श्रेष्ठि–देवचन्द्र लालभाई–जैनपुस्तकोद्धारे–ग्रन्थाङ्कः १६.

याकिनीमहत्तरासूनुश्रीहरिभद्रसूरीश्वरविनिर्मितः

न्यायविशारद–न्यायाचार्यश्रीमद्‌यशोविजयोपाध्यायविरचितया स्याद्वादकल्पलताभिधानया टीकया विभूषितः

शास्त्रवार्तासमुच्चयः ।

(एतद्रूपोऽयं प्रथमो विभागः)

शास्त्रविशारदजैनाचार्य-श्रीविजयधर्मसूरीश्वरपादाम्भोजभ्रमरेण श्रेष्ठित्रिकमचन्द्रात्मजेन
न्यायतीर्थपदवीधारिणा पण्डितहरगोविन्ददासेन संशोधितः।

'झवेरी नगीनभाई घेलाभाई' इत्यनेन (एतद्भाण्डागारस्यैकतमेन कार्यवाहिणा) प्रकाशितः ।

Rs 2–0–0.] (अस्याः पुनर्मुद्रणाद्याः सर्वेऽधिकाराः एतद्भाण्डागारकार्यवाहकाणामायत्ताः स्थापिताः) [प्रति ५००.

वीरसंवत् २४४०. विक्रमसंवत् १९७०. ईसु १९१४.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वोपज्ञवृत्तिसमावृतो वर्त्स्यति
आविर्भावयिष्यते द्वितीयोऽंशः

Printed 1 to 432 by Harakhchand Bhurabhai in the "Dharmâbhyudaya" Printing Press, Benaras.

Title, Preface, Index etc. printed by R. Y. Shedge in the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay.

Published by Shah Naginbhai Ghelabhai Javeri, 325, Javeri Bazar, Bombay.

(All Rights Reserved by Trustes of the Fund.)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Sheth Devchand Lalbhai Jain Pustakoddhár Fund Series. No. 16.

PREFACE.

Jain literature, comprising as it does almost all the branches that are characterestic of ancient Indian literature, holds no insignificant niche in the gallery of that literature. It is considerable even as it is at present, and was more so in former times. This is not the proper place to enumerate the great writers and their works that constitute the glory of that literature. The fact that the Jain writers had flourished in great abundance in times gone by, is evident from the vast stock of literature that has survived to this day, though it is yet in an unexplored state. Their eminence in subject matter as well as language is manifest to those who are conversant with it.

Along with Indian literature at large, Jain literature too has been a participator in the unhappy fate it met with at the hands partly of alien bigotry, and partly of mutual religious jealousy, and from the peculiarities of the climate. There was a time when there was no other alternative to secure the very existence of such literature but that of burying it in subterranean archives. The very method employed for the safety of the works became later on instrumental in further diminishing the stock,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

and that at a time when there was not the least chance of its being further enriched. Those upon whom had fallen the task of being the hereditary custodians of such collections, had inherited the traditions of their forefathers, *viz.*, those of not suffering any part of such collection to see the rays of the Sun, lest they might be deprived of them, and the works most dear to them be destroyed by the assailants. It is very strange indeed that these traditions are alive even at this day when there is peace all round, and when the time is most propitious for the development of literature. Fire even has contributed its quota to the destruction of the records. Add to these the all round degeneration among the followers of the faith, when far from the prospects of further expansion, the faith was in imminent danger of being extinct. It was during this time that more attention was paid to the performance of external rites and ceremonies, and practically nothing was done in the direction of education and literature and the stirring up of the inner spirit of faith. It is only very recently that a practical revival of a salutary character is visible. Owing to circumstances above mentioned, the literary results of the arduous labour and the great learning of the Âchâryas and the Sâdhus of the faith, could not be made accessible.

It may perhaps not be out of place here to give in short, the history of the fund that has led to the publication of the series. The *late Sheth Devchand Lalbhai Javeri*, in whose memory this fund

Jain Education International For Private & Personal Use Only www.jainelibrary.org

has been inaugurated, left by his will a sum of Rs. 45,000 along with other sums to be spent in various other matters, to be devoted to some benevolent purpose. This amount was further enhanced by a sum of Rs. 25,000 set apart by *Gulabchand Devchand Esq.*, to be spent in some good purpose in the memory of the said *Sheth Devchand Lalbhai*. It was at the advice of *Pannias Shree Ânanḍ Sâgar Gani* that these sums which made the original funds in Trust, were amalgamated, and the present Trust was inaugurated. At present the funds of this Trust amount to about Rs. 100,000 the original being further enhanced by the property of "*Bai Vijkore*" the deceased daugther of the said Sheth Devchand Lalbhai, which was directed to be made over to this Trust by her. The object of this Trust is to devote the interest of the funds for the preservation and the development of "*the Jain Shwetamber religious literature.*"

This work was composed in the year 1055 of the Mahâveera Era and the year 585 of the Vikrama Era. The author of this small work, which consists of 700 verses, was the great impartial preceptor, *Shrimad Haribhadra Âchârya* who has set up his ideal as follows:—

"पक्षपातो न मे वीरे, न द्वेषः कपिलादिषु;
युक्तिमद्वचनं यस्य, तस्य कार्यः परिग्रहः."

Jain Education International For Private & Personal Use Only www.jainelibrary.org

The author has dealt out equal justice to all schools of thought, which can be evidently seen from the very first expository sentence of the work, which runs as follows:—

"यं श्रुत्वा सर्वशास्त्रेषु, प्रायस्तत्त्वविनिश्चयः। जायते द्वेषशमनः"

We have in our possession a small yet elegant commentary composed by the great Âchârya himself, which we are shortly going to publish as the second part of this work. But, we present to our more thoghtful readers a lucid commentary named, 'स्याद्वादकल्पलता' written by *Nyâyâchârya Yashovijaya Upâdhyâya.*

We had a mind to publish the biography of *Shrimad Haribhadra Âchârya* but the want of time has forced us to give up the idea for the present. We shall, if possible, lay it before our readers in the second part of this work.

We have got this work prepared by *Pundit Hargovinddas Trikamchand Shah*, a scholar of न्याय and an ex-student of the *Shree Yashovijay Pâthashâlâ of Benares.*

We express our deep and sincere indebtedness to the following for providing us with the original manuscripts of this work :—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Pannias Shree Siddhivijaya, Pannias Shree Ânandsâgara, Yoganishtha Shree Buddhi-Sâgara and Javeri Bhogilal Tarachand a trustee of *Dehlâ's Upâshraya* of Ahmedabad, and others.

We are glad in laying this work before the appreciative public as "No. 16th" of our series.

JAVERI BAZÂR,
BOMBAY.
November, 1913.

NAGINBHAI GHELABHAI JAVERI,
for the Trustees of
The Sheth Devchand Lalbhai Jain Pustakoddhâr Fund.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रस्तावना ।

बुद्धः शुद्धो न शुद्धोदनतनयनयो नास्तिको नास्तदोषो
नो न्याय्यो न्यायमार्गो विमलमतिमता नापि वैशेषिकी दृक् ।
प्रेक्षाक्षेत्रं न सांख्यं न सततमहतं शासनं जैमिनीयं
गम्भीरप्रौढतर्के विलसति सति सद्वाङ्मये हारिभद्रे ॥ १ ॥

एतस्य सांप्रतमत्रभवतां भवतामभिमुखीकर्तुं प्रस्तुतस्य ग्रन्थस्य विनिर्माता स एव **श्रीमान् हरिभद्रसूरिः**, यस्य द्विजकुललब्धजन्मनोऽपि, अभिनिविष्टबुद्धीनां स्वप्नेऽप्यसुनिर्वहया ज्ञानाभिमानाविर्भूतया प्रतिज्ञया 'दूषणान्यपि तत्तत्कारणकलापकलितानि भूषणत्वेन परिणमन्ते' इत्यबाधितसिद्धान्तमिव सत्यापयतः समवाप्तभगवदर्हद्धर्मस्य तत्तत्प्रभावककार्यप्रादुर्भावकतयाऽर्हच्छासनसौधावष्टम्भस्तम्भत्वेन चतुश्चत्वारिंशदधिकाया ग्रन्थानां चतुर्दशशत्या विधायकत्वेन च समुपलब्धात्मलाभा सुकीर्तिनर्तकी जगद्रङ्गमण्डपेऽद्य यावद् नरीनृत्यते ।

पूर्वस्मिन्ननेहसि षट्स्वपि दर्शनेषु स्वस्वदर्शनग्रन्थप्रणयनपद्धतिरधिकारिवर्गभेदेन प्रायो विभागत्रयविभक्ताऽभवदिति विभाव्यते;—(१) गद्याकारेण "अल्पाक्षरमसंदिग्धम्०"[1] इत्यादिलक्षणलक्षितसूत्रसमूहशालिनी, (२) पद्यप्रकारेणानुष्टुब्जालवृन्दात्मना कारिकामयी, (३) गद्यपद्य-

---

१ "अल्पाक्षरमसंदिग्धं सारवद् विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥ १ ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मयोभयात्मा गद्यबहुला पद्यप्रचुरा वा प्रकीर्णा च । तत्राद्यायां निजाभीष्टतत्त्वस्वरूपमात्रप्रकाशनम् [illegible] प्रकटतया वा क्वचिदपरसिद्धान्तापकर्षसूचनं वा प्रस्तूयते । द्वितीयायां युक्तिसूक्तिविभूषितया किञ्चिद्विस्तृतपद्धत्या पराभिमतमन्तव्यनिराकरणम्, स्वाभीप्सितानां च तेषां स्फुटीकरणं विधीयते । तृतीयस्यां पुनरेकमेव कञ्चित् प्रतिनियतविषयम्, बहून् वा तान् कक्षाद्वयव्युत्पन्नानधिकारिणोऽपेक्ष्य यावद् बुद्धिबलोदयं परपक्षप्रतिक्षेपः स्वपक्षसिद्धिश्च सुसूक्ष्मविचारभरावगाहिन्या प्रतिपादनप्रणाल्या प्रकटीक्रियते ।

सत्यप्यस्मिन् श्रेणित्रितये प्रथमतः प्रपठनीयान् प्रथमकोटिप्रविष्टान् ग्रन्थानधीतवतः, व्युत्पत्तिं च तेष्वासादितवतः, अथ च ततोऽपि विशेषमभिलषतोऽधिकारिणः समाश्रित्य परोपकारसारोऽयं ग्रन्थकारो द्वितीयपद्धतिमलंकुर्वन्तं संस्कृतपद्यात्मकं ग्रन्थमिममनुष्टुप्छन्दसां सप्तभिः शतैर्विनिरमास्त, नाम चास्य 'प्रमातारः, समवगम्य ग्रन्थनाम्नोऽर्थशून्यतां स्वप्रवृत्तिप्रतिबन्धं मा विधिषत, प्रमाय वा याथार्थ्यमिन्द्रगोपादिष्विवातथ्यनामस्वन्यग्रन्थेष्विव ग्रन्थेऽस्मिन् प्रवृत्तिमारभमाणाः फलावाप्तिपराङ्मुखा मा जनिषत, मा तनिषत च संजातानाश्वासास्तत्कर्तरि विप्रतारकत्वकलङ्कशङ्काम्' इति सुदूरमवलोकमानः सुशकानुष्ठानयोरप्यर्थशून्याऽयथार्थयोराह्वयोर्व्यवच्छेदेन सततमौचितीमावहत् प्रतिपन्नार्थतथात्वाव्यभिचारित्वं "शास्त्रवार्तासमुच्चयः" इति समयुङ्क्त, व्यभक्त च ग्रन्थमेनं स्तबकाकारेष्वेकादशसु विभागेषु[१] । एतेन 'एतेनैव ग्रन्थकृताऽन्येऽपि दर्शनविषयमिममधिकृत्यानेकेऽनेकान्तजयपताकादयोऽद्यापि प्रतीतिपथमवतरन्तो ग्रन्था अग्रन्थिषत, इति तत एव विषयस्यास्य निर्णयात् पिष्टपेषणमिवानुकुर्वन्नयं

१ "शतानि सप्त श्लोकानामनुष्टुप्छन्दसां कृतः । आचार्यहरिभद्रेण शास्त्रवार्तासमुच्चयः" (स० ११, श्लो० ५६)
इति ग्रन्थकर्त्रैव ग्रन्थान्ते प्रतिपादनात् ।

२ यद्यपि मूलग्रन्थे स्वोपज्ञटीकायां च नायं विभाग उपलब्धचरः, तथापि स्याद्वादकल्पलतायां तद्विलोकनेन ग्रन्थकृतोऽपि स विभागोऽनुमत इति संभाव्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रन्थः कथमिव साफल्यमश्नुवीत ?' इत्यारेकापि रिक्तविषयीकृता, तेषां ग्रन्थानां तृतीयकोऽभ्युक्तलक्षणलक्षितत्वेन विजातीयविषयसंदर्भगर्भत्वात्। न खलु तत्रोपनिबद्धान्येव प्रतिपत्तव्यवस्तून्यत्र प्रतिपाद्यत्वेनाध्यक्षत, येनास्य निरर्थकतामुक्तार्थतां वा संशयीरन्, स्वप्रवृत्तिं चात्र भवन्तीं निरुन्धीरन् धीराः, अतिरिक्ताधिकारियोग्यत्वादस्य ।

इदमत्र किञ्चिद् विचार्यमाणं न नाम नोचितीभवितुमर्हति यदुत, ईदृशीमेव कर्कशतर्कपरिष्कृतपद्धतिमादधद्भ्यः, आश्रयद्भ्यश्चार्हतमत-विभिन्नानि तानि तानि स्वमतमन्तव्यानि, माध्यमककारिका[1]–श्लोकवार्तिकादिभ्यः[2] प्रबन्धनिबन्धेभ्यः सामान्यतो विशेषतश्च कर्तृगोचरं कृतिविषयं च कं कमतिशयं ग्रन्थेऽत्र विलोकामहे ? इति । विचारश्चायमत्र स्थलसंकोचेन न विस्तरतः शक्यानुष्ठानः, संक्षेपतः पुनर्निरीक्षितोभयग्रन्थानामथ च ताटस्थ्यमातिष्ठानानामयमेवार्हति निर्बाधो निर्णयः, तथाहि—माध्यमकादिकर्तारः स्वपक्षसिद्धिमुपलिप्सवः परपक्षप्रतिक्षेपाविनाभाविनीं च तां निजमनसि विनिश्चिन्वन्त इव यथा तथा परपक्षप्रतिवादमेव लक्ष्यकार्षुः, अकार्षुश्चान्यशास्त्राणां तत्कर्तॄणां च महात्मनां मत्सराध्मातमानसा इवापशब्दैर्दूरूपप्रतिरूपकादिभिरवहेलनाम्[3], इति न तादृशादरभाजनं भवन्ति मध्यस्थानाम् । अयं पुनरनूनज्ञानविभवस्तद्विपरीतलक्षणो विचक्षणो ग्रन्थकारः 'न हि रागद्वेषोपप्लुतमानसैर्निर्मीयमाणो विचारः स्वीकर्तव्यताकोटिमुपढौकते' इति स्वहृदयमिवाविर्भावयन्, अन्यत्कुर्वन् परदर्शनमन्त-व्यानि, आदरदृष्ट्या विगाहमानः परतीर्थिकशास्त्राणि, बहु मन्वानश्च तत्प्रणेतॄन् विपश्चितः, 'अनुसंधेयानि महात्मनां वचनानि' इत्युक्तिमाश्रयन्,

---

१ नागार्जुनप्रणीतः शून्यवादनिरूपणपरोऽयं ग्रन्थः । २ कुमारिलभट्टविहितो जैमिनीयकतिपयसूत्रव्याख्यानरूपः पूर्वमीमांसादर्शनग्रन्थः ।

३ "यस्य दर्शनतेजांसि परवादिमतेन्धनम् । दहन्त्यद्यापि लोकस्य मानसानि तमांसि च ॥ १ ॥"

इत्यादिमाध्यमकारिकाटीकाकारचन्द्रकीर्त्यादिभिः प्रणीतैः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा परदर्शनानि विगतदृष्टेष्टविरोधादिकल्मषाणि भवितुमर्हन्ति तथा पौर्वापर्येणानुसंदधानः, सन्न्याय[illegible]ातभगवदर्हद्दर्शनसंगतिशालीनि च तानि विदधानः, विरलमन्यत्रोपलभ्यमानाभिर्युक्तिततिभिः संपादयति निर्बाधं स्वमन्तव्यं सिद्धिसौधाध्यासधैर्यधारि सौन्दर्यभाजा वचनविन्यासेन । प्रत्यलश्चैतन्निदर्शनाय

“एवं प्रकृतिवादोऽपि विज्ञेयः सत्य एव हि । कपिलोक्तत्वतश्चैव दिव्यो हि स महामुनिः ॥” इति श्लोकपर्यन्तः सांख्यमताधिकारः । तत आदधात्ययं ग्रन्थः सर्वेषामपि सर्वदर्शनज्ञानमुपलिप्सूनामालोकनीयताम् , आवहति विश्वेषामपि द्विधाक्लेशोद्विग्नानां विश्वसनीयताम्, अर्हति च समेषामपि तटस्थानामुपादेयतामिति ।

यच्च दर्शनमेव सकलम् , तदंशो वा कश्चन तादृशबाधाद्याहितत्वेन न कथञ्चिदपि संगतिमाप्नोति, तस्य प्रतिक्षेपोऽप्यत्र तेन प्रौढिमानमश्नुवानेन तर्कसंपर्केण निरूपयांबभूवे, यं प्रज्ञाविषयीकुर्वता मध्यस्थेन संख्यावता ग्रन्थकर्तुः शेमुष्युन्मेषं परां स्तुतिमनुपनीय न स्थैर्यमाधातुं शक्यते; यावता तदितरैर्ग्रन्थप्रणयिभिः स्वपक्षसिद्धये विरच्यमाना युक्तिप्रबन्धाः प्रायः प्रतिवादिप्रतिपादितप्रतिद्वन्द्वितर्कोपहन्यमाना दोषपङ्ककलङ्कितात्मानः सन्तः प्रख्यापयन्ति तद्ग्रन्थितॄणां स्वाभिमताभिनिवेशसहकृतं विमलविज्ञानविरहम्; सत्यापयन्ति “[1]आग्रही बत निनी[2]षति युक्तिम्” इत्यु[3]मास्वातिवाचकेनोच्चानं सूक्तम् , प्रतापयन्ति चेत्थं मनस्विनां वितथवादमसहमानानि मनांसि; यथा श्लोकवार्तिके चोदनासूत्रे

---

१ आग्रही बत निनीषति युक्तिं तत्र, यत्र मतिरस्य निविष्टा । पक्षपातरहितस्य तु युक्तिर्यत्र, तत्र मतिरेति निवेशम् ॥ १ ॥

२ नेतुमिच्छति न तु शक्नोतीति ध्वनिः । ३ यदाह ज्ञानकलशः संदेहसमुच्चये–“उक्तं चोमास्वातिवाचकैः” “आग्रही०” ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"चोदना जनिता बुद्धिः प्रमाणं दोषवर्जितैः । कारणैर्जन्यमानत्वाल्लिङ्गाप्तोक्त्यक्षबुद्धिवत् ॥"

इति श्लोकोक्तस्तर्कस्तत्प्रतिद्वन्द्विना

"चोदनाजनिता बुद्धिरप्रमा गुणवर्जितैः । कारणैर्जन्यमानत्वादलिङ्गाप्तोक्तबुद्धिवत् ॥"

इत्यनेन निरस्यमाणः; यथा वा

"दोषाः सन्ति न सन्तीति पौरुषेयेषु चिन्त्यते । वेदे कर्तुरभावात्तु दोषाशङ्कैव नास्ति नः ॥"

इत्ययमपि

"गुणाः सन्ति न सन्तीति पौरुषेयेषु चिन्त्यते । वेदे कर्तुरभावात्तु गुणाशङ्कैव नास्ति नः ॥"

इत्यनेन प्रतिहन्यमानः । इत्यलं बहुना प्रसङ्गेन ।

---

१ कर्तृपुरुषाश्रयगुणदोषनिबन्धने हि शब्दधियः प्रामाण्याप्रामाण्ये जगति विनिश्चिते, इति कर्त्रभावे वेदे तद्बुद्धेः कथमिव प्रामाण्यं भवेत् ? इति प्रेर्यस्य परिजिहीर्षया तत्र पुरुषकर्तृकत्वाभावेन तदाश्रयदोषाणामपि निराधाराणामनवस्थितेर्दोषाभावनिमित्तं स्वतस्तत्प्रामाण्यमभिवाञ्छता कुमारिलभट्टेन तत्साधनाय पद्यमिदमभिहितम्। एतच्च प्रतिवादिभिः सुगतसुतादिभिर्वेदे कर्तृपुरुषव्यावृत्तौ तदाश्रयगुणानामप्यभावेन गुणाभावकारणकमप्रामाण्यमासञ्जितवद्भिस्तमेव श्लोकं प्रतिकूलतर्केणोपस्कृत्य निराकृतम् । एवं "दोषाः सन्ति०" इत्येतदपि "गुणाः सन्ति०" इत्यनेन; "दोषाभाव एव गुणः" इति च "गुणाभाव एव दोषः" इत्येतेन; "गुणानामेव संसारेऽसत्त्वम्" इति च "दोषाणामेव सर्वथाऽभावः" इत्यमुना तत्समानतां बिभ्रता, "भावान्तरविनिर्मुक्तः" इति भट्टस्यैवोक्त्यातिशयं पुष्णता च प्रतिपक्षतर्केण प्रतिक्षिप्यमाणम् ।

२ आप्तोक्तस्यापि नाऽन्वयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्मिंश्च ग्रन्थे स्वतन्त्रदर्शनप्रवर्तकत्वेन तत्समुत्तेजकत्वेन वा प्रसिद्धानमून् प्रबन्धनिबन्धॄन् नामानि ग्राहं निरदिक्षद् ग्रन्थकारः;

(१) कपिलः (सांख्यदर्शनादिपुरुषः) स्त० ३, श्लो० ४४ ।

(२) जैमिनिः (मीमांसादर्शनाविर्भावकः) स्त० ८, श्लो० ३३ ।

(३) धर्मकीर्तिः (न्यायवादितया ख्यातो न्यायवार्तिकादिकर्ता उद्धुरो बौद्धाचार्यः) स्त० १०, श्लो० २४ ।

(४) बुद्धः (ताथागतशासनजनकः) स्त० ६, ५१, ५३; स्त० ११, १८ ।

(५) बृहस्पतिः (चार्वाकमतप्रवर्तयिता) स्त० १, श्लो० १११ ।

(६) मनुः (स्मृतिविशेषकर्ता ऋषिः) स्त० ३, १६ ।

(७) व्यासः (अष्टादशपुराणीप्रणायकतया विश्रुतो महर्षिः) स्त० १, ७५; ११, ४७ ।

ग्रन्थस्यास्य दर्शनविषयत्वात्, तत्रापि च पद्यबद्धसंदर्भत्वाद् निसर्गापतितं काठिन्यम्, इति स्वभ्यस्तवतामप्यपरनिबन्धान् नातिव्युत्पन्नप्रज्ञानां जनानामथ च संक्षेपतस्तदर्थाधिगममाकाङ्क्षतां स्वाभीप्सितनिष्पत्तये स्वल्पमपि सहकारिणमन्तरेण नान्यः कश्चन सरलः पन्था इति विज्ञाय परहितनिरतो ग्रन्थकारस्तदुपकारकरणवासितान्तःकरणः स्वयमेव पदार्थमात्रावबोधिनीं लघीयसीं टीकामपि निर्ममे, या स्तोकेनैव कालेनास्यैव ग्रन्थस्य द्वितीयविभागरूपेण प्रकटीभविष्यन्ती प्रभविष्यति तदवलोकनमनोरथरथस्थितान् कृतार्थयितुमार्थिकान् कृतिनः ।

सत्त्वेऽपि तस्या दिङ्मात्रप्रदर्शनप्रवणत्वात्, मूलग्रन्थस्य पुनरेतस्येदृशासदृशश्लाघनीयपद्धतिप्रतिबद्धत्वेन कर्कशतर्कसंपर्काङ्कितत्वेन चातिसूक्ष्मगभीराशयपरिपूर्णत्वाद् याथार्थ्येन भावार्थमात्मसाच्चिकीर्षन्तोऽपि सन्तो न समर्थीभवन्ति संपादयितुमात्मीयाभिमतमर्थम्, इत्युपचिकीर्षमाणस्तान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विस्तरतो ग्रन्थाशयमधिगमयितुं व्यररचत् सार्धचतुर्दशश्लोकसहस्रमानां स्याद्वादनिर्बाधसिद्धान्ताप्राप्तपूर्वफलास्वाददायकत्वेन यथार्थनामां स्याद्वादकल्पलताभिधानां महीयसीं टीकां वाचककदम्बकावतंसः **श्रीमान् यशोविजयो महोपाध्यायः,** यस्य शैशवादेव गृहीतजिनपतियतिव्रतस्य निजनिष्प्रतिमप्रतिभाप्राग्भारेण क्रमशो विगाहितागाधपारगागमापारपारावारस्य, द्वादश वर्षाणि वाराणसीमधितष्ठुषः पुनरधीतप्राच्यनव्यप्रणालीकनिःशेषदर्शनसिद्धान्तसंघातस्य स्वीयानवद्यविद्याविभवविस्मितैर्वाराणसेयविबुधविसरैः 'न्यायविशारद'—इत्याद्युपनामभिर्विभूषितं नाम ।

टीकाकृतः सत्तासमयस्तेनैव निजेषु ग्रन्थेषु[1] स्वयमुल्लिखितत्वेन, अन्यैरपि[2] बहुभिः प्रमाणैर्निष्टङ्कितत्वेन च विक्रमात् सप्तदशशताब्दीपश्चाद्भागरूपोऽष्टादश्याश्च तस्याः पूर्वतनो विनिर्णीत एव । न्यायविशारदेनानेन तत्तद्विषयान् हृदयङ्गमशैल्या प्रतिपादयन्तो भूयांसो ग्रन्था विरचया-

---

१ यथा गूर्जरभाषामये वीरस्तवने;—

"इंदलपुरमां रहिय चोमासुं धर्मध्यान सुख पायाजी । संवत् सत्तर तेत्रीशा (१७३३) वर्षे विजय दशमी मन भायाजी ॥"

२ श्रीमानविजयोपाध्यायानां धर्मसंग्रहस्तेन परिशोधितः, यथाहुस्त एव तत्प्रशस्तौ;—

"सत्तर्ककर्कशधियाखिलदर्शनेषु मूर्धन्यतामधिगतास्तपगच्छधुर्याः । काश्यां विजित्य परयूथिकपर्षदोऽभ्या विस्तारितप्रवरजैनमतप्रभावाः ॥ १० ॥
तर्कप्रमाणनयमुख्यविवेचनेन प्रोद्बोधितादिममुनिश्रुतकेवलित्वाः । चक्रुर्यशोविजयवाचकराजिमुख्या ग्रन्थेऽत्र मय्युपकृतिं परिशोधनाद्यैः ॥ ११ ॥"

धर्मसंग्रहनिर्माणसमयश्च

"वर्षे दिग्गजगुणमुनिचन्द्र (१७३८) प्रमिते च माधवे मासे । शुद्धतृतीयादिवसे यत्नः सफलोऽयमजनिष्ट ॥ १२ ॥"

इति प्रशस्तिपद्ये स्वयं ग्रन्थकृता निरूपितः । एवं

"धत्ते न्याययशा यशोविजयतां श्रीवाचको नामनि साहाय्याद् बुध ऋद्धिनामविमलः संवेगमार्गस्थितः"

इत्यादीनि विबुधविमलसूरिरचितसम्यक्त्वपरीक्षाद्युक्तान्यपि दर्शितटीकाकृत्समयसंवादकप्रमाणानि प्रसिद्धानि, स्थलाभावेन तु नात्र निदर्शितानि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्चक्रिरे, यैर्लोचनगोचरसंचारिभिः कर्तृणां कृत्स्नविषयव्यापकं महत्त्वख्यापकं च पाण्डित्यं स्वयं पर्यचैषुः, परिचिन्वन्ति, परिचेष्यन्ति च तदवगाहनकृतश्रमा इति नात्र बहु वक्तव्यमस्माकम्; येषु सांप्रतमपि मुद्रिताकारेण लिखितादर्शरूपेण वामी उपलभ्यन्ते;—

(१) अध्यात्ममतपरीक्षा सटीका (२) अध्यात्मसारः (३) अध्यात्मोपनिषत् (४) अष्टसहस्रीविवरणम्
(५) आध्यात्मिकमतखण्डनं सटीकम् (६) उपदेशरहस्यं सवृत्ति (७) कर्मप्रकृतिटीका (८) गुरुतत्त्वनिर्णयः सटीकः
(९) जैनतर्कपरिभाषा (१०) ज्ञानबिन्दुः (११) ज्ञानसारः (१२) देवधर्मपरीक्षा
(१३) द्वात्रिंशद्द्वात्रिंशिका (१४) नयप्रदीपः (१५) नयरहस्यम् (१६) सटीको नयोपदेशः
(१७) न्यायखण्डनखण्डखाद्यम् (१८) न्यायालोकः (१९) प्रतिमाशतकं सवृत्तिकम् (२०) भाषारहस्यं टीकासहितम्
(२१) मार्गपरिशुद्धिः (२२) यतिलक्षणसमुच्चयः (२३) वैराग्यकल्पलता (२४) षोडशकवृत्तिः
(२५) सामाचारीप्रकरणम्

अनुपलभ्यमाना अपि सांप्रतम्, अस्यामेव टीकायां स्वकर्तृकत्वेन प्रत्यभिज्ञायमानाः, इतस्ततः श्रूयमाणा वैते;—

(१) अध्यात्मोपदेशः (२) अनेकान्तमतव्यवस्था (३) आत्मख्यातिः (४) चतुर्विंशतिजिनस्तुतिः
(५) छन्दश्चूडामणिटीका (६) ज्ञानसारचूर्णिः (७) ज्ञानार्णवः (८) तत्त्वविवेकः
(९) त्रिसूत्र्यालोकविधिः (१०) पातञ्जलयोगसूत्रचतुर्थपादवृत्तिः (११) प्रमाणरहस्यम् (१२) मङ्गलवादः
(१३) मार्गशुद्धिपूर्वार्धम् (१४-१५) लताद्वयम् (१६) विचारबिन्दुः (१७) विधिवादः
(१८) शठप्रकरणम् (१९) सिद्धान्ततर्कपरिष्कारः (२०) स्याद्वादरहस्यम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च, 'रहस्य–पदाङ्किताास्तेन शतमेकं ग्रन्थाः प्राणायिषत इत्यपि श्रूयंते । एतच्च यदि

"पूर्वं न्यायविशारदत्वबिरुदं काश्यां प्रदत्तं बुधै-
र्न्यायाचार्यपदं ततः कृतशतग्रन्थस्य यस्यार्पितम् ।
शिष्यप्रार्थनया नयादिविजयप्राज्ञोत्तमानां शिशु-
स्तत्त्वं किञ्चिदिदं यशोविजय इत्याख्याभृदाख्यातवान् ॥"

इति तर्कभाषाया ग्रन्थकृद्वाचमेव संवादरूपामनुभवद् भवेच्चेत् प्रमाणतासंसर्गि, शक्नोति भवितुम् । मा भूद् वा रहस्यपदलाञ्छितानां शतस्य ग्रन्थानामियं संवादः, इतरसहकृतानां तु तेषां ग्रन्थकृत्कृतग्रन्थानां शतत्वं प्रमाणदार्ढ्येन केन निरोद्धुं तीर्यते ? ।

· दर्शितनामसु च पुस्तकेषु सर्वाणि गीर्वाणवाणीमलङ्कृतवन्ति, त्रिचतुराणि तु प्राकृतगाथाबद्धमूलान्यपि प्रायः संस्कृतस्वोपज्ञटीकाभिरन्वितानि । एतदतिरिक्तानि टीकाकाररचितानि गूर्जरभाषायामप्यनेकानि ग्रन्थरत्नानि स्तुति-चरित्र-विचारो-पदेशप्रभृतीन् विविधविषयान् पद्यबहुलेन गद्येन सरसमुपवर्णयमानानि, यानि महात्मनोऽस्य संस्कृतादिभाषानभिज्ञजनोपकारकर्त्रीं करुणां देशभाषानुरागं च निवेदयितुं प्रभूष्णूनि, अद्यत्वेऽप्युपलभामहे ।

यद्यप्येतेषु टीकाकाररचितेषु संस्कृतप्राकृतग्रन्थेषु कतमश्चादिमः, कतमश्चान्तिम इति विभागशः प्रत्येकं पौर्वापर्येण विनिश्चयो न शक्यते

---

१ भाषारहस्यस्वोपज्ञवृत्तौ प्रथमगाथापातनिकास्थम्–"रहस्यपदाङ्किततया **चिकीर्षिताष्टोत्तरशतग्रन्थान्तर्गतप्रमारहस्य–स्याद्वादरहस्यादिसजातीयं** प्रकरणमिदम्" इतीदमुपजीव्य संभवतः परैरुक्तं शतकविधानं श्रुतिकर्म ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्तुम्, सर्वत्र विरचनासमयस्य टीकाकृता प्राचीं पद्धतिमनुसरताऽनुपात्तत्वेन तद्विनिगमकहेतुविरहात्; इतश्चाप्येतद् निर्णेतुमशक्यम्, उक्तवदखिलतद्ग्रन्थानामनासादनेन, उपलब्धव्यानामपि कृत्स्नानां तत्कृतीनां समूलचूलमवलोकनावकाशस्यासंभवात्, संभवेऽपि वा केनचनेदन्तनेन पुरातनेन वा धीधनेनाऽनादृतत्वात्, आदृतत्वेऽपि वा तदनुसंधानोपलब्धेरनुपलब्ध्यादिपराहतत्वात्; यदि हि ग्रन्थग्रन्थितृभिः पूर्वपूर्वप्रणीतप्रबन्धानामभिसंधिप्रसङ्गस्तदुत्तरोत्तररचितग्रन्थेष्ववाप्तः स्यात्, अवाप्तौ च तत्र नाम गृहीत्वान्यथा वोल्लेखेन पूर्वग्रन्थस्यानुसंधिर्विहितः स्यात्, तादृशनैपुण्यपूर्णश्च कश्चिदपि विपश्चित् तदन्वेषणे प्रारब्धावसितपरिश्रमः प्रादुःष्यात्, स्यात् तदा तदाशाऽभीष्टफलशालिनी; एतच्चासंभवरहितमपि न सुसंभवमिति; तथापि यदि प्रकृतटीकाग्रन्थो ग्रन्थकृद्ग्रन्थेष्वन्तिमतमः स्यात्, न प्रायशः किञ्चिद् बाधकमुत्पश्यामः, पश्यामः पुनरिह साधकद्वयम्;— समस्तेऽपि प्रस्तुते मूलग्रन्थे सुगमतममप्येकं काव्यं टीकारहितमनुक्त्वा प्रतिस्तबकप्रान्तं गुर्वादिपरिचायकं जघन्यत एकमप्यनवद्यपद्यमनुक्त्वा च स्थितिमनादधता टीकाग्रन्थमेनं विदधतोपलब्धस्यापि किञ्चिद्रहस्यशालित्वेनावश्यटीकनीयस्याप्यन्त्यवृत्तत्रितयस्य वृत्त्यकरणान्यथानुपपादः, गुर्वादिप्रशस्तेः सततमौचितीमञ्चति ग्रन्थान्तभागे तदनुपादानाविनाभावश्च । साधकसिद्धिश्च प्रभूतेषु प्रत्नन्नूतनेष्वन्त्यमूलवृत्तत्रितयीविभूषितेष्वादर्शपुस्तकेष्वपि तदनुपलब्धिबलेन संभावितचरीह द्रष्टव्येत्यलं प्रपञ्चेन ।

अस्मिंश्च टीकाप्रकाण्डे क्वापि खण्डनीयत्वेन, क्वचित् संवादित्वेन, कुत्रापि प्रसङ्गदार्ढ्याधायकत्वेन च समुपन्यस्ता इतरे ग्रन्थकर्तारः, महतीं संख्यामाख्यन्तो ग्रन्थाश्च बाढं परिचाययन्ति वाचकमस्तकावतंसकस्य टीकाकारस्यास्य परमवधिमधिगतं विविधविषयविषयकं सावगाहनं प्रतिभासाम्राज्यम्, संसाधयन्ति टीकाया एतस्या विषयकमनीयतां महत्त्वपूर्णत्वं च परिपुष्णन्तो विशेषतो जिज्ञासुभिरादरणीयताम्, द्रढयन्ति च निपुणतरमवलोकिनामैतिह्यप्रियाणां प्रागुपवर्णितग्रन्थप्रणेतृसत्तासमयविनिर्णयम्, इति महोपयोगितामवधारयता नामनिर्देशं निर्दिष्टास्ते द्वितयेऽप्यक्षरा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नुक्रमेण समुच्चित्य विष्वग्भावेनेहैवान्यत्र प्रकटीकृताः । ये पुनः परा-ऽपरा-ऽन्य-किमादिभिरभिधाभिर्ग्रन्थकृता टीकाकृता च स्मृतिमनायिषत, ते स्पष्टतया विशेषवाच्यमनभिदधाना न तादृशीमावश्यकतामपेक्षांबभूवांस इत्युपेक्षांबभूवानाः ।

एवं च स्याद्वादकल्पलताविभूषितस्यैतस्य शास्त्रवार्तासमुच्चयस्य संशोधनकर्मणि व्याप्रियमाणः सटीकानि यान्यादर्शपुस्तकानि येषां महात्मनामुपालप्सि, तानि, तेषां धन्यवादार्पणपूर्वकं नामानि च कृतज्ञतामुररीकुर्वाणः प्रकाशयामि;—

(१) प्रसेधकद्वारा राजनगर (Ahmedabad) स्थस्य "डेला"–भाण्डागारस्य संबन्धि, प्राचीनम्, शुद्धप्रायम्, द्वापञ्चाशत्पत्र्यात्मकमपूर्णम्, **क**संज्ञितम् ।

(२) मुनिराजश्रीमद्बुद्धिसागराणाम्, पुरातनम्, नातिशुद्धम्, आदितः संपूर्णमपि प्रथमादर्शाप्राप्तस्थाननिवेशेन तत्संज्ञयैव परिभाषितम्। प्रान्तभागे "१५००० सर्वसंख्या लेकनपाटविमो कलाणमस्तु" इत्युल्लेखसमन्वितम् ।

(३) अस्मद्गुरुवर्यशास्त्रविशारदजैनाचार्यश्रीमद्विजयधर्मसूरीश्वराणाम्, नवीनम्, नात्यशुद्धम्, प्रथमतः प्रारभ्य द्विसप्ततिपत्रीरूपम्, **ख**संज्ञितम् ।

(४) पंन्यासश्रीवीरविजयगणीनाम्, न बहशुद्धम्, नवीनम्, परिपूर्णमपि तृतीयपुस्तकशेषांशस्थानापन्नतयोपरितनसंज्ञयैव परिगणितम् । "संवत् १९६० रा मिति ज्येष्ठवद ५ शनिवासरे प्रथमपौरे लिपीकृतम्" इत्यन्तभागोपन्यस्ताक्षरम् ।

(५) पंन्यासश्रीसिद्धिविजयगणीनाम्, प्रकाशकद्वारा संप्राप्तम्, नवीनम्, अशुद्धम्, संपूर्णम्, **ग**संज्ञितम् ।

(६) प्रकटयितृद्वारा समासादितम्, नवीनम्, अशुद्धम्, **घ**संज्ञितम्; प्रान्तभाग एतदुल्लेखाङ्कितम्—"संवत् १९६१ ना वर्षे भादरवा सुदि ८ शनिश्चरे शुभं भवतु कल्याणमस्तु" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७) प्रकाशकद्वारोपलब्धम्, राजनगरडेलाभाण्डागारस्य प्राचीनम्, अत्यशुद्धम्, ङसंज्ञितम्।

तदेवमिमानि सप्त हस्तादर्शपुस्तकानि, अन्यानि चानुषङ्गापेक्षितानि तान्युपयुज्य, अत्याज्यपाठभेदानुपदर्शितसंज्ञाभिरधः संन्यस्य, प्रसङ्गापादितप्राकृतपाठान् संस्कृतकृत्या परिष्कृत्य, विषमस्थलानि टिप्पण्यादिना विशदीकृत्य, कारिकाश्लोकाक्षरानुक्रमण्या विभूष्य च महीयसा प्रयासेन संपादितेऽस्मिन् सवृत्तिके ग्रन्थे, उररीकुर्वन्तु नयनार्पणायासममानमानसा मनस्विनः, निपुणं व्यापारयन्तु मनांसि सर्वदर्शनतत्त्वमुपलिप्सवो व्युत्पित्सवः, सूक्ष्मेक्षिकया परीक्षन्तां तीर्थमन्तव्यानां याथार्थ्यायाथार्थ्ये व्युत्पन्नाः, अक्षुण्णमुत्क्षिपन्तु युक्तिविरहकलुषितानि तानि क्षपितपक्षपाता विचक्षणाः, सततं निषेवन्तां सन्न्यायपूतं भगवदर्हद्दर्शनसुधासारसौहित्यमक्षतदक्षताः क्षेमाकाङ्क्षिणः प्रेक्षावन्तः, वितन्वन्तां चैवं परिश्रममिमं मामकीनं फलेग्रहिम्।

अन्ते, ईदृशाप्रतीकाशग्रन्थरत्नप्रकाशनतः प्रादुर्भवन्तमभ्रान्तमानन्दसंदोहं प्रकटीकृत्य, तन्निबन्धनतामश्नुवानाय **श्रेष्ठिश्रेष्ठाय श्रीयुतदेवचन्द्राह्वाय** यस्य चलाचलवस्तुतो निश्चलकुशलसंसर्गिफलमासादयतः परमार्थस्वार्थसाधकेनानन्यादृशेन वदान्यतागुणेन परिणतमिदं संपादनं भवदभिमुखीकर्तुं समर्थः समजनिषि, अनेकशो हार्दिकान् धन्यवादान् वितीर्य, सानुनयमभ्यर्थ्य च 'निसर्गदोषसहकृताः स्खलना दुर्निवाराः' इति स्वभावोपनतास्ताः क्षन्तुं प्रकृतिपवित्रचरित्रान् सज्जनान्, समाप्नोति लघीयसीमिमां प्रस्तावनाम्—

शास्त्रविशारदजैनाचार्यश्रीमद्विजयधर्मसूरीश्वरचरणारविन्दभ्रमरायमाणो

न्यायतीर्थ **हरगोविन्दः।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शास्त्रवार्तासमुच्चयमूलकारिकाणामकाराद्यनुक्रमेण सूची ।

आद्यपादः		पत्रम्	पार्श्वम्
अ.			
अगन्धजननव्यावृ-	....	१४८	२
अगम्यगमनादीनाम्	....	६९	१
अग्निज्ञानजमेतेन	....	१५३	१
अग्न्यादिज्ञानमेवेह	....	१५४	२
अचेतनानि भूतानि	....	१७	१
अज्ञो जन्तुरनीशोऽयम्	....	९१	२
अत एवागमज्ञस्य	....	४२०	१
अतः कथञ्चिदेकेन	....	१५३	२
अतः कालादयः सर्वे	....	८८	२
अतः प्रत्यक्षसंसिद्धः	....	५०	२

आद्यपादः		पत्रम्	पार्श्वम्
अतत्स्वभावात् तद्भावे	....	८२	१
अतस्तत्रैव युक्तास्था	....	१५	१
अतीताजातयोर्वापि	....	३९९	२
अतीन्द्रियार्थद्रष्टा तु	....	३८३	२
अतीन्द्रियार्थसंवादः	....	३८९	२
अतीन्द्रियेषु भावेषु	....	६७	१
अतोऽपि शुक्लं यद्वृत्तम्	....	३५५	१
अत्यन्तासति सर्वस्मिन्	....	१३५	१
अत्र चोक्तं न चाप्येषाम्	....	१४६	२
अत्रापि पुरुषस्यान्ये	....	११३	२
अत्रापि प्राज्ञ इत्यन्यः	....	३८६	२

आद्यपादः		पत्रम्	पार्श्वम्
अत्रापि ब्रुवते केचित्	....	६६	२
अत्रापि ब्रुवते केचित्	....	३५५	२
अत्रापि ब्रुवते वृद्धाः	....	३८७	१
अत्रापि वर्णयन्त्यन्ये	....	३१३	१
अत्रापि वर्णयन्त्येके	....	५१	२
अत्राप्यन्ये वदन्त्येवम्	....	२९४	२
अत्राप्यभिदधत्यन्ये	....	११९	१
अत्राप्यभिदधत्यन्ये	....	२१५	२
अत्राप्यभिदधत्यन्ये	....	२२८	२
अत्राप्यभिदधत्यन्ये	....	३४८	१
अथ भिन्नस्वभावानि	....	२८	१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः		पत्रम्	पार्श्वम्
अथान्यत्रापि सामर्थ्यम्	....	१४६	२
अथाभिन्ना न संक्रान्तिः	....	१५०	१
अदृष्टाकाशकालादि	....	३०	२
अदृष्टं कर्म संस्कारः	....	५८	१
अधिकार्यपि चास्येह	....	३९०	१
अनन्तधर्मकं वस्तु	....	४१३	१
अनन्तरं च तद्भावः	....	१३६	२
अनभिव्यक्तिरप्यस्याः	....	१८	१
अनभ्युपगमाच्चेह	....	४१०	१
अनादिकर्मयुक्तत्वात्	....	७९	१
अनादिभव्यभावस्य	...	३२७	२
अनित्यः प्रियसंयोगः	....	८	१
अनित्याः संपदस्तीव्र-	...	८	२
अनुभूतार्थविषयम्	....	११९	२
अनेकान्तत एवातः	....	२५५	१
अन्ते क्षयेक्षणादादौ	....	२१०	१
अन्ते क्षयेक्षणं चाद्य	....	२०९	२
अन्तेऽपि दर्शनं नास्य	...	१२६	१
अन्यत्वेऽन्यस्य सामर्थ्यम्	....	१९८	२
अन्यथा तत्त्वतोऽद्वैते	....	३०५	१
अन्यथा दाहसंबन्धात्	....	४१३	१
अन्यथाऽनियतत्वेन	....	८४	१
अन्यथा योग्यता तेषाम्	...	१७०	२
अन्यथा वस्तुतत्त्वस्य	....	६२	२
अन्यदेवेन्द्रियग्राह्यम्	....	४१३	१
अन्यदोषो यदन्यस्य	....	४११	१
अन्यादृशपदार्थेभ्यः	....	१६१	२
अन्ये तु जन्यमाश्रित्य	....	१९६	२
अन्ये तु ब्रुवते ह्येतत्	....	१०७	१
अन्ये त्वद्वैतमिच्छन्ति	....	२७६	१
अन्ये त्वभिदधत्यत्र	....	५४	२
अन्ये त्वभिदधत्यत्र	....	९५	१
अन्ये त्वभिदधत्येवम्	....	२१३	१
अन्ये त्वभिदधत्येवम्	....	३९८	२
अन्ये त्वभिदधत्येवम्	....	४०८	२
अन्ये त्वाहुरनाद्येव	....	२१९	२
अन्ये पुनरिदं श्राद्धाः	....	६७	१
अन्ये पुनर्वदन्त्येवम्	....	३१२	१
अन्ये व्याख्यानयन्त्येवम्	....	२०४	२
अन्येषामपि बुद्ध्यैवम्	....	७८	२
अन्योन्यमिति यद्भेदम्	....	२६२	१
अपरीक्षापि नो युक्ता	....	६२	२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः		पत्रम्	पार्श्वम्
अपोहस्यापि वाच्यत्वम्	....	४१४	२
अपौरुषेयताप्यस्य....	....	३८४	१
अप्रवृत्त्यैव सर्वत्र	....	७०	१
अबुद्धिजननव्यावृ-	....	१४८	१
अभिन्नदेशतादीनाम्	....	१३९	१
अभिप्रायस्ततस्तेषाम्	....	१०४	१
अभ्रान्तजातिवादे तु	....	४०१	२
अमूर्ताः सर्वभावज्ञाः	....	४२४	२
अयमेवं न चेत्यन्य-	....	३८६	२
अर्थक्रिया यतोऽसौ वा	....	१९८	१
अर्थक्रियासमर्थत्वम्	....	१९८	१
अर्थग्रहणरूपं यत्	....	१७७	१
अर्थासंनिधिभावेन	....	३९९	१
अशुभादप्यनुष्ठानात्	....	६८	१
अशेषदोषजननी	....	६	२
असतः सत्त्वयोगे तु	....	१३४	२
असत्यपि च या बाह्ये	....	१८७	१
असत्यामपि संक्रान्तौ	....	१५०	१
असत् स्थूलत्वमण्वादौ	....	२३	२
असदुत्पत्तिरप्यस्य	....	१४०	२
असदुत्पत्तिरप्येवम्	....	१४१	१
असदुत्पद्यते तद्धि	....	१३४	२
असाध्यारम्भिणस्तेन	....	४२०	१
अस्त्येव सा सदा किन्तु	....	५५	१
अस्त्वेतत् किन्तु तद्धेतु-	....	१८७	१
अस्थानपक्षपातश्च....	....	१९१	२
अहंप्रत्ययप्रत्यक्षे	....	४४	१
आ.			
आगमाख्यात् तदन्ये तु		६१	२
आगमादपि तत्सिद्धिः	....	३५७	२
आगमैकत्वतस्तच्च....	....	६२	१
आत्मत्वेनाविशिष्टस्य	....	५२	१
आत्मनात्मग्रहे तस्य	....	४९	२
आत्मनात्मग्रहोऽप्यत्र	....	४६	१
आत्मा न बध्यते नापि	....	११२	१
आत्मा नामी पृथक्कर्म	....	३८९	२
आदिसर्गेऽपि नो हेतुः	....	९६	१
आदौ क्षयस्वभावे च	....	२१०	१
आर्षं च धर्मशास्त्रं च	....	१०४	२
आह चालोकवद् वेदे	....	३५४	१
आह तत्रापि नो युक्ता	....	९	२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः	पत्रम्	पार्श्वम्
इ.		
इत एकनवते कल्पे	१६३	२
इत्थं न तदुपादानम्	३४	२
इत्थमालोचनं चेदम्	२७०	१
इत्येवमन्वयापत्तिः....	१६२	२
इदानीं तु समासेन	१५	२
इन्द्रप्रतारणायेदम्	५९	१
इन्द्रियग्राह्यतोऽन्योऽपि	४१३	२
इन्द्रियेण परिच्छिन्ने	१६५	२
इष्टापूर्तादिभेदोऽस्मात्	३५४	२
इष्यते न परैर्मोहात्	२३८	२
ई.		
ईश्वरः परमात्मैव	१०२	२
ईश्वरः प्रेरकत्वेन	९०	१

आद्यपादः	पत्रम्	पार्श्वम्
उ.		
उक्तं विहाय मानं चेत्	२१६	१
उच्यत एवमेवैतत्	१०	२
उच्यते सांप्रतमदः	१८४	१
उत्पादोऽभूतभवनम्	२२८	२
उत्पादोऽभूतभवनम्	२३१	२
उत्पादव्ययबुद्धिश्च....	२१४	१
उपकारी विरोधी च	१९०	२
उपदेशः शुभो नित्यम्	६	१
उपलब्धिलक्षणप्रा-	१६९	२
उपलब्धिलक्षणप्रा-	१७०	१
उपादानादिभावेन....	१४७	१
उपादेयविशेषस्य	३३४	२
उपादेयश्च संसारे	७	१

आद्यपादः	पत्रम्	पार्श्वम्
उभयोर्ग्रहणाभावे	१५१	१
ऋ.		
ऋत्विग्भिर्मन्त्रसंस्कारैः	३५४	२
ए.		
एककालग्रहे तु स्यात्	१६५	२
एकत्र निश्चयोऽन्यत्र	१२५	२
एकत्रैवैकदैवैतत्	२३८	१
एकमर्थं विजानाति	१५१	१
एकस्तथा परो नेति	३०	१
एकान्तेनैकरूपायाः	११२	२
एकान्तैक्ये न नाना यद्	२७१	१
एतच्च नोक्तवद् युक्त्या	१४१	२
एतदप्यसदेवेति	२१०	२
एतदप्युक्तिमात्रं यत्	७०	१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः		पत्रम्	पार्श्वम्
एतदप्युक्तिमात्रं यत्	....	१२१	१
एता वार्ता उपश्रुत्य	....	४३०	२
एतेन सर्वमेवेति	....	२५६	२
एतेनाहेतुकत्वेऽपि....	....	१२८	२
एतेनैतत् प्रतिक्षिप्तम्	....	१२७	२
एतेनैतत् प्रतिक्षिप्तम्	....	१४०	१
एतेनैतत् प्रतिक्षिप्तम्	....	२६७	१
एवं गुणगणोपेतः	....	६	२
एवं च न विरोधोऽस्ति	....	१६६	१
एवं च वस्तुनस्तत्त्वम्	....	४१५	२
एवं च व्यर्थमेवेह....	....	१९२	१
एवं च शून्यवादोऽपि	....	२१७	२
एवं चाग्रहणादेव	....	१७६	२
एवं चैतन्यवानात्मा	....	४२	२

आद्यपादः		पत्रम्	पार्श्वम्
एवं तत्रापि तद्भावे	....	२८८	२
एवं तज्जन्यभावत्वे	....	१६२	२
एवं तत्फलभावेऽपि	...	७४	२
एवं न यत् तदात्मानं	....	१८४	१
एवं न्यायविरुद्धेऽस्मिन्	....	२६४	२
एवं प्रकृतिवादोऽपि	....	११७	१
एवं वेदविहितापि....	....	७३	२
एवं व्यावृत्तिभेदेऽपि	....	१४८	२
एवं शक्त्यादिपक्षोऽयम्	....	५६	२
एवं सति घटादीनाम्	....	२७	२
एवं सुबुद्धिशून्यत्वम्	....	६५	२
एवं ह्युभयदोषादि-	....	२६६	२
एष स्थाणुरयं मार्गः	....	३७५	१

आद्यपादः		पत्रम्	पार्श्वम्
क.			
कर्तायमिति तद्वाक्ये	....	१०३	२
कर्त्रभावात् तथा देश-	....	२९	२
कर्मणो भौतिकत्वेन	....	५३	२
कर्मादिपरिणत्यादि	....	३१२	२
कर्मादेस्तत्स्वभावत्वे	....	९६	२
कल्पितश्चेदयं धर्मः	....	१३७	२
काठिन्याबोधरूपाणि	....	२२	२
कादाचित्कमदो यस्मात्	....	१२२	२
कारणत्वात् स संतान-	....	१९५	१
कालः पचति भूतानि	....	८०	१
कालादीनां च कर्तृत्वम्	....	७९	२
कालाभावे च गर्भादि	....	८०	२
कालोऽपि समयादिर्यत्	....	८८	१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः	पत्रम्	पार्श्वम्
किञ्च कालादृते नैव	८०	२
किञ्च तत्कारणं कार्य–	१३६	२
किञ्च निर्हेतुके नाशे	१९४	२
किञ्च विज्ञानमात्रत्वे	१८५	२
किञ्च स्याद्वादिनो नैव	२२९	१
किञ्चान्यत् क्षणिकत्वे वः	१६३	२
किञ्चिद् निवर्ततेऽवश्यम्	२६९	१
कृत्वा प्रकरणमेतत्	४३१	१
केवलज्ञानभावे च	४१७	२
क्रियातिशययोगे च	४१९	१
क्रियाहीनाश्च यल्लोके	४१८	१
क्रियैव फलदा पुंसाम्	४१८	१
क्रियोपेताश्च तद्योगात्	४१८	१
क्लिष्टं विज्ञानमेवासौ	१८६	१

आद्यपादः	पत्रम्	पार्श्वम्
क्लिष्टं हिंसाद्यनुष्ठानम्	७९	१
क्लिष्टाद् हिंसाद्यनुष्ठानात्	६४	१
क्षणस्थितौ तदेवास्य	१२२	१
क्षणिकत्वे यतोऽमीषाम्	१६५	२
क्षणिकाः सर्वसंस्काराः	४१५	२
क्षीरनाशश्च दध्येव	२०१	२
ग.		
गुर्वी मे तनुरित्यादौ	४४	१
गृहीतं सर्वमेतेन	१२५	१
ग्रहणेऽपि यदा ज्ञानम्	२११	२
घ.		
घटमौलिसुवर्णार्थी....	२२३	१
घटादि ज्ञानमित्यादि–	१८०	१
घटाद्यपि कुलालादि–	१०८	१

आद्यपादः	पत्रम्	पार्श्वम्
घटाद्यपि पृथिव्यादि-	१०७	१
च.		
चन्द्रसूर्योपरागादेः	६१	२
चारित्रपरिणामस्य	३४०	२
चिरमेव हि संसारः	१८५	२
चित्रं भाग्यं तथा चित्रात्....	८५	१
चिन्तामणिस्वरूपज्ञः	४२०	२
ज.		
जन्ममृत्युजराव्याधि-	३३१	२
जन्माभावे जरामृत्योः	४२३	२
जात्यन्तरात्मकं चैनम्	२६८	१
जात्यन्तरात्मके चास्मिन्	२६५	२
ज्ञानं हि फलदं पुंसाम्	४१७	१
ज्ञानमप्रतिघं यस्य	९१	१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः		पत्रम्	पार्श्वम्
ज्ञानमात्रं च यल्लोके	....	११९	१
ज्ञानमात्रे तु विज्ञानम्	....	१८१	१
ज्ञानयोगस्तपः शुद्धम्	....	१०	२
ज्ञानयोगस्तपः शुद्धम्	....	३३९	२
ज्ञानयोगस्य योगीन्द्रैः	....	३४०	१
ज्ञानयोगादतो मुक्तिः	....	३४६	१
ज्ञानवंतश्च यद्वीर्यात्	...	४१७	२
ज्ञानहीनाश्च यल्लोके	....	४१७	१
ज्ञानादेव नियोगेन	....	४१६	२
ज्ञानेन गृह्यते चार्थः	....	२११	२
ज्ञायते तद्विशेषस्तु	....	४११	२
ज्ञेयत्ववत् स्वभावोऽपि	....	१२४	२
त.			
तं प्रतीत्य तदुत्पादः	....	१३८	१

आद्यपादः		पत्रम्	पार्श्वम्
तं प्राप्य तत्स्वभावत्वात्	....	१९६	१
तच्चास्तु लोकशास्त्रोक्तम्	....	७१	२
तज्जननस्वभावा ने-	....	२४	२
तज्ज्ञानं यद् न वै धूम-	....	१५२	२
ततः स सर्वविद् भूत्वा	....	३३८	१
ततश्च दुष्करं तद् न	....	३३५	१
ततश्चानेकरूपत्वात्	....	११४	१
ततश्चेश्वरकर्तृत्व-	...	१०२	२
ततस्तस्याविशिष्टत्वात्	....	८७	१
ततो व्याधिनिवृत्त्यर्थम्	....	७४	१
ततोऽसत् सत् तथा न्यायात्		२६५	१
तत्क्रियायोगतः सा चेत्	....	५४	२
तत्तज्जननभावत्वे	....	१६२	१
तत् तज्जननस्वभावम्	....	१५०	२

आद्यपादः		पत्रम्	पार्श्वम्
तत्तत्कालादिसापेक्षः	....	८७	२
तत् तद्विधस्वभावं यद्	....	१२४	२
तत्रापि देहकर्ता चेत्	....	१०८	२
तत्सत्त्वसाधकं तद् न	....	१३५	१
तथागतेरभावे च....	....	२११	१
तथाग्रहस्तयोर्नैतत्	....	१५९	२
तथाग्रहे च सर्वत्र	....	१५१	२
तथा च भूतमात्रत्वे	....	२९	२
तथा चित्रस्वभावत्वात्	....	२१२	२
तथा तुल्येऽपि चारम्भे	....	५२	२
तथान्यदपि यत्कल्प-	....	१६५	१
तथापि तु तयोरेव	....	१६३	२
तथेति हन्त को न्वर्थः	....	१५२	२
तथेदममलं ब्रह्म	....	२८७	२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः	पत्रम्	पार्श्वम्
तथैतदुभयाधार-	२३१	२
तदग्रहणभावैश्च	१७१	१
तदनन्तरभावित्व-	१३९	१
तदनासेवनादेव	१०२	१
तदन्यग्रहणे चास्य	१८१	१
तदन्यहेतुसाध्यत्वे	७३	१
तदन्यावरणाभावात्	५५	१
तदभावेऽन्यथाभावः	१५३	१
तदर्थनियतोऽसौ यत्	२१०	२
तदाकारपरित्यागात्	१५४	२
तदात्मकत्वमात्रत्वे	२९	१
तदाभूतेरियं तुल्या	१२३	१
तदित्थंभूतमेवेति	२३९	१
तदेव न भवत्येतत्	१३०	२

आद्यपादः	पत्रम्	पार्श्वम्
तदेव न भवत्येतत्	२०१	२
तद्दर्शनमवाप्नोति	३२८	१
तद् दृष्ट्वा चिन्तयत्येवम्	३३१	१
तद्देशना प्रमाणं चेत्	१६४	२
तद्भिन्नभेदकत्वे च	८६	१
तद्रूपशक्तिशून्यं तत्	१६३	१
तद्विपर्ययसाध्यत्वे	७३	१
तद्वैलक्षण्यसंवित्तेः	३३	१
तन्निवृत्तौ न चोपायः	३७२	२
तन्नीतिप्रतिपत्त्यादेः	३८७	१
तमन्तरेण तु तयोः	१४	१
तथाहुः क्षणिकं सर्वम्	११८	२
तथाहुर्नाशुभात् सौख्यम्	६६	२
तथाहुर्मुकुटोत्पादः	२२९	२

आद्यपादः	पत्रम्	पार्श्वम्
तस्माच्च जायते मुक्तिः	१५	२
तस्मात् तदात्मनो भिन्नम्	५७	१
तस्मादधर्मवत् त्याज्यः	१०	२
तस्मादवश्यमेष्टव्यः	१४	२
तस्मादवश्यमेष्टव्यः	५३	१
तस्मादवश्यमेष्टव्यम्	१२७	१
तस्मादवश्यमेष्टव्या	१६१	१
तस्माद् दुष्टाशयकरम्	५९	२
तस्माद् यथोदितात् सम्यक्	६३	२
तस्माद् व्याख्यानमस्येदम्	३७४	१
तस्मान्नचाविशेषेण	३७४	१
तस्या एव तथाभूत-	८६	२
तस्यां च नागृहीतायाम्	१३६	१
तस्याप्यशून्यतायां च	२१६	२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः	पत्रम्	पार्श्वम्	आद्यपादः	पत्रम्	पार्श्वम्	आद्यपादः	पत्रम्	पार्श्वम्
तस्यैते योगसामर्थ्यात्	२६९	१	दिव्यदर्शनतश्चैव	२१	१	धर्मादयोऽपि चाध्यक्षाः	३५६	१
तस्यैव च तथाभावे	२५७	२	दुःखं पापात् सुखं धर्मात्....	४	२	धर्माधर्मक्षयाद् मुक्तिः	१४	२
तस्यैव चित्ररूपत्वात्	३१२	२	दुष्करं सर्वसत्त्वानाम्	३३४	१	धर्माधर्मव्यवस्था तु	३५३	१
तस्यैव तत्स्वभावत्व-	१३८	२	दृश्यमानेऽपि चाशङ्का	३८३	१	न.		
तस्यैव तत्स्वभावत्वात्	१०७	२	दृष्टान्तमात्रतः सिद्धिः	१८५	२	न कालव्यतिरेकेण	८०	१
तस्यैव तत्स्वभावत्वात्	२१२	१	दृष्टेष्टाभ्यां विरोधाच्च	६९	१	न च तत्कर्मवैधुर्ये	८४	२
तस्यैव तु तथाभावे	२६९	२	देहभागेन नैवास्य	१०८	२	न च तन्मात्रभावादेः	८५	२
तस्यैव तु तथाभावे	२७२	१	देहस्पर्शादिसंवित्त्या	११४	२	न च पूर्वस्वभावत्वात्	११०	२
तानशेषान् प्रतीत्येह	१४५	२	देहात् पृथक्त्व एवास्य	१११	१	न च प्रकाशमात्रं तु	१८५	१
तेन तद्भावभावित्वम्	३२	२	दोषाणां ह्रासदृष्टयेह	३८७	२	न च बुद्धिविशेषोऽयम्	४९	१
तेनाग्निहोत्रं जुहुयात्	३७३	१	द्रव्यपर्याययोर्भेदे	२६७	१	न च भेदोऽपि बाधायै	२७०	२
द.			ध.			न च भ्रान्तापि सद्बाधा	२७२	२
दग्धे बीजे यथाऽत्यन्तम्	४२३	१	धर्मस्तच्चात्मधर्मत्वात्	३४०	१	न च मूर्ताणुसंघातः	२५	१
दर्शनं मुक्तिबीजं च	३२६	१	धर्मस्तदपि चेत् सत्यम्	१३	१	न चर्ते नियतिं लोके	८३	२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः		पत्रम्	पार्श्वम्
न च लावण्यकार्कश्य-	....	३१	२
न च संस्वेदजाद्येषु	....	३४	२
न चागमेन यदसौ	....	३४९	१
न चातीतस्य सामर्थ्यम्	....	१९९	१
न चाप्यक्षविरुद्धत्वम्	....	१९७	२
न चापि स्वानुमानेन	....	२१२	१
न चाप्यतीन्द्रियार्थत्वात्	....	२८५	२
न चाप्यपौरुषेयोऽसौ	....	३७५	२
न चायसस्य बन्धस्य	....	९	२
न चात्रस्थानिवृत्त्येह	....	३४०	२
न चासदेव तद्धेतुः	....	१८७	१
न चासौ तत्स्वरूपज्ञः	....	४२०	२
न चासौ तत्स्वरूपेण	....	१८	१
न चासौ भूतभिन्नो यत्	....	१८	२
न चास्यातत्स्वभावत्वे	....	१९१	१
न चास्यादर्शनेऽप्यद्य	....	३८८	१
न चेल्लावण्यसद्भावः	...	३२	१
न चेह लौकिको मार्गः	....	३०	२
न चैकैकत एवेह....	....	८८	२
न चैतदपि न न्याय्यम्	....	२१३	२
न चैतद् दृश्यते लोके	....	६७	१
न चैतद् बाध्यते युक्त्या	....	३०५	१
न चैवंभूतसंघात-	....	२७	२
न चोत्पादव्ययौ न स्तः	....	२२९	२
न चोभयादिभावस्य	....	१९७	१
न जलस्यैकरूपस्य	....	८६	१
न तथाभाविनं हेतु-	....	३५	१
न तद्गतेर्गतिस्तस्य	....	१६६	२
न तद् भवति चेत् किं न		३२२	२
न तयोस्तुल्यतैकस्य	....	१५२	१
न तस्यामेव संदेहात्	....	३३	१
न तादात्म्यं द्वयाभाव-	....	३९८	२
न धर्मी कल्पितो धर्मः	....	१३७	२
न नास्ति ध्रौव्यमप्येवम्	....	२२९	२
न पुनः क्रियते किञ्चित्	....	१९०	२
न पूर्वमुत्तरं चेह....	....	१५४	१
न प्रतीत्यैकसामर्थ्यम्	....	१४६	१
न प्रत्यक्षं यतो भावा	....	१६९	२
न प्राणादिरसौ मानम्	....	३२	१
न भोक्तृव्यतिरेकेण	....	८४	२
न मानं मानमेवेति	....	२४३	१
न युज्यते च सन्न्यायात्	....	२७१	१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः	पत्रम्	पार्श्वम्
नरकादिफले कांश्चित्	९५	२
न लौकिकपदार्थेन	३७२	२
न विनेह स्वभावेन	८२	१
न विविक्तं द्वयं सम्यक्	४२१	१
न वृद्धसंप्रदायेन	३७१	२
न सत्त्वभावजनकः	१९६	२
न स्वभावातिरेकेण	८१	१
न स्वसंधारणे न्यायात्	१९८	२
न स्वसत्त्वं परासत्त्वम्	२४७	१
न हिंस्यादिह भूतानि	७४	१
न हेतुफलभावश्च	१३७	२
न ह्युक्तवत् स्वहेतोस्तु	४०९	२
नाक्षादिदोषविज्ञानम्	१८५	१
नात्मापि लोके नो सिद्धः	१९	२
नानात्वाबाधनाच्चेह	१४९	२
नाना योगी विजानाति	२७३	१
नानुपादानमन्यस्य	१०८	१
नानुवृत्तिनिवृत्तिभ्याम्	२६९	२
नान्यप्रमाणं संवादात्	३७४	२
नान्योन्यव्यतिरेकान्त-	२६२	१
नाप्रवृत्तेरियं हेतुः	७१	१
नाभावो भावतां याति	१२१	१
नाभावो भावमाप्नोति	३६	२
नाभेदो भेदरहितः	२६६	१
नाभ्यास एवमादीनाम्	३८४	१
नामूर्तं मूर्ततां याति	११४	२
नाम्ना विनापि तत्त्वेन	१३६	१
नार्थान्तरगमो यस्मात्	२०१	१
नार्थापत्त्यापि सर्वोर्थः	३४९	१
नासतो विद्यते भावः	३६	१
नासत् सज्जायते जातु	२०२	१
नासत् सज्जायते यस्मात्	१९८	२
नासत् स्थूलत्वमण्वादौ	२३	२
नासत् स्थूलत्वमण्वादौ	२३	२
नाहेतोरस्य भवनम्	१२३	२
नित्यत्वापौरुषेयत्वा	३७२	२
नित्यमर्थक्रियाभावात्	२१४	१
नित्यस्यार्थक्रियायोगः	२१२	२
नित्येतरदतो न्यायात्	२०२	१
नित्यैकयोगतो व्यक्ति	२७२	१
नियतेनैव रूपेण	८३	१
नियतेर्नियतात्मत्वात्	८५	२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः	पत्रम्	पार्श्वम्
निवर्तते च पर्यायः	२६७	२
निष्पन्नत्वादसत्त्वाच्च	४०९	२
नेत्थं बोधान्वयाभावे	१५४	२
नैकान्तग्राह्यभावं तत्	१८१	२
नैकोऽपि यद् द्विविज्ञेयः	१६६	२
नैतद् दृश्यविकल्पार्थ-	४०८	२
नैवं दृष्टेष्टबाधायत्	५८	२
नोत्पत्त्यादेस्तयोरैक्यम्	१२७	१
न्यायात् खलु विरोधो यः	२६४	२
प.		
पञ्च बाह्या द्विविज्ञेयाः	१६५	१
पञ्चमस्यापि भूतस्य	२४	१
पञ्चविंशतितत्त्वज्ञः	११३	१
पयोव्रतो न दध्यत्ति	२२४	१

आद्यपादः	पत्रम्	पार्श्वम्
परचित्तादिधर्माणाम्	३९०	१
परमानन्दभावश्च	४२३	२
परमार्थैकतानत्वे	३९९	१
परमार्थैकतानत्वे	४१०	२
परमैश्वर्ययुक्तत्वात्	१०३	२
पराभिप्रायतो ह्येतत्	१७१	१
परिकल्पितमेतच्चेत्	२४८	२
परिणामोऽपि नो हेतुः	२००	२
पापं तद्भिन्नमेवास्तु	५२	२
पापादत्रेदृशी बुद्धिः	३८३	२
पुनर्जन्म पुनर्मृत्युः	८	१
पुरुषस्योदिता मुक्तिः	११३	२
पुरुषोऽविकृतात्मैव	१०९	१
पूर्वस्यैव तथाभावा	१३८	१

आद्यपादः	पत्रम्	पार्श्वम्
पृथिव्यादिमहाभूत-	१५	२
प्रकाशैकस्वभावं हि	१८३	१
प्रकृत्याऽसुन्दरं ह्येवम्	९	१
प्रकृत्यैव तथाभूतम्	१८६	२
प्रणम्य परमात्मानम्	१	२
प्रतिक्षिप्तं च यत् सत्त्वा	१२८	२
प्रतिक्षिप्तं च यद् भेदा-	२६८	१
प्रतिक्षिप्तं च यद् हेतोः	१४०	२
प्रतिपक्षस्वभावेन	६४	१
प्रतिपक्षागमानां च	६८	२
प्रतिबिम्बोदयोऽप्यस्य	१०९	२
प्रतीत्या बाध्यते यो यत्	६५	१
प्रत्यक्षस्यापि तत्त्वाज्यम्	४३	२
प्रत्यक्षानुपलम्भाभ्याम्	१५३	२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः	पत्रम्	पार्श्वम्
प्रत्यक्षाभ.सभावेऽपि	२७३	२
प्रत्यक्षेण प्रमाणेन	२४८	२
प्रत्यभिज्ञाबलाच्चैतत्	२७०	२
प्रत्येकं तस्य तद्भावे	१४६	१
प्रत्येकमसती तेषु....	२३	१
प्रदीपादिवदिष्टश्चेत्	३७३	२
प्रदीर्घाध्यवसायेन	१६०	२
प्रधानाद् महतो भावः ...	१०६	२
प्रधानोद्भवमन्ये तु	१०५	१
प्रभूतानां च नैकत्र	१४५	१
प्रमाणपञ्चकावृत्तिः	३६५	२
प्रमाणमन्तरेणापि	२१६	१
प्रवर्तमान एवं च	३३६	१
प्रातिभालोचनं तावत्	३८८	१
प्रामाण्यं रूपविषये	३७२	१
फ.		
फलं ज्ञान-क्रियायोगे	४१९	१
फलं ददाति चेत् सर्वम्...	९६	१
ब.		
बठरश्च तपस्वी च	४२१	१
बन्धादृते न संसारः	४१२	१
बहूनामपि संमोहः	३८३	२
बुद्धावर्णेऽपि चादोषः	४१६	१
बुद्धैवं भवनैर्गुण्यम्	३३३	२
बोधमात्रस्य तद्भावे	५६	१
बोधमात्रातिरिक्तं तत्	५६	१
ब्रह्महत्यानिदेशानु-	६८	२
ब्रुवते शून्यमन्ये तु	२१३	१
भ.		
भावमात्रं तदिष्टं चेत्	२३८	२
भावस्याभवनं यत् तत्	१२९	१
भावेऽपि च प्रमाणस्य	२९५	१
भावे वास्या बलादेकम्	२११	१
भावे ह्येष विकल्पः स्यात्	१२७	२
भूतानां तत्स्वभावत्वा-	५३	१
भूतिर्येषां क्रिया सोक्ता	१९९	१
भेदे तददलं यस्मात्	२६	२
भोगमुक्तिफलो धर्मः	१४	१
भ्रान्ताचाभ्रान्तिरूपा न	१८४	१
भ्रान्तोऽहं गुरुरित्येषः	४३	१
म.		
मतिज्ञानविकल्पत्वात्	२७३	२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः	पत्रम्	पार्श्वम्
मन्त्रादीनां च सामर्थ्यम् ...	३८५	१
मन्यन्तेऽन्ये जगत् सर्वम्	११८	१
ममैव हेतुशक्त्या चेत्	१६४	२
माध्यस्थ्यमेव तद्धेतु-	६९	२
मानं चेद मानमेवेति	२४४	१
मानाभावे परेणापि	१९७	२
मुक्तिः कर्मक्षयादिष्टा	७३	२
मुक्तिः कर्मक्षयादेव ...	७२	२
मुक्तिभावे च सर्वैव	१८८	१
मुक्तिश्च केवलज्ञान-	४२०	२
मुक्तौ च तस्य भेदेन	१८६	१
मुक्त्वा धर्मं जगद्वन्द्यम्	९	२
मूर्तयाप्यात्मनो योगः	११६	१
मृतदेहे च चैतन्य-	२१	२

आद्यपादः	पत्रम्	पार्श्वम्
मृत्यादिवर्जिता चेह	४२३	१
मृद् द्रव्यं यद् न पिण्डादि	२६५	१
मे ममेत्यात्मनिर्देशः	१६४	१
मैत्रीं भावयतो नित्यम्	६	१
मोक्षः प्रकृत्ययोगो यत्	११३	१
य.		
यं बुद्धं बोधयन्तः ...	४३१	१
यं श्रुत्वा सर्वशास्त्रेषु	३	१
यः कर्ता कर्मभेदानाम्	५१	२
यः केवलानलग्राहि- ...	१५२	२
यच्चेदमुच्यते ब्रूमः	२०१	१
यच्चोक्तं दुःखबाहुल्य-	६७	२
यच्चोक्तं पूर्वमत्रैवं	१८९	१
यज्जायते प्रतीत्यैक	१४६	१

आद्यपादः	पत्रम्	पार्श्वम्
यत एकं न सत्यार्थम्	३८९	१
यतश्च काले तुल्येऽपि	८८	२
यतश्च तत् प्रमाणेन	६६	२
यतो भिन्नस्वभावत्वे	१४५	२
यथा ते शेत इत्यादौ	१८३	२
यथा विशुद्धमाकाशम्	८६	२
यदि तेनैव विज्ञानम्	१४७	२
यदि नाम क्वचिद् दृष्ट	६२	१
यदि नित्यं तदात्मैव	५१	२
यदीयं भूतधर्मः स्यात्	१७	१
यद् यदैव यतो यावत्	८३	१
यन्निवृत्तौ न यस्येह	२६७	२
यस्मात् तस्याप्यदस्तुल्यम्	२९२	१
यस्मिन्नेव तु संताने	२२०	२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः	पत्रम्	पार्श्वम्
या च लूनपुनर्जात	७३	१
याऽपि रूपादिसामग्री	१४४	२
यावतामस्ति तद् मानम्	१६	२
यावदेवंविधं नैतत्	७१	१
युक्त्ययोगश्च योऽर्थस्य	१८१	२
युक्त्या तु बाध्यते यस्मात्	१०७	२
युवैव न च वृद्धोऽपि	२५८	१
येनाकारेण भेदः किम्	२६६	१
योग्यतामधिकृत्याथ	१७०	२
योऽप्येकस्यान्यतो भावः	१३९	२
र.		
रागादिक्लेशवर्गो यत्	१८६	१
रूपं येन स्वभावेन	१४७	२
रूपालोकादिकं कार्यम्	१४५	१

आद्यपादः	पत्रम्	पार्श्वम्
ल.		
लज्जते बालचरितैः	५७	२
लोकायतं मतं प्राज्ञैः	५९	१
लोकेऽपि नान्यतः स्थानात्	२०	१
व.		
वक्तृव्यापारभावेऽपि	३६५	२
वन्ध्येतरादिको भेदः	४१०	२
वर्णाश्रमव्यवस्थापि	३५५	१
वस्तुनोऽनन्तरं सत्ता	१४०	१
वस्तुनोऽनन्तरं सत्ता	१४१	१
वस्तुस्थित्या तथा तद यत्	१३५	२
वस्तुस्थित्या तयोस्तत्त्वे	१५१	१
वस्तुस्थित्यापि तत् तादृक्	३८९	१
वह्नेः शीतत्ववस्त्वेव	६५	१

आद्यपादः	पत्रम्	पार्श्वम्
वाच्य इत्थमपोहस्तु	४०१	१
वापीकूपतडागानि	३५४	२
वायुसामान्यसंसिद्धेः	३२	२
वासकाद् वासना भिन्ना	१५०	१
वासनाप्यन्यसंबन्धम्	५५	२
वासनाहेतुकं यच्च	२४२	१
वास्यवासकभावश्च ...	१५०	२
वास्यवासकभावाच्चेत्	१४९	२
विकल्पोऽपि तथा न्यायात्	१५४	१
विज्ञानं यत् स्वसंवेद्यम्	१७४	१
विज्ञानमात्रमप्येवम्	२१३	१
विज्ञानमात्रवादोऽपि	१६९	१
विज्ञानमात्रवादोऽयम्	१८८	१
विद्याविद्यादिभेदाच्च	२९५	२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः		पत्रम्	पार्श्वम्
विपरीतप्रकाशश्च	....	३७३	२
विपरीतास्तु धर्मस्य	....	५	१
विभक्तेदृक्परिणतौ	....	१०९	२
विभिन्नकार्यजनन-	....	१४९	१
विरोधाद् नोभयाकारः	....	१८२	१
विशिष्टं वासनाजन्म	....	४०९	१
विशिष्टपरिणामाभा-	....	१८	२
विसभागक्षणस्याथ	....	१९५	२
वेदाद् धर्मादिसंस्थापि	....	३७१	२
वेदेऽपि पठ्यते ह्येषः	....	३८५	२
व्यक्तिमात्रत एवैषाम्	....	२९	१
व्यवस्थापकमस्यैवम्	....	१८४	२
व्यवस्थाभावतो ह्येवम्	....	६५	२
व्यवस्थितौ च तत्त्वस्य	....	१८४	१
व्याख्याप्यपौरुषेयस्य	....	३७४	१
व्याधिग्रस्तो यथा रोगी	...	३३५	२
श.			
शक्तिचैतन्ययोरैक्यम्	....	१७	२
शक्तिरूपं तदन्ये तु	....	५४	१
शक्तिरूपेण सा तेषु	....	१७	१
शतानि सप्त श्लोकानाम्	....	४३०	२
शब्दात् तद्वासना बोधः	....	४०९	१
शास्त्रकारा महात्मानः	....	१०४	१
शास्त्रादतीन्द्रियगतेः	....	३६३	१
शून्यं चेत् सुस्थितं तत्त्वम्		२१५	२
शोकप्रमोदमाध्यस्थ्यम्	....	२२८	२
स.			
स एव भावस्तद्धेतुः	....	१२४	१
संक्लेशो यद् गुणोत्पादः	....	१९६	१
संतानापेक्षयास्माकम्	....	१२०	२
संतानापेक्षयैतच्चेत्	....	१६४	२
संसारमोचकस्यापि	....	७२	१
संसारव्याधिना ग्रस्तः	....	३३५	२
संसाराद् विप्रमुक्तो यत्	....	२५७	१
संसारी चेत् स एवेति	....	२५६	२
संसार्यपि न संसारी	....	२२९	१
स क्षणस्थितिधर्मा चेत्	....	१२१	२
सति चास्मिन् किमन्येन	....	४०१	१
सति चास्मिन्नसौ धन्यः	....	३३०	१
सतोऽसत्त्वं यतश्चैवम्	....	१३०	२
सतोऽसत्त्वे तदुत्पादः	....	१२१	२
सतोऽस्य किं घटस्येव	....	४३	१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः		पत्रम्	पार्श्वम्
सत्त्वेऽपि नेन्द्रियज्ञानम्	....	१६६	२
सत्यामस्यां स्थितोऽस्माकम्		१६१	१
सदाभावेतरापत्तिः	....	२४२	२
स पश्यत्यस्य यद् रूपम्	....	३३०	२
समनन्तरवैकल्पम्	....	१५२	१
समयापेक्षणं चेह	....	४१२	१
समारोपादसौ नेति	....	१२४	२
सम्यक् प्रवृत्तिः साध्यस्य	....	४१९	२
सर्वज्ञेन ह्यभिव्यक्तात्	....	३८६	१
सर्वत्र दर्शनं यस्य	...	६७	२
सर्वत्र दृष्टे संवादात्	....	३८८	२
सर्वथैव तथा भावी	....	१३८	२
सर्वद्वन्द्वविनिर्मुक्ताः	....	४२४	१
सर्वमेतेन विक्षिप्तम्	....	१६७	२
सर्ववाचकभावत्वात्	....	४१२	२
सर्वार्थविषयं तच्चेत्	....	३५५	२
सर्वे भावाः स्वभावेन	....	८१	१
सर्वेषां बुद्धिजननैः	....	१४५	१
सहकारिकृतो हेतोः	....	१९१	१
सहार्थेन तज्जनन-	....	१७०	१
स हि व्यावृत्तिभेदेन	....	१४८	१
सांवृतत्वाद् व्ययोत्पादौ	...	१९५	१
सादृश्याज्ञानतो न्याय्या	....	२७२	२
साधकत्वे तु सर्वस्य	....	१३६	२
साधुर्नवेति संकेतः	...	३७४	१
साधुसेवा सदा भक्त्या	....	५	२
साध्यमर्थं परिज्ञाय	....	४१९	२
सामग्रीभेदतो यश्च	....	१४७	१
सामग्र्यपेक्षयाप्येवम्	....	१४९	१
सिध्येत् प्रमाणं यद्येवम्	....	३८९	१
सुखाय तु परं मोक्षः	....	३३२	२
सुदूरमपि गत्वेह	....	६४	१
सैवाथभेदरूपापि	....	२९५	२
सोऽन्तेवासी गुरुः सोऽयम्		११९	२
स्तस्तौ भिन्नावभिन्नौ वा	...	१३७	१
स्यादेतद् भूतजत्वेऽपि	....	३०	१
स्वकाले भिन्न इत्येतत्	....	१९	१
स्वकृतस्योपभोगस्तु	....	१२०	२
स्वकृताध्ययनस्यापि	....	३८५	१
स्वधर्मोत्कर्षादेव	...	६९	२
स्वभाव एष जीवस्य	....	६४	१
स्वभावक्षणतो ह्यूर्ध्वम्	....	१२६	१

शा० स० ४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यपादः		पत्रम्	पार्श्वम्
स्वभावो नियतश्चैव	....	८९	१
स्वभावो भूतमात्रत्वे	....	२८	१
स्वयं रागादिमान् नार्थम्	....	३७३	१
स्वयमेव प्रवर्तन्ते....	....	९५	२
स्वरूपमात्रभेदे च	....	२८	२
स्वसंवेदनसिद्धत्वात्	....	१५५	२
स्वहेतोरेव तज्जातम्	....	१२३	२
स्वो भावश्च स्वभावोऽपि	....	८७	१

आद्यपादः		पत्रम्	पार्श्वम्
ह.			
हन्म्येनमिति संक्लेशात्	....	१९५	२
हविर्गुडकणिक्कादि-	....	२९	१
हिंसादिभ्योऽशुभं कर्म	....	६१	१
हिंसाद्युत्कर्षसाध्यत्वे	....	७२	२
हिंसाद्युत्कर्षसाध्यो वा	....	७२	२
हिंसानृतादयः पञ्च	....	४	२

आद्यपादः		पत्रम्	पार्श्वम्
हिमस्यापि स्वभावोऽयम्	....	६५	२
हुद्भताशेषसंशीति....	....	३६१	१
हुद्भताशेषसंशीति....	....	३८७	२
हेतवोऽस्य समाख्याताः	....	५८	२
हेतुं प्रतीत्य यदसौ	....	१९०	१
हेतुर्भवस्य हिंसादिः	....	३३३	२
हेतोः स्याद् नश्वरो भावः		१८९	२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

श्रीहरिभद्रसूरिविनिर्मितः ।

शास्त्रवार्तासमुच्चयः ।

न्यायविशारदन्यायाचार्यश्रीयशोविजयोपाध्यायविरचितया

स्याद्वादकल्पलतावृत्त्या समुल्लसितः ।

ऐन्द्रश्रेणिनताय दोषहुतभुङ्नीराय नीरागताधीराजद्विभवाय जन्मजलधेस्तीराय धीरात्मने ।
गम्भीरागमभाषिणे मुनिमनोमाकन्दकीराय सन्नासीराय शिवाध्वनि स्थितिकृते वीराय नित्यं नमः ॥१॥
प्रणम्य शारदां देवीं गुरूनपि गुणैर्गुरून् । विवृणोमि यथाशक्ति शास्त्रवार्तासमुच्चयम् ॥ २ ॥

१ सत्सु नासीरोऽग्रेसरस्तस्मै ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हारिभद्रं वचः क्वेदं बहुतर्कपचेलिमम् ? । क्व चाहं शास्त्रलेशज्ञस्तादृक्तन्त्राऽविशारदः ? ॥ ३ ॥
श्रमो ममोचितो भावी तथाप्येष शुभाऽऽयतिः । अर्हन्मतानुरागेण, मेघेनेव कृषिस्थितिः ॥ ४ ॥

इह खलु निखिलं जगदज्ञानध्वान्तनिरस्ताऽऽलोकमवलोकमानस्तदुपचिकीर्षुर्भगवान् हरिभद्रसूरिः प्रकरणमिदमारब्धवान् । तत्राऽऽदौ प्रारिप्सितग्रन्थस्य निर्विघ्नपरिसमाप्तये मङ्गलमाचरन् प्रेक्षावत्प्रवृत्तयेऽभिधेयमाह—

प्रणम्य परमात्मानं वक्ष्यामि हितकाम्यया । सत्त्वानामल्पबुद्धीनां शास्त्रवार्तासमुच्चयम् ॥१॥

प्रणम्येति । अथ समाप्तिमात्रे मङ्गलं न हेतुः, कादम्बरी-नास्तिकानुष्ठितयोरन्वय-व्यतिरेकाभ्यां व्यभिचारात्[१] । न च स्वसमसंख्यविघ्नस्थलीयसमाप्तौ मङ्गलं हेतुः, नास्तिकानुष्ठितस्थले च जन्मान्तरीयमङ्गलादेव च समाप्तिरिति वाच्यम्; विघ्नाधिकसंख्यमङ्गलस्थले समाप्त्यभावप्रसङ्गात् । न च स्वानधिक-न्यूनसंख्यविघ्नस्थलीयत्वं निवेश्यम्; यत्र दश विघ्नाः, पञ्च च प्रायश्चित्तेन नाशिताः, पञ्च च मङ्गलानि, तत्र समाप्त्यभावप्रसङ्गात् । न च प्रायश्चित्ताद्यनाश्यस्वानधिकसंख्यविघ्नस्थलीयत्वं निवेश्यम्; बलवतो विघ्नस्य बहुभिरपि मङ्गलैरनाशात्, बलवता मङ्गलेन बहूनामपि विघ्नानां नाशाच्च । किञ्च, विघ्नः समाप्तौ विशेषणम्, उपलक्षणं वा ? । नाद्यः, विघ्नस्यापि जन्यत्वापत्तेः । नाऽन्त्यः, नियतोपलक्ष्यतावच्छेदकाभावा[२]दिति दिक् । आवश्यकत्वाद् विघ्नध्वंस एव मङ्गलफलम्, समाप्तिस्त्वसति प्रतिबन्धे स्वकारणादेव भवति, कारीरीत इवाऽवग्रहनिवृत्तौ वृष्टिः, ॥ १ ॥

१ कादम्बर्यां सत्यपि मङ्गले समाप्त्यभावात्, नास्तिकानुष्ठिते च मङ्गलाभावेऽपि समाप्तिदर्शनादित्यर्थः । २ नियतोपलक्ष्यतावच्छेदकत्वादुपलक्षणलक्षणस्येत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'निर्विघ्नं परिसमाप्यतां' इति कामनापि "सविशेषणे[1] हि०" इति न्यायाद् विघ्नध्वंसमात्रावगाहिनी; इत्यपि मतं न रमणीयम्, मङ्गलं विनापि विघ्नध्वंसस्य प्रायश्चित्तादितो भावेन व्यभिचारात्। न च प्रायश्चित्ताद्यनाश्यविघ्नध्वंसे मङ्गलं हेतुरतो न दोष इति वाच्यम्; प्रायश्चित्तादीनामपि मङ्गलाद्यनाश्यविघ्नध्वंसं प्रति हेतुत्वेऽन्योन्याश्रयात्[2]। 'विघ्नो मा भूत्' इति कामनया प्रवृत्तेर्विघ्नप्रागभाव एव मङ्गलफलमित्यपि न पेशलं वचनम्, प्रागभावस्यासाध्यत्वात्, स्वत आगन्तुकस्य समयविशेषस्य संबन्धरूपस्य तत्परिपालनस्यापि मङ्गलासाध्यत्वात्। शिष्टाचारपरिपालनं मङ्गलफलमित्यपि वार्तम्, तत्परिपालनस्याऽदृष्टद्वाराऽभीप्सितसिद्धिहेतुत्वे मङ्गलस्यैवादृष्टार्थत्वौचित्यात्, विघ्नमविनाश्य [3]धर्मविशेषस्य समाप्त्यहेतुत्वे विघ्ननाशस्यैवाऽऽवश्यकत्वाच्च। किञ्च, शिष्टाचारेण विधिबोधितकर्तव्यत्वमनुमाय मङ्गले प्रवृत्तिरेव तत्परिपालनम्[4], न सा[5] तत्फलम्[6], किन्तु तज्जनिकेति। न चाचारप्राप्तातिलङ्घने प्रत्यवायस्मरणात् प्रत्यवायित्वपर्यवसन्नाशिष्टत्वशङ्कानिरास एवं[7] तत्फलं तत्परिपालनमिति वाच्यम्, तादृशशङ्कायाः शिष्यावधानप्रतिपक्षत्वेऽपि समाप्त्यप्रतिपक्षत्वात्, 'कामनाविशेषनियतकर्तव्यताकस्य मङ्गलस्य तदभावेनाकरणेऽपि[8] न प्रत्यवायः' इति विशेषदर्शनेन तच्छङ्कानिवृत्तेश्च। तस्माद् मङ्गलं निष्फलमिति चेत्॥ अत्रोच्यते—विघ्नध्वंस एव मङ्गलं[9] हेतुः; न चोक्तव्यभिचारः, प्रायश्चित्तादीनामपि मङ्गलत्वात्; 'प्रारिप्सितप्रतिबन्धकदुरितनिवृत्त्यसाधारणकारणं मङ्गलम्' इति हि तल्लक्षणं परैर्गीयते, तत्र चाऽस्माभिलर्घवात् 'प्रारिप्सितप्रतिबन्धक-' इति विशेषणं त्यज्यत इति।

---

१ "सविशेषणे हि विधि-निषेधौ विशेषणमुपक्रामतो विशेष्याबाधके सति" इत्येवंरूपात्। २ स्वस्मिन्नन्यापेक्षकत्वे सति तस्मिन् स्वापेक्षकत्वमन्योन्याश्रयत्वम्। ३ शिष्टाचारपरिपालनरूपस्य। ४ शिष्टाचारपरिपालनम्। ५ प्रवृत्तिः। ६ मङ्गलफलम्। ७ क. 'व तत्प'। ८ कामनाविशेषाभावेन। ९ क. 'ङ्गलहे'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदिदमुक्तमाकरे– "स्वाध्यायादेरपि मङ्गलत्वाविरोधात्" इति । तथापि नानेन रूपेण हेतुत्वम्, आत्माश्रयात्[1], किन्तु नतित्वादिना प्रातिस्विकरूपेणैव, इति व्यभिचार एवेति चेत् । न, नत्याद्यभिव्यङ्ग्यभावविशेषस्यैव निश्चयतो दुरितक्षयहेतुत्वात्; निकाचितकर्मणश्चाऽनपवर्तनीयत्वाद् न बलवतो विघ्नस्य नाशः; वस्तुतः शब्दाद्यात्मकनत्यादीनामपि स्वाव्यवहितोत्तरविघ्नध्वंसहेतुत्वाद् न कोऽपि दोष इति सर्वमवदातम् ॥ परे तु– विघ्नध्वंस-तत्प्रागभावपरिपालन-समाप्तिप्रचयगमन-शिष्टाचारपरिपालनानां सर्वेषामेवाऽविनिगमाद् मङ्गलफलत्वम्, तत्तत्कामनया शिष्टाचारेण तत्तत्फलकत्वोन्नयनात् "अनुमानव्यवस्थानात् तत्संयुक्तं[2] प्रमाणं स्यात्" (जैमि० १।३।१५) इति न्यायेन यथाचारमेव श्रुतिकल्पनात् । न चैकमङ्गलप्रयोगादनेकफलापत्तिः, अनेकफलबोधकश्रुतावुद्देश्यसाहित्याविवक्षणात्; अन्यथा "सर्वेभ्यो दर्श-पूर्णमासौ" इत्यत्रापि तत्प्रसङ्गात्, कादम्बर्यादौ समाप्तिकामनया मङ्गलाचारे मानाभावाद् न दोष इत्याहुः ॥ अनेकफलकात् कर्मण उद्देश्या-ऽनुद्देश्य-प्रधाना-ऽप्रधानबहुविधफलदर्शनाद् नैतद् युक्तमित्यपरे ॥ स्वतो मङ्गलभूत एव शास्त्रे शिष्यमतिमङ्गलपरिग्रहार्थं[3] मङ्गलाचरणम्, अन्यथा मङ्गलवाक्यस्य शास्त्रबहिर्भावे वाक्यान्तराणामप्यविशेषाच्छास्त्रबहिर्भावप्रसङ्गे शास्त्रस्य चरमवर्णमात्रपर्यवसानप्रसङ्गात्, इति तु भाष्यकाराभिप्रायः। तत्त्वमत्रत्यं मत्कृतमङ्गलवादादवसेयम् । तस्मात् सफलं मङ्गलम्, इति युक्तं तदाचरणं ग्रन्थकारस्येति ॥

अथाक्षरार्थ उच्यते– परमः क्षीणघातिकर्मा य आत्मा तं, प्रणम्य भक्ति-श्रद्धातिशयेन नत्वा, अल्पबुद्धीनामसंकलिततत्तच्छास्त्रार्थग्रहणाऽप्रवणमतीनां सत्त्वानां, हितकाम्ययाऽनुग्रहेच्छया, शास्त्राणां बौद्ध-वैशेषिकादिदर्शनानां या वार्ताः सिद्धान्त-

१ स्वस्मिन् स्वापेक्षकत्वमात्माश्रयत्वम् । २ फलसंयुक्तम् । ३ "सीसमइमंगलपरिग्गहत्थमेत्तं तदभिहाणं" (गाथा २०) इत्यादिविशेषावश्यकभाष्यात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवादास्तासां समुच्चयमेकत्र संकलनम्, "कृदभिहित०"[1] न्यायाश्रयणात् समुचिताः शास्त्रवार्ता इत्यर्थः, ता वक्ष्याम्यभिधास्ये; नाऽतो द्वितीयार्थाऽनन्वयः, द्रव्यपरकृदर्थान्वितस्यैव तदुत्तरपदार्थेऽन्वयात्, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वानियमस्य "तेषां मोहः पापीयान् नामूढस्येतरोत्पत्तेः" (न्यायसू० ४ । १ । ६) इत्यादावेव दूषितत्वात्; "पाणिपादं वादय" इत्यत्र पाणिपादसमाहारस्यैवाऽत्र समुच्चयस्य स्वाश्रयनिरूपितत्वसंबन्धेनाऽन्वयस्त्वनुभवाऽनुपारूढत्वाद् न कल्प्यत इति दिग्। अत्राऽऽद्यपदेन मङ्गलं निबद्धम्, मङ्गलेन स्वशास्त्रसिद्धावपि तन्निबन्धेन श्रोतॄणामनुषङ्गतोऽपि मङ्गलोपपत्तेः। शास्त्रवार्तासंग्रहश्चा-भिधेयतयोक्तः ॥ १ ॥

अवान्तरप्रयोजनमप्यत्र यद्यपि सामान्यतोऽल्पबुद्धिहितमुक्तमेव, तथापि विशेषप्रयोजनानुबन्धितया नामग्राहं तन्नि-र्देष्टुं प्रकृतग्रन्थमभिष्टौति–

यं श्रुत्वा सर्वशास्त्रेषु प्रायस्तत्त्वविनिश्चयः । जायते द्वेषशमनः स्वर्ग-सिद्धिसुखावहः ॥२॥

यमिति । यं श्रुत्वा तात्पर्यतः परिज्ञाय, सर्वशास्त्रेषु सकलदर्शनेषु, प्रायो बाहुल्येन, तत्त्वविनिश्चयः प्रामाण्या-ऽप्रामाण्यविवेको जायते । नन्वेवमितरदर्शनेष्वप्रामाण्यज्ञानात् तत्राऽनिष्टसाधनत्वज्ञाने द्वेषोदयात् संसारानुबन्ध्येव बहुशास्त्रज्ञानमा[...] तितम्, इत्यत आह– द्वेषशमन इति । प्रामाण्यनिश्चय उपादेयेऽर्थे निष्कम्पप्रवृत्तिजनकतयैवोपयुज्यते, इतरत्रा[3]ऽप्रामाण[...]

---

१ "कृदभिहितो भावो द्रव्यवत् प्रकाशते"। २ प्रत्ययार्थः। ३ अनुपादेयेऽर्थे।

निश्चयस्तु तदर्थप्रवृत्तिप्रतिपक्षतयैव, द्वेषस्तु माध्यस्थ्यप्रतिबन्धादेव नोदेति, इति न कोऽपि दोषानुषङ्गः, प्रत्युत दान-संयमादौ शुद्धप्रवृत्त्या स्वर्ग-सिद्धिसुखावह एव सः ॥

अत्र कश्चिदाह– ननु 'स्वर्गे सुखम्' इत्यत्र न विप्रतिपत्तिरस्ति, सिद्धौ तु सुखे न मानमस्ति, सुखत्वावच्छे[ ]धर्मजन्यत्वावधारणात् । न च विजातीयादृष्टानां विजातीयसुखहेतुत्वात् , तत्तत्कर्मणामेवादृष्टरूपव्यापारसंबन्धेन तद्धेतुत्वाद् वा सामान्यतो हेतुत्वे मानाभाव इति वाच्यम् , तथापि विशेषसामग्रीविरहेण मोक्षसुखानुत्पत्तेः । न च "[2]नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतिरेवाऽत्र मानम् । न च नित्यसुखे सिद्धे ब्रह्माभेदबोधनम् , तद्बोधने च नित्यसुखासिद्धिरिति परस्पराश्रय इति वाच्यम् ; स्वर्गत्वमुपलक्षणीकृत्य स्वर्गविशेषे यागकारणताबोधवत् सुखत्वमुपलक्षणीकृत्य सुखविशेषे ब्रह्माभेदोपपत्तेः । यद्वा, नित्यं सुखं बोधयित्वा तत्र ब्रह्माभेदो विधिनैव बोध्यते; न च वाक्यभेदः, वाक्यैकवाक्यत्वात् । न च 'आनन्दम्' इत्यत्र नपुंसकलिङ्गत्वानुपपत्तिः, छान्दसत्वात् । न च "आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितम्" इति भेदपरषष्ठ्यनुपपत्तिः, 'राहोः शिरः' इतिवदभेदेऽपि षष्ठीदर्शनात् ; इति वाच्यम् ; आत्मनोऽनुभूयमानत्वेन नित्यसुखस्याऽप्यनुभवप्रसङ्गात् , सुखमात्रस्य स्वगोचरसाक्षात्कारजनकत्वनियमात् । न चात्माऽभिन्नतया सुखमनुभूयत एव, सुखत्वं तु तत्र नाऽनुभूयते, देहात्माऽभेदभ्रमवासनादोषात् , आत्यन्तिकदुःखोच्छेदरूपव्यञ्जकाभावाद् वेति वाच्यम् , आत्मसुखयोरभेदे सुखत्वस्याऽऽत्मत्वतुल्यव्यक्तिकत्वेनाऽऽत्मत्वाऽन्यजातित्वासिद्धेः । किञ्च, एवं सर्वाभेदश्रुत्या दुःखमपि सुखं

१ तत्त्वविनिश्चयः। २ इत आरभ्य विहितविक्षिप्तावान्तरपूर्वपक्षः "षष्ठीदर्शनात्" इत्येतत्पर्यन्तो मुक्तिसुखस्थापनापरः पूर्वपक्षः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात्, सिद्धार्थत्वेनाऽप्रामाण्यं चोभयत्र तुल्यमिति चेत् ॥ अत्रोच्यते– प्रेक्षावत्प्रवृत्त्यन्यथानुपपत्तिरेव सिद्धिसुखे मानम् । न च क्षुदादिदुःखनिवृत्त्यर्थमन्नपानादिप्रवृत्तिवदत्रोपपत्तिः, तत्रापि सुखार्थमेव प्रवृत्तेः, अन्यथाऽस्वादुपरित्याग-स्वादूपादानानुपपत्तेः, अभावे विशेषाभावेन कारणविशेषस्याऽप्रयोजकत्वात् । न च चिकित्सास्थलीयप्रवृत्तिवदुपपत्तिः, तत्रापि दुःखध्वंसानियतागामिसुखार्थितयैव प्रवृत्तेः । न च प्रायश्चित्तवदत्र दुःख-द्वेषयोरनिष्टेरेव प्रवृत्तिरिति वाच्यम्, तत्राप्य[3]भिमताऽऽगामिबोधिहेतुककर्मक्षयार्थितयैव प्रवृत्तेः । किञ्च, दुःखाभावदशायां 'सुखं नास्ति' इति ज्ञाने कथं प्रवृत्तिः, सुखहानेरनिष्टत्वात् ? । न च वैराग्याद् न तदनिष्टत्वप्रतिसंधानम्, विरक्तानामपि प्रशमप्रभवसुखस्येष्टत्वात्, अनुभवसिद्धं खल्वेतत् । किञ्च, दुःखे द्वेषमात्रादेव यदि तन्नाशानुकूलः प्रयत्नः स्यात् तदा मूर्च्छादावपि प्रवृत्तिः स्यात् । जायत एव बहुदुःखग्रस्तानां मरणादावपि प्रवृत्तिरिति चेत् । न, विवेकिप्रवृत्तेरेवाऽत्राऽधिकृतत्वात् । अतः सुष्ठूच्यते–

"दुःखाभावोऽपि नाऽऽवेद्यः पुरुषार्थतयेष्यते । न हि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः" ॥ १ ॥ इति ।

'दुःखं मा भूत्' इत्युद्दिश्य प्रवृत्तेर्दुःखाभाव एव पुरुषार्थः, तज्ज्ञानं त्वन्यथासिद्धमिति चेत् । सत्यम्, अवेद्यस्य तस्य ज्ञानादिहानिरूपाऽनिष्टानुविद्धतया प्रवृत्त्यनिर्वाहकत्वात् । एतेन 'वर्तमानोऽप्याचिरमनुभूयते' इति निरस्तम्, तथावेद्यताया मूर्च्छाद्यवस्थायामपि संभवात् । यत्तु "अशरीरं वा वसन्तं प्रिया-ऽप्रिये न स्पृशतः" इति श्रुतेर्मुक्तौ सुखाभाव-

१ प्रेक्षावत्प्रवृत्तौ । २ क्षुदादेरिति गम्यम् । ३ अभिमतो य आगामी बोधिहेतुकः कर्मक्षयस्तत्प्रयोजनतया, बोधिशब्दश्च समयपरिभाषया तत्त्वार्थश्रद्धानवाचकः । ४ दुःखाभावस्य । ५ दुःखाभावविशेषणम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धिः, द्वित्वेनोपस्थितयोः प्रिया-ऽप्रिययोः प्रत्येकं निषेधान्वयादिति । तदसत्, प्रिया-ऽप्रियोभयत्वावच्छिन्नाऽभावस्यैवाऽत्र विषयत्वात्, द्वित्वस्याऽऽख्यातार्थाऽन्विताऽभावप्रतियोगिगामितयैवोपपत्तेः, उपपादितं चैतदन्यत्र । न चेदेवम्,

" सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम् । तं वै मोक्षं विजानीयाद् दुष्प्रापमकृतात्मभिः " ॥ १ ॥

इत्यादिवचनविरोधः । न च शरीरादिकं विना सुखाद्यनुत्पत्तिर्बाधिका, शरीरादेर्जन्यात्मविशेषगुणत्वावच्छिन्नं प्रत्येव हेतुत्वात्, तत्र च जन्यत्वस्य ध्वंसप्रतियोगित्वरूपस्येश्वरज्ञानादेरिव मुक्तिकालीनज्ञानात् सुखादेरपि व्यावृत्तत्वादिति । अधिकं मत्कृतन्यायालोकादवसेयम्, वक्ष्यते चावशिष्टमुपरिष्टात् ॥ २ ॥

वक्तव्ये शास्त्रवार्तासमुच्चये पूर्वं सर्वविप्रतिपत्त्यविषयां शास्त्रवार्तामाह—

दुःखं पापात्सुखं धर्मात्सर्वशास्त्रेषु संस्थितिः । न कर्तव्यमतः पापं कर्तव्यो धर्मसंचयः ॥३॥

पापादधर्मात्, दुःखं भवति, धर्मात् सुखं भवति; इयं सर्वशास्त्रेषु समीचीना— अविप्रतिपत्तिविषया स्थितिर्मर्यादा । अतो दुःखहेतुतया पापम्— अशुभकर्महेतु, न कर्तव्यम्, सुखहेतुतया संचितोऽङ्गवैकल्यादिविरहितो धर्मः कर्तव्यः ॥ ३ ॥

शुभा-ऽशुभहेतूनां कर्तव्या-ऽकर्तव्यत्वमुक्तम्, अथ तद्धेतूनेवाह— "पाप-धर्महेतुपरिहारा-ऽऽसेवनाभ्यां तदकरणादि, इति तद्धेतूनाह" इत्यपरे ।

हिंसानृतादयः पञ्च तत्त्वाश्रद्धानमेव च । क्रोधादयश्च चत्वार इति पापस्य हेतवः ॥४॥ ॥ ४ ॥

---

१ पापहेतु-धर्महेत्वोः क्रमेण परिहारा-ऽऽसेवनयोरन्वयः । २ तस्य पापहेतोरकरणम्, आदिना धर्मकारणस्य करणम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमादयोगेन प्राणव्यपरोपणं हिंसा, धर्मविरुद्धं वचनमनृतम्; आदिपदाद् धर्मविरोधेन स्वामि-जीवाद्यननुज्ञातपरकीयद्रव्यग्रहणमदत्तादानम्, स्त्री-पुंसव्यतिकरलक्षणमब्रह्म, सर्वभावेषु मूर्च्छालक्षणः परिग्रहश्च परिगृह्यते। अत्र च "आदिशब्दादवरोधेऽप्यनृतग्रहणं प्राधान्यख्यापनार्थम्" इति वदन्ति, तत्ख्यापनं च प्रभृति-प्रधानार्थकयोरादिशब्दयोः कृतैकशेषयोर्बलादेवेति प्रतिभाति। "आद्ये परोक्षम्" (तत्त्वार्थ० १-११) इत्यत्रेवोत्तैरत्रयापेक्षमत्राऽऽद्यत्वमित्याक्षेपादेवाऽनृतस्य प्राधान्यं लभ्यत इत्यपरे। एते पञ्चाऽविरतिरूपाः। तत्त्वस्य यथास्थितवस्तुनोऽश्रद्धानं यस्मादिति बहुव्रीह्याश्रयणात् तत्त्वाऽश्रद्धानं मिथ्यात्वम्। एवकारः प्रसिद्ध्यर्थः। चः पुनरर्थः। क्रोधादयः- क्रोध-मान-माया-लोभाश्च चत्वारः, इति-एतावन्तः, योगानां साधारण्येनाऽग्रहणात्, विषय-प्रमादा-ऽऽर्त-रौद्रादीनां चात्रैवाऽन्तर्भावात्, इति- एवंप्रकारा वा; पापस्याऽशुभकर्मणः, हेतवः कारणानि ॥ ४ ॥

विपरीतास्तु धर्मस्य एत एवोदिता बुधैः। एतेषु सततं यत्नः सम्यक् कार्यः सुखैषिणा॥५॥

विपरीतास्तु— अहिंसा-सत्या-ऽस्तेय-ब्रह्मा-ऽपरिग्रह-सम्यग्दर्शन-क्षान्ति-मार्दवा-ऽऽर्जवा-ऽनीहारूपाः, तुर्विशेषणे, एत एव बुधैरर्हद्वचनानुसारिगीतार्थैः, धर्मस्य गुणाः शुभाशयलक्षणस्य हेतव उदिताः। अत एतेषु धर्महेतुषु, सततं निरन्तरं, सुखैषिणा कल्याणकामेन, सम्यग् विधिना, यत्नः कार्यः, सुखोपाये प्रवृत्तेरेव सुखोत्पत्तेः। स्वभावतः सुख-दुःखेच्छा-द्वेषवतामपि प्राणिनां सुखोपाये धर्मेऽनिच्छा, दुःखोपाये चाऽधर्म एवेच्छा खलु मोहमहाराजनिदेशविलसितम्। तदुक्तम्—

---

१ आदिना तीर्थङ्कर-गुर्वोग्रहः। २ हरिभद्रपादाः स्वविवरणे इति शेषः। ३ स्तेया-ऽब्रह्म-परिग्रहाणां त्रयमपेक्षते यतत्। ४ सुखेच्छावतां दुःखद्वेषवतां चेत्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

" धर्मस्य फलमिच्छन्ति धर्मं नेच्छन्ति मानवाः । फलं नेच्छन्ति पापस्य पापं कुर्वन्ति सादराः " ॥ १ ॥ इति ।

उक्तहेतुषु प्रवृत्त्या च, अहिंसादिनाऽविरतेः, सम्यग्दर्शनेन च मिथ्यात्वस्य, क्षमादिना च क्रोधादीनां निवृत्तेस्तन्मूलकदुःखविरहादनिवारितः सुखावकाशः । 'अहिंसया क्षमया क्रोधस्य, ब्रह्मचर्येण वस्तुविचारेण कामस्य, अस्तेया-ऽपरिग्रहरूपेण संतोषेण लोभस्य, सत्येन यथार्थज्ञानरूपेण विवेकेन मोहस्य, तन्मूलानां[1] च सर्वेषां निवृत्तिः' इति तु पातञ्जलमतानुसारिणः । तत्रेदं विभावनीयम्- अहिंसादिना मूलगुण[2]घातिक्रोधादिनिवृत्तावपि, संज्वलनादि[3]रूपक्रोधादिनिवृत्तिः क्षमाद्युत्तरगुणसाम्राज्यादेव ॥ ५ ॥

अहिंसादिसंपत्तिनिमित्तमेवाऽऽह-

साधुसेवा सदा भक्त्या मैत्री सत्त्वेषु भावतः । आत्मीयग्रहमोक्षश्च धर्महेतुप्रसाधनम् ॥ ६ ॥

सदा सर्वकालम्, भक्त्या बहुमानेन, साधुसेवा ज्ञानादिगुणवृद्धोपासना, भावतो निश्चयतः, सत्त्वेषु प्राणिषु, मैत्री प्रत्युपकारनिरपेक्षा प्रीतिः । आत्मीयग्रहस्य ममत्वपरिणामस्य मोक्षः परित्यागो यस्माद् बाह्यसङ्गत्याग इत्यर्थः । स च धर्महेतूनामहिंसादीनां प्रकृष्टं फलाऽयोगव्यवच्छिन्नं साधनम्; अत्र 'प्रसाधनम्' इत्येकवचनेन स्वे-तरसकलकारणनियतत्वं व्यज्यते ॥ ६ ॥

---

१ हिंसादिमूलानाम् । २ व्रत-श्रमणधर्मादयो मूलगुणाः । ३ परीषहाद्युपनिपाते संयमिनमपि सम्- ईषज्ज्वलयन्तीति व्युत्पत्तेर्विशिष्टाः क्रोधादयः संज्वलनशब्देन समये परिभाष्यन्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधुसेवाव्यापारमाह–

उपदेशः शुभो नित्यं दर्शनं धर्मचारिणाम्। स्थाने विनय इत्येतत् साधुसेवाफलं महत् ॥७॥

नित्यं निरन्तरं, शुभो निःश्रेयसाऽभ्युदयहेतुः, उपदेशो मौनीन्द्रप्रवचनप्रतिपादनरूपः, भवजलधियानपात्रप्रायः खल्वयम्, अस्य श्रवणमात्रादेव समीहितसिद्धेः, सुतरां च तदर्थज्ञानात्। तथा, धर्मचारिणामुद्यतविहारपरायणानां साधूनां, दर्शनं मुखारविन्दविलोकनम्; एतदपि परमबोधिलाभहेतुः, ततः क्लिष्टकर्मविगमात्। तथा, स्थाने शास्त्रोक्तस्थले, विनयः कर-शिरःसंयोगविशेषाद्यभिव्यङ्ग्यो मानसः परिणामविशेषः। इत्येतत् साधुसेवाफलं महद् धर्माङ्गसाधनम्, उपदेशादिना चारित्रप्रतिबन्धककर्मक्षयोपशमादिना चारित्रधर्माऽवाप्तेः ॥ ७ ॥

मैत्रीव्यापारमाह–

मैत्रीं भावयतो नित्यं शुभो भावः प्रजायते। ततो भावोदकाज्जन्तोर्द्वेषाग्निरुपशाम्यति ॥८॥

मैत्रीमिति। मैत्रीमुक्तलक्षणां, नित्यं सर्वकालं, भावयतोऽभ्यस्यतः, शुभः प्रशस्तः, भावः साम्यलक्षणो जायते, यमन्ये[1] 'प्रशान्तवाहिता'[2] इत्याचक्षते। ततस्तस्मात्, भावरूपादुदकात्, द्वेषलक्षणोऽग्निः, उपशाम्यति समूलमपयाति। एवं च शुद्धोपयोगलक्षणधर्मे साम्य-द्वेषोपशमद्वारा मैत्र्युपयुज्यत इति फलितम् ॥ ८ ॥

---

१ पातञ्जलमतानुयायिनः। २ योगदर्शने विभूतिपादे दशमे सूत्रे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्मीयग्रहमोक्षव्यापारमाह—

अशेषदोषजननी निःशेषगुणघातिनी । आत्मीयग्रहमोक्षेण तृष्णापि विनिवर्तते ॥ ९ ॥

अशेषाणां दोषाणां हिंसा-ऽनृतादीनां जननीव मातेव, तृष्णायां सत्यां सकलदोषाणामवश्यंभावात्; तदुक्तम्— "लोभमूलानि पापानि" इति । तथा, निःशेषाणां गुणानामुपशमादीनां घातिनी, सतां विनाशात्, असतां चोत्पत्तिप्रतिबन्धात् । आत्मीयग्रहमोक्षेण बाह्यसङ्गत्यागेन, तृष्णापि लोभवासनापि, विनिवर्तते विषयसङ्गरूपोद्बोधकाभावादनुत्थानोपहता सती प्रतिपक्षपरिणामाभ्यासेन क्षीयत इति यावत् ॥ ९ ॥

अतिदेशमाह—

एवं गुणगणोपेतो विशुद्धात्मा स्थिराशयः । तत्त्वविद्भिः समाख्यातः सम्यग्धर्मस्य साधकः ॥ १० ॥

एवंप्रकारैर्गुणगणैरुपेतः सहितः, विशुद्धात्माऽत्यन्ताऽपायहेतुकुग्रहमलरहितः, स्थिरचित्तो नास्तिक्याऽनुपहतचित्ताध्यवसायः, तत्त्वविद्भिः, सम्यग्-आगमोक्तविधिना, धर्मस्य साधको धर्महेतुनिर्वाहाधिकारी, समाख्यातः । एवंविधस्याऽऽदित एव मार्गानुसारिप्रवृत्त्युपलम्भात्, तदर्थमेवाऽऽदिकर्मविध्युपदेशाच्च । तदुक्तं ललितविस्तरायां ग्रन्थकृतैव— "तत्सिद्ध्यर्थं तु यतितव्यमादिकर्मणि, परिहर्तव्योऽकल्याणमित्रयोगः, सेवितव्यानि कल्याणमित्राणि, न लङ्घनीयोचितस्थितिः, अपेक्षितव्यो लोकमार्गः, माननीया गुरुसंहतिः, भवितव्यमेतत्तन्त्रेण, प्रवर्तितव्यं दानादौ, कर्तव्योदारपूजा भगवताम्, निरूपणीयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधुविशेषः, श्रोतव्यं विधिना धर्मशास्त्रम्, भावनीयं महायत्नेन, प्रवर्तितव्यं विधानतः, अवलम्बनीयं धैर्यम्, पर्यालोचनीया-ऽऽयतिः, अवलोकनीयो मृत्युः, भवितव्यं परलोकप्रधानेन, सेवितव्यो गुरुजनः, कर्तव्यं योगपददर्शनम्, स्थापनीयं तद्रूपादि च चेतसि, निरूपयितव्या धारणा, परिहर्तव्यो विक्षेपमार्गः, यतितव्यं योगसिद्धौ, कारयितव्या भगवत्प्रतिमा, लेखनीयं भुवनेश्वरवचनम्, कर्तव्यो मङ्गलजापः, प्रतिपत्तव्यं चतुःशरणम्, गर्हितव्यानि दुष्कृतानि, अनुमोदनीयं कुशलम्, पूजनीया मन्त्रदेवता, श्रोतव्यानि सच्चेष्टितानि, भावनीयमौदार्यम्, वर्तितव्यमुत्तमज्ञानेन" इति । 'नाऽनिवृत्ताऽधिकारायां प्रकृता-वेवं[1]भूताः' इति कापिलाः । 'नाऽनवाप्तभवविपाके' इति च सौगताः । 'अपुनर्बन्धकस्त्वेवंभूतः' इत्यार्हताः । न चाऽपुन-र्बन्धकस्याऽधिकारिविशेषणस्याऽनिश्चये प्रवृत्त्यनुपपत्तिरिति शङ्कनीयम्, अशाठ्यपूर्वकैतत्प्रयत्नेनैव तन्निश्चयात्; तदुक्तम्– "भ-ग्नोऽप्येतद्यत्नलिङ्गोऽपुनर्बन्धकः" इति; तं प्रत्युपदेशसाफल्यमिति । आदित एतत्प्रयत्न एवाऽस्य कथम् ?, इति चेत् । 'अविरुद्ध-कुलाचारादिपरिपालनाद्यर्थितया' इति गृ[2]हाण । अत 'एव सम्यग्दर्शनादिजन्यविवेकाभावादनाभोगतोऽपि "सदन्ध०" न्यायेन मार्ग[3]गमनमेवाऽस्य' इति वदन्ति । विभावनीयं चेदं "सुप्त-मण्डितप्रबोध-दर्शन०" न्यायेनेति दिग् ॥ १० ॥

ननु सुखार्थितानियता प्रेक्षावत्प्रवृत्तिर्धर्म[4] एवेति कुतो नियम्यते, स्रक्-चन्दना-ऽङ्गना[5]भाषादीनामपि सुखोपायत्वात् त[6]त्रापि प्रवृत्तेर्न्यायप्राप्तत्वात् ? । अत आह–

उपादेयश्च संसारे धर्म एव बुधैः सदा । विशुद्धो मुक्तये,सर्वं यतोऽन्यद् दुःखकारणम्॥११॥

---

१ धर्महेतुनिर्वाहाधिकारिणः । २ जानीहि । ३ क. 'गंग' । ४ सप्तम्यन्तं पदम् । ५ क. 'नादी' । ६ स्रक्-चन्दना-ऽङ्गनाभाषादौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपादेयश्च ग्राह्यश्च, बुधैर्ज्ञाततत्त्वैः, सदा दुःखदभोगादिकालव्यवच्छेदेन, मुक्तये मोक्षार्थं, विशुद्धो निरतिचारः, धर्म एव; यतोऽन्यद् धर्मभिन्नं, सर्वं स्रक्-चन्दना-ऽङ्गनाऽऽलिङ्गनादिकं, दुःखसाधनं नरकाद्यनुबन्धि । इत्थं च न तत्र प्रवृत्तिर्न्याय्यप्रामेत्यवधारणौचित्यम् । न खल्विष्टसाधनताज्ञानमात्रं प्रवृत्तिहेतुः, मधु-विषसंपृक्ताऽन्नभोजनेऽपि प्रवृत्तिप्रसङ्गात्; किन्तु बलवदनिष्टाननुबन्धीष्टसाधनताज्ञानम्, न च तथात्वं शृङ्गारादिविषयाणामिति । नन्वेवमविरतसम्यग्दृशां कथं निषिद्धकर्मणि प्रवृत्तिः?। रागान्धतया तज्जन्यदुःखे बलवत्त्वाऽप्रतिसन्धानादिति चेत् । न, तत्र बलवत्त्वस्य निषेधविधिनैव बोधात् । न्यूनदुःखजनकत्वज्ञानस्याऽप्यलसप्रवृत्तिप्रतिपन्थित्ववद् बलवद्दुःखानुबन्धित्वज्ञानस्याऽपि रागान्धप्रवृत्तावप्रतिपन्थित्वाद् न दोषः, इत्यपि न सम्यग्, दुःखमात्रभीरोरलसस्य प्रवृत्तिफलेच्छाया एवाऽनुदयादप्रवृत्त्युपपत्तेः, अत्र च रागान्धस्य द्वेषानुदयेऽपि विसामग्रीवशादेव प्रवृत्त्यनुपपत्तेः । अथ प्रवृत्ताविष्टसाधनताज्ञानमेव हेतुः, न तु बलवदनिष्टाननुबन्धित्वज्ञानमपि, फले उत्कटेच्छाविरहविशिष्टदुःखजनकत्वज्ञानं च प्रवृत्तिप्रतिबन्धकम्, इति न मधु-विषसंपृक्तान्नभोजने प्रवृत्तिः; अलसस्य च यदि फलेच्छाऽस्ति तदा दुःखद्वेषादपकृष्टा समा वा, न तूत्कटा, इति प्रतिबन्धकसाम्राज्याद् न तस्य प्रवृत्तिः; रागान्धानां च पारदार्यादिफले उत्कटेच्छासत्त्वात् तत्र प्रवृत्तिरिति चेत् । न, तथापि निषेधविधिसामर्थ्याद् दुःखेऽप्युत्कटताविज्ञानस्य प्रवृत्तिफले उत्कटेच्छाविघातकतया प्रकृतानुपपत्तेः । एतेन 'प्रवृत्तौ समानविशेष्यतया बलवद्द्वेषस्यैव कार्यसहभावेन ॥ ७ ॥

१ ख.ग.घ.च.'न्यत् सर्वं ध'। २ प्रवृत्तिहेतुरित्यन्वयः। ३ अस्याऽभ्यन्तरीकृतान्यपूर्वपक्षोत्तरपक्षस्य मूलपूर्वपक्षस्य "प्रवृत्त्यनुपपत्तेरिति चेत्" इति पर्यन्तेन संबन्धः। ४ ख. 'वदन्वयस्य'। ५ 'इदमनिष्टम्' इत्याकारकस्य द्वेषस्य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिबन्धकत्वादलसस्य स्वल्पदुःखजनकेऽपि बलवद्द्वेषाद् न प्रवृत्तिः, रागान्धस्य च बहुदुःखजनकेऽपि तद्विरहात् प्रवृत्तिः' इत्यपास्तम्, निषिद्धे बलवद्द्वेषस्याऽप्यावश्यकत्वात्, अन्यथा विषभक्षणादावपि[1] [2]तदुपपत्तेः; इति चेत् । सत्यम्, मोहप्राब[3]ल्यदोषमहिम्नैव पारदार्यादिफलेच्छाविघातस्य, [4]तत्र बलवद्द्वेषस्य चाऽनुदयाद् रागान्धप्रवृत्त्युपपत्तेः । तदुक्तम्–

"[5]जाणिज्जइ चिन्तिज्जइ जम्म-जरा-मरणसंभवं दुक्खम् । न य विसएसु विरज्जइ अहो ! सुबद्धो कवडगंठी ॥१॥" इति ।

शास्त्रबोधितं दुःखबलवत्त्वमेव वा कर्मोदयदोषेणाऽरोच्यत इति । अधिकमस्मत्कृताऽध्यात्ममतपरीक्षायाम् । नन्वेवमेतादृशकर्मणः शास्त्रेणाऽनपनयनात् तद्वैफल्यमिति चेत् । न, अनिकाचितस्य तस्य शास्त्राभ्यासनिवर्तनीयत्वादिति दिग् ॥ ११ ॥

यदुक्तम्– अन्यत् सर्वं दुःखकारणमिति, तदेव विवेचयति–

अनित्यः प्रियसंयोग इहेर्ष्याशोकवत्सलः । अनित्यं यौवनं चापि कुत्सिताचरणास्पदम् ॥१२॥

इह संसारे, ईर्ष्या प्रतिपक्षाभ्युच्चयजनितो मत्सरविशेषः, तदत्ययादिचिन्ताप्रभवो दुःखभेदः शोकः, तौ वत्सलाववश्योपनतकारणौ यत्र तादृशः; प्रियसंयोगो वल्लभसमागमः, अनित्यः स्वप्नसमागतकामिनीविलासवत् पर्यन्तविनश्वरप्रकृतिः । एतेन पूर्वं पश्चाच्च दुःखानुबन्धित्वं प्रियसंयोगस्योक्तम् । यौवनमपि कुसुमशरमित्रं वयोऽपि, कुत्सिताचरणस्य कामक्रीडादिगर्हिताचारस्याऽऽस्पदं मूलभूतम्, अनित्यं च ॥ १२ ॥

---

१ ग. 'पि प्रवृत्त्यनुप' । २ ख. 'तदनुप' । ३ ख. ग. घ. च. 'ल्याद् दो' । ४ अङ्गनासङ्गादिदुःखविषये ।
५ ज्ञायते चिन्त्यते जन्म-जरा-मरणसंभवं दुःखम् । न च विषयेषु विरज्यतेऽहो ! सुबद्धः कपटग्रन्थिः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा--

अनित्याः संपदस्तीव्रक्लेशवर्गसमुद्भवाः । अनित्यं जीवितं चेह सर्वभावनिबन्धनम् ॥१३॥

तीव्रो दुःसहो यः क्लेशवर्गो निशितशरप्रवाहपरायणकिराताक्रान्तविकटकान्तारगमन-प्रतिकूलपवनसमुच्छलद्बहल-जलपरिक्षुब्धजलधियानपात्रारोहण-प्रकृतिभीषणराजसेवादिजन्यः, ततः समुद्भव उत्पत्तिर्यासामेतादृश्यः संपदोऽनित्या विद्युद्विलसितवदकस्माद् नश्वराः । तथा, इह जगति, सर्वभावानिबन्धनं सकलव्यवहारकारणम्, जीवितं चाऽनित्यम् । इदमैहिकं दुःखमुक्तम् ॥ १३ ॥

अथाऽऽमुष्मिकं तदाह-

पुनर्जन्म पुनर्मृत्युर्हीनादिस्थानसंश्रयः । पुनः पुनश्च यदतः सुखमत्र न विद्यते ॥१४॥

पुनरेतज्जन्मापेक्षयाऽग्रिमं जन्म, बीजरूपस्य जन्मान्तरानिमित्तादृष्टस्य सत्त्वेऽङ्कुररूपस्य जन्मान्तरस्य प्रादुर्भावात् । तथा, पुनर्जन्मनि सति पुनर्मृत्युः, जन्मनो मृत्युनान्तरीयकत्वात् । तथा, प्रागुपात्तनीचैर्गोत्रादिकर्मविपाकात्पुनः पुनश्च वारं वारं च, हीनादिस्थानानामधर्मा[1]-ऽधमतरा[2]-ऽधमतमादिजातीनां संश्रय आश्रयणं यद् यस्मात् कारणात्, अतो हेतोः, अत्र जगति, सुखं प्रवृत्त्युपयोगि न विद्यते, व्यवहारतः प्रतिभासमानस्याऽपि सांसारिकस्य सुखस्य बहुतरदुःखानुविद्धत्वेन हेयत्वात्, निश्चयतस्तु कर्मोदयजनितत्वात् सुखशब्दवाच्यतामेव नेदमास्कन्दति । तदुक्तं विशेषावश्यके[3]-

१ ग.घ.च. 'मादि' । २ ख.'रादि' । ३ एकादशे गणधरवादे गाथा ३३,३४,३५ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

" [1]पुण्णफलं दुक्खं चिय कम्मोदयओ फलं व पावस्स । णणु पावफले वि समं पच्चक्खविरोहिया चेवं ॥ १ ॥
जत्तो चिय पच्चक्खं सोम्म ! सुहं णत्थि दुक्खमेवेदं । तप्पडियार[2]विभिण्णं तो पुण्णफलं ति दुक्खं ति ॥ २ ॥
विसयसुहं दुक्खं चिय दुक्खपडियारओ तिगिच्छि व्व । तं सुहमुवयाराओ ण य उवयारो विणा तच्चं ॥ ३ ॥" इति ।

अत एव व्यास-पतञ्जलिप्रभृतिभिरपि संसारे सुखाभाव एवोक्तः । गौतमेनापि चैकविंशतिदुःखमध्य एव सुखं परिगणितमिति । न च वस्तुभूतसुखप्रतिक्षेपाद् विपर्यासः, स्वाभाविकसुख-विकाररूपयोर्द्वयोरेकपक्षनिक्षेपे विपर्यासायोगादिति दिक्॥१४॥

अथ फलितमाह–

[3]प्रकृत्यासुन्दरं ह्येवं संसारे सर्वमेव यत्। अतोऽत्र वद किं युक्ता क्वचिदास्था विवेकिनाम्?

एवमुपदर्शितप्रकारेण, हि निश्चितं, यद् यस्मात् कारणात्, सर्वमेव प्रियसंयोगादिकं, संसारे जगति, प्रकृत्या स्वभावेन, असुन्दरं बलवदनिष्टानुबन्धीष्टसाधनत्वाभाववत् । अतो हेतोः, अत्र संसारे, 'वद' इति शिष्यसंबोधनं व्यामोहादिदोषनिरासेनाऽवधानार्थम्, किं क्वचित् प्रियसंयोगादौ, विवेकिनामिष्टसाधनत्वाद्यंशेऽभ्रान्तानाम्, आस्था प्रवृत्त्यादिरूपा, तत्प्रवर्त-

---

१ पुण्यफलं दुःखमेव कर्मोदयतः, फलमिव पापस्य । ननु पापफलेऽपि समं प्रत्यक्षविरोधिता चैवम् ॥ १ ॥
यत एव प्रत्यक्षं सौम्य ! सुखं नास्ति दुःखमेवेदम् । तत्प्रतीकारविभिन्नं ततः पुण्यफलमिति दुःखमिति ॥ २ ॥
विषयसुखं दुःखमेव दुःखप्रतीकारतश्चिकित्सेव । तत्सुखमुपचाराद् न चोपचारो विना तथ्यम् ॥ ३ ॥

२ विशेषावश्यकपुस्तके 'विभत्तं' इति पाठः । ३ मूलपुस्तके, स्वोपज्ञटीकायां च 'प्रकृत्यसु' इति समस्त एव पाठो दृश्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कवचनप्रामाण्यप्रतिपत्तिरूपा वा युक्ता ?, न युक्तेति काक्वर्थः ॥ १५ ॥

अपवादमाह–

मुक्त्वा धर्मं जगद्वन्द्यमकलङ्कं सनातनम् । परार्थसाधकं धीरैः सेवितं शीलशालिभिः॥१६॥

जगतां वन्द्यमिष्टसाधनत्वेन स्पृहणीयम्, अकलङ्कमैहिका-ऽऽमुष्मिकदोषाननुबन्धिनं, सनातनं प्रवाहापेक्षयाऽनादिनिधनम् । अनेनाऽऽधुनिकत्वशङ्कानिरासः । परः प्रकृष्टो मोक्षः, अर्थो धनम्, उपलक्षणात् कामोऽपि गृह्यते, तत्साधकं तन्निबन्धनम् । अनेन चतुर्वर्गाभ्यर्हितत्वमुक्तम्। तथा, शीलशालिभिः काष्ठाप्राप्तब्रह्मचर्यैस्तीर्थकरादिभिः, सेवितमाचीर्णम्। अनेन सुसंप्रदायायातत्वमुक्तम् । एतादृशं धर्मं मुक्त्वाऽन्यत्राऽऽस्था नोचिता, धर्मे तूचितैव, दोषाभावादिति भावः ॥ १६ ॥

आह तत्रापि नो युक्ता यदि सम्यग्निरूप्यते। धर्मस्याऽपि शुभो यस्माद्बन्ध एव फलं मतः॥१७

आह पूर्वपक्षी प्रत्यवतिष्ठते– तत्रापि धर्मेऽपि, नो युक्ताऽऽस्था, यदि सम्यग् निरूप्यते सूक्ष्ममीक्ष्यते, यस्माद् हेतोः धर्मस्याऽपि शुभः सातादिहेतुः, बन्ध एवाऽभिनवकर्मपुद्गलपरिग्रह एव, फलं मत इष्टः ॥ १७ ॥

ननु किमेतावता, इष्टसाधनत्वस्याऽनपायात् ?, अत आह–

न चायसस्य बन्धस्य तथा हेममयस्य च। फले कश्चिद्विशेषोऽस्ति पारतन्त्र्याविशेषतः॥१८॥ ॥ ९ ॥

---

१ "भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते" इति तल्लक्षणात्। २ ख. ग. घ. च. 'र्मे नो'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न चाऽऽयसस्य लोहनिगडादेः, हेममयस्य च कनकशृङ्खलादेः, बन्धस्य फले कश्चिदनुकूलत्व-प्रतिकूलत्वकृतः बलवत्त्वाऽबलवत्त्वकृतो वा विशेषोऽस्ति, पारतन्त्र्यस्य स्वेच्छानिरोधदुःखस्याऽविशेषत उभयत्र विशेषाभावात् ॥ १८ ॥

उपसंहरन्नाह–

तस्माद्धर्मवत्त्याज्यो धर्मोऽप्येवं मुमुक्षुभिः। धर्माधर्मक्षयान्मुक्तिर्मुनिभिर्वर्णिता यतः॥१९॥

तस्मात् संसारपरिभ्रमणजन्यबलवद्दुःखानुबन्धित्वात्, अधर्मवद् धर्मोऽपि त्याज्यः, मुमुक्षुभिर्मोक्षेच्छावद्भिः, तदितरेषां संसारसुखाविरक्तत्वेन विवेकाभावात् । बलवद्दुःखानुबन्धित्वेन त्याज्यत्वमुक्त्वा, इष्टसाधनीभूताभावप्रतियोगित्वेनापि त्याज्यत्वमाह– मुनिभिः परिणतप्रवचनैः, धर्मा-धर्मयोरुभयोः क्षयाद् मुक्तिर्यतो वर्णिता । अतोऽप्यधर्मवत् त्याज्यो धर्म इति भावः ॥ १९ ॥

उच्यत एवमेवैतत् किन्तु धर्मो द्विधा मतः। संज्ञानयोग एवैकस्तथान्यः पुण्यलक्षणः॥२०॥

उच्यते अत्र समाधानं क्रियते– एतत् पूर्वोक्तं धर्मस्य संसारहेतुत्वं मोक्षविरोधित्वं च, एवमेवाऽविप्रतिपत्तिविषय एव । ननु कथमेकस्य मोक्षजनकत्वं, तत्प्रतिबन्धकत्वं च, विरोधात् ?; अत आह– किन्तु धर्मो धर्मपदवाच्यः, द्विधा द्विप्रकार उक्तः । एवं च धर्मपदमक्षादिपदवद् नानार्थकम्, तथा च मोक्षजनक-प्रतिबन्धकयोर्विभेदाद् न विरोधः, इत्यनुपदं ग्रन्थकृता स्पष्टाक्षरैरेव वक्ष्यते । द्वैविध्यमेव स्पष्टयति– एको धर्मः, संज्ञानयोगः– समीचीनमर्हत्प्रवचनानुसारि ज्ञानं गुरुपारतन्त्र्यनिमित्तं संवेदनं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन सहितो योगः शुभवीर्योल्लासः । एवकारः प्रसिद्ध्यर्थः । तथा, अन्यो धर्मः, पुण्येन सातादिना कार्येण लक्ष्यत इति पुण्यलक्षणः ॥ २० ॥

अत्र पुण्यलक्षणधर्मस्य सुप्रसिद्धत्वाज्ज्ञानयोगधर्मस्य स्वरूपं फलं चाह—

ज्ञानयोगस्तपः शुद्धमाशंसादोषवर्जितम् । अभ्यासातिशयादुक्तं तद्धि मुक्तेः प्रसाधकम् ॥ २१ ॥

आशंसादोषेणेह-परलोकादिदुष्टाशंसया वर्जितं तज्जन्येच्छाऽविषयीभूतं, शुद्धं ज्ञान-संयमोपबृंहितं, तपो ज्ञानयोग उच्यते। तदुक्तगुणोपपन्नं तपोऽभ्यासातिशयात् क्षायोपशमिकभावपूर्वकदृढयत्नात्, विमुक्तेः प्रसाधकं मोक्षस्य जनकमुक्तम्; दुष्टाशंसापूर्वकस्य तपसो निषिद्धत्वात्, "[1]नो इहलोगट्ठाए तवमहिट्ठिज्जा, नो परलोगट्ठाए तवमहिट्ठिज्जा" इति वचनात्; केवलस्य च [2]तस्य विशिष्टनिर्जरां प्रत्य[3]जनकत्वात्, समुदितानामेव त्रयाणां प्रकाश-व्यवदाना-ऽनाश्रवरूपव्यापारैर्निःशेषकर्माभावोपपत्तेः, अभ्यासस्य च स्वजनकभाववृद्धिहेतुत्वेन[4] ततोऽशुभवासनाक्षयादविलम्बेन फलोदयाच्च। अङ्गीकृतं च पातञ्जलैरप्येतत्–"अभ्यास-वैराग्याभ्यां तन्निरोधः" (पात० १, १२) ताः प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतिलक्षणाः पञ्च वृत्तयः। तत्र प्रत्यक्षादीनि प्रमाणानि। विपर्ययो मिथ्याज्ञानम्। तदविद्या-ऽस्मिता-राग-द्वेषा-ऽभिनिवेशभेदेन पञ्चविधम्। "अनित्या-ऽशुचि-दुःखा-ऽनात्मसु नित्य-शुचि-सुखा-ऽऽत्मख्यातिरविद्या" (पात० २, ५) "[5]दृग्-दर्शनशक्त्योरेकात्मतेवाऽस्मिता" (पात० २, ६) "[6]सुखानुशयी रागः"

१ नो इहलोकार्थतया तपोऽधितिष्ठेत्, नो परलोकार्थतया तपोऽधितिष्ठेत्। २ तपसः। ३ क. 'त्यप्रत्यलत्वा'। ४ ख. ग. घ. 'नाऽशु'।
५ दृक्शक्तिः पुरुषः, दर्शनशक्तिश्च बुद्धिस्तयोरित्यर्थः। ६ सुखानुभवात् पश्चाच्चेतसि शेते तच्छीलश्चितवृत्तिविशेषः, अभिलाष इति यावत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(पात० २, ७) "दुःखानुशयी द्वेषः" (पात० २, ८) "स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः"। (पात० २, ९) शब्द-ज्ञानानुपाती वस्तुशून्यः प्रमाभ्रमविलक्षणोऽसदर्थव्यवहारो विकल्पः, शशविषाणम्, असत्पुरुषस्य चैतन्यमित्यादि। "अभावप्रत्ययालम्बना वृत्तिर्निद्रा" (पात०१,१०) चतसृणां वृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणस्तदालम्बना वृत्तिर्निद्रा न तु ज्ञानाद्यभावमात्रमिति भावः। अनुभूतविषयासंप्रमोषप्रत्ययः स्मृतिः, पूर्वानुभवसंस्कारजं ज्ञानमित्यर्थः। तासां निरोधः सवासनानां क्षयः। स चाऽभ्यासेन वैराग्येण च भवति। वैराग्येण चित्तनद्या विषयप्रवाहो निवार्यते, समाध्यभ्यासेन च प्रशान्तवाहिता संपाद्यते, इति द्वारभेदादुभयोः समुच्चयात्, एकद्वारत्वे हि व्रीहि-यववद् विकल्प एव स्यात्, न तु समुच्चय इति। "तत्र स्थितौ यत्नोऽभ्यासः" (पात० १,१३) तत्र द्रष्टरि शुद्धे चित्तस्याऽवृत्तिकस्य प्रशान्तवाहितारूपा निश्चला स्थितिस्तदर्थं यत्नो मानस उत्साहो 'बहिर्मनो निरोत्स्यामि' इत्याकारः, स चाऽऽवर्त्यमानोऽभ्यास उच्यत इति। "स तु दीर्घकाल-नैरन्तर्य-सत्कारासेवितो दृढभूमिः"(पात०१,१४) अनिर्वेदेन दीर्घकालासेवितः, अविच्छेदेन निरन्तरासेवितः, श्रद्धातिशयेन सत्कारासेवितो दृढभूमिर्विषयसुखवासनया चालयितुमशक्यो भवति, अन्यथा तु लय-विक्षेप-कषाय-सुखास्वादापरिहारे व्युत्थानसंस्कारप्राबल्यात् समाधिसंस्काराणां भङ्गुरतयाऽदृढभूमिरेव स्यात्, इति कथं ततो विशिष्टफलसिद्धिः स्यात्?।

वैराग्यं च द्विविधम्—परम्, अपरं च। तत्र यतमानसंज्ञा-व्यतिरेकसंज्ञै-केन्द्रियसंज्ञा-वशीकारसंज्ञाभेदैरपरं चतुर्धा। तत्र किमिह

१ पूर्वभवीयमरणदुःखानुभवजन्यो वासनासंघातः स्वरसपदवाच्यः, तेन रूपेण वहनशील इत्यर्थः।
२ पञ्चानां वृत्तीनाम्। ३ मूलसूत्रे निमित्तसप्तम्यङ्गीकारात्। ४ ख. ग. घ. 'द्वारैर्व्यु'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सारं ?, 'किं चाऽसारम्?, इति गुरु-शास्त्रपारतन्त्र्येण ज्ञानोद्योगो यतमानम् । विद्यमानस्वचित्तदोषाणां मध्येऽभ्यस्यमानविवेके-नैतावन्तः पक्वाः, एतावन्तश्चावशिष्टाः, इति चिकित्सावद् विवेचनं व्यतिरेकः । दृष्टा-ऽऽनुश्रविकविषयप्रवृत्तेर्दुःखमयत्वबोधेन बहिष्प्रवृत्तिमजनयन्त्या अपि तृष्णाया औत्सुक्यमात्रेण मनस्यवस्थानमेकेन्द्रियम् । तृष्णाविरोधिनी चित्तवृत्तिर्ज्ञान-प्रसादरूपा वशीकारः । तदिदं सूत्रितम्– "दृष्टा-ऽऽनुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्" (पात० १,१५) इति । तदन्तरङ्गं साधनं संप्रज्ञातस्य समाधेः, असंप्रज्ञातस्य तु बहिरङ्गम् । परं तु वैराग्यं संप्रज्ञातसमाधिपाटवेन गुणत्रयात्मकात्[3] प्रधानाद् विविक्तस्य पुरुषस्य साक्षात्कारादगुणशेषगुणत्रयव्यवहारे[4]षु वैतृष्ण्यं यत्[5]। "तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्" (पात० १, १६) इति सूत्रम् । तदन्तरङ्गं साधनमसंप्रज्ञातसमाधेः, तत्परिपाकनिमित्ताच्च चित्तोपशमातिशयात् कैवल्यम्, इति यथास्थानं व्यवस्थापनात् ।

अत्रेदमवधेयम्– अभ्यस्तं तपः समुच्छिन्नक्रियाऽनिवृत्तिरूपं[2] ध्यानमेव, तस्यैव साक्षाद् मोक्षहेतुत्वात् । न च मोक्षहेतु-शुद्धात्मज्ञानेन तस्य व्यवधानम्, समकालभाविनोरपि ज्ञान-ध्यानयोः प्रदीप-प्रकाशयोरिव निश्चयतो हेतुत्वाश्रयणात् । तदिद-मभिप्रेत्योक्तम्–

" मोक्षः कर्मक्षयादेव स चात्मज्ञानतो भवेत् । ध्यानसाध्यं मतं तच्च तद् ध्यानं हितमात्मनः ॥ १ ॥ " इति ।

समाधिरिति च शुक्लध्यानस्यैव नामान्तरं परैः परिभाषितम्; तथाहि– चतुर्विधस्तैः संप्रज्ञातसमाधिरुक्तः– सवितर्कः, निर्वितर्कः, सविचारः, निर्विचारश्चेति । यदा स्थूलं महाभूतेन्द्रियात्मकषोडशविकाररूपं विषयमादाय पूर्वा-परानुसन्धानेन,

१ ख. ग. घ. च. 'किं न्वसा' । २ सत्त्व-रजः-तमोरूपात् । ३ प्रकृतेः । ४ क. 'हारे वै' । ५ क. 'ण्यं तत्' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दार्थोल्लेखेन च भावना क्रियते सविकल्पकवृत्तिरूपा, तदा सवितर्कः समाधिः। यदा त्वस्मिन्नेवालम्बने शब्दार्थस्मृतिविलये तच्छून्यत्वेन भावना प्रवर्तते निर्विकल्पकवृत्तिरूपा, तदा निर्वितर्कः समाधिः। यदाऽन्तःकरणं सूक्ष्मविषयमालम्ब्य देश-काल-धर्मावच्छेदेन सविकल्पकवृत्तिरूपा भावना प्रवर्तते, तदा सविचारः समाधिः। यदा चास्मिन्नेव विषये तदवच्छेदं विना निर्विकल्पकवृत्तिरूपा धर्मिमात्रभावना प्रवर्तते, तदा निर्विचारः समाधिरिति। रजस्तमोलेशानुविद्धान्तःकरणसत्त्वस्य भावनात्मको भाव्यमानसत्त्वोद्रेकेण सानन्दः समाधिः, यत्र बद्धधृतयः प्रधान-पुरुषतत्त्वान्तराऽदर्शिनो विदेहशब्देनोच्यन्ते। रजस्तमोलेशानभिभूतशुद्धसत्त्वमालम्ब्य भावनात्मकश्चिच्छक्तेरुद्रेकात् सत्तामात्रावशेषत्वेन सास्मितः समाधिः, यत्र स्थिताः परं पुरुषं पश्यन्ति। तदिदं समाधिद्वयं ग्रहीतृ-ग्रहणयोरपि चित्तवृत्तिविषयतया ग्राह्यकोटावेव निक्षेपाद् नातिरिच्यते। तदिदमुक्तम्– "सूक्ष्मविषयत्वं चालिङ्ग[1]पर्य[2]न्तम्" (पात० १,४५) इति। सूत्रितं च– "चतुर्विधा हि ग्राह्यसमापत्तिः" इत्यादि। "क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृ-ग्रहण-ग्राह्येषु तत्स्थतदञ्जनता समापत्तिः" (पात०१,४१) इति समापत्तिलक्षणम्। तत्स्थता तदेकाग्रता तन्मयता न्यग्भूते चित्ते भाव्यमानोत्कर्षः स्फटिकोपरागस्थानीयः। निर्विचारसमाधेः प्रकृष्टाभ्यासाच्छुद्धसत्त्वोद्रेके क्लेशवासनारहितस्य चित्तस्य भूतार्थविषयः क्रमाननुरोधी स्फुटः प्रज्ञालोकः प्रादुर्भवति। तदुक्तम्– निर्विचारवैशारद्येऽध्यात्मप्रसादः" (पात० १,४७) इति "ऋतम्भरा तत्र प्रज्ञा" (पात० १,४८)। ऋतं सत्यमेव बिभर्ति भ्रान्तिकारणाभावात्, इति ऋतम्भरा, यौगिकीयं संज्ञा, सा चोत्तमो योगः, तथा च भाष्यम्–

---

१ अलिङ्गे प्रधाने पर्यन्तः परिसमाप्तिर्यस्य तदित्यर्थः। २ पातञ्जलयोगसूत्रे 'पर्यवसानम्' इति पाठः समुपलभ्यते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"आगमेनाऽनुमानेन ध्यानाभ्यासरसेन च । त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥ १ ॥" इति ।

तज्जन्यसंस्काराणां व्युत्थानादिसंस्कारविरोधित्वात् । तत्प्रभवप्रत्ययाभावेऽप्रतिहतप्रसरः समाधिः । ततस्तज्जा प्रज्ञा, ततस्तत्कृताः संस्काराः, इति नवो नवः संस्काराशयो वर्धते, ततश्च प्रज्ञा, ततश्च संस्कार इति । ततो योगिप्रयत्नविशेषेण संप्रज्ञातसमाधेर्व्युत्थानजानां च संस्काराणां निरोधादसंप्रज्ञातसमाधिर्भवति । तदुक्तम्– "तस्यापि निरोधे सर्वनिरोधाद् निर्बीजः समाधिः" (पात०१, ५१) इति । तदा च निरोधचित्तपरिणामप्रवाहः, तज्जन्यसंस्कारप्रवाहश्चावतिष्ठते । तदुक्तम्– "संस्कारशेषोऽन्यः" (पात०१,१८) इति । [1]ततः प्रशान्तवाहिता संस्कारात् । [2]सा ह्यवृत्तिकस्य चित्तस्य निरिन्धनाग्निवत् प्रतिलोमपरिणामेनोपशमः, तत्र पूर्वप्रशमजनितः संस्कार उत्तरोत्तरप्रशमहेतुरिति । ततो निरिन्धनाग्निवच्चित्तक्रमेणोपशाम्यद्व्युत्थानसमाधिनिरोधसंस्कारैः सह स्वस्यां प्रकृतौ लीयत इति । अत्र चतुर्विधोऽपि संप्रज्ञातसमाधिः शुक्लध्यानस्याद्यपादद्वयं प्रायो नातिशेते । षोडशकादित्रिषयोपवर्णनं च तत्राऽप्रामाणिकस्वप्रक्रियामात्रम्, तत्र मानाभावात्, आत्मविषयकसाक्षात्कारे आत्मविषयकस्यैव ध्यानस्य हेतुत्वाच्च । वितर्कश्चात्र विशिष्टश्रुतसंस्काररूपः, विचारश्च योगान्तरसंक्रमरूपो ग्राह्यः, विशिष्टज्ञाने सविकल्पक-निर्विकल्पकव्यवस्थायोगात्, परिभाषामात्रस्य निरालम्बनत्वात्; पृथक्तानभिधानेन चात्र न्यूनत्वम् । प्रज्ञालोकश्च केवलज्ञानादधः सचित्रालोककल्पश्चतुर्ज्ञानप्रकर्षोत्तरकालभावी प्रातिभाऽपरनामा ज्ञानविशेषः । ऋतम्भरा च केवलज्ञानम् । ततः संस्काराशयवृद्धिश्चासंभवदुक्तिका, मतिज्ञानभेदस्य संस्कारस्य तन्मूलभूतज्ञानावरणक्षयेणैव क्षीणत्वात् । अतश्चरमशुक्लध्यानांशस्थानीयोऽसं-

१ "तस्य प्रशान्तवाहिता संस्कारात्" इति पातञ्जलयोगसूत्रम् (३,१०) । २ प्रशान्तवाहिता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रज्ञातसमाधिर्न वृत्तिनिरोधार्थमपेक्षणीयः, किन्तु भवोपग्राहिकर्मक्षयार्थमिति सूक्ष्ममीक्षणीयम्, ज्वरपरवशपुरुषवचनप्रायाणां परतन्त्राणां काकतालीयन्यायेनैव कचिदर्थाबाधादिति दिग्। तदेवं ध्यानरूपमेवं तपो ज्ञान-क्रियाभ्यामपृथग्भूतमपृथग्भूततत्तद्व्यापारयोगि परमयोगाभिधमपवर्गहेतुरिति निर्व्यूढम्। तत्र च धर्मपदशक्तिराप्तवाक्यादेव, स्वारसिकप्रयोगे लक्षणानवकाशात्, अन्यथा विनिगमनाविरहात्। देवार्चादौ धर्मजनकत्वेनैव धर्मपदप्रयोगो न तु स्वरसत इति चेत्। तथाप्यत्र योगजादृष्टप्रयोजकतया धर्मपदप्रयोग इति न वैषम्यम्॥ २१ ॥

गूढाशयः पृच्छति–

धर्मस्तदपि चेत्सत्यं किं न बन्धफलः स यत्। आशंसावर्जितोऽन्येपि[3] किं नैवं चेन्न यत्तथा॥२२

तदपि शुद्धतपोऽपि, धर्मो धर्मव्यवहारविषयः। गूढाशय एवोत्तरयति– इति चेत्, सत्यं धर्मपदव्यवहारविषय एवेत्यर्थः। उद्घाटिताशयः पृच्छति– बन्धफलः कर्मबन्धहेतुः, स धर्मः, किं न भवति ?; धर्मव्यवहारविषयत्वं हि शुभबन्धहेतुत्वेन सहचरितमुपलब्धम्, अतो ज्ञानयोगेनाऽपि धर्मेण सता बन्धफलेन भवितव्यमिति परस्याशयः। व्यक्ताशय एव समाधत्ते– यद् यस्माद्धेतोः, स धर्मः, आशंसावर्जितः, प्रसिद्धधर्मव्यापकधर्माभिधानमेतत्; अन्यो हि धर्मो बन्धहेतुः, अन्यथानीदृशः, अतो न धर्मव्यवहारविषयत्वेन बन्धहेतुत्वमस्य, सहचारमात्रेण व्याप्त्यग्रहात्, अन्यथा पार्थिवत्व-लोहलेख्य-

१ ख. ग. घ. च. 'णां का'। २ ख.ग.घ.च.'ततत'। ३ मूल-स्वोपज्ञटीकयोः 'अन्योऽपि' इति पाठः। ४ क. 'र्मव्य'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वयोरपि [1]तद्ग्रहप्रसङ्गादित्याशयः। इदमेव व्यतिरेकाशङ्कानिरासेन द्रढयति– अन्येऽपि पुण्यलक्षणा धर्माः, एवम्–अबन्धफलाः, किं न ? इति चेत्। यद् यस्माद्धेतोः, तथा आशंसावर्जिता न, अबन्धहेतुत्वनियतधर्माभावाभिधानमेतत्। [2]नन्विदमयुक्तमुक्तम्, एकस्यैव चारित्रस्य सरागत्व-वीतरागत्वाभ्यां शुभबन्ध-मोक्षोभयहेतुत्वसंभवात्। अत एव पूर्वतपः-पूर्वसंयमयोः स्वर्गहेतुत्वं भगवत्यामुक्तम्। न च बन्ध-मोक्षजनकतावच्छेदकरूपविभेदाद् नोक्तदोष इति वाच्यम्, सरागत्व-वीतरागत्वातिरिक्ततज्जनकतावच्छेदकरूपकल्पने मानाभावात्। कर्मक्षयोपशम-क्षयजन्यतावच्छेदकयोरेव तज्जनकतावच्छेदकत्वमिति चेत्, एवं सति शैलेशीसमयभाविन एव चारित्रस्य मोक्षहेतुत्वपर्यवसाने ऋजुसूत्रनयाश्रयणप्रसङ्गादिति चेत्। सत्यम्, तदुपगृहीतव्यवहाराश्रयणे-नैवेत्थमभिधानात्; शुद्धर्जुसूत्रनयेन तु ज्ञान-तपसोरन्यथासिद्धत्वम्, तज्जन्यक्रियाया एव मोक्षोपपत्तेः। यदाह भगवान् भद्रबाहुः– "[3]सद्दुजुसुआणं पुण निव्वाणं संजमो चेव" इति। यद्वा, आशंसासाहित्य-राहित्याभ्यां बन्ध-मोक्षजनकतावच्छेदकरूपभेद एवाऽत्रोपवर्णितः। तथा"[4]अन्यः पुण्यलक्षणः" इत्यत्रान्यपदं च वैधर्म्यार्थकम्, अतो न किञ्चिदनुपपन्नम्। परे तु–'तपस्त्व-चारित्रत्वाभ्यामेव मोक्षहेतुता, संकोचे मानाभावात्, सरागताकालीनप्रशस्तसङ्गादेव स्वर्गोत्पत्तेर्वस्तुतः सरागतपसः स्वर्गहेतुत्वं "सविशेषणे हि०" इति न्यायेन रागमात्र एव पर्यवस्यति' इत्याहुः। अपरे तु–'मोक्षोद्देशेन क्रियमाणयोस्तपः-संयमयोर्मोक्षहेतुत्वमेव, स्वर्गस्य चानुद्देश्यत्वाद् न फलत्वम्, कर्मांशप्रतिबन्धाच्च न तदा मोक्षोत्पादः, ततो गत्यन्तरजनकादृष्टा-

१ तच्छब्देन व्याप्तिपरामर्शः, न चेयमनयोर्गृह्यते, वज्रे ह्यपि पार्थिवत्वे लोहलेख्यत्वाभावेनाऽविनाभावाभावादिति भावः। २ इतः प्रभृति 'प्रसङ्गात्' इत्येतत्पर्यन्तः प्रतिविहिताभ्यन्तरपूर्वपक्षकः पूर्वपक्षः। ३ शब्द-ऋजुसूत्रयोः पुनर्निर्वाणं संयम एव। ४ श्लो० २०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावादर्थत एव स्वर्गोत्पत्तिः' इत्याहुः । सर्वे एवैते सदादेशाः, भगवदनुमतविचित्रनयाश्रितमहर्षिवचनानुयायित्वात्, इत्यवसेयम् ॥ २२ ॥

उक्तधर्मद्वैविध्यं शब्दान्तरेण तन्त्रान्तरेऽपि संमतमित्याह–

भोगमुक्तिफलो धर्मः स प्रवृत्तीतरात्मकः।सम्यङ्मिथ्यादिरूपश्च गीतस्तन्त्रान्तरेष्वपि॥२३॥

भोगफल एको धर्मः, अन्यश्च मुक्तिफल इति शैवाः । प्रवृत्त्यात्मक एकः, निवृत्त्यात्मकश्चान्य इति त्रैविद्यवृद्धाः । सम्यग्रूप एकः, मिथ्यारूपश्चान्य इति शाक्यविशेषाः, आदिपदाद् हेयोपादेया-ऽभ्युदयनिःश्रेयसपरिग्रहः । एवं तन्त्रान्तरेषु जैनातिरिक्तदर्शनेष्वपि, अयं द्विभेद उक्तः ॥ २३ ॥

आगमविप्रतिपन्नं प्रति संज्ञानयोगे कार्यान्यथानुपपत्तिं प्रमाणयति–

तमन्तरेण तु तयोः क्षयः केन प्रसाध्यते ?। सदा स्यान्न कदाचिद्वा यद्यहेतुक एव सः॥२४॥

तमन्तरेण तु संज्ञानयोगं विना तु, तयोर्धर्मा-ऽधर्मयोः, क्षयः केन हेतुना, प्रसाध्यते ?, न केनापि । तथाविधहेत्वनुपलम्भादहेतुक एवायमस्तु, सहेतुकविनाशस्य दुःश्रद्धानत्वादिति बौद्धाशङ्कायामाह– यद्यहेतुक एव हेतुरहित एव, स धर्मा-ऽधर्मोभयक्षयः, तदोत्पत्तिस्वभावत्वे सदैव स्यात्, अनुत्पत्तिस्वभावत्वे कदापि वा न स्यात् । कदाचिदुत्पत्तिस्वभावत्वाद् न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सदैव स्यादिति चेत् । तर्हि कालान्तरेऽप्युत्पत्तिप्रसङ्गः । तदहरेवोत्पत्तिस्वभावत्वाद् नान्यदोत्पत्तिरिति चेत् । तर्हि तत्तद्धेतुसकाशादेवोत्पत्तिस्वभावत्वादायातं सहेतुकत्वम् । आकाशस्य क्वाचित्कत्ववत् कादाचित्कत्वमप्यत्र न हेतुनियम्यमिति चेत् । न, कादाचित्कत्वस्याऽवधिनियतत्वात् । सन्त्ववधयः, न तु तेनाऽपेक्ष्यन्त इति चेत् । न, नियतपूर्ववृत्तित्वस्यैवाऽपेक्षार्थत्वात्, अन्यथा 'गर्दभाद् धूमः' इत्यपि प्रमीयेतेति । अधिकमुपरिष्टाद् वक्ष्यते ॥ २४ ॥

फलितमाह–

तस्मादवश्यमेष्टव्यः कश्चिद्धेतुस्तयोः क्षये । स एव धर्मो विज्ञेयः शुद्धो मुक्तिफलप्रदः ॥ २५ ॥

तस्मात् कादाचित्कत्वस्य सहेतुकत्वव्याप्यत्वात्, अवश्यं कश्चित् तयोर्धर्मा-धर्मयोः, क्षये हेतुरेष्टव्योऽङ्गीकर्तव्यः । य एव चात्र हेतुः स एव शुद्धः सर्वाशंसारहितः, मुक्तिलक्षणफलप्रदः, धर्मो धर्मपदवाच्यः, मन्तव्यः श्रद्धेयः ॥ २५ ॥

चोद्यशेषं परिहरति–

धर्मा-ऽधर्मक्षयाद् मुक्तिर्यच्चोक्तं पुण्यलक्षणम् । हेयं धर्मं तदाश्रित्य न तु संज्ञानयोगकम् ॥ २६ ॥

यच्च "धर्मा-ऽधर्मक्षयाद् मुक्तिः" इत्युक्तम्, तत् पुण्यलक्षणं हेयं त्याज्यं धर्मम्, आश्रित्य प्रकृतधर्मपदशक्तिग्रहविषयीकृत्य; न तु संज्ञानयोगकं संज्ञायां कप्रत्ययात् संज्ञानयोगसंज्ञं धर्ममाश्रित्य, तेन न बाधः । इति सर्वमवदातम् ॥ २६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्यवसितमाह–

अतस्तत्रैव युक्तास्था यदि सम्यङ् निरूप्यते। संसारे सर्वमेवान्यद्दर्शितं दुःखकारणम् ॥२७॥

अतः पूर्वपक्षोक्तयुक्तिनिरासात्, तत्रैव धर्म एव, आस्था युक्ता, यदि सम्यग्– आगमोपपत्त्यनुसारेण, निरूप्यते विचार्यते। प्रतिपक्षप्रवृत्तिनिरासायोक्तमेव स्मारयति– संसारे सर्वमेवाऽन्यद् धर्मातिरिक्तं, दुःखकारणं केवलदुःखमयं, दर्शितम्– "अनित्यः प्रियसंयोगः" इत्यादिना। अत्रेदं पतञ्जलिसूत्रम्– "परिणाम-ताप-संस्कार-दुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" (पात० २, १५) इति। राग एव हि पूर्वमुद्भूतः सन् विषयप्राप्त्या सुखं परिणमते। तस्य च प्रतिक्षणं प्रवर्धमानत्वेन स्वविषयाप्राप्तिनिबन्धनदुःखस्य दुष्परिहरत्वात् परिणामदुःखता। तथा, सुखमनुभवन् दुःखसाधनानि द्वेष्टि, तदपरिहारक्षमश्च मुह्यतीति तापदुःखता। तथा, वर्तमानसुखानुभवः स्वविनाशकाले संस्कारमाधत्ते, स च सुखस्मरणं, तच्च रागं, स च मनः-काय-वचनप्रवृत्तिं, सा च पुण्या-पुण्यकर्माशयौ, तौ च जन्मादीनि[2], इति संस्कारदुःखता॥ एवं कालत्रयेऽपि सुखस्य दुःखानुषङ्गाद् दुःखरूपता सिद्धा, उद्भूतसत्त्वकार्यत्वेऽपि सुखस्याऽनुद्भूतरजस्तमःकार्यत्वात् स्वभावतोऽपि दुःखविषादरूपता। समवृत्तिकानामेव हि गुणानां युगपद्विरोधः, न तु विषमवृत्तिकानाम्, इत्येकदोद्भूता-ऽनुद्भूततया न सुख-दुःख-मोहविरोधः॥ २७॥

तदेवं 'धर्म एव युक्ताऽऽस्था' इति समर्थितम्। तस्माद् मुक्त्युत्पत्तिप्रकारश्चावश्यवक्तव्योऽपि प्रतिबन्धकशिष्यजिज्ञा-

---

१ श्लोक० १२। २ 'आधत्ते' इत्यनेन संबन्धः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सासत्त्वाद् नेदानीं वक्ष्यते । पुरस्तादेव चावसरसंगत्या वक्ष्यत इत्याह–

तस्माच्च जायते मुक्तिर्यथा मृत्यादिवर्जिता । तथोपरिष्टाद्वक्ष्यामः सम्यक्शास्त्रानुसारतः ॥२८॥

तस्माच्च धर्मात्, यथा येन प्रकारेण, मृतिरायुःक्षयः, आदिना रोग-शोकादिग्रहः, तद्वर्जिता तद्रहिता, मुक्तिर्निर्वृतिः, यथा भवति, तथोपरिष्टादग्रे, सम्यग्– अविरोधेन, शास्त्रानुसारतः शास्त्रतात्पर्यं परिगृहय, वक्ष्यामः ॥ २८ ॥

इदानीं तु प्रसङ्गसंगत्या शास्त्रपरीक्षैव क्रियत इत्याह–

इदानीं तु समासेन शास्त्रसम्यक्त्वमुच्यते । कुवादियुक्त्यपव्याख्यानिरासेनाऽविरोधतः ॥२९॥

इदानीं तु समासेन संक्षेपेण, विस्तरतस्तत्करणे त्वायुःपर्यवसानात्, शास्त्रस्य सम्यक्त्वं प्रामाण्या-ऽप्रामाण्यविभागः, उच्यते । कथम्?, इत्याह– कुवादिनां चार्वाक-मीमांसकादीनां युक्तयश्चापव्याख्याश्च कुवादियुक्त्यपव्याख्यास्तासां निरासेन बलवत्प्रमाणबाध्यत्व-भ्रान्तिमूलकत्वोपदर्शनेन, अविरोधतस्तदापादितविरोधाशङ्कानिरासादिति भावः ॥ २९ ॥

तत्रादौ चार्वाकयुक्तीर्निराचिकीर्षुस्तन्मतोपन्यासमाह–

पृथिव्यादिमहाभूतमात्रकार्यमिदं जगत् । न[2] चात्मा, दृष्टसद्भावं मन्यन्ते भूतवादिनः ॥३०॥

१ क. 'रणस्य दुःशकत्वात्, शिष्यहिताहेतुत्वाच्च शा' । २ 'न चात्मा-ऽदृष्टसद्भावं' इति द्वन्द्वसमासगर्भित एव क्रियान्वयी पाठो मूल-स्वोपज्ञटीकयोरङ्गीकृतः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदं प्रत्यक्षोपलभ्यमानं, जगत् चराचरं, पृथिव्यादीनि पृथिवी-अप्-तेजो-वायुलक्षणानि यानि चत्वारि महाभूतानि तन्मात्रकार्यं, मात्रपदेनाऽऽकाशादिव्यवच्छेदः। नन्वात्मन एव न तथात्वम्, इत्यत आह– न चात्मा शरीरातिरिक्तोऽहंप्रत्ययालम्बनमस्ति "चैतन्यविशिष्टः कायः पुरुषः" इति वचनात्। एवं भूतवादिनो लोकायतिकाः, दृष्टसद्भावं प्रत्यक्षवस्तुन एव पारमार्थिकत्वं, मन्यन्ते, नाऽदृष्टस्य, तत्र मानाभावात्। न ह्यनुमानं तत्र मानम्, व्यभिचारिसाधारण्येन तस्याऽप्रमाणत्वात्, वह्न्यादिसंभावनयैव तत्र प्रवृत्त्युपपत्तेः। अगृहीताऽसंसर्गकवह्न्यादिस्मृतिरूपायां संभावनायामसद्विषयिण्यां परमार्थसत्स्वलक्षणविषयाध्यक्षविषयविषयकत्वरूपसंवादोऽपि न संभवतीति चेत्। न, अध्यक्षमूलकविकल्पविषयकत्वरूपसंवादस्य सद्विषयकत्वरूपप्रामाण्यासहचरात् कथं ततस्तदभिमानः?, इति चेत्। सत्यम्, तथाप्यध्यक्षमूलकाध्यक्षान्तरसाधारणस्याऽध्यक्षमूलकविषयविषयकत्वलक्षणसंवादस्योक्तप्रामाण्यसहचारात्। तथापि दृष्टसाधर्म्येणाऽनुमानाप्रामाण्यसाधनमनुमानप्रामाण्यानभ्युपगमे दुःसमाधानमिति चेत्। सत्यम्, साधर्म्यदर्शनस्योद्बोधकविधया, साधारणधर्मदर्शनविधया वाऽगृहीतासंसर्गकार्थस्मृतिरूपायाम्, उत्कटकोटिकसंशयरूपायां वा संभावनायामेवोपयोगात्। संभावनाया एव च बहुशो व्यवहारहेतुत्वात्। अत एव न परकीयसंदेहादिप्रतिसन्धाननिमित्तशब्दप्रयोगाद्यनुपपत्तिः। धूमदर्शनात् प्रागप्यर्थसंशयरूपा संभावनाऽस्त्येव, न तु प्रवृत्तिः, इति व्यभिचार इति चेत्। न, धूमदर्शनप्राक्कालीनस्य तस्य विध्यंशेऽनुत्कटकोटिकत्वेन संभावनाऽनात्मकत्वात्। धूमदर्शनोत्तरकालीनस्याऽपि तस्याविशेषात् कथमुत्कटकोटिकत्वम्?, इति चेत्। तर्हि विशिष्यैव धूमदर्शनादेरुत्कटकोटिकार्थसंशयहेतुत्व-

१ स्वलक्षणशब्दो विशेषपरिभाषकः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माद्रियताम् ।

अथ ‘ अनुमानं न प्रमाणम् ’ इति वाक्यस्य प्रामाण्ये शब्दप्रामाण्यापातः, अप्रामाण्ये चानुमानप्रामाण्यापात इति चेत् । न, एतद्वाक्यस्य प्रमाकरणत्वाभावरूपाप्रामाण्यविषयत्वात्, असत्ख्यातिसत्त्वे विशिष्टज्ञानमात्रस्यैव भ्रमत्वेन भ्रमजनकत्वेऽप्यविरोधाच्च । न च प्रत्यक्षप्रामाण्यमप्यनुमानाधीनग्रहम्, इत्यनुमानोपगम आवश्यकः, स्वतःप्रामाण्यग्रहे तत्संशयायोगादिति वाच्यम्; स्वलक्षणविषयकत्वरूपव्यावर्तकधर्मदर्शनात्, स्वसंवेदनेन तद्व्यक्त्यात्मकसद्विषयकत्वनिश्चयाच्च, निर्विकल्पके तत्संशयायोगात्, सविकल्पकस्य चानुमानवदप्रमाणत्वात् । निर्विकल्पके सन्मात्रावलम्बनत्व-स्वप्रकाशविषयत्व-प्रामाण्यावगाहित्वानां सिद्धिरप्यनुमानादेवेति चेत् । न, स्वरूपतस्तेषामपि स्वग्राह्यत्वात्, तत्तद्रूपेण तु संभावनाविषयत्वादेव ‘निर्विकल्पकं सन्मात्रविषयम् ’ इति धियः ‘अयं घटः’ इतिधीतुल्यत्वादिति दिक् ।

अत एव शब्दोऽपि न मानम्, परस्परविरुद्धार्थाभिधायकानामागमानां विनिगन्तुमशक्यत्वात्, शब्दस्य वासनामात्रप्रभवत्वात्, तन्मात्रजनकत्वाच्च; अन्यथाऽसदर्थप्रतिपादकशब्दप्रयोगो दुर्घटः स्यात् । तर्हि तैवागमो निष्प्रयोजनः स्यादिति चेत् । न, परं प्रति दूषणपर्यनुयोगात्, परस्य तदनुत्तरमात्रेण निग्रहे च तत्सार्थक्यात् । अत एव “सर्वत्र पर्यनुयोगपराणि सूत्राणि बृहस्पतेः ” इत्यभिहितम् । ततोऽदृष्टे मानाभावाद् नास्त्यात्मा । इति लोकायतिकप्रवादः ॥ ३० ॥

१ क. ‘यत्व’ । २ स्वसंवेदनग्राह्यत्वम् । ३ सन्मात्रावलम्बनत्व-स्वप्रकाशविषयत्व-प्रामाण्यावगाहित्वानाम् । ४ चार्वाकस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र परमार्थवादिनामार्हतानां मतमाह—

अचेतनानि भूतानि न तद्धर्मो न तत्फलम् । चेतनास्ति च यस्येयं स एवात्मेति चापरे ॥३१॥

भूतानि पृथिव्यादीनि, अचेतनानि चैतन्याभाववत्त्वेन प्रमितानि । अतश्चेतना तद्धर्मो न– भूतस्वभावभूता न । अत एव च तत्फलं न– भूतोपादानकारणजन्या न, मृदो घटस्येव तत्स्वभावस्यैव तदुपादेयत्वात् । अस्ति च चेतना, प्रतिप्राण्यनुभवसिद्धत्वात् । अतो यस्येयं स्वभावभूता, फलभूता च; स एवाऽऽत्मा, परिशेषात्, इति चाऽपरे जैनाः ॥ ३१ ॥

विपक्षे बाधकमाह—

यदीयं भूतधर्मः स्यात् प्रत्येकं तेषु सर्वदा । उपलभ्येत सत्त्वादि-कठिनत्वादयो यथा ॥३२॥

यदीयं चेतना, भूतधर्मः स्यात् तदा तेषु भूतेषु, प्रत्येकमसंघातावस्थायां, सर्वदा- इन्द्रियविषयसंप्रयोगकाले, उपलभ्येत, भूतसामान्यधर्मत्वे सत्त्वादिवत्, भूतविशेषधर्मत्वे च कठिनत्वादिवत्, योग्यत्वादिति भावः, मध्यगताऽऽदिपदादयं विभागः प्रतीयते ॥ ३२ ॥

पराभिप्रायमाह—

शक्तिरूपेण सा तेषु सदाऽतो नोपलभ्यते । न च तेनापि रूपेण सत्यसत्येव चेन्न तत् ॥३३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा चेतना, तेषु भूतेषु, सदाऽसंघातावस्थायामपि, शक्तिरूपेण वर्तते। अतस्तदा नोपलभ्यते, व्यक्तिरूपाक्रान्तस्यैव योग्यत्वात्। न च तेनापि प्रसिद्धेन शक्त्याख्येनापि रूपेण, सती चेतना, असती; न ह्यनुपलब्धिमात्रादभावः सिद्ध्यति, किन्तु योग्यानुपलब्ध्या, न चात्र साऽस्ति, तत्र तद्रूपावच्छिन्नायास्तस्या अयोग्यत्वादिति। समाधत्ते- इति चेत्, न तत् पूर्वोक्तम्॥ ३३॥

कुतः?, इत्याह-

शक्तिचैतन्ययोरैक्यं नानात्वं वाथ सर्वथा। ऐक्ये सा चेतनैवेति नानात्वेऽन्यस्य सा यतः३४

शक्ति-चैतन्ययोः सर्वथा भेदासहिष्णुतयैक्यमभेदः, अथेति पक्षान्तरे, सर्वथाऽभेदासहिष्णुतया नानात्वं भेदः। आद्यपक्षे दोषमाह–ऐक्येऽभेदे, सा शक्तिः चेतनैव। ततश्च यदि योग्या सा, तदा प्रागप्युपलब्धिप्रसङ्गः। यदि च न योग्या, तदा पश्चादप्यनुपलब्धिप्रसङ्गः। द्वितीयपक्षे दोषमाह– नानात्वे भेदे, सा चेतना, अन्यस्य स्याद् न भूतानां, तदन्यशक्तिरूपत्वात् तेषाम्। यत एवम्, ततो न तदिति योजना। अथ चेतनायाः स्वाभिन्नव्यक्तिरूपा तज्जनकताख्या शक्तिः स्वरूपतो निर्विकल्पकविषयाऽपि तद्रूपेण सविकल्पकागोचर इति न दोष इति चेत्। न, व्यक्तचेतनाया अप्युत्तरचेतनाजनकतया शक्तिरूपेणाऽयोग्यत्वप्रसङ्गात्। चेतनात्वेनैव सा योग्या, न तु शक्तिरूपेणेति चेत्। प्रत्येकदशायामपि चेतनात्वेन योग्यत्वम्, चेतनात्वशून्या चेतना वा प्रसजेदिति महत् संकटम्॥ ३४॥

१ योग्यानुपलब्धिः। २ संघातावस्थायाः पूर्वमपि। ३ संघातदशोत्तरकालम्। ४ भूतानाम्। ५ पूर्वोक्तम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनभिव्यक्तत्वाद् नोपलभ्यत इत्याशयं दूषयति–

अनभिव्यक्तिरप्यस्या न्यायतो नोपपद्यते। आवृतिर्न यदन्येन तत्त्वसंख्याविरोधतः॥३५॥

अनभिव्यक्तिरप्यस्याश्चेतनायाः, न्यायतः परमार्थविचारात् , नोपपद्यते नाऽबाधिता भवति, यद् यस्माद्धेतोः, प्रतिबन्धकसमवधानरूपाऽऽवृतिर्[1]अत्राऽनभिव्यक्तिरभिमता, नाऽन्या, अनिर्वचनात् । प्रतिबन्धश्चात्र नान्येन भूतातिरिक्तेन, अतिरिक्तप्रतिबन्धकाभ्युपगमे " पृथिव्यादिचतुष्टयमेव तत्त्वम् " इति स्वसिद्धान्तव्याकोपात् ॥ ३५ ॥

भूतानामेव केनचिद् रूपेणाऽऽवारकत्वं भविष्यतीति, अत्राह–

न चासौ तत्स्वरूपेण तेषामन्यतरेण वा। व्यञ्जकत्वप्रतिज्ञानाद् नावृतिर्व्यञ्जकं यतः॥३६॥

न चासावावृतिस्तत्स्वरूपेण भूतत्वादिना भूतस्वरूपेण, नवा तेषा[2]मन्यतरेण पृथिवीत्वादिना, पृथिवी-जलान्यतरत्वादिना वा । कुतः ?, इत्याह– व्यञ्जकत्वप्रतिज्ञानात्– चैतन्यसाक्षात्कारजनकत्वस्वीकारात् । तत्त्वेऽप्यावृतिजनकत्वमस्तु, अत आह– यतो व्यञ्जकमावृतिरावारकं न भवति, एकस्य चैतन्यसाक्षात्कारजनकत्व-तज्जनकीभूताभावप्रतियोगित्वयोर्विरोधादिति भावः ॥ ३६ ॥

---

१ भूताऽसमुदितावस्थायाम् । २ भूतानाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कायाकारपरिणामाभाव एवाऽत्राऽऽवृतिः स्यात्, अत्राह—

विशिष्टपरिणामाभावेऽपि ह्यत्रावृतिर्न वै। भावताऽऽप्तेस्तथा नाम व्यञ्जकत्वप्रसङ्गतः ॥३७॥

विशिष्टपरिणामाभावेऽपि, हिः पादपूरणे, वै निश्चितं, अत्र भूतचेतनायां, आवृतिर्न, आवारकत्वस्य भावत्वव्याप्यत्वेन तथात्वे तस्य भावताऽऽप्तेर्भावत्वप्रसङ्गात्। न चाऽऽवारकत्वं न भावत्वव्याप्यम्, अन्धकारे व्यभिचारादिति वाच्यम्; अन्धकारस्य द्रव्यत्वेन व्यवस्थापयिष्यमाणत्वात्। तुच्छत्वादभावस्य नाऽऽवारकत्वमिति तथात्वे भावत्वापत्तिरित्यन्ये। दूषणान्तरमाह– तथा, विशिष्टपरिणामाभावस्य चेतनासाक्षात्कारप्रतिबन्धकत्वे तदभावत्वेन तद्धेतुत्वे गौरवाद् नामाऽस्य विशिष्टपरिणामस्यैव लाघवेन व्यञ्जकत्वप्रसङ्गात् ॥ ३७ ॥

न चेष्टाऽऽपत्तिः, इत्याह–

न चासौ भूतभिन्नो यत्ततो व्यक्तिः सदा भवेत्। भेदे त्वधिकभावेन तत्त्वसंख्या न युज्यते॥३८॥

न चासौ विशिष्टपरिणामः, भूतभिन्नो भूतातिरिक्तः, यद् यस्माद्धेतोः; ततः सदा सर्वकालं, व्यक्तिश्चेतनासाक्षात्कारो भवेत्, भूताभिन्नविशिष्टपरिणामस्य यावद्भूतकालभावित्वात्। भेदे तु भूतेभ्यो विशिष्टपरिणामस्याऽभ्युपगम्यमाने,

---

१ भूतजन्यायां चेतनायाम्। २ कायाकारपरिणामवैशिष्ट्ये। ३ अन्धकारस्य सत्यप्यावारकत्वे तेजोऽभावरूपत्वेन भावत्वव्याप्यत्वाभावादिति परस्याभिप्रायः। ४ आवारकत्वे। ५ विशिष्टपरिणामाभावत्वेन। ६ चेतनासाक्षात्कारप्रतिबन्धहेतुत्वे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधिकभावेन चतुष्टयबहिर्भावेन, तत्त्वसंख्या न युज्यते– " चत्वार्यैव तत्त्वानि " इति विभागव्याघातः स्यात् ॥ ३८ ॥

अत्र पराभिप्रायमाशङ्क्य परिहारमाह–

स्वकालेऽभिन्न इत्येतत्कालाभावे न संगतम्। लोकसिद्धाश्रये त्वात्मा हन्त! नाश्रीयते कथम्?॥

स्वकाले परिणामकाले, अभिन्नः पदार्थः; ततो न तत्त्वसंख्याव्याघातः। न चाऽन्यदा चैतन्यव्यक्तिप्रसङ्गः, तत्काले भूतस्य विशिष्टपरिणामभिन्नत्वेन व्यञ्जकाभावात्। न चैकत्र भेदा-ऽभेदोभयविरोधः, कालभेदेनैकत्रोभयसमावेशात्; कथमन्यथा पक्तादशायां घटादौ 'अयं न श्यामः' इत्यादिधीः?। न च तत्र विशेषणसंसर्गाभाव एव विषयः, अनुयोगिनि सप्तमीं विना तदनुपपत्तेरिति दिक्। इति– एतत्प्रकारम्, एतत् प्रकृतवचनम्, कालाभावे न संगतम्– अलीकम्; न हि कालो नाम तत्त्वान्तरमिष्यते परैः।

अथ शब्द-तदुपजीविप्रमाणयोरेवाऽनादरश्चार्वाकाणाम्, तन्मूलभूताऽऽप्ताऽनाश्वासात्। अनुभवसिद्धस्त्वर्थो नापह्नोतुं शक्यः। अत एव तान्त्रिकलक्षणलक्षितमेवाऽनुमानं प्रतिक्षिप्यते, तादृशप्रत्यक्षवत्, न तु बाल-गोपालसाधारणानलादिप्रतिपत्तिरूपम्, अन्यथा व्यवहारानिर्वाहात्; न हि धूमपरामर्शात् 'पर्वतो वह्निमान्' इति ज्ञानं जायमानं संशयरूपं, स्मृतिरूपं वा संभवति 'संदेह्मि, स्मरामि' इत्यननुसंधानात्। किञ्च, परामर्शस्य निश्चयसामग्रीत्वाद् न संशयहेतुत्वम्, 'पर्वतो वह्निमान्'

---

१ क. ग. घ. च. 'लेवं का' मूलपुस्तकेऽप्ययमेव पाठः। २ तान्त्रिकलक्षणलक्षितप्रत्यक्षवत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति पूर्वमननुभवाच्च न तादृशी' स्मृतिः। अथ 'यो धूमवान् सोऽग्निमान्' इति व्याप्तिज्ञानं धूमवत्त्वावच्छेदेन वह्निप्रकारकं तथैव स्मृतिमनुमितिस्थानीयां जनयति; पर्वतत्वांशे उद्बुद्धसंस्कारसहकृताद् वा ततः 'पर्वतो वह्निमान्' इति स्मृतिः, यथा बुद्धिविषयतावच्छेदकावच्छिन्नशक्तादपि तत्पदाद् निरुक्तशक्तिग्रहाऽऽहितसंस्कारेण तत्तद्धर्मावच्छिन्नशक्त्यंशे उद्बुद्धेन सहकृतात् पर्वतत्वादिविशिष्टोपस्थितिरिति चेत्। न, विशिष्योद्बोधकहेतुत्वे गौरवात्, हेत्वाभासादिवैफल्यप्रसङ्गाच्च। तथाप्यनुमित्यभ्युपगमे प्रमाणान्तरप्रसङ्ग इति चेत्। न, अनुमितित्वस्य मानसत्वव्याप्यत्वाद् 'वह्निं न साक्षात्करोमि' इति प्रतीतेर्गुरुत्वादाविव लौकिकविषयताभावादेवोपपत्तेः, युक्तं चैतत्, अनुमितित्वावच्छिन्नं प्रति चाक्षुषादिसामग्रीप्रतिबन्धकत्वाऽकल्पने लाघवादिति। तथाच 'इदानीं घटः' इत्यादिप्रतीतौ संबन्धघटकतया, परत्वादिलिङ्गेन वा कालसिद्धिरिति नव्यचार्वाकाशय इति चेत्।

अत्राह– लोकसिद्धस्य कालस्याऽऽश्रयेऽङ्गीकारे तु, 'हन्त' इति खेदे, आत्मा कथं नाऽऽश्रीयते श्रद्धीयते?। 'लोकसिद्धत्वाविशेषेऽपि सकलप्रयोजनहेतोरनन्यसाधारणगुणस्याऽऽत्मनोऽनङ्गीकारः, तत्सद्वस्तुपरिणामान्यथासिद्धस्य कालस्य चाङ्गीकारः, इति पुरः परिस्फुरतोर्मणि-पाषाणयोर्मध्ये मणिपरित्याग-पाषाणग्रहणवदतिशोचनीयं विलसितमिदं देवानांप्रियस्य[3], इति 'हन्त' इत्यनेन सूच्यते ॥ ३९ ॥

लोकसिद्धत्वमेवाऽऽत्मनः स्पष्टयति–

नात्मापि लोके नो सिद्धो जातिस्मरणसंश्रयात्। सर्वेषां तदभावश्च चित्रकर्मविपाकतः ॥ ॥ १९ ॥

१ तादृशानुभवपूर्वकत्वात् तादृश्याः स्मृतेः। २ अनुभवात्। ३ मूर्खस्य चार्वाकस्य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्मा लोकेऽपि शब्द-तदुपजीविप्रमाणातिरिक्तप्रमाणानुसारिण्यपि, अपिर्भिन्नक्रमोऽत्रे संबध्यते, नो सिद्ध इति न, किन्तु सिद्ध एव, नञ्द्वयादवधारणं प्रतीयते । कुतः ?, इत्याह– जातिस्मरणस्य भवान्तरानुभूतार्थविषयस्य मतिज्ञानविशेषस्य संश्रयात्– लोकेनाऽङ्गीकरणात्; न हि भवान्तरानुभूतार्थस्मरणमन्वय्यात्मद्रव्यं विनोपपद्यते, शरीरस्य भवान्तराननुयायित्वात्। भवान्तरादागमनाऽविशेषे केषाञ्चिदेव जातिस्मरणं न सर्वेषामिति कथं विशेषः ?, इति तटस्थशङ्कायामाह– सर्वेषामभिमतव्यतिरिक्तानां, तदभावश्च जातिस्मरणाभावश्च, चित्रस्य बहुविधशक्तिकस्य कर्मणस्तदावरणस्य विपाकः फलप्रदानाभिमुख्यकालस्तस्मात् ॥ ४० ॥

अत्रैव दृष्टान्तमाह–

लोकेऽपि नैकतः स्थानादागतानां तथेक्ष्यते । अविशेषेण सर्वेषामनुभूतार्थसंस्मृतिः ॥४१॥

लोकेऽपि– इहलोकेऽपि, एकतो विवक्षितात् स्थानात्, आगतानां सर्वेषाम्, अनुभूतार्थसंस्मृतिरविशेषेण नेक्ष्यते, कस्यचिदनुभूतयावदर्थस्मृतिः, कस्यचित् कतिपयार्थस्मृतिः, कस्यचिच्चार्थमात्राऽस्मृतिरिति विशेषदर्शनात् । एवं चात्र दृष्टविशेषस्य चित्रकर्मविपाकप्रयोज्यत्वात्, जात्यस्मरणमपि तत्प्रयोज्यमिति सिद्धम् । अथ तत्र यदंशे संस्कारोद्बोधस्तदंशे स्मरणम्, नष्टचित्तस्य च संस्काराभावाद् न स्मरणम्, इत्युद्बोधकसंस्काराभावेनाऽस्मरणोपपत्तौ, किं तत्प्रतिबन्धकादृष्टकल्पनेन ?, इति

१ सप्तमी, लोकविशेषणम् । २ लोके । ३ जातिस्मरणरूपमतिज्ञानावरणस्य । ४ चित्रकर्मविपाकप्रयोज्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेत् । सत्यम्, उद्बोधकानामपि स्मृत्यावरणक्षयोपशमाऽऽधायकतयैवोपयोगात् तस्यैव[1] स्मृत्यन्तरङ्गहेतुत्वात्; विनाऽप्युद्बोधकं क्षमोपशमपाटवात् झटिति स्मृतिदर्शनात् । संस्कारश्चोत्कर्षतः षट्षष्टिसागरोपमस्थितिकमतिज्ञानभेदान्तःपाती समतिक्रान्तसंख्यातभवावगमस्वरूपमतिज्ञानविशेषजातिस्मरणार्थं न प्राग्भवीय उपयुज्यते, किन्तु स्मृतिसामान्येऽनुभवव्यापाररक्षार्थं जातिस्मरणनियतेहादिचतुष्टयान्तर्भूत एव, तथाविधक्रमानुविद्धस्यैव च्छद्मस्थोपयोगस्य साधनात्, क्वचिदपायमात्रस्य क्वचन धारणामात्रस्य च स्फुटत्वेऽपि दोषादन्यानुपलक्षणात् । यदाह भगवान् जिनभद्रगणिक्षमाश्रमणः—

"[2]उप्पलदलसयवेहे व्व दुव्विहावत्तणेण पडिहाइ । समयं व सुक्कसक्कुलिदसणे विसयाणमुवलद्धी[3] ॥१॥" इति ।

तत्त्वमत्रत्यं मत्कृतज्ञानार्णवादवसेयम् । 'बालस्य स्तन्यपानप्रवृत्तिरिष्टसाधनताधी[4]साध्या । सा[5] चानुमितिरूपा । सा च व्याप्त्यादिस्मृतिजन्या । व्याप्त्यादिस्मृतिश्च प्राग्भवीयानुभवसाध्या; इति "वीतरागजन्मादर्शन०" न्यायाद् भवान्तरानुगाम्यात्मसिद्धिः' इत्यपरे वर्णयन्ति । वस्तुतः स्मरणान्तरान्यथानुपपत्त्याऽपि लोकसिद्ध एवाऽऽत्मा, शरीरस्य चैतन्ये बाल्येऽनुभूतस्य तारुण्येऽस्मरणप्रसङ्गात्, चैत्रेणाऽनुभूतस्येव मैत्रेण; बाल-युवशरीरयोर्भेदात् परिणामभेदे द्रव्यभेदावश्यकत्वात् । न चोपादानेनाऽनुभूतस्योपादेयेन स्मरणादुपपत्तिः, छिन्नकरादेरनुपादानत्वेन च्छिन्नकरादेः पूर्वानुभूतास्मरणप्रसङ्गात् । न च करेण यदनुभूतं तत् खण्डशरीरोपादानापरकिञ्चिदवयवेनाऽप्यनुभूतम्; इति तद्गतवासनासंक्रमाद् नानुपपत्तिरिति वाच्यम्; प्रत्यवयवगत-

१ स्मृत्यावरणक्षयोपशमस्य । २ उत्पलदलशतवेध इव दुर्विभावत्वेन प्रतिभाति । समकं वा शुष्कशष्कुलीदशने विषयाणामुपलब्धिः ॥ १ ॥
३ विशेषावश्यकभाष्ये गाथेयं २९९ । ४ इष्टसाधनताधीः । ५ अनुमितिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विज्ञानबहुत्वेऽनेकपरामर्शप्रसङ्गात्; यावदवयवेषु व्यासज्यवृत्तित्वे च चैतन्यस्य यत्किञ्चिदाश्रयविनाशे बहुत्वसंख्याया इव विनाशप्रसङ्गात्; पूर्वचैतन्यविरहे उत्तरचैतन्यानुत्पादात्, परमाणुगतत्वे तद्गतरूपादिवच्चैतन्याऽतीन्द्रियत्वप्रसङ्गाच्च। रूपस्कन्धवद् विज्ञानस्कन्धैक्योपगमाद् न दोष इति चेत्। न, तथापि 'योऽहमनुभवामि, सोऽहं स्मरामि' इत्यभेदाऽवमर्शानुपपत्तेः। सादृश्येन वैसदृश्यतिरस्कारात् तथाऽवमर्शः, एवं च क्षणभङ्गे स्मृतिकुर्वद्रूपपरमाणुपुञ्जानामेव स्मृतिनियामकत्वाद् न कोऽपि दोष इति चेत्। न, स्थैर्य-प्रत्यभिज्ञाप्रामाण्ययोरुपपादयिष्यमाणत्वादिति दिक् ॥ ४१ ॥

प्रकारान्तरेण लोकसिद्धत्वमाह–

दिव्यदर्शनतश्चैव तच्छिष्टाव्यभिचारतः। पितृकर्मादिसिद्धेश्च हन्त! नात्माऽप्यलौकिकः ॥

दिव्यदर्शनतश्चैव, पात्रावतारादौ विशिष्टरूपस्य पुंसः स्पष्टप्रेक्षणाच्चैव, 'हन्त' इति खेदे, आत्माऽप्यलौकिको लोकाऽगम्यो न। न हि भूतविशेषस्य मन्त्रविशेषाकृष्टस्याऽऽगमनं संभवति, जडत्वात्[1] न वा तत्र विशिष्टशक्तिः संभवति; तथा, तेन दिव्यदर्शनविषयेण यच्छिष्टं कथितं तस्याऽव्यभिचारादविसंवादिप्रवृत्तिजनकत्वादपि[2]; तथा, तन्निर्वाहकातिशयितज्ञानहेत्वतिशयस्य विनाऽऽत्मानमसंभवात्; पितृकर्म वरप्रदानादिफलक[3]परलोकगतपितृप्रीत्यनुकूलाचारविशेषः, आदिना विष-

१ साकल्यवृत्तित्वे। २ 'आत्मसिद्धेः' इत्युत्तरपदेन संबन्धः। ३ बहुव्रीह्यन्तस्याऽस्याऽऽचारविशेषेऽन्वयः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शास्त्रवार्ता- वालनादिपरिग्रहः, [1]तत्सिद्धेस्तत्फलान्यथानुपपत्तेरपि ; तथा, तत्फलनिर्वाहकातिशयाऽऽश्रयतयाऽप्यात्मसिद्धेः । अत्र यद्यपि सटीकः ।

॥ २१ ॥ हेतुत्रयेणाऽप्यदृष्टसाधनादेवाऽऽत्मसिद्धिः, अदृष्टं चालौकिकम् , इति लोकसिद्धत्वं व्याहतम् ; तथाऽप्यनायत्याऽदृष्टकल्पनात् तत्र शब्दस्याऽनपेक्षणाल्लोकप्रसिद्धकार्येण लोकप्रसिद्धत्वमित्यभिमानः । न चातिशयस्य भोग्यनिष्ठतयैवोपपत्तिः, भोगनिर्वाहार्थं भोगसमानाधिकरणस्यैव तस्य कल्पयितुं युक्तत्वात्। अभिहितं चेदं "[2]संस्कारः पुंस एवेष्टः प्रोक्षणा-ऽभ्युक्षणादिभिः" इत्यादिना कुसुमाञ्जलौ उदयनेनाऽपि ।

इदमभ्युपगम्योक्तम् , वस्तुतः प्रागुक्तरीत्या लोकसिद्धाश्रयणमपि चार्वाकस्य न युक्तम् , तथाहि– यत् तावदुक्तम्– अनुभवसिद्धोऽर्थो नापह्नोतुं शक्यत इति । तदभ्युपगमबाधितम् , अनुभवसिद्धस्य जात्यादिवैशिष्ट्यस्याऽनभ्युपगमात् । परीक्ष्यमाणस्य [3]तस्याऽनुपपत्तेस्[4]तदनुभवबाध इति चेत् । तर्ह्यनुगताकारविषयत्वेन विशिष्टज्ञानमात्र एव प्रामाण्याभावनिश्चयाद् दुरुद्धरो व्यवहारबाधः । [5]तस्य [6]तद्व्याप्यत्वानिश्चयदशायां संदेहसाम्राज्यात् , कोट्यस्मरणदशायां [7]तस्याऽप्यभावाद् वा न [8]तद्बाध इति चेत् । [9]तथापि विशेषदर्शिनस्[10]तत्र प्रवृत्तिशून्यत्वापातः । धर्मिमात्रविषयकाद् निर्विकल्पकाद् धर्मिमात्रविषयिण्या एव प्रवृत्तेरभ्युपगमाद् न दोष इति चेत् । तर्हि यदुक्तमग्रे– 'तान्त्रिकलक्षणलक्षितमेवाऽनुमानं प्रतिक्षिप्यते, न तु स्वप्रतिपत्तिरूपं व्यवहार-

---

१ पितृकर्म-विषवालनादिसिद्धेः । २ कुसुमाञ्जलौ प्रथमस्तबके कारिका ११ । ३ जात्यादिवैशिष्ट्यस्य । ४ जात्यादिवैशिष्ट्यानुभवबाधः । ५ अनुगताकारविषयकविशिष्टज्ञानमात्रस्य । ६ प्रामाण्याभावव्याप्यत्वानिश्चयदशायाम् । ७ संदेहस्याऽपि, उभयकोटिविषयत्वात् तस्य, एकस्या अप्यस्मरणेऽभावादित्यर्थः । ८ व्यवहारबाधः । ९ तद्बाधाभावेऽपि । १० चार्वाकस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुरम् इति, तत्किं विस्मृतम् ? । कथं च सविकल्पकव्यवहितस्य निर्विकल्पस्य प्रवृत्त्युपयोगित्वम् ?, इति सूक्ष्ममीक्ष्यताम् ।

अथ विशिष्टज्ञानस्याऽपि धर्म्यंशे, स्वप्रकाशत्वांशे च प्रामाण्यमेव, अतो धर्म्यंशेऽप्रामाण्यज्ञानाभावात् तदंशे ततः प्रवृत्त्युपपत्तिः, शुक्त्यादाविदं रजतमित्यादिज्ञानानां च विशिष्टवासनोपनीतरजताद्यलीकधर्म्यंवगाहित्वाद् व्यवहारबाधः "सर्वं ज्ञानं धर्मिण्यभ्रान्तम्" इति प्रवादश्चानुपपन्न इति चेत् । न, विशिष्टवासनासामर्थ्याऽविशेषे विशिष्टज्ञानमात्रस्यैव विशिष्टालीकधर्मिविषयसंभवात्, सम्यग्-मिथ्याज्ञानविभागार्थमेतादृशकुसृष्ट्यादरे चैकत्र धर्मिणि प्रकारीभूतधर्मसत्त्वम्, अन्यत्र च तदसत्त्वम्, इत्येतावन्मात्रस्यैव लाघवेनाऽऽश्रयणीयत्वात् । 'इदं रजतं' इत्यत्र पुरोवर्ति रजतमनुभूयते, अतस्तद्देशेऽलीकं रजतं कल्पते, सत्यस्थले तु नैवम्, सत्यस्यैव पुरोवृत्तित्वात्, इति विशेषाद् नोक्तानुपपत्तिरिति चेत् । न, 'इदम्' इति विषयतायाः क्षयोपशमविशेषनियम्यतया तदनुरोधेनाऽतिरिक्ताऽकल्पनात्, अन्यथाऽनन्तालीकरजताद्युत्पत्ति-विनाश-तद्धेत्वादिकल्पने गौरवात्, अज्ञातधर्मिणि प्रवृत्त्यनुपपत्तेश्चेति । अधिकं प्रमारहस्ये ।

यच्चाप्युक्तम्– अनुमितित्वस्य मानसत्वव्याप्यत्वाभ्युपगमाद् न प्रमाणान्तरप्रसङ्ग इति । तदप्यसत्, तदानीं वह्निमानसस्वीकारे[1] लिङ्गादीनामपि मानसापत्तेः । न चाचार्यमत इव तत्र तज्ज्ञानमात्र[2] इष्टापत्तिः, एवमप्युच्छृङ्खलोपस्थितानां घटादीनां तत्र भानापत्तेः । न च परामर्शादिरूपविशेषसामग्रीविरहाद् न तदापत्तिः[3] इति वाच्यम्, सामान्यसामग्रीवशात् तदापत्तेः । न च घटमानसत्वस्य परामर्शप्रतिबध्यतावच्छेदकत्वाद् न तदापत्तिः, पटमानसत्वादीनामपि तथात्वेनाऽनन्तप्रतिबध्य-प्रतिबन्धकभाव-

---

१ वह्निमानसज्ञाने । २ लिङ्गादिभानमात्रे । ३ घटभानापत्तिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्पने गौरवात्[1], वह्नि-घटोभयानुमितिजनकपरामर्शस्थले व्यभिचारात्, तत्तत्परामर्शाभावविशिष्टतत्तत्परामर्शत्वेन प्रतिबन्धकत्वे च सुतरां तथात्वात्[2], सामान्यतो मानसत्वेनैव तेव[3] तत्प्रतिबद्धयत्वावच्छेदकत्वौचित्यात्। न चैवमनुमितिसामग्र्यां सत्यां भोगोऽपि कथं भवेत् ?, इति वाच्यम्, भोगान्यज्ञानप्रतिबन्धकतावच्छेदकतया समानीतजातिविशेषवतां सुख-दुःखानामुत्तेजकत्वादिति । अधिकं मत्कृतन्यायालोक-स्याद्वादरहस्ययोरवसेयम् ॥ उक्तः शक्तिपक्षः ॥ ४२ ॥

अथ कार्यपक्षमधिकृत्याह–

काठिन्याबोधरूपाणि भूतान्यध्यक्षसिद्धितः। चेतना तु न तद्रूपा सा कथं तत्फलं भवेत् ? ॥

काठिन्यं कठिनः स्पर्शः पृथिवीमात्रवृत्तिः, इदमुपलक्षणं रसादीनाम्, अबोधोऽचैतन्यं, तद्रूपाणि तद्धर्मनिरूपितधर्मिताश्रयाणि, भूतानि पृथिव्यादीनि । कुतः ?, इत्याह– अध्यक्षसिद्धितः 'कठिना पृथिवी, अचेतना पृथिवी' इत्यादिसत्यप्रत्यक्षविषयत्वात् । चैतन्यस्याऽचाक्षुषत्वात्[4] तदभावो यद्यपि न चाक्षुषः, तथाप्युपनयजन्यं[5] मानसं तदध्यक्षं[6] ग्राह्यम् । चेतना तु तद्रूपा न– काठिन्या-ऽबोधसामानाधिकरण्येन प्रमीयमाणा न, अतः सा चेतना, तत्फलं भूतोपादेया, कथं भवेत् ?– न क-

---

१ अनन्तप्रतिबध्य-प्रतिबन्धककल्पनया गौरवात् । २ चार्वाकस्य । ३ परामर्शनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेकत्वाङ्गीकारस्योचितत्वात् । ४ तदा चैतन्यमनुकूल्यते । ५ चेष्टाजन्यम् । ६ चैतन्य भावविषयकं प्रत्यक्षम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

थञ्चिदित्यर्थः । तथात्वे[1] हि 'कठिनोऽहं, जडोऽहम्' इत्यादिप्रतीत्यापत्तिः । अथ जायत एव 'स्थूलोऽहं, गौरोऽहं' इतिवत् 'कठिनोऽहम्' इत्यपि प्रतीतिः, प्रतीयत एव च जाड्यमपि, 'मामहं न जानामि' इत्यादिना, इति किमापादितम् ?, इति चेत् । न, 'कठिनोऽहम्' इत्यादिप्रतीतेर्भ्रमत्वात्, इदंत्वसामानाधिकरण्येनाऽनुभूयमानस्य काठिन्यादेरहंत्वसामानाधिकरण्यायोगाच्च, इत्युपरिष्टाद् विवेचयिष्यते । 'मामहं न जानामि' इति प्रतीतिश्च विशेषज्ञानाभावविषया, न तु ज्ञानसामान्याभावविषया, भावरूपाज्ञानविषया वा, ज्ञाना-ऽज्ञानयोर्विरोधात्[2], भावरूपाज्ञानस्याऽन्यत्र निरस्तत्वाच्चेति दिग् ॥ ४३ ॥

भूतकार्यत्वे[3], उत्पत्तेः प्राक् सत्त्वा-सत्त्वपक्षयोर्दोषमाह—

प्रत्येकमसती तेषु न च स्याद् रेणुतैलवत् । सती चेदुपलभ्येत भिन्नरूपेषु सर्वदा ॥ ४४ ॥

प्रत्येकमसंहतावस्थायां, तेषु भूतेषु, असती— अविद्यमाना चेतना, नच— नैव स्यात् । किंवत् ?, इत्याह— रेणुतैलवद् रेणौ तैलवदित्यर्थः । यथा तिलेषु प्राग् विद्यमानमेव तिलसंघातात् तैलमुत्पद्यते, रेणुषु तु प्रागविद्यमानं तत्संघातादपि नोत्पद्यते; तथा भूतेषु प्रागविद्यमाना चेतना तत्संघातादपि नोत्पद्येत, तत्संघातजन्यत्वस्य तत्राऽस्तित्वव्याप्यत्वादिति भावः । चेद् यदि, भिन्नरूपेषु— असंहतेषु भूतेषु, सती विद्यमाना चेतना; तदा सर्वदोपलभ्येत, तदुपलम्भप्रतिबन्धकनिराकरणात्, आपादकसाम्राज्यादिति भावः ॥ ४४ ॥

---

१ चेतनाया भूतोपादेयत्वे । २ एतस्य हेतुद्वयस्य यथाक्रमं ज्ञानसामान्याभाव-भावरूपाज्ञानप्रतिषेधसाधकत्वम् । ३ चेतनाया इति वाक्यशेषः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तनियमे व्यभिचारमाशङ्कते–

असत्स्थूलत्वमण्वादौ घटादौ दृश्यते यथा । तथाऽसत्येव भूतेषु चेतनाऽपीति चेन्मतिः ॥

असदविद्यमानं, स्थूलत्वं महत्त्वम्, अण्वादौ परमाण्वादौ, आदिना द्व्यणुकग्रहः, घटादौ– घटस्य परम्परया कारणीभूते त्र्यणुके, यथा दृश्यते चाक्षुषविषयीक्रियते; तथा भूतेष्वसंहतभूतेषु, असत्येवाऽविद्यमानैव, चेतनाऽपि भवति, सामग्र्येव हि कार्योत्पत्तिव्याप्या, न तु तत्र[1] तदुत्पत्तौ[2] तत्र[3] तदस्तित्वमपि[4] तन्त्रम्, [5]देशानियमस्यापि प्रागभावेन, विशिष्टपरिणामेन वाऽन्यथासिद्धेः, इति चेद् मतिः परिकल्पना, तव[6] ॥ ४५ ॥

तत्रोच्यते–

नाऽसत्स्थूलत्वमण्वादौ तेभ्य एव तदुद्भवात् । असतस्तत्समुत्पादो न युक्तोऽतिप्रसङ्गतः ॥

अण्वादौ परमाणु-द्व्यणुकयोः, स्थूलत्वं महत्त्वम्, असदविद्यमानं, न । कुतः?, इत्याह– तेभ्य एव त्र्यणुककारणत्वेन प्रसिद्धेभ्य एवाऽणुभ्यः, तदुद्भवात् स्थूलत्वोत्पादात् । विपक्षे बाधकमाह– असतोऽणुष्वविद्यमानस्य स्थूलत्वस्य, तत्समुत्पादः– तेभ्योऽणुभ्य उद्भवः, अतिप्रसङ्गतो न युक्तः ॥ ४६ ॥

१ संहतावस्थापन्नेषु भूतेषु । २ चेतनोत्पत्तौ । ३ असंहते भूते । ४ चेतनास्तित्वम् । ५ तत्संघातजन्यत्वं तन्नास्तित्वव्याप्यमिति नियमस्य । ६ चार्वाकस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतिप्रसङ्गमेव स्पष्टयति–

पञ्चमस्यापि भूतस्य तेभ्योऽसत्त्वाविशेषतः। भवेदुत्पत्तिरेवं च तत्त्वसंख्या न युज्यते ॥४७॥

यदि तत्र[1]ाऽसदपि तत्रोत्पद्यते, तदाऽसत्त्वाविशेषतः पञ्चमस्याऽपि भूतस्योत्पत्तिर्भवेत्। न चेष्टाऽऽपत्तिरित्याह– एवं च पञ्चमभूतोत्पत्त्यभ्युपगमे च, तत्त्वसंख्या "चत्वार्येव तत्त्वानि" इतिविभागवचनोक्ता, न युज्यते। एवं च देशनियमार्थमुक्तनियमाऽकल्पनेऽप्यसदनुत्पत्तिनिर्वाहाय तन्नियम[2]कल्पनमावश्यकमिति भावः। कारणाभावादेव पञ्चमभूतानुत्पत्तिः, न त्वसत्त्वादिति चेत्। सो[3]ऽपि कुतः?। असत्त्वादिति चेत्। तद[4]पि कुतः?। कारणाभावादिति चेत्। अन्योन्याश्रयः। अस्तीतिधीविषयत्वाभावात्[5], इति चेत्। न, प्रध्वंसादौ व्यभिचारात्[6]। विधि-निषेधव्यवहाराविषयत्वात्, इति चेत्। न, 'पञ्चमं भूतं नास्ति' इतिनिषेधव्यवहारस्य जागरूकत्वात्। भूते पञ्चमत्वं नास्तीति चेत्। न, विकल्पविषयस्याऽखण्डस्यैव पञ्चमभूतस्य प्रतियोगित्वोल्लेखाभ्युपगमात्, अन्यथा 'इह पञ्चमं भूतं नास्ति' इत्यस्याऽनुपपत्तेः, तदभ्युपगमविरोधाच्च। नन्वेवं सत्कार्यवादसाम्राज्यापत्तिः, तथाच कार्यात् प्रागपि तदु[7]पलब्धिप्रसङ्गः। अनाविर्भावाद् न तत्प्रसङ्ग इति चेत्। न, अनाविर्भावस्य निर्वक्तुमशक्यत्वात्, उपलम्भाभावरूपत्वे[8] तस्याऽऽत्माश्रयात्, व्यञ्जकाद्यभावरूपत्वे च व्यञ्जकादीनां प्राक्सत्त्वे तद[9]भावाऽयोगात्, असत्त्वे च तद[10]नुपपत्तेः। किंच,

---

१ भूतसंघाते। २ भूतसंघातजन्यत्वमसंहततत्प्रत्येकास्तित्वव्याप्यमित्येवंरूपस्य नियमस्य कल्पनम्। ३ कारणाभावः। ४ असत्त्वम्। ५ असत्त्वमिति वाक्यशेषः। ६ प्रध्वंसस्य 'प्रध्वंसोऽस्ति' इत्यस्तिधीविषयत्वसत्त्वेऽपि सत्त्वाभावात्। ७ सत्त्वोपलम्भप्रसक्तिः। ८ ख.ग.घ.च. 'त्वेन त'। ९ व्यञ्जकाद्यभावायोगात्, सदसत्त्वयोर्विरोधात्। १० व्यञ्जकाद्यनुत्पत्तेः, नाऽसत् सद् भवतीति सिद्धान्ताश्रयणात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमुत्पत्तिपदार्थ एव विलीयेत, कार्यस्य प्रागपि सत्त्वेनाऽऽद्यक्षणसंबन्धरूपतदभावात्, इत्युभयतः पाशा रज्जुः, इति चेत्। न, कथञ्चित् सद-सत्कार्यवादे दोषाभावात्, द्रव्यरूपेण प्राक्सतः पर्यायस्य द्रव्यरूपेण प्रागप्युपलम्भात्, पर्यायरूपेणाऽऽद्यक्षणसंबन्धरूपपर्यायोत्पत्तेः सुघटत्वाच्च। न चेदेवम्, उपादानकारणत्वमेव दुर्घटं स्यात्, समवायनिरासेन स्वसमवेतकार्यकारित्वलक्षणतदसिद्धेः; उपादाने कार्यप्रागभावोऽपि न सिद्ध्येत्, प्रतियोगित्व-विशेषणतयोः स्वरूपानतिरेकात्, इत्यन्यत्र विस्तरः। अत एव शाक्यो-लूकानां सत्कार्यवादे, सांख्यानां चाऽसत्कार्यवादे पर्यनुयोगा एकान्तपक्षनिवृत्त्यंशे फलवन्त एव तान्त्रिकैरुक्ताः। तथाच संमतौ बभाण वादी सिद्धसेनः–

"जे संतवायदोसे सक्को-लूआ भणन्ति संखाणं। संखा य असव्वाए तेसिं, सव्वे वि ते सच्चा ॥१॥" इति ॥४७॥

पराभिप्रायमाशङ्क्य निराकुरुते–

तज्जननस्वभावा नेत्यत्र मानं न विद्यते। स्थूलत्वोत्पाद इष्टश्चेत्तत्सद्भावेऽप्यसौ समः ॥४८॥

अण्वादयस्तज्जननस्वभावा न– असदुत्पादकस्वभावा न, ततो न [10]तेभ्योऽसदुत्पत्तिः। न चैतादृशस्वाभाव्येऽपि पर्यनुयोगावकाशः, 'वह्निर्दहति, नाकाशम्' इत्यादिवत् स्वभावस्याऽपर्यनुयोज्यत्वादिति भावः। इति– उपदर्शितायां, अत्र

१ तस्या उत्पत्तेः। २ कथञ्चित्सदसत्कार्यवादाङ्गीकारः। ३ तत्– उपादानकारणम्। ४ स्वरूपाभिन्नत्वात्। ५ बौद्ध-वैशेषिकाणाम्। ६ एकान्तस्यैव दुर्नयत्वेन प्रतिक्षेप्तुं जैनानामिष्टेः। ७ सैद्धान्तिकैः। ८ यान् सद्वाददोषान् शाक्यो-लूका भणन्ति सांख्यानाम्। सांख्याश्चासद्वादे तेषां, सर्वेऽपि ते सत्याः ॥१॥ ९ सम्मतिसूत्रे गाथा १४७। १० अणुभ्यः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकृतोपपत्तौ च, मानं प्रमाणं, न विद्यते, निर्विकल्पकेन तदग्रहणात्, तद्विषयत्वस्य[1] निश्चयैकोन्नेयत्वादिति भावः । स्थूलत्वोत्पाद इष्टोऽभिमतः; अतस्तदन्यथानुपपत्तिरेवाऽतिप्रसङ्गभङ्गायाऽसदजननस्वभावत्वेनोपादानस्योपेयहेतुत्वे मानमिति चेत् । असौ स्थूलत्वोत्पादः, तत्सद्भावेऽपि तेष्वणुषु कथञ्चित्सत्त्वेऽपि, समस्तुल्यनिर्वाहः[2] । तथाच लाघवात् सज्जननस्वभावत्वेनैवोपादानस्योपेयहेतुता, न त्वसदजननस्वभावत्वेन ॥ इति सत्कार्यसिद्धिः ॥ ४८ ॥

अत्र कार्यस्य सत्त्वं पूर्वोत्तरकालयोः पर्यायार्थिकनयानुसारिणः पर्यायद्वारेणैवाऽऽदिशन्ति, द्रव्यस्य निष्पन्नत्वेनाऽदलत्वात्, द्रव्यार्थिकनयानुसारिणस्तु तेन रूपेण द्रव्यस्याऽनुत्पन्नत्वाद् द्रव्यद्वारेणैवाऽऽदिशन्ति[3] । तदिदमुभयाभिप्रायेणोक्तं सम्मतौ–"पच्चुप्पन्नं[4] भावं विगय-भविस्सेहिं जं समण्णेइ, एयं पडुच्च वयणं[5]" इति । अत्र चाऽऽद्या[6]भिप्रायेण टीकाकृतोक्तम्–"न चात्मादिद्रव्यं विज्ञानादिपर्यायोत्पत्तौ दलं, तस्य निष्पन्नत्वात्" इति । अन्त्या[7]भिप्रायेण चोपचयमाह ग्रन्थकारः प्रकृते–

न च मूर्ताणुसंघातभिन्नं स्थूलत्वमित्यदः। तेषामेव तथाभावो न्याय्यं मानाविरोधतः॥४९॥

न च मूर्तानां रूपवतामणूनां परमाणूनां संघातात् परिणामविशेषाद् भिन्नं स्थूलत्वं, मूर्तपदं चाक्षुषयोग्यत्वनिर्वाहाय । इति हेतोः, अदः स्थूलत्वं, तेषामेव परमाणूनामेव, तथाभावः कथञ्चिदेकत्वपरिणामः, न्याय्यं घटमानकम्, मानाविरोधतः

---

१ निर्विकल्पकविषयत्वस्य । २ स्थूलत्वोत्पादाविनाभावः । ३ पूर्वोत्तरकालयोः कार्यस्य सत्त्वमिति संबध्यते । ४ प्रत्युत्पन्नं भावं विगत-भविष्यद्भ्यां यत् समन्वेति, एतत् प्रतीत्य वचनम् । ५ सम्मतिसूत्रे गाथा १०० । ६ आद्योऽत्र पर्यायार्थिकनयः । ७ अन्त्यो द्रव्यार्थिकनयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाणाविरोधात्, तदन्यभेदेन तत्त्वसाधनाद् न हेतु-साध्ययोरविशेषः । एवं च स्थूलत्वस्य प्रागपि द्रव्यरूपेण सत्त्वं सिद्धम् ।

अत्रेयं प्रक्रिया– अणूनामेवैकत्वसंख्या-संयोग-महत्त्वा-ऽपरत्वादिपर्यायैरुत्पत्तिः, बहुत्वसंख्या-विभागा-ऽणुपरिणाम-परत्वादिपर्यायैश्चाऽनुत्पत्तिः । न च विशिष्टाऽण्वतिरिक्तमवयवि द्रव्यमस्ति । न चैवं विभक्तस्येव संहतस्याऽप्यणोरचाक्षुषत्वं स्यादिति वाच्यम्, 'नानास्वभावत्वेन तस्य तदा चाक्षुषजननस्वभावत्वात्, विप्रकृष्ट-सन्निकृष्टेषु रेण्वादिषु तथास्वाभाव्यदर्शनात्, प्रतिपत्तिपत्तारं च प्रति नियमेनाऽनतिप्रसङ्गात्' इति बहवः । 'त्र्यणुकत्वादिघटकसंयोगानां पिशाचत्वादिघटकसंयोगभिन्नानां वैजात्येन द्रव्यसाक्षात्कारत्वावच्छिन्नं प्रति हेतुत्वात्' इत्यन्यतन्त्रानुसृताः । तथापि तन्त्वादिपरिणतानामणूनां कथं पटादिपरिणामः, द्रव्यस्थानीयस्य परिणामस्य द्रव्यान्तरस्थानीयपरिणामप्रतिबन्धकत्वात्, अन्यथाऽन्त्यावयविनि द्रव्यान्तरोत्पत्तिप्रसङ्गात् ? इति चेत् । न, अन्त्यावयविन्यपि पटादौ खण्डपट-महापटाद्युत्पत्तिदर्शनात्, पटत्वेन पटाऽनाधारत्वाच्च, 'पटे पटः' इत्यप्रत्ययात् । अथ द्रव्याऽसमवायिकारणीभूतसंयोगनाशेन पूर्वपटनाशोत्तरमेवोत्तरपटोत्पादः । न चैकैकतन्तुसंयोगे द्वितन्तुकादेर्नाशे त्रितन्तुकाद्युत्पत्तिः, पुनरेकैकतन्तुवियोगे त्रितन्तुकादिनाशे द्वितन्तुकाद्युत्पत्तिरिति कल्पनागौरवाद् द्वितन्तुकपटादेरेव तन्त्वन्तरसंयोगेन त्रितन्तुकादिपटोत्पादकत्वमिति वाच्यम्; द्वितन्तुकादिक्रमेणोत्पन्नचतुरादितन्तुकपटस्य द्वितन्तुकाऽसमवायिकारणसंयोगनाशाद् द्वितन्तुकादिनाशक्रमेण नाशः, अन्तरा पुनर्द्वितन्तुकादिक्रमेणोत्पत्तिरिति कल्पनागौरवसाम्यात्; पटादिजनकविजातीयसंयोगं प्रति तन्तुत्वादिना हेतुत्वाच्च; इति चेत् । न, विजातीयसंयोगस्य द्रव्यहेतुत्वासिद्धेः, तत्रापि हेत्वन्तरापेक्षायामवश्याऽऽश्रयणीयेन ॥ २५ ॥

१ अण्वादेः । २ संहतावस्थायाम् । ३ चाक्षुषप्रत्यक्षाजनन-जननस्वभावत्वविभावनात् । ४ इतो 'हेतुत्वाच्च' इत्यन्तः पूर्वपक्षः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वभावापरनाम्ना परमाणुगतातिशयेनैव द्रव्योत्पत्तिसंभवात्; स चातिशयः शक्तिः, अन्यो वा, इत्यन्यदेतत् । एवं च दशतन्तुकादेश्चरमतन्तुसंयोग-वियोगक्रमेणेव प्रथमतन्तुसंयोग-वियोगक्रमेणाऽपि नवतन्तुकोपलब्धिर्निराबाधा, नवपर्यन्तैरिव द्वितीयादिभिरपि नवतन्तुभिरतिशयितैर्नवतन्तुकाऽऽरम्भात् । न चैवं प्रतिलोमक्रमेणाऽनन्तपटकल्पनाऽऽपत्तिः,द्वितीयमादाय नवतन्तुकस्येव, तृतीयमादायाऽष्टतन्तुकस्याऽपि स्वीकर्तव्यत्वादिति वाच्यम्; इष्टत्वात्, एकानेकस्वभावाविरोधात्, एकतन्तुसंयोगविगमाभिव्यञ्जकाभावादेवाऽष्टतन्तुकाद्यनुपलब्धेः; अत एव महति पटे 'एकः पटः' इति प्रतीतिर्नाऽनुपपन्ना, अङ्गुलीभूतलसंयोगावच्छेदेन पाण्याद्यनन्तसंयोगानुपलब्ध्यादिवद् वा पटान्तरानुपलब्धेरिति दिग् ।

ननु तथापि पूर्वावस्थानाशेनैवोत्तरावस्थाभ्युपगमात् तन्त्वादिपरिणामनाशेनैव पटादिपरिणामोत्पत्तेः पटकाले तन्तुप्रतीतिर्न स्यात्, नष्टस्याऽतीतवदग्रहणादिति चेत् । न, द्विविधो हि विनाशः– प्रायोगिकः[1], वैस्रसिकश्च[2] । आद्यः समुदयजनित एव, अन्त्यस्तु द्विविधः– समुदयजनितः, ऐकत्विकश्च । अन्त्यो धर्मादीनां गत्याधारत्वादिपर्यायोत्पादस्य तदनाधारत्वध्वंसपूर्वकत्वेनाऽन्ततः क्षणध्वंसे तद्विशिष्टध्वंसनियमाच्चोपेयः । समुदयजनितश्च द्विभेदः – समुदयविभागलक्षणः, अर्थान्तरगमनलक्षणश्च । तत्राऽऽद्यस्य प्रतियोगिप्रतिपत्तिविरोधित्वेऽपि, अन्त्यस्याऽतथात्वाद[3]नुपपत्तिविरहा[4]दिति दिक् ॥ ४९ ॥

ननु न स्थूलत्वं परमाण्वभिन्नम्, गुण-गुणिनोर्भेदात्, कारणबहुत्व-कारणमहत्त्व-प्रचयक्रमेणोत्पन्नस्य तस्या[5]ऽवयविनिष्ठत्वाच्च । न चाऽवयविनि मानाभावः, विलक्षणसंस्थानावच्छेदेन संनिकर्षाद् यद्द्रव्यगतघटत्वादिग्रहस्तद्व्यक्तेरुत्पाद-विनाश-

१ प्रयोगजन्यः । २ स्वाभाविकः । ३ प्रतियोगिप्रतिपत्त्यविरोधित्वात् । ४ पटकाले तन्तुप्रतीतेरुपपत्तेः । ५ स्थूलत्वस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदादिप्रत्ययान्यथाऽनुपपत्त्या पृथगवयविसिद्धेः । न चाऽऽवृतत्वा-ऽनावृतत्वाभ्यां [1]तद्भेदः, अवच्छेदकभेदेनाऽविरोधात् । न चाऽर्धावृतेऽप्यवयविनीन्द्रियसंनिकर्षसत्त्वे परिणामादिग्रहप्रसङ्गः, इष्टत्वात् , तद्गतहस्तत्वादिजातिग्रहे तु यावदवयवावच्छेदेन संनिकर्षस्य हेतुत्वात् । न च 'पाणौ शरीरं सकम्पं, निष्कम्पं च चरणे' इतिप्रतीतेः सकम्पत्व-निष्कम्पत्वाभ्यां भेदः, तत्र पाणावेव कम्पस्वीकारात् 'पाणौ शरीरं चलति' इतिप्रत्ययस्य परम्परासंबन्धेन पाणिवृत्तिकम्पावगाहित्वात् । न च कम्पाभावधीरेव परम्परासंबन्धेन चरणनिष्ठकम्पाभावमवगाहतामिति वाच्यम् , पाणिकर्मणैव प्रत्ययाद्युपपत्तावतिरिक्तशरीरकर्मकल्पनायां गौरवात् । न चैवं कर्मणस्त्रुटिमात्रगतत्वापत्तिः, सर्वावच्छेदेनोपलभ्यमानकर्मवति शरीरादौ कर्माभावोपलम्भप्रसङ्गात् । एतेन 'शरीर एवाऽस्तु क्रिया, नानावयवे तत्कल्पने गौरवात्' इत्यपास्तम् , पाण्यादौ कर्माभावोपलम्भापत्तेः । न च परम्परासंबन्धस्य दोषत्वम् , चरणादावपि [2]तदनापत्तेः, दोषत्वकल्पने गौरवाच्च; इत्याशङ्कायामाह–

भेदे तददलं यस्मात्कथं सद्भावमश्नुते ?। तदभावेऽपि तद्भावे सदा सर्वत्र वा भवेत्॥५०॥

भेदे स्थूलत्वस्याणुभ्यः सर्वथा पृथग्भावे, अदलं सत् तत् स्थूलत्वं, यस्मात् कथं सद्भावमश्नुते– सत्ताव्यवहारं कथं प्राप्नुयात् ?, सर्वथा द्रव्यपृथग्भूतत्वे शशशृङ्गवदसत्त्वप्रसङ्गात् । किञ्च, तदभावेऽपि [3]दलाभावेऽपि, तद्भावे स्थूलत्वोत्पादे 'अभ्युप-

---

१ अवयविभेदः, आवृतत्वाऽनावृतत्वयोर्विरुद्धधर्मत्वात् , विरुद्धधर्माध्यासस्य च भेदनिबन्धनत्वात् , "विरुद्धधर्माध्यासः, कारणभेदश्च भेदहेतुः, स चेन्न भेदको विश्वमेकं स्यात्" इति बौद्धाम्नायादिति भावः । २ तस्य कर्माभावोपलम्भस्याऽनापत्तेः । ३ उपादानाभावेऽपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गम्यमाने' इति शेषः, कालनियमहेत्वभावात् सदा, देशनियमहेत्वभावाच्च सर्वत्र वा, भवेत् 'तत्[1]' इति योज्यते । अथ त्र्यणुकादेरेव महत्त्वोपादानत्वाद् नाऽदलत्वम्, अन्यादृशमदलत्वं चाऽप्रयोजकम्, समवायेन जन्यसत्त्वावच्छिन्नं प्रति तादात्म्येन द्रव्यस्य हेतुत्वाच्च नातिप्रसङ्ग इति चेत् । न, समवायनिरासात्, ध्वंससाधारण्येनाऽपृथग्भावेन जन्यत्वावच्छिन्नं प्रत्येव द्रव्यहेतुत्वौचित्याच्च, इत्यन्यत्र विस्तरः । पृथगवयविन्यपि च न मानमस्ति, अनन्तावयव्यादिकल्पने गौरवात् । किञ्च, आवृता-ऽनावृतत्वाभ्यामपि भिद्यत एवाऽवयवी, ज्ञानप्रतिबन्धकसंयोग-त[2]दभावरूपयोरावृता-ऽनावृतत्वयोर्भिन्नावच्छेदेन संभवेऽपि चाक्षुषविषयता-त[3]दभावरूपयोस्त[4]योर्विना भेदमसंभवात्, स्वरूपाबहिर्भूताया विषयताया अव्याप्यवृत्तित्वायोगात्; सकम्पत्व-निष्कम्पत्वाभ्यामपि तथा शरीरस्य निष्कम्पत्वे 'पाणौ न चलति' इत्यस्याऽपि प्रसङ्गात् । शरीरत्वादेरिव पाणेः कर्माऽभावानवच्छेदकत्वादयमदोष इति चेत् । न, चरणे कम्पदशायामपि 'पाणौ न चलति' इत्यनापत्तेः । न च दोषात् 'पाणौ न चलति' इति न प्रतीयत इति वाच्यम्, तादृशदोषकल्पने गौरवात् । किञ्च, एवमुक्तयुक्त्याऽग्रादिनिष्ठसंयोगादेरेव वृक्षादौ प्रतीत्युपपत्तौ संयोगादेरपि व्याप्यवृत्तित्वं स्यात् । अपि च, एवं शतमाषकेभ्यः शतमाषकाऽऽरब्धावयविनि गुरुत्वाधिक्यादवनतिविशेषः स्यात् । न चावयविन्यत्यन्तापकृष्टगुरुत्वस्वीकाराद् गुरुतरद्रव्ययोः समयोरुत्तोलने एकत्र संलग्नतृणादिगुरुत्वाधिक्यादवनतिवदुपपत्तिः, तत्तदन्त्यावयवित्वेनाऽत्यन्तापकृष्टगुरुत्वहेतुत्वे, उत्कृष्टगुरुत्वप्रतिबन्धकत्वे च गौरवात्, इत्यन्यत्र विस्तरः । तस्मात् कथञ्चित् परमाण्वात्मकमेव स्थूलत्वं परमाणुषु सदेवोत्पद्यते, इत्युपचयेन सिद्धम् ॥ ५० ॥

---

१ स्थूलत्वम् । २ तदा ज्ञानप्रतिबन्धकसंयोगः । ३ तच्छेदेन चाक्षुषविषयता गृह्यते । ४ आवृतत्वा-ऽनावृतत्वयोः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न चैवं द्रव्यरूपेणाऽणुषु स्थूलत्वस्येव प्रत्येकावस्थायां भूतेषु तथाचैतन्यस्य सत्त्वेऽप्यनुपपत्तिविरहात् सिद्धं नः समीहितम्, इत्यत्राह–

न चैवं भूतसंघातमात्रं चैतन्यमिष्यते। अविशेषेण सर्वत्र तद्वत् तद्भावसंगतेः॥ ५१॥

न चैवं– स्थूलत्वं यथाऽणुसंघातमात्रं तथा, भूतसंघातमात्रं चैतन्यमिष्यते चार्वाकैः। तथेष्टौ को दोषः?, इति तटस्थाशङ्कायामाह– अविशेषेण संघातातिरिक्तविशेषानभ्युपगमेन, सर्वत्र जीवच्छरीरवदन्यत्राऽपि, तद्वद् भूतसंघातवत्, तद्भावसंगतेर्व्यक्तचैतन्यसद्भावप्रसङ्गात्॥ ५१॥

ततः किम्?, इत्याह–

एवं सति घटादीनां व्यक्तचैतन्यभावतः। पुरुषाद्यविशेषः स्यात् स च प्रत्यक्षबाधितः॥५२॥

एवमुपदर्शितप्रकारेण, व्यक्तचैतन्यभावतः, तसः सप्तम्यर्थत्वाद् व्यक्तचैतन्यभावे 'सति' इति योजनीयम्। 'एवं सति' इत्यनेनोक्तार्थपरामर्शे तु सर्वपदस्य घटादिरेवाऽर्थ इति पौनरुक्त्यं स्यात्। घटादीनां पुरुषात्– जीवच्छरीरात्, न विशेषः स्यात्। न चायमपीष्टः, इत्याह– स च घटादीनां पुरुषाविशेषश्च, प्रत्यक्षबाधितः, घटादीनामचेतनत्वेन प्रतीतेः॥ ५२॥

१ व्यक्तचैतन्यस्य। २ चार्वाकाणाम्। ३ घटादौ। ४ घटादीनाम्। ५ पूर्वश्लोकस्थसर्वत्रपदघटकस्य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु स्थूलत्वमपि नाऽणुसंघातमात्रम्, द्व्यणुकादावभावात्, किन्तु [1]संघातविशेष एव; एवं च चैतन्यमपि घटादिव्यावृत्तभूतसंघातविशेष एवेति नानुपपत्तिः, इति शङ्कते–

अथ भिन्नस्वभावानि भूतान्येव यतस्ततः। तत्संघातेषु चैतन्यं न सर्वेष्वेतदप्यसत्॥५३॥

अथ यतो भूतान्येव शरीरारम्भकाण्येव, भिन्नस्वभावानि घटाद्यारम्भकस्वभावविलक्षणस्वभावानि। ततस्तत्संघातेषु शरीरेषु, चैतन्यं; न सर्वेषु घटादिषु; एवं च संहन्यमानविशेषकृतः संघातविशेष इति भावः। अत्राह– एतदप्यसत् ॥ ५३ ॥

स्वभावो भूतमात्रत्वे सति न्यायाद् न भिद्यते। विशेषणं विना यस्माद् न तुल्यानां विशिष्टता॥

यतो भूतमात्रत्वे सति भूतातिरिक्तभेदकाभावे सति, न्यायाद् युक्तितः, स्वभावो न भिद्यते। कुतः ?, इत्याह– यस्मात् कारणात्, तुल्यानां भूतत्वेन समानानां घट-शरीराद्यारम्भकाणां, विशेषणं विना विशिष्टता न भवति; भूतस्य भूतान्तरभेदो हि न वास्तवः, किन्तु विभिन्नधर्मप्रकारकबुद्धिविषयत्वलक्षणो भाक्त एव, विशेषणावच्छिन्नविशेष्यभेदात्मको वा, न च विभिन्नधर्मं विना [2]तद्घटित[3]तत्संभव इति भावः। अत एव भूतान्तरनिष्ठकार्यजनकातिशयाऽन्याऽतिशयशालित्वलक्षणवैधर्म्यरूपो भेदोऽपि निरस्तः, [4]तादृशातिशयस्य भूतातिरिक्तत्वे [5]तत्त्वान्तरप्रसङ्गात्, [6]तदनतिरिक्तत्वे च स्वभावाभेदादिति दिग् ॥ ५४ ॥

---

१ द्व्यणुकादिविशिष्टसंघातः। २ तेन विभिन्नधर्मेण। ३ तस्य विशेष्यभेदस्य। ४ भूतान्तरनिष्ठकार्यजनकातिशयाऽन्यातिशयस्य। ५ तथा च "चत्वार्येव तत्त्वानि" इति सिद्धान्तव्याघात इत्यर्थः। ६ तदा भूतानि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरूपत एव [1]भेदो भविष्यति, इत्यत्राह–

स्वरूपमात्रभेदे च भेदो भूतेतरात्मकः । अन्यभेदकभावे तु स एवाऽऽत्मा प्रसज्यते ॥ ५५ ॥

स्वरूपमात्रभेदे चाऽविशिष्टस्वभावावच्छिन्नभेदे चाभ्युपगम्यमाने, भूतेतरात्मकः– भूतमितरयति यस्तादृश आत्मा स्वरूपं यस्यैतादृशो भेदः स्याद् भूतान्यत्वं स्यात् 'नेदं भूतं' इति प्रतीतिसाक्षिकत्वाद् भूतस्वरूपभेदस्येत्यर्थः । एवं च भूतान्यत्वेन परिशेषादात्मसिद्धिरिति भावः । अस्तु तर्हि अनायत्या भेदकान्तरम्, इत्यत्राह– अन्यभेदकभावे तु भूतातिरिक्तभेदकसत्त्वे तु, स एव भेदकत्वेनाऽभिमत एव, आत्मा प्रसज्यते, समानशुक्लपटेषु रागादिरिव; घटादितुल्येषु शरीरादिषु सात्मकत्वेनैव विशेषात् । न च सात्मकत्वसमनियतधर्माणामेव भेदकत्वम्, प्रत्येकं विनिगमनाविरहप्रसङ्गात् । न च सात्मकत्वेनाऽपि समं [2]तत्प्रसङ्गः, अक्लृप्तेन समं तदभावात् । न च तादृशविशिष्टशरीरत्वेनैव चैतन्योपादानत्वम्, धर्मिग्राहकमानेन विशेषणस्यैव चैतन्योपादानतया सिद्धेः, तत्त्वेन परचैतन्यनिमित्तत्वादिति निष्कर्षः; तथाच न विशेषणकृतोऽपि संघातविशेष इति भावः । वस्तुतः शरीरपरिणामिनामेव भूतानां नात्मोपग्रहं विना वैचित्र्यम्, तदुपग्रहश्च तत्सहकारित्वम्, तच्चाऽदृष्टद्वारा । तथाच शरीरं भोगसमानाधिकरणगुणसाध्यम्, भोगसाधनत्वात्, स्रगादिवत्, इत्यत्र तात्पर्यम् ॥ ५५ ॥

कार्यभेदादेव स्वभावभेदो भविष्यति, इत्याशङ्कते—

---

१ घटारम्भक-शरीरारम्भकाणां भूतानामिति शेषः । २ विनिगमनाविरहस्तदाऽनुकृष्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हवि-र्गुड-कणिक्कादिद्रव्यसंघातजान्यपि। यथा भिन्नस्वभावानि खाद्यकानि तथेति चेत्॥

हविर्घृतम्, आदिशब्दाच्चातुर्जातकादिपरिग्रहः, तत्संघातजान्यपि खाद्यकानि यथा रस-वीर्यविपाककार्यभेदाद् हविरादिभिन्नस्वभावानि, तथा भूतसंघातजान्यपि शरीराणि चैतन्यकार्यभेदाद् घटादिभ्यो भिन्नस्वभावान्युपपत्स्यन्ते। अत्र कार्यभेदे स्वभावभेदः, स्वभावभेदे च कार्यभेद इत्यन्योन्याश्रय इति दोषे सत्येव कार्यभेदासिद्धिं दोषान्तरमाह। इति चेत् 'नैतदेवम्' इति शेषः॥ ५६॥

व्यक्तिमात्रत एवैषां ननु भिन्नस्वभावता। रस-वीर्यविपाकादिकार्यभेदो न विद्यते॥५७॥

यत एषां खाद्यकानां, 'ननु' इत्याक्षेपे, भिन्नस्वभावता व्यक्तिमात्रत एव व्यक्तिभेदमात्राधीनैव। मात्रपदप्रयोजनमाह– रस-वीर्य-विपाकादिकार्यभेदो– हविर्गुडादिकार्यरस-वीर्यविपाकादिविलक्षणहेतुत्वं न विद्यते। अयं भावः– कारणोत्कर्षात् कार्योत्कर्षेऽपि कार्यवैजात्यस्य कारणवैजात्याधीनत्वात् खाद्यकदृष्टान्तेनाऽसंहतभूतकार्यात् संहतभूतकार्योत्कर्षेऽपि चैतन्यलक्षणं विलक्षणं कार्यं विलक्षणमात्मानमेव हेतुमाक्षिपतीति॥ ५७॥

शङ्कते–

तदात्मकत्वमात्रत्वे संस्थानादिविलक्षणा। यथेयमस्ति भूतानां तथा सापि कथं न चेत्?॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदात्मकत्वमात्रत्वे हवि-र्गुड-कणिकादिद्रव्यसंघातात्मकत्वमात्रत्वे सति, संस्थानादिना, आदिशब्दात् परिमाणादिग्रहः, विलक्षणा विभिन्नसंवित्तिसंवेद्या, यथेयं खाद्यकानां भिन्नस्वभावताऽस्ति; तथा भूतानां भूतकार्याणां देह-घटादिव्यक्तीनां, साऽपि चैतन्योपादानत्व-तदनुपादानत्वलक्षणा विभिन्नस्वभावताऽपि कथं न ?। अत्रोत्तरम्– इति चेत् । नैतद् वाच्यम्, व्यक्तिमात्रत इत्यस्य हि स्वरूपभेदाऽप्रयोज्यत्वमर्थः, तत्स्वभावाऽऽक्रान्तव्यक्तिस्तु कर्तृव्यापारादिकारणविशेषसमुत्पाद्यैव, अतो नाऽऽकस्मिकत्वम्, अविशेषो वा; तेन त्वभिमतव्यक्तिविशेषस्याऽनुत्पत्तिरेव ॥ ५८ ॥

कुतः ?, इति चेत् ।

कर्त्रभावात्तथा देश-कालभेदाद्ययोगतः । न चासिद्धमदो भूतमात्रत्वे तदसंभवात् ॥ ५९ ॥

कर्त्रभावात्– खाद्यकानामिव शरीरस्याऽतिरिक्तकर्त्रभावात्, तथा, देश-कालभेदादीनाम्, आदिनाऽदृष्टादिपरिग्रहः, अयोगतोऽभावात् । न चासिद्धमद उक्तवचनं, भूतमात्रत्वे विश्वस्य भूतैकस्वभावत्वे, तदसंभवात् कर्त्राद्यसंभवात् ॥ ५९ ॥

फलितमाह–

तथाच भूतमात्रत्वे न तत्संघात-भेदयोः । भेदकाभावतो भेदो युक्तः, सम्यग् विचिन्त्यताम् ६०

१ तच्चैतन्यम् । २ तव चार्वाकस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाच कर्त्राद्यभावे च, भूतमात्रत्वे– विश्वस्य भूतैकस्वरूपत्वे, तेषां भूतानां संघातभेदयोः शरीर-घटादिभेदयोः, भेदकाभावतो भेदो न युक्तः, इति सम्यगुक्तनीत्या परमार्थविचारेण, विचिन्त्यतां परामृश्यताम् ॥ ६० ॥

एकस्तथाऽपरो नेति तन्मात्रत्वे तथाविधः। यतस्तदपि नो भिन्नं ततस्तुल्यं च तत्तयोः॥६१॥

यतो यस्मादापाततः प्रतीयमानाद् निमित्तात्, एको भूतसंघातो देहादिरूपः, तथा देहादिरूपत्वेन, अपरो घटादिरूपः, तन्मात्रत्वे भूतसंघातमात्रत्वे, अपिर्गम्यते, तन्मात्रत्वेऽपीत्यर्थः, तथाविधो देहादिरूपो न, इति– एतादृशो विभागः 'उच्यते' इति शेषः; तदपि निमित्तं, नो भिन्नं भूतातिरिक्तं, तत्त्वान्तरप्रसङ्गात्। ततस्तस्माद्धेतोः, तयोर्देह-घटादिरूपयोर्भूतसंघातयोः, तच्च भूतमात्रत्वं च, तुल्यम्; अतः शरीरस्य नाऽऽत्मत्वमिति भावः ॥ ६१ ॥

अनभिज्ञः सन् पुनः शङ्कते—

स्यादेतद् भूतजत्वेऽपि ग्रावादीनां विचित्रता। लोकसिद्धेति सिद्धैव न सा तन्मात्रजा न तु६२

स्यादेतद् भूतजत्वेऽपि ग्रावादीनां पाषाणादीनां, विचित्रता घटादिभ्यो विलक्षणवर्ण-स्पर्शादिरूपा, लोकसिद्धेति, न हि सा नास्तीति वक्तुं शक्यते, प्रत्यक्षसिद्धस्याऽर्थस्य प्रतिक्षेपाऽयोगात्, तथा शरीरविचित्रताऽप्युपपत्स्यत इत्याशयः। अत्राह– सिद्धैव सा– न सा प्रतिक्षिप्यते, तु पुनः, तन्मात्रजा न– भूतमात्रजा न ॥ ६२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुतः ?, इत्याह–

अदृष्टाकाश-कालादिसामग्रीतः समुद्भवात् । तथैव लोकसंवित्तेरन्यथा तदभावतः ॥६३॥

अदृष्टा-ऽऽकाश-कालादिसामग्रीतः समुद्भवात् तदुत्पादाभ्युपगमात् । तथा लोकेन न प्रतीयते, इत्यत्राह– तथैव– उक्तवदेव, लोकसंवित्तेर्व्युत्पन्नलोकप्रतीतेः । अन्यथा– एवमनभ्युपगमे, तदभावतो विचित्रताऽभावप्रसङ्गात् ॥ ६३ ॥

सर्वैर्लोकैस्तथा न प्रतीयत इति चेत् । अत्राह–

न चेह लौकिको मार्गः स्थितोऽस्माभिर्विचार्यते। किन्त्वयं युज्यते क्वेति त्वन्नीतौ चोक्तवन्न सः

न चेह तत्त्वपरीक्षायां, लौकिकोऽव्युत्पन्नलोकमात्राश्रितः, स्थितो मार्गः– 'किमयमित्थं स्थितः ?' इतिसंशयोपारूढोऽर्थः, अस्माभिर्विचार्यते– गतानुगतिकतया तद्वदेव संदिह्यते। किन्तु 'अयमित्थंभूतोऽर्थः क युज्यते?' इत्यादिजिज्ञासाक्रमेण परीक्ष्यते । परीक्ष्यमाणश्चोक्तवद्– उक्तरीत्या, त्वन्नीतौ त्वदभ्युपगमे, स यथास्थितोऽर्थो न घटते ॥ ६४ ॥

अत्र नव्यनास्तिकाः– अवच्छेदकतया ज्ञानादिकं प्रति तादात्म्येन कल्प्यकारणताकस्य शरीरस्यैव समवायेन ज्ञानादिकं प्रति हेतुत्वकल्पनमुचितम् । न चैवमात्मत्वं जातिर्न स्यात् , पृथिवीत्वादिना साङ्कर्यादिति वाच्यम् , उपाधिसाङ्कर्यस्येव जातिसाङ्कर्यस्याऽप्यदोषत्वात् । न च तथापि भूतचतुष्कप्रकृतित्वेन शरीरमतिरिच्येत, स्वाश्रयसमवेतत्वसंबन्धेन गन्धाद्यभा- ॥ ३० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वस्य गन्धादिकप्रतिबन्धकत्वेन तस्य भूतचतुष्कप्रकृतित्वायोगात्, पार्थिवादिशरीरे जलादिधर्मस्यौपाधिकत्वात् । न चैवं परात्मरूप-स्पर्शादीनामिव तत्समवेतज्ञानादीनामपि चाक्षुष-स्पार्शनप्रसङ्गः, रूपादिषु जातिविशेषमभ्युपगम्य रूपाऽन्यतद्वत्त्वेन चाक्षुषं प्रति, स्पर्शान्यतद्वत्त्वेन च स्पार्शनं प्रति प्रतिबन्धकत्वकल्पनात्, इत्थमेव रसादीनामचाक्षुष-स्पार्शनत्वनिर्वाहात् । न चोक्तस्मरणानुपपत्तिः, पूर्वघटनाशानन्तरं खण्डघटे कारणगुणक्रमेण तद्गुणसंक्रमवत् पूर्वशरीरनाशोत्तरमुत्तरशरीरे पूर्वशरीर-गुणसंक्रमात् । न चैवमवयविज्ञानादाववयवज्ञानादिहेतुताकल्पने गौरवं, फलमुखत्वात् । माऽस्तु वाऽवयवी, विजातीयसंयोगेनैव तदन्यथासिद्धेः । तथाच शरीरान्तरोत्पादेऽपि शरीरत्वघटकविजातीयसंयोगविशिष्टाऽणुवृत्तिसंस्कारात् तादृशस्मरणोपपत्तिः । न च परात्मनोऽपि योग्यत्वात् स्वात्मन इव प्रत्यक्षत्वप्रसङ्गः, तत्तदात्ममानसे तत्तदात्मत्वेन हेतुत्वात्; परेषां तु तत्तदात्मप्रत्यक्षत्वावच्छिन्नं प्रति हेतुत्वे विनिगमनाविरहः । किञ्च, एवं संयोगस्य पृथक्प्रत्यासत्तित्वाऽकल्पने लाघवम् । न च व्यणुक-परमाणुरूपाद्यप्रत्यक्षत्वाय चक्षुःसंयुक्त-मह-दुद्भूतरूपवत्समवायत्वादिना प्रत्यासत्तित्वे त्रुटिग्रहार्थं संयोगस्य पृथक्प्रत्यासत्तित्वकल्पनमावश्यकमिति वाच्यम्; द्रव्य-तत्समवेतप्रत्यक्षे उद्भूतरूप-महत्त्वयोः समवाय-सामानाधिकरण्याभ्यां स्वातन्त्र्येण हेतुत्वे दोषाभावात्। अपि च, एवमुद्भूतरूपकार्यतावच्छेदकं द्रव्यप्रत्यक्षत्वमेव, न त्वात्मेतरत्वमपि तत्र निविशत इति लाघवमित्याहुः ।

तत्रोच्यते—

---

१ ख.ग.घ.च. 'रणानुप' । २ ख.ग.घ.च. 'प्रत्यपि हे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृतदेहे च चैतन्यमुपलभ्येत सर्वथा। देहधर्मादिभावेन, तद् न धर्मादि नान्यथा ॥ ६५ ॥

मृतदेहे च सर्वथा जीवशरीरकालीनप्रकारेण, देहधर्मादिभावेन देहधर्मत्व-देहकार्यत्वाभ्यां, चैतन्यमुपलभ्येत, देहत्व-देहरूपादिवदिति भावः; अन्यथा योग्यानुपलम्भेन तदभाव एव स्यात्। तथाच तच्चैतन्यं, तद्धर्मादि न- त[1]द्धर्मभूतं, त[1]त्कार्यभूतं च न, त[2]द्भावेऽपि त[3]दभावात्, घटत्व-घटरूपादिवदिति भावः ॥ ६५ ॥

यद् यद्धर्मादिकं न, तत् तद्भावे न भवति, इत्यत्र व्यभिचारमाशङ्क्य समाधत्ते-

न च लावण्य-कार्कश्य-श्यामत्वैर्व्यभिचारिता। मृतदेहेऽपि सद्भावादध्यक्षेणैव संगतेः॥६६॥

न च लावण्य-कार्कश्य-श्यामत्वैः शरीरधर्म-कार्यैः, मृतदेहसत्त्वेऽपि त[4]दभावाद् व्यभिचारितेति वाच्यम्, अध्यक्षेणैव संगतेः परिच्छेदात्, मृतदेहेऽपि सद्भावात् ते[5]षां, विना विषयं प्रत्यक्षायोगात् ॥ ६६ ॥

ननु रूपमात्रं तत्रोपलभ्यते, न तु बलवद्धातूपग्रहजन्यं लावण्यादि। किञ्च, उक्तनियमोऽप्यसिद्धः, पाकजरूपादिना व्यभिचारात्, तद्देशत्व-तत्संख्या-तत्परिमाणोपर्यवस्थापितकर्पराद्यपात्प्रत्यक्षोपलभ्यत्वाद्यापत्तिभिया तत्र परमाणुपर्यन्तनाशानभ्युपगमात्। अत आह-

---

१ तच्छब्देन देहः। २ देहभावेऽपि। ३ चैतन्याभावात्। ४ लावण्यादीनामभावात्। ५ लावण्यादीनाम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न चेल्लावण्यसद्भावो न स तन्मात्रहेतुकः। अत एवान्यसद्भावादस्त्यात्मेति व्यवस्थितम् ६७

चेद् यदि, मृतदेहे लावण्यसद्भावो न, तदा स लावण्यसद्भावः, तन्मात्रहेतुको न– देहमात्रप्रयोज्यो न, त[1]न्मात्रहेतुकत्वे तद्रूपादीनामिव त[1]त्सत्त्वेऽनाशप्रसङ्गात् । तन्मात्रहेतुकत्वमत्र तत्सामग्रीसमनियतसामग्रीकत्वम्, अतो न तद्रूपादावपि हेत्वन्तरसत्त्वादनुपपत्तिः । अस्तु तर्हि त[2]त्र त[3]दा गत्वरं हेत्वन्तरम्, अत्राह— अत एव– तदा लावण्याभाववच्चैतन्याभावस्याऽप्यन्याभावप्रयोज्यत्वादेव, तादृशाऽन्यपदार्थसद्भावात्, अस्त्यात्मा शरीरातिरिक्तं चैतन्योपादानम्, इति व्यवस्थितं सिद्धम् ॥ ६७ ॥

पर आह–

न प्राणादिरसौ मानं किं तद्भावेऽपि तुल्यता। तदभावादभावश्चेदात्माभावे न का प्रमा? ॥६८॥

असौ चैतन्याभावप्रयोजकाभावप्रतियोगी, प्राणादिर्न किन्त्वात्मा, अत्र किं मानम् ?। उत्तरवाद्याह प्रतिबन्द्या– ‘प्राणाद्यभावस्यैव’ इति शेषः, तद्भावेऽपि चैतन्याभावप्रयोजकाभावप्रतियोगित्वेऽपि, तुल्यता– किं मानम् ? इत्यर्थः । तदभावात् प्राणाद्यभावात्, अभावः ‘चैतन्यस्य’ इति शेषः, तथा चाऽ[4]न्यथाऽनुपपत्तिरेव मानमिति चेत् । तर्हि आत्माभावे न चैतन्याभावः, ‘इत्यत्र च’ इति शेषः, का प्रमा किं प्रमाणं ? न किञ्चित्, अन्यथाऽनुपपत्तेरेकत्र पक्षपातायोगादिति भावः ॥६८॥

पर आह–

---

१ तच्छब्देन देहः । २ देहे । ३ मृतावस्थायाम् । ४ प्राणादिसद्भावं विना चैतन्यस्यानुपपत्तिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन तद्भावभावित्वं न भूयो नलिकादिना। संपादितेऽप्यतत्सिद्धेः सोऽन्य एवेति चेन्न तत् ६९

तेन सह प्राणादिना सह, तौ भावौ– अन्वय-व्यतिरेकौ तद्भावित्वं तत्प्रतियोगित्वं 'तत्र मानम्' इति शेषः, हेतुत्वेन क्लृप्तस्य तस्यैव कार्याभावप्रयोजकाभावप्रतियोगित्वकल्पनौचित्यादिति भावः। अत्रोत्तरम्– न, अन्वय-व्यतिरेकप्रतियोगित्वमेव प्राणादेरसिद्धमित्यर्थः। कुतः?, इत्याह– भूयो मरणोत्तरं, नलिकादिना, आदिशब्दाद् बस्त्यादिग्रहः, संपादितेऽपि– अन्तःसंचारितेऽपि 'वायौ' इति शेषः, अतत्सिद्धेश्चैतन्यानुत्पत्तेरन्वयव्यभिचारादिति[3] भावः। पर आह– स नलिकादिना संपादितो वायुः, अन्य एव न प्राणः, इति न व्यभिचारः। उत्तरवाद्याह– इति चेत्, न तद् यदुक्तमेतत् ॥ ६९ ॥

कुतः?, इत्याह–

वायुसामान्यसंसिद्धेस्तत्स्वभावः स नेति चेत्। अत्रापि न प्रमाणं वश्चैतन्योत्पत्तिरेव चेत् ७०

वायुसामान्यसंसिद्धेः– कोष्ठान्तःसंचारिवायुत्वं हि प्राणत्वम्, ततः कोष्ठान्तःसंचार-वायुत्वयोस्तत्र सिद्धेः कथं न प्राणत्वम्? इति भावः। पर आह– स चैतन्यजननस्वभावो न, अतो न प्राणः। अत्राह– इति चेत्, अत्रापि चैतन्यजननस्वभावत्वेऽपि, वो युष्माकं, न प्रमाणम्, अप्रत्यक्षत्वात् तस्य। [7]चैतन्योत्पत्तिरेवाऽन्यथानुपपद्यमाना प्रमाणमिति चेत् ॥ ७० ॥

---

१ प्राणाद्यभावस्यैव। २ कार्यमत्र चैतन्यम्। ३ मृतदेहे नलिकादिना संपादितस्य प्राणवायोः सत्त्वेऽपि चैतन्यस्याऽसत्त्वेन 'तत्सत्त्वे सत्त्वं' इति लक्षणस्याऽन्वयस्याऽभावादित्यर्थः। ४ मृतदेहे। ५ नलिकादिना संपादितो वायुः। ६ चैतन्यजननस्वभावत्वस्य। ७ पूर्वपक्षवचनम्। ८ प्राणादि विना।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न, तस्यामेव संदेहात्तवाऽयं केन नेति चेत् । तत्तत्स्वरूपभावेन तदभावः कथं नु चेत् ॥

न, तस्यामेव चैतन्योत्पत्तावेव, 'किमियं प्राणप्रयोज्या, उताऽऽत्मप्रयोज्या' इति संदेहात्; तथाचाऽन्यथासिद्धत्वशङ्कया न तत्र[1] कारणत्वनिश्चय[2] इति भावः । आत्मन्यप्ययं संदेहः, केन मानेन न, येन[3] तत्र[4] कारणत्वनिश्चयः स्यात् ?, इति चेत् । तस्य चैतन्यस्य तत्स्वरूपभावेनाऽऽत्मधर्मानुविधायित्वेन, तथा चाऽऽत्मनि चैतन्यधर्मानुविधायकत्वेन विशेषदर्शनादन्यथासिद्धत्वशङ्कानिरास इति भावः । नन्वेवं[5] प्राणस्य चैतन्योपादानत्वं माऽस्तु, निमित्तत्वं त्वविरुद्धमेव, तन्नाशादेव[6] च चैतन्यनाशः, आत्माभ्युपगमेऽपि नित्यत्वेन तस्य[7] नाशाऽयोगात् । न च तच्छरीर आत्मसंयोगनाशाच्चैतन्याभावः, विभुत्वेन[8] तत्संयोगस्याऽपि सार्वत्रिकत्वात्, चैतन्योपादानं च प्रागुक्तरीत्या शरीरमेव, इति नव्यनास्तिकस्य न दूषणम्; इति चेत् । न, प्राणनाशं विनाऽपि सुषुप्त्यादौ ज्ञानादिनाशाद् तन्नाशस्य[9] तन्नाशाहेतुत्वात्[10] । एतेन 'विजातीयमनःसंयोगस्य नाशस्येव स्वप्रतियोगिजन्यत्वसंबन्धेन प्रतियोगितया ज्ञानादिनाशे हेतुत्वमस्तु' इत्यपास्तम्, सुषुप्तौ श्वास-प्रश्वासादिसंतानानुरोधेन विजातीयमनःसंयोगसत्त्वस्याऽप्यावश्यकत्वात् । अथ जीवनयत्नसत्त्वादेव तदा श्वास-प्रश्वासादिसंतानः, तन्नाशश्च प्रारब्धादृष्टनाशादेव, इति तदन्यनाशे विजातीयमनःसंयोगनाशो हेतुरिति चेत् । न, एवं सत्यावश्यकत्वात् सर्वत्राऽदृष्टनाशादेव ज्ञानादिनाशाभ्युपगमौचित्यात् ।

---

१ प्राणे । २ संशयस्य निश्चयप्रतिबन्धकत्वादित्यर्थः । ३ संदेहाभावेन । ४ आत्मनि । ५ इतो 'न दूषणम्' इति पर्यन्तः पूर्वपक्षः । ६ तच्छब्देन प्राणः । ७ चैतन्यस्य । ८ व्यापकत्वेन । ९ प्राणनाशस्य । १० चैतन्यनाशाहेतुत्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत एव विजातीयमनःसंयोगेऽपि न मानमस्ति, अदृष्टविशेषपरिपाकवशादेव सुषुप्त्यादिकाले ज्ञानानुत्पादात्, परेणाऽपि मनसो निरिन्द्रियप्रदेशगमने तस्य शरणीकरणीयत्वात् । अदृष्टं च धर्मिग्राहकमानेन प्रत्यगात्मनिष्ठमेव सिद्धमिति नास्तिकः । न च विशिष्टाणुवृत्तित्वमेव तस्य न्याय्यम्, अनेकाश्रयकल्पनात एकाश्रयकल्पने लाघवात्, शरीरत्वघटकसंयोगस्यैवाऽऽत्मत्वघटकत्वेनाऽऽत्मत्व-शरीरत्वयोस्तुल्यवित्तिवेद्यत्वप्रसङ्गाच्च । आत्मत्वघटकसंयोगस्य भिन्नत्वे त्वात्मन एव भिन्नत्वं किमिति हन्त ! न रोचयेः ? इति किमतिविस्तरेण ? । परः शङ्कते– ननु चैतन्ये तदभावः प्राणधर्मानुविधायित्वाभावः, कथम् ? । 'नु' इति वितर्के । 'अहमशनीयावान्, अहं पिपासावान्' इत्यशनीया-पिपासयोः प्राणधर्मयोरहंत्वसामानाधिकरण्येनाऽनुभवात् "अन्योऽन्तरात्मा प्राणमयश्च" इति श्रुतेश्च प्राणस्य चैतन्यानभ्युपगमे महान् वितर्कावसर इति भावः ॥ अत्रोच्यते– इति चेत् ॥७१॥

तद्वैलक्षण्यसंवित्तेर्मातृचैतन्यजे ह्ययम् । सुते तस्मिन्न दोषः स्यान्न न भावेऽस्य मातरि ॥७२॥

तद्वैलक्षण्यसंवित्तेः प्राणधर्मसामानाधिकरण्येनाऽप्रमीयमाणत्वाद् नैवमित्युपस्कारः; न हि प्राणधर्मः स्पर्शविशेषादिरहंत्वसामानाधिकरण्येनाऽनुभूयते, तथाऽनुभूयमाने पुनरशनीया-पिपासे इच्छात्मकत्वादात्मधर्मावेव, न तु प्राणधर्मौ, इति न प्राण एवाऽऽत्मा । अस्तु तर्हि 'कायाकारपरिणतं भूतमात्मा' इति मौलमेव मतम् 'अहं स्थूलः' इत्यादितद्धर्मसामानाधिकरण्येनाऽनुभवात्; इति विस्मृतप्रागुक्तदोषः शङ्कते– अयम्– उक्तो दोषः, हि निश्चितं, मातृचैतन्यजे सुते पुत्रशरीरे, तस्मिन्

१ पूर्वपक्षवादिना । २ विजातीयमनःसंयोगस्य । ३ अदृष्टस्य । ४ अशनीया बुभुक्षा । ५ तदा भूतानि परामृश्यन्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चैतन्येऽभ्युपगम्यमाने न स्यात्; न हि सुतचैतन्यहेतोश्चैतन्यस्याऽभावोऽस्ति, येनाऽनुगतहेतुतयाऽऽत्मसिद्धिः स्यात्, मातृचैतन्यस्यैव तद्धेतुत्वात्, व्यवधानेनाऽपि सुषुप्तिप्राक्कालीनविकल्पस्य जागरविकल्पहेतुत्वदर्शनात्। न च मातृचैतन्य-सुतचैतन्ययोर्वैलक्षण्याद् न हेतु-हेतुमद्भाव इति सांप्रतम्, वृश्चिकादिव गोमयादपि वृश्चिकप्रादुर्भावदर्शनाच्चैतन्येऽपि माता-पितृ-शुक्र-शोणिता-ऽभ्यास-रसायनादिनानाहेतुकत्वाविरोधादिति। अत्राह[1]— अस्य चैतन्यहेतुचैतन्यस्य, मातरि मातृशरीरेऽभ्युपगम्यमाने, दोषो न इति न, किन्तु दोष एव, मातृनिष्ठस्य चैतन्यस्य सुतनिष्ठचैतन्यहेतुत्वे गर्भस्थेन भ्रूणेन मात्रनुभूतस्मरणप्रसङ्गात्। किञ्च, गोमय-वृश्चिकजन्यवृश्चिकयोर्वैजात्यस्याऽनुभवासिद्धत्वेन तदवच्छिन्नयो[2]र्गोमय-वृश्चिकयोर्हेतुत्वेऽपि, चैतन्ये विशेषादर्शनात् तत्र[3] चैतन्यमेव हेतुः, न तु मातृशरीरादिकम्। प्रज्ञा-मेधादिविशेषेऽप्यन्तरङ्गतया समानजातीयपूर्वाभ्यासस्यैव हेतुत्वम्, अन्यथा समानेऽपि रसायनाद्युपयोगे यमजयोः[4] कस्यचित् क्वचिदेव प्रज्ञा-मेधादिकमिति प्रतिनियमो न स्यात्, रसायनाद्युपयोगस्य साधारणत्वात्। इति न मातृचैतन्यात् सुतचैतन्यम्। न चेन्द्रियसंनिकर्षादिनैव ज्ञानोत्पत्तौ सामान्यतो ज्ञानं प्रति ज्ञानहेतुत्वे मानाभावः, सुषुप्तौ ज्ञानानुत्पत्तिनिर्वाहायोपयोगस्य ज्ञानहेतुत्वसिद्धे[5]ः, इत्यन्यत्र विस्तरः ॥ ७२ ॥

दोषान्तरमप्याह–

---

१ 'उत्तरम्' इति शेषः। २ वैजात्यावच्छिन्नयोः। ३ चैतन्ये। ४ युगपज्जातयोः। ५ सुषुप्तावपि मनसः शरीरव्यापित्वेन कक्षीकृतस्य स्पर्शनादीन्द्रियेण, स्पर्शप्रादेश्च तूलिकादिना संनिकर्षसद्भावात् साकल्येनेन्द्रियसंनिकर्षादेः कारणस्य सत्त्वेऽप्यनुपजायमाना ज्ञानोत्पत्तिस्तदतिरिक्तमर्थग्रहणव्यापाररूपं ज्ञानापरनामानमुपयोगरूपं हेतुमाक्षिपतीति हृदयम्। मनसः शरीरव्यापित्वं च रत्नाकरे स्पष्टम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न च संस्वेदजाद्येषु मात्रभावेन तद् भवेत्। प्रदीपज्ञातमप्यत्र निमित्तत्वान्न बाधकम् ॥७३॥

न च संस्वेदजाद्येषु यूकादिषु, मात्रभावेन [1]स्वजनकस्त्रीशरीराभावेन, तच्चैतन्यमनुभवसिद्धमपि भवेत्। एवं च व्यभिचाराद् निमित्तकारणत्वमपि मातृशरीरस्य नास्तीत्याशयः। अत एवाह– प्रदीपज्ञातमपि– यथा दीपाद् दीपान्तरमुत्पद्यते तथा मातृचैतन्यात् सुतचैतन्यमिति निदर्शनमपि, प्रदीपस्य निमित्तकारणत्वात्, [2]प्रकृते च [3]तत्त्वस्याऽप्यभावाद् न बाधकं न पृथगात्मसिद्धिप्रतिकूलम्। वस्तुतः शरीरविशेष इव चैतन्यविशेषे मातृशरीरस्य निमित्तकारणत्वसंभवेऽप्युपादानत्वस्य सामान्यत एव कल्पनाद् मातृशरीरस्य सुतचैतन्योपादानत्वं नास्तीति ॥ ७३ ॥

फलितमाह–

इत्थं न तदुपादानं युज्यते तत् कथञ्चन। अन्योपादानभावे च तदेवात्मा प्रसज्यते ॥ ७४ ॥

इत्थमुक्तन्यायेन, तद् मातृशरीरं, कथञ्चन केनापि प्रकारेण, तदुपादानं सुतचैतन्योपादानं, न युज्यते। अन्योपादानभावे च मातृशरीरातिरिक्तसुतचैतन्यसद्भावे च, स एव भूतातिरिक्त आत्मा, [4]तैव प्रसज्यते। शरीरवृद्धि-विकारयोश्चैतन्यवृद्धि-विकारोपलम्भस्तु न [5]तदुपादानत्वसाधकः, अजगर-सात्त्विकादौ व्यभिचारात्, शरीरस्य सहकारित्वेऽपीन्द्रियपाटवा-ऽपाटवाभ्यां

१ स्वशब्देन यूकादि। २ यूकादौ। ३ निमित्तकारणत्वस्य। ४ चार्वाकस्य। ५ तच्छरीरमुपादानं यस्य चैतन्यस्य तत् तथा तद्भावस्तस्य साधकः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शरीरवृद्धि-विकारयोश्चैतन्यवृद्धि-विकारसंभवाच्च । इन्द्रियाण्येवाऽऽत्माऽस्तु, इति चेत् । न, मिलितानां [1]तेषां ज्ञानाद्याश्रयत्वे चक्षुरादिशून्यस्याऽपि [2]त्वाचाद्यप्रसङ्गात् । चक्षुश्चाक्षुषस्येव, त्वगादि च [2]त्वाचादेरेवाऽऽश्रयः, इति चेत् । तर्हि 'योऽहं स्पृशामि सोऽहं पश्यामि' इतिप्रतीत्यनुपपत्तिः, चक्षुषा दृष्टस्य वस्तुनश्चक्षुर्नाशेऽन्येन स्मरणानुपपत्तिश्च । 'चक्षुरादिजन्यनानाज्ञानाधिष्ठानमेकमेव नित्यमिन्द्रियम्' इत्यभ्युपगमे तु संज्ञामात्र एव विवाद[3] इति दिग् ॥ ७४ ॥

नन्वनुपादानं चैतन्यमस्तु, किमात्मना ?, इत्यत आह–

न तथाभाविनं हेतुमन्तरेणोपजायते । किञ्चिद् नश्यति चैकान्ताद् यथाह व्यासमहर्षिः ॥७५॥

तथाभाविनं कार्यरूपतया भवनशीलं, हेतुं विना किमपि न जायते, [4]तत्परिणामकृतद्रव्यावस्थाविशेषरूपत्वात् [4]तत्परिणामोत्पादस्य । न चैकान्ताद् द्रव्यपृथग्भावेन किञ्चिद् नश्यति, [4]तत्परिणामोत्तरद्रव्यावस्थारूपत्वात् [4]तद्विनाशस्य । न चैवं द्रव्यमेव स्यात्, न तूत्पाद-विनाशौ, कथञ्चिद्भिन्नत्वस्याऽपीष्टत्वात् । तदिदमुक्तं सम्मतौ–

"[5]तिण्णि वि उप्पायाई अभिन्नकाला य भिन्नकाला य । अत्थंतरं अणत्थंतरं च दवियाहि णायव्वा[6] ॥ १ ॥"

अत्रैकप्रतियोगिनिरूपितत्वेन, तद्विशिष्टद्रव्यनिरूपितत्वेन वोत्पाद-स्थिति-विगमानां भिन्नकालता, यथा घटोत्पाद-

---

१ इन्द्रियाणाम् । २ त्वाचं स्पार्शनम् । ३ तादृशाधिष्ठानस्यैवाऽऽर्हतमते आत्मपदार्थत्वादिति भावः । ४ तच्छब्देनोपादानम् ।
५ त्रयोऽप्युत्पादादयोऽभिन्नकालाश्च भिन्नकालाश्च । अर्थान्तरमनर्थान्तरं च द्रव्येभ्यो ज्ञातव्याः ॥ १ ॥ ६ सम्मतिसूत्रे गाथा १३२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समये, घटविशिष्टमृदुत्पादसमये वा न तद्विनाशः, अनुत्पत्तिप्रसक्तेः। नापि [1]तद्विनाशसमये तदुत्पत्तिः, अविनाशप्रसक्तेः। न च तत्प्रादुर्भावसमय एव तत्स्थितिः, तद्रूपेणाऽवस्थितस्याऽनवस्थाप्रसक्त्या प्रादुर्भावायोगात्। अतो द्रव्यादर्थान्तरभूतास्[2]ते, अनेकरूपाणामेकद्रव्यरूपत्वायोगात्। भिन्नप्रतियोगिनिरूपितत्वेन, [3]तद्विशिष्टद्रव्यनिरूपितत्वेन वाऽभिन्नकालता; यथा– कुशूलतद्विशिष्टमृन्नाश-घटतद्विशिष्टमृदुत्पाद-मृत्स्थितीनाम्। अत ऐकरूप्येण द्रव्यादनर्थान्तरभूतत्वम्; इति संप्रदायः।

अत्रेदं विविच्यते– उत्पादादय आधारत्वादिवदतिरिक्ता अपि, न स्वाद्यक्षणसंबन्धादिरूपा एव, क्षण एवाऽभावात्। [4]तेषां च घटत्वादिना प्रतियोगित्वम्, मृत्त्वादिना चाऽनुयोगित्वम्, इति 'मृदि घट उत्पन्नः' इत्यादिधीः। द्रव्ये तु पर्यायोपहितरूपेण प्रतियोगित्वं, तत्र चाऽनुयोगितायाः प्रतियोगिन्येव समावेशाद् द्रव्यस्य नाऽनुयोगित्वम्, यथा— 'घटविशिष्टं मृद्द्रव्यमुत्पन्नम्' इति। न चात्र विशेषणस्यैवोत्पादो विषयः, विशिष्टस्यैव प्रतियोगित्वानुभवात्; इतरत्रान्वितस्य घटस्योत्पादेऽन्वयायोगाच्च। न च विशिष्टहेतुकल्पने गौरवम्, घटहेतूनामेव घटविशिष्टहेतुत्वात्। [5]अत एव क्षणहेतूनामेव क्षणविशिष्टहेतुत्वात् सर्वत्राविशिष्टवै[6]स्रसिकोत्पादसिद्धिः। न चैवं[7] 'ज्ञानमुत्पन्नम्' इतिवत् 'आत्मोत्पन्नः' इति व्यवहारः स्यात्, आत्मत्वेनोत्पादाप्रतियोगित्वे तु 'कम्बुग्रीवादिमानुत्पन्नः' इत्यपि न स्यात्, इति वाच्यम्; गुरुरूपस्याऽपि प्रकारताद्यवच्छेदकत्ववदुत्पादादिप्रतियोगितावच्छेदकत्वात्। अत एव नित्या-ऽनित्यत्वव्यवहारयोरप्यसांकर्यम्। [8]नन्वेवं 'परमाणुर्नित्यः' इति व्यवहारोऽपि भ्रान्तः

१ तस्य घटस्य। २ ते उत्पाद-स्थिति-विगमाः। ३ तदा भिन्नप्रतियोगी। ४ उत्पादादीनाम्। ५ विशिष्टहेतुकल्पनादेव।
६ वैस्रविकः स्वाभाविकः। ७ विशिष्टहेतुकल्पने। ८ इतः प्रभृति 'प्रसङ्गात्' इति पर्यन्तः पूर्वपक्षः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात्, परमाणोः परमाणुभावेन नाशस्याऽप्यभ्युपगमात्; अत एवावयवविभागोत्तरं तथोत्पादप्रतिपादनात्, तदुक्तम्—

"[1]दव्वंतरसंजोगाहि केई दवियस्स बेंति उप्पायं। उप्पायत्थाऽकुसला विभागजायं ण इच्छंति ॥ १ ॥
अणु-दुअणुएहिं दव्वे आरद्धे तिअणुअं ति ववएसो। तत्तो अ पुण विभत्तो अणु त्ति जाओ अणू होइ[2] ॥२॥" इति।

(अ)युक्तं चैतत्, प्राक् परमाणुतासत्त्वे स्थूलकार्याभावप्रसङ्गात्; इति चेत्। न, व्यावहारिकनित्यतालक्षणे समुदयविभागरूपस्यैव व्ययस्य प्रवेश्यत्वादिति। अधिकं त्रिसूत्र्यालोके। उक्तेऽर्थे व्याससंमतिमाह– यथाऽऽह व्यासमहर्षिः, छन्दःप्रतिलोमताऽत्राऽऽर्षत्वाद् न दोषाय ॥ ७५ ॥

नासतो विद्यते भावो नाभावो विद्यते सतः। उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥७६॥

नाऽसतः खरविषाणादेः, विद्यते, भाव उत्पादः, असत्त्वव्याघातप्रसङ्गात्। सतश्च पृथिव्यादेः, अभावोऽपि नास्ति, शशशृङ्गवदसत्त्वप्रसङ्गात्। उभयोरप्यनयोरर्थयोः, तत्त्वदर्शिभिः परमार्थग्राहिभिः, अन्तो नियमः, दृष्टः प्रमितः, यद् यत्रोत्पद्यते तत् तत्र सत्, यच्च यत्र सत् तत् तन्निष्ठाभावाप्रतियोगीति ॥ ७६ ॥

---

१ द्रव्यान्तरसंयोगेभ्यः केचिद् द्रव्यस्य ब्रुवन्त्युत्पादम्। उत्पादार्थाऽकुशला विभागजातं नेच्छन्ति ॥ १ ॥
अणु-द्व्यणुकैर्द्रव्ये आरब्धे त्र्यणुकमिति व्यपदेशः। ततश्च पुनर्विभक्तोऽणुरिति जातोऽणुर्भवति ॥ २ ॥ २ सम्मतिसूत्रे गाथा १३५, १३६।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदमेवाऽपरेऽपि वदन्ति-

नाभावो भावमाप्नोति शशशृङ्गे तथाऽगतेः। भावो नाभावमेतीह, दीपश्चेन्न स सर्वथा ॥७७॥

नाऽभावस्तुच्छो भावमाप्नोति- पारमार्थिकत्वं प्रतिपद्यते, शशशृङ्गे तथाऽगतेः- भावत्वेनाऽपरिच्छेदात् । भावोऽपि पारमार्थिकः, इह जगति, अभावं तुच्छस्वभावं, नैति। ननु दीपो भावरूपः, स चाऽऽलोकाभावात्मकान्धकारस्वरूपतां प्रतिपद्यत इति चेत्। स दीपस्यान्धकारपरिणामः, सर्वथाऽभावरूपो न, भास्वरपरिणामपरित्यागेऽपि द्रव्यत्वापरित्यागात्।

तेजसोऽतिविनिर्वृत्तिरूपता[1] स्वीकृता तमसि या कणाशिना[2]। द्रव्यतां वयममी समीक्षिणस्तत्र पत्रमवलम्ब्य चक्ष्महे ॥ १ ॥

तमो द्रव्यं, रूपवत्त्वात्, घटवत्। न च हेत्वसिद्धिः, 'तमो नीलम्' इति प्रतीतेः सार्वजनीनत्वात्। न चासौ भ्रमः, बाधकाभावात्। न[3] चोद्भूतरूपमुद्भूतस्पर्शव्याप्यम्, इत्युद्भूतरूपवत्त्वे उद्भूतस्पर्शापत्तिर्बाधिका, इन्द्रनीलप्रभासहचरितनीलभागस्तु स्मर्यमाणारोपेणैव तत्प्रभायां नीलधीनिर्वाहाद् गौरवादेव न कल्प्यत इति तत्र न व्यभिचारः, कुङ्कुमादिपूरितस्फटिकभाण्डे बहिरारोप्यमाणपीताश्रयेऽपि न व्यभिचारः, तत्रापि स्मर्यमाणारोपेणैव पीतधीनिर्वाहाद् बहिष्पीतद्रव्याकल्पनात्, बहिर्गन्धोपलब्धेस्तु वाय्वाकृष्टानुद्भूतरूपभागान्तरेणैवोपपत्तेरिति वाच्यम्; मानाभावात्, प्रभायां व्यभिचाराच्च। न चोद्भूतनीलरूपवत्त्वमेवोद्भूतस्पर्शव्याप्यम्, न च धूमे व्यभिचारः, तत्रा[4]ऽप्युद्भूतस्पर्शवत्त्वात्, अत एव तत्संबन्धाच्चक्षुषो जलनिपात

१ विनिवृत्तिरभावः। २ कणादेन। ३ अस्य 'इति वाच्यं' इति पर्यन्ते संबन्धः। ४ तत्र धूमे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति वाच्यम् ; चक्षु-र्धूमसंयोगत्वेनैवाऽश्रुपातजनकत्वाद् धूमे उद्भूतस्पर्शासिद्धेः, नीलित्रसरेणौ[1] व्यभिचाराच्च । न च पाटितपट-सूक्ष्मावयव इव तत्राऽप्युद्भूतस्पर्शवत्त्वानुमानम्, अनुद्भूतरूपस्योद्भूतरूपजनकताया इवाऽनुद्भूतस्पर्शस्याऽपि निमित्तभेदसंसर्गेणोद्भूतस्पर्शजनकतासंभवाद् दृष्टान्ताऽसंप्रतिपत्तेः । अपि च, त्रसरेणोरुद्भूतस्पर्शवत्त्वे तत्स्पर्शस्पार्शनप्रसङ्गः । महत्त्वविशेषाभावाद् ने[2], इति चेत् । न, एकत्वविशेषाभावेन विनिगमनाविरहात्, आश्रयत्वाचाभावस्य द्रव्यान्यसत्त्वा(च)च्च । प्रतिबन्धकत्वाद् ने[2], इति चेत् । न, उद्भूतस्पर्शाभावस्यैव तत्प्रतिबन्धकत्वेन तत्रानुद्भूतत्वकल्पनौचित्यात् । वस्तुतः प्रभा-घटसंयोगादौ पराभिमतजातिस्थानीयत्वगग्राह्यतास्वभावादेव न त्वाचत्वम्, इति नैतादृशप्रतिबन्धकत्वकल्पनमपि ।

'तमसि पवनाभिव्यज्यमानः शीतस्पर्शोऽप्यनुभूयत एव, अत उद्भूतस्पर्शवत्त्वमपि तत्र[3]' इति सांप्रदायिकाः[4] । अथ नील-रूपवत्त्वे[5] तमसः पृथिवीत्वापत्तिः, नीलत्वावच्छिन्नं प्रति पृथिवीत्वेन हेतुत्वादिति चेत् । न, मम[6] स्वभावविशेषस्यैव विशिष्ट-नीलनियामकत्वात्, तैर्वा[7]ऽप्यवयवनीलादिनैवाऽवयविनि नीलाद्युपपत्तौ पृथिवीत्वेन तत्समवायिकारणताभावात्, जन्यसन्मात्रसमवायिकारणतावच्छेदकीभूतद्रव्यत्वाभावादेव नीलादौ नीलाद्यनुत्पत्तिनिर्वाहात् । अथ नीलजनकविजातीयतेजःसंयोगस्य जलादावपि संभवात् तत्र नीलाद्युत्पत्तये नीलत्वावच्छिन्नं प्रति पृथिवीत्वेन हेतुत्वं कल्प्यत इति चेत् । न, तथाप्युपस्थितविजातीयनीलत्वावच्छिन्नं प्रत्येव तद्धेतुत्वौचित्यात् ; व्यापकधर्मस्य व्याप्यधर्मेणाऽन्यथासिद्धेः ।

---

१ नीलित्रसरेणौ । २ 'तत्स्पर्शस्पार्शनप्रसङ्गः' इति संबध्यते । ३ तमसि । ४ श्रीरत्नप्रभाचार्यादयो रत्नाकरावतारिकादाविस्यर्थः । ५ क. 'लरूपत्वा' । ६ जैनस्य । ७ कणादमतानुयायिनः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ तमसो जन्यत्वे स्पर्शवदवयवारभ्यत्वं स्यादिति चेत् । न, तमसः स्पर्शवदवयवत्वस्येष्टत्वात्, शक्त्याख्यस्याऽतिशयस्यैव द्रव्यजनकत्वाच्च। [1]तयाऽपि च न स्पर्शवत्त्वेन जनकत्वं कल्पयितुं शक्यम्, अन्त्यावयविनि व्यभिचारात् । न चाऽनन्त्यावयवित्वमपि निवेशनीयम्, तस्य द्रव्यसमवायिकारणत्वपर्यवसितत्वात् । न च जन्यद्रव्यत्वावच्छिन्नं प्रति द्रव्यत्वेन प्रतिबन्धकत्वादन्त्यावयविनि द्रव्यानुत्पत्तेर्न दोष इति वाच्यम्; तथापि नव्यैश्चक्षुरादिष्वनुद्भूतस्पर्शानभ्युपगमात्, तथाऽहेतुत्वात् । न च द्रव्यारम्भकत्वान्यथानुपपत्त्यैव तत्राऽनुद्भूतस्पर्शाङ्गीकार इति वाच्यम्; अनन्तानुद्भूतस्पर्शकल्पनामपेक्ष्य लघुभूतैकजातिकल्पनाया एवोचितत्वात् । न च मूर्तत्वेन [2]तथात्वम्, मनसि व्यभिचारात् । न च [3]तत्र विजातीयसंयोगरूपहेत्वन्तराभावादेव द्रव्यानुत्पत्तिरिति वाच्यम्; यत्क्रियया घटे आरम्भको मनसि चानारम्भकः संयोगो जनितस्तत्क्रियाजन्यतावच्छेदाय तत्रोक्तवैजात्याऽऽवश्यकत्वात् । न च मनोऽन्यमूर्तत्वेन [2]तथात्वम्, गौरवात् । एवं च तादृशजातिकल्पने, विजातीयसंयोगकल्पने, नोदनात्वादीनां तद्वैजात्यव्याप्यत्वकल्पने, तदवच्छिन्नकारणकल्पने च गौरवाद् वरमतिशय एवाऽनतिप्रसक्तो द्रव्यजनकः कल्प्यते, इति सूक्ष्मं विभावनीयम् ।

अथ तमसो द्रव्यत्वे आलोकनिरपेक्षचक्षुर्ग्राह्यत्वं न स्यात्, द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्यालोकसंयोगत्वेन हेतुत्वात् । न चाऽऽलोकचाक्षुषे व्यभिचारः, तत्राऽप्यालोक-गगनसंयोगस्य सत्त्वात् । न चैवं[4] बहलतमे तमसि सुवर्णसाक्षात्कारापत्ति[5]ः, मह-

१ वैशेषिकेण । २जनकत्वं कल्पयितुं शक्यम् । ३ मनसि । ४ द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्यालोकसंयोगत्वेन हेतुत्वे । ५ सुवर्णस्य तैजसत्वेन वैशेषिकैरङ्गीकारादिति भावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुद्भूता-ऽनभिभूतरूपवदालोकसंयोगत्वेन त[1]द्धेतुत्वात्। न चैकावच्छेदेनाऽऽलोकसंयोगवत्यपरावच्छेदेन चक्षुःसंयोगाच्चाक्षुषापत्तिः, चक्षुःसंयोगावच्छेदकावच्छिन्नालोकसंयोगत्वेन त[1]द्धेतुत्वात्। न च चक्षुःसंयोगावच्छेदकावच्छिन्नालोकसंयोगत्वेन, आलोकसंयोगावच्छेदकावच्छिन्नचक्षुःसंयोगत्वेन वा हेतुत्वमिति विनिगमनाविरहः, उद्द्योतस्थपुरुषस्यान्धकारस्थवस्तुसाक्षात्काराऽनुदयस्य विनिगमकत्वात्। आलोकसंयोगानवच्छेदकानवच्छिन्नचक्षुःसंयोगत्वेनापि न हेतुत्वम्, गौरवात्, अन्धकारस्थस्योद्द्योतस्थवस्त्वग्रहणप्रसङ्गाच्च। अत एव समवायेनाऽऽलोकाभावाऽन्यलौकिकचाक्षुषं प्रति स्वावच्छेदकावच्छिन्नसंयोगवच्चक्षुःसंयुक्तमनःप्रतियोगिकविजातीयसंयोगसंबन्धेनाऽऽलोकसंयोगस्य हेतुत्वमपि न निरवद्यम्, संबन्धगौरवात्, किञ्चिदवयवावच्छेदेनाऽऽलोकसंयुक्तेनैव चक्षुषाऽन्धकारवद्भित्तिसंयोगेऽन्धकारेऽपि वस्तुग्र[2]हणप्रसङ्गाच्च; इति चेत्।

न, आलोकं विनापि घूकादीनां द्रव्यचाक्षुषोदयाद् व्यभिचारात्। न च चैत्रादिचाक्षुष [3]एव [4]तद्धेतुत्वाद् न व्यभिचार इति वाच्यम्; तथाऽप्यञ्जनादिसंस्कृतचक्षुषां तस्करादीनां चाक्षुषे व्यभिचारात्। न चाऽञ्जनाद्यसंस्कृतचैत्रादिचक्षुर्जन्यचाक्षुषे त[1]द्धेतुत्वम्, अञ्जनादीनामपि च स्वातन्त्र्येण चाक्षुषहेतुत्वमिति वाच्यम्; अननुगमात्, आलोकाद्युद्बोध्यक्षयोपशमरूपयोग्यताया एवाऽनुगतत्वेन हेतुत्वौचित्यात्। किञ्च, एवं चक्षुषोऽवच्छेदकत्वेनाऽहेतुत्वापत्तिः। अपि च, चक्षुःसंयोगावच्छिन्नसंयोगसंबन्धेनैवाऽऽलोकत्वेन हेतुता वाच्या, लाघवात्; न च तेन संबन्धेनाऽऽलोकस्याऽऽलोकवृत्तित्वम्, इत्यालोक एव व्यभिचारः, इति

१ तच्छब्दश्चाक्षुषपरामर्शकः। २ क, 'हप्र'। ३ क, 'एवैत'। ४ तत्पदमालोकानुकर्षकम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुवर्णभिन्नं यत् तेजस्तद्भिन्नद्रव्यचाक्षुषे तथा हेतुता वाच्या; तथा च लाघवात् तमोऽन्यद्रव्यचाक्षुषं प्रति तमसः प्रतिबन्धकत्वमेव न्याय्यम्, महदुद्भूता-ऽनभिभूतरूपवदालोकत्वापेक्षया तमोऽभावत्वेन हेतुत्वे लाघवाच्च।

किञ्च, एवं तमसोऽभावत्वे तेजोज्ञानं विना ज्ञानं न स्यात्, अभावज्ञाने प्रतियोगिज्ञानस्याऽन्वय-व्यतिरेकाभ्यां हेतुत्वावधारणात्। अथाऽत्रेष्टापत्तिः, आलोकं जानतामेव तमःप्रत्यक्षस्वीकारात्; तदाहुराचार्याः– "गिरिदरीविवरवर्तिनो यदि योगिनो न ते तिमिरावलोकिनः, तिमिरावलोकिनश्चेद् नूनं स्मृताऽऽलोकाः" इति, इति चेत्। न, तेजसोऽप्रतिसंधानेऽपि तमोऽनुभवस्य प्रत्यक्षसिद्धत्वात्।

अथाभावस्य ज्ञानमात्रे प्रत्यक्षमात्रे वा न प्रतियोगिज्ञानं हेतुः, प्रमेयत्वादिनाऽभावग्रहे, अभावत्वसामान्यलक्षणाधीनतत्प्रत्यक्षे च व्यभिचारात्। नापि तदभावलौकिकप्रत्यक्षे तज्ज्ञानं हेतुः, प्राचां घटात्यन्ताभावादेर्घटादि-तत्प्रागभाव-तत्प्रध्वंसप्रतियोगित्वात्[3], तत्त्रयाग्रहेऽप्येकग्रहे प्रत्यक्षात्; नव्यमते समनियतैकत्वपरिमाणाद्यभावस्यैकमात्रग्रहे प्रत्यक्षाच्च। अथ तदभावलौकिकप्रत्यक्षे तदभावयत्किञ्चित्प्रतियोगिज्ञानत्वेन हेतुत्वाद् न व्यभिचार इति चेत्। न, तथाहेतुत्वे मानाभावात्, वह्न्यादिज्ञानशून्यस्याऽपि संनिकृष्टे ह्रदादावन्तत इदंत्वादिनाऽपि वह्न्याद्यविशेषिततदभावलौकिकप्रत्यक्षस्येष्टत्वात्, वह्न्यादिविशेषिततत्प्रत्यक्षं तु विशेषणतावच्छेदकवह्नित्वादिज्ञानप्रकारकज्ञानसाध्यम्, इति तेजोज्ञानं विनाऽपि तमःप्रत्यक्षे न दोष इति चेत्। न, प्रतियोगि-

१ चक्षुःसंयोगावच्छिन्नसंयोगसंबन्धेनाऽऽलोकत्वेनेत्यर्थः। २ अतः 'न दोषः' इतिपर्यन्तः पूर्वपक्षः। ३ ख.ग.घ.च. 'त् त्रया'। ४ क. 'दिना ज्ञा'। ५ ख.ग.घ.च.'दिप्र'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानस्याऽभावप्रत्यक्षाहेतुत्वे विना प्रतियोगिज्ञानं 'न' इत्याकारकप्रत्ययापत्तेः। न चाऽभावत्वस्यापीदंत्वेन ग्रहादापादकाभावः, प्रथमप्रभावा-ऽभावत्वयोर्निर्विकल्पके 'अभाव-' इत्याकारकप्रत्यक्षापत्तेर्दुर्वारत्वात्। न चाभावत्वमात्रेण प्रत्यक्षस्येष्टत्वम्, 'शून्यमिदं दृश्यते' इत्यादिप्रत्ययात्, इत्थमेवाऽभावत्वस्य भावभेदस्य पिशाचादिभेदवद् योग्यस्य 'घटो नास्ति' इत्यादौ स्वरूपतो भानमपि प्राचां संभवदुक्तिकम्, नञुल्लेखस्तु प्रतियोगिवाचकपदनियतो न सार्वत्रिक इति वाच्यम्; अन्धकार इव हृदादावपि 'शून्यमिदम्' इति वह्न्यभावादौ प्रत्ययापत्तेः। 'अभावत्वप्रत्यक्षे योग्यधर्मावच्छिन्नज्ञानत्वेन हेतुत्वाद् नाऽयं दोषः' इत्यतिमन्दम्, योग्यधर्माणामननुगतत्वात्; घटत्वाद्यन्यतमत्वेनानुगमे गौरवात्, पिशाचत्वाद्ययोग्यधर्मावच्छिन्नस्य ग्रहेऽपि 'पिशाचो नाऽयम्' इत्यादिप्रतीतेश्च।

अथ 'न' इत्याकारकप्रत्यक्षवारणायेन्द्रियसंबद्धविशेषणताया एव प्रतियोगिविशेषितप्रत्यक्षहेतुत्वम्। न चेन्द्रियस्य चक्षु-स्त्वगादिभेदभिन्नत्वेनेन्द्रियसंबद्धविशेषणतायाः प्रतियोगिविशेषितप्रत्यक्षहेतुत्वे गौरवात् पृथक् प्रतियोगिधीहेतुतैव युक्ता। न च तद्धेतुत्वेऽपि 'न' इत्याकारकप्रत्यक्षापत्तिः, उपस्थितस्य प्रतियोगिनोऽभावे वैशिष्ट्यभाने बाधकाभावात्। न च 'अभावो न घटीयः' इत्यादिबाधधीदशायां तदापत्तिः, अभावत्वावच्छेदेनाऽभावे तादृशबाधधिय आहार्यत्वात्; अभावत्वसामानाधिकरण्येन च तद्दशायामपि प्रतियोगिवैशिष्ट्यभानसंभवात्। न च प्रतियोगितासंबन्धावच्छिन्नप्रतियोगितयाऽभावे घटवैशिष्ट्यविषयकत्वात्, प्रतियोगितासामान्येन घटबाधग्रहाभावेऽपि संयोगादिसंबन्धावच्छिन्नप्रतियोगितया 'न घटीयः' इति

१ 'इति वाच्यम्' इत्यत्र संबन्धः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाधधीकाले संयोगादिना घटाभावादेः 'न' इत्याकारकप्रत्यक्षापत्तिः, तदापि प्रतियोगितासंबन्धावच्छिन्नप्रतियोगितया घटस्य प्रकारतया भाने बाधकाभावात्, घटत्वाद्यवच्छिन्नप्रकारत्वा-ऽन्यप्रकारत्वानिरूपिताऽभावविषयताकप्रत्यक्षे घटादिधियो हेतुत्वाच्च; अन्यथा घटाद्यभावस्य पटाद्यभावत्वादिना ग्रहे व्यभिचारापत्तेः; इत्थं चाभावांशे निर्विकल्पकं, 'अभावः' इत्याकारकप्रत्यक्षं च न जायते, निखिलप्रतियोगिज्ञानकार्यतावच्छेदकाक्रान्तेदृशप्रत्यक्षस्य यत्किञ्चित्प्रतियोगिज्ञानेऽसंभवात्, यावत्प्रतियोगिज्ञानस्य चाऽसंभवात्; अभावत्वांशे निर्विकल्पकं त्वभावांशे यत्किञ्चित्प्रतियोगिविशिष्टविषयत्वात् यत्किञ्चित्प्रतियोगिधीसाध्यमेवेति नानुपपत्तिः, इदंत्वेन तमःप्रत्यक्षं त्वनुपपन्नम्, अभावांशे निर्विकल्पकवद् यावत्प्रतियोगिधीकार्यतावच्छेदकाक्रान्तत्वात्, इति वाच्यम्; केवलाभावत्वनिर्विकल्पकापत्तेः, अभावस्याऽखण्डत्वात्; अन्यथाऽभावविशिष्टबुद्धावपि तन्निर्विकल्पकायोगात्। किञ्च, 'घट-पटौ न' इत्यादिप्रत्यक्षं घटज्ञान-पटज्ञानादिकार्यतावच्छेदकानाक्रान्ततया तद्विरहेऽपि स्यात्, तत्र घटत्व-पटत्व-द्वित्वानां प्रकारतावच्छेदकत्वेऽपि नीलघटाद्यभावप्रत्यक्षे व्यभिचारवारणाय 'घटत्वाद्यवच्छिन्न-' इत्यस्य घटत्वादिपर्याप्तावच्छेदकताकत्वार्थत्वेनैतद्दोषानुद्धारात्। तस्माद् घटत्वादिप्रकारकप्रत्यक्षस्य लाघवात्, घटत्वाद्यवच्छिन्नप्रकारतानिरूपितविषयताकप्रत्यक्षत्वमेव कार्यतावच्छेदकम्, शुद्धाभावप्रत्यक्षं तु प्रतियोगितासंबन्धावच्छिन्नप्रकारतानिरूपिताऽभावविषयताकप्रत्यक्ष एव विशेषणताया हेतुत्वाद् न भवतीति युक्तम्, कोटिप्रतियोगिज्ञानहेतुत्वाऽकल्पने लाघवात्। न च 'अभावो न घटीयः' इति प्रत्यक्षे व्यभिचारः, तत्रापि प्रतियोगितासंबन्धावच्छिन्न(प्रतियोगितासंबन्धावच्छिन्न)प्रकारतानिरूपिताभावविषयताकत्वस्याऽक्षतत्वात्। यदि चैवमपि प्रतियोगितामात्रेण 'द्रव्यं नास्ति, मेयं नास्ति' इत्यादेरापत्तिः, तदा प्रकारीभूतकिञ्चिद्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्मावच्छिन्नत्वेन प्रतियोगिताया विशेषणाद् न दोषः, अभावत्वनिर्विकल्पकं चाऽङ्गीक्रियत एव, निरवच्छिन्नप्रकारताकबुद्धौ निरवच्छिन्नविषयताकबुद्धेर्हेतुत्वादिति चेत् ।

न, एवमपि घटाभाव-पटाभावयोरुभयोः संनिकर्षे घटाभावांशे प्रतियोगिविशेषितस्य, पटाभावांशे च तदविशेषितस्य समूहालम्बनस्य प्रसङ्गात् । किञ्च, एवमिदंत्वादिनाऽभावप्रत्यक्षं न स्यात् , न स्याच्च 'अभावप्रतियोगी घटः, इत्यादि ; तादृश-प्रत्यक्षेष्वपि पृथक्कारणत्वकल्पने चातिगौरवम् । अथाभावत्वप्रकारकघटाद्यभावत्वविषयकप्रत्यक्षे घटत्वादिना घटादिज्ञानस्य हेतुत्वम् , पटाभावत्वेन च भूतले न घटाभावादिज्ञानम् , तत्र पटाभावस्यैवाऽऽरोपात् , इत्यालोकज्ञानं विनापीदंत्वेन तमःप्रत्यक्षं नानुपपन्नमिति चेत् । न, 'घटवद् भूतलम्' इति ज्ञानोत्तरं 'अभाववद् भूतलम्' इति ज्ञानप्रसङ्गात् , तादृशाऽसंसर्गाऽग्रहस्याऽऽपादकस्य सत्त्वात् । किञ्च, एवमभावप्रत्यक्षे प्रतियोगिज्ञानापेक्षायां विना प्रतियोगिज्ञानं, जायमानं तमस्त्वप्रकारकं तमःप्रत्यक्षं तमसो भावत्वमेव साधयतीति प्रतिकूलाभिधानमिदं देवानांप्रियस्य ।

एवं चाऽभावलौकिकप्रत्यक्षस्य घटत्वाद्यन्यतमत्वविशिष्टविषयकत्वनियमाद् विशेषसामग्रीं विना सामान्यसामग्रीमात्रात् कार्यानुत्पत्तेर्नाऽभावनिर्विकल्पकं, 'न' इत्याकारकप्रत्यक्षं वा, विशेषणादिज्ञानरूपविशेषसामग्र्यभावात् । न चाऽभावलौकिकप्रत्यक्षत्व-घटत्वादिविशिष्टविषयकप्रत्यक्षत्वयोर्व्याप्य-व्यापकभावाऽभावात् कथं विशेषसामग्रीत्वम् ? इति वाच्यम् ; कार्यतावच्छेदकीभूततद्धर्माश्रययत्किञ्चिद्व्यक्तिनिष्ठकार्यतानिरूपितकारणतावच्छेदकं यावत्प्रत्येकं तत्तदवच्छिन्नसत्त्वेऽवश्यं तद्धर्मावच्छिन्नोत्पत्तिरित्येवं नियमात् ; 'तद्धर्मव्याप्यधर्मावच्छिन्नयत्किञ्चिद्व्यक्तिनिष्ठकार्यतानिरूपित-' इत्याद्युक्तौ व्याप्तिज्ञान-परा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मर्शयोः सत्त्वे बाधधीसत्त्वेऽप्यनुमित्यापत्तेः, तद्धर्म(तद्धर्म)व्याप्यव्यापकधर्मावच्छिन्नयत्किञ्चिद्व्यक्तिनिष्ठकार्यतानिरूपित-' इत्याद्युक्तौ गौरवात्, 'घटत्वादिविशिष्टवैशिष्ट्यविषयकप्रत्यक्षत्वस्याऽभावलौकिकप्रत्यक्षत्वव्याप्यतत्तदभावलौकिकप्रत्यक्षत्वव्यापकत्वात् प्रकृतसिद्धेश्च-' इत्युक्तावपि न साध्यसिद्धिः; न वा घटत्वाद्यवच्छिन्नप्रकारत्वा-ऽतिरिक्तप्रकारत्वानवच्छिन्नाऽभावत्वलौकिकविषयतावच्छिन्नाऽभावलौकिकविषयताकप्रत्यक्षे, घटत्वातिरिक्तधर्मावच्छिन्नप्रतियोगितासंबन्धावच्छिन्नप्रकारत्वानिरूपितत्वे सत्यऽभावत्वविषयत्वावच्छिन्नाऽभावलौकिकविषयताकप्रत्यक्षे वा घटत्वाद्यवच्छिन्नप्रकारताकज्ञानहेतुत्वेऽपि निर्वाहः, तमोविषयतायास्तमस्त्वविषयताऽवच्छिन्नत्वेऽभावत्वविषयतावच्छिन्नत्वानियमात्, तमस्त्वस्य तेजोऽभावत्वानतिरिक्तत्वात्, अभावत्वविषयतावच्छिन्ननिवेशे गौरवात् तमसो द्रव्यत्वस्यैव युक्तत्वादिति दिक्।

किञ्च, नाऽऽलोकप्रतियोगिकाभावमात्रं तमोव्यवहारविषयः, एकालोकवत्यप्यालोकान्तराभावात्; न वाऽऽलोकसामान्याभावः, आलोकवत्यपि संबन्धान्तरेण तदभावात्; न च संयोगसंबन्धावच्छिन्नतदभावः, आलोकेऽपि तत्सत्त्वात्, नाऽप्यालोकान्यवृत्तित्वविशिष्टतदभावः, अन्धकारेऽन्धकारापत्तेः; न चाऽऽलोकान्यद्रव्यवृत्तित्वविशिष्टः स तथा, त्वदात्मन्यपि तत्प्रसङ्गात्; न च कदाचिदालोकसंसर्गाऽवद्वृत्तित्वविशिष्टः स तथा, कदाप्यालोकसंसर्गो यत्र नास्ति तत्रापि घोरनरकादौ तच्छ्रवणात्, अवतमसे यावदालोकाभावाच्च। किञ्च, एतावद्घटकाऽप्रतिसंधानेऽपि तमस्त्वप्रतिसंधानाद् घटत्ववज्जातिरूपमेव तद्

१ 'तमोव्यवहारविषयः' इति संबध्यते। २ आलोकाभावः। ३ तमोव्यवहारविषयः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्याय्यम्। एतेन 'यावदालोकसत्त्वेनान्धकारव्यवहारस्तावन्निष्ठबहुत्वविशेषावच्छिन्नप्रतियोगिताकाभावस्तमः' इत्यप्यपास्तम्, बहुत्वस्य बुद्धिविशेषादिना विनिगमनाविरहाच्च 'अखण्डाभाव एव तमः, अखण्डं वा तमस्त्वम्' इति कल्पयतस्त्वतिरिक्ततमोद्रव्यकल्पने किं क्षूयते ? ।

अपिच, तमसोऽभावत्वे उत्कर्षा-ऽपकर्षाऽसंभवादन्धतमसा-ऽवतमसादिविशेषोऽपि न स्यात् । न च महद्-उद्भूता-ऽनभिभूतरूपवद्‌यावत्तेजोऽभावोऽन्धतमसम्, कतिपयतदभावश्चावतमसम्, ईत्यादिविभागो न्याय्यः, दिवा प्रकृष्टालोकेऽपि तत्सत्त्वात् । न च च्छायायामतिव्याप्तिवारणाय 'स्वन्यूनसंख्यबाह्यालोकसंवलने सति' इति विशेषणदानाऽऽवश्यकत्वात्, तदानीं च बाह्यालोकस्य स्वाधिकसंख्यत्वाद् न दोष इति वाच्यम्; तद्दिनातिरिक्ताऽनन्तदिनवृत्तिबाह्यालोकाभावानामेवाऽधिकत्वात्, तादृशरूपाप्रतिसन्धानेऽप्यन्धतमसत्वाद्यनुभवाच्च । एतेन 'रूपत्वग्राहकतेजःसंवलितस्तदवान्तरविशेषग्राहकयावत्तेजःसंसर्गाभावोऽवतमसम्, रूपत्वावान्तरजातिग्राहकतेजःसंवलितः प्रौढप्रकाशकयावत्तेजःसंसर्गाभावश्छाया, यावदालोकाभावश्चान्धतमसम्' इति निरस्तम्, ज्ञानगर्भतयाऽवतमसादीनामचाक्षुषत्वप्रसङ्गात्, तादृशजात्यसिद्ध्या तत्तज्ज्ञानविशेषपरिचायितजातिविशेषविशिष्टालोकनिवेशासंभवाच्चेति दिग् ।

किञ्च, अत्यन्ताभावत्वे तमस उत्पत्ति-नाशादिप्रतीतीनां भ्रमत्वं स्यात् । न च 'आलोकसंसर्गाभावसमुदाय एवाऽन्ध-

---

१ क. 'इति वि' ।

कारः, तत्र राशिष्विव किञ्चित्समुदायिव्यतिरेकप्रयुक्त एव विनाशः, एवमुत्पत्तिमत्ययोऽप्यूह्यः' इति शशधरशर्मणो वचनं रमणीयम्, राशिषु बहुत्वविशेषनाशो-त्पादाभ्यां तदाश्रयनाशो-त्पादप्रतीत्युपपत्तावपि प्रकृते तदयोगात्, समूहविलक्षणमहदेको-त्पादाद्यनुभवाच्च। अपिच, एवं 'इदं नीलं' इत्यादिधियां भ्रमत्वं, तत्र 'नेदं नीलं' इत्यादिसाक्षात्कारे वस्तुस्वरूपस्याऽदृष्टवि-शेषस्य वा दोषस्य वा प्रतिबन्धकत्वम्, तत्राऽप्यप्रामाण्यग्रहाभावविशिष्टतेजोऽभावत्वप्रकारकज्ञानादीनामुत्तेजकत्वं कल्पनीयम्, इत्यतिगौरवम्।

यत्तु 'तमसो द्रव्यत्वे प्रौढालोकमध्ये सर्वतो घनतरावरणे तमो न स्यात्, तेजोऽवयवेन तत्र तमोऽवयवानां प्रागन-वस्थानात्, सर्वतस्तेजःसंकुले वाऽन्यतोऽप्यागमनासंभवात्' इति वर्धमानेनोक्तम्; तदसत्, 'यद् द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयम्' इति व्याप्तेस्तेजोऽणुभिरेव तत्रान्धकारारम्भस्वीकारात्। न च 'तेजसस्तेजस एवाऽऽरम्भकत्वादयुक्तमे[2]-तत्' इति वाच्यम्, नियताऽऽरम्भनिरासादिति दिग्।

एवं तमसोऽभावत्वे गतिमत्त्व-परत्वा-ऽपरत्व-विभागादिप्रत्ययानामप्यनुपपत्तिः। न च स्वाभाविकगतेराश्रयगत्यनुवि-धाननियमानुपपत्तिः, पद्मरागप्रभायां तथादर्शनात्; कुड्याद्यावरणभङ्गे तन्नियमभङ्गस्य च प्रभायामिव च्छायादावपि तुल्य-त्वात्। तदिदमुक्तम्–

१ क. 'स्य प्र'। २ तेजोऽणुभिरन्धकारारम्भस्वीकरणम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

" तमः खलु चलं नीलं, परा-ऽपरविभागवत् । इतरद्रव्यवैधर्म्याद् नवभ्यो भेत्तुमर्हति ॥ १ ॥" इति ।

'तमो द्रव्यं, घनतर-निकर-लहरीप्रभृतिशब्दैर्व्यपदिश्यमानत्वात्, किरणादिवत्' इत्यपि वदन्ति[1] । 'नाऽत्राऽऽलोकः किन्त्वन्धकारः' इति व्यवहारादप्यालोकाभावाद् भिन्नं तमः, 'नाऽत्र घटः किन्तु तदभावः' इतिवद् विवरणपरतां विनाऽपि स्वारसिकप्रयोगदर्शनात्, अपकृष्टाऽऽलोकसत्त्वेऽप्यन्धकारव्यवहाराच्च । अत एवोत्कृष्टालोकाभावोऽन्धकार इति चेत् । न, तदुत्कर्षप्रतियोग्यपकर्षशालितयैव तमसि द्रव्यत्वसिद्धेः । 'तमःप्रतियोगिकाभावेनैव तेजोव्यवहारः, तत्र तत्तत्तेजोज्ञानं प्रतिबन्धकम्' इति शेषानन्तवचनं त्वत्यनादरणीयम्, स्पष्टगौरवात्, व्यवहर्तव्यज्ञाने सति, सत्यां चेच्छायां व्यवहारेऽधिकानपेक्षणाच्चेति दिग् ।

प्राभाकरास्तु– तेजोज्ञानाभाव एव तमः, नीलं तम इति धीस्तु स्मृतनीलिम्ना सममालोकज्ञानाभावस्यासंसर्गाग्रहात् । अत एवाऽऽलोकवद् गर्भगृहं प्रविशतः प्रथममालोकाग्रहे 'नीलं तमः' इति धीः, तदुक्तम्– " अप्रतीतावेव प्रतीतिभ्रमो मन्दानाम्" इत्याहुः । तदप्यसत्, 'तमः पश्यामि' इति प्रतीत्या तमसश्चाक्षुषत्वात्; ज्ञानाभावस्य चाऽतथात्वात् । निमीलितनयनस्य च न तमःप्रतीतिरस्ति, किन्त्वर्थान्तरप्रतीतिरेव, अन्यथा 'गेहे तमोऽस्ति, नवा ?' इति संशयानुपपत्तेः; गर्भगृहे च तमःप्रत्ययो भ्रम एव, आलोकज्ञानप्रतिबन्धकदोषस्य तत्र स्वीकारावश्यकत्वादिति दिग् ।

---

१ 'रत्नाकरावतारिकायां द्वितीयपरिच्छेदे तमोवादे श्रीरत्नप्रभसूरयः' इति शेषः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कन्दलीकारस्तु– 'आरोपितं नीलं रूपं तमः' इत्याह । तन्न, नीलीद्रव्योपरक्तेषु वस्त्र-चर्मादिषु तमोव्यवहारप्रसङ्गात्, "गुणे शुक्लादयः पुंसि" (अम०को० १,५,१७) इत्यनुशासनेन शुक्लादिपदजन्यशुक्लत्वाद्यवच्छिन्नमुख्यविशेष्यताकशाब्दबोधे पुंलिङ्गकशुक्लादिपदशक्तिज्ञानजन्योपस्थितेर्हेतुत्वेन 'नीलस्तमः' इति प्रयोगप्रसङ्गाच्च । न चाऽत्र नीलस्य तमोविशेषणत्वमेव, अनुक्तलिङ्गविशेषणपदानां च विशेष्यलिङ्गताया औत्सर्गिकत्वाद् नीलपदे क्लीबत्वमिति वाच्यम्; नीलस्य सामान्यतया विशेष्यत्वात्, विशेषणविशेष्यभावे कामचाराभिधानस्य परस्परव्यभिचारितदुभयविषयत्वादिति दिग् ।

'नीलारोपविशिष्टस्तेजःसंसर्गाभावस्तमः' इति शिवादित्यः । तदपि न, नीलारोपाद्यग्रहेऽपि तमस्त्वग्रहात्, तादृशतमस्त्वावच्छिन्नधर्मिकनीलारोपायोगाच्चेति । अधिकं वादमालायाम् ।

इमां गिरं समाकर्ण्य सकर्णा जाङ्गुलीमिव । उद्वमन्तु सुखं ध्वान्ते (ना)ऽत्राभावत्वभ्रमं विषम् ॥ १ ॥

तस्माद् न जायते किञ्चिदेकान्ताद् न च नश्यति । प्रसिद्धं निखिलार्थानां त्रैलक्षण्यं हि लक्षणम् ॥ २ ॥ ७७ ॥

उपसंहरन्नाह–

एवं चैतन्यवानात्मा सिद्धः सततभावतः । परलोक्यपि विज्ञेयो युक्तमार्गानुसारिभिः ॥७८॥

एवमुक्तयुक्त्या, चैतन्यवान् ज्ञानोपादानम्, आत्मा शरीरभिन्नः, सिद्धः । स च सततभावतः– अनादिनिधनत्वात्, परलोक्यपि युक्तमार्गानुसारिभिः– उपपत्तिसहिताऽऽगमानुगृहीतमतिभिः, विज्ञेयः; आद्यचैत्रशरीरधर्माणामव्यवहितपूर्ववर्तिचैत्र-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शरीरधर्मानुविधायित्वात्, युवशरीरे तथादर्शनात्, अनुगतकार्मणशरीरसिद्ध्या तज्जन्यभोगाश्रयस्य परलोकित्वसिद्धेः। न च घटे घटजन्यत्वस्येव शरीरे शरीरजन्यत्वस्याऽपि न नियम इति वाच्यम्, आत्मनः क्रियावत्त्वेन चेष्टारूपतात्क्रियानियामकशरीरत्वस्याऽऽद्यशरीरहेतुकर्मणि स्वीकारादिति ॥ ७८ ॥

अत्राह परः-

सतोऽस्य किं घटस्येव प्रत्यक्षेण न दर्शनम्?। अस्त्येव दर्शनं स्पष्टमहंप्रत्ययवेदनात्॥७९॥

सतो भावरूपस्याऽऽत्मनः सतः, घटस्येव प्रत्यक्षेण दर्शनं किं न भवति?, तथा चाऽनुपलब्ध्याऽभाव एव तस्येत्याशयः। तत्राऽनुपलब्धिरेव नास्तीति समाधत्ते- स्पष्टं साक्षात्, अहंप्रत्ययस्य वेदनात्- अनुभवसिद्धत्वात्, अस्त्येव दर्शनम्। न चेदं न प्रत्यक्षमिति वाच्यम्, व्याप्त्यादिप्रतिसंधानविरहेऽपि जायमानत्वात्, आत्मत्वविशिष्टस्याऽयोग्यत्वे साध्याऽप्रसिद्ध्याऽनुमानासंभवाच्च। एतेन 'तत्राऽऽत्मा तावत् प्रत्यक्षतो न गृह्यते' इति न्यायभाष्योक्तमप्यपास्तम्। ननु यद्येवमात्मा प्रत्यक्षः, कथं तर्हि तत्र शरीराभेदबुद्धिः, धर्मिस्वरूपस्य शरीरभेदस्याऽपि ग्रहात्?, इति चेत्। न धर्म्यंशे, तद्भावेन तद्ग्रहेऽपि शरीरभेदप्रकारकग्रहाभावात् तदभेदबुद्ध्युपपत्तेः; इति नानुपलब्ध्याऽऽत्माभावनिश्चयः। न च चक्षुराद्यनुपलब्ध्या तदभावः, वाय्वादेरप्यभावप्रसङ्गात्। न चाऽनुपलब्धिमात्रस्याऽर्थाभावसाधकत्वम्, अन्यथा स्वगृहाद् निर्गतो वराकश्चार्वाको न गृहमासादयेत्, पुत्रादिभिस्तदहब्ध्या तदभावसिद्धेः, प्रत्युत पुत्र-धनाद्यभावावधारणाच्छोकविकलो बहु विक्रोशेत्; तदा पुत्रादिसत्त्वे चाऽनुपलब्धे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्व्यभिचाराद् नार्थाभावसाधकत्वम् । अथ संनिकृष्टेऽधिकरणे पुत्राद्यत्यन्ताभावग्रहेऽपि तद्ध्वंसाग्रहाद् न शोक इति चेत् । तथापि पुत्राद्युपलम्भहेतुचक्षुराद्यनुपलम्भेन तदभावात् पुत्राद्यनुपलम्भेन परावृत्तस्य तस्य मूढता स्यात्; तदिदमुक्तम्- "स्वगृहाद् निर्गतो भूयो न तदाऽऽगन्तुमर्हति" इति । अथ चक्षुरादिसंभावनाद् न तदनुपलब्ध्या तदभावसिद्धिरिति चेत् । तर्ह्यात्मनोऽपि संभावनासत्त्वाद् न तदनुपलब्ध्या तदभावसिद्धिरिति परिभावनीयम् ॥ ७९ ॥

उक्तप्रत्ययो न प्रमा, इत्याशङ्कते—

भ्रान्तोऽहं गुरुरित्येष सत्यमन्यस्त्वसौ मतः। व्यभिचारित्वतो नास्य गमकत्वमथोच्यते॥८०॥

'अहं गुरुः' इत्येष प्रत्ययो भ्रान्तः, गुरुत्वानाश्रयेऽहंत्ववत्यात्मनि गुरुत्वावगाहनात् । यद्यपि घटस्येव कदाचिद् भ्रमविषयत्वेऽप्यात्मनो नानुपपत्तिः, तथापि तत्प्रत्ययाभावे प्रमाणाग्राह्यत्वादसत्ख्यातिग्राह्यत्वेनालीकत्वमस्येत्यभिमानः । तत्रोच्यते- सत्यम्, उक्तप्रत्ययो भ्रान्त एव; तु पुनः, असौ प्रमारूपोऽहंप्रत्ययः, अन्यः- 'अहं गुरुः' इत्याद्यतिरिक्तः 'अहं जाने, अहं सुखी' इत्यादिरूपः, मतोऽङ्गीकृतः । अथाऽस्य- अहंप्रत्ययजनकोपयोगस्य, व्यभिचारित्वतो भ्रमजनकत्वात्, गमकत्वं प्रमाणत्वं नेति । उच्यते ॥ ८० ॥

प्रत्यक्षस्यापि तत्त्याज्यं तत्सद्भावाविशेषतः। प्रत्यक्षाभासमन्यच्चेद्व्यभिचारि न साधु तत्॥८१॥

१ क. 'नासत्त्वाद्' । २ क. 'प्रमाभा' । ३ ख. ग. घ. 'व पु' । ४ ख. ग. घ. च. 'माणरू' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तर्हि प्रत्यक्षस्यापि चक्षुरादेरपि, तत्सद्भावाऽविशेषतो भ्रमजनकत्वाविशेषात्, तत् प्रमाणत्वं त्याज्यम्। अथ प्रत्यक्षाभासं द्विचन्द्रादिप्रत्यक्षं, व्यभिचारि विसंवादिव्यवहारजनकम्, अन्यत् सत्यघटादिप्रत्यक्षभिन्नं, तत् साधु प्रमा[1]रूपं, न। तथा च न भ्रमाजनकत्वलक्षणं प्रामाण्यमभिमतं, किन्तु प्रमाजनकत्वम्; तच्च घटादिप्रमाजननादक्षतमित्याशय इति चेत् ॥ ८१ ॥

अहंप्रत्ययपक्षेऽपि ननु सर्वमिदं समम्। अतस्तद्वदसौ मुख्यः सम्यक्प्रत्यक्षमिष्यताम् ॥८२॥

'ननु' इत्याक्षेपे, इदं सर्वं– प्राक्प्रकटितमाकूतम्, अहंप्रत्ययपक्षेऽपि समम्, असत्याहंप्रत्ययपरित्यागेन सत्याहंप्रत्ययमादाय प्रमाणत्वाविरोधात्, दुष्टा-ऽदुष्टकारणजन्यत्वेन प्रत्ययद्वैविध्यात्। अतः प्रमाणग्राह्यत्वाद् नाऽलीकत्वमात्मनः, किन्तु पारमार्थिकत्वमिति व्यञ्जयति। अत उक्तसाम्यात्, तद्वत् सत्यघटप्रत्ययवत्, असौ– 'अहं जाने' इत्यादिप्रत्ययः, मुख्यः सद्व्यवहारजनकः, सम्यक्प्रत्यक्षं प्रत्यक्षप्र[2]माणरूपः, इष्यताम्– अङ्गीक्रियताम् ॥ ८२ ॥

ननु 'अहं जाने' इत्यादिप्रत्ययस्य न भ्रान्तत्वम्, 'अहं गुरुः' इति प्रत्ययस्य च भ्रान्तत्वम्, इत्यत्र किं विनिगमकम्?, इत्यत आह—

गुर्वी मे तनुरित्यादौ भेदप्रत्ययदर्शनात्। भ्रान्तताभिमतस्यै[3]वास्य युक्ता नेतरस्य तु ॥ ८३॥

---

१ ख. ग. घ. च. 'माणरू'। २ क. 'मारू'। ३ मूलपुस्तके 'स्यैव सा यु' इति पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुर्वी गुरुत्ववती, मे मम तनुः, इत्यादौ प्रयोगे भेदप्रत्ययदर्शनात्, अभिमतस्यैव त्वया बाधकत्वेनाऽङ्गीकृतस्यैव, अस्य 'अहं गुरुः' इति प्रत्ययस्य, भ्रान्तता युक्ता, तु पुनः, नेतरस्य- 'अहं जाने' इत्यादिप्रत्ययस्य, तत्र बाधकाऽनवतारात्। अत्र 'षष्ठ्या यद्यपि संबन्धमात्रमर्थः, तथापि तस्या भेदनियतत्वेन शरीरेऽहंत्ववद् भेदस्य शाब्दबोधोत्तरमाक्षेपलभ्यत्वेन गुरुत्वे मद्भिन्नवृत्तित्वेनोक्तप्रत्ययेऽहंत्वव्यधिकरणप्रकारकत्वलक्षणभ्रमत्वग्रहः' इति वदन्ति। 'भेदविशिष्टः संबन्ध एव षष्ठ्यर्थः, राहोः शिर इत्यादौ तु बाधाद् भेदांशस्त्यज्यते' इत्यन्ये। यद्यपि 'ममाऽऽत्मा' इत्यादावपि षष्ठीप्रयोगो दृश्यते, तथापि गुरुत्वादावेवाऽहंत्वव्यधिकरणत्वम्, अन्यत्र क्लृप्तत्वात्, इदंत्वसंवलितत्वाच्च; न तु ज्ञानादावित्यत्र तात्पर्यम् ॥ ८३ ॥

नन्वयमहंप्रत्ययो न प्रत्यक्षरूपः, इन्द्रियत्वेनेन्द्रियजन्यज्ञानस्यैव प्रत्यक्षत्वात्, अत एवाऽऽत्मापि कथं प्रत्यक्षव्यपदेशभाग्, प्रत्यक्षज्ञानविषयतयैव विषयस्य प्रत्यक्षत्वव्यपदेशात्? । स्वातिरिक्तज्ञानं विनाऽप्यपरोक्षत्वेन प्रतिभासनात् प्रत्यक्ष आत्मेति चेत्। किं तत्?, स्वप्रतीतौ व्यापारो वा, चिद्रूपस्य सत्ता वा?। नाऽऽद्यः, कर्मणीव स्वात्मनि व्यापारानुपलम्भात्। न द्वितीयः, स्वतः प्रकाशाऽयोगात्। अत एव न स्वसंविदितज्ञानविषयत्वेनापि तथात्वम्, तदसिद्धेः; सिद्धौ वा प्रमाणान्तरप्रसङ्गात्[2]। अथ सर्वज्ञानानां 'घटमहं जानामि' इत्याद्याकारत्वात् प्रत्यक्षेणैव स्वविषयत्वासिद्धिरिति चेत्। न, तत्र ज्ञाने घटविषयत्वग्रहेऽपि स्वस्य ज्ञानविषयत्वाग्रहात्, स्वस्य स्वाविषयत्वेन स्वविषयत्वाऽविषयत्वात्, अन्यथा 'घटज्ञानज्ञानवान्' इत्याकारप्रसङ्गात्।

१ तत्- स्वसंविदितज्ञानं, तस्य। २ 'स्वसंविदितज्ञानस्य' इति शेषः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च, 'घटमहं जानामि' इति ज्ञाने क्रियायाः कृतेर्वा समवायित्वलक्षणमात्मनः कर्तृत्वम्, परसमवेतक्रियाफलशालित्वं करणव्यापारविषयत्वं वा विषयस्य कर्मत्वम्, धात्वर्थत्वं कृतिजन्यत्वं वा ज्ञानस्य क्रियात्वमयोग्यत्वाद् न भासत इति न ताहश[1]त्रिपुटीप्रत्यक्षात् स्वसंविदितत्वसिद्धिः, अन्यथा 'घटं चक्षुषा पश्यामि' इति व्यवहारात् करणविषयत्वमपि सिध्येत् । किञ्च, अर्थविषयकत्वेनैव ज्ञानस्य प्रवर्तकत्वम्, न तु स्वविषयत्वेनापि, गौरवात् ; तथा च 'अर्थमात्रविषयक एव व्यवसायः' इत्यभ्युपगमः श्रेयान् ।

अपि च, 'अहमिदं जानामि' इत्यत्रेदंत्वविशिष्टज्ञानवैशिष्ट्यमात्मनि भासते । न च स्वप्रकाशे तदुपपत्तिः, ज्ञानस्य पूर्वमज्ञातत्वेन प्रकारत्वानुपपत्तेः । न चाऽभावत्वाभानेऽप्यभावत्वविशिष्टबोधात् तत्र व्यभिचारवारणाय समानवि[2]त्तिवेद्यभिन्नविशेषणज्ञानत्वेन विशिष्टबुद्धौ हेतुत्वाद् न दोष इति वाच्यम् ; यद्धि येन विना न भासते तत् तत्समानवित्तिवेद्यम्— तद्ग्रहसामग्रीनियतग्रहसामग्रीकमित्यर्थः । न च ज्ञानाभाने आत्माभानमित्यस्ति, तदभानेऽपि 'अहं सुखी' इति भानस्य सर्वसिद्धत्वात् ।

अपिच, प्रत्यक्षविषयतायामिन्द्रियसंनिकर्षस्य नियामकत्वात् कथं तदनाश्रयस्य स्वस्य प्रत्यक्षत्वम् ?, कथं वा प्रत्यक्षाजनकस्य प्रत्यक्षविषयत्वम्, प्रत्यक्षविषयतायास्त[3]ज्जनकत्वव्याप्तत्वात् ? । न च संस्कार-स्मृत्याद्युपनीततत्तादौ व्यभिचारः, अनागतगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यप्रत्यक्षविषयतायास्त[4]थात्वात् ; वस्तुतो लौकिकप्रत्यक्षविषयतायाः प्रत्यक्षजनकत्वव्याप्तत्वात्, तदजनके स्वस्मिँल्लौकिकसाक्षात्कारविषयता न स्यादिति द्रष्टव्यम् । तेनाऽनुपदोक्तनियमे 'विद्यमानत्वसामा-

१ ताहशी कर्तृत्व-कर्मत्व-क्रियात्वरूपा त्रिपुटी । २ वित्तिर्ज्ञानम् । ३ तच्छब्दः प्रत्यक्षानुकर्षकः । ४ प्रत्यक्षजनकत्वव्याप्तत्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यजन्यप्रत्यक्षविषये व्यभिचारवारणायाऽनागतत्वस्थानेऽजनकत्वस्य निवेशावश्यकत्वे प्रत्यासत्त्यादिभागमपहायाऽजनकविषयसाक्षात्कारान्यप्रत्यक्षविषयताया एव प्रत्यक्षजनकत्वव्याप्यत्वकल्पने स्वस्याजनकत्वेन स्वविषयतायां जनकत्वस्याऽनियामकत्वेन स्वविषयता न बाधिता' इत्युक्तावपि न क्षतिः। किञ्च, लौकिकविषयत्वेन लाघवादिन्द्रिययोग्यत्वाज्ज्ञानस्य परिशेषाद् मनोग्राह्यत्वसिद्धौ न स्वप्रकाशत्वम्। किञ्च, एवमनुमित्यादौ सांकर्यात् प्रत्यक्षत्वं जातिर्न स्यात्। न च स्वविषयत्वे ज्ञानानपेक्षत्वं तत्त्वम्, न तु जातिरिति वाच्यम्; एकत्र ज्ञानापेक्षा-ऽनपेक्षयोर्विरोधात्। न च भ्रमे धर्मविषयकत्व-धर्मिविषयकत्वावच्छेदभेदेन दोषापेक्षा-ऽनपेक्षावदनुमित्यादावपि वह्न्यादिविषयकत्व-स्वविषयकत्वावच्छेदभेदेन ज्ञानापेक्षा-ऽनपेक्षोपपत्तिरिति वाच्यम्; दोषापेक्षे भ्रमे तदनपेक्षाऽनभ्युपगमात्, धर्म्यंशे स्वभावादेवाऽभ्रमत्वात्।

किञ्च, ज्ञानजन्यतानवच्छेदकं यत्किञ्चिज्जन्यतावच्छेदकं यद्विषयत्वं, तदवच्छेदेन तस्य प्रत्यक्षत्वम्, इति स्वविषयत्वांशे न तथात्वम्, ज्ञानसामग्र्या ज्ञानत्वस्यैव जन्यतावच्छेदकत्वात्, विशेषसामग्र्यां च तस्याऽतिप्रसक्ततयैवाऽनवच्छेदकत्वात्। न च वित्तेरवश्यवेद्यत्वात् स्वप्रकाशत्वम्, नो चेत्, या वित्तिर्न वेद्यते तदधीनसत्त्वस्य विषयपर्यन्तस्याऽसत्त्वं स्यादिति वाच्यम्; सर्वासां वित्तीनां ज्ञानज्ञानत्वेनाऽवश्यवेद्यत्वात्। परप्रकाशेऽनवस्थानात् स्वप्रकाशसिद्धिरित्यपि न युक्तम्, स्वप्रकाशत्वस्याऽपि परिशेषानुमेयतया तदनुमितिस्वप्रकाशताया अप्यनुमानान्तरलभ्यतयाऽनवस्थासाम्यात्, विषयान्तरसंचारादिना प्रतिबन्धेन त[3]द्भङ्गस्याऽप्युभयत्र साम्यात्। इत्यत आह–

१ प्रत्यक्षत्वम्। २ तस्य दोषस्य। ३ क, 'तद्बन्धस्या'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आत्मनात्मग्रहोऽप्यत्र तथानुभवसिद्धितः। तस्यैव तत्स्वभावत्वान्न च युक्त्या न युज्यते ॥८४॥

आत्मनाऽऽत्मग्रहोऽपि कर्तृ-कर्म-क्रियागोचरत्वमपि, अत्र प्रकृताहंप्रत्यये, तथानुभवसिद्धितः स्वसंविदितत्वानुभवसिद्ध्या, तस्यैव– आत्मन एव, तत्स्वभावत्वात्– कर्तृत्वादिकिर्मीरितशक्तियोगित्वात्; न च युक्त्या तर्केण, न युज्यते न साध्यते– अपितु साध्यत एवेत्यर्थः।

यथा कथायां प्रविशन् परस्य नैयायिकः कारयति प्रतीक्षाम्।
तथा यथार्थाऽऽगमबद्धबुद्धिर्दास्यामि नाऽस्यैापि किमेष शिक्षाम्?॥ १॥

तथाहि– 'जानामि' इति सार्वलौकिकं ज्ञानमेव पूर्वापरज्ञानकल्पनागौरवसहकृतं कर्तृ-कर्म-क्रियावगाहि सत् स्वविषयत्वे प्रमाणम्, 'ज्ञानस्येदं जानामि, इदं ज्ञानं जानामि' इत्युभयाकारत्वात्। एतेन 'स्वविषयत्वे सिद्धे गौरवसहकृतं ज्ञानगोचरताया ग्राहकं प्रत्यक्षं स्वप्रकाशतायां प्रमाणम्, तेन च मानेन तस्य स्वविषयतासिद्धिः, इत्यन्योन्याश्रयः' इत्यपास्तम्; ज्ञानविषयत्वेनाऽनुभूयमानस्य लाघवात् प्राच्यज्ञानैक्यसिद्धौ स्वप्रकाशतासिद्धेः, कालभेदेनोभयानुभवस्य शपथप्रत्यायनीयत्वात्। नन्वेवं घटज्ञानज्ञानाद्यनन्ताकारत्वं स्यादिति चेत्। न, घटज्ञानज्ञानादिविषयताया अपि वस्तुतो घटज्ञानविषयताऽनतिरेकात्, अभिलापभेदस्य विवक्षाधीनत्वात्। तत्र चाश्रयत्वरूपं कर्तृत्वं, विषयत्वरूपं कर्मत्वं, विशेषणत्वरूपं क्रियात्वं च

१ किर्मीरितं शबलितम्। २ अस्य नैयायिकस्य, 'स्वसंवेदनवादे' इति शेषः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योग्यत्वाद् भासते, करणाद्यंशे त्वयोग्यत्वाद् न साक्षात्त्वमिति किमनुपपन्नम् ? । परप्रकाशे च ज्ञानस्य प्रत्यक्षानुपपत्तिः, अनुव्यवसायक्षणे व्यवसायाभावात् । न च ज्ञानत्वनिर्विकल्पकजन्यज्ञानक्षणे व्यवसायस्याऽभावेऽपि पूर्वं तत्सत्त्वात् तदा तत्प्रत्यक्षं, ततो विशेषणज्ञानादात्मनि ज्ञानविशिष्टधीः, विशेषणं च न विशिष्टप्रत्ययहेतुः, तत्तां विनापि तद्बुद्धेः प्रत्यभिज्ञादर्शनादिति वाच्यम् , प्रत्यक्षे विषयस्य स्वसमयवृत्तित्वेनैव हेतुत्वात् , अन्यथा विनश्यदवस्थघट-चक्षुःसंनिकर्षाद् घटनाशक्षणे घटप्रत्यक्षप्रसङ्गात् , ज्ञानस्यातीतत्वेन 'जानामि' इति वर्तमानत्वज्ञानानुपपत्तेश्च । न च वर्तमानत्वेन स्थूल उपाधिर्भासते न तु क्षणः, तस्याऽतीन्द्रियत्वादिति वाच्यम् , संसर्गशब्दादितः क्षणस्याऽपि सुज्ञानत्वात् ।

किञ्च, 'अहं घटज्ञानवान्' इतिवद् 'मयि घटज्ञानम्' इत्यप्यनुभवो नेच्छामात्रेणापह्नोतुं शक्यते; तत्र च व्यवसायस्य विशेष्यस्याऽसत्त्वात् कथं तत्प्रत्यक्षम् ? । एतेन 'ज्ञानत्वनिर्विकल्पकजन्यज्ञाने घटस्याप्युपनीतस्य भानात् तत्र वर्तमानत्वभानं सूपपदम्' इत्युक्तावपि न निस्तारः, व्यवसायप्रत्यक्षानुपपादनात् 'घटं पश्यामि' इति प्रयोगानुपपत्तेश्च । एतेन 'यदि च जात्यतिरिक्तस्य किञ्चिद्धर्मप्रकारेण भाननियमाज्ज्ञानविशिष्टबुद्धौ ज्ञानविशेष्यकज्ञानमेव हेतुः, तदा निर्विकल्पकोत्तरमपि ज्ञानम्, इति ज्ञानग्रहे 'जानामि' इति ज्ञानांशेऽलौकिके प्रत्यक्षं सूपपदम्' इत्यपास्तम् ; घटचाक्षुषांशेऽलौकिकात् ततः 'पश्यामि' इत्यप्रयोगात् ; 'पश्यामि' इति विलक्षणविषयतयाऽनुव्यवसायविलक्षणविषयतया चाक्षुषस्य नियामकत्वेन तदभावे तदनुपपत्तेः । न च चाक्षुषत्वांशभ्रमजनकदोषाद् निद्रायाम् 'आकाशं पश्यामि' इत्यादाविवोपपत्तिः, 'घटं पश्यामि' इत्यत्र सर्वांशप्रमाया एवाऽनुभवात् । तदिदमुक्तं स्याद्वादरत्नाकरे– ' किञ्च, इन्द्रियजं प्रत्यक्षं संनिकृष्टे विषये प्रवर्तते, अतीतक्षणवर्तिनश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानस्य मनोलक्षणेन्द्रियसंनिकर्षो न युज्यते, ततः कथं प्राचीनज्ञाने मानसप्रत्यक्षवार्तापि ? ' इति । 'व्यवसायनाशक्षणोत्पन्नव्यवसायान्तरे ज्ञानत्वविशिष्टबुद्धिः' इत्यप्यत एव निरस्तम्, तद्धेतोश्चक्षुःसंनिकर्षादेस्तदानीं नियतसंनिधिकत्वाभावात्, अनुमित्युत्तरज्ञानत्वनिर्विकल्पोत्तरमनुमित्ययोगात्, अन्यत्रानुमितित्वाभावात् 'अनुमिनोमि' इत्यनुपपत्तेः, पूर्वव्यवसायविशेष्यकज्ञानस्य कथमप्यनुपपत्तेश्च । एतेन 'ज्ञानं ज्ञानत्वं च निर्विकल्पके भासते, ततो ज्ञानत्ववैशिष्ट्यं ज्ञाने, ज्ञानवैशिष्ट्यं चात्मनि भासते, इति विशेष्ये विशेषणं, तत्र च विशेषणम्, इति रीत्या ज्ञानप्रत्यक्षत्वम् ' इति निरस्तम् ; 'ज्ञानं घटीयं नवा ?' इति संदेहेऽपि तद्बुद्धिप्रसङ्गाच्च ।

यत्तु 'ज्ञानं ज्ञानत्वं च विशिष्टज्ञानविषय एव, अनुव्यवसायस्य विषयरूपविशेषणविषयकव्यवसायसाध्यत्वेन विशिष्टज्ञानसामग्रीसत्त्वाज्ज्ञानत्वमपि तत्र भासते, सामग्रीसत्त्वादंशे तत् सप्रकारकं निष्प्रकारकं चेति नरसिंहाकारं तत्रैव विशिष्टं ज्ञानत्ववैशिष्ट्यं च भासते, अनुमित्यादौ च न तथाऽनुव्यवसाये, अनुमितित्वाभावात् ' इति, 'वस्तुतस्तु-' इति कृत्वा चिन्तामणिकृतोक्तम् ; तदसत्, सार्वत्रिकप्रकारं विना काचित्कप्रकाराभिधानस्य प्रयासमात्रत्वात्, अभावप्रत्यक्षस्य घटत्वाद्यन्यतमविशिष्टविषयकत्वनियमवज्ज्ञानप्रत्यक्षे तन्नियमाभावात्, 'अहं सुखी' इतिवत् 'अहं ज्ञानवान्' इति विषयविनिर्मुक्तप्रतीतेः सार्वजनीनत्वात्, संनिकर्षकार्यतायां विषयान्तर्भावे गौरवात्, ज्ञाने नृसिंहाकारतोपगमे विषयेऽपि तदभ्युपगमौचित्येन स्याद्वादाऽऽपाताच्च ।

नृसिंहाकारज्ञाने ज्ञानत्व-घटत्वप्रकारत्वोभयाश्रयज्ञानवैशिष्ट्यधीर्न स्यात्, इति प्रसञ्जनं तु समाहितं मिश्रेण— 'विष-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यनिरूप्यं हि ज्ञानं, न तु विषयपरम्परानिरूप्यम्' इत्यादिना । अधिकविषयकत्वेऽपि च व्यवसायस्य प्रवृत्तिजनकत्वमविरुद्धम्, इष्टतावच्छेदकप्रवृत्तिविषयवैशिष्ट्यावगाहित्वेन प्रवृत्तिहेतुत्वात् । न चात्र 'प्रमेयम्' इति ज्ञानात् प्रवृत्त्यापत्तिः, इष्टतावच्छेदके तद्भिन्ननिष्ठधर्माऽप्रकारकत्वविशेषणात् । न चेष्टतावच्छेदकप्रकारकज्ञानस्य मुख्यविशेष्यतया प्रवृत्तिहेतुत्वम्; 'तद् रजतम्, इदं द्रव्यम्' इति ज्ञानात् प्रवृत्तिवारणाय प्रवृत्तिविषयविशेष्यकत्वावच्छेदेनेष्टतावच्छेदकप्रकारकत्वस्य वाच्यत्वे इष्टतावच्छेदकविशेष्यकत्वावच्छेदेन प्रवृत्तिविषयप्रकारकत्वेनापि हेतुतायां विनिगमनाविरहात्, उभयबुद्ध्योरुक्तैकरूपेण हेतुत्वौचित्यात् ।

यत्तु 'वह्निव्याप्यधूमवत्पर्वतवान् देशः' इति परामर्शात् 'पर्वतो वह्निमान्' इत्यनुमितेरनुदयाद् वह्निव्याप्यधूमत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नमुख्यविशेष्यताकनिश्चयत्वेनाऽनुमितिहेतुत्वात्, स्वप्रकाशनये तु पर्वतस्य ज्ञानविशेष्यत्वात् तदतिरिक्तविशेष्यतानिरूपितप्रकारतानात्मकत्व-मुख्यत्वनिवेशे गौरवम्' इति । तन्न, स्वप्रकाश्यस्य व्यवसाया-ऽनुव्यवसायोभयाकारत्वेऽप्यविरोधात्, तव ज्ञानमानसादौ वह्न्यनुमितिसामग्र्यादिप्रतिबन्धकत्वकल्पने महागौरवात्, घटचाक्षुषे सति चाक्षुषसामग्र्यां सत्यां तदनुव्यवसायानुपपत्तेश्च; तदानीं चक्षुर्मनोयोगादिविषमकल्पनायां मानाभावात्, घटदर्शनोत्तरमाहत्यैव पटदर्शनात्, तदा चक्षुर्मनोयोगान्तरादिकल्पनयाऽतिगौरवात् । न च ममापि स्वविषयकत्वनियामकहेतुकल्पने गौरवम्, आलोकस्य प्रत्यक्षे आलोकान्तरानपेक्षत्ववत् स्वभावत एव ज्ञानस्य स्वसंविदितत्वात् । अस्तु वा स्व-परप्रकाशनशक्तिभेदः, तथापि न गौरवम्, फलमुखत्वात् ।

१ नैयायिकस्य । २ स्याद्वादवादिनः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यच्चोक्तम्– 'ज्ञानस्य पूर्वमनुपस्थितत्वात् कथं प्रकारत्वम् ?' इति । तन्न, तस्याऽऽत्मवित्तिवेद्यत्वात्, 'अहं सुखी' इत्यस्यापि 'सुखं साक्षात्करोमि' इत्याकारत्वात्, अनभ्यासादिदोषेण तथाऽनभिलापात् । यदपि 'प्रत्यक्षविषयतायामिन्द्रियसंनिकर्ष एव नियामकः' इत्युक्तम्; तदपि न, अलौकिकप्रत्यक्षविषयतायां व्यभिचारात् । न च लौकिकत्वं विषयताविशेषणम्, दोषविशेषप्रभवप्रत्यक्षविषयतायां व्यभिचारात्, ज्ञाने पराभिमतलौकिकविषयताभावस्येष्टत्वाच्च । 'साक्षात् करोमि' इतिधीनियामकस्पष्टताख्यविषयतायां च संबन्धविशेषेण विषयनिष्ठस्य प्रत्यक्षप्रतिबन्धकज्ञानावरणापगमस्य, शक्तिविशेषस्य वा नियामकत्वमिति न किञ्चिदनुपपन्नम् । अभेदे कथं विषयत्वम् ?, इति चेत् । यथा घटाभावे घटाभावविशेषणत्वम् । किं तत् ?, इति चेत् । स्वभावविशेष एव । अनिर्वचनात् तदसिद्धिरिति[1] चेत् । न, तस्याऽऽख्यातुमशक्यत्वेऽपि प्रत्याख्यातुमशक्यत्वात्[2][3] ।

यत्तु 'स्वव्यवहारशक्तत्वमेव स्वविषयत्वम्' इति । तन्न, आत्मन्यतिप्रसङ्गात्; ज्ञानपददाने चेच्छाद्यनुपसंग्रहात्; शक्तेः पदार्थान्तरत्वेनाऽऽत्माश्रयः, द्वारेऽपि तस्या[4] अनन्यथासिद्धनियतपूर्ववृत्तित्वज्ञानव्यङ्ग्यत्वेनाऽन्योन्याश्रयाच्चेति विभावनीयम् । यदपि 'प्रत्यक्षाजनकस्य प्रत्यक्षाविषयत्वं स्यात्' इत्युक्तम्; तदपीश्वरादिप्रत्यक्षविषये गगनादौ व्यभिचारग्रस्तम् । 'लौकिकविषयत्वेनेन्द्रियग्राह्यत्वाज्ज्ञानस्य न स्वप्रकाशत्वम्' इत्यपि रिक्तमुक्तम्[5], शक्तिविशेषेणैवेन्द्रियग्राह्यत्वात्, लौकिकविषयत्वेनाऽतत्त्वात्, तत्त्वस्यैवाऽतीन्द्रिय[6] आपाद्यत्वात्; शक्तिविशेषस्यैव तन्नियामकत्वे तेन रूपेणाऽन्यथासिद्धेश्च । एतेन 'ज्ञानमानसाऽन-

---

१ तदा स्वभावविशेषपरामर्शः । २ खण्डयितुम् । ३ कार्याद्यन्यथानुपपत्तेस्तत्सिद्धये सिद्धहस्तत्वादिति भावः । ४ शक्तेः । ५ रिक्तं तुच्छम् । ६ तच्छब्द इन्द्रियग्राह्यानुकर्षकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्युपगमे धर्मादीनामिव तस्याऽयोग्यत्वाय मानससाक्षात्कारप्रतिबन्धकत्वकल्पने गौरवम्' इति नव्यमतं निरस्तम्। 'अयोग्यत्वस्य प्रतिबन्धकत्वेऽविश्रामात् स्वरूपायोग्यतयैव तत्त्वात्' इति यौक्तिकाः।

यत्तु 'अनुमित्यादौ सांकर्यात् प्रत्यक्षत्वं जातिर्न स्यात्' इत्युक्तम्; तत् तथैव, ज्ञानजन्यतानवच्छेदकतद्विषयकत्वस्यैव प्रत्यक्षत्वात्। तत्त्वं च स्वावच्छिन्नजनकताश्रयज्ञानोपहितवृत्तित्वविशिष्टज्ञानजन्यतावच्छेदकभिन्नत्वम्, अतो न किञ्चिदंशेऽलौकिके वह्निलौकिकप्रत्यक्षे वह्न्यंशेऽप्रत्यक्षत्वम्, वह्निविषयत्वस्य धूमपरामर्शजन्यतावच्छेदकत्वादिति बोध्यम्। ज्ञानजन्यतावच्छेदकत्वोपलक्षितोद्देश्यताविधेयताद्यात्मकतद्विषयतान्यत्वं वा तदर्थः, तेन 'नाऽपूर्वचैत्रत्वादिविशिष्टप्रत्यक्षे तद्विषयताकत्वावच्छिन्नजनकताश्रयज्ञानाप्रसिद्ध्या 'अहमेतत्क्षणवर्तिज्ञानवान्, तत्सामग्रीतः' इत्यनुमितावहंविषयकत्वादिनापि ज्ञानजन्यत्वाच्च तदंशेऽप्रत्यक्षत्वम्' इति वदन्ति। वस्तुतः स्पष्टताख्यविषयतैव प्रत्यक्षत्वम्, अत एव 'पर्वतो वह्निमान्' इत्यत्र पर्वतांशेऽपि स्पष्टतया प्रत्यक्षत्वम्, इति 'वह्निं न साक्षात्करोमि' इतिवत् 'पर्वतं न साक्षात्करोमि' इति न धीः। अत एव च "स्पष्टं प्रत्यक्षम्" (प्रमाणनय० २,१) इति प्रत्यक्षलक्षणं सूत्रितम्, विवेचितं चेदं ज्ञानार्णवे। अतश्च स्वसंविदितस्य प्रमाणान्तरत्वप्रसङ्गोऽप्यपास्तः। न चैवं प्रत्यभिज्ञायास्तत्तांशे, स्मृतिरूपत्वेनेदंतांशे च प्रत्यक्षत्वेनोपपत्तौ स्मृतिपार्थक्येन परोक्षमध्ये परिगणनं विरुध्येतेति वाच्यम्, विलक्षणक्षयोपशमजन्यत्वेन तस्याः पृथक्परिगणनादिति युक्तमुत्पश्यामः। अधिकं न्यायालोके।

१ तदा ज्ञानजन्यतानवच्छेदकतद्विषयकत्वम्। २ स्पष्टत्वस्य प्रत्यक्षलक्षणत्वात्। ३ प्रत्यक्ष एव स्वसंवेदनस्याऽन्तर्भावादित्यर्थः। ४ स्मृतेः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बोधः स्वार्थावबोधक्षम इह निहताऽज्ञानदोषेण दृष्ट-
स्तस्मादस्माकमन्तर्विरचयति चमत्कारसारं विलासम् ।
येषामेषाऽपि वाणी मनसि न रमते स्वाऽऽग्रहग्रस्ततत्त्वा-
ऽऽलोका लोकास्त एते प्रकृतिशठधियो हन्त! हन्ताऽनुकम्प्याः ॥ १ ॥ ८४ ॥

नन्वयमहंप्रत्ययो नाऽऽत्मनि साक्षी, नीलादेरिवाऽहंकारस्याऽपि बुद्धिविशेषाकारत्वात्, नीलादि-संविदोर्विवेकादर्शनेन भेदासिद्धेः; कर्मतया भानस्य पूर्वपूर्वभ्रान्तिनिमित्तकत्वात्, बाह्यार्थं विनापि तदाकारस्य रजतादिभ्रम एव दर्शनात् प्रागनुपलम्भेनाऽर्थाभावसिद्धेः, परोपलम्भे मानाभावात्; भावेऽपि स्व-परदृष्टनीलयोः स्व-परसुखादिवदेकत्वासिद्धेः; कश्चिदेव किञ्चिदाकारनियमस्य च स्वप्नावस्थायामिव जागरावस्थायामपि नियतवासनाप्रबोधेन संवेदननियमादुपपत्तेः, इत्याशङ्कायामाह–

न च बुद्धिविशेषोऽयमहंकारः प्रकल्प्यते। दानादिबुद्धिकालेऽपि तथाहंकारवेदनात् ॥८५॥

न चायं– प्रकृतबुद्धिविषयोऽहङ्कारः, बुद्धिविशेषः– अर्थविनिर्मुक्तताद्दग्बुद्ध्याकाररूपः प्रकल्प्यते । कुतः?, इत्याह– दानादिबुद्धिकालेऽपि तथा– 'अहं ददामि' इत्यादिप्रतिनियतोल्लेखेन, अहङ्कारवेदनात्– 'अहम्' इत्यनुभवात्; वासनाप्रभवत्वेऽन्यवासनाया अन्याकाराऽजनकत्वेन दानादिवासनाया अहंकारबुद्ध्यनुपपत्तेरित्याशयः । ननु युगपदुभयवासनाप्रबोधादुभ-

१ ख. ग. घ. च. 'स्य जनादि' । २ ख. ग. घ. च. 'पः परिक' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

याकारोपपत्तिरिति चेत् । कथं तर्ह्यहंकारवासना दानादिवासनाप्रबोधनियतकालीनप्रबोधा, न तु नीलादिवासना ? इति वाच्यम् । स्वभावादिति चेत् । न, तथा सति तेन वासनाया अप्यन्यथासिद्धेः । तत्कालस्य नीलादिवासनाऽनुद्बोधकत्वादिति चेत् । न, तत्काल एवाऽन्येषां तदुद्बोधात् । तदीयतद्वासनोद्बोधे तत्कालो न हेतुरिति चेत् । गतं तर्हि वासनया, तत्कालेनैव तदाकारप्रतिनियमात् । तस्मात् तत्तदर्थसंनिधानेनैव क्षयोपशमरूपा तत्तज्ज्ञानजननी वासना प्रबोध्यते; इत्यहङ्कारस्यार्थविषयत्वमकामेनापि प्रतिपत्तव्यम् । एतेन 'अहंत्वाद्याकारस्याऽप्यलीकत्वमेव, एकस्य विज्ञानस्य नानाकारभेदायोगात्; तदुक्तम्–

"किं स्यात् सा चित्रतैकस्यां न स्यात् तस्यां मतावपि । यदीयं[3] स्वयमर्थानां रोचते तत्र के वयम् ? ॥१॥"

इति माध्यमिकोक्तमप्यपास्तम्, स्वरूपानुभवलक्षणाऽर्थक्रियया ज्ञानस्यैव तदाकारस्य, अर्थचित्रताधीनाया ज्ञानचित्रतायाश्च सिद्धेरिति । अधिकमग्रे विवेचयिष्यते ॥ ८५ ॥

ननु यद्येवं स्वतः प्रकाश एवाऽऽत्मा, तदा सदा किं न कर्तृ-क्रियाभावेन प्रकाशते ?, इत्यत आह–

आत्मनात्मग्रहे तस्य तत्स्वभावत्वयोगतः । सदैवाग्रहणं ह्येवं विज्ञेयं कर्मदोषतः ॥ ८६ ॥

आत्मना– ज्ञानेन, आत्मनो ज्ञातुर्ग्रहणे– ज्ञप्तिक्रियायां, तस्य– आत्मनः, तत्स्वभावत्वयोगतः– तादृशज्ञानजननशक्तिसमन्वि- ॥ ४९ ॥

१ स्वभावाङ्गीकारे । २ गतं सृतम्, अलमिति यावत् । ३ ख. ग. च. 'दीदं स्व' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्वात्, 'उपपाद्यमानायाम्' इति शेषः, हि निश्चितम्, एवम्– 'अहं जाने' इत्याद्युल्लेखेन, सदैव सुषुप्त्यादावपि, अग्रहणम्–अप्रतिसंधानम्, कर्मदोषतः– तथाप्रतिबन्धकज्ञानावरणसाम्राज्यात्, ज्ञेयम्।

नन्वेवं त्यज्यतां स्वप्रकाशाऽऽग्रहः, इन्द्रियाद्यभावादेव तदाऽग्रहणोपपत्तेः। न च सुषुप्त्यनुकूलमनःक्रियया॒ऽऽत्म-मनःसंयोगनाशकाले उत्पन्नेन सुषुप्तिसमकालोत्पत्तिकमनोयोगसहकृतेन परामर्शेन सुषुप्तिद्वितीयक्षणेऽनुमित्युत्पत्तिरिति वाच्यम्; तत्काले परामर्शोत्पत्तौ मानाभावात्, तत्सामग्रीभूतव्याप्तिस्मृत्यादेः फलैककल्प्यत्वात्। अथ तत्काले आत्मादिमानसोत्पत्तिः। न च विशेषगुणोपधानेनैवाऽऽत्मनो भानमिति वाच्यम्; सविषयकप्रकारकात्ममानसत्वस्य मनोयोगादिजन्यतावच्छेदकत्वे गौरवात्। न च त्वङ्-मनोयोगाभावात् तदनापत्तिः, तस्य[2] जन्यज्ञानत्वावच्छिन्नेऽहेतुत्वात्, अन्यथा रासनाद्युत्पत्तिकाले त्वाचोत्पत्तेः। मानसत्वावच्छिन्नं प्रति तद्धेतुत्वे च त्वाचत्वावच्छिन्नं प्रति पृथक्कारणत्वे गौरवादिति चेत्। न, सुषुप्तौ जीवनयोनियत्नानभ्युपगमेन विजातीयमनःसंयोगस्यैवाऽभावात्। न च त्वक्क्रियया त्वङ्-मनःसंयोगनाशे पुरीतत्क्रियया पुरीतद्-मनःसंयोगरूपसुषुप्त्युत्पत्तौ प्राक्तनाऽऽत्म-मनःसंयोगनाशाभावात् तदा ज्ञानोत्पत्त्यापत्तिरिति वाच्यम्; सर्वत्र मनःक्रिययैव सुषुप्तिस्वीकारात्। तदुक्तम्– 'यदा मनस्त्वचं परिहृत्य' इत्यादि; इति चेत्। न, चेष्टाहेतुजीवनयोनियत्नस्य तदाऽवश्यं सत्त्वात्, नाड्यादिक्रिययाऽपि सुषुप्तिसंभवात् 'यदा मनः' इत्याद्यभिधानस्य प्रायिकत्वात्, मनोयोगनिष्ठवैजात्यावच्छिन्नहेतोरदृष्टातिरिक्तस्याऽदर्शनात्, रसना-मनःसंयोगदशायां त्वङ्-मनःसंयोगस्याऽप्यावश्यकत्वात्। तद्वा त्वाचप्रतिबन्धकस्याऽदृष्टस्य स्वीकारे चाक्षुषादिसामग्रीकाले मान-

१ ख. ग. घ. च. 'गात् तदभावाना'। २ त्वङ्-मनोयोगस्य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सानुत्पत्त्यर्थमप्येतत्प्रतिबन्धकादृष्टकल्पनात् सुषुप्तौ तेनैव ज्ञानानुत्पत्तिप्रतिबन्धोपगमौचित्याच्च । किञ्च, ज्ञानज्ञानादौ विषयान्तरसंचारस्य प्रतिबन्धकत्वकल्पने गौरवात्, ज्ञानस्येन्द्रियाऽग्राह्यत्वकल्पनात्, स्वसंविदित-तत्प्रतिबन्धकदोषकल्पनागौरवमपि फलमुखत्वाद् न बाधकमिति दिग् ॥ ८६ ॥

उपसंहरन्नाह–

अतः प्रत्यक्षसंसिद्धः सर्वप्राणभृतामयम् । स्वयंज्योतिः सदैवात्मा तथा वेदेऽपि पठ्यते ॥८७॥

अतः– अहंप्रत्ययस्याऽभ्रान्तत्वात्, अयम्– आत्मा, सर्वप्राणभृतां प्रत्यक्षसंसिद्धः– प्रत्यक्षप्रमाणविषयः । न केवलमिदमनुभवगर्भया युक्त्यैव ब्रूमः, किन्तु परेषामागमोऽप्यत्रार्थे साक्षी; इत्याह– तथा– अनुभवानुसारेण, वेदेऽपि आत्मा सदैव स्वयंज्योतिः– स्वसंविदितज्ञानाभिन्नः, पठ्यते– "आत्मज्योतिरेवाऽयं पुरुषः" इति । एतेन वेदप्रामाण्याभ्युपगन्तॄणां ज्ञानपरोक्षत्ववादिनां मीमांसकानां मतमपहस्तितम्, अपरोक्षत्वे ज्ञानस्यैवाऽसिद्धेः । न च ज्ञाततालिङ्गेन [1]तदनुमानम्, [2]तस्या एवाऽसिद्धेः । न च घटादेः कर्मत्वान्यथानुपपत्त्या तत्सिद्धिः, क्रियाजन्यफलशालित्वं हि [3]तत्, न च घटे ज्ञानजन्यमन्यत् फलमस्तीति वाच्यम्, एवं सति 'इष्टो घटः, कृतो घटः' इत्यादिप्रतीतेरिष्टता-कृततादेरपि सिद्धिप्रसङ्गात् ।

किञ्च, 'अतीतो घटो ज्ञातः' इत्यादौ तदसंभवः; न ह्यतीते घटे ज्ञाततोत्पत्तिसंभवः, समवायि कारणं विना भावका-

१ तच्छब्देन ज्ञानं गृह्यते । २ तस्या ज्ञाततायाः । ३ तत्– कर्मत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यानुत्पत्तेः । न च तत्र[1] ज्ञातताभ्रम एव, बाधकाभावात् । तत्र[1] स्वरूपसंबन्ध एव ज्ञाततेति चेत् । विद्यमानेऽपि[2] स[3] एवाऽस्तु । त्वयाऽपि[4] ज्ञानेन ज्ञातताानियमार्थमवश्यं तस्य स्वीकर्तव्यत्वात्, समवायेन ज्ञाततायां विषयतया ज्ञानस्य हेतुत्वात्; कर्मत्वमपि विद्यमाने घटेऽतीतघट इव गौणमेवेति ।

अस्तु वा ज्ञातता, तथापि न तया ज्ञानानुमानसंभवः, ज्ञाततायाा विषयनिष्ठत्वात्, ज्ञानस्य चाऽऽत्मनिष्ठत्वात् । अथ समवायेन घटप्रत्यक्षं संबन्धविशेषेण घटप्राकट्यं स्वसमानाधिकरणं जनयति, इति तेन तदनुमानम्[5]; अत एव तदीयप्राकट्यस्य नाऽन्येन ज्ञानम्, विषयतया तदीयप्राकट्यप्रत्यक्षे तादात्म्येन तदीयप्राकट्यस्य हेतुत्वादिति चेत् । न, तथाऽप्यनुमित्यादेरासिद्ध्यापत्तेः, परोक्षज्ञानेऽप्राकट्यस्यापि पदार्थान्तरस्य स्वीकारापत्तेश्च । न च प्रवृत्त्यादिना तदनुमानम्[5], लिङ्गाऽननुगमस्याऽदोषत्वादिति वाच्यम्, प्रवृत्त्यादेरिव ज्ञानस्य प्रत्यक्षत्वे बाधकाभावात्; बाह्यार्थवत् कर्मत्वानवभासस्य क्रियात्वेनाऽनुवेधादुपपत्तेः; इति किमप्रस्तुतेन ? ।

आत्मसिद्धेः परं शोकाल्लोकाः ! लोकायताऽऽननम् ।
समालोकामहे म्लानं तत्र नो कारणं वयम् ॥ १ ॥ ८७ ॥

॥ इति चार्वाकमतनिरासः ॥

---

१ तत्र-- अतीते घटे । २ घटविशेषणमिदम् । ३ तदा स्वरूपसंबन्धः । ४ मीमांसकेन । ५ ज्ञानानुमानम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रैव प्रसङ्गेन वार्तान्तरमाह—

अत्रापि वर्णयन्त्येके सौगताः कृतबुद्धयः । क्लिष्टं मनोऽस्ति यन्नित्यं तद्यथोक्तात्मलक्षणम् ८८

अत्रापि– आत्मसिद्धावपि, कृतबुद्धयः– चार्वाकापेक्षया परिष्कृतधियः, एके सौगता वर्णयन्ति । किम् ?, इत्याह– क्लिष्टं– क्लेशविशिष्टं न तु बाह्याकारं, यद् नित्यं मनोऽस्ति, तद् यथोक्ताऽऽत्मलक्षणम्– अहंप्रत्ययालम्बनाऽऽत्मव्यपदेशभाक् ॥८८॥

अत्र नित्यत्वं तद्भावेनाऽव्ययत्वम् , क्षणविशरारुपरिणामप्रवाहपतितत्वं वा; इति विकल्प्य दूषयति—

यदि नित्यं तदात्मैव संज्ञाभेदोऽत्र केवलम् । अथानित्यं ततश्चेदं न यथोक्तात्मलक्षणम् ॥८९॥

यदि त्वदभ्युपेतं मनो नित्यं– तद्भावेनाऽव्ययम् , तदाऽऽत्मैव तत् ; अत्र– अस्मिन् वादे, केवलं संज्ञाभेदः– न त्वर्थभेदः । अथाऽनित्यम्– द्रव्यतयाऽपि नश्वरम् , 'तदा' इति प्राक्तनमनुषज्यते, ततश्च– अनित्यत्वाच्च, इदं मनः, न यथोक्तात्मलक्षणम्– युक्त्या-ऽऽगमाभ्यां यादृशमात्मनो लक्षणं सिद्धं तद्वद् नेत्यर्थः ॥ ८९ ॥

आत्मलक्षणमेवाह–

यः कर्ता कर्मभेदानां भोक्ता कर्मफलस्य च । संसर्ता परिनिर्वाता स ह्यात्मा नान्यलक्षणः ॥९०॥ ॥ ५१ ॥

१ विशृणाति तच्छीलो विशरारुर्विनाशीत्यर्थः । २ त्वच्छब्दस्तथागततनयावाचकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यः कर्मभेदानां ज्ञानावरणादीनां, कर्ता; कर्मफलस्य सुख-दुःखादेश्च, भोक्ता; तथा, संसर्ता- स्वकृतकर्मानुरूपनरकादिगतिगामी; तथा, परिनिर्वाता- कर्मक्षयकारी; हि- निश्चितम्, स आत्मा; नाऽन्यलक्षणः- पराभिमतकूटस्थादिरूपः। कर्तृत्वादिकं च नानित्यस्योपपद्यते, कार्यसमये नश्यतो हेतोः कार्याजनकत्वात्; अन्यथा कालान्तरेऽपि कार्योत्पत्तेः प्रसङ्गात्, इति न त्वदुक्तं मन एवाऽऽत्मा, किन्त्वन्य एव विज्ञानघनः शाश्वत इति सिद्धम् ॥ ९० ॥

नित्यत्वे कथमस्य वैचित्र्यम्?, इत्यत आह-

आत्मत्वेनाविशिष्टस्य वैचित्र्यं तस्य यद्वशात्। नरादिरूपं तच्चित्रमदृष्टं कर्मसंज्ञितम्॥९१॥

आत्मत्वेनाऽविशिष्टस्य- एकजातीयस्य, तस्य- आत्मनः, नरादिरूपं वैचित्र्यं वैलक्षण्यम्, यद्वशात्- यस्माद्धेतोः, तच्चित्रं कार्यवैचित्र्यानिर्वाहकविचित्रशक्तिकलितम्, कर्मसंज्ञितं- कर्मापरनामकम्, अदृष्टं सिध्यति। न च नरत्वादिवैचित्र्यं नरगत्याद्यर्जकक्रिययैव प्राग्भवीययोपपाद्यताम्, किमन्तर्गडुनाऽदृष्टेन? इति वाच्यम्; व्यवहितहेतोः फलपर्यन्तव्यापारव्याप्यत्वावधारणात्। तदिदमुक्तं न्यायाचार्यैरपि- "चिरध्वस्तं फलायाऽलं न कर्माऽतिशयं विना" इति। अथ नरादिशरीरवैचित्र्यं तदुपादानवैचित्र्यादेव, भोगवैचित्र्यं च शरीरवैचित्र्यात्, शरीरसंयोगश्चाकाशादाविवाऽऽत्मन्यपि, इत्यदृष्टं कोपयुज्यताम्?, इति चेत्।

---

१ सौगतोक्तम्। २ कुसुमाञ्जलौ प्रथमस्तवके कारिका ९।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न, शरीरसंयोगस्याऽऽकाशादावपि सत्त्वेन तत्रापि भोगापत्तेः । उपष्टम्भकसंयोगेन शरीरस्य भोगनियामकत्वे तु तादृशसंयोगप्रयोजकतयैवाऽदृष्टसिद्धेः ॥ ९१ ॥

अपरथाऽपि कार्यवैचित्र्यमाह—

तथा तुल्येऽपि चारम्भे सदुपायेऽपि यो नृणाम् । फलभेदः, स युक्तो न युक्त्या हेत्वन्तरं विना ।

तथा, तुल्येऽपि च– समानेऽपि च, आरम्भे– कृष्यादिप्रयत्ने, सदुपायेऽपि– अकुण्ठितशक्तिकतदितरयावत्कारणसहितेऽपि, नृणां– चैत्र-मैत्रादीनाम् , फलभेदः धान्यसंपत्ति-असंपत्तिरूपः, स्वल्प-बहुधान्यसंपत्तिरूपो वा यः, स युक्त्या 'विचार्यमाणः' इति शेषः, हेत्वन्तरम्– क्लृप्तकारणाऽतिरिक्तकारणं, विना न युक्तः । अथाऽऽद्यप्रवृत्ताववैषम्येऽप्युत्तरकालं सामग्रीवैषम्यादेव कार्यवैषम्यमिति चेत् । न, सामग्रीवैषम्यस्यापि हेत्वन्तराधीनत्वात् ।

अथवा, समानेऽप्यारम्भे– एकजातीयदुग्धपानादौ, यः फलभेदः– पुरुषभेदेन सुख-दुःखादितारतम्यलक्षणः, स हेत्वन्तरं विना– अतिरिक्तहेतुतारतम्यं विना, न युक्त इत्यर्थः । न चाऽत्रापि क्वचिद् दुग्धादेः कर्कट्यादिवत् पित्तादिरसोद्बोधादुपपत्तिः, सर्वत्र तदापत्तेः । न च भेजषवत् तथा, ततः साक्षात् सुखादितौल्यात् , धातुवैषम्यादेरुत्तरकालत्वात् ; पित्तादिरसोद्बोध्यधातुवैषम्यादिविरहितदुग्धपानत्वादिना सुखादिहेतुत्वे गौरवात् , अदृष्टप्रयोज्यजातिव्याप्यजात्यवच्छिन्नं प्रत्येव दुग्धपानादेर्हेतुत्वौचित्याच्चेति दिग् ॥ ९२ ॥ ॥ ५२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदमेवाऽभिप्रेत्याह—

तस्मादवश्यमेष्टव्यमत्र हेत्वन्तरं परैः । तदेवादृष्टमित्याहुरन्ये शास्त्रकृतश्रमाः ॥ ९३ ॥

तस्मात्– तुल्येऽप्यारम्भे फलभेददर्शनात्, अत्र फलभेदनिमित्तं, परैश्चार्वाकैः, हेत्वन्तरमवश्यमेष्टव्यम्– अनायत्या नियमेनाऽङ्गीकार्यम् । तदेव हेत्वन्तरम्, शास्त्रकृतश्रमाः– अध्ययन-भावनाभ्यां गृहीतशास्त्रतात्पर्याः, अन्ये– आस्तिकाः, अदृष्टमाहुः । तथा चाह भगवान् भाष्यकारः–

"[1]जो तुल्लसाहणाणं फले विसेसो, न सो विणा हेउं । कज्जत्तणओ गोयम ! घडो व्व, हेऊ अ से कम्मं[2] ॥१॥" इति ॥९३॥

पराकूतमाशङ्क्य निराकुरुते—

भूतानां तत्स्वभावत्वादयमित्यप्यनुत्तरम् । न भूतात्मक एवात्मेत्येतदत्र निदर्शितम् ॥९४॥

भूतानां राजादिपरिणतभूतानाम्, तत्स्वभावत्वात्– विचित्रभोगहेतुस्वभावत्वात्, अयं– फलभेदः, इत्यपि– चार्वाकोक्तम्, अनुत्तरम्– उत्तराभासः । कुतः ?, इत्याह– 'यतः' इति शेषः, 'भूतात्मक एवात्मा न' इत्येतत्, अत्र– पूर्वप्रघट्टके, निदर्शितं– व्यवस्थापितम्; आत्मस्वभावभेदश्चाऽदृष्टाधीन इति भावः ॥ ९४ ॥

---

१ यस्तुल्यसाधनानां फले विशेषः, न स विना हेतुम् । कार्यत्वतो गौतम ! घट इव हेतुश्च तस्य कर्म ॥ १ ॥

२ विशेषावश्यकभाष्ये द्वितीयस्मिन् गणधरवादे गाथा ८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूतपदस्याऽगृहीतविशेषस्योपादाने उत्तरमेव वैतत्, इति स्वाभिप्रायादाह—

कर्मणो भौतिकत्वेन यद्वैतदपि सांप्रतम्। आत्मनो व्यतिरिक्तं तच्चित्रभावं यतो मतम्॥९५॥

कर्मणः– अदृष्टस्य, भौतिकत्वेन– पौद्गलिकत्वेन, एतदपि– 'भूतानां तत्स्वभावत्वात् फलभेदः' इत्युत्तरमपि, 'यद्वा' इति प्रकारान्तरे, सांप्रतं– समीचीनम्।

नन्विदमसंगताभिधानम्, 'भोगनिर्वाहकस्याऽऽत्मधर्मस्यैवाऽदृष्टस्य कल्पनात्, तदुक्तम्– "संभोगो निर्विशेषाणां न भूतैः संस्कृतैरपि[1]" इति। तथा, चित्रस्वभावत्वमप्यदृष्टस्याऽनुपपन्नम्, तद्वैजात्ये मानाभावात्; तत्सत्त्वे कर्मणां विशिष्याऽदृष्टहेतुत्वे गौरवाच्च। न च कीर्तननाश्यतावच्छेदकतया तत्सिद्धिः, तत्र दृष्टत्वस्य स्वाश्रयजन्यताविशेषसंबन्धेनाऽश्वमेधत्वादिघटितस्य वा तथात्वात्; अन्यथा 'मयाऽश्वमेध-वाजपेयौ कृतौ, मया वाजपेय-ज्योतिष्टोमौ कृतौ' इत्यादिकीर्तननाश्यतावच्छेदकजातिसिद्धौ सांकर्यस्यापि संभवात्। अस्तु वा तत्कीर्तनाभावविशिष्टतत्तत्कर्मत्वेन हेतुत्वम्, अतो न समूहालम्बनहरि-गङ्गास्मरणजन्याऽपूर्वस्य गङ्गास्मृतिकीर्तनाद् नाशे हरिस्मृतेरपि फलानापत्तिः, तज्जन्यापूर्वयोरेकस्य नाशेऽप्यपरस्य सत्त्वे गङ्गास्मृतेरपि वा फलापत्तिः' इति नैयायिकमतसाम्राज्यात्; इत्यत आह–

यद्– यस्माद्धेतोः, तत्– कर्म, आत्मनो व्यतिरिक्तं– भिन्नद्रव्यतया व्यवस्थितम्; तथा, चित्रभावं– फलवैचित्र्यनिर्वा-

१ कुसुमाञ्जलौ प्रथमस्तबके कारिका ९।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हकवैचित्र्यशालि, मतम्– अङ्गीकृतम्, 'पारगतागमवेदिभिः' इति शेषः। 'तत्र पौद्गलिकत्वे इदमनुमानम्– अदृष्टं पौद्गलिकम्, आत्मानुग्रहो-पघातनिमित्तत्वात्, शरीरवत्। न चाऽप्रयोजकत्वम्, 'कार्यैकार्थप्रत्यासत्त्या तस्य सुखादिहेतुत्वे त्वन्नीत्याऽसमवायिकारणत्वप्रसङ्गात्' इति वदन्ति। वस्तुतो धर्मा-ऽधर्मयोर्मानसप्रतिबन्धकत्वादिकल्पनापेक्षया नात्मधर्मत्वमेव कल्पनीयम्, इत्यादिकं ज्ञानार्णवेऽनुसंधेयम्। तद्वैचित्र्यमपि बन्धहेतुत्ववैचित्र्येऽपि संक्रमकरणादिकृतं परिणतप्रवचनानां सुज्ञानमेव। परेषामपि कीर्तनादिनाश्यतावच्छेदकं वैजात्यमावश्यकमेव, अश्वमेध[3]-वाजपेयादिघटितस्य गुरुत्वात्, सुखवैजात्यघटितेनाऽविनिगमाच्च; समूहालम्बनकीर्तनाच्चोभयोरेव वैजात्यावच्छिन्नयोर्नाशः; अन्यथा प्रत्येकनाश्यनाशप्रसङ्गात्, तत्र किञ्चित्प्रतिबन्धकादिकल्पने गौरवाच्च। इति किमिहाऽप्रकृतपरगृहविचारप्रपञ्चेन? ॥ ९५ ॥

अत्रैवाऽन्येषां वार्तान्तरमाह—

शक्तिरूपं तदन्ये तु सूरयः संप्रचक्षते। अन्ये तु वासनारूपं विचित्रफलदं तथा ॥ ९६ ॥

तत्– अदृष्टम्, अन्ये तु सूरयः शक्तिरूपं– कर्तुः शक्त्यात्मकम्, संप्रचक्षते– व्यावर्णयन्ति। तु– पुनः, तेभ्योऽप्यन्ये वासनारूपं तत्, विचित्रफलदं– नानाविधफलजनकं, तथा– उक्तवत्, संप्रचक्षते ॥ ९६ ॥

तत्र प्राच्यपक्षदूषणप्रकारं वृद्धप्रवादेनाह—

---

१ पारगतो भगवानर्हन्। २ क. 'त्वभीत्या'। ३ क. ख. ग. 'मेधादि'। ४ ख. 'नाश'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ये त्वभिदधत्यत्र स्वरूपनियतस्य वै। कर्तुर्विनान्यसंबन्धं शक्तिराकस्मिकी कुतः?॥९७॥

अन्ये तु– प्रावचनिकाः, अत्र विचारे, एवमभिदधति। किम्?, इत्याह– वै– निश्चितम्, स्वरूपेणाऽऽत्मत्वेन नियतस्याविशिष्टस्य कर्तुः, अन्यसंबन्धम्– आत्मातिरिक्तहेतुसंबन्धं विना, शक्तिराकस्मिकी– अकस्मादुत्पत्तिका सती, कुतः– कथं भवेत्?– न कथञ्चिदित्यर्थः। 'शक्तिर्यद्यात्ममात्राऽजन्यत्वे सति तदतिरिक्ताऽसाधारणकारणजन्या न स्यात्, जन्या न स्यात्' इत्यापादनं बोध्यम्॥ ९७॥

अत्र विशेषासिद्धिमाक्षिप्य परिहरति—

तत्क्रियायोगतः सा चेत्तदपुष्टौ न युज्यते। तदन्ययोगाभावे च पुष्टिरस्य कथं भवेत्?९८

तस्याऽऽत्मनः क्रिया सुपात्रदानादिका तस्या योगतः संबन्धात्, सा शक्तिः; तथा चात्मातिरिक्ताऽसाधारणकारणजन्यत्वमेव, इति चेत्। तस्याऽऽत्मनोऽपुष्टौ सत्यनुपचये सति, न युज्यते 'क्रियाजन्या शक्तिः' इति शेषः, यथा मृदः पुष्टावेव घटादिजनिका शक्तिर्भवति, तथाऽऽत्मनोऽपि पुष्टावेव सुखादिजनिका शक्तिः स्यात्, न त्वन्यथेति भावः। अस्तु तर्हि पुष्टिः, इत्यत आह– तया क्रिययाऽन्येषां कर्माणूनां योगाभावे बन्धविरहे, अस्य– आत्मनः, पुष्टिः– उपष्टम्भकाणुसंवेधरूपा, कथं भवेत्?। एवं च पुष्टिहेतुतया कर्मसिद्धिरावश्यकीत्याशयः। यद्यपि पुष्टिरन्यत्र स्थौल्य एवोपयुज्यते, तथापि क्रियया न हेतुशक्त्याधानम्, हेतुमात्रे तत्प्रसङ्गात्; आत्मन्येव तदाधाने तु कर्मण एव नामान्तरं तदित्यभिप्रायः॥ ९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्तु तर्हि अजन्यैवाऽदृष्टरूपा शक्तिः, इत्यनूद्याह—

अस्त्येव सा सदा किन्तु क्रियया व्यज्यते परम्। आत्ममात्रास्थितताया न तस्या व्यक्तिः कदाचन

सा– अदृष्टरूपा शक्तिः, सदाऽस्त्येव; किन्तु परं– केवलम्, क्रियया–सुपात्रदानादिकया, व्यज्यते– फलप्रदानयोग्या क्रियते, 'न तु जन्यते' इति 'परम्' इत्यनेन स्पष्टीक्रियते। नैवं वाच्यम्, यत आत्ममात्रास्थितायाः– अनावृतैकस्वरूपव्यवस्थितायाः, तस्याः शक्तेः, न- नैव, व्यक्तिः– आवरणनिवृत्तिरूपा, कदाचन जातुचित् ॥ ९९ ॥

कथम् ?, इत्याह—

तदन्यावरणाभावाद् भावे वास्यैव कर्मता। तन्निराकरणाद् व्यक्तिरिति तद्भेदसंस्थितिः १००

तस्याः शक्तेरन्यस्याऽऽवरणस्याभावात्– अनावृतायाः शक्तेरावरणमेव नास्ति, किं तर्हि क्रियया तत्र निवर्तनीयम्, सतो नित्यनिवृत्तत्वात् ?। तथा च का नामाऽऽवरणनिवृत्तिरूपा व्यक्तिस्तत्र क्रियया क्रियताम् ? इत्याशयः। अथ यदि शाश्वत्यास्तस्याः शक्तेः कार्यान्तरं प्रत्यनावृतत्वेऽपि प्रकृतफलप्रदानाभिमुख्याभावात् तत्राऽऽवृतत्वम्, इत्यर्धजरतीयं स्वीक्रियते। तदाप्याह– भावे वा– तदन्यावरणाङ्गीकारे वा, अस्यैव– आवरणत्वेनाऽङ्गीकृतस्यैव, कर्मता; यतस्तस्याऽऽवरणस्य निराकरणात्, व्यक्तिः शक्तेः, इति तयोः शक्त्याऽऽत्मनोः सकाशाद् भेदसंस्थितिः– भेदमर्यादा 'अस्ति' इत्यनुषज्यते। एवं चान्य आत्मा,

---

१ क. 'तेऽपीति'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्र सा शक्तिः; अन्या च शक्तिः, या क्रिययाऽभिव्यज्यते; अन्यच्च कर्म, यदावरणरूपं तदा नश्यति ; इति त्रयसिद्धावपि कर्मणो नाऽसिद्धिरित्यभ्युच्चयः; शाश्वतशक्तेरात्माऽनतिरेकाच्च द्वयमेव वा पर्यवस्यति । वस्तुतः सा शक्तिर्यदि तदैव क्रिययाऽभिव्यज्यते, तदा तदैव स्वर्गोत्पत्तिः स्यात् ; यदि च क्रियाजन्यावरणध्वंससहकृता कालान्तर एव सा फलजननी स्वीक्रियते, तदा किमेतावत्कुसृष्ट्या, तज्जन्यधर्मस्यैव स्वविपाककाले फलजनकत्वौचित्यात् ? इति स्मर्तव्यम् ॥ १०० ॥

इदमेवाह—

पापं तद्भिन्नमेवास्तु क्रियान्तरनिबन्धनम्। एवमिष्टक्रियाजन्यं पुण्यं किमिति नेष्यते?॥१०१॥

तत्- आवारकत्वेनाऽभिमतं क्रियान्तरजन्यमशुभक्रियानिमित्तकं, पापं, भिन्नमेव- शक्त्यतिरिक्तमेव, अस्तु । इति चेत् । एवम्- अशुभक्रियाजन्यपापवत् , इष्टक्रियाजन्यं विहितक्रियानिमित्तकं, पुण्यं, किमिति- कुतो हेतोः, नेष्यते, एकैकाभावेनैकान्यथासिद्धावविनिगमात् ? इति भावः ॥ १०१ ॥

'वासनैवाऽदृष्टम्' इति द्वितीयपक्षं निराकर्तुमाह-

वासनाऽप्यन्यसंबन्धं विना नैवोपपद्यते। पुष्पादिगन्धवैकल्ये तिलादौ नेष्यते[2] यतः॥१०२॥

१ आत्म-शक्ति-क्रियारूपं त्रयम् । २ 'नेक्ष्यते' इति मोलपुस्तकः पाठः, ज्यायांश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वासनाऽप्यन्यसंबन्धं विना– वास्यातिरिक्तयोगं विना, नैवोपपद्यते । कुतः ?, इत्याह– पुष्पादिगन्धवैकल्ये यतस्तिलादौ वासना नेष्यते । एवं च वासना वास्यातिरिक्तसंबन्धजन्येति नियमः सिद्धः ॥ १०२ ॥

ततः किम् ?, इत्याह—

बोधमात्रातिरिक्तं तद्वासकं किञ्चिदिष्यताम् । मुख्यं तदेव वः कर्म न युक्ता वासनान्यथा ॥ १०३ ॥

बोधमात्रातिरिक्तम्– वास्यज्ञानभिन्नम्, तत् तस्मात्, नियमात् किञ्चिद् वासकमिष्यताम्, तदेव– इष्यमाणम्, वः– युष्माकं, मुख्यं– वस्तुसत्, कर्माऽस्तु । अन्यथा– परमार्थसदतिरिक्तकर्माऽस्वीकारे, वासना न युक्ता । न ह्यसत्ख्यात्युपनीतादृष्टभेदाग्रहाज्ज्ञानवासनेत्यभ्युपगमः प्रामाणिकः, तैलादिगन्धेषु पुष्पादिगन्धभेदाग्रहेऽपि तद्वासनापत्तेः । न च तैलादिवासनाविलक्षणैव ज्ञानवासनोक्तस्वरूपा, अतो नानुपपत्तिरिति वाच्यम् ; तथापि ज्ञानेऽदृष्टभेदग्रहाद् वासनानिवृत्त्येदानीं मुक्तिप्रसङ्गात् । औत्तरकालिकभेदाग्रहप्रयोजकदोषसत्त्वाद् नेदानीं तन्निवृत्तिरिति चेत् । तर्हि दोषाभावविशिष्टभेदग्रहाभावो वासनेति फलितम्, दोषश्च तत्र वासनैवेत्यात्माश्रयः । किञ्च, एतादृशवासनापेक्षयाऽवश्यकल्पनीयाऽदृष्ट एवाप्रामाणिकत्वकल्पनापेक्षया प्रामाणिकत्वकल्पनमुचितमिति परिभावनीयम् ॥ १०३ ॥

इदमेवाभिप्रेत्याह—

बोधमात्रस्य तद्भावे नास्ति ज्ञानमवासितम् । ततो मुक्तिः सदैव स्याद्वैशिष्ट्यं केवलस्य न ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बोधमात्रस्य– अविशिष्टज्ञानस्य, तद्भावे– वासनात्वे 'अङ्गीक्रियमाणे' इति शेषः, ज्ञानमवासितं नास्ति, सर्वस्यैव ज्ञानस्य वासनारूपत्वात् । ततः सदैवावासितज्ञानसद्भावाद् मुक्तिः स्यात् । अथ विशिष्टं ज्ञानं वासना स्वीकरिष्यते, इत्यत्राह– केवलस्य– अविशेषितज्ञानस्य, वैशिष्ट्यं नः विशेषकस्वीकारे चोक्तवत् तदेवाऽदृष्टमिति भावः । अथ क्षणिकतत्तज्ज्ञानप्रवाहरूपा वासना, अतो नानुपपत्तिरिति चेत् । न, त्वदीयज्ञानेन बुद्धस्यापि वासनापत्तेः । एकसंतानगामित्वेन विशेषाद् नानुपपत्तिरिति चेत् । न, क्षणपरम्परातिरिक्तसंतानस्वीकारे द्रव्याभ्युपगमप्रसङ्गात्, अन्यथा चातिप्रसङ्गापरिहारादिति स्फुटीभविष्यत्यग्रे ॥१०४॥

उपसंहरन्नाह—

एवं शक्त्यादिपक्षोऽयं घटते नोपपत्तितः। बन्धाद् न्यूनातिरिक्तत्वे तद्भावानुपपत्तितः॥१०५॥

एवं– उक्तदिशा,अयं प्रागुपन्यस्तः, शक्त्यादिपक्षः– शक्ति-वासनयोरदृष्टप्रवादः, उपपत्तितः– युक्तेः, न घटते । उपपत्तिश्च प्रतिस्वं प्रागुक्तैव । तामेव साधारणीकृत्याह– बन्धात् सकाशात्, न्यूनत्वे– किञ्चिद्बन्धवदवृत्तित्वे, अतिरिक्तत्वे च– बन्धाभाववद्वृत्तित्वे सति, तद्भावानुपपत्तितः– अप्रसङ्गा-ऽतिप्रसङ्गाभ्यां बध्य-बन्धनीयभावाऽव्यवस्थाप्रसङ्गाद्धेतोः । शब्दभङ्ग्या प्रागुक्तदोषस्मारणमात्रमेतदिति ध्येयम् ॥ १०५ ॥

ततः किम् ?, इत्याह—

---

१ त्वदीयं सुगतशिष्यसंबन्धि । २ सुगतस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मात् तदात्मनो भिन्नं सच्चित्रं चात्मयोगि च। अदृष्टमवगन्तव्यं तस्य शक्त्यादिसाधकम्॥

तस्मात्– उक्तहेतोः, तत्– नरादिवैचित्र्यप्रयोजकम्, आत्मनः सकाशात्, भिन्नं– पृथग् द्रव्यभूतं न त्वात्मगुणरूपम्, सत्– पारमार्थिकं न तु कल्पनोपारूढम्, चित्रं– नानास्वभावं न त्वेकजातीयम्, आत्मयोगि– आत्मप्रदेशेषु क्षीर-नीरन्यायेनाऽनुप्रविष्टं, न त्वात्मनः कूटस्थात् पृथगेव विवर्तमानम्, सर्पकञ्चुकवदुपर्येव वा वर्तमानम्। चः समुच्चये। तेन प्रवाहतोऽनादित्वादि समुच्चीयते। तस्य आत्मनः, शक्त्यादेः पराभिमतशक्त्यादिपक्षस्य साधकं निर्वाहकम्, अदृष्टं– कर्म, अवगन्तव्यं– सूक्ष्मदृशा पर्यालोचनीयम्।

अत्रोच्छृङ्खला नैयायिकाः– 'अस्तु तत्तत्क्रियाध्वंस एव व्यापारः, किमपूर्वेण?। न चैवं क्रियायाः प्रतिबन्धकत्वव्यवहारापत्तिः, संसर्गाभावत्वादिना कारणीभूताऽभावप्रतियोगित्वेनैव तद्व्यवहारात्। न चैवं संस्कारोऽप्युच्छिद्येत, अनुभवध्वंसेनैवोपपत्तेः, उद्बोधकानां विशिष्य स्मृतिहेतुत्वेनाऽनतिप्रसङ्गादिति वाच्यम्; इष्टत्वात्। न चैवं प्रायश्चित्तितादिकर्मणोऽपि फलापत्तिः, प्रायश्चित्ताद्यभाववत्कर्मत्वेन कारणत्वात्। न चैवं दत्तादत्तफलोद्देश्यकप्रायश्चित्ते कृते प्रतियोगिनि तत्प्रायश्चित्तस्य निवेशे दत्तफलादपि फलं न स्यात्, अनिवेशे चादत्तफलादपि फलं स्यादिति वाच्यम्; अदत्तफलनिष्ठोद्देश्यतया तदभावस्य वाच्यत्वात्। एतेन 'प्रायश्चित्तं न नरकादिप्रतिबन्धकम्, आशुविनाशित्वेन तदुत्पत्त्यवारकत्वात्[1]। नापि तद्ध्वंसः, प्रायश्चित्तान-

१ तदा नरकादिपरामर्शः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्तरकृतगोवधादितोऽपि नरकानुत्पत्त्यापत्तेः । न च तत्तत्प्रायश्चित्तप्राग्वर्तिगोवधादिजन्यनरके तत्तत्प्रायश्चित्तध्वंसः, तथा प्राग्जन्मकृतगोवधादितोऽपि नरकानुत्पत्त्यापत्तेः । 'तज्जन्मकृत-'इतिप्राग्वर्तिगोवधविशेषणे त्वप्रसिद्धिः' इत्यपास्तम् । न चाऽपूर्वाऽस्वीकारेऽङ्गप्रधानव्यवस्थानुपपत्तिः, प्रधानकर्थंताप्रवृत्तिविधिविधेयत्वादिनाऽङ्गत्वस्य सुवचत्वात्' इत्याहुः ।

तदसत्, तत्क्रियोद्देशेनाऽन्यप्रायश्चित्ते कृतेऽपि फलानापत्तेः । तत्तत्प्रायश्चित्ताभावनिवेशात् तत्तत्प्रायश्चित्तविशिष्टाऽदत्तफलध्वंसातिरिक्तध्वंसस्य व्यापारत्वाद् वा नानुपपत्तिरिति चेत् । तथापि तत्त्वज्ञानिक्रियया भोगापत्तिः । तद्ध्वंसातिरिक्तत्वमपि निवेशनीयमिति चेत् । तथापि ध्वंसस्याऽनन्तत्वेन भोगानन्तत्वापत्तिः । चरमभोगानन्तरं व्यापारसत्त्वेऽपि प्रागभावाभावादेव न फलोत्पत्तिरिति चेत् । तर्हि प्रायश्चित्तस्थलेऽपि प्रागभावाभावादेव भोगानुत्पत्तिरिति किं तदभावादिनिवेशेन ? । प्रायश्चित्तविधिसामर्थ्ये तु विजातीयप्रायश्चित्तानां विजातीयाऽदृष्टनाशकत्वमेवोचितम्, आगमाऽसंकोचात्, लाघवाच्च । एतेन चरमभोगप्रागभावविशिष्टोक्तध्वंसाधारतासंबन्धेन क्रियाहेतुत्वमप्यपास्तम्, विशेष्यविशेषणभावे विनिगमनाविरहाच्च । किञ्च, तत्क्रियाणां तत्तत्प्रायश्चित्तोद्देश्यत्वमपि तत्तत्क्रियाजन्यकर्मनाशेच्छाविषयतयैव सुष्ठु निर्वहति, नान्यथा, इत्यतोऽप्यदृष्टसिद्धिः ।

किञ्च, प्राग्जन्मकृतानां नानाकर्मणां न योगोद्देश्यत्वमस्ति, न च ततस्तज्जन्यफलम्, इति योगरूपप्रायश्चित्तस्याऽदृष्टनाशकत्वं विना न निर्वाहः । न च योगात् कार्यव्यूहद्वारा भोग एवेति सांप्रतम्, नानाविधानन्तशरीराणामेकदाऽसंभवादिति । स्पष्टं न्यायालोके । न च योगस्य प्रायश्चित्तत्वस्वीकारे भवतामपसिद्धान्त इति वाच्य[म्]; "सव्वा वि य ॥ ५७॥

१ क. 'त्वासि' । २ सर्वाऽपि च प्रव्रज्या प्रायश्चित्तं भवान्तरकृतानां पापानाम्, कर्मणाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पव्वज्जा पायच्छित्तं भवंतरकडाणं, पावाणं कम्माणं" इति ग्रन्थकृतैवाऽन्यत्रोक्तत्वात् । अपि च, कर्मक्षयार्थितयैव मोक्षोपाये प्रवृत्तिर्न्याय्या, न तु दुःखध्वंसार्थितया, दुःखध्वंसस्य पुरुषप्रयत्नं विनैव भावात् । इत्यपि विवेचितं न्यायालोके । इत्यतोऽपि कर्मसिद्धिः । अपि च, लोकस्थितिरपि कर्माधीनैव, अन्यथा ज्योतिश्चक्रादेर्गुरुत्वादिना पातादिप्रसङ्गात् । न चेश्वराधीनैव, तस्य निरस्यत्वात् । इति किमतिविस्तरेण ? ।

मरीचिरुच्चैः समुदञ्चतीयं जैनोक्तभानोर्यददृष्टसिद्धिः ।
निमील्य नेत्रे तदसौ वराकश्चार्वाकघूकः श्रयतां दिगन्तम् ॥ १ ॥ १०६ ॥

॥ इत्थं सिद्धमदृष्टम् ॥

अथास्यैव दर्शनपरिभाषाजनितान् व्यञ्जनपर्यायानाह—

अदृष्टं कर्म संस्कारः[2] पुण्यापुण्ये शुभाशुभे[3]। धर्माधर्मौ तथा पाशः[4] पर्यायास्तस्य कीर्तिताः १०७

'अदृष्टम्' इति वैशेषिकाः । 'कर्म' इति जैनाः । 'संस्कारः' इति सौगताः । 'पुण्या-ऽपुण्ये' इति वेदवादिनः । 'शुभा-ऽशुभे' इति गणकाः । 'धर्मा-ऽधर्मौ' इति सांख्याः । 'पाशः' इति शैवाः । एवमेते तस्य- अदृष्टस्य, पर्यायाः- व्यञ्जनपर्यायाः,

१ क. 'व्वज्जता पा' । २ क. ख. ग. घ. च 'स्कारा: पु' । ३ क, ख. ग. घ. च 'शुभौ' । ४ क. ख. ग. घ. च 'पाशाः प' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कीर्तिताः । समानप्रवृत्तिनिमित्तकत्वघटितपर्यायत्वं तु न सर्वत्रेति बोध्यम् ॥ १०७ ॥

कथमनेनाऽऽत्मा संयुज्यते ?, इत्याह—

हेतवोऽस्य समाख्याताः पूर्वं हिंसानृतादयः । तद्वान् संयुज्यते तेन विचित्रफलदायिना॥१०८॥

अस्य– कर्मणः, पूर्वं– "[1]हिंसानृतादयः पञ्च" इत्यादिनिरूपणकाले, हिंसा-ऽनृतादयो हेतवः समाख्याताः; तद्वान् तत्क्रियाध्यवसायपरिणतः, विचित्रफलदायिना तेन– कर्मणा, संयुज्यते– अन्योन्यसंबन्धेन बध्यते ॥ १०८ ॥

उक्तेषु वादेषु कः श्रेयान् ?, इति विवेचयति—

नैवं दृष्टेष्टबाधा यत्सिद्धिश्चास्याऽनिवारिता । तदेनमेव विद्वांसस्तत्त्ववादं प्रचक्षते ॥१०९॥

एवम्– आत्मनः कर्मसंयोगे स्वीक्रियमाणे, न दृष्टेष्टबाधा– अमूर्तस्यापि मूर्तेन सहाऽऽकाशादौ संयोगस्य दर्शनात्, अमूर्तस्यापि ज्ञानस्य ब्राह्मी-घृतोपभोग-मद्यपानादिनाऽनुग्रहो-पघातयोरिष्टत्वाच्च; सिद्धिश्चाऽस्य– कर्मणः, उक्तदिशाऽनिवारिता– प्रतितर्काऽबाधितप्रसरा । तत्– तस्मात् कारणात्, एनमेव– प्रकृतवादमेव, विद्वांसः– मध्यस्थगीतार्थाः, तत्त्ववादं– प्रामाणिकाभ्युपगमं, प्रचक्षते ॥ १०९ ॥

१ प्रकृतस्तबके श्लो० ४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवकारफलमेवाह—

लोकायतमतं प्राज्ञैर्ज्ञेयं पापौघकारणम् । इत्थं तत्त्वविलोमं यत्तद् न ज्ञानविवर्धनम् ॥११०॥

लोकायतमतं– नास्तिकदर्शनम्, प्राज्ञैः– सूक्ष्मेक्षिभिः, पापौघस्य क्लिष्टकर्मसमूहस्य, कारणं ज्ञेयम् । कुतः ?, इत्याह– यत्– यस्माद्धेतोः, इत्थम्– उक्तप्रकारेण, तत्त्वविलोमं– यथार्थपदार्थज्ञानप्रतिकूलम्, तथा, अज्ञानविवर्धनम्– क्लिष्टवासनासंततिहेतुः ॥ ११० ॥

अत्र द्रव्यासत्यत्वमपि नास्ति, इति परोक्तैतदुत्पत्तिप्रकारदूषणच्छलेनाह—

इन्द्रप्रतारणायेदं चक्रे किल बृहस्पतिः । अदोऽपि युक्तिशून्यं यन्नेत्थमिन्द्रः प्रतार्यते ॥१११॥

इन्द्रप्रतारणाय– वृत्रदानवव्यापादनार्थं हिंसादिभीतस्येन्द्रस्य धर्माद्यभावभ्रममाधाय लोकसुखार्थं प्रेरणाय, इदं– लोकायतमतम्, 'किल' इति सत्ये, बृहस्पतिः– सुरगुरुः, चक्रे । अदोऽपि– एतदपि वचनम्, युक्तिशून्यम्– अविचारितरमणीयम् । कुतः ?, इत्याह– यत्– यस्मात्, इत्थम्– अनेन बृहस्पत्युक्तप्रकारेण, इन्द्रो न प्रतार्यते, दिव्यदृष्टित्वात् तस्येति भावः ॥ १११ ॥

उपसंहरन्नाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मादुष्टाशयकरं क्लिष्टसत्त्वविचिन्तितम्। पापश्रुतं सदा धीरैर्वर्ज्यं नास्तिकदर्शनम्॥११२॥

तस्मात्– सर्वथैवाऽसत्यत्वात्, दुष्टाशयकरं– परलोकाद्यभावसाधनेन विषयेच्छामात्रपर्यवसायिचित्ताध्यवसायनिबन्धनम्; तथा, क्लिष्टसत्त्वैरचिन्तिताऽऽमुष्मिकाऽपायै[1]रैहिकसुख एवाऽत्यन्तं गृद्धैर्विचिन्तितम्– स्वेच्छया प्रकटीकृतम्। अत एव पापश्रुतम्– श्रूयमाणमप्यनुषङ्गतः पापनिबन्धनं, धीरैः– ज्ञानवृद्धैः, नास्तिकदर्शनं सदा वर्ज्यं– ज्ञात्वा परिहरणीयम्; न त्वत्राग्रे वक्ष्यमाणेषु वार्तान्तरेष्विव द्रव्यासत्यत्वाशङ्कापि विधेया, अन्यथा तामेव[2] च्छलमुपलभ्य प्रकृतिदुष्टा विषयपिपासापिशाची छलयेदिति भावः ॥ ११२ ॥

युक्तिर्मुक्तिप्रसरहरणी नास्ति का नास्तिकानां
सर्वा गर्वात् किमु न दलिता सा नयैरास्तिकानाम्?।
ध्वस्तालोका किमु न जगति ध्वान्तधारा बत स्यात्
किं नोच्छेत्री रविकरततिर्दुःसहोदेति तस्याः? ॥ १ ॥

वार्तामिमामत्र निशम्य सम्यक् त्यक्त्वा रसं नास्तिकदर्शनेषु ।
ऐकान्तिका-ऽऽत्यन्तिकशर्महेतुं श्रयन्तु वादं परमार्हतानाम् ॥ २ ॥

१ अपायो दुःखम्। २ द्रव्यासत्यत्वाशङ्काम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति पण्डितश्रीपद्मविजयसोदरन्यायविशारदपण्डितयशोविजयविरचितायां स्याद्वादकल्पलता-
भिधानायां शास्त्रवार्तासमुच्चयटीकायां प्रथमः स्तबकः ।

अभिप्रायः सूरेरिह हि गहनो दर्शनतति-
निरस्या दुर्धर्षा निजमतसमाधानविधिना ।
तथाप्यन्तः श्रीमन्नयविजयविज्ञांह्रिभजने
न भग्ना चेद् भक्तिर्न नियतमसाध्यं किमपि मे ॥ १ ॥

यस्याऽऽसन् गुरवोऽत्र जीतविजयप्राज्ञाः प्रकृष्टाशया
भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदर-
स्तेन न्यायविशारदेन रचिते ग्रन्थे मतीर्दीयताम् ॥ २ ॥

१ क. 'तानाम्न्यां शा'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

|| अर्हम् ||

अथ द्वितीयः स्तबकः ।

अप्रतीपाय[1] दीपाय सतामान्तरचक्षुषे । नमः स्याद्वादितन्त्राय स्वतन्त्राय [2]विवस्वते ॥ १ ॥

वार्तान्तरमाह—

हिंसादिभ्योऽशुभं कर्म तदन्येभ्यश्च तच्छुभम् । जायते नियमो मानात् कुतोऽयमिति चापरे॥ १॥

हिंसादिभ्यः– अविरत्यादिहेतुभ्यः, अशुभं– पापं, कर्म भवति । तदन्येभ्यश्च– विरत्यादिहेतुभ्यः, शुभं– पुण्यं, तत्– कर्म, भवति । अयं नियमः– प्रतिनियतहेतु-हेतुमद्भावनिश्चयः, कुतः– कस्मात्, मानात्– प्रमाणात् ?; इति चाऽपरे संदिहाना वादिनः प्राहुः । अव्युत्पन्नानां चेयमाशङ्का धर्मा-ऽधर्मपदवाच्यत्वावच्छिन्नधर्मिताका, अन्यथा धर्मिग्राहकमानेनोक्तनियमोपरक्तयोरेव धर्मा-धर्मयोः सिद्धावीदृशशङ्काऽनुदयादिति ध्येयम् ॥ १ ॥

[1] क. 'तीताय' । [2] भास्वते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदमेवाभिप्रेत्य व्युत्पत्तिपुरस्कारेणैव समाधानवार्तामाह—

आगमाख्यात्तदन्ये तु तच्च दृष्टाद्यबाधितम् । सर्वार्थविषयं नित्यं व्यक्तार्थं परमात्मना ॥२॥

तदन्ये तु– असंदिहानास्तत्त्ववादिनः, आगमाख्याद् मानात्, 'नियमं ब्रुवते' इति वाक्यशेषः। कथमेतदत्र मानम्?, इत्यत आह– तच्च– आगमाख्यं, दृष्टाद्यबाधितं– दृष्टेष्टाभ्यामविरुद्धम्; एतेन 'पयसा सिञ्चति' इत्यादेरिव बाधितत्वनिरासः। तथापि स्वाविषये प्रकृतनियमे कथं तद् मानम्?, इत्यत आह– सर्वार्थविषयं– यावदभिलाप्यभावविषयम्; प्रज्ञापनीयभावानामनन्तभागस्य श्रुतनिबद्धत्वेऽपि तदभ्यन्तरभूतया मत्याऽनिबद्धानामपि तेषां ग्रहणश्रवणाद् नानुपपन्नमेतत्। कृत्रिमत्वात् कथमीदृशमेतत्?, इत्यत आह– नित्यं– प्रवाहापेक्षयाऽनादि-निधनम्, भरतादौ विच्छेदकालेऽपि महाविदेहेऽविच्छेदात्। तथाप्यनाप्तोक्तत्वादनीदृशमेतत्, इत्याह– परमात्मना– क्षीणदोषेण भगवता, व्यक्तार्थं– प्रतिपादितार्थम् ॥ २ ॥

नन्विदं स्वगृहवार्तामात्रम्, अप्रत्यक्षे पापादौ तत्प्रामाण्यग्राहकमानाभावात्; इत्याशङ्कायामाह—

चन्द्रसूर्योपरागादेस्ततः संवाददर्शनात्। तस्याप्रत्यक्षेऽपि पापादौ न प्रामाण्यं न युज्यते॥३॥

ततः– तद्बोधितात्, चन्द्र-सूर्योपरागादेरर्थात्– तमाश्रित्य, इति ल्यब्लोपे पञ्चमी; संवाददर्शनात्– अविसंवादिप्रवृत्तिजनकत्वनिश्चयात्, तस्य– शब्दस्य, अप्रत्यक्षेऽपि– श्रोत्रऽप्रत्यक्षेऽपि, पापादौ, प्रामाण्यं– तद्वद्विशेष्यकत्वे सति तत्प्रकारकज्ञानजनकत्वम्, न युज्यत इति न– न निश्चीयत इति न, किन्तु निश्चीयत एवेत्यर्थः ॥ ३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पराभिप्रायमाह—

यदि नाम क्वचिद् दृष्टः संवादोऽन्यत्र वस्तुनि। तद्भावस्तस्य तत्त्वं वा कथं समवसीयते?॥४॥

यदि नाम क्वचित्— चन्द्रोपरागादावर्थे, संवादो दृष्टः; तदा तदभिधायकवाक्यस्य प्रामाण्यं सिध्यतु। अन्यत्र— पापादौ वस्तुनि, तद्भावः— संवादभावः, तस्य पापाद्यभिधायकवाक्यस्य, तत्त्वं वा— प्रमाणत्वं वा, कथं समवसीयते?। प्रामाण्यव्याप्यसंवादित्वग्रहाभावात् पापाद्यभिधायकवाक्ये प्रामाण्यनिश्चयो दुर्घट इति समुदायार्थः॥ ४॥

अत्र समाधानमाह—

आगमैकत्वतस्तच्च वाक्यादेस्तुल्यतादिना। सुवृद्धसंप्रदायेन तथा पापक्षयेण च॥ ५॥

आगमैकत्वतः— दृष्टा-ऽदृष्टसंवाद्यागमयोरेकत्वात्, 'तस्य तथात्वं समवसीयते' इति योजना; संवादित्ववत् संवादिजातीयत्वस्यापि प्रामाण्यव्याप्यत्वात्। अत एव जलादिज्ञाने दृष्टसंवादजातीयत्वेन प्रागेव प्रामाण्यनिश्चयाद् निष्कम्पा प्रवृत्तिर्घटत इति भावः। आगमैकत्वमेव कथम्?, इत्याह— तच्च— आगमैकत्वं च, वाक्यादेः— वाक्य-पदगाम्भीर्यादेः, तुल्यतादिना समवसीयते। नन्विदमयुक्तम्, आगमानुकारेण पठ्यमानेऽन्यत्रापि तत्तुल्यतासत्त्वात्; अनन्तार्थत्वादेश्च दुर्ग्रहत्वात्; इत्यत

---

१ ख. ग. घ. च. 'क्यप्रा'। २ पापाद्यभिधायकवाक्यस्य। ३ तथात्वं— प्रमाणत्वम्। ४ ख. ग. घ. च. 'न प्रामा'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आह— सुवृद्धसंप्रदायेन– ज्ञान-चरणसंपन्नगुरुपरम्परया । नन्वियमपि मिथोविवादाक्रान्ता, सुवृद्धत्वप्रमापकहेत्वन्तरानुसरणे च तदेवाऽऽगमैकत्वग्राहकमस्तु; इत्यत आह– तथा पापक्षयेण च– सम्यक्त्वप्रतिबन्धककर्मक्षयोपशमेन च । 'अयं हि सर्वत्र यथावस्थिततत्वग्रहे मुख्यो हेतुः, लब्धीन्द्रियरूपतदभिव्यञ्जकतयैवाऽन्योपयोगात्, तदभिव्यक्तिव्यापारकतयैव 'तथा' इत्यनेन हेत्वन्तरसमुच्चयात्' इति वदन्ति ॥ ५ ॥

विपर्यये बाधकमाह—

अन्यथा वस्तुतत्त्वस्य परीक्षैव न युज्यते । आशङ्का सर्वगा यस्माच्छद्मस्थस्योपजायते॥६॥

अन्यथा– उक्तरीत्या संशयाविच्छेदे, वस्तुतत्त्वस्य परीक्षैव– सदसद्विचार एव, न युज्यते; यस्माद् हेतोः, छद्मस्थस्य– अक्षीणज्ञानावरणीयस्य, सर्वगा– सर्वार्थविषयिणी, आशङ्का जायते ॥ ६ ॥

अस्तु तर्ह्यपरीक्षैव, इत्यत आह—

अपरीक्षापि नो युक्ता गुण-दोषाविवेकतः । महत्संकटमायातमाशङ्के न्यायवादिनः ॥७॥

अपरीक्षापि– अविचारोऽपि, नो–नैव, युक्ता । कस्मात्?, इत्याह– गुण-दोषाविवेकतः–निष्कम्पप्रवृत्ति-निवृत्तिप्रयोजकानिश्चयात् । तस्मात् परीक्षा-ऽपरीक्षोभयायोगात्, न्यायवादिनः तार्किकस्य, महत् संकटमायातमित्याशङ्के । एतेन 'वक्त्रधी-

१ सुवृद्धत्वप्रमापकहेत्वन्तरम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नत्वाच्छाब्दस्याऽप्रामाण्यम्' इत्यपि निरस्तम्, गुणवद्वक्तृकत्वेन तस्य प्रामाण्यव्यवस्थितेः। अत एव 'अनुमानादस्य विशेषः, शाब्दप्रमायां वक्तृयथार्थवाक्यार्थज्ञानस्य गुणत्वात् , इति गुणवद्वक्तृप्रयुक्तशब्दप्रभवत्वादेव शाब्दमनुमानज्ञानाद् विशिष्यते' इति वदतां सम्मतिटीकाकृतामाशयः।

अत्रेदमवधेयम्– एते पदार्थास्तात्पर्यविषयमिथःसंसर्गवन्तः, आकाङ्क्षादिमत्पदस्मारितत्वात् 'दण्डेन गामभ्याज' इति पदस्मारितपदार्थवत्, इति न शाब्दस्थलीयानुमानशरीरम्, अनाप्तोक्तपदस्मारिते व्यभिचारात्। आप्तोक्तत्वेन विशेषणीयो हेतुरिति चेत्। न, आप्तत्वस्य पूर्वं दुर्ग्रहत्वात्। अत एव योग्यताया हेतुप्रवेशेऽपि न निर्वाहः, एकपदार्थेऽपरपदार्थवत्त्वरूपायास्तस्याः प्रागनिश्चयात्। निश्चये वा सिद्धसाधनात्। आकाङ्क्षापि समभिव्याहृतपदस्मारितार्थजिज्ञासारूपा स्वरूपसत्येव हेतुः, न तु ज्ञाता। योग्यतासहिताऽऽसत्तिरपि न नियामिका, 'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यताम्' इत्यत्र 'राज्ञः पुरुषः' इति भागे व्यभिचारात्। एतेन 'एतानि पदानि तात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणि, आकाङ्क्षादिमत्पदत्वात्, इत्यनुमानशरीरे उक्तयोग्यताया हेतुविशेषणेऽपि न सिद्धसाधनम्' इत्युक्तावपि न निस्तारः।

अथ तात्पर्यरूपाऽऽकाङ्क्षा हेतुप्रविष्टेति न व्यभिचारः। न च कर्मत्वादौ घटादिसंसर्गसिद्धावपि कर्मत्वादौ निरूपितत्वसंबन्धेन घटादिप्रकारकबोधो न जात इति वाच्यम्, कर्मत्वादिकं घटादिमत्, घटाकाङ्क्षादिमत्पदस्मारितत्वात् ,

१ अतः प्रभृति 'संभवात्' इति पर्यन्तः पूर्वपक्षः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यनुमानस्याऽपि संभवात्; इति चेत् । न, अनुमानाद् नियतबोधानुपपत्तेः । शाब्दात्मकविलक्षणानुमितौ व्युत्पत्तेरपि तन्त्रत्वाद् न दोष इति चेत् । न, व्युत्पत्तेः पदस्य शाब्दहेतुत्वगर्भत्वात् ।

किञ्च, एवं प्रत्यक्षादिना सिद्धावपि विनैवेच्छां शाब्दबोधानुदयः स्यात् । न च पक्षताया लिङ्गभेदभिन्नत्वेन तत्तल्लिङ्गकानुमितौ तदहेतुत्वादेव नानुपपत्तिरिति वाच्यम्; तथाप्यन्विता-ऽन्वयवारणाय तल्लिङ्गकतदनुमितौ तल्लिङ्गकतदनुमित्यभावस्य हेतुत्वापेक्षया घटपदजन्यशाब्दबोधे घटपदजन्यशाब्दबोधस्यैव प्रतिबन्धकत्वे लाघवात्, अतिरिक्तशाब्दसिद्धेः । एवं पदजन्यविशिष्टवैशिष्ट्यबोधे पदजन्यविशेषणतावच्छेदकप्रकारकज्ञानहेतुत्वादिनापि तत्सिद्धिः ।

अपि च, घटात् पृथगित्यन्वये शाब्दसमानाकाराऽनुमितिर्दुर्घटा, पृथक्त्वपक्षकानुमितावतद्वतोऽभानापत्तेः, तद्वतः पक्षत्वे च तत्रैव पञ्चम्यर्थभानापत्तेः । वस्तुतः 'नानुमिनोमि, किन्तु शाब्दयामि' इति विषयताविशेषसिद्ध्या शाब्दस्यातिरेकः । न च शाब्दा-ऽनुमितिसामग्रीसमाहारे युगपदुभयोत्पत्तिवारणायैकसामग्र्याऽपरत्र प्रतिबन्धकत्वकल्पने गौरवम्; वह्न्यादेरशाब्दानुमितेः, अपरस्य शाब्दानुमितेश्चैकदोत्पत्तिवारणाय तवापि शाब्दानुमितेः शाब्देतरानुमितिप्रतिबन्धकत्वकल्पनावश्यकत्वात्; इत्यन्यत्र विस्तरः ॥ ७ ॥

निगमयन्नाह—

तस्माद्यथोदितात्सम्यगागमाख्यात्प्रमाणतः। हिंसादिभ्योऽशुभादीनि नियमोऽयं व्यवस्थितः ॥ ६३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मात्– उक्तोपपत्तेः, यथोदितात्– पृथक् प्रमाणत्वेन व्यवस्थापितात्, सम्यगागमाख्यात्– आप्तोक्तशब्दाभिधानात्, प्रमाणतः, हिंसादिभ्यः– हिंसा-ऽहिंसादिभ्यः, शुभादीनि– पाप-पुण्यादीनि, बहुवचनाद् दुःख-सुखादिसंग्रहः; अयं नियमः– नियतहेतु-हेतुमद्भावः, व्यवस्थितः– सिद्धः ॥ ८ ॥

एतदेव भावयन्नाह—

क्लिष्टाद्धिंसाद्यनुष्ठानात्प्राप्तिः क्लिष्टस्य कर्मणः। यथाऽपथ्यभुजो व्याधेरक्लिष्टस्य विपर्ययात्॥

क्लिष्टात्– संक्लेशबहुलात्, हिंसाद्यनुष्ठानात्, क्लिष्टस्य– ज्ञानावरणादिप्रकृतिकस्य, कर्मणः प्राप्तिर्भवति; यथा– अपथ्यभुजः– विरुद्धभोजिनो रोगिणः, व्याधेः– रोगस्य प्राप्तिः। तथा, विपर्ययात्– अक्लिष्टाऽहिंसाद्यनुष्ठानात्, अक्लिष्टस्य– सातवेदनीयादिशुभप्रकृतिकस्य कर्मणः, प्राप्तिर्भवति; यथा– पथ्यभोजिनो व्याधिविगमात् सुखस्य प्राप्तिरिति ॥ ९ ॥

आगमाद् नियममुक्त्वा स्वभावात् तं व्यवस्थापयितुमाह—

स्वभाव एष जीवस्य यत्तथापरिणामभाक्। बध्यते पुण्य-पापाभ्यां माध्यस्थ्यात्तु विमुच्यते॥१०॥

एष जीवस्य– चेतनस्य, स्वभावो यत् तथापरिणामभाक्– हिंसादिपरिणतः, पुण्य-पापाभ्यां बध्यते; माध्यस्थ्यात्तु– वैराग्यात्तु, विमुच्यते– क्षीणकर्मा भवति। इत्थं चैतदप्यवश्यमङ्गीकर्तव्यम्, अन्यथा 'दण्डादेरेव घटादिजनकत्वम्, न वेमादेः' इति कुतः ?' इति प्रश्ने किमुत्तरमभिधानीयमायुष्मता ?। न च प्रश्नस्यैवानुपपत्तिः, 'पर्वते वह्निः कुतः ?' इत्यत्रेव ज्ञापकहेतु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिज्ञासया तदुपपत्तेः । न चैवं स्वभावेऽपि प्रश्नापत्तिः, तत्र व्याघातेन शङ्काया एवाऽनुदयादिति ॥ १० ॥

उक्तमेवाऽङ्गीकारयति—

सुदूरमपि गत्वेह विहितासूपपत्तिषु । कः स्वभावागमावन्ते शरणं न प्रपद्यते ? ॥११॥

इह– शास्त्रे, सुदूरमपि गत्वा– बहून्यपि प्रमाणानि परिगृह्य, उपपत्तिषु– सूक्ष्मयुक्तिषु, विहितासु– प्रकटीकृतासु, को वादी, अन्ते– बाधकतर्कोपस्थितौ, स्वभावा-ऽऽगमौ शरणं न प्रपद्यते ?– स्वपक्षसाधनार्थं बलवत्त्वेन नाङ्गीकुरुते ?– सर्व एव तथा प्रपद्यत इत्यर्थः । बौद्धेनाऽहेतुकस्य कार्यस्य स्वभावेन कादाचित्कत्वसमर्थनात्, मीमांसकेन च यागीयहिंसायामधर्मजनकत्वाभावे 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादिवेदवाक्यस्यैव प्रमाणत्वेनाऽऽश्रयणादिति ॥ ११ ॥

परः पर्यनुयुङ्क्ते—

प्रतिपक्षस्वभावेन प्रतिपक्षागमेन च । बाधितत्वात्कथं ह्येतौ शरणं युक्तिवादिनाम् ? ॥१२॥

प्रतिपक्षस्वभावेन– उक्तविपरीतस्वभावेन, प्रतिपक्षागमेन– उक्तविपरीतागमेन च बाधितत्वात्, हि– निश्चितम्, एतौ– उक्तस्वभावा-ऽऽगमौ, युक्तिवादिनां– युक्तिप्रधानवादिनाम्, न तु श्रद्धामात्रवताम्; कथं शरणम् ?– कथमर्थसिद्धिक्षमौ ?– न कथञ्चिदित्यर्थः ॥ १२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाधत्ते—

प्रतीत्या बाध्यते यो यत्स्वभावो न स युज्यते। वस्तुनः कल्प्यमानोऽपि वह्न्यादेः शीततादिवत्॥

यद्– यस्मात् कारणात्, यः स्वभावः, प्रतीत्या– प्रमाणेन, बाध्यते; स कल्प्यमानोऽपि– तत्स्वभावत्वेन वह्न्यादेः शीततादिवज्जात्याऽऽपाद्यमानोऽपि, वस्तुनः स्वभावो न युज्यते– न सत्तर्कविषयो भवति। तथाच 'वह्न्यादेर्यद्युष्णत्वादिस्वभावः स्यात्, शीतत्वाद्यपि स्यात्' इतिवत् 'हिंसादेर्यद्यधर्मजनकत्वादिस्वभावः स्यात्, धर्मजनकत्वाद्यपि स्यात्' इति न बाधकमिति भावः॥ १३॥

पर आह—

वह्नेः शीतत्वमस्त्येव, तत्कार्यं किं न दृश्यते?। दृश्यते हि हिमासन्ने, कथमित्थं स्वभावतः।१४।

वह्नेः शीतत्वमस्त्येव– स्वाभाविकमेव मृगतृष्णिकादिवत्। तत्राह– यदि भ्रमादुपलभ्यमानमपि शीतत्वं वह्निस्वभावः, तदा तत्कार्यं– तत्सङ्गेन रोमाञ्चाविर्भावादि, किं न दृश्यते?। पर आह– हि– निश्चितम्, हिमासन्ने वह्नौ, शीतकार्यं रोमाञ्चादि दृश्यते। तत्राचार्य आह– इत्थं कथम्?– 'हिमासन्न एव वह्निः शीतकार्यं जनयति, नान्यदा' इति कथम्?। पर आह– स्वभावतः, यथा दण्डादेश्चक्रादिसंयुक्तस्यैव कार्यजनकत्वस्वभावः, तथा वह्नेर्हिमासन्नस्यैव रोमाञ्चजनकत्वस्वभाव इत्यर्थः॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव दृष्टान्तेन द्रढयति-

हिमस्यापि स्वभावोऽयं नियमाद्वह्निसंनिधौ। करोति दाहमित्येवं वह्न्यादेः शीतता न किम्?॥

हिमस्याऽप्ययं स्वभावो यद् नियमात्- अवश्यं, वह्निसंनिधौ- वह्निसमीप एव, दाहं करोति, सामीप्य एवाऽयस्कान्तवत्, नागदमनीवद् वा कार्यकारित्वात्। इति हेतोः, एवम्- हिमस्य दाहजनकत्ववत्, वह्न्यादेः शीतता न किं? किं न स्वभावः? ॥ १५ ॥

अत्रोत्तरमाह-

व्यवस्थाऽभावतो ह्येवं या त्वद्बुद्धिरिहेदृशी। सा लोष्टादस्य यत्कार्यं तत्त्वत्तस्तत्स्वभावतः॥

एवम्- उक्तरीत्या, व्यवस्थाऽभावतः- सम्यग्नियामकाभावात्, हि- निश्चितम्, या इह विचारे, ईदृशी- स्वभावान्यथात्वप्रकल्पनात्मिका, त्वद्बुद्धिः, सा लोष्टात्- पाषाणात्, त्वत्समीपस्थे तत्र त्वत्स्वभावसंक्रमात्। तथा, अस्य-- लोष्टस्य, यत्कार्यम्- अभिघातादिकम्, तत्, त्वत्तः सकाशात्, लोष्टसमीपस्थस्य तव तत्स्वभावतः-- लोष्टस्वभावात् ॥ १६ ॥

ततः किम्?, इत्याह--

एवं सुबुद्धिशून्यत्वं भवतोऽपि प्रसज्यते। अस्तु चेत्को विवादो नो बुद्धिशून्येन सर्वथा॥१७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवम्-- लोष्टस्वभावत्वे, भवतोऽपि लोष्टवत् सुबुद्धिशून्यत्वम्-- सम्यग्बुद्धिरहितत्वम्, प्रसज्यते; अपि ना लोष्टस्याऽपि बुद्धियुक्तत्वं स्यादिति प्रागुक्तं स्मार्यते। इष्टापत्तावाह- अस्तु- न्यायानुगतं तथास्वभावत्वम्, इति चेत्। तदा सर्वथा बुद्धिशून्येन भवता सह, नः- अस्माकम्, को विवादः ?। एवं चावश्यक्लृप्तनियतपूर्ववर्तिनो हिमादेरेव रोमाञ्चादिकार्यसंभवे तत्सहभूतस्य वह्नेरन्यथासिद्धत्वाद् न तज्जनकत्वम्, न वा तदनुरोधेन शीतस्वभावत्वमिति। प्रकृतेऽप्येवं व्यवस्था भावनीया। अथैवं कारणत्वस्य स्वाभाविकत्वे नीलादिवत् साधारणं स्यादिति चेत्। स्यादेव, सर्वैस्तत्त्वेन प्रतीयमानत्वरूपमन्यग्रहानधीनग्रहविषयत्वरूपमपि तद्धेतुशक्तावस्त्येव, व्यञ्जकस्वभावे त्वन्यघटितत्वादेव नास्ति। न च परापेक्षत्वादलीकत्वापत्तिः, तथानियमाभावात्। अभ्यधिष्महि च भाषारहस्ये-

"ते होंति परावेक्खा वंजयमुहदंसिणो त्ति ण य तुच्छा। दिट्ठमिणं वेचित्तं सराव-कप्पूरगंधाणं[1],[2] ॥ १ ॥" इति। अधिकं तद्विवरणादवसेयम् ॥ १७ ॥

एवं प्रतिपक्षस्वभावो निराकृतः। ततः प्रतिपक्षाऽऽगमनिराकरणे प्राप्तेऽप्यागमशरणार्थं प्रसङ्गाद् वार्तान्तरमुत्थापयति—

अन्यस्त्वाहेह सिद्धेऽपि हिंसादिभ्योऽशुभादिके। शुभादेरेव सौख्यादि केन मानेन गम्यते ?१८

---

१ ते भवन्ति परापेक्षा व्यञ्जकमुखदर्शिन इति न च तुच्छाः। दृष्टमिदं वैचित्र्यं शराव-कर्पूरगन्धयोः ॥ १ ॥ २ भाषारहस्ये गाथेयं ३०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यस्तु वादी, आह– इह– न्याये लोके च, हिंसादिभ्य एवाऽशुभादिके सिद्धेऽपि, शुभादेरेव– पुण्यकर्मादेरेव, सौख्यादि भवति, न पापादेः, इति केन मानेन गम्यते ? ॥ १८ ॥

अत्र केषांचित् समाधानवार्तामाह—

अत्रापि ब्रुवते केचित् सर्वथा युक्तिवादिनः। प्रतीतिगर्भया युक्त्या किलैतदवसीयते॥१९॥

अत्रापि– उक्तपूर्वपक्षेऽपि, केचित् सर्वथा युक्तिवादिनः– आगमनिरपेक्षयुक्तिप्रणयिनः, ब्रुवते । किं ब्रुवते ?, इत्याह– प्रतीतिगर्भया– अनुभवसहकृतया, युक्त्या– तर्केण, 'किल' इति सत्ये, एतत्– प्राक् पर्यनुयुक्तम्, अवसीयते– निश्चीयते ॥१९॥

तन्मतमेवाह—

तयाहुर्नाशुभात्सौख्यं तद्बाहुल्यप्रसङ्गतः। बहवः पापकर्माणो विरलाः शुभकारिणः॥२०॥

ते वादिन आहुर्यत्– अशुभात्– पापकर्मणः, सौख्यं न भवति । कुतः ?, इत्याह– तद्बाहुल्यप्रसङ्गतः– सुखभूयस्त्वप्रसङ्गात् । इदमपि कुतः ?, इत्याह– पापकर्माणो हिंसादिकारिणः, बहवो व्याधादयः, शुभकारिणः– हिंसादिनिवृत्ताः साधुप्रभृतयः, विरलाः– स्तोकाः । एवं च सुखं यदि पापजन्यं स्यात्, यावत्पापकर्तृवृत्ति स्यात्; दुःखं च यदि पुण्यजन्यं स्यात्, पुण्याऽसामानाधिकरणं न स्यात्, इति तर्कशरीरं बोध्यम् ॥ २० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्राऽऽपाद्यविपर्ययप्रदर्शनेन शुद्धत्वमाह—

न चैतद् दृश्यते लोके दुःखबाहुल्यदर्शनात्। शुभात्सौख्यं ततः सिद्धमतोऽन्यच्चाप्यतोऽन्यतः॥

न चैतत्-- आपाद्यमानम् , लोके-- जगति, दृश्यते । कुतः ?, इत्याह– दुःखबाहुल्यदर्शनात्– दुःखस्य पुण्याऽसमानाधिकरणत्वदर्शनात् । इदमुपलक्षणं सुखे यावत्पापकर्तृवृत्तित्वाभावस्य। ततः शुभात्– पुण्यात् , सौख्यम् ; अतः– सौख्यात् , अन्यद् दुःखं चापि, अतः–पुण्यात्, अन्यतः-- पापात् , सिद्धम् ॥ २१ ॥

नेदं स्वतन्त्रसाधनम् , किन्त्वापाततः प्रसङ्गाऽऽपादनम् , तच्च न साधकम् , इत्यन्येषां वार्तान्तरमाह—

अन्ये पुनरिदं श्राद्धा ब्रुवत आगमेन वै। शुभादेरेव सौख्यादि गम्यते नान्यतः क्वचित्॥२२॥

अन्ये पुनः श्राद्धाः– आगमे श्रद्धावन्तः, इदं– वक्ष्यमाणम् , ब्रुवते । किम् ?, इत्याह– वै– निश्चितम् , शुभादेरेव– पुण्यादेरेव, सौख्यादि फलम् , इत्यागमेन गम्यते ; क्वचित्– कुत्रापि, अन्यतः-- अन्येन मानेन, न गम्यते ॥ २२ ॥

कुतः ?, इत्याह—

अतीन्द्रियेषु भावेषु प्राय एवंविधेषु यत् । छद्मस्थस्याविसंवादि मानमन्यद् न विद्यते॥२३॥

प्रायः– बाहुल्येन, एवंविधेषु– उक्तजातीयेषु, अतीन्द्रियेषु– ऐन्द्रियकक्षयोपशमाऽग्राह्येषु, भावेषु, यत्– यस्मात् कारणात् ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छद्मस्थस्य– अक्षीणघातिकर्मणः, अविसंवादि– अप्रामाण्यशङ्कादिविरहितम्, अन्यत्– शब्दातिरिक्तम्, मानं– प्रमाणं, न विद्यते। प्रातिभादिना योगिभिस्तद्ग्रहणात् प्रायोग्रहणम्। अत्र च यद्यप्यतीन्द्रियार्थे पूर्वमागमस्य प्रमाणान्तरानवगतवस्तुप्रतिपादकत्वेनाहेतुवादत्वम्, तथाप्यग्रे तदुपजीव्य प्रमाणप्रवृत्तौ हेतुवादत्वेऽपि न व्यवस्थानुपपत्तिः, आद्यदशापेक्षयैव व्यवस्थाभिधानात्। अतो यदन्यत्रोक्तम्– 'आगमश्चोपपत्तिश्च' इत्यादि, तद् नानेन सह विरुध्यते, अपूर्वत्वं चादृष्टस्योपपद्यत इति ध्येयम् ॥ २३ ॥

उक्ततर्के बाधकमुक्त्वा प्रकृतोपपत्तिमाह—

यच्चोक्तं दुःखबाहुल्यदर्शनं तन्न साधकम्। क्वचित्तथोपलम्भेऽपि सर्वत्रादर्शनादिति ॥२४॥

यच्च दुःखबाहुल्यदर्शनमुक्तं तर्कघटकत्वेन, तत् साधकम्– आपादकमपि न। कुतः?, इत्याह– क्वचिद् भरतादौ, तथोपलम्भेऽपि– दुःखबाहुल्यदर्शनेऽपि, सर्वत्र महाविदेहादौ, अदर्शनात्– दुःखबाहुल्यानुपलम्भात्। इति हेतुसमाप्त्यर्थः॥२४॥

सर्वत्र दर्शनं यस्य तद्वाक्यात्किं न साधनम्?। साधनं तद्भवत्येवमागमात्तु न भिद्यते॥२५॥

अथ यस्य सर्वत्र– सर्वक्षेत्रेषु, दर्शनं– दुःखबाहुल्यज्ञानम्, तद्वाक्याद् दुःखबाहुल्यं ज्ञात्वा साधनम्– उक्तप्रसङ्गसाधनम्, किं न भवेत्, आपाद्यव्यतिरेकनिश्चयसाम्राज्यात्?; इति चेत्। तत् साधनं भवत्येव, तु– पुनः, एवम्– उक्तप्रकारेण,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आगमाद् न भिद्यते, श्रुतानुसारिमतेः श्रुतान्तर्भूतत्वात् । अत एव भव्या-ऽभव्यादिभावानां पूर्वम्, "तत्थ य अहेउवाओ भविया-ऽभवियादओ भावा" इति गाथाप्रतीकेनाऽहेतुवादविषयत्वमुक्त्वाऽपि

" भविओ सम्मदंसण-नाण-चरित्त-पडिवत्तिसंपण्णो । णियमा दुक्खंतकडो त्ति लक्खणं हेउवायस्स ॥ १ ॥ "

इति गाथयाऽनन्तरमागमोपगृहीतहेतुप्रवृत्त्या हेतुवादविषयत्वमुक्तं भगवता सम्मतिकृता, इत्यवधेयम् ॥ २५ ॥

नन्वागमेनापि कथमयं नियमो बोधनीयः, पापादपि सुखदर्शनेन व्यभिचारनिश्चयात् ?, इत्यत आह–

अशुभादप्यनुष्ठानात्सौख्यप्राप्तिश्च या क्वचित् । फलं विपाकविरसा सा तथाविधकर्मणः२६॥

अशुभादप्यनुष्ठानात्– क्षुद्रदेवताविशेषोद्देशेन भूतवधाद्याचारादपि, या क्वचित् सौख्यप्राप्तिः पुत्रप्राप्त्यादिजन्या, सा विपाकविरसा– आयत्यहितानुबन्धिनी, तथाविधकर्मणः– प्राचीनपापानुबन्धिपुण्यस्य, फलम् । न चैवं तत्कर्माऽनपेक्षा स्यात्, पापजनकव्यापारमपेक्ष्यैव तस्योद्देश्यफलजनकत्वात्, तद्विपाकजनकतया तदपेक्षणात् । अत एव 'क्वचित्' इत्यनेन व्यभिचारसूचनात् तत्कर्मणस्तत्फलजनकत्वमपास्तम् । न चैहिकतत्तत्फलोद्देशेन तत्तत्कर्मविधानादङ्गादिवैकल्यप्रयुक्तो व्यभिचार इति न दोष इति वाच्यम्; साङ्गादपि पुत्रेष्ट्यादेः क्वचित् पुत्राद्यनुत्पाददर्शनात् । एतेन 'प्रतिबन्धकादृष्टध्वंस एव पुत्रेष्ट्यादि-

---

१ तत्र चाहेतुवादो भव्या-ऽभव्यादयो भावाः । २ सम्मतिसूत्रे गाथा १४० ।

३ भव्यः सम्यग्दर्शन-ज्ञान-चारित्र-प्रतिपत्तिसंपन्नः । नियमात् कृतदुःखान्त इति लक्षणं हेतुवादस्य ॥ १ ॥ ४ सम्मतिसूत्रे गाथा १४१ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

फलम्, प्रतिबन्धकाभावसहकृतदृष्टकारणसमाजाच्च पुत्राद्युत्पत्तिरिति न दोषः' इति निरस्तम्; प्रतिकूलकर्माभाववदनुकूलकर्मणोऽप्यवश्यमपेक्षणात्, तद्विपाकार्थमेव तत्कर्मान्यथासिद्धेः ॥ २६ ॥

इदमेव दृष्टान्तेन द्रढयति—

ब्रह्महत्यानिदेशानुष्ठानाद् ग्रामादिलाभवत् । न पुनस्तत एवैतदागमादेव गम्यते ॥२७॥

ब्रह्महत्याया निदेशः– 'त्वं ब्राह्मणं व्यापादय, ततोऽहं तव ग्रामादि दास्यामि' इति राजाऽऽज्ञा, ततोऽनुष्ठानम्– ब्रह्महत्याकरणम्, ततो ग्रामादिलाभवत्– स ग्रामादिलाभो यथा प्राचीनपापानुबन्धिपुण्यादेव, न पुनस्तत एव– ब्रह्महत्याया एव; तथा प्रकृतमपीति भावः । ननु ब्रह्महत्यायास्तत्फलबोधको न विधिः, इतरत्र तु तादृशविधिश्रवणाद् वैषम्यम्, इत्यत आह– एतत्– उपपादितम्, आगमादेव गम्यते– आगम एव हि हिंसासामान्ये दुःखजनकत्वं बोधयति, तत् कथं स एव हिंसाविशेषस्य सुखजनकत्वं बोधयेत्? इति भावः । अधिकमग्रे विवेचयिष्यामः । इत्थं चैतदवश्यमुपेयम्, अन्यथा श्रोत्रियेणापि म्लेच्छादिकृतकर्मविशेषात् फलविशेषदर्शनात् किं तत्र समाधानं विधेयम्? ॥ २७ ॥

नन्वागमोऽपि प्रतिपक्षागमबाधित एवेत्युक्तमेव, इत्यतस्तेषां निर्बलत्वेनाऽप्रतिपक्षत्वमवसरसंगत्याह—

प्रतिपक्षागमानां च दृष्टेष्टाभ्यां विरोधतः । तथाऽनाप्तप्रणीतत्वादागमत्वं न युज्यते ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपक्षागमानां– जैनातिरिक्तदर्शनानाम्, दृष्टे-ष्टाभ्यां विरोधतः– अबाधितप्रत्यक्षादिस्वाभ्युपगमविरुद्धार्थाभिधायकत्वात्, 'तथा' इति हेत्वन्तरसमुच्चये, अनाप्तप्रणीतत्वात्– यथार्थवाक्यार्थशून्यवक्तृकत्वात्, आगमत्वं– प्रमाणशब्दत्वम्, न युज्यते ॥ २८ ॥

अत्रोभयहेत्वभिधानेऽपि द्वितीयहेतुग्रहेऽपि प्रथम एव हेतुः, इत्युपजीव्यत्वात् तस्यैवाश्रयणं युक्तमित्युपदर्शयन्, तदुपदर्शनमेव प्रतिजानीते—

दृष्टे-ष्टाभ्यां विरोधाच्च तेषां नाप्तप्रणीतता। नियमाद् गम्यते यस्मात्तदसावेव दर्श्यते ॥२९॥

तेषां– विप्रतिपन्नागमानाम्, दृष्टे-ष्टाभ्यां विरोधाच्च नाऽऽप्तप्रणीतता, नाप्तपदस्य नाकादिमध्यनिवेशाश्रयणादनाप्तप्रणीततेत्यर्थः; 'आप्तप्रणीतता' इत्युत्तरं नञो योजनात् तत्र क्रियान्वये तात्पर्यादाप्तप्रणीतत्वाभाव इति वाऽर्थः; नियमात्– व्याप्तिबलात्, गम्यते– अनुमीयते यस्मात्, तत्– तस्माद्धेतोः, असावेव– दृष्टे-ष्टाभ्यां विरोध एव, प्रदर्श्यते– शब्देन श्रोतॄणां बोध्यते ॥ २९ ॥

तत्रादौ मण्डलतन्त्रादिवादिमते तं प्रदर्शयति—

अगम्यगमनादीनां धर्मसाधनता क्वचित्। उक्ता लोकप्रसिद्धेन प्रत्यक्षेण विरुध्यते ॥३०॥

अगम्यगमनादीनां लोक-शास्त्रनिषिद्धभगिन्यादिगमन-मांसभक्षणप्रभृतीनाम्, क्वचित्– मण्डलतन्त्रादिग्रन्थे, धर्मसाधनता उक्ता, सा लोकप्रसिद्धेन– अविद्वदङ्गनादिसिद्धेन 'भगिन्यादिगमनादिकं न धर्मजनकम्' इत्याकारेण श्रुतनिश्रितादिमति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानरूपेण प्रत्यक्षेण बाध्यते । न चोक्तागमस्यैव किं नैतद् बाधकत्वम् ?, इति वाच्यम्; बहुसिद्धत्वेनाऽस्यैव बलवत्त्वात् । न च 'शतमप्यन्धानां न पश्यति' इति न्यायाद् बहुसिद्धत्वमप्रयोजकम्, उपजीव्यजातीयत्वात्, अनुकूलतर्कसहकृतत्वाच्चेत्यवसेयम् । उक्तो लोकदाष्टिविरोधः ॥ ३० ॥

अथेष्टविरोधमाह—

स्वधर्मोत्कर्षादेव तथा मुक्तिरपीष्यते । हेत्वभावेन तद्भावो-नित्य इष्टेन बाध्यते ॥ ३१ ॥

तथा, तैर्वादिभिः स्वधर्मोत्कर्षादेव– स्वाभिमताऽगम्यगमनादिधर्मप्रकर्षादेव, मुक्तिरपीष्यते, तथा च हेत्वभावेन– सर्वागम्यगमनादीनां दुःशकतया तदुत्कर्षरूपचरमहेत्वसंभवेन, तद्भावः– मुक्त्युत्पादः, नित्यः– हेतुनिरपेक्षः, स्यात्, नञ्प्रश्लेषेण अनित्यः– अभवनशीलः स्यादिति वा; स चेष्टेन– उक्तरीत्या सहेतुकत्वाभ्युपगमेन, बाध्यते । 'तद्भावः–मुक्तिसद्भावः, नित्यः स्यात्, हेत्वभावेन मुक्तानां मुक्तताक्षतेः, तथा चेष्टबाधः' इति ग्रन्थकृदाशयस्तु[1] हिंसाध्यवसायविशेषरूपहिंसोत्कर्षेण प्राक्कर्मक्षयसंभवेऽप्यग्रे तदभावेन क्षणिकत्वद्वाराऽसंभवादुपपाद्यः ॥ ३१ ॥

पराभिप्रायमाह—

माध्यस्थ्यमेव तद्धेतुरगम्यगमनादिना । साध्यते तत्परं येन तेन दोषो न कश्चन ॥ ३२ ॥

१ स्वोपज्ञटीकायां स्थित इति शेषः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माध्यस्थ्यमेव– अरक्त-द्विष्टत्वमेव, तद्धेतुः– मुक्तिहेतुः, तत्परं– प्रकृष्टम्, क्लेशवासनयाऽक्षोभ्यमिति यावत्, येन कारणेन, अगम्यगमनादिना, साध्यते, गम्यागमनादिषु तुल्यतया प्रवृत्तेः; तेन कारणेन, कश्चन न दोषः । माध्यस्थ्योत्कर्षेण मुक्तेः, तत्साधनतया चागम्यगमनाद्युपयोगस्य समर्थनादिति भावः ॥ ३२ ॥

अत्रोत्तरम्—

एतदप्युक्तिमात्रं यदगम्यगमनादिषु । तथाप्रवृत्तितो युक्त्या माध्यस्थ्यं नोपपद्यते ॥३३॥

एतदपि- अनन्तरोदितमपि, उक्तिमात्रम्- युक्तिशून्यम्, यत्- यस्मात् कारणात्, अगम्यगमनादिषु तथाप्रवृत्तितः अगम्यगमनादितुल्यप्रवृत्तेः, युक्त्या विचार्यमाणम्, माध्यस्थ्यं नोपपद्यते ॥ ३३ ॥

कुतस्तर्ह्युपपद्यते ?, इत्याह—

अप्रवृत्त्यैव सर्वत्र यथासामर्थ्यभावतः । विशुद्धभावनाभ्यासात्तन्माध्यस्थ्यं परं यतः ॥३४॥

सर्वत्र– गम्यागमनादौ, यथासामर्थ्यभावतः– स्वपरिहारसामर्थ्यमनतिक्रम्य, अप्रवृत्त्यैव– तन्निबन्धनविषयद्वेषात् तदनिच्छया, निर्ममत्वमासाद्य विशुद्धानां मैत्र्याद्युपबृंहितानां भावनानामनित्यत्वाद्यनुप्रेक्षाणामभ्यासाद् दृढमानसोत्साहात्, परमनिर्ममत्वप्राप्तेः, विषयद्वेषस्यापि वह्नेर्दाह्यं विनाश्याऽनुविनाशवद् विषयेच्छां विनाश्य तत्कालं विनाशात्; तत्– प्रागुक्तम्, परम्– उत्कृष्टम्, माध्यस्थ्यं भवति यतः, अतोऽन्यथा नोपपद्यत इति भावः । तदिदमुक्तं वशिष्ठेनापि—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः । मैत्र्यादिवासना राम! गृहाणाऽमलवासनाः ॥ १ ॥"

तत्र वासनालक्षणमिदम्—

"दृढभावनया त्यक्तपूर्वापरविचारणम् । यदादानं पदार्थस्य वासना सा प्रकीर्तिता ॥ २ ॥"

सा च द्विविधा- मलिना, शुद्धा च । तत्र शुद्धा योगशास्त्रसंस्कारप्राबल्यात् तत्त्वज्ञानसाधनत्वेनैकरूपाऽपि मैत्र्यादि-शब्दैर्विभक्ता । मलिना तु त्रिविधा- लोकवासना, शास्त्रवासना, देहवासना चेति । सर्वे जना यथा न निन्दन्ति तथैवाऽऽ-चरिष्यामि' इत्यशक्यार्थाभिनिवेशो लोकवासना । अस्याश्चाशक्यार्थत्व-पुमर्थानुपयोगित्वाभ्यां मालिनत्वम् । शास्त्रवासना त्रिविधा- पाठव्यसनम्, बहुशास्त्रव्यसनम्, अनुष्ठानव्यसनं चेति । मलिनत्वं चास्याः क्लेशावहत्व-पुमर्थानुपयोगित्व-दर्पहेतुत्वैः । देहवासना च त्रिविधा- आत्मत्वभ्रान्तिः, गुणाधानभ्रान्तिः, दोषापनयनभ्रान्तिश्च । गुणाधानं द्विविधम्- लौकिकं, शास्त्रीयं च । आद्यं सम्यक्शब्दादिविषयसंपादनम्, अन्त्यं गङ्गास्नानादिसंपादनम् । दोषापनयनमप्येवं द्विविधम्[1] । आद्यमौषधेन व्याध्याद्यपनयनम्, अन्त्यं स्नानादिना शौचाद्यपनयनम् । एतन्मालिन्यं चाऽप्रामाणिकत्वात्, अशक्यत्वात्, पुमर्थानुपयोगित्वात्, पुनर्जन्महेतुत्वाच्च । शुद्धवासनया चेयं मलिनवासना क्षीयते, तथाहि- सुखिषु मैत्रीं भावयतस्तदीयं सुखं मदीयमेवेति कृत्वा 'सर्वं सुखजातीयं मे भूयात्' इति चिन्तात्मिका रागवासना निवर्तते, दुःखिषु करुणां भावयतश्च वैर्यादिनिवृत्त्या द्वेषवासना

१ लौकिक-शास्त्रीयरूपभेदेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निवर्तते, तथा, पुण्यवत्सु मुदिताभावनात् पुण्याऽकारणानुशयनिवृत्तेस्तद्वासना निवर्तते, तथा, पापेषूपेक्षां भावयतस्तत्करणनिमित्तकानुशयनिवृत्तेस्तद्वासना निवर्तत इति। ततोऽशुक्लाऽकृष्ण-पुण्यप्रवृत्ति-चित्तप्रसादाभ्यां परं माध्यस्थ्यम्। इति पातञ्जलानां प्रक्रिया ॥ ३४ ॥

पराभिप्रायमाह–

यावदेवंविधं नैतत्प्रवृत्तिस्तावदेव या। साऽविशेषेण साध्वीति तस्योत्कर्षप्रसाधनात्॥३५॥

यावदेवंविधं– सर्वत्राऽप्रवृत्तिरूपम्, एतद्– माध्यस्थ्यम्, न भवति; तावदेव या प्रवृत्तिः, साऽविशेषेण– गम्याऽगम्यादितुल्यतयैव, साध्वी न्याय्या, तस्य– माध्यस्थ्यस्य, 'उत्कर्षप्रसाधनात्' इति हेतोर्गम्यगमनादौ प्रवृत्तिर्न्याय्येति निगर्वः॥३५॥

अत्रोत्तरमाह—

नाप्रवृत्तेरियं हेतुः कुतश्चिदनिवर्तनात्। सर्वत्र भावाविच्छेदादन्यथाऽगम्यसंस्थितिः॥३६॥

इयम्– अविशेषेण प्रवृत्तिः, अप्रवृत्तेर्हेतुर्न। कुतः?, इत्याह– कुतश्चित्– क्वाप्यर्थे, अनिवर्तनात्– निवृत्तिप्रयत्नाभावात्, यथालाभं सर्वत्रैव प्रवृत्तेः। इदमपि कुतः?, इत्याह– सर्वत्र विषये, भावाविच्छेदात्– इच्छानिवृत्त्यभावात्, अन्यथा– क्वचिदिच्छानिवृत्त्यङ्गीकारे, अगम्यसंस्थितिः– अगम्यव्यवस्था; यदितरस्मिन् प्रवृत्तिस्तस्यैवाऽगम्यत्वादिति भावः॥ ३६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदुपचयार्थमेवाह—

तच्चास्तु लोकशास्त्रोक्तं तत्रौदासीन्ययोगतः । संभाव्यते परं ह्येतद्भावशुद्धेर्महात्मनः॥३७॥

तच्च-- अगम्यम् , लोकशास्त्रोक्तं-- भगिन्याद्येव, अस्तु, याद्दच्छिककल्पनाया अप्रामाणिकत्वात् । तत्र– अगम्ये, औदासीन्ययोगतः– अरक्ता-ऽद्विष्टभावेन प्रवृत्तेः, महात्मनः– दृढप्रतिज्ञस्य, भावशुद्धेः-- एकान्तविहितानुष्ठानसंपत्तेः, हि-- निश्चितम् , परमेतद्– माध्यस्थ्यम्, संभाव्यते, देशविरतिपरिणामेनाऽनिकाचितस्य चारित्रमोहनीयस्याऽचिरादेव क्षयसंभवात् ।

स्यादेतत् , इच्छानिरोधाद् न तन्निवृत्तिः, किन्तु यथेच्छं प्रवृत्त्या सिद्धत्वज्ञानादेव । ततो योगार्थं यथेच्छं प्रवृत्तिरेवोचिता, का तत्र गम्या-ऽगम्यव्यवस्था ? । मैवम् , यावत्सुखसिद्धत्वधियं विना विशेषदर्शिनः सामान्येच्छाया अविच्छेदात् ; विशिष्य सिद्धत्वधियस्तु विशेषेच्छाया अनिवर्तकत्वात् ; अन्यथा प्रोषितस्याऽज्ञातकान्तामरणस्य तत्कान्तावलोकनेच्छाऽभावप्रसङ्गात् , असिद्धविषये इच्छाया अनिरोधाच्च । तस्मात् सामान्येच्छाविच्छेदः सिद्धत्वज्ञानकृतो नास्ति विरक्तानाम्, किन्तु शुभादृष्टकृत एव । तच्च शुभादृष्टं विषयाऽप्रवृत्त्यैव भवति, तत्प्रवृत्त्या तु तत्प्रतिकूलाऽदृष्टार्जनादुत्कटेच्छैव विषये जायते । तदुक्तं पतञ्जलिनापि-- "भोगाभ्यासमनुवर्धन्ते रागाः, कौशलं चेन्द्रियाणाम्" इति । गीतास्वप्युक्तम्—

१ 'महात्मनाम्' इति मूलपुस्तके पाठः । २ क. 'थेष्टं प्र' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवोपवर्धते ॥ १ ॥" इति ।

इत्थं चैतदवश्यमङ्गीकर्तव्यम्, पिपासाया इव विषयेच्छायाः क्लिष्टकर्मोदयजनितत्वेन तदुपशमेनैव तदुपशमात्। तदुपशमार्थमेव च पिपासोपशमार्थं जलपानस्येव मौनीन्द्रप्रवचनवचनामृतपानस्य न्याय्यत्वादिति । अधिकमध्यात्ममतपरीक्षायाम् ॥३७॥

॥ तदेवं मण्डलतन्त्राद्यागमो दूषितः ॥

अथ संसारमोचकागमेऽप्येतदतिदेशमाह—

संसारमोचकस्यापि हिंसा यद्धर्मसाधनम्। मुक्तिश्चास्ति ततस्तस्याऽप्येष दोषोऽनिवारितः३८

संसारमोचकस्यापि यद्— यस्मात् कारणात्, हिंसा धर्मसाधनम्, मुक्तिश्चास्ति 'अभ्युपगता' इति शेषः। ततः— तस्मात् कारणात्, तस्याऽप्येष पूर्वोक्तदोषोऽनिवारितः, हिंसाया धर्मसाधनताया लोकदृष्टविरुद्धत्वात्, तदुत्कर्षाभावेन मुक्त्यभावप्रसङ्गाच्च । स्यादेतत्, तृष्णानिमित्तैव हिंसा न धर्महेतुः, न तूपकारनिमित्ताऽपि, व्याधितस्याऽऽप्तवैद्येन दाहादिकरणात्; तथाच दुःखितानां दुःखविघाताय हिंसाभ्युपगमो न विरोत्स्यत इति। मैवम्, अविरतानां हतानां जीवानां मेत्याऽनन्तदुःखेष्वेव नियोजनात् । किञ्च, एवं सुखिनामपि पापवारणार्थं घातः स्यात्, तथाचाऽपूर्वकारुणिकस्य तव कुटुम्बघातोऽपि न्यायप्राप्तः । तस्माद् दुष्टोऽयमभिनिवेशः । दुःखकारणाऽधर्मविनाशेन धर्मे नियोजनादेव च कारुणिकत्वमुपपद्यते, इत्यार्हतमतं रमणीयम् ॥ ३८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोषानिवारितत्वमेवोक्तं भावयति—

मुक्तिः कर्मक्षयादेव जायते नान्यतः क्वचित्। जन्मादिरहिता यत्तत्स एवात्र निरूप्यते॥३९॥

मुक्तिः कर्मक्षयादेव- जन्महेतुपुण्या-ऽपुण्यविलयत एवाऽसाधारणहेतोः, नाऽन्यतः कचिद् दानादेः, अभय-सुपात्रदानादीनामपि व्यवहितहेतुत्वात्; जन्मादिरहिता- जन्म-मरणाद्यनाश्लिष्टा, यद्- यस्माद्धेतोः। तत्- तस्मात् कारणात्, स एव कर्मक्षय एव, अत्र प्रकृतस्थले, निरूप्यते ॥ ३९ ॥

किंहेतुकोऽयम्?, इति पर्यनुयुज्यते—

हिंसाद्युत्कर्षसाध्यो वा तद्विपर्ययजोऽपि वा। अन्यहेतुरहेतुर्वा स वै कर्मक्षयो ननु?॥४०॥

तथाहि- 'ननु' इत्याक्षेपे, वै- निश्चितम्, स कर्मक्षयो हिंसाद्युत्कर्षसाध्यो वा स्यात्- हिंसोत्तरदुःखापनयनोत्कर्षसाध्यो वा स्यात्, तद्विपर्ययसाध्यो वा- अहिंसाद्युत्कर्षसाध्यो वा स्यात्, अन्यहेतुः- एतदुभयातिरिक्तहेतुर्वा स्यात्, अहेतुर्वा स्यात्; इति चत्वारः पक्षाः ॥ ४० ॥

आद्य आह—

हिंसाद्युत्कर्षसाध्यत्वे तदभावे न तत्स्थितिः। कर्मक्षयास्थितौ च स्यान्मुक्तानां मुक्तताक्षतिः॥४१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हिंसाद्युत्कर्षसाध्यत्वे तदभावे– हिंसाद्युत्कर्षाभावे, न तत्स्थितिः– न कर्मक्षयस्थितिः, कर्मक्षयाऽस्थितौ च मुक्तानां मुक्तताक्षतिः स्यात् ॥ ४१ ॥

द्वितीय आह–

तद्विपर्ययसाध्यत्वे परसिद्धान्तसंस्थितिः । कर्मक्षयः सतां यस्मादहिंसादिप्रसाधनः ॥४२॥

तद्विपर्ययसाध्यत्वे–अहिंसाद्युत्कर्षसाध्यत्वे, परसिद्धान्तसंस्थितिः– अन्याभ्युपगमप्रसङ्गः, यतः सतां– साधूनाम्, कर्मक्षयोऽहिंसादिप्रसाधन[1] इष्टः ॥ ४२ ॥

तृतीय आह–

तदन्यहेतुसाध्यत्वे तत्स्वरूपमसंस्थितम् । अहेतुत्वे सदाभावोऽभावो वा स्यात्सदैव हि ॥४३॥

तदन्यहेतुसाध्यत्वे– उक्तोभयातिरिक्तसाध्यत्वे, तत्स्वरूपं– तदन्यहेतुस्वरूपम्, असंस्थितम्– अनिर्वचनबाधितं बाधकम् । चतुर्थ आह– अहेतुत्वे कर्मक्षयस्य, सदाभावः स्यात्, उत्पत्तिशीलत्वात्, हि– निश्चितम्, सदैवाऽभावो वा स्यात्, अनुत्पत्तिशीलत्वात् ॥ ४३ ॥

१ ख. ग. घ. च. 'प्रधान' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदत्र द्वितीयविकल्प एव न्याय्य इति दर्शयति—

मुक्तिः कर्मक्षयादिष्टा ज्ञानयोगफलं स च । अहिंसादि च तद्धेतुरिति न्यायः सतां मतः॥४४॥

मुक्तिः– परमानन्दप्राप्तिः, कर्मक्षयादिष्टा– कर्मक्षयजन्याऽभिमता, स च–कर्मक्षयः, ज्ञानयोगफलम्– रत्नत्रयसाम्राज्य-जन्यः, तद्धेतुः– तत्कारणं च, अहिंसादि– हिंसाविरतिपरिणामादि, इति– एषः, सतां जैनागमोपनिषद्वेदिनाम्, न्यायः– सन्मार्गः, मतः– इष्टः । तदेवं संसारमोचकाऽऽगमाऽसारता प्रतिपादिता ॥ ४४ ॥

अथ यज्वनामागमाऽसारतां तद्वदेव प्रदर्शयति—

एवं वेदविहितापि हिंसा पापाय तत्त्वतः । शास्त्रचोदितभावेऽपि वचनान्तरबाधनात् ॥४५॥

एवम्– संसारमोचकाभिमतहिंसावत्, वेदविहितापि "श्वेतं वायव्यमजमालभेत भूतिकामः" इत्यादिविधिनेष्टसाधनत्वेन बोधितापि, हिंसा, तत्त्वतः– युक्त्या विचार्यमाणा, पापाय भवति । विधिबोधितत्वे कथमेवं स्यात्?, इत्यत्राह– शास्त्रचोदितभावेऽपि– प्रकृतविधिबोधितेष्टसाधनताकत्वेऽपि, वचनान्तरबाधनात्– सामान्यतः प्रवृत्तेन निषेधविधिनाऽनिष्टसाधनत्वेन बोधनात् ॥ ४५ ॥

१ क. 'न्यं त' । २ उपनिषद्– रहस्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव भावयन्नाह—

न हिंस्यादिह भूतानि हिंसनं दोषकृद् मतम् । दाहवद्वैद्यके स्पष्टमुत्सर्गप्रतिषेधतः ॥४६॥

'न हिंस्यादिह' इत्यत्रस्थेहशब्दोऽन्यत्र योज्यः, तथा च 'न हिंस्याद् भूतानीह' इत्यर्थः । इदं च "न हिंस्यात् सर्वा[1]भूतानि" इति वेदवाक्यस्मारकम् । इह वाक्ये हिंसनं– राग-द्वेष-मोह-तृष्णादिनिबन्धनहिंसासामान्यम्, दोषकृत्– अनिष्टजनकम्, स्पष्टम्– असंदिग्धतया, मतम्– अभीष्टम् । किंवत् ?, इत्याह– वैद्यके दाहवत्– 'दाहो न कार्यः' इति वैद्यकनिषेधवाक्यनिषिद्धदाहवत् । कुतः ?, इत्याह– उत्सर्गप्रतिषेधतः– नञ्समभिव्याहारादनिष्टसाधनत्वे निरूढलाक्षणिकप्रकृतविध्यर्थस्य व्युत्पत्तिमहिम्ना निषेध्यतावच्छेदकावच्छेदेनैवाऽन्वयात् । एतेन 'नञर्थे लिङर्थान्वये कथं दोषकृत्त्वबोधः ?, प्रकृतनिषेधविधेः पापजनकत्वे निरूढलक्षणायां च दृष्टान्तानुपपत्तिः, इति प्रकृतविध्यर्थनिषेधस्य हिंसात्वसामानाधिकरण्येनाऽन्वयाद् नानुपपत्तिः' इति निरस्तम्; सामानाधिकरण्येनापि विधिशङ्काविरहेण सामान्यत एव निषेधान्वयस्वीकारात् ॥ ४६ ॥

ततः किम् ?, इत्याह—

ततो व्याधिनिवृत्त्यर्थं दाहः कार्यस्तु चोदिते । न ततोऽपि न दोषः स्यात्फलोद्देशेन चोदनात्॥४७॥

ततो 'दाहो न कार्यः' इत्यनेन सामान्यत एव दाहस्यानिष्टसाधनत्वसिद्धेः 'व्याधिनिवृत्त्यर्थं दाहः कार्यः' इति

---

[1] छान्दसत्वाद् दीर्घः, ख. ग. घ. च. 'सर्वभू' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चोदितेऽपि– विहितेऽपि, तुरप्यर्थः, न ततोऽपि– दाहात् फलोद्देशेन व्याधिनिवृत्त्यर्थं चोदनात्– विधानाद् हेतोः, न दोषः– तापलक्षणः स्यात्, किन्तु स्यादेव ॥ ४७ ॥

प्रकृते दार्ष्टान्तिकयोजनामाह—

एवं तत्फलभावेऽपि चोदनातोऽपि सर्वथा। ध्रुवमौत्सर्गिको दोषो जायते फलचोदनात् ॥४८॥

एवं चोदनातोऽपि– क्रत्वङ्गहिंसाविधेरपि, तत्फलभावेऽपि– तद्बोधितफलभावेऽपि, ध्रुवं– निश्चितम्, सर्वथाऽन्यहिंसातुल्यतयौत्सर्गिकः सामान्यनिषेधबोधितः, दोषः– पापलक्षणः, जायते, फलचोदनात्– फलोद्देशात्, तृष्णामूलकहिंसात्वेनैवाऽधर्मजनकत्वात् ।

ननु निषेधविधिनाऽनिष्टसाधनत्वमात्रबोधने ततो निवृत्त्यनुपपत्तिः, बलवदनिष्टसाधनत्वबोधने च व्याधिनिवृत्त्यर्थं दाहेऽपि प्रवृत्त्यनुपपत्तिः, इति विशेषनिषेधे सामान्यविधेस्तदितरपरत्ववद् विशेषविधौ सामान्यनिषेधस्यापि तदितरपरत्वमेव न्याय्यम्; अवश्यं चैतदभ्युपेयम्, कथमन्यथा तवापि[1] सामान्यत आधाकर्मिकादिग्रहणनिषेधेऽप्येसंस्तरणादिदशायां[2] तद्विधानम्? इति चेत्। न, आधाकर्मिकग्रहणा-ऽग्रहणयोः संयमपालनार्थमेकोद्देशेनैव विधानादुत्सर्गा-ऽपवादभावव्यवस्थितावपि, प्रकृतेऽहिंसा-यागयोरेकार्थत्वाभावेनोत्सर्गा-ऽपवादव्यवस्थाया एवाऽयोगात्; सामान्यनिषेधे संकोचस्याऽन्याय्यत्वात् । तदुक्तं

१ तव– आर्हतस्य । २ ग्लानाद्यनिर्वाहावस्थायाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तुतिकृता[1]–"नोत्सृष्टमन्यार्थमपोद्यते च[2]" इति । प्रवृत्तिस्तु तत्र मूढानां श्येनादाविव दोषादेव ।

अत एव सांख्या अपि सामान्यनिषेध-विशेषविधिबोधितानर्थहेतुकत्व-क्रत्वङ्गत्वयोरेकत्र समावेशसंभवाद् निषिद्धस्यापि विहितत्वस्य, विहितस्यापि निषिद्धत्वस्य च श्येनादिवदुपपत्तेः, श्येनादाविव ज्योतिष्टोमादौ रागद्वेषादिवशीकृतस्यैवाऽधिकाराज्ज्योतिष्टोमादीनां दुष्टत्वमेव प्रतिपन्नवन्तः । तथा महाभारते—

"जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते । अहिंसया हि भूतानां जपयज्ञः प्रवर्तते ॥ १ ॥" इति ।

मनुस्मृतावपि—

"जपेनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः । कुर्यादन्यद् न वा कुर्याद् मैत्रो ब्राह्मण उच्यते ॥ १ ॥"

इत्यहिंसायाः प्रशंसया हिंसाया दुष्टत्वमेवोक्तम् । तथोत्तरमीमांसायामप्युक्तम्—

"अन्धे तमसि मज्जामः पशुभिर्ये यजामहे । हिंसा नाम भवेद् धर्मो न भूतो न भविष्यति ॥ १ ॥" इति ।

तथा, व्यासेनाप्युक्तम्—

"ज्ञानपालीपरिक्षिप्ते ब्रह्मचर्यदयाम्भसि । स्नात्वा तु विमले तीर्थे पापपङ्कापहारिणि ॥ १ ॥
ध्यानाग्नौ जीवकुण्डस्थे दममारुतदीपिते । असत्कर्मसमित्क्षेपैरग्निहोत्रं कुरूत्तमम् ॥ २ ॥

---

१ हेमचन्द्रप्रभुणा । २ अन्ययोगव्यवच्छेदद्वात्रिंशिकायां श्लो० ११ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कषायपशुभिर्दुष्टैर्धर्म-कामा-ऽर्थनाशकैः । शममन्त्रहुतैर्यज्ञं विधेहि विहितं बुधैः ॥ ३ ॥
प्राणिघातात्तु यो धर्ममीहते मूढमानसः । स वाञ्छति सुधावृष्टिं कृष्णाहिमुखकोटरात् ॥ ४ ॥" इत्यादि ।

ततो 'दुष्टमग्निष्टोमादि कर्माऽधिकारिणापि दोषासहिष्णुना त्याज्यम्, अन्तःकरणशुद्धेरीदृशेन गायत्रीजपादिनैव बाढमुपपत्तेः' इत्याहुः ।

अत्र भाट्टाः— 'न क्रत्वर्था हिंसाऽनर्थहेतुः, विधिस्पृष्टे निषेधानवकाशात्, तथाहि— विधिना बलवदिच्छाविषयसाधनताबोधरूपां प्रवर्तनां कुर्वताऽनर्थसाधने तदनुपपत्तेः, स्वविषयस्य प्रवर्तनागोचरस्याऽनर्थसाधनत्वाभावोऽप्यर्थादाक्षिप्यते, तेन विधिविषयस्य नानर्थहेतुत्वं युज्यते । न हि क्रत्वर्थत्वं साक्षाद्विध्यर्थः, येन विरोधो न स्यात्, किन्तु प्रवर्तनयैव; प्रवर्तना तु पुरुषार्थमेव विषयीकुर्वती क्वचित् क्रतुमपि तथाभावमापन्नं विषयीकरोति, इत्यन्यदेतत् । पुरुषप्रवृत्तिश्च बलवदिच्छोपधानदशायां जायमाना न भाव्यस्यार्थहेतुतामाक्षिपति, किन्तु यथाप्राप्तमेवाऽवलम्बते, बलवदिच्छाविषये स्वत एव प्रवृत्तेः; स्वर्गादौ विध्यनपेक्षणात् । अत एव विहितश्येनफलस्याऽपि शत्रुवधरूपाऽभिचारस्यानर्थहेतुत्वमुपपद्यत एव, फलस्य विधिजन्यप्रवृत्तिविषयत्वाभावात्, विधिजन्यप्रवृत्तिविषयं तु धात्वर्थं करणं प्रवर्तनाऽऽगाहते । सा च नाऽनर्थहेतुं विषयीकरोति । इति विशेषविधिबाधितं सामान्यनिषेधवाक्यं राग-द्वेषादिमूलाऽक्रत्वर्थहिंसाविषयम् । तेन श्येना-ऽग्निष्टोमयोर्वैषम्यादुपपन्नमदुष्टत्वम् । ज्योतिष्टोमादेर्विधिस्पृष्टस्यापि निषेधविषयत्वे षोडशिग्रहणस्याप्यनर्थहेतुत्वापत्तिः,'नातिरात्रे षोडशिनं गृह्णाति' इति निषेधात् । तस्मादु न किञ्चिदेतत्' इत्याहुः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राभाकरास्तु–'फलसाधने रागत एव प्रवृत्तिसिद्धेर्न नियोगस्य प्रवर्तकत्वम्, तेन श्येनस्य रागजन्यप्रवृत्तिविषयत्वेन विधेरौदासीन्याद् न तस्याऽनर्थहेतुत्वं विधिना प्रतिक्षिप्यते। अग्नीषोमीयहिंसायां तु क्रत्वङ्गभूतायां फलसाधनत्वाभावेन रागाभावाद् विधिरेव प्रवर्तकः, स च स्वविषयस्याऽनर्थहेतुतां प्रतिक्षिपति, इति प्रधानभूता हिंसाऽनर्थं जनयति, न क्रत्वर्था, इति न हिंसामिश्रितत्वेन दुष्टत्वमग्नीषोमादेः' इत्याहुः।

इदं च मतद्वयं फलतस्तुल्यमेव। इयांस्तु विशेषो यत्– प्राभाकरमते "[1]चोदनालक्षणोऽर्थो धर्मः" इत्यत्राऽर्थपदव्यावर्त्यत्वेनाधर्मत्वं श्येनादेः। भाट्टमते तु श्येनफलस्यैवाऽभिचारस्याऽनर्थहेतुत्वादधर्मत्वम्, श्येनस्य तु विहितस्य समीहितसाधनस्य धर्मत्वमेव; अर्थपदव्यावर्त्यं तु कलिञ्जभक्षणादेर्निषिद्धस्यैव, इति फलतोऽनर्थहेतुत्वेन तु शिष्टानां श्येनादौ न धर्मत्वेन व्यवहार इति।

तत्र भाट्टमतेऽभिचारः शत्रुवधानुकूलव्यापारः पापरूप एव, इति कथं श्येनस्य नानर्थहेतुत्वम्? इति विधिविषयेऽपि निषेधावकाश एवाऽऽयातः, अनर्थप्रयोजकत्वस्यैव लाघवेन शिष्टप्रयोगानुरोधेन च; निषेधविध्यर्थत्वे तु सुतरां तस्मादिष्टसाधनत्वमात्रमेव विध्यर्थः। फले उत्कटेच्छाविरहविशिष्टदुःखजनकत्वज्ञानमेव च प्रवृत्तिप्रतिबन्धकम्, इति श्येन इव क्रत्वङ्गहिंसायामपि सामान्यनिषेधवाक्यात् [2]प्रत्यवायजनकत्वबोधेऽपि प्रबलदोषमहिम्ना फले उत्कटेच्छाया अविघातात् प्रवृत्तिः, इति न तत्र

---

१ जैमिनीयसूत्रे १, १, २। २ प्रत्यवायः– दोषः, पापमिति यावत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रत्वङ्गत्वा-ऽनर्थहेतुत्वयोर्विरोधः, इति प्रत्यवायजनकेऽपि प्रवर्तकस्यैतादृशवाक्यस्याऽर्थशास्त्रत्वमेव, न धर्मशास्त्रत्वम्, इति प्रतिपत्तव्यम्।

प्राभाकरमतेऽपि श्येनस्य विधिना फलसाधनत्वज्ञापनं विना प्रवृत्त्यविषयत्वात् कथं रागजन्यप्रवृत्त्यविषयत्वम्?। प्रधानहिंसात्वेन चाऽधर्मजनकत्वेऽन्यहिंसाया अधर्मजनकत्वं न स्यात्। रागप्राप्तहिंसात्वेन तथात्वेऽपि रागप्राप्तत्वं यदि विध्यजन्येच्छाविषयत्वम्, तदा श्येनासंग्रहः, यदि चाङ्गविध्यजन्येच्छाविषयत्वम्, तदा श्येनाङ्गाऽसंग्रहः, गौरवं च; इति न किञ्चिदेतत्। एतेन 'भाट्टदर्शनमवलम्ब्याभिहितम्, अशुद्धमिति चेत्, न शब्दात्' इति बादरायणसूत्रमप्यपास्तम्।

नैयायिकास्तु– 'इष्टसाधनत्वम्, कृतिसाध्यत्वम्, बलवदनिष्टाननुबन्धित्वं च, इति त्रयमेव विध्यर्थः। तत्र क्रत्वर्थहिंसायां साक्षाद् निषेधाभावात् प्रायश्चित्तानुपदेशाच्चेष्टसाधनत्व-कृतिसाध्यत्ववद् बलवदनिष्टाननुबन्धित्वमपि विधिना बोध्यते, इति न तस्या अनर्थहेतुत्वम्। श्येनादेस्त्वभिचारस्य साक्षादेव निषेधात्, प्रायश्चित्तोपदेशाच्चानर्थहेतुत्वावगमात् तावन्मात्रं तत्र विधिना न बोध्यते, इति संगतं श्येना-ऽग्नीषोमयोर्वैलक्षण्यम्' इत्याहुः।

तदप्यसत्, क्रत्वङ्गहिंसायामपि सामान्यनिषेधानुरोधेनाऽनर्थहेतुत्वावश्यकत्वात्, तत्प्रायश्चित्तबोधकवेदस्याऽपि कल्पनात्। सामान्यनिषेध-विधिसंकोचे शक्यार्थत्यागेन वेदे लक्षणापक्षाश्रयणस्यातिजघन्यत्वात्; अन्यथा 'रात्रौ श्राद्धं न कुर्वीत' इत्यत्रापि नञो भेदवत्परत्वेन गुणविधेः, अधिकारविधेर्वा प्रसङ्गात्; 'अमावास्यायां पितृभ्यो दद्यात्' इत्यादिविधिबोधित- ॥ ७६ ॥

१ बलवदनिष्टाननुबन्धित्वम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्राद्धजन्यतावच्छेदकपुण्यत्वाऽवान्तरजातिव्यापकजात्यवच्छिन्नं प्रति रात्रीतरश्राद्धकरणस्य कारणत्वेन रात्रिकृतश्राद्धात् फलानुत्पादसंभवात् । अथ तत्रापि विशेषनिषेधे सामान्यविधिः, तदितरपरत्वव्युत्पत्त्या प्रसह्य नञैवोपपत्तौ नञो भेदवत्परत्वं स्वीक्रियत इति चेत् । तर्हि सामान्यविधेरसंकोचानुरोधेन निषेधविधौ विशेषणाभावमात्रविषयत्वं स्वीक्रियताम्, विकल्प एव वा ।

यैस्तु तत्र पर्युदासविषयप्राप्ते श्राद्धे रात्रिभिन्नत्वरूपगुणविधानमेव स्वीक्रियते, न तु रात्रिभिन्नाऽमावास्यात्वेन निमित्तत्वम्, विशेषण-विशेष्यभावविनिगमनाविरहेणातिगौरवात् । तैरत्रापि सामान्यनिषेधविधावक्रत्वङ्गहिंसात्वेन निमित्तत्वं परित्यज्य क्रत्वङ्गहिंसायां श्येन इव बलवदनिष्टाननुबन्धित्वान्वयपरित्यागमात्रे किं न मनो दीयते, प्रवृत्तेस्तद्वदेवोपपत्तेः ? । एतेन 'तेन रूपेण निमित्तताऽऽर्थिकी, इति न शक्यार्थत्यागः' इत्यपास्तम्, अर्थतः क्रत्वङ्गहिंसायां बलवदनिष्टाननुबन्धित्वस्यैवाऽसिद्धेः, श्येन इव तत्र सामान्यनिषेधबाधादेव तदनन्वयात्[1] 'श्येने तदनन्वयप्रयोजकं तात्पर्यम्, क्रत्वङ्गहिंसायां तु न तत्[2]' इति कल्पनागौरवे हिंसारसिकत्वं विनाऽन्यस्य बीजस्याऽभावात् ।

अथाऽग्नीषोमादेः स्वर्गजनकत्वं श्रुतं तदङ्गहिंसाया बलवदनिष्टानुबन्धित्वं विरुन्ध्यादिति चेत् । श्येनस्याभिचारजनकत्वमपि किं न तथा ? । श्येनजन्याऽदृष्टस्य शत्रुवध-नरकोभयजनकत्वाद् न विरोध इति चेत् । तर्हि क्रत्वङ्गहिंसाजन्याऽदृष्टस्यापीष्टानिष्टोभयजनकत्वमङ्गीक्रियताम् । एवं सति पुण्यत्व-पापत्वयोः साङ्कर्यमिति चेत् । तदिदं तवैव[3] संकटम्; अस्माकं[4] तु पापा-

१ तच्छब्देन बलवदनिष्टाननुबन्धित्वम् । २ तद्– बलवदनिष्टाननुबन्धित्वानन्वयप्रयोजकं तात्पर्यम् । ३ तव– नैयायिकस्य । ४ अस्माकम्– जैनानाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नुबन्धिपुण्यविपाकनिमित्ततया श्येनाऽग्नीषोमादीनामिष्टप्रयोजकत्वमात्राभ्युपगमे न किञ्चिद् बाधकम् । ‘ यो यद्गतफलार्थितया क्रियते, स तद्गतकिञ्चिदतिशयजनकः ’ इति नियमात् शत्रुवधार्थितया क्रियमाणं श्येनजन्यादृष्टं पापरूपं शत्रावेव स्वीक्रियत इति चेत् । कथं तर्हि श्येनकर्तुर्नरकावाप्तिः; श्येनध्वंसस्य श्येनव्यापारतायामन्यत्राऽप्यदृष्टोच्छेदप्रसङ्गात्, शत्रुनिष्ठपापस्य च भोगेन नाशात् ?। न चायं नियमोऽपि, कर्मणः समानाधिकरणस्यैवाऽदृष्टस्य जनकत्वात्, तत्तददृष्टाऽन्यादृष्टत्वेन समानाधिकरणकर्मजन्यत्वे गौरवात् । एतेन श्येनात् पापद्वयाभ्युपगमोऽपि परास्तः; इति न किञ्चिदेतत् ।

ये तु– ‘ श्येनेऽपि बलवदनिष्टाननुबन्धित्वं न बाधितान्वयम्, न हि सा हिंसा, अदृष्टाद्वारकमरणोद्देश्यकमरणानुकूलव्यापारस्यैव हिंसात्वात् । गङ्गामरणार्थक्रियमाणत्रिसन्ध्यस्तवपाठवारणाय ‘अदृष्टाऽद्वारक–’ इति विशेषणम् ; कूपकर्तुर्दैवात् कूपपतितगोहिंसावारणाय ‘मरणोद्देश्यक–’ इति । तथा च श्येनस्याऽपि न निषिद्धत्वम्’ इत्याहुः ।

तेषां हिंसाणामपूर्वा हिंसारसिकता, यया श्येनकर्तुरपि वैरिमरणप्रयोजकवज्रपाताद्यकर्तृत्वेन शिष्टत्वमनुमतम्, अनर्थप्रयोजकेऽपि निषेधविधिप्रवृत्तौ च प्रतिज्ञाबाध इति । न च तैः पाप्मभिर्हिंसालक्षणं स्वमतेनाऽपि सुष्ठु घुष्टम्[1], स्वजन्याऽदृष्टाजन्यत्वस्य मरणविशेषणत्वेऽसंभवात्, कार्यमात्रस्याऽदृष्टजन्यत्वात्, सामानाधिकरण्येनाऽदृष्टजन्यत्वनिवेशे च श्येनातिव्याप्तेः । एतेन ‘अदृष्टव्यापारसंबन्धेन स्वाजन्यत्वं तत्’ इत्यपि निरस्तम्, प्रतियागप्रतिबद्धश्येनातिव्याप्तेश्च । न च तत्र मरणोपधायकत्वलक्षणं मरणानुकूलत्वमेव न, इति नातिव्याप्तिरिति वाच्यम् ; खड्गघातेनाऽपि यत्र दैवाद् मरणं तत्राऽव्याप्त्यापत्तेः । न च

१ घुषेर्विशब्दनार्थादविशब्दने क्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रापि पूर्णप्रायश्चित्ताभावाद् न हिंसेति वाच्यम्, अर्धप्रायश्चित्तस्यापि हिंसानिमित्तत्वात् । एतेन 'मरणजनकादृष्टाजनकत्वलक्षणं तद्व्यापारविशेषणम्' इत्यपि निरस्तम्, इतरहिंसाजनकतादृशाऽदृष्टाऽप्रसिद्धेश्च मरणोद्देश्यकत्वमपि न मरणत्वप्रकारकेच्छाऽजन्येच्छाविषयत्वम्, धनादिलिप्सया हिंसायामतिव्याप्तेः; किन्तु मरणजनकेच्छाऽविषयत्वम्; तथा च क्रत्वङ्गहिंसायामतिव्याप्तिः; अत एव मरणफलकत्वाबोधकविधिबोधितकर्तव्यताकान्यत्वरूपाऽदृष्टाऽद्वारकत्वनिवेशेऽपि न निस्तारः । न चाविहितत्वमात्रनिवेशेऽपि निर्वाहः, प्रमादकृतहिंसायामव्याप्तेः; विहितेऽपि श्येनादौ त्वदीयानामपि हिंसाव्यवहारात्, अनेन रूपेण पापजनकत्वे गौरवाच्चेति दिग् ।

तस्मात् 'प्रमादयोगेन प्राणव्यपरोपणं हिंसा'[1] इति परमर्षिप्रणीतमेव हिंसालक्षणं सम्यक् । अत्र च प्रमादयोगः–यतनाऽभावः, यतना च जीवरक्षानुकूलो व्यापारः, तत्त्वं[2] च जीवमरणव्यापारविघटकत्वम्, युगमात्रक्षेत्रे सम्यग्नेत्रव्यापाररूपेर्यासमित्यादिना जीवमरणजनकचरणव्यापारादेरनिष्टसाधनत्वेन निवर्तनादिति बोध्यम् । न च 'मरणानुकूलव्यापारेण' इत्येवाऽस्तु, किमधिकेन ?, इति वाच्यम् । अप्रमत्तहिंसायामतिव्याप्तेः । न चैवमप्यनाभोगाविघटनेनाऽप्रमत्तहिंसाया हिंसात्वापत्तिः, शक्यविघटनत्वस्य व्यापारविशेषणत्वात् । न चैवमप्यनशनादावतिव्याप्तिः, परजीवग्रहणे चात्महिंसायामव्याप्तिरिति वाच्यम्; शुभसंकल्पापूर्वकत्वस्य मरणव्यापारविशेषणत्वात् । न चैवं याज्ञिकानामपि क्रत्वङ्गहिंसायां शुभसंकल्पाद् न दोष इति वाच्यम्, विधिजन्यमोक्षेच्छाया एव शुभसंकल्पपदेन ग्रहणात् । अत एव राज्यादिनिदानार्थमनशनमप्यात्महिंसां वदन्ति

१ तत्त्वार्थसूत्रे ७, ८ । २ जीवरक्षानुकूलव्यापारत्वं च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तान्त्रिकाः[1] । द्रव्य-भावोभयहिंसालक्षणं चैतत्, कर्मबन्धजनकता तु प्रकृतिप्रदेशावाश्रित्य प्रमत्तयोगत्वेन, स्थिति-रसौ चाश्रित्य क्लिष्टाध्यवसायत्वेन, इत्यन्यत्र विस्तरः। तस्माद् हिंसायामहिंसात्वं समर्थयतां परेषां वेदावलम्बनमपि महतेऽनर्थाय; उक्तं च[2]—

"ये चक्रुः क्रूरकर्माणः शास्त्रं हिंसोपदेशकम् । क्व ते यास्यन्ति नरके नास्तिकेभ्योऽपि नास्तिकाः ? ॥ १ ॥

वरं वराकश्चार्वाको योऽसौ प्रकटनास्तिकः । वेदोक्तितापसच्छद्मच्छन्नं रक्षो न जैमिनिः[3] ॥ २ ॥" इति ।

वेदाऽप्रामाण्यं पापकर्मणि प्रवर्तकत्वात्, परपरिगृहीतत्वाच्च विभावनीयम्, इति किमतिहिंस्रेण सह बहुविचारणया ? ॥४८॥

तदेवं याज्ञिकाऽऽगमे दृष्टे-ष्टविरुद्धतामुपदर्श्य, अन्यत्राऽप्यतिदिशन्नाह—

अन्येषामपि बुद्ध्यैवं दृष्टेष्टाभ्यां विरुद्धता । दर्शनीया कुशास्त्राणां ततश्च स्थितमित्यदः ॥४९॥

अन्येषामपि– आजीवकादिसंबन्धिनाम्, एवम्– उपदर्शितप्रकारेण, बुद्ध्या– विचारणया, कुशास्त्राणां– शास्त्राभासानाम्, दृष्टे-ष्टाभ्यां विरुद्धता दर्शनीया, उपदर्शितजातीयत्वेन सर्वेषामपि तेषां दुष्टत्वात्, तदुक्तं स्तुतिकृता[4]—

" हिंसादिसंसक्तपथोपदेशादसर्वविन्मूलतया प्रवृत्तेः ।

नृशंसदुर्बुद्धिपरिग्रहाच्च ब्रूमस्त्वदन्यागमप्रमाणम् ॥ १ ॥" इति ।

---

१ आर्हतसिद्धान्तनिष्णाताः । २ कलिकालसर्वज्ञश्रीहेमचन्द्राचार्येण । ३ योगशास्त्रे द्वितीयस्मिन् प्रकाशे श्लो॰ ३७,३८ । ४ अयोगव्यवच्छेदद्वात्रिंशिकायां श्लो॰ १० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्च– अन्यागमानां दृष्टेष्टाविरुद्धत्वेनाऽप्रतिपक्षत्वाच्च, इति– पूर्वोक्तम् , अदः– वक्तृप्रत्यक्षं 'हिंसादिभ्योऽशुभादि' इत्यादि, स्थितम्– अप्रामाण्यशङ्काविरहितेनाऽऽगमप्रमाणेन सिद्धम् ॥ ४९ ॥

ततः सिद्धं प्रतिनियतं कर्म, तच्च कर्तारमाक्षिपति, इति तथात्वं स्वात्मन एव, इति नियमयति—

क्लिष्टं हिंसाद्यनुष्ठानं न यत्तस्यान्यतो मतम्। ततः कर्ता स एव स्यात्सर्वस्यैव हि कर्मणः॥

क्लिष्टं– रौद्राध्यवसायपूर्वकम् , प्राणिघाताद्याचरणम् ; इदमुपलक्षणमक्लिष्टाचरणस्य, यत्– यस्माद्धेतोः, तस्य– आत्मनः, अन्यतः– स्वातिरिक्तव्यापारवतः, न मतं– नाऽभीष्टम् , देवदत्तयोगेन यज्ञदत्तानुष्ठानाभावात् । ततः– तस्माद्धेतोः, स एव– अधिकृतात्मैव, हि– निश्चितम् , सर्वस्यैव– स्वीयहिता-ऽहितकर्मणः, कर्ता स्यात् , स्वव्याप्यस्य कर्मणः कारणान्तराप्रयोज्यत्वे सति कारणान्तरप्रयोजकत्वलक्षणस्वातन्त्र्येण हेतुत्वात् । अत्र [1]निश्चयतोऽपृथग्भावेन स्वव्याप्यस्य रागद्वेषाद्यध्यवसायलक्षणस्य भावकर्मणः परिणामित्वलक्षणस्वातन्त्र्येण कर्तृत्वम् ; [2]व्यवहारेण तु संयोगविशेषेण स्वव्याप्यद्रव्यकर्मणि योगव्यापारस्वातन्त्र्येण कर्तृत्वमिति विवेकः ॥ ५० ॥

ननु यद्यात्मैव कर्ता, तदा हितमेवाऽयं कुर्यात्, नाहितम्; इत्यत्राह—

अनादिकर्मयुक्तत्वात्तन्मोहात्संप्रवर्तते। अहितेऽप्यात्मनः प्रायो व्याधिपीडितचित्तवत्॥५१॥

---

१ निश्चयनयमतमाश्रित्येत्यर्थः । २ व्यवहारनयापेक्षया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स आत्मा, आत्मनः– स्वस्य, अहितेऽपि– हिंसाद्यनुष्ठानेऽपि, अनादिकर्मयुक्तत्वाद् हेतोः, तन्मोहात्– कर्मजनितमौढ्यात्, संप्रवर्तते– आदरेण प्रवर्तते, प्रायो बाहुल्येन। किंवत्? इत्याह– व्याधिपीडितचित्तवत्– रोगाकुलहृदयवत्। यथा व्याधितोऽपथ्यं जानन्, अजानन् वा बहुकालस्थितिकव्याधिमहिम्नाऽपथ्य एव प्रवर्तते, तथा संसार्यपि जानन्, अजानन् वाऽहित एव प्रायः कर्मदोषात् प्रवर्तत इति भावः। अत्राऽहितप्रवृत्तौ क्लिष्टं कर्म हेतुः, तत्र चाहितप्रवृत्त्यन्तरम्, इत्यन्योन्याश्रयोऽनादिपदेन न दोषायेति सूच्यते; बीजाऽङ्कुरस्थलीयस्याऽन्योन्याश्रयस्योत्पत्ति-ज्ञप्त्यप्रतिबन्धकत्वेनाऽदोषत्वादित्याशयः ॥ ५१ ॥

अत्र प्रसङ्गाद् वार्तान्तरमाह—

कालादीनां च कर्तृत्वं मन्यन्तेऽन्ये प्रवादिनः। केवलानां तदन्ये तु मिथः सामग्र्यपेक्षया ५२

अन्ये प्रवादिनः– एकान्तवादिनः, कालादीनाम्, आदिना स्वभावादिग्रहः, केवलानां– परक्लृप्तहेतुरहितानाम्, कर्तृत्वम्– असाधारणत्वेन हेतुत्वम्, मन्यन्ते। तदन्ये तु– अनेकान्तवादिनः सामग्र्यपेक्षया– सामग्रीप्रविष्टत्वेन, मिथः– परस्परम्, सहकारिलक्षणं कर्तृत्वं 'मन्यन्ते' इति प्राक्तनानुषङ्गः। इदमेवाऽभिहितं सम्मतिकारेण—

"कालो सहाव-णियई पुव्वकयं पुरिसकारणेगंता। मिच्छत्तं ते चेव उ समासओ हुंति सम्मत्तं[3] ॥१॥" इति ॥५२॥

तत्र पूर्वं कालवादिमतोपपत्तिमाह—

---

१ क्लिष्टे कर्मणि। २ कालः स्वभाव-नियती पूर्वकृतं पुरुषकारणमेकान्तात्। मिथ्यात्वं त एव तु समासतो भवन्ति सम्यक्त्वम्। ३ सम्मतिसूत्रे १५०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न कालव्यतिरेकेण गर्भकालशुभादिकम् । यत्किञ्चिज्जायते लोके तदसौ कारणं किल ॥५३॥

कालव्यतिरेकेण– स्त्री-पुंससंयोगादिजन्यत्वेन पराभिमतस्याऽपि गर्भस्य जन्म न भवति, न हि तज्जन्मनि गर्भपरिणतिर्हेतुः, अपरिणतस्यापि कदाचिज्जन्मदर्शनात्; तथा, कालोऽपि शीतो-ष्ण-वर्षाद्युपाधिः, तद्व्यतिरेकेण न भवति । अत्र कालस्थाने 'बाल' इति क्वचित् पाठः, तत्र बालत्वं जन्मोत्तरावस्था, साऽपि कालव्यतिरेकेण न, अन्यथाऽतिप्रसङ्गादित्यर्थः । तथा, शुभादिकं– स्वर्गादिकम्, आदिना नरकादिग्रहः, यत् किञ्चिल्लोके घटादि, तदपि कालव्यतिरेकेण न भवति, कर्म-दण्डादिसत्त्वेऽपि कालान्तर एव स्वर्ग-घटाद्युत्पत्तेः । तत्– तस्मात् कारणात्, असौ कालः 'किल' इति सत्ये, कारणम्– अन्यस्य त्वन्यथासिद्धत्वादसत्यत्वमिति भावः ॥ ५३ ॥

तथा—

कालः पचति भूतानि कालः संहरति प्रजाः । कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥५४॥

कालः भूतानि– उत्पत्तिमन्ति, पचति– उत्पन्नानां प्रकृतपर्यायोपचयं करोतीत्यर्थः । तथा, कालः प्रजाः संहरति– प्रकृतपर्यायान्तरपर्यायभाजः करोति । तथा, कालः सुप्तेषु– अजनितकार्येषु पराभिमतकारणेषु सत्सु, जागर्ति– विवक्षितकार्यमुपदधातीत्यर्थः । अतो हि– निश्चितम्, कालः सृष्टि-स्थिति-प्रलयहेतुतया दुरतिक्रमः– अनपलपनीयकारणताकः ॥ ५४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च कालादृते नैव मुद्गपक्तिरपीक्ष्यते । स्थाल्यादिसंनिधानेऽपि ततः कालादसौ मता ॥५५॥

'किञ्च' इत्युपचये, कालादृते– कालं विना, स्थाल्यादिसंनिधानेऽपि, आदिना विलक्षणवह्निसंयोगादिग्रहः, मुद्गपक्तिरपि– मुद्गानां विलक्षणरूप-रसादिरूपविक्लृतिपरिणतिरपि, नैवेक्ष्यते। ततोऽसौ– मुद्गपक्तिः, कालाद् मता– कालमात्रजन्येष्टा। न च तदा मुद्गपक्तिजनकविलक्षणाग्निसंयोगाभावादेव तदपक्तिरिति वाच्यम् , तत्रापि हेत्वन्तरापेक्षावैयग्र्यात्, आवश्यकत्वेन कालस्यैव तद्धेतुत्वौचित्यादित्याशयः ॥ ५५ ॥

विपक्षे बाधकमाह—

कालाभावे च गर्भादि सर्वं स्यादव्यवस्थया । परेष्टहेतुसद्भावमात्रादेव तदुद्भवात् ॥५६॥

कालाभावे च— कालस्याऽसाधारणहेतुत्वानङ्गीकारे च, गर्भादिकं सर्वं कार्यमव्यवस्थया– अनियमेन स्यात् । कुतः ?, इत्याह– परेष्टहेतुसद्भावमात्रादेव– पराभिमतमाता-पित्रादिहेतुसंनिधानमात्रादेव, तदुद्भवात्– अविलम्बेन गर्भाद्युत्पत्तिप्रसङ्गात्। ननु कालोऽपि यद्येक एव सर्वकार्यहेतुः, तदा युगपदेव सर्वकार्योत्पत्तिः, तत्तत्कार्ये तत्तदुपाधिविशिष्टकालस्य हेतुत्वे चोपाधीनामेवाऽऽवश्यकत्वात् कार्यविशेषहेतुत्वम्; इति गतं कालवादेन, इति चेत् । अत्र नव्याः– क्षणरूपः कालोऽतिरिच्यत एव, स्वजन्यविभागप्रागभावविशिष्टकर्मणस्तथात्वे जाते विभागे तदभावापत्तेः, तदाऽन्यविशिष्टकर्मणस्तथात्वेऽननुगमात् , तस्य च

१ सर्वत्र मूलादर्शेषु 'पीष्यते' इति पाठः । २ तच्छब्दो मुद्गपरामर्शकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्क्षणवृत्तिकार्ये तत्पूर्वक्षणत्वेन हेतुत्वम्; तत्क्षणवृत्तित्वं च तत्क्षणस्याऽप्यभेदेऽपि 'इदानीं क्षणः' इति व्यवहारात् कालिकाधाराऽऽधेयभावसिद्धेः। अतस्तत्तत्क्षणतन्नाशानां तत्तत्पूर्वक्षणजन्यत्वाद् न क्षणिकत्वानुपपत्तिः। एवं च क्षणिकेनैव क्षणेन कार्यविशेषजननाद् नातिरिक्तहेतुसिद्धिः। न च तत्क्षण एव तन्तौ पटादिकं जायते, घटादिकं त्वन्यत्र, इति देशनियमार्थमतिरिक्तहेतुसिद्धिः, काचित्कत्वस्य नित्य इवाऽनित्येऽपि स्वभावत एव संभवात्, कादाचित्कत्वस्यैव हेतुनियम्यत्वात्, अन्यत्राऽन्यापत्तेरभावात्। क्षणस्येवाऽन्येषामपि नियतपूर्ववर्तित्वात् कथं हेतुत्वप्रतिक्षेपः?, इति चेत्। 'अवश्यक्लृप्त०' इत्याद्यन्यथासिद्धिसद्भावात्। अत एव न पटत्वाद्यवच्छिन्नस्याऽऽकस्मिकतापत्त्या तदवच्छिन्नं प्रति हेतुतासिद्धिः, तदवच्छिन्ननियतपूर्ववर्तित्वनिश्चयादेवैतावत्सत्त्वेऽवश्यं पटोत्पत्तिरिति निश्चयेन कृतिसाध्यतार्थीसंभवात्; अप्रामाणिकव्यवहारानुपपत्तिरूपमाकस्मिकत्वं तु न बाधकम्, युक्तं चैतत्, अनन्तनियतपूर्ववर्तिष्वनन्यथासिद्धत्वाकल्पनेन लाघवात्' इत्याहुः ॥ ५६ ॥

॥ उक्तः कालवादः ॥

अथ स्वभाववादमाह—

न स्वभावातिरेकेण गर्भबालशुभादिकम्। यत्किञ्चिज्जायते लोके तदसौ कारणं किल ॥५७॥

---

१ ख. ग. घ. च. 'त्वं तत्क्ष[illegible]। २ अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्व्यतिरिक्तस्याऽन्यथासिद्धत्वेनाऽऽम्नायादिति तात्पर्यम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वभावातिरेकेण– स्व[illegible]तिवृत्य, गर्भ-बाल-शुभादिकं यत् किञ्चित्– कार्यं, लोके न जायते, तत्– तस्मात् कारणात्, 'किल' इति सत्ये, असौ स्वभावः, कारणं– कादाचित्कत्वनियामकः, आकाशत्वादीनां कादाचित्कत्ववद् घटादीनां कादाचित्कत्वस्येतरानियम्यत्वात्; आकाशादीनामन्यत्र सत्त्वे तत्स्वभावत्वाभावप्रसङ्गस्येव कादाचित्कत्वस्याऽपि गगनादौ सत्त्वे घटादिस्वभावत्वाभावप्रसङ्गस्य बाधकत्वात्; अवधीनां नियतपूर्ववर्तित्वेऽपि तद्गतोपकाराजनकत्वेनाऽहेतुत्वात्। भवनस्वभावत्वे घटः सर्वदा भवेदिति चेत्। न, तदहरेव भवनस्वभावत्वात्। अथवा, कारणमिति- मुख्य एवाऽर्थः, उपादानस्वभावस्यैवोपादेयगतस्वभावरूपोपकारजनकस्योपादेयहेतुत्वात्। न चोपकारेऽप्युपकारान्तरापेक्षायामनवस्था, तस्य स्वत एवोपकृतत्वात्। दण्डादीनां दण्डरूपादीनामिव नियताऽवधित्वेऽप्यन्यथासिद्धत्वम्, 'दण्डाद् घटः' इति व्यवहारस्तु 'इन्धनात् पाकः' इतिवदेव ॥ ५७ ॥

इदमेवाह—

सर्वे भावाः स्वभावेन स्वस्वभावे तथा तथा। वर्तन्तेऽथ निवर्तन्ते कामचारपराङ्मुखाः॥५८॥

सर्वे भावाः, स्वभावेन– स्वगतेन हेतुगतेन वा निमित्तेन, तथा तथा– विशिष्टसंस्थानादिप्रतिनियतरूपेण, स्वस्वभावे– आत्मीयात्मीयसत्तायाम्, 'तिलेषु तैलम्' इतिवदभिव्याप्तौ सप्तमी, स्वस्वभावमभिव्याप्येत्यर्थः, वर्तन्ते– भूत्वा तिष्ठन्ति। अथ नाशकाले निवर्तन्ते– स्वभावेन नाशभाजो भवन्ति। किंभूताः?, इत्याह– कामचारपराङ्मुखाः– अनियतभावनिरपेक्षाः ॥५८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हेत्वन्तरे कामचारमेव स्पष्टयति—

न विनेह स्वभावेन मुद्गपक्तिरपीष्यते। तथाकालादिभावेऽपि नाश्वमाषस्य सा यतः॥५९॥

इह– जगति, स्वभावेन विना, तथाकालादिभावेऽपि– प्रतिनियतकालव्यापारादिसामग्रीसंनिधानेऽपि, मुद्गपक्तिरपि नेष्यते। कुतः?, इत्याह– यतोऽश्वमाषस्य– कङ्कदुकस्य[1], सा– पक्तिः, न भवति। न ह्यश्वमाषे विलक्षणाग्निसंयोगादिकं नास्तीति वक्तुं शक्यते, एकयैव क्रियया तत्तदन्यवह्निसंयोगात्। न चादृष्टवैषम्यात् तदपाकः, दृष्टसाद्गुण्ये तद्वैषम्याऽयोगात्; अन्यथा दृढदण्डनुन्नमपि[2] चक्रं न भ्राम्येत्। तस्मात् स्वभाववैषम्यादेव तदपाकः, इत्यन्यत्र कामचारात् स्वभाव एव कारणमिति पर्यवसन्नम्॥ ५९॥

उक्तदार्ढ्यायैव विपक्षे बाधकमाह—

अतत्स्वभावात्तद्भावेऽतिप्रसङ्गोऽनिवारितः। तुल्ये तत्र मृदः कुम्भो न पटादीत्ययुक्तिमत्॥६०॥

अतत्स्वभावात्– तत्स्वभावभिन्नात्, तत्स्वभावरहिताद् वा; तद्भावे– अधिकृतकार्योत्पादे 'अङ्गीक्रियमाणे' इति शेषः; अतिप्रसङ्गोऽनिष्टप्रसङ्गः, अनिवारितः– अबाधितः। कुतः?, इत्याह– तुल्ये– समाने, तत्र– अतत्स्वभावत्वे सति, मृदा कुम्भ एव जन्यते, न पटादीति, अयुक्तिमत्– नियामकरहितम्। ननु नातत्स्वभावत्वं तज्जननप्रयोजकमुच्यते, येनेत्थमापत्तिः[3] संगच्छते,

---

१ कङ्कदुकापाकः। २ नुन्नम्– प्रेरितम्। ३ अतत्स्वभावत्वे मृदः कुम्भाद्यपि न स्यात्, पटाद्यपि वा स्यात्, अविशेषात्, इत्येवंरूपा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किन्तु सामग्रीमेव कार्यजनिकां ब्रूमः; अश्वमाषस्य च पक्तिं प्रति स्वरूपयोग्यतैव न, इति को दोषः?, इति चेत्।

अत्र वदन्ति[1]— अन्तरङ्गत्वात् स्वभाव एव कार्यहेतुः, न तु बाह्यकारणम्। न च मृत्स्वभावाविशेषाद् घटादिकार्याविशेषप्रसङ्गः, 'स्वस्य भावः कार्यजननपरिणतिः' इति स्वभावार्थत्वात्, तस्याश्च[2] कार्यैकव्यङ्ग्यत्वात्। न चेदेवम्, अङ्कुरजननस्वभावं बीजं प्रागेवाऽङ्कुरं जनयेत्। सहकारिलाभा-ऽलाभाभ्यां हेतोः कार्यजनना-ऽजनने उपपत्स्येते इति चेत्। न, सहकारिचक्रानन्तर्भावेन विलक्षणबीजत्वेनैवाङ्कुरहेतुत्वौचित्यात्। न च सहकारिचक्रस्याऽतिशयाधायकत्वं[3] त्वयाऽपि[4] कल्पनीयम्, इति तस्य[5] तत्कार्यजनकत्वकल्पनमेवोचितमिति[6] वाच्यम्; पूर्व-पूर्वोपादानपरिणामानामेवोत्तरोत्तरोपादेयपरिणामहेतुत्वात्, अत एव कालवादाप्रवेशात्। न च चरमक्षणपरिणामरूपबीजस्याऽपि द्वितीयादिक्षणपरिणामरूपाङ्कुराजनकत्वाद् व्यक्तिविशेषमवलम्ब्यैव हेतु-हेतुमद्भावो वाच्यः, अन्यथा व्यावृत्तिविशेषानुगतप्रथमादिचरमपर्यन्ताङ्कुरक्षणात् प्रतिव्यावृत्ति विशेषानुगतानां चरमबीजक्षणादिकोपान्त्याङ्कुरक्षणानां हेतुत्वे कार्य-कारणतावच्छेदककोटावेकैकक्षणप्रवेशा-ऽप्रवेशाभ्यां विनिगमनाविरहप्रसङ्गात्; तथा च तज्जातीयात् कार्यात् तज्जातीयकारणानुमानभङ्गप्रसङ्ग इति वाच्यम्; सादृश्यतिरोहितवैसदृश्येनाऽङ्कुरादिना तादृशबीजादीनामनुमानसंभवात्, प्रयोज्य-प्रयोजकभावस्यैव विपक्षबाधकतर्कस्य जागरूकत्वादिति। अधिकमध्यात्ममतपरीक्षायाम्। ततः स्वभावहेतुकमेव जगदिति स्थितम्। उक्तं च—

---

१ स्वभाववादिन इति शेषः। २ कार्यजननपरिणतेः। ३ सहकार्यतिरिक्तत्वेन मुख्यतयाऽभिमते हेताविति गम्यते। ४ स्वभाववादिना। ५ सहकारिचक्रस्य। ६ तच्छब्देनाधिकृतपरामर्शः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"कः कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणां च ? ।
स्वभावतः सर्वमिदं प्रवृत्तं न कामचारोऽस्ति कुतः प्रसङ्गः ? ॥ १ ॥" इति ॥६०॥

॥ उक्तः स्वभाववादोऽपि ॥

अथ नियतिवादमाह—

नियतेनैव रूपेण सर्वे भावा भवन्ति यत्। ततो नियतिजा ह्येते तत्स्वरूपानुवेधतः॥६१॥

नियतेनैव– सजातीय-विजातीयव्यावृत्तेन स्वभावानुगतेनैव रूपेण, सर्वे भावा भवन्ति, यद्– यस्माद् हेतोः । ततो हि– निश्चितम्, एते– भावाः, नियतिजाः– नैयत्यनियामकतत्त्वान्तरोद्भवाः । हेत्वन्तरमाह– तत्स्वरूपानुवेधतः– नियतिकृत-प्रतिनियतधर्मोपश्लेषात् । दृश्यते हि तीक्ष्णशस्त्राद्युपहतानामपि मरणनियतताभावेन मरणम्, जीवननियततया च जीवन-मेवेति ॥ ६१ ॥

इदमेव स्फुटमाह—

यद्यदैव यतो यावत्तत्तदैव ततस्तथा। नियतं जायते, न्यायात्क एतां बाधितुं क्षमः? ॥ ६२ ॥

यद्– घटादिकम्, यदैव– विवक्षितकाल एव, यतः– दण्डादेः, यावत्– विवक्षिताल्प-बहुदेशव्यापि, जायमानं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृश्यते; तद्- घटादिकम्, तदैव- विवक्षितकाल एव, ततः- दण्डादेः, तथा- तावद्देशव्यापि, लोके- जगति, नियतम्- नियतिकृतम्, जायते । ततो न्यायात्- तर्कात्, क एतां- नियतिम्, बाधितुं क्षमः, प्रमाणसिद्धेऽर्थे बाधानवतारात्, नियतरूपावच्छिन्नं प्रति नियतेरेव हेतुत्वात्, अन्यथा नियतरूपस्याप्याकस्मिकताऽऽपत्तेः ? । न च तावद्धर्मकत्वं न जन्यतावच्छेदकम्, किन्त्वार्थसमाजसिद्धमिति वाच्यम्; नियतिजन्यत्वेनैवोपपत्तावार्थसमाजाऽकल्पनात्, भिन्नसामग्रीजन्यतयैकवस्तुरूपव्याघातापत्तेश्च । तदुक्तम्—

"प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः सोऽवश्यं भवति नृणां शुभोऽशुभो वा ।
भूतानां महति कृतेऽपि हि प्रयत्ने नाऽभाव्यं भवति, न भाविनोऽस्ति नाशः ॥ १ ॥" इति ॥ ६२ ॥

इदमेव विवृणोति—

न चर्ते नियतिं लोके मुद्गपक्तिरपीक्ष्यते[1] । तत्स्वभावादिभावेऽपि नासावनियता यतः ॥६३॥

न च लोके- जगति, नियतिमृते- नियतिं विना, मुद्गपक्तिरपीक्ष्यते- दृश्यते; यतस्तत्स्वभावादिभावेऽपि- मुद्गपक्तिजनकस्वभावव्यापारादिसत्त्वेऽपि, नासौ- अधिकृता मुद्गपक्तिः, अनियता, किन्तु स्वरूपनियता । न चैतद् नैयत्यं स्वभावप्रयोज्यम्, स्वभावस्य कार्यैकजात्यप्रयोजकत्वात्, अतिशयरूपस्याऽपि तस्य विशेष एव प्रयोजकत्वात्, पक्त्यन्तरसाजात्य-

१ सर्वत्र मूलपुस्तकादर्शेषु 'पीष्यते' इति पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैजात्योभयानुवेधस्य नियतिं विनाऽसंभवात्। हेतुना व्यक्तिरेवोत्पाद्यते, उभयानुवेधस्तु तत्र तत्त्वान्तरसंवेधादिति चेत्। न, समवायादिनिरासेन तत्संवेधानुपपत्तेः, अनिरासेऽपि तत्रैव तत्संवेधनियामकगवेषणात्। किञ्च, दण्डादिसत्त्वेऽवश्यं घटोत्पत्तिरिति न सम्यग् निश्चयः, तत्सत्त्वेऽपि कदाचिद् घटानुत्पत्तेः; किन्तु संभावनैव, इति न दृष्टहेतुसिद्धिः; 'यद् भाव्यं तद्भवत्येव' इति तु सम्यग् निश्चयः। न चैव कार्योत्पत्तेः पूर्वं नियत्यनिश्चयात् प्रवृत्तिर्न स्यादिति वाच्यम्, अविमृश्यैव प्रवृत्तेः, फललाभस्य तु यादृच्छिकत्वादिति दिग्॥ ६३॥

उक्तमेव बाधकविपक्षत्वेनाह—

अन्यथाऽनियतत्वेन सर्वभावः प्रसज्यते। अन्योन्यात्मकतापत्तेः क्रियावैफल्यमेव च॥६४॥

अन्यथा– नियतिजन्यत्वं विना, अनियतत्वेन हेतुना, सर्वभावः प्रसज्यते, व्यक्त्यविशेषात्। च पुनः अन्योन्यात्मकतापत्तेः– घट-पटाद्यविशेषापत्तेः, क्रियावैफल्यमेव, सिद्धाया व्यक्तेरसाध्यत्वात्। सा व्यक्तिरसिद्धैवेति चेत्। तत्त्वं नान्यभेदः, तद्ग्रहेऽपि 'सोऽयम्' इति तत्ताग्रहात्। न च तद्व्यक्तिरेव तत्त्वम्, तस्य तत्राविशेषणत्वात्, किन्तु नियतिकृतधर्म एव; इति सिद्धं नियत्या॥ ६४॥

॥ उक्तो नियतिवादः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ कर्मवादमाह—

न भोक्तृव्यतिरेकेण भोग्यं जगति विद्यते । न चाकृतस्य भोक्ता स्यान्मुक्तानां भोगभावतः ६५

भोक्तृव्यतिरेकेण, जगति– चराचरे, भोग्यं न विद्यते, भोग्यपदस्य ससंबन्धिकत्वात् ; न चाकृतस्य भोक्ता स्यात्, स्वव्यापारजन्यस्यैव स्वभोग्यत्वदर्शनात् ; अन्यथा, मुक्तानां– निष्ठितार्थानाम्, भोगभावतः– भोगप्रसङ्गात् ॥ ६५ ॥

ततः किम् ?, इत्याह—

भोग्यं च विश्वं सत्त्वानां विधिना तेन तेन यत् । दृश्यतेऽध्यक्षमेवेदं तस्मात्तत्कर्मजं हि तत् ॥६६॥

भोग्यं च– भोगप्रयोजनं च, सत्त्वानां– संसारिणाम्, तेन तेन– सुख-दुःखप्रदानादिलक्षणेन, विधिना– प्रकारेण, इदं विश्वं– जगत्, अध्यक्षमेव– स्वसंवेदनसाक्षिकमेव, दृश्यते, यद्– यस्माद् हेतोः; तस्मात् कारणात्, हि– निश्चितम्, तत्– जगत्, तत्कर्मजं– भोक्तृकर्मजम् ; जगद्धेतुत्वं कर्मण्येव, नान्यत्र, इतरेषां पराभिमतहेतूनां व्यभिचारित्वादिति भावः ॥ ६६ ॥

तथा—

न च तत्कर्मवैधुर्ये मुद्गपक्तिरपीक्ष्यते । स्थाल्यादिभङ्गभावेन यत् क्वचिन्नोपपद्यते ॥६७॥

न च तत्कर्मवैधुर्ये– भोक्तृगतानुकूलादृष्टाभावे, मुद्गपक्तिरपीक्ष्यते । कथम् ?, इत्याह— यद्– यतो हेतोः, क्वचित्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवक्षितस्थाने, स्थाल्यादिभङ्गभावेन, नोपपद्यते– न सिध्यति। दृष्टकारणवैगुण्यादेव तत्र कार्याभाव इति चेत्। तर्हि तद्वैगुण्यं यन्निमित्तम्, तत एव कार्यवैगुण्यं न्यायप्राप्तम्, 'तद्धेतोः०' इति न्यायात्। नन्वेवं नियमतो दृष्टकारणापेक्षा न स्यादिति चेत्। न स्यादेव, तथाविधप्रयत्नं विनापि शुभादृष्टेन धनप्राप्त्यादिदर्शनात्; कर्मविपाककालेऽवर्जनीयसंनिधिकत्वेनैव [1]तेषां निमित्तत्वव्यवहारात्। अत एव 'दृष्टकारणानामदृष्टव्यञ्जकत्वम्' इति सिद्धान्तः; तदुक्तम्—

"यथा यथा पूर्वकृतस्य कर्मणः फलं निधानस्थमिवाऽवतिष्ठते।
तथा तथा तत्प्रतिपादनोद्यता प्रदीपहस्तेव मतिः प्रवर्तते॥ १॥" इति।

न च विपाककालापेक्षणात् कालवादप्रवेशः, तस्य कर्मावस्थाविशेषरूपत्वात्। न च कर्महेत्वपेक्षावैयग्र्यम्, अनादित्वात् कर्मपरम्परायाः॥ ६७॥

विपक्षे बाधकमाह–

चित्रं भोग्यं तथा चित्रात्कर्मणोऽहेतुतान्यथा। तस्य यस्माद्विचित्रत्वं नियत्यादेर्न युज्यते॥६८॥

तथा– प्रतिनियतरूपेण, चित्रं– नानाप्रकारम्, भोग्यम्, चित्रात्कर्मणो घटते, [2]तस्य तत्तत्कार्यजनकविचित्रशक्तियोगित्वात्। अन्यथा– चित्रकर्मानभ्युपगमे, अहेतुता स्यात्, 'चित्रभोग्यस्य' इत्यनुषज्यते; कचिदुद्भूतरूपमेव, कचिच्चानुद्भूत-

१ तेषां दृष्टकारणानाम्। २ ख. ग. घ. च. 'तत्य'। ३ चित्रकर्मणः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रूपमेव, परमाणुसाद्भूतानां च शाल्यादिबीजानां शाल्याद्यङ्कुरजनकत्वमेव, इति नियमे परेणाऽप्यदृष्टस्यैवाऽङ्गीकारात्, सर्वत्र तद्धेतुत्वस्यैवौचित्यात् । ननूक्तमेव नियत्यादेः कार्यवैचित्र्यम्, अत एतत्पक्षेणैव प्रत्यासत्त्या प्रतिलोमक्रमेण तद्दूषणार्थमाह- तस्य- भोग्यस्य, विचित्रत्वम्, यस्माद्धेतोः, नियत्यादेः- नियत्यादिप्रयोज्यम्, न युज्यते ॥ ६८ ॥

तथाहि—

नियतेर्नियतात्मत्वान्नियतानां समानता । तथानियतभावे च बलात्स्यात् तद्विचित्रता ॥६९॥

नियतेर्नियतात्मत्वात्- एकरूपत्वात्, नियतानां- तज्जन्यत्वेनाभिमतानाम्, समानता स्यात्, तथा- अदृष्टप्रकारानतिक्रमेण, अनियतभावे च- असमानकार्यकारित्वे च नियतेरभ्युपगम्यमाने, बलात्- न्यायात्, तद्विचित्रता- नियतिविचित्रता, स्यात्; 'घटो यदि पटजनकाऽन्यूना-ऽनतिरिक्तहेतुजन्यः स्यात्, पटः स्यात्; घटजनकं यदि पटं न जनयेत्, पटजनकाद् भिद्येत' इति तर्कद्वयम् ॥ ६९ ॥

प्रागुक्तरीत्या कार्यवैचित्र्यनिर्वाहकतयैव नियत्यभ्युपगमाद् द्वितीय इष्टापत्तिमाशङ्कयाह—

न च तन्मात्रभावादेर्युज्यतेऽस्या विचित्रता । तदन्यभेदकं मुक्त्वा सम्यग्न्यायाविरोधतः ॥७०॥

न च- नैव, तन्मात्रभावादेः- तन्मात्रभावो- नियतिमात्रत्वम्, आदिना परिणामग्रहः ततोऽस्याः- प्रतिनियतकार्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जनकनियतेः, तदन्यभेदकं– नियत्यन्यभेदकम्, मुक्त्वा– अनभ्युपगम्य, सम्यग्न्यायाऽविरोधतः– सत्तर्काऽप्रातिकूल्येन, विचित्रता स्यात् ॥ ७० ॥

एतदेव प्रकटयन्नाह—

न जलस्यैकरूपस्य वियत्पाताद् विचित्रता। ऊषराधिधराभेदमन्तरेणोपजायते॥ ७१ ॥

जलस्य, एकरूपस्य– जलत्वेन समानस्य, वियत्पातात्– अभ्रपातादनन्तरम्, ऊषरादिधराभेदम्– ऊषरेतर-पृथिवीसंबन्धादिजन्यवर्ण-गन्ध-रस-स्पर्शादिवैलक्षण्यम्, अन्तरेण, विचित्रता न दृश्यते; सकललोकसिद्धं खल्वेतत्; तथा, नियतेरप्यन्यभेदकं विना न भेद इति भावः ॥ ७१ ॥

अस्तु तर्हि तदन्यभेदकम्, अत्राह—

तद्भिन्नभेदकत्वे च तत्र तस्या न कर्तृता। तत्कर्तृत्वे च चित्रत्वं तद्वत्तस्याप्यसंगतम् ॥७२॥

तद्भिन्नभेदकत्वे च– तद्भिन्नं भेदकं यस्यास्तस्या भावस्तत्त्वमिति समासः, नियतिभिन्नभेदकशालित्वे नियतेरङ्गीक्रियमाण इत्यर्थः, तत्र– भेदकत्वेनाऽभिमते, तस्याः– नियतेः, न कर्तृता– न हेतुता, तथाच सर्वहेतुत्वसिद्धान्तव्याकोपः। तत्कर्तृत्वे च– नियतेर्भेदकत्वाभिमतहेतुत्वे च, चित्रत्वं– भेदकत्वम्, तद्वत्– नियतिवत्, तस्यापि– भेदकत्वाभिमतस्यापि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असंगतम्, कारणसरूपत्वात् कार्यस्येति भावः । एतेन 'तद्व्यक्तिनिरूपितनियतित्वेन तद्व्यक्तिजनकत्वम्' इत्यप्यपास्तम्, 'तन्नियतिजन्यत्वेन तद्व्यक्तित्वसिद्धिः, तत्सिद्धौ च तद्व्यक्तिनिरूपितत्वेन नियतिजन्यतासिद्धिः' इत्यन्योन्याश्रयात्, कार्यस्य कारणतानवच्छेदकत्वाच्च, अन्यथा नियतित्वनिवेशवैयर्थ्यादिति दिग् ॥ ७२ ॥

ननु नियतिस्वभावभेदादेव कार्यभेदोऽस्तु, इत्याशङ्क्याह—

तस्या एव तथाभूतः स्वभावो यदि चेष्यते । त्यक्तो नियतिवादः स्यात्स्वभावाश्रयणान्ननु ॥ ७३ ॥

यदि च तस्या एव– नियतेरेव, तथाभूतः– कार्यवैचित्र्यप्रयोजकः, स्वभावभेद इष्यते, तदा 'ननु' इत्याक्षेपे, स्वभावाश्रयणाद् नियतिवादस्त्यक्तः स्यात् । अथ तत्स्वभावस्तत्परिपाक एवेति नान्यहेतुत्वाभ्युपगम इति चेत् । न, परिपाकेऽप्यन्यहेत्वाश्रयणावश्यकत्वात् । अन्यत्र परिपाकद्वैविध्यदर्शनेऽपि नियतिपरिपाकः स्वभावादेवेति चेत् । घट्टकुटीप्रभातापत्तिः । उत्तरपरिपाके पूर्वपरिपाक एव हेतुः, आद्यपरिपाके चान्तिमापरिपाक एव, इत्यादिरीत्या विशिष्य हेतु-हेतुमद्भावाद् न दोष इति चेत् । तर्ह्येकदैकत्र घटनियतिपरिपाकेऽन्यत्रापि घटोत्पत्तिः, प्रतिसंतानं नियतिभेदाभ्युपगमे च नियति-परिपाकयोर्द्रव्य-पर्यायनामान्तरत्व एव विवादः ।

किञ्च, एवं शास्त्रोपदेशवैयर्थ्यप्रसक्तिः, तदुपदेशमन्तरेणाऽप्यर्थेषु नियतिकृततत्त्वबुद्धेर्नियत्यैव भावात्, दृष्टा-ऽदृष्टफल-

१ ख. ग. घ. च. 'दृष्टफ' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शास्त्रप्रतिपादितशुभा-ऽशुभक्रियाफलनियमाभावश्च स्यात् । तद्धेतुकत्वान्तर्भावितनियमस्य नियतिप्रयोज्यत्वे च सिद्धमितरहेतुना, पारिभाषिककारणत्वप्रतिक्षेपस्याऽबाधकत्वादिति दिग् ॥ ७३ ॥

स्वभावाश्रयणेऽपि दोषमाह—

स्वो भावश्च स्वभावोऽपि स्वसत्तैव हि भावतः । तस्यापि भेदकाभावे वैचित्र्यं नोपपद्यते ॥७४॥

स्वभावोऽपि च स्वो भावः, कर्मधारयाऽऽश्रयणात्, एकपदव्यभिचारेऽपि तस्य बहुलमुपलम्भात् । अन्यभावपदार्थभ्रान्तिनिरासाय तद्विवरणमाह– हि निश्चितम्, भावतः– अध्यक्षविषयतया, स्वसत्तैव; तस्याऽपि– स्वभावस्य, भेदकाभावे– वैजात्याभावे, वैचित्र्यं– कार्यवैचित्र्यप्रयोजकत्वम्, नोपपद्यते ॥ ७४ ॥

ततस्तस्याविशिष्टत्वाद्युपगपद्विश्वसंभवः । न चासाविति सद्युक्त्या तद्वादोऽपि न संगतः ॥७५॥

ततः– वैचित्र्याभावात्, तस्य– स्वभावस्य अविशिष्टत्वात्– एकरूपत्वात्, विश्वजनकत्वे, युगपत्– एकदैव, विश्वसंभवः– जगदुत्पादप्रसङ्गः; न च स्याद् युगपज्जगदुत्पादः, भवति, इति हेतोः, सद्युक्त्या– अबाधिततर्केण, तद्वादोऽपि– स्वभाववादोऽपि, न संगतः । ननु स्वभावस्य क्रमवत्कार्यजनकत्वमपि स्वभावादेवेति नानुपपत्तिरिति चेत् । न, तस्यैव स्वभावस्य

१ सिद्धमित्यत्र भावे क्तः । २ तस्य– कर्मधारयस्य । ३ सर्वत्रादर्शेषु पाठोऽयं लेखकप्रमादकृतः प्रतिभाति 'न चासौ– यु' इति स्यात्, युक्तं स्यात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वोत्तरकार्यजनकत्वे पूर्वोत्तरकालयोरुत्तरपूर्वकार्यप्रसङ्गेन क्रमस्यैव व्याहतेः, एकस्यैव स्वभावस्य नानाजातिनियामकत्वे सर्वस्य सर्वजातीयत्वस्य, एकजातीयत्वस्य वा प्रसङ्गात् ॥ ७५ ॥

पराभिप्रायमाशङ्क्य परिहरति—

तत्तत्कालादिसापेक्षो विश्वहेतुः स चेन्ननु । मुक्तः स्वभाववादः स्यात्कालवादपरिग्रहात् ॥७६॥

तत्तत्कालादिसापेक्षः– तत्तत्क्षणादिसहकृतः, सः– स्वभावः, विश्वहेतुः, कालक्रमेण कार्यक्रमोपपत्तेरिति चेत् । 'ननु' इत्याक्षेपे, स्वभाववादो मुक्तः स्यात्, कालवादपरिग्रहात्– कालहेतुत्वाश्रयणात् । ननु क्षणिकस्वभावे नाऽयं दोष इत्युक्तमेवेति चेत् । उक्तम्, परं न युक्तम्, एकजातीयहेतुं विना कार्यैकजात्याऽसंभवात्; कुर्वद्रूपत्वस्य च जातित्वाभावेन घटं प्रति घटकुर्वद्रूपत्वेन हेतुत्वस्य वक्तुमशक्यत्वात्, सामग्रीत्वेन कार्यव्याप्यत्वस्य वास्तविकत्वेन गौरवस्याऽदोषत्वात्, प्रत्यभिज्ञादिबाधेन क्षणिकत्वस्य निषेत्स्यमानत्वाच्च । किञ्च, एकत्र घटकुर्वद्रूपसत्त्वेऽन्यत्र घटानुत्पत्तेर्देशनियामकहेत्वाश्रयणे स्वभाववादत्यागः, दण्डादौ घटादिहेतुत्वं प्रमायैव प्रेक्षावत्प्रवृत्तेश्च; अन्यथा दण्डादिकं विनाऽपि घटादिसंभावनया निष्कम्पप्रवृत्त्यनुपपत्तेरिति दिग् । न च निर्हेतुका भावा इत्यभ्युपगमेनाऽपि स्वभाववादसाम्राज्यम्, तत्र हेतूपन्यासे वदतो व्याघातात्; तदुक्तम्—

"न हेतुरस्तीति वदन् सहेतुकं ननु प्रतिज्ञां स्वयमेव बाधते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथापि हेतुप्रलयार्दसौ भवेत्, प्रतिज्ञया केवलयाऽस्य किं भवेत्? ॥ १ ॥" इति ।

न च ज्ञापकहेतूपन्यासेऽपि कारकहेतुप्रतिक्षेपवादिनो न स्वपक्षबाधेति वाच्यम्; ज्ञानजनकत्वेनैव ज्ञापकत्वात्, अनियतावधित्वे कादाचित्कत्वव्याघातात्, नियतावधिसिद्धौ तत्त्वस्यैव हेतुत्वात्मकत्वाच्च; अन्यथा 'गर्दभाद् धूमः' इत्यपि प्रमीयेतेति । अधिकमग्रे ॥ ७६ ॥

अत एव कालवादोऽपि निरस्तः[1], इत्याह—

कालोऽपि समयादिर्यत्केवलः सोऽपि कारणम् । तत एव ह्यसंभूतेः कस्यचिन्नोपपद्यते ॥ ७७ ॥

कालोऽपि समयादिः– वर्त्तमद्रव्यपर्यायरूपः, अतिरिक्तकालपर्यायो वा; यद्– यस्माद्धेतोः[3], ततः, तत एव– समयादेः, हि– निश्चितम्, कस्यचित्– कस्यापि, असंभूतेः– अनुत्पत्तेः, केवलः– अन्यानपेक्षः, सोऽपि– कालोऽपि, कारणं नोपपद्यते, विवक्षितसमये कार्यान्तरस्याऽप्युत्पत्तिप्रसङ्गात् । न च तत्क्षणवृत्तिकार्ये तत्पूर्वक्षणहेतुत्वाभिधानाद् न दोष इत्युक्तमेवेति वाच्यम्, अग्रेभाविनस्तत्क्षणवृत्तित्वस्यैव फलत आपाद्यत्वात्, तत्क्षणवृत्तिकार्ये तत्पूर्वक्षणेन हेतुत्वम्, तदुत्तरक्षणविशिष्टे कार्ये तत्क्षणत्वेन वा[2], इति त्रिनिगमनाविरहाच्च ॥ ७७ ॥

---

१ असौ– प्रतिज्ञा, हेतुप्रलयात्– हेतुरहितैवेत्यर्थः, भवेदिति पूर्वपक्षः । २ कादाचित्कत्वस्यैव । ३ ख. ग. घ. च. 'तोस्तत ए' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोषान्तरमाह—

यतश्च काले तुल्येऽपि सर्वत्रैव न तत्फलम् । अतो हेत्वन्तरापेक्षं विज्ञेयं तद् विचक्षणैः ॥७८॥

यतश्च, काले– समयादौ, तुल्येऽपि– अविशिष्टेऽपि सति, तत्फलं– तत्कालजन्यं घटादि, सर्वत्रैव न, तन्त्वादौ तदनुपपत्तेः ; अतस्तत्फलं, विचक्षणैः– यौक्तिकैः, हेत्वन्तरापेक्षं– कालातिरिक्तदेशादिहेतुजन्यं, विज्ञेयम् । न च मृदोऽन्यत्र घटस्याऽनापत्तिरेव, काले हेतुसत्त्वेऽपि देशे कार्यानापत्तेरिति वाच्यम्, मृदजन्यत्वेन मृदवृत्तित्वस्याऽऽपाद्यत्वात् । मृदजन्यत्वं च जन्यतासंबन्धेन मृद्भिन्नत्वम् । अतो न तर्कमूलव्याप्त्यसिद्धिः । न च तत्स्वभावत्वादेव तस्य काचित्कत्वम्, फलतस्तत्स्वभावत्वस्यैवाऽऽपाद्यत्वादिति दिग् ॥ ७८ ॥

उपसंहारमाह—

अतः कालादयः सर्वे समुदायेन कारणम् । गर्भादेः कार्यजातस्य विज्ञेया न्यायवादिभिः ।७९।

अतः– उक्तहेतोः, कालादयः सर्वे समुदायेन स्वस्वप्रत्यासत्त्या, गर्भादेः कार्यजातस्य, न्यायवादिभिः, कारणम्– फलोपधायकाः, विज्ञेयाः ॥ ७९ ॥

इदमेव स्फुटतरशब्देनाह—

न चैकैकत एवेह क्वचित्किञ्चिदपीक्ष्यते । तस्मात्सर्वस्य कार्यस्य सामग्री जनिका मता ।८०। ॥ ८८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इह– जगति, न च– नैव, एकैकत एव नियत्यादेः, क्वचित्– क्वापि, किञ्चित्– किमपि घटादि, ईक्ष्यते– जायमानं प्रतीयते। तस्माद् हेतोः, सर्वस्य घटादेः कार्यस्य, सामग्री– कथञ्चित्तद्व्यतिरिक्ताऽव्यतिरिक्तहेतुसंहतिः, जनिका– कार्योपधायिका, मता– इष्टा। पूर्वं कारणसमुदाये कार्योपधायकत्वनियमः साधितः, इदानीं तु कार्ये कारणसमुदायोपाधेयत्वनियम इति तु तत्त्वम्। ननु कालाद्येकान्तप्रतिक्षेपेऽप्यदृष्टैकान्ताऽप्रतिक्षेपाद् न साध्यसिद्धिरिति चेत्। न, अदृष्टैकान्तवादेऽनिर्मोक्षापत्तेः। मोक्षस्य कर्माजन्यत्वात्, आत्मस्वरूपावस्थानरूपो मोक्षः कर्मक्षयेणाभिव्यज्यत एव, न तु जन्यत एवेति चेत्। सत्यम्, कर्मक्षयस्यैव कर्म विनाऽनुत्पत्तेः। स्वप्रयोज्यज्ञानयोगसंबन्धेन पूर्वकर्मैव तत्र हेतुरिति चेत्। न, साक्षादेव तस्य हेतुत्वौचित्यात्; अन्यथा कर्मत्वस्यैव तेन संबन्धेन हेतुत्वप्रसङ्गात्। किञ्च, दृष्टकारणान्यनतिपत्य[1]ाऽदृष्टस्य कार्यजनकत्वात् तेषा[2]मपि तथात्व[3]मनिवारितम्; तद्विपाकेन तदुपक्षये तैस्तद्विपाकोपक्षयस्यापि वक्तुं शक्यत्वात्, बलवत्त्वस्याऽप्युभयत्र "अब्भंतर-बज्झाणं[4]" इत्यादिना महता प्रबन्धेनाऽन्यत्राऽविशेषेणैव साधितत्वादिति दिग्॥ ८०॥

'अत्र कालादयश्चत्वारोऽपि स्वातन्त्र्येण हेतवः' इत्येके; 'काला-दृष्टे एव तथा[5], नियति-स्वभावयोस्त्वदृष्टधर्मत्वेन न तथात्वम्' इत्यन्ये; इति मतभेदमाह––

स्वभावो नियतिश्चैव कर्मणोऽन्ये प्रचक्षते। धर्मावन्ये तु सर्वस्य सामान्येनैव वस्तुनः॥८१॥

---

१ अनतिपत्य– अनतिवृत्य, अनुल्लङ्घ्येत्यर्थः। २ दृष्टकारणानाम्। ३ हेतुत्वम्। ४ अभ्यन्तर-बाह्यानाम्। ५ तथा– स्वातन्त्र्येण हेतू।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्य आचार्याः, स्वभावो नियतिश्च, एवकारस्य 'कर्मणः' इत्युत्तरं संबन्धात् कर्मण एव धर्मौ 'इति' इत्यध्याह्रियते, इति प्रचक्षते- अभ्युपगमप्रकर्षेण व्याख्यान्तीति योजना; उद्भूतरूपादिवस्तुस्वभावहेतोः स्वभावस्य वह्नेरूर्ध्वज्वलनादिनियमरूपार्थम्, नियतेश्चाऽदृष्ट एव स्वीकारादित्याशयः। अन्ये त्वाचार्याः, सामान्येनैव- दृष्टा-ऽदृष्टसाधारण्येनैव, सर्वस्य वस्तुनः स्वभावो नियतिश्च धर्मौ, इति 'प्रचक्षते' इति प्राक्तनेन योजना। अत्र स्वभावस्तथाभव्यात्मिका जातिः कार्यैकजात्याय, नियतिश्चातिशयितपरिणतिरूपा कार्यातिशयाय सर्वत्रोपयुज्यत इति। अधिकमन्यत्र ॥ ८१ ॥

इति श्रीपण्डितपद्मविजयसोदरपण्डितयशोविजयविरचितायां स्याद्वादकल्पलताभिधानायां
शास्त्रवार्तासमुच्चयटीकायां द्वितीयः स्तबकः संपूर्णः ॥

अभिप्रायः सूरेरिह हि गहनो दर्शनततिर्निरस्या दुर्धर्षा निजमतसमाधानविधिना।
तथाप्यन्तः श्रीमन्नयविजयविज्ञांह्रिभजने न भग्ना चेद् भक्तिर्न नियतमसाध्यं किमपि मे ॥ १ ॥
यस्यासन् गुरवोऽत्र जीतविजयप्राज्ञाः प्रकृष्टाशया भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः।
प्रेम्णा यस्य च सद्म पद्मविजयो जातः सुधीः सोदरस्तेन न्यायविशारदेन रचिते ग्रन्थे मतिर्दीयताम् ॥ २ ॥

१ ग. घ. च. 'दृष्टसा'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

अथ तृतीयः स्तबकः ।

सर्वः शास्त्रपरिश्रमः शमवतामाकालमेकोऽपि यत्साक्षात्कारकृते धृते हृदि तमो लीयेत यस्मिन्मनाक् ।
यस्यैश्वर्यमपङ्किलं च जगदुत्पाद-स्थिति-ध्वंसनैस्तं देवं निरवग्रहग्रहमहाऽऽनन्दाय वन्दामहे ॥ १ ॥

सामग्र्यामीश्वरोऽपि निविशत इति वार्तान्तरमाह—

ईश्वरः प्रेरकत्वेन कर्ता कैश्चिदिहेष्यते। अचिन्त्यचिच्छक्तियुक्तोऽनादिसिद्धश्च सूरिभिः॥१॥

इह– सामग्र्याम्, कैश्चित् सूरिभिः– पातञ्जलाचार्यैः, प्रेरकत्वेन– परप्रवृत्तिजनकत्वेन, ईश्वरः कर्तेष्यते । कीदृशः ?, इत्याह– अचिन्त्या-इन्द्रियादिप्रणालिकां विनाऽपि यथावत्सर्वविषयावच्छिन्ना या चिच्छक्तिश्चेतना, तया युक्तस्तदाश्रयः, तथा, अनादिसिद्धश्च, कदापि बन्धाभावात् । त्रिविधो हि तैर्बन्ध उच्यते, प्राकृतिक-वैकारिक-दाक्षिणभेदात् । तत्र प्रकृतावात्मताज्ञानाद् ये प्रकृतिमुपासते तेषां प्राकृतिको बन्धः, यान् प्रतीदमुच्यते—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः।" इति।

ये तु विकारानेव भूते-न्द्रिया-ऽहङ्कार-बुद्धीः पुरुषबुद्ध्योपासते, तेषां वैकारिको बन्धः, यान् प्रतीदमुच्यते—

"दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः॥ १॥
बौद्धाः[1] शतसहस्राणि तिष्ठन्ति विगतज्वराः।" इति।

इष्टापूर्ते दाक्षिणो बन्धः, पुरुषतत्त्वानभिज्ञो हीष्टापूर्तकारी कामोपहतमना बध्यत इति। इयं च त्रिविधापि बन्धकोटिरीश्वरस्य मुक्तिं प्राप्यापि भवे पुनरेष्यतां प्रकृतिलीनत्वज्ञानानां योगिनामिव नोत्तरा, नवा पूर्वा, संसारिमुक्तात्मनामिव, इति निर्बाधमनादिसिद्धत्वम्। तथा चाह पतञ्जलिः– "क्लेश-कर्मविपाका-ऽऽशयैरपरामृष्टः पुरुषविशेष ईश्वरः"[2] इति। क्लेशाः– अविद्या-ऽस्मिता-राग-द्वेषा-ऽभिनिवेशाः, कर्माणि शुभा-ऽशुभानि, तद्विपाको जात्यायुर्भोगाः; आशयाः– नानाविधास्तदनुगुणाः संस्काराः, तैरपरामृष्टोऽसंस्पृष्टः, सर्वज्ञतया भेदाऽग्रहनिमित्तकाऽविद्याऽभावात्, तस्या एव च भवहेतुसर्वक्लेशमूलत्वात्; तथाच सूत्रम्– "अविद्या[3] क्षेत्रमुत्तरेषां प्रसुप्त-तनु-विच्छिन्नो-दाराणाम्" इति। अनभिव्यक्तरूपेणावस्थानं सुप्तावस्था, अभिव्यक्तस्यापि सहकार्यभावात् कार्याऽजननं तन्ववस्था, अभिव्यक्तस्य जनितकार्यस्यापि केनचिद् बलवता सजातीयेन विजा-

१ बौद्धाः–बुद्धिशब्दाच्छैषिकोऽण्। २ योगसूत्रे १, २४। ३ योगसूत्रे २, ४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीयेन वा लब्धवृत्तिकेनाऽभिभवाद् भविष्यद्वृत्तिकत्वेनावस्थानं विच्छिन्नावस्था, अभिव्यक्तस्य प्राप्तसहकारिसंपत्तेरप्रतिबन्धेन लब्धवृत्तिकतया स्वकार्यकरत्वमुदारावस्था। तत्राद्यमवस्थाद्वयं प्रतिप्रसवाख्येन निर्बीजसमाधिना हीयते, अन्त्यं तु शुद्धसत्त्वमयेन भगवद्ध्यानेनेति। अविद्याऽभावात् तन्नाशजन्यं कथं तत्त्वज्ञानं तस्य?, इति चेत्। अत एव नित्यं तत्, नित्यज्ञानवत्त्वादेव चायं कपिलप्रभृतिमहर्षीणामपि गुरुः ॥ १ ॥

तदिदमाह—

ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयम् ॥ २ ॥

यस्य जगत्पतेर्ज्ञानम्, अप्रतिघम्– नित्यत्वेन सर्वविषयत्वात् क्वचिदप्यप्रतिहतम्। वैराग्यं च– माध्यस्थ्यं च, रागाभावादप्रतिघम्। चः समुच्चये। एवोऽवधारणे। ऐश्वर्यं पारतन्त्र्याभावादप्रतिघम्, तच्चाष्टविधम्– अणिमा, लघिमा, महिमा, प्राप्तिः, प्राकाम्यम्, वशित्वम्, ईशित्वम्, यत्रकामावसायित्वं चेति। यतो महानणुर्भवति सर्वभूतानामप्यदृश्यः, सोऽणिमा। यतो लघुर्भवति सूर्यरश्मीनप्यालम्ब्य सूर्यलोकादिगमनसमर्थः, स लघिमा। यतोऽल्पोऽपि नाग-नगादिमानो भवति, स महिमा। यतो भूमिष्ठस्याप्यङ्गुल्यग्रे गगनस्थादिवस्तुप्राप्तिः, सा प्राप्तिः। प्राकाम्यमिच्छानभिघातः, यत उदक इव भूमावुन्मज्जति निमज्जति च। वशित्वम्– यतो भूत-भौतिकेषु स्वातन्त्र्यम्। ईशित्वम्– यतस्तेषु प्रभव-स्थिति-व्ययानामीष्टे। यत्रकामावसायित्वम्–

१ तच्छब्देनाऽविद्या परामृश्यते। २ ईश्वरत्वेनाभिमतस्य पुरुषस्य। ३ नागो हस्ती, नगः पर्वतः। ४ "स्मृत्यर्थदयेशः" ॥ २ । २ । ११ ॥ इति सूत्रेण कर्मसंज्ञाया विकल्पेन पक्षे षष्ठी।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतः सत्यसंकल्पता भवति, यथेश्वरसंकल्पमेव भूतभावादिति । धर्मश्च प्रयत्न-संस्काररूपोऽधर्माभावादप्रतिघः । एतच्चतुष्टयं सहसिद्धम्– अन्यानपेक्षतयाऽनादित्वेन व्यवस्थितम् । अत एव नेश्वरस्य कूटस्थताव्याघातः, जन्यधर्माऽनाश्रयत्वादिति बोध्यम् ॥२॥

तस्य कर्तृत्वे युक्तिमाह—

अज्ञो जन्तुरनीशोऽयमात्मनः सुख-दुःखयोः । ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥३॥

अयं संसारी जन्तुः, आत्मनः सुख-दुःखयोर्जायमानयोः, अनीशः– अकर्ता, यतोऽज्ञः– हिता-ऽहितप्रवृत्ति-निवृत्त्युपायानभिज्ञः, अतः स्वर्गं वा, श्वभ्रमेव वा– नरकमेव वा, ईश्वरप्रेरितो गच्छेत्, अज्ञानां प्रवृत्तौ परप्रेरणाया हेतुत्वावधारणात्, पश्वादिप्रवृत्तौ तथादर्शनात्, अचेतनस्यापि चेतनाधिष्ठानेनैव व्यापाराच्च । अत एव

" मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् । तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ॥ १ ॥ "

इत्यागमेन सर्वाधिष्ठानत्वं भगवतः श्रूयते, इति पातञ्जलाः ।

नैयायिकास्तु वदन्ति—

" कार्या-ऽऽयोजन-धृत्यादेः पदात् प्रत्ययतः श्रुतेः । वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥१॥ " इति ।

अस्याऽर्थः– कार्यादीश्वरसिद्धिः, कार्यं सकर्तृकम्, कार्यत्वात्, इत्यनुमानात् । न च कार्यत्वस्य कृतिसाध्यत्वलक्षणस्य

१ कुसुमाञ्जलौ पञ्चमे स्तबके कारिका १ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षित्यादावसिद्धिरिति वाच्यम्, कालत्रयस्यत्यन्ताभावप्रतियोगित्वे सति, प्रागभावप्रतियोगित्वे सति, ध्वंसप्रतियोगित्वे सति वा सत्त्वस्य हेतुत्वात्। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वाच्च न कार्यस्य घटादेः सकर्तृकत्वसिद्ध्याऽंशतः सिद्धसाधनम्; न वा पक्षतावच्छेदकस्य हेतुत्वं दोषः, 'कार्यत्वं साध्यसमानाधिकरणम्' इति सहचारग्रहेऽपि 'कार्यं सकर्तृकम्' इति बुद्धेरभावाच्च। ननु तथापि सकर्तृकत्वं यदि कर्तृसाहित्यमात्रम्, तदाऽस्मदादिना सिद्धसाधनम्; यदि च कर्तृजन्यत्वम्, तदा बाधोऽपि, ज्ञानादेरेव जनकतया कर्तुरजनकत्वादिति चेत्। न, प्रत्यक्षजन्यत्वेच्छाजन्यत्वादिना साध्यतायामदोषात्। अदृष्टाद्वारा जन्यत्वस्य, विशेष्यतासंबन्धावच्छिन्नकारणताप्रतियोगिकसमवायावच्छिन्नजन्यत्वस्य वा साध्यत्वाच्च नाऽदृष्टजनकास्मदादिज्ञानजन्यत्वेन सिद्धसाधनम्, अर्थान्तरं वा।

अथाऽत्र शरीरजन्यत्वमुपाधिः, अङ्कुरादौ साध्यव्यापकतासंदेहे संदिग्धोपाधितासाम्राज्यात्; तदाहितव्यभिचारसंशयेनाऽनुमानप्रतिरोधात्, लाघवाद् व्यभिचारज्ञानत्वेनैव व्याप्तिधीविरोधित्वात्, पक्ष-तत्समयोरपि व्यभिचारसंशयस्य दोषत्वादिति चेत्। 'न, प्रकृते ज्ञानत्वादि-कार्यत्वाभ्यां हेतु-हेतुमद्भावनिश्चयात्, लाघवतर्कावतारे तदुपाधिसंशयस्याऽविरोधित्वात्, अनुकूलतर्कानवतार एव संदिग्धोपाधेर्व्यभिचारसंशयाधायकत्वात्; अन्यथा पक्षेतरत्वोपाधिशङ्कया प्रसिद्धानुमानस्याऽप्युच्छेदप्रसङ्गात्' इत्येके।

परे तु– स्वोपादानगोचराऽस्वजनकाऽदृष्टाऽजनिका या कृतिस्तदजन्यं समवेतं जन्यं स्वोपादानगोचरस्वजनकादृष्टजनकान्यापरोक्षज्ञान-चिकीर्षाजन्यम्, कार्यत्वात्। घटादावंशतः सिद्धसाधनवारणाय तदजन्यान्तम्, तादृशकृतिजन्यं यत् यत्स्वं तद्भि-

न्तत्वं तदर्थः; नातो द्व्यणुकादेरुपादानगोचरतादृशकृत्यप्रसिद्ध्या पक्षत्वाभावप्रसङ्गः । तत्र शब्द-फूत्कारादेरपक्षत्वे संदिग्धसाध्यकत्वेन तत्राऽनैकान्तिकत्वसंशयः स्यात्, अतः प्रतियोगिकोटौ गोचरान्तम्; शब्दादेर्मृदङ्गादिगोचरतादृशकृतिजन्यत्वेऽपि न स्वोपादानगोचरतादृशकृतिजन्यत्वमिति न दोषः । मन्त्रविशेषपाठपूर्वकस्पर्शजन्यकांश्यादिगमनस्य स्पर्शजन्याऽदृष्टद्वारा स्वोपादानकांश्यगोचरस्पर्शजनकजन्यकृतिजन्यस्याऽपक्षत्वे तत्र संदिग्धानैकान्तिकत्वं स्यात्, एवं स्वोपादानशरीरगोचरोर्ध्वचरणादितपःकृतिजन्यकालशरीरीयगौररूपादौ तत् स्यात्; अतस्तत्कोटौ 'स्वजनक'–इत्यादि; कांश्यचालनादिकं तु स्वजनकाऽदृष्टजनकजन्यकृतिजन्यमेवेत्यदोषः । ध्वंस-गगनैकत्वादिवारणाय 'समवेतम्' इति, जन्यमिति च । शब्द-फूत्कारादौ सिद्धसाधनवारणाय साध्ये गोचरान्तम् । उक्तकांश्यचालनादौ तद्वारणाय 'स्वजनक–' इत्यादि । न च साध्ये पक्षे च गोचरान्तद्वयं माऽस्तु, मृदङ्गादिगोचरकृतिजन्यशब्दादिस्तु पक्षबहिर्भूत एव दृष्टान्तोऽस्त्विति वाच्यम्; अदृष्टेतरव्यापारद्वाराऽस्मदादिकृतिजन्यत्वसिद्ध्याऽर्थान्तरप्रसङ्गवारणाय साध्ये तन्निवेशावश्यकत्वे, शब्दादावनैकान्तिकत्वसंशयवारणाय पक्षेऽपि तदावश्यकत्वात्; तादृशशब्दादिकर्तृतयापि भगवत्सिद्ध्ये पक्षे तन्निवेशेऽंशतः सिद्धसाधनवारणाय साध्ये तन्निवेशावश्यकत्वाच्च । एतेन 'स्वजनकाऽदृष्टजनकान्यत्वमप्युभयत्र माऽस्तु' इत्यपास्तम्, तादृशकांश्यचालनादिकर्तृतयाऽपि भगवत्सिद्ध्यर्थं पक्षे तदुपादाने साध्येऽप्यावश्यकत्वात् । यदि च 'स्वजनकादृष्टजनककृतेर्न स्वजनकत्वम्, मानाभावात्' इति विभाव्यते, तदा पक्षे तद् नोपादेयम्; साध्ये तु देयमेव, अन्यथा सर्गान्तरीयज्ञानादीनां द्व्यणुकाद्युपादानागोचरत्वेन द्व्यणुकादौ सिद्धसाधनाभावेऽप्युक्तकांश्यचालनादावदृष्टजनककृतिजन्यत्वसिद्ध्याऽर्थान्तरापत्तेर्वस्तुगत्या स्वोपादानगोचरकृतिजन्यं यत्, तत्त्वावच्छिन्नभेदकूटवत्त्वेन कांश्यचालनादे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रपि पक्षान्तर्गतत्वात्' इत्याहुः।

अन्ये तु– 'द्रव्याणि ज्ञाने-च्छा-कृतिमन्ति, कार्यत्वात्, कपालवत्। साध्यता विशेष्यतया, हेतुता च समवायेन; पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वाद् नांशतः सिद्धसाधनम्। न च बहिरिन्द्रियाऽग्राह्यत्वमुपाधिः, अनुकूलतर्केण हेतोर्व्याप्यतानिर्णये तदनवकाशात्। न च त्रितयस्य मिलितस्य साध्यत्वेऽप्रयोजकत्वम्, मिलितत्वेनाऽहेतुत्वात्, प्रत्येकं साध्यत्वे ज्ञाने-च्छावत्त्वेन साधने सर्गान्तरीयज्ञानादिना सिद्धसाधनमिति वाच्यम्; मिलितत्वेन साध्यत्वेऽपि कार्यकारणभावत्रयस्य प्रयोजकत्वात्। 'सर्गाद्यकालीनं द्रव्यं ज्ञानवत्, कार्यत्वात्, पक्षतावच्छेदककालावच्छेदेन साध्यसिद्धेः' इत्यप्याहुः।

'क्षित्यादिकं सकर्तृकम्, कार्यत्वात्' इत्येवाऽनुमानम्, प्रकृतिविचारानुकूलविवादविषयत्वेन च क्षित्यादीनामनुगमः, सकर्तृकत्वं च प्रतिनियतकर्तृनिरूपितः संबन्धो व्यवहारसाक्षिकः, घटादिदृष्टान्तदृष्टः[1], नित्यवर्गव्यावृत्त इति नानुपपत्तिः' इत्यपि केचित्।

आयोजनादपि[2], सर्गाद्यकालीनद्व्यणुककर्म प्रयत्नजन्यम्, कर्मत्वात्, अस्मदादिशरीरकर्मवत्, इत्यनुमानात्[3]। पर-

---

१ ख. ग. घ. च. 'दिदृष्टः'। २ द्व्यणुकारम्भकसंयोगजनकं सर्गाद्यकालीनपरमाणुकर्मात्रमायोजनम्, आयुज्यते संयुज्यतेऽन्योन्यं द्रव्यमनेनेति व्युत्पत्तेः, इदं च 'साध्यो विश्वविदव्ययः' इति कुसुमाञ्जलिकारिकान्त्यपादेन, तत्कारिकाव्याख्यानप्रारम्भेऽत्र ग्रन्थे स्थितेन 'ईश्वरसिद्धिः' इत्यनेन वाऽन्वीयते; एवमुत्तरत्रापि 'धृतेरपि, नाशादपि, पदादपि, प्रत्ययतः' इत्यादिषु सर्वत्र विज्ञेयम्। ३ अचेतनत्वात् परमाणूनां चेतनोत्पादितकर्मत्वेनैव वास्यादिवत् प्रवृत्तेरभ्युपगमनीयत्वात्, तादृशचेतनावत एव चेश्वरवद्वाच्यत्वेन स्वीकारादिति पूर्वपक्षाभिप्रायः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माणोरेव तादृशप्रयत्नवत्त्वे जडताहानिः स्यात्[1] ।

अदृष्टं तु तत्र[2] दृष्टहेत्वनपेक्षं न हेतुः, [3]तथात्वे दृष्टहेतूच्छेदापत्ते[4]ः कर्मण एवाऽनुत्पत्तिप्रसङ्गात् । चेष्टात्वमुपाधिरिति चेत् । किं तत्[5] ? । प्रयत्नजन्यक्रियात्वमिति चेत् । न, तत्रैव त[6]स्यैवाऽनुपाधित्वात् । हिता-ऽहितप्राप्ति-परिहारफलत्वं[7]मिति चेत् । न, [8]विषभक्षणा-ऽहिलङ्घनाद्यव्यापनात् । शरीरसमवायिक्रियात्वं [9]तदिति चेत् । न, मृतशरीरक्रियाया अतथात्वात् । जीवत इति चेत् । न, नेत्रस्पन्दादेरतथात्वात् । स्पर्शवद्द्रव्यान्तराप्रेरणे सति शरीरक्रियात्वं तत्, शरीरपदोपादानाद् न ज्वलन-पवनादिक्रियाऽतिव्याप्तिरिति चेत् । न, शरीरत्वस्य चेष्टाघटितत्वात् । चेष्टात्वं सामान्यविशेषो यत उन्नीयते, प्रयत्नपूर्विकेयं क्रियेति चेत् । न, क्रियामात्रेण तदुन्नयनात् ।

धृतेरपि, ब्रह्माण्डादिपतनाभावः पतनप्रतिबन्धकप्रयुक्तः, धृतित्वात्, उत्पतत्पतत्रिपतनाभाववत्, तत्पतत्रिसंयुक्ततृणादिधृतिवद् वा । [10]एतेनेन्द्रा-ऽग्नि-यमादिलोकपालप्रतिपादका आगमा अपि व्याख्याताः, तेषां तदधिष्ठानदेशानामीश्वरावेशे-

१ तादृशप्रयत्नवत्त्वस्यैव स्वातन्त्र्यपदार्थत्वात्, तस्य च चेतनाधिष्ठानाऽविनाभावादिति भावः । २ सर्गाद्यकालीनद्व्यणुककर्मणि । ३ दृष्टहेत्वनपेक्षमेवाऽदृष्टस्य कारणत्वे । ४ द्व्यणुकादीनामप्यदृष्टादेवोत्पत्तेरित्यर्थः । ५ चेष्टात्वम् । ६ परमाणुक्रियायां हि प्रयत्नवदात्मसंयोगासमवायिकारणकत्वमेव चेतनाऽऽयोजितत्वमिति साध्यम्, न च तस्योपाधित्वम्, साधनव्यापकत्वेन साधनाव्यापकघटितस्योपाधिलक्षणस्यानन्वयादिति हृदयम् । ७ चेष्टात्वमिति संबध्यते, एवमुत्तरत्रापि । ८ विषभक्षणादिक्रियाया अहितमरणप्रापकत्वादिति भावः । ९ तत्– चेष्टात्वम्, एवमग्रेऽपि । १० एतेन– धारकप्रयत्नवत्त्वव्युत्पादनेनेत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैव पतनाभाववत्त्वात्। तथाच श्रुतिः "एतस्य चाक्षरस्य प्रशासने गार्गि, द्यावापृथिवी विधृते तिष्ठतः" इति । प्रशासनं–दण्डभूतः प्रयत्नः, आवेशस्तच्छरीरावच्छिन्नप्रयत्नवत्त्वमेव, सर्वावेशनिबन्धन एव च सर्वतादात्म्यव्यवहार इति । "आत्मैवेदं सर्वम्, ब्रह्मैवेदं सर्वम्" इत्यादिकम् ।

आदिना नाशादपि, ब्रह्माण्डनाशः प्रयत्नजन्यः[1], नाशत्वात्, पाट्यमानपटनाशवदिति ।

पदादपि, पद्यते गम्यतेऽनेनेति पदं व्यवहारः, ततः, घटादिव्यवहारः, स्वतन्त्रपुरुषप्रयोज्यः, व्यवहारत्वात्, आधुनिककल्पितलिप्यादिव्यवहारवत्, इत्यनुमानात् । न च पूर्वपूर्वकुलालादिनैवाऽन्यथासिद्धिः, प्रलयेन तद्विच्छेदात् ।

प्रत्ययतः– प्रमायाः, वेदजन्यप्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या, शाब्दप्रमात्वात्, आधुनिकवाक्यजशाब्दप्रमावत् ।

श्रुतेरपि, वेदोऽसंसारिपुरुषप्रणीतः, वेदत्वात्, इति व्यतिरेकिणः । न च परमते साध्याऽप्रसिद्धिः, 'आत्मत्वमसंसारिवृत्ति, जातित्वात्' इत्यनुमानेन पूर्वं साध्यसाधनात् ।

वाक्यादपि, वेदः पौरुषेयः, वाक्यत्वात्, भारतवत्, इत्यन्वयिनः ।

संख्याविशेषः– द्व्यणुकपरिमाणजनिका संख्या, ततोऽपि; इयं संख्या, अपेक्षाबुद्धिजन्या, एकत्वान्यसंख्यात्वात्, इत्यस्मदाद्यपेक्षाबुद्ध्यजन्यत्वादतिरिक्तापेक्षाबुद्धिसिद्धौ तदाश्रयतयेश्वरसिद्धेः । न चासिद्धिः, द्व्यणुकपरिमाणं संख्याजन्यम्, जन्यपरिमाणत्वात्, घटादिपरिमाणवत् । न वा दृष्टान्तासिद्धिः, द्विकपालादिपरिमाणात् त्रिकपालादिघटपरिमाणोत्कर्षादिति दिग् ।

---

१ स्वजनकप्रयत्नसमानकालीनचरमकारणनाशप्रतियोगीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथवा, कार्यं[1]– तात्पर्यं वेदे, यस्य तत्, स एवेश्वरः । आयोजनं सद्व्याख्या, वेदाः केनचिद् व्याख्याताः, महाजनपरिगृहीतवाक्यत्वात् । अव्याख्यातत्वे तदर्थानवगमेऽननुष्ठानापत्तेः, एकदेशदर्शिनोऽस्मदादेश्च व्याख्यायामविश्वासः, इति तद्व्याख्येश्वरसिद्धिः । धृतिर्धारणं मेधाख्यज्ञानम्, आदिपदार्थोऽनुष्ठानम्; ततोऽपि, वेदा वेदविषयकजन्यधारणान्यधारणाविषयाः, धृतिवाक्यत्वात्, लौकिकवाक्यवत्; यागादिकं यागादिविषयकजन्यज्ञानान्यज्ञानवदनुष्ठितम्, अनुष्ठितत्वात्, गमनवत्, इति प्रयोगः । पदं प्रणवेश्वरादिपदम्, तत्सार्थक्यात्, स्वतन्त्रोच्चारपितृशक्तश्रुत्यादिस्थाऽहंपदाद् वा । न चेश्वरादिपदस्य स्वपरता,

"सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडन्तरङ्गाणि[2] महेश्वरस्य ॥ १ ॥"

इत्यादिवाक्यशेषेण 'ईश्वरमुपासीत' इत्यादिविधिस्थेश्वरादिपदशक्तिग्रहात्, यथा यवादिपदस्य "वसन्ते[3] सर्वशस्यानां" इत्यादिवाक्यशेषाच्छक्तिग्रहेण न कङ्ग्वादिपरता ।

प्रत्ययो विधिप्रत्ययः, ततोऽपि, आप्ताभिप्रायस्यैव विध्यर्थत्वात् । न हीष्टसाधनत्वमेव तथा, 'अग्निकामो दारूणि मथ्नीयात्' इत्युक्तौ, 'कुतः ?' इति प्रश्ने 'यतो दारुमथनमग्निसाधनम्' इत्युत्तरेऽग्निसाधनत्वेन विध्यर्थवत्त्वानुमानानुपपत्तेः, अभेदे हेतुत्वेनोपन्यासानौचित्यात्, 'तरति मृत्युम्' इत्यादौ विधिवाक्यानुमानानुपपत्तेश्चेष्टसाधनतायाः प्रागेव बोधात्; 'कुर्याः, कुर्याम्'

---

१ "पिताऽहमस्य जगतो माता धाता पितामहः" इत्यादौ । २ 'षडाहुरङ्गानि' इत्यन्यत्र ग्रन्थे पाठः । ३ "जायते पत्रशातनम्; मोदमानाश्च तिष्ठन्ति, यवाः कणशशालिनः" इति शेषं पादत्रयम् । आदिना 'वराहं गावोऽनुधावन्ति' इत्यादि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादौ वक्तृसंकल्पस्यैव बोधात् , आज्ञा-ध्येषणा-ऽनुज्ञा-संप्रश्न-प्रार्थना-ऽऽशंसालिङ्गीच्छाशक्तत्वस्यैव कल्पनाच्च– उल्लङ्घने क्रोधादिभयजनिकेच्छाऽऽज्ञा, अध्येषणीये प्रयोक्तुरनुग्रहद्योतिकाऽध्येषणा, निषेधाभावव्यञ्जिकाऽनुज्ञा, प्रयोजनादिजिज्ञासा प्रश्नः, प्राप्तीच्छा प्रार्थना, शुभेच्छाऽऽशंसा; निषेधानुपपत्तेश्चेष्टसाधनत्वनिषेधस्य बाधात् ; बलवदनिष्टाननुबन्धित्वस्यापि तदर्थत्वे 'श्येनेन' इत्यादावलसस्य यागादिदुःखेऽपि बलवद्द्वेषेण 'यजेत' इत्यादौ बाधात् । तत आप्ताभिप्रायस्यैव विध्यर्थत्वात् तादृशाभिप्रायवदीश्वरसिद्धिः । श्रुतिः– ईश्वरविषयो वेदः, ततः; 'यज्ञो वै विष्णुः' इत्यादेर्विध्येकवाच्यतया "यद् न दुःखेन संभिन्नम्"[1] इत्यादिवत् तस्य स्वार्थ एव प्रामाण्यात् । वाक्यात्–वैदिकप्रशंसा-निन्दावाक्यात् , तस्य तदर्थज्ञानपूर्वकत्वात् । संख्या "स्यामभूवम् , भविष्यामि " इत्याद्युक्ता । ततोऽपि स्वतन्त्रोच्चारयितृनिष्ठाया एव तस्या अभिधानादिति रहस्यम् ।

श्रुत्वैवं सकृदेनमीश्वरपरं सांख्या-ऽऽक्षपादागमं लोको विस्मयमातनोति, न गिरो यावत् स्मरेदार्हतीः ।
किं तावद्बदरीफलेऽपि न मुहुर्माधुर्यमुन्नीयते यावत्पीनरसा रसाद् रसनया द्राक्षा न साक्षात्कृता ? ॥ १ ॥ ३ ॥

॥ इत्थमभिहितेश्वरकर्तृत्वपूर्वपक्षवार्ता ॥

अथ समाधानवार्तामाह —

अन्ये त्वभिदधत्यत्र वीतरागस्य भावतः । इत्थं प्रयोजनाभावात् कर्तृत्वं युज्यते कथम् ? ॥४॥

---

१ अवशिष्टं पादत्रयं तु– "न च ग्रस्तमनन्तरम् ; अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् " इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ये तु– जैनाः, अत्र– ईश्वरविचारे, अभिदधति– परीक्षन्ते । किम् ?, इत्याह– वीतरागस्य– वैराग्यवतः, ईश्वरस्य– पातञ्जलैरभ्युपगतस्य, इत्थं– प्रेरकत्वे, प्रयोजनाभावात् , भावतः– इच्छातः, कर्तृत्वं कथं युज्यते ? । यो हि परप्रेरको दृष्टः स स्वप्रयोजनमिच्छन्निष्टः, ततोऽत्र व्यापिकायाः फलेच्छाया अभावाद् व्याप्यस्य परप्रेरकत्वस्याऽभावः ॥ ४ ॥

एतदेव स्पष्टयन्नाह—

नरकादिफले कांश्चित्कांश्चित्स्वर्गादिसाधने । कर्मणि प्रेरयत्याशु स जन्तून्केन हेतुना ? ॥५॥

सः– ईश्वरः, कांश्चिज्जन्तून् नरकादिफले– ब्रह्महत्यादौ, कर्मणि, कांश्चित् स्वर्गादिसाधने– यम-नियमादौ वा, आशु– शीघ्रम् , केन हेतुना प्रेरयति ? । क्रीडादिप्रयोजनाभ्युपगमे राग-द्वेषाभ्यां वैराग्यव्याहतिः, प्रयोजनानभ्युपगमे च तन्मूलकप्रेरणाभावात् सिद्धान्तव्याघातः, इत्युभयतः पाशा रज्जुरिति भावः ॥ ५ ॥

पराभिप्रायमाशङ्क्य निराकरोति—

स्वयमेव प्रवर्तन्ते सत्त्वाश्चेच्चित्रकर्मणि । निरर्थकमिहेशस्य कर्तृत्वं गीयते कथम् ? ॥६॥

सत्त्वाः, चित्रकर्मणि– ब्रह्महत्या-यम-नियमादौ, स्वयमेव– तमः-सत्त्वोद्रेकेण तथाविधबुद्ध्यंशव्यापारावेशेनैव, प्रवर्तन्ते– कर्तृत्वेनाऽभिमन्यन्ते । प्रयोजनज्ञानार्थं परमीश्वरापेक्षेति चेत् । इह– कर्मणि, निरर्थकमीशस्य कर्तृत्वं कथं ॥ ९५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गीयते ? । प्रयोजनज्ञानं हि प्रवर्तनार्थमुपयुज्यते, प्रवृत्तिश्च यदि स्वत एवोपपन्ना, तदेश्वरसिद्धिव्यसनं गृहलब्ध एव धने विदेशगमनप्रायम् ॥ ६ ॥

अभिप्रायान्तरमाशङ्क्य निराकुरुते—

फलं ददाति चेत्सर्वं तत्तेनेह प्रचोदितम् । अफले पूर्वदोषः स्यात्सफले भक्तिमात्रता ॥७॥

सर्वं तत्– चित्रं कर्म, इह– जगति, तेन– ईश्वरेण, प्रचोदितम्– अधिष्ठितं सत्, फलं– सुख-दुःखादिकम्, ददाति– उपपद्यते, अचेतनस्य चेतनाधिष्ठितस्यैव कार्यजनकत्वादिति चेत्। अफले– स्वतश्चित्रफलदानासमर्थे कर्मण्यभ्युपगम्यमाने, पूर्वदोषः– पूर्वोक्तः स्वर्ग-नरकादिफलाऽनियमदोषः, स्यात् । सफले– स्वतश्चित्रफलदानसमर्थे कर्मणि त्वभ्युपगम्यमाने, भक्तिमात्रता– ईश्वरे भक्तिमात्रं स्यात्, हरीतकीरेचकन्यायात्। अचेतनं चेतनाधिष्ठितमेव जनकमिति नियमस्त्वताद्दशस्यापि वनबीजस्याऽङ्कुरजननत्वदर्शनादसिद्धः। तस्यापि पक्षतायाम्, अन्यत्रापि व्यभिचारिणः पक्षतायां निवेशेऽनैकान्तिकोच्छेदप्रसङ्गादिति भावः ॥ ७ ॥

आदिसर्गे तस्यैव स्वातन्त्र्यमित्याशङ्क्य निराकुरुते—

आदिसर्गेऽपि नो हेतुः कृतकृत्यस्य विद्यते । प्रतिज्ञातविरोधित्वात्स्वभावोऽप्यप्रमाणकः ॥८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदिसर्गेऽपि कृतकृत्यस्य– वीतरागस्य, हेतुः– प्रयोजनम्, न विद्यते, ततः कथमादिसर्गमप्ययं कुर्यात् ? । अथेदृशः स्वभाव एवाऽस्य, यत्प्रयोजनाभावेऽप्यादिसर्गं स्वातन्त्र्येणैव करोति, अन्यदा त्वदृष्टाद्यपेक्षयैवेति । अत आह– स्वभावोऽपि– प्रागुक्तः, अप्रमाणकः, धर्मिण एव चाऽसिद्धौ कुत्र तादृशः स्वभावः कल्पनीयः ? इति भावः ॥ ८ ॥

विश्वहेतुतया धर्मिग्राहकमानेन तादृशस्वभाव एव भगवान् साध्यते, इत्यभिप्रायादाह—

कर्मादेस्तत्स्वभावत्वे न किञ्चिद् बाध्यते विभोः। विभोस्तु तत्स्वभावत्वे कृतकृत्यत्वबाधनम्॥९॥

कर्मादेस्तत्स्वभावत्वे– ईश्वरमनपेक्ष्य जगज्जननस्वभावत्वे, न किञ्चिद् विभोः– परमेश्वरस्य, बाध्यते। विभोस्तु तत्स्वभावत्वे– स्वातन्त्र्येण, अन्यहेतुसापेक्षतया वा जगज्जननस्वभावत्वे; कृतकृत्यत्वबाधनम्, वीतरागत्वव्याहतेः, कारणतया प्रकृतित्वप्रसङ्गाच्च । अथ परिणामित्वाभावाद् न प्रकृतित्वम्, प्रयोजनाभावेन जन्येच्छाया अभावेऽपि नित्येच्छासत्त्वाद् न वैराग्यव्याहतिः, जन्येच्छाया एव रागपदार्थत्वात् । ऐश्वर्यमपि न जन्यम्, किन्तु तत्तत्फलावच्छिन्नेच्छैव । सर्गादौ रजःप्रभृत्युद्रेकोऽपि तत्र तत्कार्यकारितयैव गीयत इति न कूटस्थत्वहानिरिति चेत् ।

जल्पता गिरिशसाधने गिरं न्यायदर्शननिवेशपेशलाम् ।
सांख्य ! संप्रति निजं कुलं त्वया हन्त ! हन्त ! सकलं कलङ्कितम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

थत एवं कार्यजनकज्ञानादिसिद्धौ तदाश्रयतया बुद्धिरेव नित्या सिध्येत्, न त्वीश्वरः, बुद्धित्वस्यैव ज्ञानाद्याश्रयतावच्छेदकत्वात्। आत्मत्वस्य तदाश्रयतावच्छेदकत्वे तु जन्यज्ञानादीनामप्यात्माश्रिततया विलीनं प्रकृत्यादिप्रक्रियया; इति किमेतेन सह विचारप्रपञ्चेन ?।

नैयायिकोक्तरीत्यापि नेश्वरसिद्धिः, तथाहि– कार्येण तत्साधने आद्यानुमाने नाऽनुकूलस्तर्कः, तत्तत्पुरुषीयपटाद्यर्थिप्रवृत्तित्वावच्छिन्नं प्रति तत्तत्पुरुषीयपटादिमत्त्वप्रकारकोपादानप्रत्यक्षत्वेन हेतुत्वावश्यकत्वात्; प्रत्यक्षत्वेन कार्यसामान्यहेतुत्वे मानाभावात्; चिकीर्षाया अपि प्रवृत्तावेव हेतुत्वात्; कृतेरपि विलक्षणकृतित्वेनैव घटत्व-पटत्वाद्यवच्छिन्नहेतुत्वात्। न च प्रवृत्ताविव घटादावपि ज्ञाने-च्छयोरन्वय-व्यतिरेकाभ्यां हेतुत्वसिद्धेः; तत्र घटत्व-पटत्वादीनामानन्त्यात् कार्यत्वमेव साधारण्यात् कार्यतावच्छेदकम्, शरीरलाघवमपेक्ष्य संग्राहकलाघवस्य न्याय्यत्वात्; कृतेस्तु 'यद्विशेषयोः०' इति न्यायात् सामान्यतोऽपि हेतुत्वमिति वाच्यम्; कार्यत्वस्य कालिकेन घटत्व-पटत्वादिमत्त्वरूपस्य नानात्वात्, ध्वंसव्यावृत्त्यर्थं देयस्य सत्त्वस्य विशेषण-विशेष्यभावे विनिगमनाविरहेणाऽतिगुरुत्वाच्च। न च द्रव्यजन्यतावच्छेदकतया सिद्धं जन्यसत्त्वम्, अवच्छिन्नसमवेतत्वं वा तज्जन्यतावच्छेदकम्; तथापि प्रत्येकं विनिगमनाविरहात् 'यद्विशेषयोः०' इति न्याये मानाभावात्। किञ्च, एवं प्रायोगिकत्वमेव शैलादिव्यावृत्तं देवकुलाद्यनुवृत्तं सकलजनव्यवहारसिद्धं प्रयत्नजन्यतावच्छेदकमस्तु, व्याप्यधर्मत्वात्; इदमेवाऽभिप्रेत्य हेतु-
१७ विशेषविकल्पने कार्यसमत्वं सम्मतिटीकाकृता निरस्तम्।

१ भावे क्तप्रत्ययः। २ सांख्यापशदेनेत्यर्थः। ३ कार्यं सकर्तृकम्, कार्यत्वात्, इत्यत्र। ४ क. 'त्वात्'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्तु 'घटत्वाद्यवच्छिन्ने कृतित्वेन हेतुत्वेऽपि खण्डघटाद्युत्पत्तिकाले कुलालादिकृतेरसत्त्वादीश्वरसिद्धिः' इति दीधितिकृतोक्तम्। तत्तुच्छम्, अस्माभिस्तत्र घटे खण्डत्वपर्यायस्यैवाभ्युपगमात्; युक्तं चैतत्, प्रत्यभिज्ञोपपत्तेः, तत्र सादृश्यादिदोषेण भ्रमकल्पने गौरवात्। अत एव पाकेनापि नान्यघटोत्पत्तिः, विशिष्टसामग्रीवशाद् विशिष्टवर्णस्य घटादेर्द्रव्यस्य कथञ्चिदविनाशेऽप्युत्पत्तिसंभवात्, इति व्यक्तं सम्मतिटीकायाम्; परेषामपि स्वप्रयोज्यविजातीयसंयोगसंबन्धेन तत्काले सत्त्वाच्च। न च वैशेषिकनये श्यामघटादिनाशोत्तरं रक्तघटाद्युत्पत्तिकाले प्राक्तनपरमाणुद्वयसंयोगद्व्यणुकादेर्नाशाद् नैवं संभवतीति वाच्यम्; पूर्वसंयोगादिध्वंसपूर्वद्व्यणुकादिध्वंसानामुत्तरसंयोगद्व्यणुकादावन्ततः कालोपाधितयापि जनकत्वात्, तत्कालेऽपि कुलालादिकृतेः स्वप्रयोज्यविजातीयसंयोगेन सत्त्वात्; अन्यथा घटत्वावच्छिन्ने दण्डादिहेतुत्वमपि दुर्वचं स्यात्। दण्डादिजन्यतावच्छेदकं विलक्षणघटत्वादिकमेवेति चेत्। कृतिजन्यतावच्छेदकमपि तदेवेष्यताम्, कृतेर्लाघवाद् विशेष्यतयैव हेतुत्वात्। यत्र दण्डस्य स्वप्रयोज्यकपालद्वयसंयोगेन सत्त्वम्, न तु विशेष्यतया कुलालकृतिः, तत्रैव खण्डघटे तत्सिद्धिरिति चेत्। न, कृतेरपि स्वप्रयोज्यसंबन्धेनैव हेतुत्वात्, विजातीयसंयोगत्वेन संबन्धत्वे गौरवात्, घटत्वावच्छिन्ने विजातीयकृतित्वेनैव हेतुत्वाच्चेति दिक्।

किञ्च, उपादानप्रत्यक्षस्य लौकिकस्यैव हेतुत्वात् कथमीश्वरे तत्सिद्धिः?। अपिच, प्रणिधानाद्यर्थं मनोवहनाड्यादौ प्रवृत्तिस्वीकाराद् यद्धर्मावच्छिन्ने यदर्थिप्रवृत्तिः, तद्धर्मावच्छिन्ने तत्प्रकारकज्ञानमात्रस्य हेतुत्वात् कथमुपादानप्रत्यक्षमीश्वरस्य?। तस्यानुमितित्वे जन्यानुमितित्वं व्याप्तिज्ञानजन्यतावच्छेदकमिति गौरवोद्भावनं तु प्रत्यक्षत्वे जन्यप्रत्यक्षत्वस्येन्द्रियादिजन्यतावच्छे-

१ क. 'योगादेर्घ्यणु'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दकत्वकल्पनागौरवं नातिशेते। अपिच, तदुपादानप्रत्यक्षं निराश्रयमेवाऽस्तु; दृष्टविपरीतकल्पनभिया तु नित्यज्ञानादिकमपि कथं कल्पनीयम्? । अभिहितश्चायमर्थो 'बुद्धिश्चेश्वरस्य यदि नित्या व्यापिकैवाऽभ्युपगम्यते, तदा सैवाऽचेतनपदार्थाधिष्ठात्री भविष्यति, इति किमपरतदाधारेश्वरपरिकल्पनया?' इत्यादिना ग्रन्थेन सम्मतिटीकायामपि।

किञ्च, एवं नानात्मस्वेव व्यासज्यवृत्ति तत्कल्प्यताम्, स्वाश्रयसंयुक्तसंयोगसंबन्धेन तेषु तत्कल्पनापेक्षया समवायेन तत्कल्पनाया एव तव न्याय्यत्वात्। न चैवं घटादिभ्रमोच्छेदापत्तिः, बाधबुद्धिसत्त्वादिति वाच्यम्; बाधबुद्धिप्रतिबन्धकतायां चैत्रीयत्वस्यावश्यं निवेश्यत्वात्, तच्च समवेतत्वसंबन्धेन चैत्रवत्त्वं, पर्याप्तत्वेन वा, इति न किञ्चिद् वैषम्यम्।

अपि च, 'देवतासंनिधानेन' इति पक्षेण प्रतिष्ठादिना स्वाभेदस्वीयत्वादिज्ञानं तदाहितसंस्काररूपं ब्रह्मादौ स्वीकृतम्, न च ब्रह्मादीनामीश्वरभेदः, भगवद्गीताविरोधात्। एवं वैषयिकसुख-दुःखादिश्रवणाद् धर्मा-ऽधर्मावपि तत्राऽङ्गीकर्तव्यौ। न च विरोधः, ब्रह्मादिशरीरावच्छेदेनाऽनित्यज्ञानादिसत्त्वेऽप्यनवच्छिन्नज्ञानाविरोधात्। अत एवाऽन्ये तु 'स तपोऽतप्यत' इति श्रुतेः, अणिमादिप्रतिपादकश्रुतेश्च धर्मा-ऽधर्मावनित्यज्ञानादिकमपीश्वरे स्वीकुर्वन्ति, इति शशधरेऽभिहितम्। एतन्मते च बाधादिप्रतिबन्धकतायामवच्छिन्नसमवेतत्वेन चैत्रवत्त्वादिलक्षणचैत्रीयत्वादेरवश्यं निवेश्यत्वाद् नातिरिक्तनित्यज्ञानाश्रयसिद्धिः।

किञ्च, प्रवृत्तिविशेषे इच्छान्वय-व्यतिरेकवत्, प्रवृत्तिविशेषे द्वेषाऽन्वय-व्यतिरेकावपि दृष्टौ, दुःखद्वेषेण तत्साधनद्वेषे

१ नैयायिकस्य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्नाशानुकूलप्रवृत्तेः कण्टकादौ दर्शनात् । न च जिहासयैव द्वेषान्यथासिद्धिः; 'तद्धेतोः०' इति न्यायात्; अन्यथा द्वेषपदार्थ एव न स्यात्, 'द्वेष्मि' इत्यनुभवे क्वचिदनिष्टसाधनताज्ञानस्य, क्वचिच्चाऽनिष्टत्वज्ञानस्यैव द्वेषपदेन तथाभिलापात् । एवं च कार्यसामान्ये द्वेषस्याऽपि हेतुत्वसिद्धौ नित्यद्वेषोऽपीश्वरे सिध्येत् । द्वेषवतः संसारित्वप्रसङ्ग इति चेत् । चिकीर्षावतोऽपि किं न सः ? । द्वेष-चिकीर्षयोस्तत्र समानविषयत्वे करणा-ऽकरणप्रसङ्गः, भिन्नविषयत्वे च तत्कार्यं न कुर्यादेव, इति बाधकाद् द्वेषकल्पना त्यज्यत इति चेत् । एवमुत्तरकालोपस्थितबाधकेन तद्बाधोपगमे, नित्यज्ञानादिकल्पनागौरवादिबाधकेन क्लृप्तोऽपीश्वरस्त्यज्यताम् ।

एतेन 'पुरेषु पुरेशानामिव जगदीशज्ञानेच्छादित एव तत्तत्कार्याणां स्वल्पतमा-ऽधम-देश-कालादिनियमः, वदन्ति हि पामरा अपि– 'ईश्वरेच्छैव नियामिका' इति । न चैवं तत्तदेश-कालनियततत्तत्कार्योत्पत्तिज्ञानादित एव तत्तत्कार्यानिर्वाहे गतं दण्डादिकारणत्वेनेति वाच्यम्; तदनुमतत्वेनैव दण्डादीनां घटादिहेतुत्वात्; न हि दण्डादिरेव घटादेरनन्यथासिद्धनियतपूर्ववर्ती, न वेमादिः, कपालादि समवायि, न तन्त्वादिकम्, इत्यत्राऽन्यद् नियामकं पश्यामः, इति तदनुमत्यादिकमेव । तथा, तदनुमत्यादिकं न साक्षात्, किन्तु तत्तत्कारणद्वारा तत्तत्संपादकम् । न हि राजाज्ञादितोऽपि विनांशुकं तन्त्वादि, विना तन्त्वादिकं पटादि' इति पामराशयानुसरणसंक्रान्तं पामरभात्रानां मतमपास्तम्; राजाज्ञादितुल्यतयेश्वरेच्छाया अहेतुत्वात्, सामग्रीसिद्धस्य नियतदेश-कालत्वस्य तज्जन्यताघटकतया तदनियम्यत्वात्; अन्यथा तत्कालावच्छिन्नतद्घटावच्छिन्नविशेष्यत-

१ ख. ग. घ. च 'इज्ञा' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योपादाननिष्ठतयोपादानप्रत्यक्षादित्रयहेतुताकल्पने गौरवात्, समवेतत्वसंबन्धेनेश्वरीयत्वेन तत्रयानुगमेऽप्यसंसार्यात्मत्वलक्षणेश्वरत्वनिवेशे गौरवात्, प्रत्येकमादाय विनिगमनाविरहाच्च तत्कालावच्छिन्नतद्धटावच्छिन्नत्वसंबन्धेन नियतैरेव हेतुत्वकल्पनौचित्यात्, इतरकारणवैयर्थ्यापत्तेश्च। तदनुमतदण्डत्वादिनाऽहेतुत्वात्, दण्डादीनां हेतुत्वनियमस्य च स्वभावत एव संभवात्, न तदर्थमपीश्वरानुसरणम्, अन्यथा तज्ज्ञानादेस्तत्तत्कारणानुमतित्वेऽपि नियामकान्तरं गवेषणीयम्। धर्मिग्राहकमानेन तत् स्वतो नियतमेवेति चेत्। इदमपि तत एव किं न तथा ?। व्यवस्थितश्चायमर्थो 'न चाचेतनानामपि स्वहेतुसंनिधिसमासादितोत्पत्तीनां चेतनाधिष्ठातृव्यतिरेकेणापि देश-काला-ऽऽकारनियमोऽनुपपन्नः, तन्नियमस्य स्वहेतुबलायातत्वात्' इत्यादिना ग्रन्थेन सम्मतिटीकायामपि।

किञ्च, एतादृशनियामकत्वं भवस्थ-सिद्धादिज्ञान एव, इति किं [1]शिपिविष्टकल्पनाकष्टेन ?। तदिदमुक्तं हेमसूरिभिः—

"सर्वभावेषु कर्तृत्वं ज्ञातृत्वं यदि संमतम्। मतं नः[2], सन्ति सर्वज्ञा मुक्ताः कायभृतोऽपि हि" ॥ १ ॥ इति।

युक्तं चैतत्, "[3]जं जहा भगवया दिट्ठं तं तहा विपरिणामइ" इति भगवद्वचनस्यापीत्थमेव व्यवस्थितत्वात्। एवं च

"समालोच्य क्षुद्रेष्वपि भवननाथस्य भवने नियोगाद् भूतानां मितसमय-देश-स्थिति-लयम्।
अये ! केयं भ्रान्तिः सततमपि मीमांसनजुषां व्यवस्थातः कार्ये जगति जगदीशाऽपरिचयः ? ॥ १ ॥"

---

१ सिपिविष्टो महेशः। २ आर्हतानाम्। ३ यद् यथा भगवता दृष्टं तत् तथा विपरिणमते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति पद्येऽपि प्रतिपद्यमेवं मदीयम्—

पिनष्टीयं पिष्टं भवनियमसिद्धिव्यसितिः स्वभावाद् भूतानां मितसमयदेशस्थितिरिति ।
अये ! केयं भ्रान्तिः सततमपि तर्कव्यसनिनां वृथा यद्व्यापारो जगति जगदीशस्य कथितः ? ॥ १ ॥

इति दिग् । अत एवाऽग्रिमाण्यप्यनुमानान्यपास्तानि ।

किञ्च, [1]द्वितीयानुमाने 'स्वोपादान-' इत्यत्र स्वपदस्य द्व्यणुकादिपरत्वे साध्याप्रसिद्धिः, घटादिपरत्वे पटादौ संदिग्धानैकान्तिकत्वम्, स्वोपादानगोचरत्वादिनाऽऽपाततोऽपि हेतुत्वाभावतोऽत्यप्रयोजकत्वं च । [2]तृतीये ज्ञाने-च्छापदोपादानप्रयासः । [3]चतुर्थे सर्गासिद्ध्या परं प्रति पक्षासिद्धिः ।

[4]पञ्चमे तु क्षित्यादावकर्तृकत्वस्यैव व्यवहाराद् बाधः । विशेषान्वय-व्यतिरेकाभ्यां कर्तृत्वेन कार्यसामान्य एव हेतुत्वग्रहाद् न बाध इति चेत् । तर्हि शरीर-चेष्टयोरप्यन्वय-व्यतिरेकाभ्यां कार्यसामान्यहेतुत्वात् तयोरपि नित्ययोगीश्वरे प्रसक्तिः । अथ नित्यशरीरमिष्यत एव भगवतः । तत्र 'परमाणव एव प्रयत्नवदीश्वरात्मसंयोगाधीनचेष्टावन्त ईश्वरस्य शरीराणि' इत्येके । 'वायुपरमाणव एव नित्यक्रियावन्तस्तथा, अत एव तेषां सदागतित्वम्' इत्यन्ये । "आकाशशरीरं ब्रह्म" इति श्रुतः 'आकाशस्तच्छरीरम्' इत्यपरे । चेष्टाया नित्यत्वे तु मानाभावः, नित्यज्ञानसिद्धौ तु श्रुतिरपि पक्षपातिनी, "नित्यं विज्ञानं०" इत्यादि-

१. ९२ पत्रे प्रथमे पृष्ठे पङ्क्तिः १३ । २. ९२ पत्रे प्रथमे पृष्ठे पङ्क्तिः २ । ३. ९३ पत्रे प्रथमे पृष्ठे पङ्क्तिः ६ । ४. ९३ पत्रे प्रथमे पृष्ठे पङ्क्तिः ७ ।
५ तथा- ईश्वरस्य शरीराणीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

का; अत एव ज्ञानत्वावच्छेदेनाऽऽत्म-मनोयोगजन्यत्वं न बाधकमिति चेत्। न, ईश्वरसंबन्धस्य सर्वत्राऽविशेषेण 'इदमेवेश्वरशरीरम्' इति नियमायोगात्; चेष्टाया अपि ज्ञानवदेकस्या नित्यायाश्च स्वीकारौचित्यात्, उक्तश्रुतेस्त्वदभिमतेश्वरज्ञानापक्षपातित्वाच्च, अन्यथाऽऽनन्दोऽपि तत्र सिध्येत्, ज्ञाना-ऽऽनन्दभेदश्चेति दिग्।

आयोजनादपि नेश्वरसिद्धिः, ईश्वराधिष्ठानस्य सर्वदा सत्त्वेऽप्यदृष्टविलम्बादेवाऽऽद्याणुक्रियाविलम्बात्, तत्र तद्धेतुत्वावश्यकत्वात्, दृष्टकारणसत्त्व एवाऽदृष्टविलम्बेन कार्याविलम्बात्[1], अदृष्टस्य दृष्टाघातकत्वात्, चेष्टात्वस्याऽनुगतत्वेनोपाधित्वाच्च। तदवच्छिन्न एव हि जीवनयत्नव्यावृत्तेन प्रवृत्तित्वेन गमनत्वादि व्याप्यत्वे तु विलक्षणयत्नत्वेनैव हेतुत्वात् क्रियासामान्ये यत्नत्वेन हेतुत्वे मानाभावात्, 'यद्विशेषयोः०' इत्यादिन्याये मानाभावात्।

धृतेरपि नेश्वरः सिद्धिः, गुरुत्ववत्पतनाभावमात्रस्य गुरुत्वेतरहेत्वभावप्रयुक्तस्याऽऽम्रफलादावेव व्यभिचारित्वात्। प्रतिबन्धकाभावेतरसामग्रीकालीनत्वविशेषणे[2]ऽपि वेगवदिषुपतनाभावे तथात्वात्[3]। वेगाप्रयुक्तत्वस्यापि विशेषणत्वे मन्त्रविशेषप्रयुक्तगोलकपतनाभावे तथात्वात्[3]। अदृष्टाप्रयुक्तत्वस्यापि विशेषणत्वे च स्वरूपासिद्धिः, ब्रह्माण्डधृतेरप्यदृष्टप्रयुक्तत्वात्; तदुक्तम्—

"निरालम्बा निराधारा विश्वाधारो वसुन्धरा। यच्चावतिष्ठते तत्र धर्मादन्यद् न कारणम्॥ १॥" इति।

युक्तं चैतत्, ईश्वरप्रयत्नस्य व्यापकत्वेन समरेऽपि शरपाताऽनापत्तेः। पतनाभावावच्छिन्नेश्वरप्रयत्नस्य तथात्वे तादृश-

---

१ तच्छब्देनाऽदृष्टम्। २ ख. ग. घ. च. 'णे वे'। ३ व्यभिचारित्वादित्यर्थः।

ज्ञाने-च्छाभ्यां विनिगमनाविरहात् क्लृप्तजातीयस्याऽदृष्टस्यैव ब्रह्माण्डधारकत्वकल्पनौचित्यात्। न चात्माऽविभुत्ववादिनेः संबन्धानुपपत्तिः, असंबद्धस्यापि तत्कार्यजननशक्तस्य तत्कार्यकारित्वात्, अयस्कान्तस्याऽसंबद्धस्यापि लोहाऽऽकर्षकत्वदर्शनादिति; अन्यत्र विस्तरः। प्रयत्नस्य तु विलक्षणप्रयत्नत्वेन पतनप्रतिबन्धकसंयोगविशेष एव हेतुत्वम्।

ब्रह्माण्डनाशकतयापि नेश्वरसिद्धिः, प्रलयाऽनभ्युपगमात्, अहोरात्रस्याऽहोरात्रपूर्वकत्वव्याप्यत्वात्। न च वर्षादिनत्वेनाऽव्यवहितवर्षादिनपूर्वकत्वे साध्ये राशिविशेषावच्छिन्नरविपूर्वकत्ववदत्राव्यवहितसंसारपूर्वकत्वमुपाधिः, राशिविशेषे वर्षादिनस्य हेतुत्वेन तत्रानुकूलतर्केणोपाधेः साध्यव्यापकत्वग्रहेऽप्यनुकूलतर्काभावेन प्रकृत उपाधेरसमर्थत्वात्, कालत्वस्य भोग्यव्याप्यत्वाच्च। कर्मणां विषमविपाकतया युगपन्निरोधासंभवात्, सुषुप्तौ कतिपयाऽदृष्टनिरोधस्य दर्शनावरणरूपाऽदृष्टसामर्थ्यादेवोपपत्तेर्बलवताऽदृष्टेनाऽदृष्टान्तरप्रतिरोधदर्शनात्; प्रलये तु कथं तादृशादृष्टं विनाऽदृष्टनिरोधः स्यात्?, अन्यथा त्वनायाससिद्धो मोक्षः, इति किं ब्रह्मचर्यादिक्लेशानुभवेन?, इत्यन्यत्र विस्तरः। एतेन 'आद्यव्यवहारादीश्वरसिद्धिः, प्रतिसर्गं मन्वादीनां बहूनां व्यवहारप्रवर्तकानां कल्पने गौरवादेकस्यैव भगवतः सिद्धेः' इत्यपास्तम्, सर्गादेरेवाऽसिद्धेः, इदानीमिव सर्वदा पूर्वपूर्वव्यवहारेणैवोत्तरोत्तरव्यवहारोपपत्तेः। यदि तु सर्गादिरुपेयते, तदा तदानीं प्रयोज्य-प्रयोजकवृद्धयोरभावात् कथं व्यवहारः?।

अथ यथा मायावी सूत्रसंचाराधिष्ठितदारुपुत्रकं 'घटमानय' इत्यादि नियोज्य घटाऽऽनयनं संपाद्य बालकस्य व्यु-

१ कायप्रमाणात्मवादिनो जैनस्येत्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्पत्तौ प्रयोजकः, तथेश्वरोऽपि प्रयोज्य-प्रयोजकवृद्धीभूय व्यवहारं कृत्वाऽऽद्यव्युत्पत्तिं कारयति। न चाऽत्र चेष्टया प्रवृत्तिम्, तया ज्ञानम्, तज्ज्ञाने उपस्थितवाक्यहेतुत्वम्, तज्ज्ञानविषयपदार्थे चाऽऽवापो-द्वापाभ्यां तत्तत्पदज्ञानं हेतुत्वमनुमाय तत्तपदे तत्तदर्थज्ञानानुकूलत्वेन तत्तदर्थसंबन्धवत्त्वमनुमेयम्, एवं चाऽयं संबन्धग्रहो भ्रमः स्यात्, जनकज्ञानस्य भ्रमत्वात्, इति वाच्यम्; तत्त्वेऽपि विषयाऽबाधेन प्रमात्वात्, चरमपरामर्शस्य प्रमात्वसंभवाच्च। एवमीश्वर एव कुलालादिशरीरं परिग्रह्य घटादि संप्रदाय प्रवर्तकः, अत एव श्रुतिः– "कुलालेभ्यो नमः, कर्मारेभ्यः" इत्यादीति चेत्।

न, अदृष्टाभावेन प्रयोज्यादिशरीरपरिग्रहस्यैव भगवतोऽयुक्तत्वात्, अन्यादृष्टेनाऽन्यस्य शरीरपरिग्रहे चैत्राऽदृष्टाऽऽकृष्टं शरीरं मैत्रोऽपि परिगृह्णीयात्। प्राण्यदृष्टेन घटादिवत् तत्तच्छरीरोत्पत्तिः, तत्परिग्रहस्तु भगवतस्तदावेश एवेति न दोष इति चेत्। न, घटादावतथात्वेऽपि तदीयशरीरे तदीयाऽदृष्टत्वेनैव हेतुत्वात्, अन्यथाऽतिप्रसङ्गात्।

किञ्च, कोऽयमावेशः?। तदवच्छिन्नप्रयत्न एवेति चेत्। न, तदजन्यस्य प्रयत्नस्य तदनवच्छिन्नत्वात्। अथैवंभूताऽऽवेशानुपपत्तिः, तत्र हि भूतात्मन्येव चैत्राद्यवच्छेदेन प्रवृत्तिरङ्गीक्रियते, अन्यथा मृतशरीरे तदावेशानापत्तेरिति चेत्। इयमपि तैर्[1]वानुपपत्तिः, अस्माकं[2] तु तत्र संकोच-विकाशस्वभावभूतात्मप्रदेशानुप्रवेशादुपपत्तेः। तत्र त्ववच्छेदकतया चैत्रप्रयत्नं प्रति चैत्रशरीरत्वेनाऽवश्यं हेतुता वक्तव्या, अन्यथा मैत्रशरीरावच्छेदेन चैत्रप्रवृत्त्यापत्तेः; पाण्यादिचालकप्रयत्नसत्त्व एव पुन-

---

१ तव– नैयायिकस्य। २ अस्माकम्– जैनानाम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तदापत्तिवारणायाऽवच्छेदकतया तत्प्रयत्ने तया तद्भावस्य हेतोरापादकस्य सत्त्वात्, तत्तच्छरीरत्वेन तत्तत्प्रवृत्त्यादिहेतुत्वे गौरवात्, कायव्यूहस्थलेऽपि योगजाऽदृष्टोपगृहीतत्वसंबन्धेन तदात्मवत्त्वस्य सर्वशरीरानुगतत्वात् ।

अपि च, यथा कथञ्चिद् भूतावेशन्यायेन तच्छरीरपरिग्रहे जगदप्यावेशेनैव प्रवर्तयेत्, इति व्यर्थमस्य[1] वेदादिप्रणयनम् । कर्मवदस्याऽपि इष्टे-ष्टानतिलङ्घनेनैव प्रवर्तकत्वाद् नानुपपत्तिरिति चेत् । तर्हि परप्रवृत्तये वाक्यमुपदिशन् स्वेष्टसाधनताज्ञानादिकमपि कथमतिपतेत् ?, कथं वा चेष्टात्वावच्छिन्ने विलक्षणयत्नत्वेन हेतुत्वात् तदवच्छिन्नस्य विजातीयमनःसंयोगादिजन्यत्वात् तादृशप्रयत्नं विना ब्रह्मादिशरीरचेष्टा ?, विलक्षणचेष्टायां विलक्षणप्रयत्नस्य हेतुत्वात् । अत्रेश्वरीययत्न एव हेतुरिति चेत् । तर्हि तस्य[2] सर्वत्राविशिष्टत्वात् सर्वत्रापीश्वरचेष्टापत्तिः । विलक्षणचेष्टावच्छिन्नविशेष्यतया तत्प्रयत्नस्य हेतुत्वाद् नातिप्रसङ्ग इति चेत् । तर्हि चेष्टावैलक्षण्यसिद्धौ तथाहेतुत्वम्, तथाहेतुत्वे च तद्वैलक्षण्यमिति परस्पराश्रयः । किञ्च, स्वाधिष्ठातरि भोगाजनकशरीरादिसंपादनमपि तस्यैश्वर्यमात्रमेव, इति दृष्टविरोधेनैव जगत्प्रवृत्तिरायाता । एतेनैतत् प्रतिक्षिप्तम्—

"हेत्वभावे फलाभावात् प्रमाणेऽसति न प्रमा । तदभावात् प्रवृत्तिर्नो कर्मवादेऽप्ययं विधिः[3] ॥ १ ॥"

इति, कर्मणः कर्त्रादिसापेक्षत्वेनैव जगद्धेतुत्वात् । समर्थितं च

"धर्माऽधर्मौ विना नाङ्गं विनाऽङ्गेन मुखं कुतः ? । मुखाद् विना न वक्तृत्वं तच्छास्तारः परे कथम् ? ॥ १ ॥"

---

१ अस्य- ईश्वरस्य । २ तच्छब्देनेश्वरः । ३ कुसुमाञ्जलौ तृतीये स्तबके कारिका १८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति, शरीरस्य स्वोपात्तनामकर्महेतुत्वात्, तद्वैचित्र्येण तद्वैचित्र्यात्, अन्यथाऽङ्गो-पाङ्गवर्णादिप्रतिनियमानुपपत्तेरिति, अन्यत्र विस्तरः। तस्माद् मायाविवत् समयग्राहकत्वम्, घटादि संप्रदाय प्रवर्तकत्वं च पराभिमतेश्वरस्य मायावितामेव विद्याधरविशेषस्य व्यञ्जयति। पितुरिव पित्रादेर्युगादौ युगादीशस्य जगतः शिक्षया तु तथात्वं युक्तिमत्, स्वभावत एव तीर्थकृतां परोपकारित्वात्; अत एव "कुलालेभ्यो नमः" इत्याद्या श्रुतिः संगच्छत इति युक्तं पश्यामः। अनुमानेऽपि सिद्धसाधनं बोध्यम्।

प्रत्ययादिना तु वेदप्रामाण्यवादिनामाप्त-तद्वक्तृसिद्धावपि नेश्वरसिद्धिः, इति किमिह तदुपन्यासेन?। एतेन कार्यादिपदानामर्थान्तरमपि प्रयासमात्रम्। 'जन्यतत्प्रमासामान्ये तत्प्रमात्वेन गुणतया हेतुत्वात्, आद्यप्रमाजनकप्रमाश्रयतयेश्वरसिद्धिः' इति तु मूढानां वचः, घटत्वादिमद्वृत्तिविशेष्यतया तत्र घटत्वादिविषयत्वेनैव हेतुतया, संस्कारेणैव घटत्वादिसंबन्धहेतुतयैव वा तवापि निर्वाहात्; अस्माकं तु सम्यग्दर्शनस्यैव गुणत्वात्।

संख्याविशेषादपि नेश्वरसिद्धिः, तत्रापि लौकिकापेक्षाबुद्धेरेव तद्धेतुत्वात्, ममाप्यपेक्षाबुद्धेरेव तथाव्यवहारनिमित्तत्वात् तज्जन्यातिरिक्तसंख्यासिद्धेः; परिमाणेऽपि संघातभेदादिकृतद्रव्यपरिणामविशेषरूपे संख्याया अहेतुत्वाच्च, द्विकपालात् त्रिकपालघटपरिमाणोत्कर्षस्य दलोत्कर्षादेवोपपत्तेरिति। तत्त्वमत्रत्यमार्हतवार्तायां विवेचयिष्यते।

---

१ नामकर्मवैचित्र्येण। २ शरीरवैचित्र्यात्। ३ समयग्राहकत्वम्, घटादि संप्रदाय प्रवर्तकत्वं च। ४ कार्यं तात्पर्यमित्यादिना ग्रन्थेन पूर्वपक्षे ९४ पत्रे प्रतिपादितम्। ५ तव— नैयायिकस्य। ६ आर्हतवाची अस्मच्छब्दः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्माद् नेश्वरसिद्धौ किमपि साधीयः प्रमाणम्, नवा तदभ्युपगमेनापि तस्य सर्वज्ञत्वम्, उपादानमात्रज्ञानासिद्धाव-व्यतिरिक्तज्ञानासिद्धेः, कारणाभावात्, मानाभावाच्चेति दिग् ॥ ९ ॥

" संतुष्य नैयायिकमुख्य ! तस्मादस्माकमेवाऽऽश्रय पक्षमन्यम् ।
तवोच्चकैरीश्वरकर्तृताया मनोरथं संप्रति पूरयामः ॥ १ ॥
नयैः परानप्यनुकूलवृत्तौ प्रवर्तयत्येव जिनो विनोदे ।
उक्तानुवादेन पिता हितात् किं बालस्य नाऽऽलस्यमपाकरोति ? ॥ २ ॥ "

तदिदमाह—

ततश्चेश्वरकर्तृत्ववादोऽयं युज्यते परम् । सम्यग्न्यायाविरोधेन यथाहुः शुद्धबुद्धयः ॥१०॥

ततश्च- पातञ्जल-नैयायिकमतनिरासाच्च, अयं- तथाविधलोकप्रसिद्धः, ईश्वरकर्तृत्ववादः, परम्- उक्तविपरीतरीत्या, सम्यग्न्यायाविरोधेन- प्रतितर्काप्रतिहततर्कानुसारेण, युज्यते; यथा, शुद्धबुद्धयः- सिद्धान्तोपबृंहितमतयः परमर्षय आहुः ॥१०॥

तद्वचनमेवाऽनुवदति—

ईश्वरः परमात्मैव तदुक्तव्रतसेवनात् । यतो मुक्तिस्ततस्तस्याः कर्ता स्याद् गुणभावतः ॥११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ईश्वरः परमात्मैव– कायादेर्बहिरात्मनो ध्यातुर्भिन्नत्वेन ज्ञेयादन्तरात्मनश्च तदधिष्ठायकस्य ध्यातुर्ध्येयैकस्वभावत्वेन भिन्नोऽनन्तज्ञान-दर्शनसंपदुपेतो वीतराग एव । अन्ये तु– 'मिथ्यादर्शनादिभावपरिणतो बाह्यात्मा, सम्यग्दर्शनादिपरिणतस्त्वन्तरात्मा, केवलज्ञानादिपरिणतस्तु परमात्मा । तत्र व्यक्त्या बाह्यात्मा, शक्त्या परमात्मा, अन्तरात्मा च; व्यक्त्याऽन्तरात्मा तु शक्त्या परमात्मा, भूतपूर्वनयेन च बाह्यात्मा; व्यक्त्या परमात्मा तु भूतपूर्वनयेनैव बाह्यात्मा, अन्तरात्मा च' इत्याहुः । तदुक्तव्रतसेवनात्– परमाप्तप्रणीतागमविहितसंयमपालनात्; यतो मुक्तिः कर्मक्षयरूपा, भवति; ततस्तस्या गुणभावतः– राजादिवदप्रसादानियतप्रसादाभावेऽप्यचिन्त्यचिन्तामणिवद् वस्तुस्वभावबलात् फलदोपासनाकत्वेनोपचारात्, कर्ता स्यात् । अत एव भगवन्तमुद्दिश्याऽऽरोग्यादिप्रार्थना । सार्थका-ऽनर्थकचिन्तायां तु भाज्यमेतत्, चतुर्थभाषारूपत्वात्, इति ग्रन्थकृतैव ललितविस्तरायामुक्तम् । अप्रार्थनीये कर्तरि प्रार्थनाया विधिपालनबलेन शुभाध्यवसायमात्रफलत्वादिति निगर्वः ॥ ११ ॥

अस्त्वेवं मुक्तिकर्तृत्वम्, भवकर्तृत्वं तु कथम् ?, अत आह—

तदनासेवनादेव यत्संसारोऽपि तत्त्वतः । तेन तस्यापि कर्तृत्वं कल्प्यमानं न दुष्यति ॥१२॥

तदनासेवनात्– तदुक्तव्रताऽपालनादेव, यत्– यस्मात् कारणात्, तत्त्वतः– परमार्थतः, संसारोऽपि जीवस्य भवति, अविरतिमूलत्वात् तस्येति भावः; तेन हेतुना, तस्यापि– संसारस्यापि, कर्तृत्वं कल्प्यमानम्– स्वहेतुक्रियाविरुद्धविधिबोधितोपा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सनाकत्वपरेण कर्तृत्वपदेन बोध्यमानम्, न दुष्यति "अङ्गुल्यग्रे करिशतम्" इत्यादिवद् यथा कथञ्चिदुपचारेण व्यवहारानिर्वाहादिति भावः ॥ १२ ॥

नन्वीदृशकल्पनायां को गुणः?, इत्यत्राह—

कर्तायमिति तद्वाक्ये यतः केषाञ्चिदादरः। अतस्तदानुगुण्येन तस्य कर्तृत्वदेशना ॥१३॥

अयम्- ईश्वरः, कर्ता, इति हेतोः, तद्वाक्ये- ईश्वरवाक्ये सिद्धान्ते, 'अयं कर्ता' इति तद्वाक्ये प्रसिद्धवाक्ये वा; यतः केषांचित्- तथाविधभद्रकविनेयानाम्, आदरः स्वरसवाहिश्रद्धानात्मा, भवति; अतस्तदानुगुण्येन- तथाविधविनेयश्रद्धाभिवृद्धये, तस्य- परमात्मनः, कर्तृत्वदेशना- कर्तृत्वोपदेशः। श्रोतृभावाभिवृद्ध्यर्थो हि गुरोरुपदेशः, सा च कल्पितोदाहरणेनापि निर्वाह्यते, किं पुनरुपचारेण? इति भावः ॥ १३ ॥

साक्षादपि कर्तृत्वं समर्थयति—

परमैश्वर्ययुक्तत्वान्मत आत्मैव वेश्वरः। स च कर्तेति निर्दोषः कर्तृवादो व्यवस्थितः ॥१४॥

परमैश्वर्ययुक्तत्वात्- निश्चयतो घनाऽऽवृतस्यापि रवेः प्रकाशस्वभावत्ववत् कर्माऽऽवृतस्याऽप्यात्मनः शुद्धबुद्धैकस्वभावत्वेनोत्कृष्टकेवलज्ञानाद्यतिशयशालित्वात्, आत्मैव-जीव एव वा, ईश्वरो मतः- ईश्वरपदेन संकेतितः। स च- जीवश्च, कर्ता- साक्षात्कर्ता, इति हेतोः, निर्दोषः- उपचारेणाऽप्यकलङ्कितः, कर्तृवादः- ईश्वरकर्तृत्वोपदेशः, व्यवस्थितः- प्रमाणसिद्धः। अत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव "विश्वतश्चक्षुरुत विश्वतोमुखः०" इत्यादिका श्रुतिरप्युपपद्यते ; जीवस्य निश्चयतः सर्वज्ञत्वात्, अन्यथा रागाद्यावरणविलये तदाविर्भावानुपपत्तेः ।

"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः ॥ १ ॥"

इत्यादिकमप्युपपद्यते, आवृतस्वरूपादनावृतस्वरूपस्य भिन्नत्वात् ; चैतन्यात्मकमहासामान्येन लोकत्रयावेशाद् ग्राह्याकारक्रोडीकृतत्वेन तद्भरणाच्च; इत्यादिरीत्या यथाऽऽगमं पराभिप्राय उपपादनीयः ॥ १४ ॥

यतः—

शास्त्रकारा महात्मानः प्रायो वीतस्पृहा भवे । सत्त्वार्थसंप्रवृत्ताश्च कथं तेऽयुक्तभाषिणः? ॥ १५ ॥

शास्त्रकाराः, प्रायः– लोकायतादीन् परलोकाऽभीरून् विहाय, महात्मानः– धर्माभिमुखाः, भवे– संसारे, वीतस्पृहाः– लोकमानख्याति-धनलिप्सादिरहिताः, सत्त्वार्थसंप्रवृत्ताश्च– यथाबोधं परोपकारप्रवृत्ताश्च, अन्यथेदृशप्रवृत्त्ययोगात् ; ततः कथं तेऽयुक्तभाषिणः– ज्ञात्वा विरुद्धभाषिणः ? । विरोधः खलु जल-ज्वलनयोरिव परोपकारित्व-विरुद्धभाषित्वयोरिति भावः ॥१५॥

ततः किम् ?, इत्याह—

अभिप्रायस्ततस्तेषां सम्यग् मृग्यो हितैषिणा । न्यायशास्त्राविरोधेन यथाह मनुरप्यदः ॥ १६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः– अविरुद्धभाषित्वात्, तेषां– परोपकारार्थं प्रवृत्तानां शास्त्रकाराणाम्, अभिप्रायः– शब्दतात्पर्यात्मा, सम्यग्– व्यासङ्गपरिहारेण, मृग्यः– उन्नेयः, हितैषिणा– मुमुक्षुणा, न्यायशास्त्राविरोधेन– युक्त्या-ऽऽगमबाधा यथा न स्यात् तथा, न तु यथाश्रुतग्रहणमात्रेणाऽऽन्ध्ये मज्जनीयं मनः, अन्यथा 'ग्रावाणः प्लवन्ते' इत्यादिश्रुतिश्रवणेन गगनमेवाऽवलोकनीयं स्यात्। अत्र पराऽभियुक्तसंमतिमाह– यथा मनुरपि, अदः– वक्ष्यमाणम्, आह ॥ १६ ॥

किम् ?, इत्याह—

आर्षं च धर्मशास्त्रं च वेदशास्त्राविरोधिना। यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः ॥१७॥

आर्षं च– वेदादि, धर्मशास्त्रं च पुराणादि। 'आर्षं धर्मोपदेशं च' इति क्वचित् पाठः; तत्राऽप्ययमेवार्थः– आर्षं– मन्वादिवाक्यम्, धर्मजनक उपदेशो धर्मोपदेशः,'धर्मस्येश्वरस्य वोपदेशो धर्मोपदेशस्तं– वेदम्' इत्यन्ये। वेदशास्त्राविरोधिना– परस्परं तदुभयाविरोधिना, तर्केण यः, अनुसंधत्ते– तदर्थमनुस्मरति, स धर्मं वेद– जानाति, नेतरः– ऊहरहितः। तस्मादीश्वरकर्तृत्वप्रतिपादकपरागमस्याऽप्ययमेवाऽऽश्रयो युक्तः, इति सम्यग्दृष्टिपरिगृहीतत्वेन तत्प्रामाण्यमुपपादनीयम्। द्रव्यासत्याभिधानं चेदं ग्रन्थकारस्य तत्प्रमाण्याभ्युपगन्तृश्रोतृपरिबोधार्थम्, एवमग्रेऽप्यूहनीयम्।

इत्येवं पटुरीश्वरव्यतिकरः सत्तर्कसंपर्कभाग् येषां विस्मितमातनोति न मनस्ते नाम वामाशयाः।
अस्माकं तु स एक एव शरणं देवाधिदेवः, सुखाम्भोधौ यस्य भवन्ति बिन्दव इव स्वःसद्मनां संपदः ॥ १ ॥ १७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वार्तान्तरमाह—

प्रधानोद्भवमन्ये तु मन्यन्ते सर्वमेव हि । महदादिक्रमेणेह कार्यजातं विपश्चितः॥१८॥

अन्ये तु विपश्चितः– सांख्याः, इह– सामग्रीविचारे, सर्वमेव हि कार्यजातं महदादिक्रमेण प्रधानोद्भवं मन्यन्ते । तथाहि– तेषां पञ्चविंशतिस्तत्त्वानि, तत्राऽकारणम्, अकार्यं च कूटस्थनित्यचैतन्यरूप आत्मा । प्रकृतिरचेतना, महदाद्युत्पादकाशेषशक्तिप्रचिता, आदिकारणम्, परिणामिनी च । तदभावे हि परिमितं व्यक्तं न स्यात्, तथोत्पादकहेत्वभावात् । न च स्याद् भेदानामन्वयः, तन्मयकारणप्रभवत्वं विना तज्जातिमत्कार्यानुपलब्धेः । न च बुद्धिरेव कार्यधर्मानुविधायिनी, असाधारणत्वात्, अनित्यत्वाच्च । न च महदादिहेतुशक्तिप्रवृत्तिः स्यात् । न हि पटादिजननी शक्तिस्तन्तुवायादिकमाधारं विना प्रवर्तते । तथा, कारण-कार्यविभागोऽपि न स्यात्, महदादौ कार्यत्वव्यवहारस्य संबन्धिसापेक्षत्वात् । न च स्यात् क्षीरावस्थायां क्षीरं दध्न इव प्रलये भूतादीनां तन्मात्रादिक्रमेणाऽविवेकरूपोऽविभाग इति प्रकृतिसिद्धिः; तदुक्तम्—

"भेदानां परिमाणात् समन्वयाच्छक्तिसंप्रवृत्तेश्च । कारण-कार्यविभागादविभागाद् वैश्वरूप्यस्य[2] ॥ १ ॥" इति ।

न चाऽसदेव महदादिकमुत्पद्यताम्, किं तत्समन्वयार्थं प्रकृत्यनुसरणेन ? इति वाच्यम्; असतोऽनुत्पत्तेः, तदुक्तम्—

"असदकरणादुपादानग्रहणात् सर्वसंभवाभावात् । शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम्[3] ॥ १ ॥"

---

१ क. 'कार्य कारणवि' । २ सांख्यकारिकायां कारिका १५ । ३ सांख्यकारिकायां कारिका ९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असतः शशविषाणादेः सत्त्वस्य कर्तुमशक्यत्वात्, सत एव हि सत्कारणम्, तद्धर्मत्वात्, दृष्टं च तिलेषु सत एव तैलस्य निष्पीडनेन करणम्, असतस्तु करणे न निदर्शनम्। न च विद्यमानप्रागभावप्रतियोगित्वरूपस्याऽसत्त्वस्य, विद्यमानत्वरूपस्य च सत्त्वस्य न विरोध इति सांप्रतम्, लाघवादविद्यमानत्वस्यैवाऽसत्त्वरूपत्वात्, तेनैव सर्वत्राऽनुगताऽसत्त्वव्यवहारात्। तथा, उपादानग्रहणादपि सत् कार्यम्, अन्यथा शालिफलार्थिनः शालिबीजस्यैवोपादानम्, न कोद्रवबीजादेरिति प्रतिनियमानुपपत्तेः, फलायोगस्योभयत्राऽविशेषात्। 'उपादानेन ग्रहणं संबन्धस्ततोऽसतः संबन्धाभावात्' इत्यन्ये। तथा, सर्वसंभवाऽभावात् सत् कार्यम्, असतः करणेऽसंबद्धाविशेषे सर्वं सर्वस्माद् भवेत्, न चैवम्, तस्मात् कार्यं प्रागुत्पत्तेः कारणेन सह संबद्धम्; यथाहुः—

"असत्त्वाद् नास्ति संबन्धः कारणैः सत्त्वसङ्गिभिः। असंबद्धेषु चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥ १ ॥" इति।

तथा, अशक्तस्य जनकत्वेऽतिप्रसङ्गाच्छक्तस्य जनकत्वं वाच्यम्, शक्तिश्चास्य न सर्वत्र, तथैवाऽतिप्रसङ्गात्, किन्तु क्वचिदेव, इति कथमसति कार्ये कारणस्य शक्तिर्नियता स्यात्, असतो विषयत्वायोगात्[1]?। तस्मात् कारणात् प्रागपि शक्यं सदेव। तथा, कारणभावात्– कारणतादात्म्यादपि सत् कार्यं, नाऽवयवी अवयवेभ्यो भिद्यते, तथाप्रतीत्यभावात्; 'कपालं घटीभूतम्, तन्तुः पटीभूतः, स्वर्णं कुण्डलीभूतम्' इत्यादिप्रतीतेः। तस्माद् महदादिकार्यस्योत्पत्तेः प्रागपि यत्र सत्त्वं सा प्रकृतिः। ततो बुद्ध्यपरनामकं महत्तत्त्वमुत्पद्यते, न हि चैतन्यस्य स्वभावतो विषयावच्छिन्नत्वम्, अनिर्मोक्षापत्तेः। नापि प्रकृ-

१ ख. ग. घ. च. 'पस'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यधीनं तत्, तस्या अपि नित्यतया तद्दोषानुद्धारात् । नापि घटादिरेवाऽऽहत्य चैतन्यावच्छिन्नः, दृष्टा-ऽदृष्टतत्त्वानुपपत्तेः । न चेन्द्रियमात्रापेक्षो घटादिचैतन्यावच्छेदः, व्यासङ्गानुपपत्तेः । अतो यत्संबद्धेन्द्रियस्य विषयचैतन्यावच्छेदनियामकत्वम्, यद्व्यापाराच्च सुषुप्ताविन्द्रियादिव्यापारविरतावपि श्वास-प्रश्वासादि, तद् महत्तत्त्वम् । तस्य धर्मा ज्ञाना-ऽज्ञानै-श्वर्या-ऽनैश्वर्य-वैराग्या-ऽवैराग्य-धर्मा-ऽधर्मारूपा अष्टौ, बुद्धि-सुख-दुःखे-च्छा-द्वेष-प्रयत्ना अपि, भावनायास्तैरनङ्गीकारात्, अनुभवस्यैव स्मृतिपर्यन्तं सूक्ष्मरूपतयाऽवस्थानात् । तस्य ज्ञानरूपपरिणामेन संबद्धो विषयः, पुरुषस्य स्वरूपतिरोधायकः । एवं च बुद्धितत्त्वनाशादेव पुंसो विषयावच्छेदाभावाद् मोक्षः । भेदाऽग्रहाच्च 'चेतनोऽहं करोमि' इत्यध्यवसायः, अचेतनप्रकृतिकार्याया बुद्धेश्चैतन्याभिमानानुपपत्त्यैव स्वाभाविकचैतन्यरूपस्य पुंसः सिद्धेः । आलोचनं व्यापार इन्द्रियाणाम्, विकल्पस्तु मानसः, अभिमानोऽहङ्कारस्य कृत्यध्यवसाये बुद्धेः । सा हि बुद्धिरंशत्रयवती, पुरुषोपरागः, विषयोपरागः, व्यापारावेशश्च, इत्यंशाः । भवति हि 'ममेदं कर्तव्यम्' इति बुद्धेरध्यवसायः । तत्र 'मम' इति पुरुषोपरागः, दर्पणस्येव मुखोपरागः, भेदाग्रहादतात्त्विकः । 'इदम्' इति विषयोपरागः, इन्द्रियप्रणालिकया परिणतिभेदो दर्पणस्येव मुखनिश्वासहतस्य मलिनिमोपरागस्तात्त्विकः । तदुभयोपपत्तौ व्यापारावेशोऽपि । तत्र विषयोपरागलक्षणज्ञाने पुरुषोपरागस्याऽतात्त्विकसंबन्धो दर्पणप्रतिबिम्बितस्येव मुखस्य तन्मालिनिम्नेति । ततो महत्तत्त्वादहङ्कारोत्पत्तिः । भवति हि स्वप्नावस्थायां 'व्याघ्रोऽहम्, वराहोऽहम्' इत्यभिमानः, न तु 'नरोऽहम्' इत्यभिमानः । अस्ति च तत्र नरत्वं संनिहितमिन्द्रिय-मनःसंबन्धश्च । अतो नियतविषयाभिमानव्यापारकाऽहङ्कारसिद्धिः ।

१ ख. ग. घ. च. 'श्वासा' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः पञ्च तन्मात्राणि, एकादशेन्द्रियाणि च । पञ्च तन्मात्राणि– शब्द-रूप-रस-गन्ध-स्पर्शाः सूक्ष्मा उदात्तादिविशेष-रहिताः । एकादशेन्द्रियाणि च– चक्षुः, श्रोत्रम्, घ्राणम्, रसनम्, त्वगिति पञ्च बुद्धीन्द्रियाणि, वाक्-पाणि-पाद-पायू-पस्थाः पञ्च कर्मेन्द्रियाणि, मनश्चेति । पञ्चतन्मात्रेभ्यः पञ्च महाभूतान्युत्पद्यन्ते, तथाहि– शब्दतन्मात्रादाकाशं शब्दगुणम्, शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद् वायुः शब्द-स्पर्शगुणः, शब्द-स्पर्शतन्मात्रसहिताद् रूपतन्मात्रात् तेजः शब्द-स्पर्श-रूपगुणम्, शब्द-स्पर्श-रूपतन्मात्रसहिताद् रसतन्मात्रादापः शब्द-स्पर्श-रूप-रसगुणाः, शब्द-स्पर्श-रूप-रसतन्मात्रसहिताद् गन्धतन्मात्रात् शब्द-स्पर्श-रूप-रस-गन्धगुणा पृथिवीति । तदुक्तमीश्वरकृष्णेन—

"प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः । तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि[1] ॥ १ ॥

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति-विकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः[2] ॥२॥" इति ।

पूर्वं षोडशकपदेन पञ्चतन्मात्रै-कादशेन्द्रियग्रहणम्, अग्रे तु पञ्चमहाभूते-न्द्रियग्रहणमिति विशेषः ॥ १८ ॥

इममेव क्रममाह—

प्रधानान्महतो भावोऽहंकारस्य ततोऽपि च। अक्षतन्मात्रवर्गस्य तन्मात्राद् भूतसंहतेः॥१९॥

प्रधानात्– प्रकृतितत्त्वात्, महतः– बुद्धितत्त्वस्य, भावः– उत्पत्तिः, अभिव्यक्तिर्वा, ततोऽपि च, अहङ्कारस्य 'भावः'

१ सांख्यकारिकायां कारिका २२ । २ सांख्यकारिकायां कारिका ३ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युत्तरत्राप्यनुषज्यते । 'ततोऽपि' इत्युत्तरत्राऽऽवर्त्यते, ततोऽपि– अहङ्कारादपि, अक्ष-तन्मात्रवर्गस्य– एकादशेन्द्रिय-पञ्चमहाभूतानां भावः; तन्मात्रात्– जात्यपेक्षयैकवचनात् पञ्चभ्यस्तन्मात्रेभ्यः, भूतसंहतिः– पञ्चमहाभूतानां भावः ॥ १९ ॥

स्थूलकार्यमधिकृत्याह—

घटाद्यपि पृथिव्यादिपरिणामसमुद्भवम् । नात्मव्यापारजं किञ्चित्तेषां लोकेऽपि विद्यते॥२०॥

घटाद्यपि– स्थूलकार्यजातम्, पृथिव्यादीनां मृदात्मिकानां परिणामाद् विलक्षणसंयोगादिपरिणामात् समुद्भव उत्पत्तिर्यस्य तत्, परिणामादेव परिणामान्तराभ्युपगमात् । विशेषमाह– तेषां– सांख्यानाम्, लोकेऽपि– जगत्यपि, आत्मव्यापारजं किञ्चित् किमपि कार्यं नास्ति, आत्मव्यापारस्यैवाऽभावात् सुतरां तज्जन्यत्वाभावः । इति सांख्याशयवार्ता ॥२०॥

अत्र प्रतिक्षेपवार्तामाह—

अन्ये तु ब्रुवते ह्येतत्प्रक्रियामात्रवर्णनम् । अविचार्यैव तद्युक्त्या, श्रद्धया गम्यते परम् ॥२१॥

अन्ये तु– असत्कार्यवादिनः, ब्रुवते— हि– यतः, एतत्– अनुपदमभिहितम्, प्रक्रियामात्रवर्णनम्– यदृच्छाक्लृप्तपरिभाषामात्रोपदर्शनम्, न तात्त्विकमेव; तत्– तस्माद् हेतोः, युक्त्याऽविचार्यैव, परं केवलम्, श्रद्धया– वृद्धोक्तभक्त्या, गम्यते– उपादीयते ॥ २१ ॥

---

१ सर्वत्र पुस्तकादर्शेष्वेवमेव पाठेऽपि पूर्वग्रन्थानुरोधेन 'तन्मात्र' इति कारिकापदानुरोधेन च 'तन्मात्राणां' इति पाठो युक्तः प्रतिभाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुतः ?, इत्याह—

युक्त्या तु बाध्यते यस्मात्प्रधानं नित्यमिष्यते। तथात्वाप्रच्युतौ चास्य महदादि कथं भवेत्?२२

युक्त्या तु बाध्यते, यस्मात् प्रधानं, नित्यम्– अप्रच्युता-ऽनुत्पन्न-स्थिरैकस्वभावम्, इष्यते– सांख्यैरङ्गीक्रियते; अस्य– प्रधानस्य, तथात्वाप्रच्युतौ च– प्रधानत्वाप्रच्युतौ च, महदादि कथं भवेत् ?– पूर्वस्वभावपरित्यागा-ऽपूर्वस्वभावोपादानाभ्यामेव हेतु-हेतुमद्भावनियमात्, अङ्गदादिपरिणामनाशेनैव कुण्डलादिपरिणामोत्पाददर्शनादिति भावः ॥२२॥

अथ नाऽस्माभिरपूर्वस्वभावोत्पत्त्या हेतु-हेतुमद्भावोऽभ्युपगम्यते, यतो रूपभेदादनित्यता प्रसज्येत; किन्त्वपरित्यक्तसर्पभावस्य सर्पस्य कुण्डलावस्थावदपरित्यक्तप्रधानभावस्यैव प्रधानस्य महदादिपरिणामाभ्युपगम इति को दोषः, युवत्व-वृद्धत्वादिपरिणामयोरप्यवस्थित एव धर्मिणि पूर्वोत्तरभावनियमेनाऽवस्थासांकर्यात् ?, इत्यभिप्रायमुद्रङ्क्य निराकुरुते—

तस्यैव तत्स्वभावत्वादिति चेत्किं न सर्वदा। अत एवेति चेत्तस्य तथात्वे ननु तत्कुतः? ॥२३॥

तस्यैव– प्रधानस्यैव, एवकारेण स्वभावान्तरव्यवच्छेदः, तत्स्वभावत्वात्– महदादिजननस्वभावत्वात्, तथात्वाऽप्रच्युतावपि महदाद्युत्पत्तिरित्युपस्कारः, इति चेत्। तदा सर्वदा किं न भवति महदादिकम् ?, प्रकृतिसंनिधानस्य सर्वदा सत्त्वादेकहेलयैव जगत् स्यात्, समर्थस्य कालक्षेपाऽयोगादित्याशयः। परः प्राह– अत एव– कदाचिज्जननस्वभावत्वादेव, न सर्वदोत्पत्तिरित्याशयः। वाद्याह– इति चेत्, 'ननु' इत्याक्षेपे, तस्य– प्रधानस्य, तथात्वे– नियतस्वरूपाविकृतत्वे, तत्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कदाचिज्जननस्वभावत्वम् , कुतः ?– एकरूपा हि प्रकृतिः सदैव महदादि जनयेत् , कदापि वा न जनयेत् । तत्तत्कालावच्छिन्नजनना-ऽजननोभयानिरूपितैकस्वभावत्वादयमदोष इति चेत्। जनना-ऽजननयोस्तत्कालावच्छिन्नत्वे तत्स्वभावत्वम्, तत्स्वभावत्वे च तयोस्तत्त्वमित्यन्योन्याश्रयः । स्वस्वभावादेव तयोस्तत्त्वे च विलीनं प्रकृत्यादिप्रक्रिययेति भावः ॥ २३ ॥

उपचयमाह—

नानुपादानमन्यस्य भावेऽन्यज्जातुचिद्भवेत् । तदुपादानतायां च न तस्यैकान्तनित्यता॥२४॥

अनुपादानं– तथाभाविकारणविकलम् , अन्यस्य– सर्वथा तथाभाविव्यतिरिक्तस्य प्रधानस्य, भावे– संनिधाने, अन्यत्– एकान्ताऽविद्यमानं महदादि, जातुचित्– कदाचित्, न भवेत् , सर्वथाऽसतः सत्ताऽयोगात् , तदुपादानतायां च महदादेरभ्युपगम्यमानायां, न तस्य– प्रधानस्य, एकान्तनित्यता, अनित्यमहदाद्यभिन्नत्वात् । महदाद्यपि सदासत्त्वाद् नित्यमेवेति चेत् । गता तर्हि प्रकृति-विकृत्यादिप्रक्रिया, मुक्तावपि तत्सत्त्वेऽपदर्शनं च । महादादेः प्रकृतिपरिणामित्वेन प्रकृत्यभिन्नत्वेऽप्यनित्यत्वादिना भेद एवेति चेत् । तर्हि भेदा-ऽभेदप्रसङ्ग इति दिग् ॥ २४ ॥

स्थूलकार्यमधिकृत्याऽप्याह—

घटाद्यपि कुलालादिसापेक्षं दृश्यते भवत् । अतो न तत्पृथिव्यादिपरिणामैकहेतुकम् ॥२५॥

घटाद्यपि– स्थूलकार्यजातम् , कुलालादिसापेक्षं भवद् दृश्यते, कुलालादीनां तत्राऽन्वय-व्यतिरेकानुविधानदर्शनात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतस्तत् पृथिव्यादिपरिणामैकहेतुकं न भवति, नियतान्वय-व्यतिरेकौ विना तादृशपरिणामेऽपि हेतुताग्रहाभावात्, तयोश्च कुलालादावविशेषात्। कार्यगतयावद्धर्मानुविधायित्वाद् हेतोः कुलालादीनां न घटादिहेतुत्वमिति चेत्। तर्हि बुद्धिगता रागादयोऽपि प्रकृतौ स्वीकर्तव्याः, इति [1]सैव बुद्धिः, भावाष्टकसंपन्नत्वात्, न तु प्रकृतिः। स्थूलरूपतामपहाय सूक्ष्मरूपतया ते तत्र सन्तीति चेत्। लयाद्यवस्थायां सौक्ष्म्यं बुद्धावपि समानम्, सूक्ष्मतया घटादिगतधर्माणां कुलालादौ कल्पने बाधकाभावश्च ॥२५॥

चेतनेऽचेतनधर्मसंक्रमे परिणामित्वादिबाधकम्, कुलालादिदेहस्तु घटादिकर्तैष्यत एवेत्याशङ्क्याह—

तत्रापि देहकर्ता चेन्नैवासावात्मनः पृथक्। पृथगेवेति चेद्भोग आत्मनो युज्यते कथम्? ॥२६॥

तत्रापि– घटादावपि, देहः कर्ता, स्थूलरूपावच्छिन्नस्य तस्य कुलालादिचेष्टयैवोत्पादात्, इति चेत्। नैव, असौ– देहः, आत्मनः पृथग्– भिन्नः, सर्वगतत्वात् निष्क्रियत्वाच्च। आत्माऽसर्वगत-सक्रियदेहात् पृथगेवेति चेत्। तर्हि आत्मनो भोगः कथं युज्यते, सर्वथा देहाद् भेदे तस्य मुक्तकल्पत्वात्?, क्षीर-नीरन्यायेन देहाभिन्नस्यैवाऽऽत्मनो देहोपनीतभोगसंभवादिति भावः ॥ २६ ॥

नास्त्येव तत्त्वत आत्मनो भोग इतीष्टापत्त्या परः स्वाभिप्रायमाह—

देहभोगेन नैवास्य भावतो भोग इष्यते। प्रतिबिम्बोदयात्किन्तु यथोक्तं पूर्वसूरिभिः ॥२७॥

[1] सैव– प्रकृतिः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देहेन भोगो देहभोगस्तेन, 'धान्येन धनम्' इतिवदभेदे तृतीया, देहभोगेन देहद्वारेति वाऽर्थः; नैव, अस्य– आत्मनः, भावतः– तत्त्वतः, इष्यते भोगः; किन्तु प्रतिबिम्बोदयात्। यद्यप्येवमपि सुख-दुःखाद्यन्तःकरणधर्मानुविद्धस्य महत एव स्वतोऽचेतनस्य चेतनोपरागेण 'चेतनोऽहं सुखी' इत्याद्यभिमानरूपश्चैतन्यांशेऽतात्त्विको भोगः, न तु पुरुषस्य; तथापि भोक्तृबुद्धिसंनिधानात् तत्र भोक्तृत्वव्यवहारः; तदाह पतञ्जलिः– "शुद्धोऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति, तमनुपश्यन्नतदात्मापि तदात्मक इव प्रतिभासते" इति। केचित्तु बुद्धौ पुरुषोपरागवत् पुरुषेऽपि बुद्ध्युपरागं वर्णयन्ति। न चैवं विकृतत्वापत्तिः अतात्त्विकोपरागेण तदयोगात्। तथा चाह वादमहार्णवः– 'बुद्धिदर्पणसंक्रान्तमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंस्यध्यारोहति, तदेव भोक्तृत्वमस्य, न तु विकारोपपत्तिः' इति। 'बुद्धिगतप्रतिबिम्बात्मन्येव बुद्धिगतभोगोपसंक्रमः, बिम्बात्मनि तु न किञ्चित्' इत्यपरे। स्वोक्तेऽर्थेऽभियुक्तसंमतिमाह– यथोक्तं पूर्वसूरिभिः– विन्ध्यवास्यादिभिः ॥ २७ ॥

किमुक्तम्?, इत्याह—

पुरुषोऽविकृतात्मैव स्वनिर्भासमचेतनम्। मनः करोति सांनिध्यादुपाधिः स्फटिकं यथा॥२८॥

पुरुषः– आत्मा, अविकृतमात्मैव– अप्रच्युतस्वभाव एव, अचेतनं मनः, सांनिध्यात्– सामीप्याद् हेतोः, स्वनिर्भासं– स्वोपरक्तम्, करोति। निदर्शनमाह– यथोपाधिः पद्मरागादिः स्फटिकं स्वधर्मसंक्रमेण स्वोपरक्तं करोति। न चैतावता स विकरोति, किन्तु स्फटिक एव विक्रीयते; तथाऽऽत्मापि बुद्ध्युपरागं जनयन् न विकरोति, किन्तु बुद्धिरेव विक्रीयत इति भावः ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः किम् ?, इत्याह—

विभक्तेदृक्परिणतौ बुद्धौ भोगोऽस्य कथ्यते। प्रतिबिम्बोदयः स्वच्छे यथा चन्द्रमसोऽम्भसि॥२९॥

विभक्ता– आत्मभिन्ना, ईदृक्परिणतिः– अभिहितपुरुषोपरागपरिणामा च, इति कर्मधारयः, तस्यां; बुद्धौ– अन्तःकरणलक्षणायाम्, अस्य– आत्मनः, भोगः कथ्यते, आसुरिप्रभृतिभिः । किंवत् ?, इत्याह– यथा चन्द्रमसः– वास्तवस्य चन्द्रस्य, प्रतिबिम्बोदयः– प्रतिबिम्बपरिणामः, स्वच्छे– निर्मले, अम्भसि– जले ॥ २९ ॥

तदिदमखिलमपाकुर्वन्नाह—

प्रतिबिम्बोदयोऽप्यस्य नामूर्तत्वेन युज्यते।मुक्तेरतिप्रसङ्गाच्च न वै भोगः कदाचन॥३०॥

प्रतिबिम्बोदयोऽपि, अस्य– अमूर्तत्वेन न युज्यते, छायावन्मूर्तद्रव्येणैव हि प्रतिबिम्बाख्यं स्वाकारं भास्वरद्रव्योपादानं द्रव्यमारभ्यते; तथा चार्षम्—

"सामा उदिया छाया अभासुरगया णिसिं तु कालाभा । स च्चेह भासुरगया सदेहवण्णा मुणेयव्वा ॥ १ ॥" इति ।

युक्तं चैतत्, अन्यथेदंत्वावच्छेदेन मुखभेदग्रहाभावात्, 'इदं मुखम्' इति प्रतीतेः कथञ्चिदुपपादनेऽपि 'इदं मुख-

१ 'विविक्त' इत्यन्यत्र ग्रन्थे पाठः । २ श्यामोदिता छायाऽभास्वरगता निशि कालाभा । सा चेह भास्वरगता स्वदेहवर्णा ज्ञातव्या ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिबिम्बम्' इति प्रतीतेः कथमप्युपपादयितुमशक्यत्वात्; मुखभ्रमाधिष्ठानत्वरूपमुखप्रतिबिम्बत्वस्य प्रागेवाऽग्रहात्, 'आदर्शे मुखप्रतिबिम्बम्' इत्याधाराऽऽधेयभावाध्यवसायानुपपत्तेश्च। एतेन 'मुखे बिम्बत्वमिवाऽऽदर्श एव प्रतिबिम्बत्वं मुखसांनिध्यदोषाभावादिसामग्र्याऽभिव्यज्यते' इति निरस्तम्, बिम्बोत्कर्षेण प्रतिबिम्बोत्कर्षानुपपत्तेः, प्रतिबिम्बत्वाग्राहकसामग्र्या एवादर्शभेदभ्रमहेतुत्वेन 'अयं नाऽऽदर्शः, किन्तु मुखप्रतिबिम्बम्' इति सार्वजनीनानुभवानुपपत्तेश्च। न च प्रतिबिम्बस्य द्रव्यत्वे सावधिकत्वानुपपत्तिः, प्रतिबिम्बधर्मस्यैव महत्त्ववत् सावधिकत्वात्। न चाश्रयनाशे तन्नाशानुपपत्तिः, बिम्बसंनिधाननिमित्तजनितस्य तस्य तन्नाशेनैव नाशसंभवात्। न चैवमनन्तप्रतिबिम्बोत्पत्तिनाशादिकल्पने गौरवम्, सादृश्यातिरिक्तानन्तदोषादिकल्पने तवैव गौरवात्, अनुभवापलापाच्चेति। अधिकमाकरे। स्फटिकादौ लौहित्यादिकमपि पद्मरागादिमूर्तसंनिधिजन्य एव परिणामविशेषः, साक्षात्संबन्धेन तत्प्रतीतौ परम्परासंबन्धस्याऽतिप्रसक्तत्वात्। स्फटिकादिनिष्ठतया लोहिताश्रयसंसर्गस्य साक्षात्संबन्धेन लौहित्यभ्रमजनकत्वे तत्र विशेषदर्शनादेरुत्तेजकत्वे, परम्परासंबन्धेन लौहित्यप्रमानियामकत्वादिकल्पने चातिगौरवात्, लौहित्यमात्रजनकत्वकल्पनाया एव न्याय्यत्वात्; अभिभूता-ऽनभिभूतरूपयोः समावेशस्याऽनुभवसिद्धत्वेनाऽविरुत्वात्, नियतारम्भनिरासाच्चेति, अन्यत्र विस्तरः।

तस्मादात्मनो बुद्धौ बिम्बतया, उपाधितया वाऽमूर्तत्वाद् न स्वोपरागजनकत्वम्। तत्त्वे वा कथमात्मनोऽकारणत्वम्?। कथं वा तदुपरागस्याऽनिर्वचनीयस्य, असतो वा स्वीकारे नौपनिषदबौद्धमतप्रवेशः?। एतेन 'नामूर्तस्य प्रतिबिम्बाभावः शक्यो

१ सांख्यस्य। २ क. 'त्वे त्वत्र'। ३ तत्त्वतो बौद्धपक्षकक्षीकार इत्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्तुम्, अमूर्तानां रूप-परिमाणादीनां प्रतिबिम्बदर्शनात्, द्रव्यस्याऽप्यमूर्तस्य साभ्र-नक्षत्रस्याकाशादेर्जानुमात्रे जले दूर-विशालस्वरूपेण प्रतिबिम्बदर्शनाच्च' इत्युक्तावपि न निस्तारः ।

अथ न पुरुषजन्यः पुरुषोपरागः, किन्तु पुरुषभेदाग्रहादसत एव तस्योत्पत्तिः, सदुपरागेण भानाच्च नाऽसत्ख्यातिरिति चेत् । गतं तर्हि सत्कार्यवादेन । बुद्धौ सन्नेव पुरुषोपरागः कदाचिदाविर्भवतीति चेत् । तर्हि बुद्ध्युत्पत्तेः पूर्वं पुरुषस्यानुपरक्ततया मोक्षः स्यात्, प्रकृतेः साधारणत्वेनाऽनुपरञ्जकत्वात् । पूर्वबुद्धिवासनानुवृत्तेः साधारण्येऽप्यसाधारणी प्रकृतिरिति चेत् । न, 'बुद्धिनिवृत्तावपि तद्धर्मवासनानुवृत्तिः' इत्यपदर्शनम् । सौक्ष्म्याद् न दोष इति चेत् । मुक्तावपि तत्प्रसङ्गः । निरधिकारित्वाद् नैवमिति चेत् । तर्हि साधिकारा प्रसुप्तस्वभावा बुद्धिरेव प्रकृतिरस्तु, कृतमन्तरा प्रकृत्य-हङ्कार-मनः-शब्दानामर्थान्तरकल्पनया ; [1]सैव हि तत्तद्व्यापारयोगात् तेन तेन शब्देन व्यपदिश्यते, शरीरवायुवत्, इत्यागमस्यापि न विरोध इति । स्वीक्रियतां वा यथा कथञ्चित् तस्यातात्त्विको भोगः, तथाप्यन्यदूषणमित्याह– मुक्तेरतिप्रसङ्गाच्च– तेषां प्रतिबिम्बाभावात् संसारिणामपि मुक्तैकस्वभावत्वात्, वै– निश्चितम्, कदाचन– कदाचिदपि, भोगो न स्यात् ॥ ३० ॥

अथ यदि संसारिणां प्रतिबिम्बोदयस्वभावः, तदाह—

नच पूर्वस्वभावत्वात्स मुक्तानामसंगतः । स्वभावान्तरभावे च परिणामोऽनिवारितः ॥३१॥

---

१ सैव– बुद्धिरेव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नच– नवा, सः– प्रतिबिम्बोदयस्वभावः, पूर्वस्वभावत्वात्– संसार्यवस्थैकस्वभावत्वात्, मुक्तानामसंगतः, किन्तु संगत एव, अन्यथा नित्यत्वक्षतेः, एवमपि कदाचन न भोगः, किन्तु सर्वदैव स्यात्, इति योजना। स्वभावान्तरभावे च– अमुक्तस्वभावपरित्यागेन मुक्तस्वभावोत्पादे च मुक्तानामिष्यमाणे, अनिवारितः परिणामः, स्वभावान्यथात्वस्यैव तल्लक्षणत्वात्[1]। घटनाशे घटावच्छिन्नस्याकाशस्य घटानवच्छिन्नत्वेऽपि स्वभावाऽपरित्यागवत् सवासनबुद्धिनाशे विषयावच्छिन्नस्य चैतन्यस्य विषयानवच्छिन्नत्वेऽपि स्वभावाऽपरित्याग एवेति चेत्। अहो! असिद्धमसिद्धेन साधयति भवान्, घटनाशेऽप्याकाशस्य घटावच्छिन्नत्वस्वभावापरित्यागे घटाकाशव्यवहारप्रसङ्गात्। किञ्च, सा बुद्धिस्तमेवात्मानं विषयेणावच्छिनत्ति, इत्यत्र न किमपि नियामकं पश्यामः। तस्माद् बुद्धिरेव रागादिपरिणताऽऽत्मस्थानेऽभिषिच्यताम्। तस्या लयश्च रागादिलय एव, इति तत्रैव मुक्तिरिति युक्तम् ॥ ३१ ॥

देहात् पृथक्त्व आत्मनो दोषान्तरमाह—

देहात्पृथक्त्व एवास्य नच हिंसादयः क्वचित्। तदभावेऽनिमित्तत्वात्कथं बन्धः शुभाशुभः ॥ ३२ ॥

देहात् पृथक्त्व एव– एकान्ततो देहपृथक्त्वे, अस्य– आत्मनः, स्वीक्रियमाणे, न च हिंसादयः क्वचिद् भवेयुः। न हि ब्राह्मणशरीरहत्यैव ब्रह्महत्या, मृतब्राह्मणशरीरदाहेऽपि तत्प्रसङ्गात्[2]। न च मरणोद्देशाभावादयमदोषः, तदुद्देशेनापि[3] तत्प्रसङ्गात्[4],

---

१ तच्छब्दः परिणामपरामर्शकः। २ ब्रह्महत्यायाः प्रसङ्गात्, ब्राह्मणशरीरनाशस्य तत्राप्यविशेषादित्यर्थः। ३ मरणोद्देशेनाऽपि। ४ अदोषप्रसङ्गात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ब्राह्मणात्मनस्तु नाश एव न, इति ब्राह्मणं घ्नतोऽपि सा[1] न स्यात्। ब्राह्मणशरीरावच्छिन्नज्ञानजनकमनःसंयोगविशेषनाशानुकूलो व्यापार एव ब्रह्महत्येति चेत्। न, तादृशमनःसंयोगस्य स्वत एव नश्वरत्वात्, साक्षाद्घातानुपपत्तेश्च। ब्राह्मणशरीरावच्छिन्नदुःखविशेषानुकूलव्यापार एव ब्रह्महत्येति चेत्। शरीरा[2]च्छरीरिणः सर्वथा भेदे तच्छेदादिना तस्य दुःखमपि कथम्?। परम्परासंबन्धेन तदात्मसंबन्धादिति चेत्। साक्षादेव कथं न तत्संबन्धः?। शरीरावयवच्छेदादात्मावयवच्छेद एव हि शरीरात् पृथग्भूतावयवस्य कम्पोपलब्धिरुपपद्यते, नाऽन्यथा, प्राणक्रियाया अपि तन्मात्रोपग्रहं विनाऽभावात्।

नन्वेवं छिन्नावयवानुप्रविष्टस्य पृथगात्मत्वप्रसक्तिः स्यादिति चेत्। न, तत्रैव[3] पश्चादनुप्रवेशात्[4], छिन्ने हस्तादौ कम्पादितल्लिङ्गादर्शनादित्थं कल्पनात्। न चैकत्व आत्मनो विभागाभावाच्छेदाभाव इति वाच्यम्; शरीरद्वारेण तस्या[5]पि सविभागत्वात्, अन्यथा सावयवशरीरव्यापिता तस्य न स्यात्, तथाच तच्छेदनान्तरीयकश्च्छेदो न स्यात्। छिन्ना-ऽच्छिन्नयोः कथं पश्चात् संघटनम्?, इति चेत्। न, एकान्तेनाऽच्छिन्नत्वात्, पद्मनालतन्तुवच्छेदेऽपि च्छेदाभ्युपगमात्?; संघटनमपि तथाभूतादृष्टवशादविरुद्धमेव। हन्त! एवं शरीरदाहेऽप्यात्मदाहः स्यादिति चेत्। न, क्षीर-नीरयोरिवाऽभिन्नत्वेऽपि भिन्नलक्षणत्वेन तद्दोषाभावादिति, अन्यत्र विस्तरः।

तस्माद् देहादात्मन एकान्तपृथक्त्वे हिंसाद्यभावः, तदभावे- हिंसाद्यभावे, अनिमित्तत्वात्- निमित्तसंनिधानाभावात्,

---

१ सा- ब्रह्महत्या। २ ग. घ. च. 'शरीरि'। ३ यस्माच्छरीरावयवः पृथग्भूतस्तस्मिन् शरीरे। ४ छिन्नात्मावयवानामिति गम्यते। ५ तस्य- आत्मनः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथं शुभाशुभो बन्धः। अत्र शुभश्चाशुभश्चेति विग्रहे द्विवचनापत्तिः, कर्मधारये च बाध इति शुभेन सहितोऽशुभ इति व्याख्येयम् ॥ ३२ ॥

ततः को दोषः?, इत्याह—

बधादृते न संसारो मुक्तिर्वास्योपपद्यते। यमादि तदभावे च सर्वमेव ह्यपार्थकम् ॥ ३३ ॥

बन्धादृते– बन्धं विना, देव-नारकादिरूपः संसारो न। नवाऽस्य– आत्मनः, मुक्तिरुपपद्यते, बद्धानां कर्मणां क्षय एव हि मुक्तिरिति। तदभावे च– मुक्त्यभावे च; सर्वमेव, हि– निश्चितम्, यमादि[3]– यम-नियमादिकं घोरानुष्ठानम् अपार्थकम्– विपरीतप्रयोजनम्; कः खलु फलमनभिलषन्नेव दुष्करक्लेशैरात्मानमवसादयेत्? ॥ ३३ ॥

पराभिप्रायमाह—

आत्मा न बध्यते नापि मुच्यतेऽसौ कदाचन। बध्यते मुच्यते[4] चापि प्रकृतिः स्वात्मनेति चेत् ३४

असौ– प्रत्यक्षसिद्धः, आत्मा न बध्यते– न प्राकृतिकादिबन्धपरिणतो भवति, सवासनक्लेशकर्माशयानां बन्धत्वेन समाम्नातानां पुरुषेऽपरिणामिन्यसंभवात्। नापि कदाचन मुच्यते– मुचेर्बन्धनविश्लेषार्थत्वात्, तस्य[5] च सर्वदाऽबद्धत्वात्।

---

१ विरोधेन विशेषणविशेष्यभावाभावादित्यर्थः। २ मयूरव्यंसकादित्वाद् मध्यमपदलोपी समासः, शाकपार्थिववत्। ३ ग. घ, च. 'दिकं'।
४ मुद्रितमूले 'वापि' इति पाठः। ५ तस्य– आत्मनः।

कुत्र तर्हि बन्ध-मोक्षौ ?, इत्यत आह– बध्यते प्रकृतिरेव, स्वात्मना– स्वपरिणामलक्षणेन बन्धेन, मुच्यते चापि [1] तेन प्रकृतिरेव, तेत्रैव [2] बन्धविश्लेषात् । पुरुषे तु तावुपचर्येते, भृत्यगताविव जय-पराजयौ स्वामिनीति; तदुक्तम्—

"तस्माद् न बध्यते [3] नापि मुच्यते नापि संसरति कश्चित् । संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः [4] ॥१॥"

इति । समाधत्ते– इति चेत् ॥ ३४ ॥

अत्रोत्तरम्—

एकान्तेनैकरूपाया नित्यायाश्च न सर्वथा । तस्याः क्रियान्तराभावाद्बन्धमोक्षौ सुयुक्तितः॥३५॥

एकान्तेनैकरूपायाः– सर्वथैकस्वभावायाः, सर्वथा नित्यायाश्च– सर्वैः प्रकारैः प्रवृत्तिरूपैकक्रियायाश्च, तस्याः– प्रकृतेः, क्रियान्तराभावात्– निवृत्तिक्रियाया अभावात् , सुयुक्तितः– सन्न्यायात् , बन्ध-मोक्षौ न । प्रकृति-पुरुषान्यताख्यातिरूपो हि व्यापारः पुरुषस्यैव, इति तस्यैव मोक्ष उचितः, न तु प्रकृतेः, तस्याः प्रवृत्त्येकरूपत्वात् ; पुरुषार्थमचेतनत्वेन व्यापारायोगाच्च ।

किञ्च, प्रकृतेर्मुक्तौ पुरुषस्य स्वरूपावस्थाने तस्याः साधारणत्वादेकमुक्तौ संसारोच्छेदः, प्रकृतिवदात्मनोऽपि सर्वगतत्वेन 'एकावच्छेदेन मुक्तिः, नान्यावच्छेदेन' इत्यपि वक्तुमशक्यत्वात् । 'तद्बुद्ध्यवच्छेदेन मुक्तत्वम् , नान्यबुद्ध्यवच्छेदेन' इत्यपि क्षीणाया बुद्धेरनवच्छेदकत्वादनुद्धोष्यम् , बुद्धियोगेन पुरुषस्य संसारित्वे तस्यैव मोक्षप्रसङ्गाच्च ॥ ३५ ॥

१ स्वपरिणामलक्षणेन बन्धेन । २ तत्रैव–प्रकृतौ, बद्ध एव वा । ३ 'तेऽसौ न मु' इति सांख्यकारिकायां पाठः । ४ सांख्यकारिकायां कारिका ६२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोषान्तरमप्याह—

मोक्षः प्रकृत्ययोगो यदतोऽस्याः स कथं भवेत् । स्वरूपविगमापत्तेस्तथा तन्त्रविरोधतः[2]॥३६॥

मोक्षः [1]प्रकृत्ययोगः, यत्– यस्मात् कारणात् ; "प्रकृतिवियोगो मोक्षः" इति वचनात्, अतो हेतोः, अस्याः– प्रकृतेः, सः– मोक्षः, कथं भवेत् ? । कुतः ?, इत्याह– स्वरूपविगमापत्तेः– प्रकृतिस्वरूपनिवृत्तिप्रसङ्गात् ; पुरुषे तु [2]तद्व्यापारनिवृत्तिद्वारा तन्निवृत्तिर्युज्येतापि, न तु स्वस्मिन् स्वनिवृत्तिः संभवति, घटे घटनिवृत्त्यदर्शनात्, अप्रसक्तस्याऽप्रतिषेधात् । तथा, तन्त्रविरोधतोऽपि प्रकृतेर्मोक्षः कथम् ? ॥ ३६ ॥

[3]एतदेवोपदर्शयन्नाह—

पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः । जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः॥३७॥

पञ्चविंशतितत्त्वज्ञः– प्रकृति-महदादिपञ्चविंशतितत्त्वरहस्यपरिज्ञाता, यत्र तत्र– गृहस्थादौ, आश्रमे, रतः– तत्त्वज्ञानाभ्यासवान्, जटी–जटावान्, मुण्डी– मुण्डितशिराः, शिखी वापि– शिखावानपि, मुच्यते– प्रकृति-विकारोपधानविलयेन स्वरूपावस्थितो भवति, बाह्यलिङ्गमत्राऽकारणम् । नात्र संशयः– इदमित्थमेव, वचनप्रामाण्यात् ॥ ३७ ॥

---

१ क. 'प्रवृत्त्य' । २ तच्छब्देन प्रकृतिः परामृश्यते । ३ एतत्– तन्त्रम्– प्रकृते साङ्ख्यसिद्धान्त इति यावत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निगमयति–

पुरुषस्योदिता मुक्तिरिति तन्त्रे चिरंतनैः । इत्थं न घटते चेयमिति सर्वमयुक्तिमत् ॥३८॥

इति– एतत्प्रकारे, तन्त्रे– शास्त्रे, चिरंतनैः– पूर्वाचार्यैः, पुरुषस्य मुक्तिरुक्ता । न चेयं– पुरुषस्य मुक्तिः, इत्थम्– उक्तप्रकारेण विचार्यमाणा, घटते ; इति हेतोः, सर्वं– सांख्योक्तम् , अयुक्तिमत्– युक्तिरहितम् ॥ ३८ ॥

अत्रापि यावद् यथोपपन्नं, तावतस्तथावार्तामाह–

अत्रापि पुरुषस्यान्ये मुक्तिमिच्छन्ति वादिनः। प्रकृतिं चापि सन्न्यायात्कर्मप्रकृतिमेव हि।३९।

अत्रापि– सांख्यवादे, अन्ये वादिनः– जैनाः, पुरुषस्य मुक्तिमिच्छन्ति प्रकृतिवियोगलक्षणाम् । प्रकृतिं चापि, सन्न्यात्– सत्तर्कात् , हि– निश्चितम् , कर्मप्रकृतिमेवेच्छन्ति, बुद्ध्यादीनां निमित्तत्वात् ; तत्समन्वयश्च कथञ्चिदात्मादावेवोपपद्यते । सर्वथा सत्कार्यवादे तु सतः सिद्धत्वेनाऽकरणात् , साध्यार्थितयैवोपादानग्रहणात् , नियतादेव क्षीरादेः सामग्र्या दध्यादिदर्शनात् , सिद्धे शक्त्यव्यापारात् , तादात्म्ये स्वस्मिन्निव कार्य-कारणभावाद् विपरीतं [1]हेतुपञ्चकम् ।

यदि कारणव्यापारात् प्रागपि पटस्तन्तुषु सन्नेव, तदा किमित्युपलब्धिकारणेषु सत्सु, सत्यामपि जिज्ञासायां नोप-

---

१ "असदक०" इति सांख्यकारिकाया नवम्यां कारिकायां निर्दिष्टम् ,–'असदकरणम् , उपादानग्रहणम् , सर्वसंभवाभावः, शक्तस्य शक्यकरणम् , कारणतादात्म्यम्' इत्येवंरूपमित्यर्थः ; क्रमेण चैतेषां पञ्चानामपि 'सतः सिद्धत्वेनाकरणात्' इत्यादिनैकैकशो हेतुनाऽत्र वैपरीत्यं द्रष्टव्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लभ्यते ?। अनाविर्भावादिति चेत्। कोऽयमनाविर्भावः ?। उपलब्धेरभावश्चेत्। सैव कथम् ?, इत्याक्षेपे तदेवोत्तरम्, इति घट्टकुट्यां प्रभातम्। अथोपलब्धियोग्यस्यार्थक्रियाकारिरूपस्य विरहोऽनाविर्भाव इति चेत्। असत्कार्यवादः, तादृशरूपस्य प्रागसतः पश्चाद्भावात्। विजातीयसंयोगस्य तदवच्छेदेन सन्निकर्षस्य वा व्यञ्जकस्याऽभावाद् न प्रागुपलब्धिरिति चेत्। तर्हि तस्यैव प्रागसत्त्वेऽसत्कार्यापातः। प्राक् सन्नेवाऽऽविर्भूतो व्यञ्जक इति चेत्। न, आविर्भावस्यापि सदसद्विकल्पग्रासात्। स्थूलरूपावच्छिन्नस्य प्रागसत्त्वाद् नोपलब्धिः, धर्म-धर्मिणोः सौक्ष्म्य-स्थौल्ययोश्चैकत्वाद् नानवस्थेति चेत्। तर्हि सूक्ष्मरूपावच्छिन्नस्याऽहेतुकत्वेऽतिप्रसङ्गः। प्रकृतिमात्रहेतुकत्वे च स्थूलतादशायामपि तदापत्तिः, अनिर्मोक्षश्च, इति न किञ्चिदेतत्। तस्माच्छबलस्यैव वस्तुनः कथञ्चित् सत्त्वम्, असत्त्वं चोपपत्तिमत्। तथा च बुद्ध्यादीनामहंत्वसामानाधिकरण्येनाऽध्यवसीयमानत्वात् तद्धर्मतया तत्रैव समन्वयः, कर्मप्रकृतिस्तु तत्र निमित्तमात्रमिति प्रतिपत्तव्यम् ॥ ३९ ॥

एवं च न पूर्वोक्तदोष इत्याह—

तस्याश्चानेकरूपत्वात्परिणामित्वयोगतः। आत्मनो बन्धनत्वाच्च नोक्तदोषसमुद्भवः ॥४०॥

तस्याश्च– कर्मप्रकृतेः, अनेकरूपत्वात्– एकानेकशबलस्वभावत्वात्, परिणामित्वयोगतः– ज्ञानावरणादिविपाकपरिणामोपपत्तेः, एकरूपत्व एवाऽनेककार्यजनकत्वासंभवात्। आत्मनोऽन्योन्यानुप्रवेशेन बन्धनत्वात्– स्वरूपतिरोधायकत्वात्,

---

१ उपलब्धिः। २ व्यञ्जकत्वेनाऽऽज्ञातस्य विजातीयसंयोगस्य तदवच्छेदेन संनिकर्षस्य वेत्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मा-ऽऽत्मनोर्द्वयोरपि बन्धन-बध्यस्वभावपरिणामात् तथोपपत्तेः, नोक्तदोषस्याऽनिर्मोक्षादेः समुद्भवोऽवकाशः ॥ ४० ॥

परः शङ्कते—

नामूर्तं मूर्ततां याति मूर्तं नायात्यमूर्तताम् । यतो बन्धाद्यतो न्यायादात्मनोऽसंगतं तया ॥४१॥

न अमूर्तं– रूपादिसंनिवेशरहितम्, मूर्ततां– रूपादिमत्परिणतिम्, याति– आश्रयति, आकाशादौ तथादर्शनात् । तथा, मूर्तं– रूपादिमत्, अमूर्ततां– अमूर्तपरिणतिम्, न, आयाति– परमाण्वादिषु तत्सद्भावासिद्धेः, यतः– यस्मादेवं न स्वरूपविपर्ययो भवति, अतः– अस्मात्, न्यायात्– नियमात्, तया— कर्मप्रकृत्या, आत्मनो बन्धाद्यसंगतम् ॥ ४१ ॥

अत्रोत्तरम्—

देहस्पर्शादिसंवित्त्या न यात्येवेत्ययुक्तिमत् । अन्योन्यव्याप्तिजा चेयमिति बन्धादि संगतम् ॥४२॥

देहे स्पर्शः कण्टकादिस्पर्शः, उपघातहेतूपनिपातोपलक्षणमेतत्, आदिनाऽनुग्रह-हेतूपनिपातसंग्रहः, तत्संवित्त्या– तज्जनितसुख-दुःखानुभूत्या, यात्येव 'अमूर्तं मूर्तताम्' इति प्राक्तनानुषङ्गः; इति– एतत्, अयुक्तिमत्– अनुभवबाधितम् । घटादिसंवित्तिवद् देहस्पर्शादिसंवित्तिरात्मनोऽतन्मयत्वेऽप्युपपत्स्यत इत्यत आह– इयं च– देहस्पर्शादिसंवित्तिश्च, अन्योन्यव्याप्तिजा– गुड-शुण्ठीद्रव्ययोरिव शरीरा-ऽऽत्मनोर्जात्यन्तरतापत्तिप्रभवा, प्रतिप्रतीकं तदनुभवात्, एकाभावेऽप्यभावाच्च । युक्तं चैतत्, अ- ॥११४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विभागदर्शनात्, नरत्वादेरेकनिष्ठत्वेऽतिप्रसङ्गात्; व्यासज्यवृत्तित्वे च [1]परस्यापसिद्धान्तः, व्यासज्यवृत्तिजात्यनभ्युपगमात्, एकाश्रयत्वानुभवविरोधात्, शरीराप्रत्यक्षेऽप्यन्धकारे नरत्वप्रतीत्यनुपपत्तेश्च। तदिदमाह भगवान् सम्मतिकारः—

"[2,3]अण्णोण्णाणुगयाणं इमं व तं व त्ति विभयणमजुत्तं। जह दुद्ध-पा[4]णियाणं जावंता विसेसपज्जाया[5] ॥ १ ॥"

अन्योन्यानुगतयोरात्म-कर्मणोर्दुग्ध-पानीययोरिव यावन्तो विशेषपर्यायास्तावत्सु 'इदं वा, तद् वा' इति विभजनमयुक्तम्, प्रमाणाभावात्। एवं तर्हि ज्ञानादयोऽपि देहे स्युः, देहरूपादयोऽप्यात्मनीति चेत्। इष्टापत्तिः। तदाह—

"[6]रूवाइपज्जया जे देहे जीवदवियम्मि सुद्धम्मि। ते [3]अण्णोण्णाणुगया प[7]ण्णवणिज्जा भवत्थम्मि[8] ॥ १ ॥" इति।

'गौरोऽहं जानामि' इत्यादिधियस्तथैवोपपत्तेः, रूपादि-ज्ञानादीनामन्योन्यानुप्रवेशेन कथञ्चिदेकत्वा-ऽनेकत्व-मूर्तत्वा-ऽमूर्तत्वादिसमावेशात्। अत एव दण्डात्मादीनामेकत्वम्, अनेकत्वं च स्थानाङ्गे व्यवस्थितम्। तदाह—

---

१ सांख्यस्य। २ अन्योन्यानुगतयोरिदं वा तद्वेति विभजनमयुक्तम्। यथा दुग्ध-पानीययोर्यावन्तो विशेषपर्यायाः ॥ १ ॥

३ मुद्रितमूलादर्शे सम्मतिसूत्रे 'अन्नोन्नाणु' इति पाठः। ४ 'णिआणं' इत्यपि तत्र। ५ सम्मतिसूत्रे गाथा ४७।

६ रूपादिपर्यवा ये देहे जीवद्रव्ये शुद्धे। तेऽन्योन्यानुगताः प्रज्ञापनीया भवस्थे ॥ १ ॥

७ मुद्रितसम्मतिपुस्तके 'पन्नव' इति पाठः। ८ सम्मतिसूत्रे गाथा ४८।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"एवं[1] एगे आया एगे दंडे अ होइ, किरियाए । करणविसेसेण य तिविहजोगसिद्धी[3] वि अविरुद्धा[4]" ॥ १ ॥

नन्वेवमन्तर्हर्ष-विषादाद्यनेकविवर्तात्मकमेकं चैतन्यम्, बहिर्बाल-कुमार-यौवनाद्यनेकावस्थात्मकमेकं शरीरमध्यक्षतः संवेद्यत इत्यस्य विरोधः, बाह्या-ऽभ्यन्तरविभागाभावादिति चेत् । सत्यम्, आत्मभिन्नत्वा-ऽभिन्नत्वाभ्यां तदभावेऽपि मानसत्वा-ऽमानसत्वाभ्यां तद्व्यपदेशात् । तदाह—

"ण[5][6] य बाहिरओ भावो अब्भंतरओ अ अत्थि समयम्मि । णोइंदियं पुण पडुच होइ अब्भंतरविसेसो[7][8] ॥ १ ॥"

सर्वस्यैव मूर्ता-ऽमूर्तादिरूपतयाऽनेकान्तात्मकत्वात् । 'अयं बाह्यः, अयं चाभ्यन्तरः' इति समये न वास्तवो विभागः, अभ्यन्तर इति व्यपदेशस्तु नोइन्द्रियं मनः प्रतीत्य, तस्याऽऽत्मपरिणतिरूपस्य पराप्रत्यक्षत्वात्, शरीर-वाचोरिव । न च तद्वदेव तस्य परप्रत्यक्षत्वापत्तिः, इन्द्रियज्ञानस्याशेषपदार्थस्वरूपग्राहकत्वायोगात् । एवं च स्याद्वादोक्तिरेव युक्ता, न तु परस्परनिरपेक्षनयोक्तिर्विना श्रोतृधीपरिकर्मणानिमित्तम्, वस्तुनोऽनेकान्तात्मकत्वात्, तदाह—

१ एवमेक आत्मैको दण्डश्च भवति, क्रियया । करणविशेषेण च त्रिविधयोगसिद्धिरप्यविरुद्धा ॥ १ ॥
२ ग. घ. च. 'या य' । ३ मुद्रितसम्मतिसूत्रे 'द्धी उ अ' । ४ सम्मतिसूत्रे गाथा ४९ ।
५ नै च बाह्यको भावोऽभ्यन्तरकश्चास्ति समये । नोइन्द्रियं पुनः प्रतीत्य भवत्यभ्यन्तरविशेषः ॥ १ ॥
६ मुद्रितपुस्तके 'न य' इति पाठः । ७ मुद्रिते 'तरो भावो' इति पाठः । ८ सम्मतिसूत्रे गाथा ५० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"[1]दव्वट्ठियस्स आया बंधइ कम्मं फलं च वेएइ । बिइयस्स भावमेत्तं णे[2] कुणइ णे य कोइ[3] वेएइ ॥ १ ॥
दव्वट्ठियस्स जो चेव कुणइ सो चेव [4]वेयए नियमा । [5]अण्णो करेइ [6]अण्णो परिभुंजइ पज्जवणयस्स ॥ २ ॥
[7]जे वयणिज्जविअप्पा संजुज्जंतेसु होंति एएसु । सा[8] ससमयपण्णवणा[9] तित्थयरासायणा अण्णा[10] ॥ ३ ॥
पुरिसज्जायं तु पडुच्च जाणओ पण्णविज्ज अण्णयरं । परिकम्मणानिमित्तं दाएहा सो विसेसं पि[11]" ॥ ४ ॥"

तस्माद् देहात्मनोऽन्योन्यव्याप्तिर्जैव देहस्पर्शादिसंवित्तिरिति सिद्धम् । इति हेतोः, बन्धादि, संगतं- युक्तम्, कार्यान्यथानुपपत्तेः ॥ ४२ ॥

न च सहचारमात्रदर्शनादुक्तनियमोऽपीत्याह—

मूर्तयाऽप्यात्मनो योगो घटेन नभसो यथा । उपघातादिभावश्च ज्ञानस्येव सुरादिना ॥४३॥

१ द्रव्यास्तिकस्याऽऽत्मा बध्नाति कर्म फलं च वेदयति । द्वितीयस्य भावमात्रं न करोति न च कोऽपि वेदयति ॥ १ ॥
द्रव्यास्तिकस्य य एव करोति स एव वेदयति नियमात् । अन्यः करोत्यन्यः परिभुङ्क्ते पर्यवनयस्य ॥ २ ॥
ये वचनीयविकल्पाः संयुज्यमानयोर्भवन्त्येतयोः । सा स्वसमयप्रज्ञापना तीर्थकराशातनाऽन्या ॥ ३ ॥
पुरुषजातं तु प्रतीत्य ज्ञायकः प्रज्ञापयेदन्यतरत् । परिकर्मणानिमित्तं दर्शयेत् स विशेषमपि ॥ ४ ॥

२ मुद्रिते 'न' इति पाठः । ३ 'को वि वे' इत्यपि तत्र । ४ मुद्रिते 'वेअई निअमा' इति पाठः । ५ 'अन्नो' इत्यपि तत्र । ६ 'वनय' इति मुद्रितसम्मतौ । ७ 'जं' इति मुद्रिते । ८ 'सा सम' इति मुद्रिते पाठः । ९ 'पज्जव' इत्यपि तत्र । १० 'अन्ना' इति मुद्रिते । ११ सम्मतिसूत्रे गाथा ५१, ५२, ५३, ५४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूर्तयापि– प्रकृत्या, आत्मनो योगः 'संभवति' इति शेषः। दृष्टान्तमाह– यथा घटेन नभसः। घटेन संयुक्तमपि नभो न घटस्वभावतां यातीति न दोष इति चेत्। स संयोगः किं घटस्वभावः, नभःस्वभावः, उभयस्वभावः, अनुभयस्वभावो वा ?। आद्ययोरुभयनिरूप्यत्वानुपपत्तिः। तृतीये च वदतो व्याघातः, घटस्वभावसंयोगवत्तया नभसो घटस्वभावत्वात्। चतुर्थे त्वनुपाख्यत्वापत्तिः। इति न किञ्चिदेतत्।

अस्तु तर्हि नभसो घटादिनेव कर्मणा जीवस्य संबन्धः, ततोऽनुग्रहो-पघातौ तु तस्य नभस्त्वदेव न; इत्यत आह– उपघातादिभावश्च– उपघाता-ऽनुग्रहभावश्च मूर्ताया अपि कर्मप्रकृतेः सकाशात्, सुरादिना– सुरा-ब्राह्मी-घृतादिना, ज्ञानस्येव युक्तः, अङ्गा-ऽङ्गिभावलक्षणसंबन्धप्रयोज्यत्वात् तस्येति भावः।

ननु सर्वमिदमात्मनोऽविभुत्वे संभवति, तदेव चाद्यापि न सिद्धमिति चेत्। न, शरीरानियतपरिमाणवत्त्वेनैवाऽऽत्मनोऽनुभवात् मूर्तत्वसंशयस्य ज्ञानप्रामाण्यसंशयादिनोपपत्तेः। न च द्रव्यप्रत्यक्षत्वावच्छिन्नहेतोर्महत्त्वस्याऽऽत्मनि सिद्धौ तस्यावयवमहत्त्वाद्यजन्यत्वेन नित्यतया 'आत्मा विभुः, नित्यमहत्त्वात्, आकाशवत्' इत्यनुमानात् तस्य विभुत्वमेव युक्तमिति वाच्यम्; नित्यमहत्त्वेऽप्यपकृष्टपरिमाणवत्त्वे बाधकाभावेनाप्रयोजकत्वात्। अपकृष्टत्वे तस्य जन्यत्वापत्तिर्बाधिका, गगनमहत्त्वावधिकापकर्षस्य बहुत्वजन्यतावच्छेदकत्वादिति चेत्। न, परमाणुपरिमाणसाधारणतयाऽस्य कार्यतानवच्छेदकत्वात्, त्रुटिम-

१ उपघातानुग्रहभावस्य। २ तस्य– आत्मनः। ३ गगनमहत्त्वावधिकापकर्षस्य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हस्त्वावधिकोत्कर्षेण समं सांकर्यात् तादृशजात्यसिद्धेश्च; वस्तुतः प्रदीपप्रभाया इवात्मनः संकोच-विकाशाभ्यां परिमाणभेदस्याऽभ्युपगमेन सर्वथा नित्यमहत्त्वासिद्धेश्च ।

कथं चात्मनो विभुत्वे स्वस्मिन् क्रियादिप्रतीतिः, तीर्थगमनादेरदृष्टहेतुत्वश्रवणादिकं चोपपादनीयम् ? । कथं वात्मनः सर्वगतत्वात् स्वशरीरादन्यत्रापि न ज्ञानाद्युत्पादः ? । शरीराभावादिति चेत् । न, अन्यशरीरस्य सत्त्वात् । स्वशरीराभावादिति चेत् । न, स्वसंयुक्तत्वेन तस्याऽपि स्वीयत्वात् । स्वादृष्टोपगृहीतशरीराभावादिति चेत् । तर्हि उपजीव्यत्वात् तददृष्टस्यैव तदज्ञानादिहेतुत्वात् तस्य शरीरव्यापितयाऽऽत्मनस्तथात्वसिद्धिः; तदुक्तम्– "यत्रैव[1] यो दृष्टगुणः स तत्र०" इत्यादि । अपिच, आत्मविभुत्ववादे ज्ञानादीनामव्याप्यवृत्तित्वादिकल्पने गौरवमिति न किञ्चिदेतत् । अधिकं न्यायालोकादौ ॥ ४३ ॥

उपसंहरन्नाह—

एवं प्रकृतिवादोऽपि विज्ञेयः सत्य एव हि। कपिलोक्तत्वतश्चैव दिव्यो हि स महामुनिः॥४४॥

एवम्– उक्तप्रकारेण, हि– निश्चितम्, प्रकृतिवादोऽपि सत्य एव विज्ञेयः, नानृतः । उपपत्त्यन्तरमाह– कपिलोक्तत्वतश्चैव– द्रव्यार्थिकनयावलम्बिकपिलप्रणीतत्वाच्चैव । तेनाऽनृत एवायं वाद उक्तो भविष्यतीत्यत आह– हि– यतः, स महामुनिः, दिव्यः– अद्भुतशीलाचरणशाली, अतो नानृतं ब्रूयात्, इति तस्याऽप्ययमेवाऽभिप्राय इति भावः ॥ ४४ ॥

---

१ हेमचन्द्राचार्यविरचितायामन्ययोगव्यवच्छेदद्वात्रिंशिकायां श्लो० ९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सांख्य ! सख्यमिदमेव केवलं मन्यसे प्रकृतिजन्म यज्जगत् ।
आत्मनस्तु भणितौ विधर्मणः संख्यमेव भजदेवमावयोः ॥ १ ॥
आत्मानं भवभोगयोगसुभगं विस्पष्टमाचष्ट यो यः कर्मप्रकृतिं जगाद जगतां बीजं जगच्छर्मणे ।
नद्योऽब्धाविव दर्शनानि निखिलान्यायान्ति यद्दर्शने तं देवं शरणं भजन्तु भविनः स्याद्वादविद्यानिधिम् ॥ २ ॥

इति पण्डितश्रीपद्मविजयसोदरन्यायविशारदपण्डितयशोविजयविरचितायां स्याद्वादकल्पलताभिधानायां शास्त्रवार्तासमुच्चयटीकायां तृतीयः स्तबकः संपूर्णः ॥ ३ ॥

अभिप्रायः सूरेरिह हि गहनो दर्शनततिर्निरस्या दुर्धर्षा निजमतसमाधानविधिना ।
तथाप्यन्तः श्रीमन्नयविजयविज्ञांह्रिभजने न भग्ना चेद्भक्तिर्न नियतमसाध्यं किमपि मे ॥ १ ॥
यस्यासन् गुरवोऽत्र जीतविजयप्राज्ञाः प्रकृष्टाशया भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरस्तेन न्यायविशारदेन रचिते ग्रन्थे मतिर्दीयताम् ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

अथ चतुर्थः स्तबकः ।

यस्याभिधानाज्जगदीश्वरस्य समीहितं सिध्यति कार्यजातम् ।
सुरा-ऽसुराधीशकृतांह्रिसेवः पुष्णातु पुण्यानि स पार्श्वदेवः ॥ १ ॥

अङ्कारूढमृगो हरिर्न भुजगाऽऽतङ्काय सर्पाऽसुहृद् निःशङ्काश्च सुरा-ऽसुरा न च मिथोऽहङ्कारभाजो नृपाः ।
यद्व्याख्याभुवि वैर-मत्सरलवाशङ्कापि पङ्कावहा श्रीमद्वीरमुपास्महे त्रिभुवनालङ्कारमेनं जिनम् ॥ २ ॥

वार्तान्तरमाह—

मन्यन्तेऽन्ये जगत्सर्वं क्लेशकर्मनिबन्धनम् । क्षणक्षयि महाप्राज्ञा ज्ञानमात्रं तथा परे ॥ १ ॥

अन्ये– सौत्रान्तिकाः सौगताः, सर्वं– चराचरम्, जगत्, क्लेशकर्मनिबन्धनं– रागादिनिमित्तम्, तथा, क्षणक्षयि- प्रतिक्षणनश्वरम्, मन्यन्ते । तथा, महाप्राज्ञाः– तेभ्योऽपि सूक्ष्मबुद्धयः, परे– योगाचाराः, ज्ञानमात्रं– क्षणिकविज्ञानमात्रं जगद् मन्यन्ते ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाहि—

तयाहुः क्षणिकं सर्वं नाशहेतोरयोगतः। अर्थक्रियासमर्थत्वात् परिणामात्क्षयेक्षणात् ॥२॥

ते- सौगताः, आहुः- प्रतिजानते । किम्?, इत्याह- सर्वं क्षणिकमिति । अत्र हेतुचतुष्टयम्- नाशहेतोरयोगत इत्याद्यो हेतुः, अर्थक्रियासमर्थत्वादिति द्वितीयः, परिणामादिति तृतीयः, अतादवस्थ्यादित्यर्थः; क्षयेक्षणादिति तुर्यः, अन्ते क्षयदर्शनादित्यर्थः ।

अत्राद्यहेतुना स्थायित्वासिद्धौ साध्यसिद्धिः, तथाहि- नाशहेतुभिर्नश्वरस्वभावो भावो नाश्येत, अतादृशो वा?। आद्ये, प्रयासवैफल्यम् । द्वितीये तु स्वभावपराकरणस्य कर्तुमशक्यत्वादनाशप्रसङ्गः । कियत्कालस्थायित्वस्वभावस्यैव कार्यस्य हेतुभिर्जनने च तादृशस्वभावस्योदयकाल इवान्तकालेऽपि सत्त्वात् पुनस्तावन्तं कालमवस्थानापत्तिरिति ।

द्वितीयेऽप्यर्थक्रियासमर्थत्वं स्थायिनो निवर्तमानं क्षणिक एव भावे विश्राम्यति; तथाहि- स्थायी भावः क्रमेण वा कार्यं कुर्यात्, अक्रमेण वा?। द्वितीये, एकदैव सर्वकार्योत्पत्तिः । आद्ये चार्थक्रियाजननस्वभावत्वे प्रागेव कुतो न कुर्यात्?। सहकार्यभावादिति चेत् । किं सहकारित्वम्?- अतिशयाऽऽधायकत्वम्, एककार्यप्रतिनियतत्वं वा?। आद्ये, अतिशयाधानेनैव कारकोपक्षयः, अतिशयस्य भेदे च सहकार्यनुपकारः, अभेदे च बलाद् भिन्नस्वभावत्वम् । द्वितीये साहित्येऽपि पररूपेणाऽहे- ॥११८॥

तुत्वादकारकावस्थात्यागात् कार्यानुत्पत्तिरेव । इतरहेतुसंनिधान एव कार्यं जनयतीति हेतोः स्वभाव इति चेत् । तर्हुत्पत्त्यनन्तरमेव स्वभावानुप्रविष्टत्वादितरहेतून् मेलयेदिति ।

तृतीये परिणामस्याऽन्यथाभावरूपस्य पूर्वरूपपरित्यागं विनाऽभावात्, तस्य चानुभवसिद्धत्वात् क्षणिकत्वसिद्धिः ।

चतुर्थेऽप्यन्ते[1] क्षयदर्शनात् तदन्यथानुपपत्त्या प्रागपि तत्सिद्धिः । इह प्रत्यक्षानुपपत्तिर्मूलम्, आद्ये[2] तु स्वभावानुपपत्तिरिति विशेषः ॥ २ ॥

योगाचारमतप्रयोगमाह—

ज्ञानमात्रं च यल्लोके ज्ञानमेवानुभूयते । नार्थस्तद्व्यतिरेकेण ततोऽसौ नैव विद्यते ॥ ३ ॥

ज्ञानमात्रं च 'जगत्' इति शेषः । चकारेण क्षणिकत्वसमुच्चयः । हेतुमाह– यद्– यस्मात्, लोके ज्ञानमेवाऽनुभूयते, अर्थस्तद्व्यतिरेकेण नानुभूयते, तस्य जडत्वाभ्युपगमात्, ज्ञानविषयताया ज्ञानाभेदनियतत्वात् । ततः, असौ– संवृतिसिद्धो[3]ऽर्थः, नैव विद्यते– पारमार्थिको नेत्यर्थः ॥ ३ ॥

अत्र समाधानवार्तामाह—

अत्राप्यभिदधत्यन्ये स्मरणादेरसंभवात् । बाह्यार्थवेदनाच्चैव सर्वमेतदपार्थकम् ॥ ४ ॥

---

१ क्षयेक्षणरूपे चतुर्थे हेतौ । २ नाशहेत्वयोगरूपे प्रथमे हेतौ । ३ संवृतिः– कल्पना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रापि– बौद्धवादेऽपि, अन्ये– जैनाः, अभिदधति– उत्तरयन्ति । किम् ?, इत्याह– क्षणिकत्वे स्मरणादेरसंभवात्, बाह्यार्थवेदनाच्चैव– बाह्यार्थप्रमान्यथानुपपत्त्या ज्ञानमात्रासिद्धेश्चैवेत्यर्थः, सर्वमेतत्– दिङ्मात्रेण निर्दिष्टं सौगतमतद्वयम्, अपार्थकं– निष्प्रयोजनम् ॥ ४ ॥

स्मरणासंभवमुपपादयति—

अनुभूतार्थविषयं स्मरणं लौकिकं यतः । कालान्तरे तथाऽनित्ये मुख्यमेतन्न युज्यते ॥५॥

अनुभूतार्थविषयं– ज्ञातार्थगोचरम्, लौकिकम्– आगोपालादिसिद्धम्, यतः– यस्मात्, कालान्तरे– अनुभवव्यवहितोत्तरकाले, तथा– प्रतिनियतरूपेण, अनित्ये– निरन्वयनश्वरेऽनुभवितरि, मुख्यम्– अभ्रान्तमेव, एतत्– स्वसंवेदनसिद्धं स्मरणम्, नोपपद्यते– अन्येनाऽनुभवेऽन्यस्य स्मरणायोगात्, 'योऽहमन्वभवं सोऽहं स्मरामि' इत्युल्लेखानुपपत्तेश्च ॥ ५ ॥

प्रत्यभिज्ञापि न युज्यते, इत्याह—

सोऽन्तेवासी गुरुः सोऽयं प्रत्यभिज्ञाप्यसंगता । दृष्टकौतुकेयुद्वेगः प्रवृत्तिः प्राप्तिरेव वा ॥६॥

'सोऽयमन्तेवासी' 'सोऽयं गुरुः' इति प्रत्यभिज्ञापि क्षणिकत्वपक्षेऽसंगता, तत्ताविशिष्टाभेदस्येदंताविशिष्टेऽनुपपत्तेः । न च प्रत्यभिज्ञा न प्रमाणम्, 'सैवेयं गूर्जरी' इत्यादौ विषयबाधदर्शनादिति वाच्यम्; एवं सति हेत्वाभासादिदर्शनात् सद-

१ सर्वत्र मूले स्वोपज्ञटीकायां च 'कमुद्वे' इति प्रथमान्त एव पाठ आदृतः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नुमानादीनामप्यप्रामाण्यप्रसङ्गात् । न चाध्यक्षे पूर्वकालसंबन्धिताया असंनिहितत्वात् परामर्शानुपपत्तिः, अन्त्यसंख्येयग्रहणकाले 'शतम्' इति प्रतीतेः क्रमगृहीतसंख्येयाध्यवसायतत्संस्कारवशादुपपत्तेः । न च नील-पीतयोरिव वर्तमाना-ऽवर्तमानत्वयोर्विरुद्धत्वादेकत्र तत्परिच्छेदरूपत्वादयं भ्रमः, अत एव तस्य तादृशापरापरविषयसंनिधानदोषजन्यत्वमिति वाच्यम्; एकत्र नानाकालसंबन्धस्याऽविरुद्धत्वात्; अन्यथा नीलसंवेदनस्यापि स्थूराकारावभासिनो विरुद्धदिक्संबन्धात् प्रतिपरमाणु भेदप्रसक्तेस्तदवयवानामपि षट्कयोगाद् भेदापत्तितोऽनवस्थाप्रसक्तेः ।

न च क्षणिकत्वानुमानेनाऽस्याः[1] बाध इति शङ्कनीयम्, निश्चितप्रामाण्यकत्वेनाऽनयैव[2] तद्बाधात्[3]; कुर्वद्रूपत्वसिद्धावुपस्थितवह्नित्वादिकं विहाय वह्न्यादेर्विजातीयवह्नित्वादिना हेतुत्ववद् विजातीयधूमत्वादिना धूमादेः कार्यत्वसंभावनयोपस्थितधूमत्वावच्छेदेन कार्यत्वाग्रहात्, तदनुकूलतर्काभावेन व्याप्तेरग्रहात्, प्रसिद्धानुमानस्याप्युच्छेदेन क्षणिकत्वानुमानस्यैवाऽनवताराच्च । घटे रूपादेरिवोक्तप्रत्यभिज्ञायां पूर्वताया वर्तमानत्वेनैव भानाद् भ्रमत्वमित्यपि न वाच्यम्, संनिहित एव विशेषणे विद्यमानतायाः संसर्गादिना भानादिति दिक् ।

तथा, दृष्टकौतुकेऽर्थे, उद्वेगः– सिद्धत्वज्ञानकृतेच्छाविच्छेदरूपः, असंगतः स्यात्, क्षणिकतद्व्यक्त्यन्तरदर्शनस्यासिद्धत्वात् । तथा, प्रवृत्तिरपि– तद्व्यक्तिविषयिणी, असंगता स्यात्, ज्ञाताया व्यक्तेर्नष्टत्वात्, अज्ञातायां चाप्रवृत्तेः । तथा, प्राप्तिरेव च इच्छाविषयव्यक्तेः, असंगता, अस्याः प्रागेव नाशात् ॥ ६ ॥

---

१ अस्याः– प्रत्यभिज्ञायाः । २ अनयैव– प्रत्यभिज्ञया । ३ क्षणिकत्वानुमानबाधात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा—

स्वकृतस्योपभोगस्तु दूरोत्सारित एव हि । शीलानुष्ठानहेतुर्यः स नश्यति तदैव यत् ॥७॥

स्वकृतस्य– शुभादेः, उपभोगः– विपाकानुभवः, दूरोत्सारित एव, हि– निश्चितम्; प्रवृत्तेर्भ्रमादिना कथञ्चिदुपपत्तावपि स्वकृतोपभोगोपपादने न कोऽप्युपाय इति भावः । कुतः ?, इत्याह– यत्– यस्मात् कारणात्, यः शीलानुष्ठानहेतुः क्षणः, स तदैव, नश्यति– निरन्वयनाशभाग् भवति ॥ ७ ॥

पर आह—

संतानापेक्षयास्माकं व्यवहारोऽखिलो मतः । स चैक एव तस्मिंश्च सति कस्मान्न युज्यते ?॥८॥

संतानापेक्षया– भूत-वर्तमान-भविष्यत्क्षणप्रवाहापेक्षया, अस्माकम्[1], अखिलः– ऐहिक आमुष्मिकश्च, व्यवहारः, मतः– इष्टः । स च– संतानः, एक एव । तस्मिंश्च सति कस्माद् न युज्यते स्मृत्यादिः, ऐहिकतयोपपत्तेः ? ॥ ८ ॥

आमुष्मिकमधिकृत्याह—

यस्मिन्नेव तु संताने आहिता कर्मवासना । फलं तत्रैव संधत्ते कर्पासे रक्तता यथा ॥९॥

यस्मिन्नेव संताने– क्षणप्रवाहे, तुराधानयोग्यतां विशेषयति, कर्मवासना, आहिता– कर्मणा जनिता, फलं– शुभा-

१ अस्माकं– बौद्धानामित्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽशुभादिकम्, तत्रैव, संधत्ते- जनयति । किंवत् ?, इत्याह- यथा कर्पासे लाक्षारसाद्याहिता रक्तता कर्पास एव स्वफलं स्वोपरक्तबुद्ध्यादिकं जनयति ॥ ९ ॥

अत्रोत्तरम्—

एतदप्युक्तिमात्रं यन्न हेतु-फलभावतः। संतानोऽन्यः स चायुक्त एवासत्कार्यवादिनः॥१०॥

एतदपि- संतानैक्यमादाय समाधानमपि, उक्तिमात्रं- युक्तिशून्यं वचनम्, यद्- यस्मात् कारणात्, हेतु-फलभावतः- पूर्वा-ऽपरक्षणहेतु-हेतुमद्भावात्, अन्यः संतानो नास्ति । एवमपि नानुपपत्तिः, स्वजन्यतासंबन्धेनानुभवादेः स्मृत्यादिनियामकत्वात्, प्रत्यभिज्ञाया अपि 'स एवायं गकारः' इत्यादाविव तज्जातीयाभेदविषयकतयोपपत्तेः, इच्छादेरपि समानप्रकारकतयैव प्रवृत्त्यादिहेतुतयोपपत्तेश्च ; इत्यत आह- स च- क्षणिकहेतु-हेतुमद्भावश्च, असत्कार्यवादिनो मते, अयुक्त एव ॥ १० ॥

तथाहि—

नाभावो भावतां याति शशशृङ्गे तथाऽगतेः। भावो नाभावमेतीह तदुत्पत्त्यादिदोषतः॥११॥

न अभावः- तुच्छः; भावतां याति- अतुच्छतां प्रतिपद्यते । कुतः ?, इत्याह- शशशृङ्गे, तथा- भावत्वेन, अगतेः- अपरिच्छेदात् । तथा, भावः- अतुच्छः, नाऽभावमेति- न तुच्छतां याति, इह- जगति । कुतः ? इत्याह- तदुत्पत्त्यादिदोषतः- अभावोत्पत्त्यादिदोषप्रसङ्गात् ॥ ११ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाहि—

सतोऽसत्त्वे तदुत्पादस्ततो नाशोऽपि तस्य यत् । तन्नष्टस्य पुनर्भावः सदा नाशे न तत्स्थितिः १२

सतः– क्षणिकभावस्य, असत्त्वे– द्वितीयादिक्षणेऽसत्त्वे सति, तदुत्पादः– असत्त्वोत्पादः, कादाचित्कत्वात् । ततः– उत्पादात्, नाशोऽपि, तस्य–असत्त्वस्य; कृतकत्वात्; यद्– यस्मात् कारणात् । तत्– तस्मात्, नष्टस्य सतः, पुनर्भावः, तदसत्त्वनाशाधिकरणक्षणत्वस्य तदधिकरणत्वव्याप्यत्वादिति भावः । नाशस्य नित्यत्वाद् न दोष इति चेत् । तर्हि सदा नाशे, न तत्स्थितिः– प्रथमक्षणेऽपि भावस्य स्थितिर्न स्यात् ॥ १२ ॥

पराभिप्रायमाह—

स क्षणस्थितिधर्मा चेद् द्वितीयादिक्षणास्थितौ । युज्यते ह्येतदप्यस्य तथा चोक्तानतिक्रमः १३

सः– भावनाशः, क्षणस्थितिधर्मा– भाव एव । अयं भावः– द्विविधो ह्यस्माकं विनाशः, सांव्यवहार्यः, तात्त्विकश्च । आद्यो भावनिवृत्तिरूपः । द्वितीयश्च भावरूपः । तत्र कार्यकाले कारणनिवृत्तिकल्प आद्यमेव नाशमवलम्बते । वस्तुव्यवस्थापकस्त्वाद्य एव । एतेन 'कार्योत्पत्तिकाल एव कारणविनाशाभ्युपगमे कारणोत्पादरूपत्वात् तस्य सहभावेन कार्य-कारणभावव्यवस्थोत्सीदेत्, कारणोत्पादात् कारणविनाशस्य भिन्नत्वाभ्युपगमे च कृतकत्वस्वभावत्वमनित्यत्वस्य न भवेत्; व्यतिरिक्ते

१ अभावाभावस्य भावात्मकत्वादिति पर्यवसितोऽर्थः । २ अस्माकम्– बौद्धानां मते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च नाशे समुत्पन्ने न भावस्य निवृत्तिः, इति कथं क्षणिकत्वम् ?' इत्यध्ययनाविद्धकर्णोद्द्योतकरादीनामपि मतं परास्तम् । अत्राह– इति चेत् । एतदपि– क्षणस्थितिधर्मकत्वम्, हि– निश्चितम्, अस्य द्वितीयादिक्षणास्थितौ सत्यां, युज्यते, तथा चोक्तानतिक्रमः– उक्तदोषापरिहारः ॥ १३ ॥

इदमेव भावयति—

क्षणस्थितौ तदैवास्य नास्थितिर्युक्त्यसंगतेः। न पश्चादपि सा नेति सतोऽसत्त्वं व्यवस्थितम्॥

क्षणस्थितौ– क्षणस्थितिरूपस्यैव क्षणस्थितिधर्मकत्वस्याभ्युपगमे, तदैव– द्वितीयादौ क्षण एव, अस्य– भावस्य, अस्थितिर्न भवति, युक्त्यसंगतेः– क्षणस्थिति-क्षणास्थित्योर्युक्त्या विरोधात् । न चेष्टापत्तिरित्याह– न पश्चादपि– द्वितीयादिक्षणेऽपि, सा– अस्थितिः, न, तदस्थितेरेवानुभवात्, क्षणिकत्वभङ्गप्रसङ्गाच्च । न च द्वितीयादिक्षणस्थितिरपि निवृत्तिरूपा संव्यवहार्यैव, तात्त्विकी त्वाद्यक्षणस्थितिरूपेति न दोष इति वाच्यम्, अभावस्याऽधिकरणानतिरेकेण द्वितीयादिक्षणरूपत्वात्, द्वितीयादिक्षणास्थितेः । अतो द्वितीयादिक्षणेषु सतः– घटादेः, असत्त्वं व्यवस्थितम्– सिद्धम् । तथाच 'सतोऽसत्त्वे' इत्याद्युक्तदोषानतिक्रम एव ॥ १४ ॥

अत्रैवाक्षेप-परिहारावाह—

---

१ कारिका द्वादशी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न तद्भवति चेत् किं न सदा सत्त्वं तदेव यत् । न भवत्येतदेवास्य भवनं सूरयो विदुः ॥१५॥

न तत्– असत्त्वं, भवति, तुच्छत्वादित्यभिप्राय इति चेत् । किं न सदा सत्त्वं भावस्य, तदसत्त्वाभावात् । पर आह– तदेव– सत्त्वमेव, यद्– यस्मात्, न भवति द्वितीयादिक्षणेषु, अतो न सदा सत्त्वं भावस्य । अत्रोत्तरम्, एतदेव– भावस्याऽभवनं, तदात्वेनासत्त्वस्य भवनं, सूरयः– पण्डिताः, विदुः– जानन्ति । तथाहि– नेदं भावाभवनं काल्पनिकम्, तथात्वे भावस्यापि काल्पनिकत्वापत्तेः, यतो लाक्षणिको विरोधो नील-पीतादेः परैरभ्युपगम्यते, वस्तुस्वरूपव्यवस्थापकं च लक्षणम्, तन्निमित्तो विरोधो लाक्षणिक उच्यते, भावप्रच्युतिश्च लक्षणम्, यतो नीलस्य विरोधो नीलप्रच्युत्या, तद्विरोधे च पीतादीनामपि तत्प्रच्युतिव्याप्तानां तेन विरोधः; तथाच 'प्रमाणं नीलपरिच्छेदकत्वेन प्रवृत्तं नीलप्रच्युतिं, तद्व्याप्तांश्च पीतादीन् व्यवच्छिन्ददेव स्वपरिच्छेद्यं नीलं परिच्छिनत्ति' इत्यभ्युपगमः । स च भावाभवनस्य शशविषाणप्रख्यत्वे भावविरुद्धत्वस्य पीतादिव्यापकत्वस्य भावाद् नोपपद्यत इति । न च तदभवने तद्ग्रहणमात्रमेव, न तु तदतिरिक्तग्रहणम्, इति न तदभवनमेव तदसत्त्वभवनमिति वाच्यम्, सद्व्यवहारनिषेधा-ऽसद्व्यवहारप्रवृत्त्योस्तदग्रहण-तदभावग्रहणनिमित्तत्वादिति दिक् ॥ १५ ॥

एतदेव स्पष्टयन्नाह—

कादाचित्कमदो यस्मादुत्पादाद्यस्य तद् ध्रुवम् ।
तुच्छत्वान्नेत्यतुच्छस्याप्यतुच्छत्वात्कथं नु यत् ? ॥ १६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अदः– एतदसत्त्वम्, यस्मात् कादाचित्कम्, भावकालेऽसत्त्वात् । तदस्योत्पादादि– उत्पाद-विनाशादि, ध्रुवं– नियतम्, यद्यत् कादाचित्कं तत्तदुत्पादादिमदिति व्याप्तेः । पर आह– तुच्छत्वादसत्त्वस्योत्पादादि नेति । परिहरति– अतुच्छस्यापि भावस्य, अतुच्छत्वात् कारणात्, कथं नु तदुत्पादादि ? । यद् यस्मादेवम्, अतो न प्रागुक्तम्, अप्रयोजक-हेतुमात्रेण साध्यासिद्धेरिति भावः ॥ १६ ॥

पर आह—

तदाभूतेरियं तुल्या तन्निवृत्तेर्न तस्य किम् ।
तुच्छताप्तेर्न भावोऽस्तु नासत्सत्सदसत्कथम् ? ॥ १७ ॥

तदाभूतेः– तदोत्पत्तिदर्शनेन, अतुच्छस्योत्पादादि न्याय्यमित्यर्थः । अत्रोत्तरम्– इयम्– अनुभवसिद्धा तदाभूतिः, तुल्या, तुच्छस्यापि सत्त्वानन्तरमसत्त्वस्यानुभूयमानत्वात् । पर आह– तन्निवृत्तेः– अतुच्छनिवृत्तेः, न तुल्या तुच्छस्य तदाभूतिः, अतुच्छस्योत्पादानुभवः प्रमाणम्, तुच्छस्य तु निवृत्त्यनुपपत्तेरुत्पादानुभवो न प्रमाणमिति भावः । अत्रोत्तरम्– न तस्य किं– नन्व उभयत्र संबन्धात् तस्य तुच्छस्य किं न निवृत्तिः ? इत्यर्थः । पर आह– तुच्छताप्तेरिति, तुच्छेन हि तुच्छताप्तैव, तदात्मकत्वात् । न तन्निवृत्तावपि तत्रान्यत् किञ्चिदाप्यमस्ति, तन्निवृत्तेरपि तुच्छत्वात्, अतो न तुच्छस्य निवृत्तिरिति । अत्रोत्तरम्– न, भावो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽस्त्विति– नैतदेवं यदुच्यते भवता– 'तुच्छेन तुच्छतामैव, इति न तन्निवृत्तिः' इति, यतो भावोऽस्तु तुच्छता, एवमेवैतन्निवृत्त्युपपत्तेरिति । पर आह– नासत् सदिति– कथं चासत् सद् भवति, येनोच्यते– 'तुच्छतानिवृत्तौ भावोऽस्तु ? ' इत्यभिप्रायः । अत्रोत्तरम्– सदसत् कथमिति– एतदुक्तं भवति– यद्यसत् सद् न भवति प्रकृत्यन्यथायोगेन, ततः सदसत् कथं भवति ? इति ॥ १७ ॥

पर आह—

स्वहेतोरेव तज्जातं तत्स्वभावं यतो ननु । तदनन्तरभावित्वादितरत्राप्यदः समम् ॥१८॥

स्वहेतोरेव– स्वकारणादेव, तत्– सत्त्वम् , जातम्– उत्पन्नम् , तत्स्वभावम्– असद्भवनस्वभावम् , यतः– यस्मात् , तस्मात् सत् असद् भवतीति न दोषः । अत्रोत्तरम्– ननु यद्येवम् , तदा तदनन्तरभावित्वात्– सत्त्वानन्तरभावित्वात् , इतरत्रापि– असत्त्वे, अदः– एतत् 'स्वहेतोरेवासत् सद्भवनस्वभावं जातम्' इति कल्पनं, समं– तुल्ययोग-क्षेमम् ॥ १८ ॥

पर आह—

नाहेतोरस्य भवनं न तुच्छे तत्स्वभावता । ततः कथं नु तद्भाव इति युक्त्या कथं समम्? ॥१९॥

नाहेतोः– नाकारणस्य, अस्य– असत्त्वस्य, भवनम् । तथा, तुच्छे– असत्त्वे, न तत्स्वभावता– सद्भावस्वभावता, निःस्वभावत्वेन तुच्छत्वव्यवस्थानात् । यत एवम् , अतः कथं नु तद्भावः– असतः सद्भावः ? नैवेत्यर्थः । इति– एवम् ,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युक्त्या– न्यायेन, कथं समं स्वहेतोरेव जातत्वादिकल्पनम्? इति ॥ १९ ॥

अत्रोत्तरम्—

स एव भावस्तद्धेतुस्तस्यैव हि तदाऽस्थितेः। स्वनिवृत्तिस्वभावोऽस्य भावस्येव ततो न किम्?॥

स एव भावो यस्याग्रिमक्षणेऽसत्त्वम्, तद्धेतुः– असत्त्वहेतुः, तस्यैव हि– भावस्य, तदा– द्वितीयसमये, अस्थितेः– अभवनात्। एतेन नियतानन्तरभावित्वं हेतु-फलभावाङ्गमुक्तं कार्यदर्शनेन तत्कुर्वद्रूपानुमानमपि निराबाधमेव, तथाविधक्षण-कुर्वद्रूपक्षणानुमानेऽप्यस्यैव बीजत्वात्, कार्यसामान्ये सत्कुर्वद्रूपत्वेन तु न हेतुता, मानाभावात्, गौरवाच्च। यदि चाभावस्य भावीकरणमेव तद्व्यापारः, अन्यथानुपयोगादिति संप्रदायः, तदा कार्यदर्शनबलाद् भावस्याभावीकरणमपि हेतुव्यापारतयाऽवश्यं स्वीकर्तव्यमिति। अधिकमग्रे। तथा, स्वनिवृत्तिः स्वात्मनिवृत्तिः स्वभावो धर्मः, अस्य– असत्त्वस्य, भावस्येव, हेतुसामर्थ्यात्। यत एवम्, ततो न किं युक्त्या समं स्वहेतोरेव जातत्वादिकल्पनम्? ॥ २० ॥

उपचयमाह—

ज्ञेयत्ववत्स्वभावोऽपि न चायुक्तोऽस्य तद्विधः। तदभावे न तज्ज्ञानं तन्निवृत्तेर्गतिः कथम्?॥

न चास्य– असत्त्वस्य, तद्विधः– सद्भवनलक्षणः, स्वभावोऽपि, ज्ञेयत्वस्वभाववदयुक्तः, भावस्वभावत्वाभाव एव हि तुच्छत्वम्, न तु सर्वथा निःस्वभावत्वम्। अत एव शशविषाणादावखण्डेऽप्यनादिवासनाप्रभवविकल्पगोचरतया ज्ञेयत्वं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परैरङ्गीकृतम् । ज्ञेयत्वमपि नास्त्येव तत्र, इत्यत्राह– तदभावे– ज्ञेयत्वाभावे, न तज्ज्ञानं– नासत्त्वज्ञानम् । तथा च, तन्निवृत्तेः– सत्त्वनिवृत्तेः, गतिः– परिच्छेदः, कथम् ? ॥ २१ ॥

पराभिप्रायमाह—

तत्तद्विधस्वभावं यत्प्रत्यक्षेण तथैव हि । गृह्यते तद्गतिस्तेन नैतत्क्वचिदनिश्चयात् ॥२२॥

तत्– सत्त्वानुविद्धं वस्तु, तद्विधस्वभावं– निवृत्तिरूपधर्मकम् , यद्– यस्मात् , तस्मात् प्रत्यक्षेण– तथाभूतवस्तुग्राहिणा निर्विकल्पेन, तथैव हि– स्वधर्मवदेव, गृह्यते परिच्छिद्यते । यत एवं, तेन कारणेन, तद्गतिः– सत्त्वनिवृत्तिगतिः । यद्यप्येवमपि तदधर्मभूतनिवृत्तेर्भ्रमविषयतयापि ज्ञेयत्वस्वभाववत् कार्यत्वस्वभावोऽविरुद्ध एव, तथापि वस्तुस्थित्या समाधानमाह– नैतद् यदुक्तं परेण– 'प्रत्यक्षेणैव सत्त्वनिवृत्तिर्गृह्यते' इति । कुतः ?, इत्याह– क्वचिदनिश्चयात्– प्रतीत्यभावेन क्वाप्यनिश्चयात् । यद्वा, क्वचित् सभागसंततावनिश्चयात्; निश्चय एव ह्यध्यक्षकल्पकः, यथा नीलादिनिश्चयात् तदध्यक्षकल्पनम् , अन्यथा दान-हिंसाविरतिचेतसा स्वर्गप्रापणशक्तेरप्यध्यक्षत एवावसितेर्न तत्र विप्रतिपत्तिः, इति तद्व्युदासार्थमनुमानप्रवर्तनं, शास्त्रविरचनं वा वैयर्थ्यमनुभवेत् ॥ २२ ॥

पराभिप्रायमाशङ्क्याह—

समारोपादसौ नेति गृहीतं तत्त्वतस्तु तत् । यथाभावग्रहात्तस्यातिप्रसङ्गाददोऽप्यसत् ॥२३॥ ॥१२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समारोपात्– तुल्यसत्त्वाध्यारोपात्, असौ– सत्त्वनिवृत्तिनिश्चयः, नः यथा रजतसमारोपाद् न शुक्तिनिश्चयः; तत्त्वतस्तु तत्– असत्त्वं, गृहीतम्– अध्यक्षेण परिच्छिन्नम्, तस्य– अध्यक्षस्य, यथाभावग्रहात्– प्रतिनियतधर्मकस्वलक्षणग्राहित्वात्, तद्बलेनैव तदुत्पत्तेः, अन्यधर्मानुकरणे भ्रान्तत्वप्रसङ्गात्, तद्धर्माननुकरणे चानुत्पत्तेरेवेति। अत्र यद्यपि वस्तुनो निवृत्तिधर्मकत्वसिद्धावध्यक्षस्य तद्ग्राहित्वसिद्धिः, तस्य तद्ग्राहित्वसिद्धौ च वस्तुनस्तथात्वसिद्धिः, अनुमानेऽपि प्रत्यक्षस्य मूलत्वात्, इति स्फुट एवान्योन्याश्रयः, तथाऽप्युत्कटदोषान्तरमाह– अदोऽप्यतिप्रसङ्गादसत्– अकिञ्चित्करम् ॥ २३ ॥

तथाहि—

गृहीतं सर्वमेतेन तत्त्वतो-निश्चयः पुनः। मितग्रहसमारोपादिति तत्त्वव्यवस्थितेः॥२४॥

गृहीतं सर्वं– त्रैलोक्यम्, एतेन– अध्यक्षेण, तत्त्वतः– परमार्थतः, अनिश्चयः पुनः सर्वविषयः, मितग्रहसमारोपात्– यावद् यत्र निश्चीयते तावत एव तत्रारोपात्, इति– एवम्, तत्त्वव्यवस्थितेः स्वलक्षणाध्यक्षस्वरूपोपपत्तेः संभवात्। त्रैलोक्यासंनिकर्षात् कथं तद्ग्रहणापादनम्? इति चेत्। अभिप्रायानभिज्ञोऽसि, स्वलक्षणस्यैव त्रैलोक्यात्मकत्वापादनात्। इतरग्रहप्रतिबन्धककल्पनापेक्षयेतराग्रहस्यैव कल्पने लाघवमिति चेत्। तदाऽसत्त्वस्याप्यग्रह एव कल्प्यताम्, किं समारोपेण तन्निश्चयप्रतिबन्धकल्पनया?। यद्वा, परमार्थतोऽसदृशानामपि भावानां समारोपबलेन तादृशविकल्पोत्पादकदर्शनहेतुत्वे स्वयमनीला-

---

१ निवृत्तिधर्मकत्वसिद्धिः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिस्वभावानामपि भावानां नीलादिविकल्पोत्पादकदर्शनहेतुत्वसंभवाद् निर्धर्मैकमेवास्तु स्वलक्षणम् । तथाच, सर्वं धर्माभावाद् निरवशेषमित्यर्थः, नञोऽप्रश्लेषाद् निश्चयः– मितनिश्चयः पुनर्मितग्रहसमारोपाद् नियतवासनाप्रबोधात्, इति व्याख्येयम् । वासनाप्रबोधनियमेऽप्यनुभवस्यैव नियामकत्वाद् नायं दोष इति चेत् । तर्ह्यत्यन्तासति विषये कथं वासनास्वीकारः ? । समनन्तरा-ऽसमनन्तरविकल्पविभागार्थं वासनाभेदस्वीकाराद् न दोष इति चेत् । सोऽपि किमर्थम् ? । परम्परया संवादा-ऽसंवादनियमार्थमिति चेत् । तर्हि साक्षादेव तदभ्युपगमोऽस्तु, किमीदृशकुसृष्ट्या ? इति दिक् ॥ २४ ॥

अत्रैवोपचयमाह—

एकत्र निश्चयोऽन्यत्र निरंशानुभवादपि। न तथा पाटवाभावादित्यपूर्वमिदं तमः ॥२५॥

एकत्र सत्त्वे, निश्चयः, अनुभवपाटवात्; अन्यत्र च– असत्त्वे, निरंशानुभवादपि पाटवाभावात्, न तथा– न निश्चयः, इतीदमपूर्वं तमः– महत्तममज्ञानम्, निरंशे एकत्र पाटवम्, अन्यत्र न, इति विभागाभावात् । सत्त्वनिश्चयजननी शक्तिरेव पाटवम्, असत्त्वनिश्चयहेतुशक्त्यभावश्चापाटवम्, न तु तत्र विषयावच्छेदोऽपि निविशते, येन निरंशत्वविरोधः स्यादिति चेत् । न, तद्विषयत्वेनैव तच्छक्तिनियमात्; अन्यथा नीलादिस्वभावेऽप्यनाश्वासप्रसङ्गात् । विभागसंततावसत्त्वनिश्चयदर्शनेनानुभवे तच्छक्तिकल्पनावश्यकत्वाच; अन्यथाऽतिप्रसङ्गात् सर्वानुभवेऽपि मितनिश्चयशक्तिसंभवादिति दिक् ॥ २५ ॥

प्रस्तुतमेव समर्थयति—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वभावक्षणतो ह्यूर्ध्वं तुच्छता तन्निवृत्तितः। नासावेकक्षणग्राहिज्ञानात्सम्यग्विभाव्यते॥२६॥

स्वभावक्षणतः— स्वसत्ताक्षणात्, ऊर्ध्वम्— अग्रिमक्षणेषु, हि— निश्चितम्, तुच्छता— तदसत्त्वरूपा। कुतः इत्याह— तन्निवृत्तितः— भावनिवृत्त्यभ्युपगमात्। यत एवम्, अतो नासौ— तुच्छता, एकक्षणग्राहिज्ञानात् सम्यग् विभाव्यते— न्यायतो निश्चीयते, तदा तुच्छताया असत्त्वेन तदननुभवादिति भावः॥ २६॥

ततः किम्? इत्याह—

तस्यां च नागृहीतायां तत्तथेति विनिश्चयः। न हीन्द्रियमतीतादिग्राहकं सद्भिरिष्यते॥

तस्यां च द्वितीयादिक्षणास्थितिरूपायां तुच्छतायाम्, अगृहीतायां सत्याम्, तद्— वस्तु, तथा— क्षणास्थितिधर्मकम्, इति न विनिश्चयः, तत्त्वेन विनिश्चयस्य द्वितीयादिक्षणास्थितिग्रहसापेक्षत्वात्। न च तद्ग्रहोऽपीन्द्रियेणैव भविष्यति, इत्याह— न हीन्द्रियं— चक्षुरादि, अतीतादिग्राहकम्— अतीतैष्यत्परिच्छेदकम्, सद्भिः— पण्डितैः, इष्यते। न च वर्तमानक्षणग्रहे पूर्वाऽपरयोरदर्शनादेवाभावग्रह इति शङ्कनीयम्, दृश्यादर्शनस्यैवाभावग्राहकत्वात्॥ २७॥

प्रस्तुतोपचयमाह—

अन्तेऽपि दर्शनं नास्य कपालादिगतेः क्वचित्। न तदेव घटाभावो भावत्वेन प्रतीतितः॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्तेऽपि– विभागसन्तत्युत्पत्तावपि, अस्य– घटासत्त्वस्य, क्वचिद् दर्शनं न । कुतः ? इत्याह– कपालादिगतेः– कपालादेरेव परिच्छेदात् । कपालाद्येव घटाभावः स्तात्, इत्यत्राह– न तदेव– कपालाद्येव, घटाभावः– घटासत्त्वम् । कुतः ? इत्याह– भावत्वेन प्रतीतितः– सत्त्वेनानुभवात्; न चासत् सत्त्वेनानुभूयते ॥ २८ ॥

मा भूत् कपालादिकमेव घटासत्त्वम्, तथापि कपालादिदर्शनेन घटासत्त्वमनुमास्यत इत्यत्राह—

न तद्गतेर्गतिस्तस्य प्रतिबन्धविवेकतः । तस्यैवाभवनत्वे तु भावाविच्छेदतोऽन्वयः ॥२९॥

न तद्गतेः– कपालादिदर्शनात्, तस्य– घटासत्त्वस्य, गतिः– ज्ञानम् । कुतः ? इत्याह– प्रतिबन्धविवेकतः– कपालादि-घटाभावयोर्व्याप्त्यभावात् । 'तादात्म्य-तदुत्पत्तिभ्यामेव हि व्याप्तिः' इति सुगतसुतस्य संप्रदायः । न च कपाले घटाभावतादात्म्यम्, तदुत्पत्तिर्वा, इति न व्याप्तिरिति निगर्वः । अस्तु तर्हि अनायत्या घटाभावतादात्म्यमेव कपालादौ, अधिकरणानतिरिक्ताभावस्य शशविषाणप्ररूपत्वात्, एकस्यैवाखण्डतया प्रतीयमानस्य नाशस्य सांवृतिकत्वात्, इति पक्षाङ्गीकारे परस्याह– तस्यैव– कपालादेरेव, अभवनत्वे तु– घटाभवनत्वे तु, तुनाऽभ्युपगमः सूच्यते, भावाविच्छेदतोऽन्योत्पादनस्य नाशव्यवहारेण कपालरूपघटनाशे घटस्य तादात्म्यसंबन्धस्वीकारे कपालतया घटस्य परिणामेऽपि घट एव कपालीभूत इत्यर्थप्रतीयमानया भावतोऽविच्छिन्नया, अन्वयः सिद्धः । घटासत्त्वस्याखण्डस्य स्वीकारे तु 'शशविषाणम्' इत्यादाविव षष्ठ्यर्थापर्यालोचनात् स्यादप्यनन्वय इति भावः ॥ २९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपसंहरन्नाह—

तस्मादवश्यमेष्टव्यं तदूर्ध्वं तुच्छमेव तत्। ज्ञेयं सञ्ज्ञायते ह्येतदपरेणापि युक्तिमत् ॥ ३० ॥

तस्मात्– उक्तयुक्तेः, तदूर्ध्वं– क्षणस्थितिधर्मणः सत्त्वादूर्ध्वम्, तद्– घटासत्त्वम्, तुच्छमेव– भावविलक्षणमेव, अवश्यमेष्टव्यम्– अङ्गीकर्तव्यम्। हि– निश्चितम्, एतत्– असत्त्वम्, ज्ञेयं सत्– ज्ञेयस्वभावं सत्, अपरेणापि– अग्रिमज्ञानेनापि, ज्ञायते– परिच्छिद्यते, युक्तिमत्– न्याय्यमेतत्, विषयसत्त्वे तज्ज्ञानसंभवात्; तत्तुच्छत्वा-ऽतुच्छत्वयोः प्रामाण्या-ऽप्रामाण्ययोरेव प्रयोजकत्वात्, सन्मात्रविषयत्वरूपप्रामाण्याभावेऽपि भ्रमभिन्नत्वरूपस्य तस्याक्षयत्वाच्चेति निगर्वः। तदेवमसत्त्वस्योत्पादादि व्यवस्थापितम् ॥ ३० ॥

अत्रानिष्टापत्तिपरिजिहीर्षयाह—

नोत्पत्त्यादेस्तयोरैक्यं तुच्छे-तरविशेषतः। निवृत्तिभेदतश्चैव बुद्धिभेदाच्च भाव्यताम्॥३१॥

नोत्पत्त्यादेः कारणात्, तयोः– सत्त्वा-ऽसत्त्वयोः, ऐक्यम्। कुतः? इत्याह– तुच्छे-तरत्वभेदात्; असत्त्वं हि तुच्छस्वभावम्, सत्त्वं चातुच्छस्वभावमिति। तथा, निवृत्तिभेदतश्चैव– सत्त्वस्य निवृत्तिस्तुच्छा, असत्त्वस्य त्वतुच्छेति। तथा, बुद्धिभेदाच्च– सत्त्वे 'अस्ति' इत्येव बुद्धिः, असत्त्वे च 'नास्ति' इति, विभाव्यताम्– विमृश्यताम्, विरुद्धधर्माध्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्त्यैव भेदकत्वात्, अन्यथा नील-पीतादीनामपि भावत्वेन भेदो न स्यादिति । एवं तावदभिहितः परपक्षेऽनिष्टप्रसङ्गः ॥ ३१ ॥

अथैतेन यदपाकृतं तदुपन्यस्यन्नाह—

एतेनैतत्प्रतिक्षिप्तं यदुक्तं न्यायमानिना। 'न तत्र किञ्चिद् भवति न भवत्येव केवलम्' ॥३२॥

एतेन– अनन्तरोदितेन प्रसङ्गदोषेण, एतत् प्रतिक्षिप्तं यदुक्तं न्यायमानिना– तर्कावलिप्तेन धर्मकीर्तिना । किं तदुक्तमिति सार्धकारिकाद्वयमाह– न तत्र– वस्तुनि क्षणादूर्ध्वं, किञ्चिद् भवति– वस्तुशब्दवाच्यम् । किं तर्हि तत् ? इत्याह– केवलं न भवत्येव– प्राक्क्षणे भवनशीलं तदेव न भवति, अन्यथा तन्नाशायोगादित्यर्थः ॥ ३२ ॥

ननु तद् घटाभवनं यदि घटस्वभावम्, अनीदृशं वा । उभयथापि घटाप्रच्युतिः, घटस्वभावनाशकाले घटस्यापि सत्त्वात्, घटास्वभावेन नाशेन घटस्वरूपाप्रच्युतेश्च, इत्यादिदोषोपनिपातः कथं वारणीयः ? इत्यत आह—

'भावे ह्येष विकल्पः स्याद्विधेर्वस्त्वनुरोधतः। न भावो भवतीत्युक्तमभावो भवतीत्यपि' ॥३३॥

भावे हि– वस्तुनो भवने, एषः– तत्त्वा-ऽन्यत्वयोरनिष्टप्रसङ्गादिरूपः, विकल्पः– स्यात् । कुतः ? इत्याह– विधेः– शब्दादिना विधिव्यवहारस्य, वस्त्वनुरोधतः वस्त्वालम्ब्यैव प्रवृत्तेः, अवस्तुनि तदभावात् । ननु यद्येवं, कथं तर्हि 'शशविषाणमभावो भवति' इत्यादिर्व्यवहारः ? इत्यत आह– 'अभावो भवति' इत्यप्युक्ते 'भावो न भवति' इत्युक्तम्, तस्य तत्रैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तात्पर्यात्; अन्यथा विधिव्यवहारविषयत्वे तत्र तुच्छतैव न स्यात्। ननु योग्योपलब्ध्या शशशृङ्गाभावग्रहात् तत्र कालसंबन्धार्थकभवनविधानमविरुद्धम्, प्रतियोगिव्याप्येतरत्ववद् दोषेतरत्वस्यापि योग्यताशरीरे निवेशात्, अन्यथा ह्रदादौ वह्न्यादिभ्रामकदोषसत्त्वेनानुपलम्भः, तदसत्त्वे तु न योग्यता, इति तत्र वह्न्याद्यभावप्रत्यक्षमपि न स्यात्। न च प्रतियोग्यंशे भ्रमजनकदोषतरत्वं निवेशनीयम्, ह्रदे वह्निभ्रामकदोषकाले वह्निविशिष्टह्रदत्वाभावप्रत्यक्षापत्तेः; तत्र तदनुपलम्भविघटकदोषेतरत्वनिवेशे च 'अत्र पीतशङ्खो नास्ति' इत्यादाविव तत्र तद्वृत्ताभ्रमजनकदोषातिरिक्तस्य प्रतियोगिनि प्रतियोगितावच्छेदकवैशिष्ट्यांशे भ्रमजनकस्य दोषस्य सत्त्वेऽपि तत्र तदनुपलम्भस्याबाधात्। एतेन

"दुष्टोपलम्भसामग्री शशशृङ्गादियोग्यता। न तस्यां नोपलम्भोऽस्ति नास्ति सानुपलम्भने॥ १॥"[1]

इत्युदयनोक्तमपास्तम्। न च पदवृत्त्याद्यभावात् तादृशशाब्दव्यवहारासङ्गतिरिति वाच्यम्, पदवृत्त्याद्यभावेऽपि दोषविशेषमहिम्ना शब्दादपि तद्बोधसंभवात्, वेदान्तवाक्याद् निर्दोषत्वमहिम्ना पदवृत्त्यादिकं विनैव वेदान्तिनो निर्गुणब्रह्मबोधवत्; तदाह श्रीहर्षः—

"अत्यन्तासत्यपि[2] ह्यर्थे ज्ञानं शब्दः करोति हि। अबाधात्तु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम्॥ १॥"[3] इति।

न चैवं तदुपलम्भकसामग्र्यादिकल्पने गौरवम्, प्रामाणिकत्वात्; अन्यथा प्रातीतिकपदार्थमात्रविलयापत्तेरिति चेत्।

---

१ कुसुमाञ्जलौ तृतीये स्तबके कारिका ३। २ 'पि ज्ञानमर्थे श' इति खण्डन० मुद्रितपुस्तके पाठः। ३ खण्डनखण्डखाद्ये प्रथमपरिच्छेदे कारिका ११।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न, दोषेतरतदुपलम्भकहेतोरेवाभावात्, आलोक-मनस्कारादेर्भावस्यैवोपलम्भकत्वात्, शब्दस्थलेऽपि शशशृङ्गमुख्यविशेष्यके नास्तित्वप्रकारकशाब्दविकल्प एव तत्तदानुपूर्व्याः सामर्थ्यकल्पनात् । न हि 'शशशृङ्गं नास्ति' इत्यत्र 'शशशृङ्गाभावोऽस्ति' इति कस्यचिद् व्यवहारः, किन्तु 'शशशृङ्गमस्तित्वाभाववत्' इत्येव । न च व्यवहारप्रातिकूल्येन कल्पना युक्तिमतीति ॥२३॥

एवं समर्थिते स्वमते परः स्वयमेव प्रसङ्गदोषं परिहरन्नाह—

'एतेनाहेतुकत्वेऽपि ह्यभूत्वा नाशभावतः । सत्त्वानाशित्वदोषस्य प्रत्याख्यातं प्रसञ्जनम्' ॥

एतेन– नाशस्य विधिव्यवहाराविषयत्वप्रतिपादनेन, नाशस्याहेतुकत्वेऽप्यङ्गीक्रियमाणे, हि– निश्चितम् , अभूत्वा– प्रथमंमभवनरूपेणोत्पद्य, नाशभावतः– अनन्तरं भावरूपतया नाशोत्पत्तेः, सत्त्वानाशित्वदोषस्याङ्कुरादिवत् सत्त्वोन्मज्जनरूपस्यानिष्टस्य, प्रसञ्जनम्– आपादनम् , प्रत्याख्यातं– निराकृतम् ॥ २४ ॥

एतद् धर्मकीर्तिनोक्तम् , तच्च सर्वं 'सतोऽसत्त्वे' इत्यादिनेह दूषितमेव, तथापि 'एतेन' इत्यादि योजयन्नाह—

प्रतिक्षिप्तं च यत्सत्त्वानाशित्वागोऽनिवारितम् । तुच्छरूपा तदाऽसत्ता भावास्तेर्नाशितोदिता ३५

प्रतिक्षिप्तं चैतत् , यद्– यस्मात् , सत्त्वानाशित्वागः– भावोन्मज्जनापराधः, अनिवारितम् , अतस्तदवस्थ एव । कथम् ?

१ अत्रैव स्तबके कारिका १२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याह– तुच्छरूपा निःस्वभावात्मिका, तदा– द्वितीयक्षणे, असत्ता तस्या नाशिता निवृत्तिः, भावाप्तेः– सत्तारूपप्रवेशात्, उदिता– प्राक् प्रसञ्जिता ॥ ३५ ॥

ननूक्तम्– 'अभावे विकल्पाभावाद् न प्रसङ्गः' इत्यत्राह—

भावस्याभवनं यत्तदभावभवनं तु यत्। तत्तथाधर्मके ह्युक्तविकल्पो न विरुध्यते ॥३६॥

भावस्याभवनं यत्– तुच्छरूपं, तत्– तदेव, अभावभवनम्, आर्थप्रत्ययाविशेषात्, 'घटो नास्ति' इत्यतो 'घटाऽस्तित्वाभावबोधवद् घटाभावेऽस्तित्वबोधस्याप्यानुभविकत्वात्, उभयथापि संशयाभावात्, तात्पर्यभेदेनोभयोपपत्तेश्च । यत्तु– 'भूतले घटो नास्तीत्यादौ सप्तम्या निरूपितत्वमर्थः, धातोराधेयत्वम्, तथाच भूतनिरूपितवर्तमानाधेयत्वाश्रयत्वाभावस्यैव घटादावन्वयः, तथैव सुप्-तिङोर्वचनैक्यनियमोपपत्तेः । यदि च 'गगनमस्ति' इत्यादौ कालसंबन्ध एवाऽस्धात्वर्थः, तदा सप्तम्यर्थोऽवच्छिन्नत्वमस्त्यर्थेऽन्वेति, 'घटे मेयत्वमस्ति' इत्यादौ तु मेयत्वनिष्ठकालसंबन्धस्यानवच्छिन्नत्वेन बाधात् सप्तम्या वृत्तित्वमात्रमर्थ इति न दोषः; अन्यथा तु 'भवनाद् निर्गते घटे 'भवने घटोऽस्ति' इति, भवनस्थे च घटे 'भवने घटो नास्ति' इति व्यवहारप्रामाण्यापत्तिः, भवनवृत्तिघटस्य, भवनवृत्तिघटाभावस्य च कचित् सत्त्वात् । न च 'जातौ न सत्ता' इत्यत्रान्वयानुपपत्तिः, जातिसमवेतत्वस्याप्रसिद्धत्वात्, संबन्धान्तरेण जातिवृत्तित्वस्य च सत्तायां सत्त्वादिति वाच्यम्; एकार्थसमवायादिभिन्नसंबन्धेन वृत्तित्वे सप्तम्या निरूढलक्षणास्वीकारात्' इति केषाञ्चिद् नैयायिकानां मतम् । तदसत्, 'भूतले न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घटः' इत्यादौ द्विविधबोधस्यैवानुभवसिद्धत्वात्, भवननिर्गते घटादौ कथञ्चिद् घटादिपृथग्भूताधेयत्वपर्यायविगमेनानुपपत्त्य-भावात्, विशिष्टेऽस्तित्वान्वये विशेषणेऽपि तदन्वयात्, अन्यथा पाकरक्ततादशायां 'श्यामो घटोऽस्ति' इतिधीप्रसङ्गात्। किञ्च, एवं 'वृक्षे न संयोगः' इति व्यवहारो न प्रमाणं स्यात्, संयोगस्य वृक्षवृत्तित्वाभावात्, संयोगाभावस्य वृक्षवृत्तित्वान्वये तु नानुपपत्तिः; अवयव्यभेदं देशवृत्तित्वं स्वादाय तथाविधव्यवहारप्रवृत्तेः, इति व्युत्पादितं नयरहस्ये।

अपिच, 'जातौ न सत्ता' इत्यत्रापि न सुष्ठु समाधानम्, 'जातौ समवायेन सत्ता, नवा?' इत्यादिप्रश्नानिवृत्तेः। अथात्र सप्तम्यर्थो निरूपितत्वं समवेतत्वं च, तथाच 'जातिनिरूपितत्वाभाववत्समवेतत्ववती सत्ता' इति बोधः; अन्यथा 'जाति-घटयोर्न सत्ता' इत्यादौ का गतिः, सत्ताभावस्योभयत्वपर्याप्त्यधिकरणावृत्तित्वात्? । उभयत्वाधिकरणवृत्तित्वान्वये च 'पृथिवी-तद्भिन्नयोर्न द्रव्यत्वम्' इत्यस्याप्यापत्तेः। न चैवं 'संयोगेन भवने न घटः' इति स्यात्, भवनावृत्तिभाङ्गणादिसंयोगवैशि-ष्ट्यस्य घटे सत्त्वादिति वाच्यम्; घटान्वयिसंयोगत्वावच्छेदेन भवनावृत्तित्वस्यान्वय एव तथा व्यवहारात्। प्रकारतया तथा-भानासंभवेऽपि तदवच्छिन्नसंयोगस्य संसर्गमर्यादया भानात्, तथैव साकाङ्क्षत्वात्, 'जातौ समवायेन न गगनम्' इत्यादौ च नञ उभयत्र संबन्धात्, जातिवृत्तित्वाभाववत्समवायवैशिष्ट्याभाववद् गगनमित्यर्थ इत्यस्मन्मतपरिष्कार इति चेत्। न, नञ उभयत्र संबन्धेन गच्छत्यपि चैत्रे 'न गच्छति' इति प्रयोगयोग्यतापादनस्य तात्पर्यसत्त्वे इष्टापत्त्या निराससंभवेऽपि 'जातौ समवायेन न गगन-जाती' इत्यस्यानुपपत्तेः, गगन-जात्युभयत्वावच्छेदेन जातिवृत्तित्वाभाववत्समवायवैशिष्ट्याभावा-भावात्; द्वित्वसामानाधिकरण्येन तद्बोधे च 'घटे सत्ता-तद्भिन्नजाती न स्तः' इत्यस्यापि प्रसङ्गात्। एवं च 'हृद-पर्वतयोर्न ॥१२९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वह्निः' 'शिशिरविशिष्टे पर्वते न वह्निः' इत्यादिप्रतीत्या व्यासज्यवृत्तिविशिष्टधर्मावच्छिन्नाधिकरणताकाभावाभ्युपगमेन घटवत्यपि 'घट-पटौ न स्तः' इत्यस्य 'गुणे न गुण-कर्मान्यत्वविशिष्टसत्ता' इत्यस्य चोपपादनेऽपि न निर्वाह इति दिक् । वस्तुतः श्रुतज्ञानस्थलीयक्षयोपशमपाटवात् समनियतपर्यायाणामेकतरभानेऽन्यतरभानमप्यावश्यकम्, इति सिद्धं भावाभवनभानेऽभावभवनभानम् ।

ननु न भावाभवनमेवाभावभवनं, यत्र कदापि न घटस्तत्र तदभवनेऽपि तदभावभवनादिति चेत् । दर्वीकर[1]वदनादयममृतोद्गारः, येन स्वयमेव तुच्छत्वेऽप्यनुभवेन गले गृहीतोऽत्यन्ताभावाद् नाशं विशेषयसि । तदिदमाह– यद्– यस्मादेवम्, तत्– तस्मात्, तथाधर्मके ज्ञेयत्वादिस्वभावे, तस्मिन्– अभवने, हि– निश्चितम्, उक्तविकल्पः– तत्त्वा-ऽन्यत्वलक्षणः, न विरुध्यते, तुच्छतयाऽत्यन्ताभावतुल्यत्वेऽपि कादाचित्कत्वेन भावतुल्यत्वात्; अन्यथा शशविषाणादेरिव नित्यमभावोपरागेणैव भानं स्यात्, तथा च 'घटासत्त्वं नास्ति' इत्युल्लेखः स्यात् । अथास्तित्वं यदि सत्ता, तदा तथोल्लेखे इष्टापत्तिरेव; यदि च कालसंबन्धस्तत्[2], तदा बाधाद् न तथोल्लेख इति चेत् । तर्हि अवच्छिन्नकालसंबन्धात् तदेवोत्पादादिमत्त्वमायातम्, इति घट्टकुट्यां प्रभातम् । काल्पनिक एवायं नाशः, काल्पनिकमेव चास्योत्पादादिकमिति न तेन प्रसङ्ग इति चेत् । तर्हि तद्घटितं क्षणिकत्वमपि काल्पनिकमेव, इति गतं सौगतस्य सर्वस्वम् ॥ ३६ ॥

---

१ दर्वीकरः सर्पः । २ क. ख. घ. 'स्तव त' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोषान्तरमाह—

तदेव न भवत्येतद्विरुद्धमिव लक्ष्यते। तदेव वस्तुसंस्पर्शाद् भवनप्रतिषेधतः ॥३७॥

'तदेव न भवति' एतत्- यत् परेणोक्तम्, तद् विरुद्धमिव लक्ष्यते- व्याहतमिव दृश्यते। कथम्? इत्याह- 'तदेव' इत्यनेन, वस्तुसंस्पर्शात्- अविकृतवस्तुपरामर्शात्, भवनप्रतिषेधतः- भवननिषेधात्, 'भवनमभवनम्' इत्यापत्तेः। एवं च निषेधमुखेनैव विधिसमावेशात् तदा सत एवासत्त्वं व्यवस्थापितवान् देवानांप्रियः। तद् यदि तदाऽसत् स्यात् प्रागपि तथा स्यादिति तत्पदपरामृष्टं सांप्रतमेव निषिध्यत इति चेत्। तर्हि तद्वस्तुनस्तदवस्थत्वाद् वृथैव क्षणिकताप्रसाधनप्रयासः। स्यादेतत्, घटनाशस्य क्षणिकत्वेऽपि न प्रतियोग्युन्मज्जनापत्तिः, तन्नाशनाशादिपरम्परानधिकरणतत्प्रागभावानधिकरणक्षणस्यैव तदधिकरणत्वव्याप्यत्वादिति। मैवम्, लाघवेन तदभावानधिकरणत्वेनैव तदधिकरणत्वव्याप्तिकल्पनात्, सभागसन्ततौ तन्नाशक्षणे तज्जातीयस्वीकारेण बीजाङ्कुरवदुन्मज्जनापत्तेर्दुर्निवारत्वात्, तन्नाशादिपरम्पराया दुर्ग्रहत्वेन तद्घटितक्षणिकत्वस्य दुर्ग्रहत्वाच्चेति दिक् ॥ ३७ ॥

ततः सिद्धं 'सतोऽसत्त्वे' इत्यादि, इत्युपसंहरन्नाह—

सतोऽसत्त्वं यतश्चैवं सर्वथा नोपपद्यते। नाभावो भावमेतीह ततश्चैतद्व्यवस्थितम् ॥३८॥

---

१ प्रस्तुतस्तबके कारिका १२।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतश्चैवम्– उक्तेन प्रकारेण, सतोऽसत्त्वम्, सर्वथा– सर्वैः प्रकारैर्विचार्यमाणं, नोपपद्यते, भावोन्मज्जनप्रसङ्गात्। ततश्चेह यदुक्तं प्राक्– 'भावो नाभावमेति' इति, एतद् व्यवस्थितम्– उपपन्नम्, भावविच्छेदेनाभावानुत्पत्तेः, तदविच्छेदे च द्रव्यांशान्वयादिति।

अत्र नैयायिकाः– नन्वेवं वराकस्य सौगतस्य तूर्ष्णींभावेऽपि न वयमिदं मृषाभाषितं सहामहे, भावभिन्नस्यैवाभावस्य घटमानत्वात्; तथाहि– अभावो भावातिरिक्त एव, अधिकरणस्याप्रतियोगिकत्वात्, तस्य च सप्रतियोगिकतयाऽनुभूयमानत्वेन तद्रूपत्वायोगात्। अथ सप्रतियोगिकत्वं प्रतियोग्यविषयकबुद्धिविषयत्वं, तच्च तत्रापि नाभावस्य, इदंत्वादिनाप्यभावप्रत्यक्षात्, किन्त्वभावत्वस्य, तस्य च ममापि तथात्वमेव, घटवद्भिन्नत्वरूपस्य तस्य घटधीसाध्यत्वादिति चेत्। न, तद्भिन्नत्वस्यापि स्वरूपानतिरेकेणाप्रतियोगिकत्वात्, वस्तुतः प्रतियोग्यवृत्तिरनुयोगिवृत्तिर्यो धर्मस्तज्ज्ञानस्य प्रतियोगिवृत्तित्वेन, अज्ञातधर्मग्रहस्य चाभेदग्रहहेतुत्वेन, तस्य चात्र भेदरूपस्यैव संभवेनान्योन्याश्रयाच्च। न चाभावव्यवहारार्थमेव प्रतियोगिज्ञानापेक्षा, अभावस्त्वप्रतियोगिक एवेति वाच्यम्, व्यवहर्तव्यज्ञाने सति, सत्यां चेच्छायां व्यवहारोदयेन तत्राधिकस्यानपेक्षणात्, हस्त-वितस्त्याद्यवच्छेद्यत्वेन दीर्घत्वग्रह एव सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वेन तारत्वादिग्रह एव चावध्यपेक्षणात्। न चाभाववृत्त्यभावस्याधिकरणानतिरेकेण सर्वमिदं प्रतिबन्दिकवलितमिति वाच्यम्, अभावसिद्ध्युत्तरमुपस्थितायास्तस्याः

---

१ प्रस्तुतस्तबके कारिका ११। २ नैयायिकस्य। ३ जैनस्य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

फलमुखगौरववददोषत्वात् । न चाभावग्रहसामग्र्यैव तदुपपत्तेः किमन्तर्गडुनाऽभावेनेति वाच्यम्, 'नास्ति' इति धीविषयस्य तस्यान्तर्गडुत्वायोगात् ।

किञ्च, अभावप्रत्यक्षस्य विशिष्टवैशिष्ट्यप्रत्यक्षरूपत्वेन मम[1] विशेषणतावच्छेदकप्रकारकानिश्चयमुद्रयैव प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानस्य हेतुत्वं, न तु स्वातन्त्र्येण; तवं तु तद्व्यवहारे तस्य स्वातन्त्र्येण हेतुत्वं कल्पनीयमिति गौरवम् । किञ्च, अधिकरणानामननुगतत्वात् कथमनुगतव्यवहारः ? । मम[2] तु समवाय-स्वाश्रयसमवायान्यतरसंबन्धेन सत्तात्यन्ताभाव एवानुगतमभावत्वम्, तच्च स्वस्मिन्नप्यस्ति, इति न किञ्चिदनुपपन्नम् । न चातिरिक्ताभावस्याधिकरणेन समं संबन्धानुपपत्तिः, संबन्धान्तरमन्तरेण विशिष्टप्रतीतिजननयोग्यत्वस्यैव तत्संबन्धत्वात् । नन्वेवं घटाभावभ्रमानुपपत्तिः, योग्यतायाः फलैकगम्यतया तत्रापि सत्त्वात् । न च प्रमायोग्यता संबन्धः, संबन्धसत्त्वे तस्यापि प्रमात्वात्, अन्यथाऽन्योन्याश्रयात्, योग्यतायाः प्रत्ययाविषयत्वेन विभागाभावाच्च । अथ योग्यतालिङ्गितं स्वरूपमेव संबन्धः, भ्रम-प्रमयोश्च वस्तुगत्या घट-तदभाव-तद्व्यक्त्यवगाहित्वेनैव विभाग इति चेत् । न, अतीन्द्रियाभावस्वरूपसंबन्धेऽव्याप्तेः । तस्य विशिष्टज्ञानाभावादिति चेत् । न, योग्यतावच्छेदकावच्छिन्नस्वरूपद्वयस्यैव संबन्धत्वात्, योग्यतावच्छेदकं च क्वचित् प्रतियोगिदेशान्यदेशत्वम्, क्वचित् प्रतियोगिदेशत्वे सति प्रतियोगिकालान्यकालत्वम्, क्वचिन् प्रतियोगितावच्छेदकाभाववत्त्वम् । न चात्रापि मत्वर्थसंबन्धानुयोगः, तत्रापि तादृशयोग्यतावच्छेदकानुसरणात् । न चैवमनवस्था, वस्तुनस्तथात्वात् । प्रत्ययानवस्था तु नास्त्येव, उक्तावच्छेदक-

१ नैयायिकस्य । २ जैनस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वत्त्वस्य स्वरूपपरिचायकत्वात् । एवं च तादृशस्वरूपाभावे यत्राभावधीस्तत्र भ्रमत्वम्, इति किमनुपपन्नम् ? । वस्तुतः स्वसंबन्धप्रकारावच्छेदेन यत्र ज्ञाने धर्मिसंबन्धः, स्वसंबद्धधर्म्यवच्छेदेन वा प्रकारसंबन्धः, तत्र प्रमात्वम्, अन्यत्र भ्रमत्वम् । अत एव विशिष्टज्ञाने प्रकार-धर्मिणोः संयोगादिवदज्ञानस्यापि परस्परसंबन्धतया भासमानत्वात् 'इदं रजतम्' इति भ्रमे रजतत्वस्य शुक्तौ वैज्ञानिकसंबन्धेन प्रमात्वम्, संयोगेन च भ्रमत्वमिति दिक् ।

अत्र ब्रूमः—

नैयायिकाऽस्मिन् नयवाददीपे पतन् पतङ्गस्य दशां नु मा गाः ।
बौद्धस्य बुद्धिव्ययजं कुकीर्तिविसृत्वरं कज्जलमस्य पश्य ॥ १ ॥

तथाहि– अभावस्य लाघवात् क्लृप्ताधिकरणस्वभावत्वे सिद्धे तत्र सप्रतियोगिकत्वं कल्प्यमानं तैवाभावत्वस्यभावेऽन्यप्रतियोगिकत्वमिव तत्काले तद्बुद्धिजनितव्यवहारविषयत्वादिरूपं न बाधकम् । न चाधिकरणस्वरूपत्वेऽननुगमो बाधकः, तथा सत्यभावाभावस्यापि प्रतियोग्यात्मकत्वविलयेऽपसिद्धान्तात् । तत्र तदभावाभावत्वमेकमेवेति चेत् । किं तत् ? । घटत्वादिकमिति चेत् । कथमस्य तत्त्वम् ? । तेन रूपेण घटादिमत्ताप्रतीतौ घटाद्यभावाभावव्यवहारादिति चेत् । कथं तर्हि तदसाधारणधर्मान्तराणामपि न तथात्वम् ? । किञ्च, एवं घटत्वादिज्ञानं प्रतियोगिज्ञानं विना न स्यात्, अभावत्वप्रत्यक्षे योग्यधर्मावच्छिन्नज्ञानत्वेन हेतुत्वात्, अन्यथा तन्निर्विकल्पकप्रसङ्गात् । यदि च निर्विकल्पकीयविषयतया घटत्वादिना-

१ नैयायिकस्य । २ ज. 'वप्र' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽभावस्य प्रत्यक्षस्याभावत्वांशे निर्विकल्पकस्य स्वीकारे विशेष्यतानवच्छिन्ननिर्विकल्पकीयविषयतया वा प्रत्यक्षेऽभावत्वभेदस्य कारणत्वात् तन्निर्विकल्पकं वार्यते, तदा घटत्वादेरपि निर्विकल्पकाप्रसङ्गात्, भावावृत्तितयोक्तविषयतया विशेषणे चाप्रसिद्धेः । अस्तु तर्हि अभावाभावोऽप्यतिरिक्त एव, तृतीयाभावादेः प्रथमाभावादिरूपत्वेनानवस्थापरिहारादिति चेत् । तर्ह्यनन्ताभावानां तत्राभावत्वस्य कल्पनामपेक्ष्य क्लृप्ताधिकरणेष्वेव वरमेकोऽभावत्वपरिणामोऽनुभूयमानः श्रद्धीयताम् । 'न ह्ययमभावः' इति स्वातन्त्र्येण कस्याप्यनुभवोऽस्ति, किन्त्वधिकरणस्वरूपमेव तत्तदारोप-तत्तत्प्रतियोगिग्रहादिमहिम्ना तत्तदभावत्वेनानुभूयत इति ।

अथ तदभावलौकिकप्रत्यक्षे तज्ज्ञानस्य हेतुत्वाद् न स्वातन्त्र्येणाभावभानम्, अन्यप्रतियोगिकत्वेनान्याभावभानं तु नेष्यते; 'प्रमेयत्वं नास्ति, प्रमेयो न' इत्यादौ संयोगाद्यवच्छिन्नप्रमेयत्वाभावः, स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकत्वेन तत्तत्प्रमेयभेद एव च प्रमेयत्वावच्छिन्नप्रतियोगिताकत्वेन भासते । न च तथापि तद्धटाज्ञानेऽपि घटान्तरज्ञानाद् घटाभावप्रत्यक्षे समनियताभावस्यैक्ये एकधर्मावच्छिन्नाज्ञानेऽन्यधर्मावच्छिन्नज्ञानेऽपि तदवच्छिन्नाभावप्रत्यक्षे व्यभिचारः; तदभावप्रत्यक्षे तदभावज्ञानत्वेन हेतुत्वादिति न दोष इति चेत् । न, द्रव्यत्वादिना तदभावाभावज्ञानेऽपि तदभावाप्रत्यक्षात् । तदभावप्रतियोगितावच्छेदकप्रकारकज्ञानत्वेन हेतुत्वे तु कम्बुग्रीवादिमत्त्वस्य गुरुधर्मतया प्रतियोगितानवच्छेदकत्वेन 'कम्बुग्रीवादिमान् न' इति प्रत्यक्षानापत्तेः, तमःप्रत्यक्षे व्यभिचारात्, अभावे प्रतियोगितया घटादिबाधानन्तरं 'न' इत्याकारकप्रत्यक्षापत्तेश्च । बदरादौ कुण्डसंयोगादिधीकाले कुण्डाद्यभावधीवदभावे प्रतियोगितासंबन्धावच्छिन्नप्रतियोगितया घटवैशिष्ट्यधीकालेऽपि प्रतियोगितासा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मान्येन तदभावधीसंभवात् ।

अपिच, एतादृशानन्तप्रतियोगिज्ञानानामिन्द्रिय-संबन्ध-विशेषणता-रूपा-ऽऽलोकादीनां पृथगनन्तहेतु-हेतुमद्भावकल्पनापेक्षया लाघवादधिकरणस्यैव घटाभाववत्त्वेन ग्रहे क्लृप्तविशिष्टवैशिष्ट्यबोधस्थलीयमर्यादया निर्वाहः किं न कल्प्यते ?; अधिकरणस्वरूपाभावमात्रग्रहे इष्टापत्तेः, अभावत्वस्य च सप्रतियोगिकत्वेन प्रतियोगिग्रहं विनाऽग्रहात्, 'भावाभावरूपं जगत्' इत्युपदेशसहकृतेन्द्रियेण पद्मरागत्ववत् तद्ग्रहेऽपीष्टापत्तेर्वा । अधिकरणस्वरूपाभावाभ्युपगम आधाराधेयभावानुपपत्तिरिति चेत् । न, धर्मिताख्यस्याभेदस्याधारतानियामकत्वात् । कीदृशमधिकरणं घटाभावः ? इति चेत् । यादृशं तेव घटाभावाश्रयः । मम भूतले घटानयनदशायां घटाभावसंबन्धापगमाद् 'घटो नास्ति' इति न व्यवहारः, तैव तु तादृशस्यैव भूतलस्वरूपस्य सत्त्वात् तत्प्रामाण्यापत्तिरिति चेत् । न, तदा घटसंयोगपर्यायेण घटाभावपर्यायविगमात् 'इदानीं' घटाभावो जातः' इति सार्वजनीनानुभवात् । न चैवं भूतलादतिरेकः, पर्यायादेशादतिरेकेऽपि द्रव्यादेशादनतिरेकात्, पर्यायद्वारा द्रव्यविगमस्यैक्यप्रत्यभिज्ञानाप्रतिपन्थित्वात्, 'श्याम उत्पन्नः, रक्तो विनष्टः' इति वैधर्म्यज्ञानकालेऽपि 'स एवायं घटः' इति प्रत्यभिज्ञायाः सर्वसिद्धत्वात् । एतेन 'एवं दुःखध्वंसरूपमोक्षस्यात्मानतिरेकेणासाध्यत्वादपुरुषार्थत्वं स्यात्' इत्यादि बाधकं निरस्तम्, आत्मनोऽपि पर्यायतया साध्यत्वात्; परस्य तु घटानयनदशायां भूतले घटाभावव्यवहारप्रामाण्यापत्तिः, भूतलस्वरूपस्य संबन्धस्य सत्त्वात्, तदभावभ्रमदर्शनेन तस्य तदा न संबन्धत्वमित्यस्य वक्तुमशक्यत्वात्, उक्तोपलक्षणोपलक्षितस्वरूपानवच्छिन्नसांसर्गिकविषयता-

१ क. ख. ग. घ. 'बद्धवि' । २ नैयायिकस्य । ३ जैनस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रामाण्यस्य बाधज्ञानाद्युत्तेजकाप्रामाण्यज्ञानादौ निवेशे महागौरवात् । न च तदा भूतले घटाभावसंबन्धसत्त्वेऽपि तत्संबन्धावच्छिन्नाधारताभावात् तदभावतद्विशेष्यकत्वावच्छिन्नतत्प्रकारताकत्वलक्षणमप्रामाण्यमक्षतमिति वाच्यम्, धर्म-धर्मिस्वरूपापरावृत्ताधारताया अप्यपरावृत्तेः, तादृशाधारताद्यभावकल्पनापेक्षया तदभावविगमकल्पनस्यैव न्याय्यत्वात् ।

अथाभावस्याधिकरणानतिरेके मृद्द्रव्यस्यैव घटप्रागभावत्वात् तदनिवृत्तौ घटानुत्पत्तिप्रसङ्गः, कपालादेरेव घटनाशत्वेन तन्नाशे प्रतियोग्युन्मज्जनप्रसङ्ग इति चेत् । न, प्रागभाव-प्रध्वंसयोर्द्रव्य-पर्यायोभयरूपत्वेनानुपपत्त्यभावात्; तथाहि– व्यवहारनयादेशाद् घटपूर्ववृत्तित्वविशिष्टं स्वद्रव्यमेव घटप्रागभावः, घटोत्तरकालवृत्तित्वविशिष्टं च स्वद्रव्यमेव घटध्वंसः, पूर्वकालवृत्तित्वादिकं च परिचायकम्, न तु विशेषणम्, आत्माश्रयात्, विशिष्टस्यातिरिक्तत्वेनानतिप्रसङ्गाच्च । ऋजुसूत्रनयादेशाच्च प्रतियोगिप्राच्यक्षण एव प्रागभावः, उपादेयक्षण एव चोपादानध्वंसः । न च तत्पूर्वो-त्तरक्षणयोर्घटोन्मज्जनप्रसङ्गः, तत्संतानोपमर्दनस्यैव तदुन्मज्जननियामकत्वादिति व्यक्तं स्याद्वादरत्नाकरे ।

अथ मुद्गरपाताद् विनष्टो घट इति प्रतीत्याऽतिरिक्तनाशानुभवः, न हि भूतलं तद्बुद्धिर्वा तज्जन्या, तेन विनापि तयोः सत्त्वादिति चेत् । न, मुद्गरपातेन कपालकदम्बकोत्पादरूपस्यैव विभागजातस्य घटध्वंसस्य स्वीकारात्, तद्ध्वंसोत्तरं संयोगविशेषेण कपालोत्पत्तिस्वीकारस्य कल्पनामात्रत्वात्, मुद्गरपातजन्यविलक्षणपरिणामवान् घट इति प्रकृतवाक्यार्थत्वात् । ॥१३३॥

एतेनेदं व्याख्यातम्—

“दृष्टस्तावदयं घटोऽत्र नियतं दृष्टस्तथा मुद्गरो दृष्टा कर्परसंहतिः परमतोऽभावो न दृष्टोऽपरः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेनाभाव इति श्रुतिः क्व निहिता किंवात्र तत्कारणं स्वाधीना कलशस्य केवलमियं दृष्टा कपालावली ॥ १ ॥"

इति । अथ कालविशेषविशिष्टाधिकरणेनैवाभावान्यथासिद्धाववयव्यादेरप्यसिद्धिप्रसङ्ग इति चेत् । न, कालविशेषस्य द्रव्य-पर्यायोभयरूपत्वेन तस्यैवाभावावयव्यादिरूपत्वस्येष्टत्वात्, शबलवस्त्वभ्युपगमे दोषाभावादिति दिक् ।

प्राभाकरास्तु- 'घटवद्भूतलबुद्धिभिन्ना भूतलबुद्धिर्घटाभावः । न च घटवति घटाज्ञानदशायां तदभावापत्तिः, अन्याभावानभ्युपगमात्, तद्व्यवहारस्य च प्रतियोग्यधिकरणज्ञाने यावत्प्रतियोग्युपलम्भकसत्त्वे चेष्टत्वात् । न च बाधावतार-दशायां तदापत्तिः, प्रतियोगिमत्त्वज्ञानस्यैव बाधकत्वेन तदानीमभावव्यवहारकाभावात् । न च बाधितव्यवहारस्य संवादा-पत्तिः, बाधितत्वेनैवासंवादात् । न च प्रतियोगिमत्तानवगाह्यधिकरणबुद्धि-प्रतियोगिमत्तावगाह्यधिकरणबुद्ध्योर्विषयताद्वृत्तौ किं केन बाध्यताम्, प्रमात्वस्यापि साधारण्यात्? इति वाच्यम्, अभावव्यवहारभ्रम-प्रमात्वानुरोधेन प्रतियोगिमत्ता-नवगाह्यधिकरणबुद्धेरधिकरणे विषयतया सत्त्वेऽपि घटाद्यभावत्वेन तत्रासत्त्वात्, यथा परेषां घटध्वंसस्य घटात्यन्ताभाव-त्वेन स्वात्मनि सत्त्वेऽपि घटध्वंसत्वेन तत्रासत्त्वम्, 'घटध्वंसे घटो ध्वस्तः' इति प्रत्ययात्। यद्वा, वस्तुगत्या यः प्रतियोगिमान् तज्ज्ञानभिन्नमधिकरणज्ञानमेव तदभावः, आकाशाद्यभावस्त्वधिकरणसामान्यज्ञानमेव । न चैवमननुगमः, वृत्तिमद्-ऽवृत्तिमदभा-वयोर्लक्ष्ययोर्भेदेन लक्षणभेदात् । अथवा, आरोप्यसंबन्धसामान्ये यदधिकरणानुयोगिकत्व-यत्प्रातियोगिकत्वोभयाभावस्तदधि-करणज्ञानत्वमेव तत्संबन्धावच्छिन्नतत्प्रतियोगिताकाभावत्वम्' इत्याहुः ।

तच्चिन्त्यम्, अभावस्याधिकरणबुद्धिरूपत्वे सूक्ष्मस्य केशादेर्जिज्ञासानुपपत्तेः, घटनाशस्य बुद्धिरूपत्वे च तन्नाशे तदुन्म-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञनापत्तेः, प्रतियोगिमद्भिन्नाधिकरणस्यैवाभावस्वरूपत्वे लाघवाच्चेति । अन्यत्र विस्तरः । तस्माद् भावपरिणाम एवाभाव इति व्यवस्थितमेतत्–'भावो नाभावमेति' इति ॥ ३८ ॥

अथ 'नाभावो भावतां याति' इत्येतद् व्यवस्थापयन्नाह—

असतः सत्त्वयोगे तु तत्तथाशक्तियोगतः । नासत्त्वं तदभावे तु न तत्सत्त्वं तदन्यवत् ॥३९॥

असतः– एकान्तासत्त्वेनाभिमतस्य, सत्त्वयोगे त्वभ्युपगम्यमाने, तस्य–असत्त्वेनाभिमतस्य, तथा– नियतरूपानुविद्धभविष्यत्तया, शक्तियोगतः– शक्तिसंबन्धात्, नासत्त्वं– नात्यन्तासत्त्वम्, तादृशस्य शशशृङ्गवच्छक्त्ययोगात् । मा भूत् तादृशशक्तियोग इत्यत्राह— तदभावे तु– तथाशक्त्यभावे त्वभ्युपगम्यमाने, तदन्यवत्– अधिकृतव्यक्तिभिन्नवत्, न प्रतिनियतार्थक्रियाकारित्वरूपं सत्त्वम्, नियामकाभावात् ॥ ३९ ॥

अथ प्रतिनियतार्थक्रियाकारित्वं तद्व्यक्तिस्वरूपमेव, तद्व्यक्तेरुत्पत्तिश्च तज्जननशक्तिमतो हेतुविशेषादेव; न ह्येवं सत्कार्यापत्तिः, हेतुस्वरूपायाः शक्तेः प्राक् सत्त्वेऽपि कार्यस्वरूपायाः शक्तेरभावात्, इत्याशङ्कते–

असदुत्पद्यते तद्धि विद्यते यस्य कारणम् । विशिष्टशक्तिमत्तच्च ततस्तत्सत्त्वसंस्थितिः ॥४०॥

१ प्रस्तुतस्तबके कारिका ११।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्धि– तदेव वस्तु, असदुत्पद्यते यस्य कारणं विद्यते। तच्च– कारणं, विशिष्टशक्तिमत्– प्रतिनियतरूपानुविद्ध-कार्यजननशक्तियुक्तम्, ततो हेतोः, तत्सत्त्वसंस्थितिः– तद्व्यक्तेः प्रतिनियतसत्त्वव्यवस्था ॥ ४० ॥

अत्रोत्तरम्—

अत्यन्तासति सर्वस्मिन्कारणस्य न युक्तितः। विशिष्टशक्तिमत्त्वं हि कल्प्यमानं विराजते ॥४१॥

अत्यन्तासति– सर्वथाऽविद्यमाने कार्यजाते, कारणस्य युक्तितः– न्यायेन, विशिष्टशक्तिमत्त्वं– प्रतिनियतजननस्वभावत्वम्, कल्प्यमानं न विराजते, सर्वथाऽवध्यभावात्, अविद्यमानव्यक्तीनामवधित्वेऽतिप्रसङ्गात्, कथञ्चिद्विद्यमानत्वेनैवावधित्वे नियमोपपत्तेः ॥ ४१ ॥

पर आह—

तत्सत्त्वसाधकं तन्न तदेव हि तदा न यत्। अत एवेदमित्थं तु न वै तस्येत्ययोगतः ॥४२॥

तत्सत्त्वसाधकं– तद्व्यक्त्युत्पादकम्, तत्– कारणम्, तत्त्वमेव विशिष्टशक्तिमत्त्वम्, तत्कारणव्यक्तित्वेन पूर्वावधित्वस्य, तत्कार्यव्यक्तित्वेन चोत्तरावधित्वस्य संभवात्। न चैवं गौरवम्, वस्तुतोऽर्थस्य तथात्वादिति। अत्रोत्तरम्– न–नैतदेवम्, तदेव– विवक्षितकार्यसत्त्वम्, तदा– कारणकाले, न यद्– यस्मात्, असत्त्वाद् न तत्र हेतुव्यापार इत्याशयः। पर आह– यत एव कार्यं प्रागसत्, अत एवेदं– कारणस्य तत्सत्त्वसाधकत्वम्, इत्थं तु– घटमानं तु, सत आकाशादेरिव साधकत्वानुपपत्तेः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्राह– न वै– नैतदेवम्, सर्वथाऽसति तस्मिन्, 'तत्सत्त्वसाधकं तत्' इत्यत्र 'तस्य' इत्यर्थायोगात्, सर्वथाऽसति शशशृङ्गादाविव षष्ठ्या अप्रयोगात् ॥ ४२ ॥

अथ सत्त्वं न तावत् सत्तासंबन्धः, व्यक्तिव्यतिरेकेण विशददर्शने तदनवभासात्, दृश्यादृष्टौ चाभावसिद्धेः । न च 'सत् सत्' इति कल्पनाबुद्ध्या तदध्यवसायः, तत्रापि बहिष्परिस्फुटव्यक्तिस्वरूपान्तर्नामोल्लेखाध्यवसायव्यतिरेकेण सत्तास्वरूपाप्रकाशनात्, सत्ताया अपि सत्तान्तरयोगेनासत्त्वेऽनवस्थानाच्च । नापि स्वरूपतः सत्त्वम्, स्वप्नावस्थावगतेऽपि पदार्थात्मनि स्वरूपसद्भावात् सत्त्वप्रसक्तेः, परिस्फुटसंवेदनावभासनिर्ग्राह्यत्वात् स्वरूपस्य संनिहितत्वेनैव तदनुभवात्, असंनिहिततत्कल्पनायां मानाभावात् 'असदिदमनुभूतम्' इति स्वप्नोत्तरप्रतीतेः, किन्त्वर्थक्रियाकारित्वमेव तत् । तथाच विद्यमानाया अपि व्यक्तेः स्वरूपतः सत्त्वाद् न 'तस्य' इत्यनुपपत्तिः । न हि तदा तत्सत्त्व एव तत्संबन्धव्यवहारः, अतीतघटज्ञानेऽतीतघटसंबन्धित्वेन व्यवहारस्य सर्वसिद्धत्वात् । न च भृङ्गग्राहिकया तत्कार्यव्यक्तिहेतुत्वाग्रहादनुपपत्तिः, घटार्थिप्रवृत्तौ घटजातीयहेतुताज्ञानस्यैव प्रयोजकत्वात्, विशिष्य हेतुतया च प्रतिनियतवस्तुव्यवस्थितेरेवोपपादनात्, इत्याशयवान् परः प्राह—

वस्तुस्थित्या तथा तद्यत्तदनन्तरभावि यत् । नान्यत्ततश्च नाम्नेह न तथास्ति प्रयोजनम् ४३

वस्तुस्थित्या– आर्थं न्यायमाश्रित्य; तथा, तत्– कार्यसत्त्वसाधकम्, तत्– कारणम् । कुतः ? इत्याह– यद्– यस्मात्, तदनन्तरभावि– प्रकृतकारणानन्तरभावि, तत्– प्रतिनियतमेव कार्यसत्त्वम्, नान्यद्– नान्यादृशम् । ततश्चेह विचारे, नाम्ना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न प्रयोजनमस्ति, अतदायत्तत्वाद् वस्तुसिद्धेः, श‍ृङ्गग्राहिकया तद्ग्रहस्य चाप्रयोजकत्वादिति भावः ॥ ४३ ॥

अत्रोत्तरम्—

नाम्ना विनापि तत्त्वेन विशिष्टावधिना विना ।
चिन्त्यतां यदि सन्न्यायाद् वस्तुस्थित्यापि तत्तथा ॥ ४४ ॥

नाम्ना विनापि– श‍ृङ्गग्राहिकया तद्ग्रहं विनापि, तत्त्वेन– आर्थ्यैव प्रतीत्या, विशिष्टावधिना विना– स्वसंबन्धिनं भाविनं विशिष्टमवधिमन्तरेण, चिन्त्यताम्– माध्यस्थ्यमवलम्ब्य विमृश्यताम्, यदि भवति सन्न्यायात्– सूक्ष्मन्यायेन, वस्तुस्थित्यापि– उक्तलक्षणया, तत्– कारणम्, तथा– असतः कार्यस्य सत्त्वसाधकम्; नैव तथास्ति, अत्यन्तासत्त्वे तत्संबन्धस्यैवानुपपत्तेः, अतीतघटस्यापि तज्ज्ञानज्ञेयत्वपर्यायेण सत्त्वादेव तज्ज्ञानसंबन्धित्वात्, दण्डादौ घटकारणताया अपि तत्पर्यायद्वारा घटसत्त्वं विना दुर्घटत्वात्। ननु ज्ञाने घटादेर्ज्ञानस्वरूपा विषयतैव संबन्धः, दण्डे च दण्डस्वरूपा कारणतैव तथा, घटनिरूपितत्वेन तद्व्यवहारे च घटज्ञानस्य हेतुत्वाद् न दोष इति चेत्। न, उभयनिरूप्यस्य संबन्धस्योभयत्रैवान्योन्यव्याप्तत्वात्; अन्यथेतरानिर्भासविलक्षणनिर्भासानुपपत्तेः, विषयविशेषं विना ज्ञानाकारविशेषोपगमे साकारवादप्रसङ्गादिति। अन्यत्र विस्तरः ॥ ४४ ॥

यदि चैवमपि साधकत्वमिष्यते, तदाऽतिप्रसङ्ग इत्याह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधकत्वे तु सर्वस्य ततो भावः प्रसज्यते । कारणाश्रयणेऽप्येवं न तत्सत्त्वं तदन्यवत् ॥४५॥

साधकत्वे तु तस्य निरवधिक एवाभ्युपगम्यमाने, सर्वस्य– कार्यजातस्य, ततः– कारणात्, भावः– उत्पादः, प्रसज्यते, तस्यासत्साधकत्वेनाविशेषात् । उपसंहरन्नाह– एवम्– उक्तेन न्यायेन, कारणाश्रयणेऽपि– कार्यविशेषार्थं कारणविशेषानुसरणेऽपि, न तत्– प्रतिनियतकार्यसत्त्वम्, तदन्यवत्– ततोऽन्यत्रेव योग्यताभावाविशेषात्, नानाकार्यजननीनां तत्तद्धेतुव्यक्तीनां तद्व्यक्तिजनकत्वमेव स्वभाव इत्यस्य वक्तुमशक्यत्वात्, तत्स्वभावानुप्रविष्टत्वेन तद्वदेव सत्त्वप्रसङ्गाच्चेति ॥४५॥

दोषान्तरमाह—

किञ्च तत्कारणं कार्यभूतिकाले न विद्यते । ततो न जनकं तस्य तदाऽसत्त्वात् परं यथा ॥४६॥

किञ्च, तत्– पराभिप्रेतं, कारणं; कार्यभूतिकाले– कार्योत्पादसमये, न विद्यते, क्षणिकत्वात्, यत एवं, ततो न जनकं तस्य– कार्यस्य । कुतः? इत्याह– तदाऽसत्त्वात्– कार्यभूतिसमयेऽसत्त्वात् । किंवत्? इत्याह– परं यथा– कारणकारणवदित्यर्थः ॥ ४६ ॥

आशङ्काशेषं परिहरति—

अनन्तरं च तद्भावस्तत्त्वादेव निरर्थकः । समं च हेतु-फलयोर्नाशो-त्पादावसंगतौ ॥४७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनन्तरं च– कारणाव्यवहितोत्तरसमये च, तद्भावः कार्योत्पादोऽभ्युपगम्यमानः, तत्त्वादेव–अनन्तरत्वादेव, निरर्थकः, दण्डादीनां दण्डत्वादिना घटादिव्याप्यत्वाभावात्, सामग्रीप्रविष्टदण्डत्वादिना तथात्वे गौरवात्; कुर्वद्रूपत्वेन तथात्वे हि क्षणिकत्वसाधनाशा, सा च न पूर्यते, अव्यवहितोत्तरसमयवृत्तित्वसंबन्धेन व्याप्यत्वे गौरवात्, आनन्तर्यमात्रस्य च कारणकारणसाधारणत्वात् क्षणिकत्वानियामकत्वात्, कुर्वद्रूपकल्पनापेक्षया कथञ्चिद्भिन्नाभिन्नसामग्र्यनुप्रवेशरूपकुर्वद्रूपत्वेन दण्डादेस्तदैव घटादिव्याप्यत्वौचित्याचेत्याशयः। तथा, समं च– एककालं च, हेतु-फलयोः कार्य-कारणयोः, नाशो-त्पादाव-सङ्गतौ– अघटमानौ ॥ ४७ ॥

तथाहि—

स्तस्तौ भिन्नावभिन्नौ वा ताभ्यां भेदे तयोः कुतः। नाशो-त्पादावभेदे तु तयोर्वै तुल्यकालता ॥४८॥

तौ– नाशो-त्पादौ, ताभ्यां– हेतु-फलाभ्यां, भिन्नौ, अभिन्नौ वा स्त इति पक्षद्वयम्। तत्र भेदेऽभ्युपगम्यमाने, तयोः– हेतु-फलयोः, नाशो-त्पादौ कुतः, संबन्धाभावात्, नाशस्य निर्हेतुकत्वाभ्युपगमेनोत्पादस्य चोत्पद्यमानाजन्यत्वेन तदुत्पत्ति-संबन्धस्याप्यभावात्? अभेदे त्वभ्युपगम्यमाने, तयोः– कार्य-कारणयोः, वै– निश्चितम्, तुल्यकालता, हेतुनाश-फलोत्पाद-योरभिन्नकालत्वात् ॥ ४८ ॥

ततः किम्? इत्याह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न हेतु-फलभावश्च तस्यां सत्यां हि युज्यते । तन्निबन्धनभावस्य द्वयोरपि वियोगतः ॥४९॥

तस्यां च– कार्य-कारणयोस्तुल्यकालतायां च सत्यां, हि–निश्चितम्, हेतु-फलभावो न युज्यते। कुतः ? इत्याह– तन्निबन्धनभावस्य– कार्य-कारणभावनियामकतद्भावभावित्वादिसद्भावस्य, द्वयोरपि– तयोरभिन्नकालयोर्निरूपकयोः, वियोगतः– अभावात् ॥ ४९ ॥

पराभिप्रायमाशङ्क्य परिहरन्नाह—

कल्पितश्चेदयं धर्म-धर्मिभावो हि भावतः । न हेतु-फलभावः स्यात्सर्वथा तदभावतः ॥

अयं–'कारणं धर्मि, नाशो धर्मः, कार्यं धर्मि, उत्पादश्च धर्मः' इत्याकारो धर्म-धर्मिभावः, हि– निश्चितम्, भावतः– परमार्थतः, कल्पितः, नाशस्य सांवृतत्वात्, उत्पादस्य च कार्यरूपत्वेऽपि भेदनिबन्धनधर्म-धर्मिभावव्यवहारानङ्गत्वादिति चेत् । सर्वथा तदभावतः– धर्म-धर्मिभावाभावात्, हेतु-फलभावो न स्यात्, कारणत्वस्यानन्तर्यघटितत्वात्, तस्य च नाशघटितत्वादिति भावः ॥ ५० ॥

पराभिप्रायमाह—

न धर्मी कल्पितो धर्म-धर्मिभावस्तु कल्पितः । पूर्वो हेतुर्निरंशः स उत्तरः फलमुच्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मी– कारणादिः, न कल्पितः, तस्याध्यक्षावसितत्वात् । धर्म-धर्मिभावस्तु कल्पितः, परापेक्षग्रहत्वेन सविकल्पकैकवेद्यत्वात् । तत्र पूर्वो वस्तुक्षणो निरंशः– धर्मान्तराघटितः, हेतुः; उत्तरश्च तादृशो वस्तुक्षणः फलमुच्यते। तत्र काल्पनिकं कारणत्वं कार्यत्वं च मा भूत्, वास्तवं तु धर्मिस्वरूपमन्याघटितं भवत्येव, इति को दोषः ? इति भावः ॥ ५१ ॥

अत्रोत्तरमाह—

पूर्वस्यैव तथाभावाभावे हन्तोत्तरं कुतः ?। तस्यैव तु तथाभावेऽसतः सत्त्वमदो न सत् ॥५२॥

पूर्वस्यैव– भावक्षणस्य, तथाभावाभावे– फलरूपेण परिणमनाभावे, 'हन्त' इति खेदे, उत्तरं– फलं, कुतः ? । तस्यैव तु– कारणक्षणस्य, तथाभावे– फलरूपेण परिणमनेऽभ्युपगम्यमाने, असतः कार्यस्य, सत्त्वम्– उत्पत्तिः, अद्– एतद् वचनम्, न सत्– न समीचीनम्, व्याहतत्वादित्यर्थः ॥ ५२ ॥

एतेनान्यदपि तदुक्तमयुक्तमित्याह—

तं प्रतीत्य तदुत्पाद इति तुच्छमिदं वचः । अतिप्रसङ्गतश्चैव तथा चाह महामतिः ॥५३॥

'तं प्रतीत्य– कारणक्षणमाश्रित्य, तदुत्पादः– कार्योत्पादः' इतीदं वचस्तुच्छं– निष्प्रयोजनम्; यतः कारणाश्रयणं यदि तद्रूपाश्रयणं, तदोक्तदोषात्, यदि च तदानन्तर्यभावमात्रनिबन्धनस्वभावाश्रयणं, तदाऽतिप्रसङ्गतश्चैव– विश्वस्यापि तदनन्तर-

भावित्वेन वैश्वरूप्याभावप्रसङ्गाच्चैव । स्वोक्तेऽर्थे पूर्वाचार्यसंमतिमुपदर्शयति—तथाच- उक्तसदृशं च, महामतिः- महामतिनामा ग्रन्थकृत्, आह- ॥ ५३ ॥

तथाहि—

'सर्वथैव तथाभाविवस्तुभावादृते न यत्। कारणानन्तरं कार्यं द्राग्नभस्तस्ततो न तत्' ॥५४॥

सर्वथैव- कारणत्वादिपर्यायवत् तद्द्रव्यतयापि, तथाभाविवस्तुभावादृते- कार्यकाले फलपरिणामिवस्तुसत्तां विना, कारणानन्तरं- प्रतिनियतहेत्वव्यवहितोत्तरसमये, कार्यं- प्रतिनियतकार्यम्, द्राग्- झटित्येव, नभस्तः-आकाशात्- अकस्मादित्यर्थः, यतो हेतोर्न संभवेत्, ततस्तत् कार्यं न भवेदेवेत्थंवादिन इति भावः ॥ ५४ ॥

एतदेव समर्थयन्नाह—

तस्यैव तत्स्वभावत्वकल्पनासंपदप्यलम्। न युक्ता युक्तिवैकल्यराहुणा जन्मपीडनात् ॥५५॥

तस्यैव- विवक्षितकार्यस्यैव, तत्स्वभात्वकल्पनासंपदपि- स्वभावत एव कारणानियम्यनियतजातीयत्वकल्पनर्द्धिरपि, न युक्ता । कुतः ? इत्याह- युक्तिवैकल्यराहुणा- प्रमाणाभावरूपसैंहिकेयेण, जन्मपीडनात्- उत्पादस्यैव दूषणात्, हेतुं विनैव तादृशस्वभावककार्योत्पादाभ्युपगमे तं विनैवार्थक्रियाया अपि स्वभावत एवोपपत्तौ तदुत्पादकल्पनाया अप्ययुक्तत्वादिति भावः; 'क्रूरग्रहेण जन्मनि पीडिते च न भवति विभूतिः' इति ग्रहवित्तन्त्रव्यवस्था ॥ ५५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तस्यैव तदनन्तरभवनस्वभावत्वे युक्त्यभावादाकस्मिकत्वेन कार्यानुत्पत्तिदूषणं स्वोक्तमेव संमतिग्रन्थे प्राग् योजितम्, अथचातिप्रसङ्गं सामान्यशब्देन स्वोक्तमेव तत्र योजयितुमाह' इति केचित्। वस्तुतो घटकुर्वद्रूपत्वेन मृत्पिण्ड-दण्डादिक्षणानामेव घटहेतुत्वम्, पटकुर्वद्रूपत्वेन च तन्तु-वेमादिक्षणानामेव पटहेतुत्वम्, इत्यादिरीत्या नातिप्रसङ्ग इत्यत्राप्याह—

तदनन्तरभावित्वमात्रतस्तद्व्यवस्थितौ। विश्वस्य विश्वकार्यत्वं स्यात्तद्भावाविशेषतः ॥५६॥

तदनन्तरभावित्वमात्रतः– अधिकृतकारणानन्तर्यमात्रात्, तद्व्यवस्थितौ– कार्यकारणभावसिद्धावभ्युपगम्यमानायां, विश्वस्य– सकलकार्यस्य, विश्वकार्यत्वं– सकलकारणजन्यत्वं स्यात्। कुतः? इत्याह– तद्भावाविशेषतः– तदनन्तरभावित्वाविशेषात्। न ह्यनन्तरभाविघटापेक्षयेव तादृशपटापेक्षयापि न मृत्पिण्डादिक्षणानां कुर्वद्रूपत्वं, येन कार्यविशेषः स्यात्। कार्यविशेषदर्शनात् तद्विशेषः कल्प्यत इति चेत्। न, व्यावृत्तिरूपस्य विशेषस्य निषेत्स्यमानत्वात्। विधिरूपत्वेऽप्यङ्कुरकुर्वद्रूपत्वादेः शालित्वादिना सांकर्यात्, जातिरूपस्य तस्यासंभवात्, अनभ्युपगमाच्चेत्याशयः ॥ ५६ ॥

इदमेव स्पष्टयति। 'विशेषकारणं विक्षिपति' इत्यपरे।

अभिन्नदेशतादीनामसिद्धत्वादनन्वयात्। सर्वेषामविशिष्टत्वान्न तन्नियमहेतुता ॥५७॥

अभिन्नदेशतादीनां– कारणदेशैकदेशत्वादीनाम्, आदिनाऽभिन्नजातित्वादिग्रहः, असिद्धत्वात्, क्षणिकत्वेन देशादिभेदोपपत्तेः; तथा, अपरिणामित्वेनानन्वयात्, सर्वेषाम्– अनन्तरभाविनां कार्याणाम्, सर्वाणि पूर्वभावीनि कारणानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यविशिष्टत्वाद् न तन्नियमहेतुता– न कार्यविशेषनियमहेतुता कारणविशेषे। इत्यक्षरार्थः।

अयं भावः– घटकुर्वद्रूपत्वेन घटहेतुतया कथंचित्कालनियमादिनिर्वाहेऽपि देशनियमस्तथाभाविकारणानभ्युपगमे दुर्घटः, सर्वेषां घटकुर्वद्रूपक्षणानामेकत्रासत्त्वात्, मृत्पिण्डक्षणदेशेऽपि पूर्वत्र घटक्षणानुत्पत्तेश्च। न च मृद्रूपघटक्षणं प्रति घटकुर्वद्रूपमृत्क्षणत्वेन हेतुत्वाद् नानुपपत्तिरिति वाच्यम्, दण्डादिसमाजादमृद्रूपघटापत्तेः। न च दण्डादीनामपि मृद्रूपघटत्वावच्छिन्नं प्रत्येव हेतुत्वाद् नायं दोष इति वाच्यम्, स्फुटगौरवात्, कार्यगतयावद्धर्माणां कार्यतावच्छेदके प्रवेशप्रसङ्गात्, कारणगतमृद्रूपस्य कार्यसंक्रमेऽन्वयप्रसङ्गात्, अतिरिक्तस्यानिर्वचनाच्च। तस्माद् घटयोग्यताया घटहेतुत्वं विना न निर्वाह इति सूक्ष्ममीक्षणीयम् ॥ ५७ ॥

पराभिप्रायमाशङ्क्य परिहरति—

योऽप्येकस्यान्यतो भावः संताने दृश्यतेऽन्यदा। तत एव विदेशस्थात्सोपि यत्तन्न बाधकः ५८

योऽपि कश्चिदेकस्य धूमादेः, अन्यतः– अग्न्यादेः सकाशात्, भावः–भूत्वा भावः, अन्यदा उत्पादादूर्ध्वम्, संताने दृश्यते, क्षणयोर्न व्यावहारिकं ग्रहणमिति संतानग्रहणम्, सोऽपि विदेशस्थात्– देशान्तरस्थितात्, तत एव– अग्न्यादेरेव, यद्– यस्मात्; तत्– तस्मात्, न बाधको नियतकल्पनाया अयम्। इत्यक्षरार्थः।

अयं भावः– तत्कार्यजननशक्तिमदेव कारणं तत्कार्यजनकम्, देशनियमस्तु स्वभावादेव, दूरस्थेनापि वह्निना दूरस्थ- ॥ १३९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूमजननदर्शनादिति परस्याशयः । सोऽयमयुक्तः, वह्निना स्वसमीपदेश एव धूमोत्पादादनन्तरं तदुपसर्पणस्यापि तत्तत्क्रियादि- हेतुदेशानियतदेशत्वात्, अन्यथा काशीयो वह्निः प्रयागेऽपि धूमं जनयेत् । न च लोहोपलस्यासन्निकृष्टलोहाकर्षकत्ववदन्यत्रापि तथाकल्पनम्, अतिप्रसङ्गात् । शक्तिरपि सूक्ष्मकार्यरूपैव, अत एव तिलादौ तैलसद्भावं निश्चित्यैव तैलार्थिनस्तत्र प्रवर्तन्ते, इति न किञ्चिदेतदिति दिक् ॥ ५८ ॥

एतेन प्रसङ्गाभिधानेन यद् व्युदस्तं तदभिधातुकामः प्राह—

एतेनैतत्प्रतिक्षिप्तं यदुक्तं सूक्ष्मबुद्धिना । 'नासतो भावकर्तृत्वं तदवस्थान्तरं न सः' ॥५९॥

एतेन— अनन्तरोदितप्रसङ्गेन, एतत्— वक्ष्यमाणम्, प्रतिक्षिप्तम्— अपाकृतम्, यदुक्तं सूक्ष्मबुद्धिना—कुशाग्रीयधिया शान्तरक्षितेन । किमुक्तम् ? इत्याह— नासतः— तुच्छस्य कारणस्य, भावकर्तृत्वं— वस्तुजनकत्वम्, येन शशशृङ्गादेरपि जनकत्वप्रसङ्गः स्यात् । तथा, सः— उत्पद्यमानो भावः, तदवस्थान्तरं न— सद्रूपापन्नासदवस्थाक्रान्तो न, येन शशशृङ्गेऽपि सदवस्थापादनेन हेतुव्यापारोपवर्णनं सफलं स्यात् ॥ ५९ ॥

किं तर्हि तत्त्वम् ? इत्याह—

वस्तुनोऽनन्तरं सत्ता कस्यचिद्या नियोगतः । सा तत्फलं मता सैव भावोत्पत्तिस्तदात्मिका ६०

वस्तुनः— अग्न्यादेः, अनन्तरं सत्ता, कस्यचिद्— धूमादेः, नियोगतः— नियमेन, या; सा तत्फलं— तस्यानन्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रस्याग्न्यादेः कार्यम्, मता– दृष्टा । तस्याः कथमुत्पत्तिः ? इत्याह– सैव– सत्ता भावोत्पत्तिः, उत्पत्त्यु-त्पत्तिमतोरभेदात्, तदात्मिका– भावात्मिकैव, नान्या । ततः सत्ताया एव जनकत्वात् कथमसज्जनकत्वेनातिप्रसङ्गोद्भावनं युक्तम् ? इत्याशयः ॥ ६० ॥

ननु यद्येवम्, तर्हि कथम् 'असत उत्पत्तिः' इत्युच्यते ? इत्यत आह––

असदुत्पत्तिरप्यस्य प्रागसत्त्वात् प्रकीर्तिता। नासतः सत्त्वयोगेन कारणात्कार्यभावतः॥६१॥

असदुत्पत्तिरपि, अस्य– सत्तात्मकस्य भावस्य, प्रागसत्त्वात्– प्राक्कालवृत्तित्वाभावात्, प्रकीर्तिता । विशेषमाह– असतः– तुच्छस्य, सत्त्वयोगेन– सत्त्वव्यापारेण, न । कुतः ? इत्याह– कारणात् सकाशात्, कार्यभावतः कार्योत्पादात्, भात्राद्धि भावोत्पत्तिरिति । न हि प्रागसत्त्वमनुत्पत्तिव्याप्यम्, किन्त्वसत्त्वमेव, नापि प्रागसतः सत्ताऽनुपपन्ना, किन्त्वसत एवेति भावः ॥ ६१ ॥

यथैतत् प्रतिक्षिप्तं तथा लेशतो दर्शयति––

प्रतिक्षिप्तं च तद्धेतोः प्राप्नोति फलतां विना । असतो भावकर्तृत्वं तदवस्थान्तरं च सः ॥६२॥

प्रतिक्षिप्तं चैतत्, तद्धेतोः– विशिष्टफलहेतोर्मृदादेः, फलतां विना– घटादिरूपेण भवनमन्तरेण, प्राप्नोति– आपद्यते । किम् ? इत्याह– असतः– तुच्छस्यैव, भावकर्तृत्वं, कारणत्वेनाभिमतस्य तत्त्वतोऽकारणत्वात्, कार्योत्पादकाले तस्यासत्त्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्थक्रियाकारित्वाभावेन स्वरूपसत्त्वस्य स्वभावगतपदार्थवद् वस्तुव्यवस्थाऽहेतुत्वात्। तथा, तदवस्थान्तरं च– असदवस्थाविशेषश्च, सः– भावः, प्राप्नोति, अनुत्पत्तिरूपासत्ताया एवोत्पत्तिरूपसत्तावस्थाप्राप्तेः ॥ ६२ ॥

इदमेव भावयति—

वस्तुनोऽनन्तरं सत्ता तत्तथा तां विना भवेत्। नभःपातादसत्सत्त्वयोगाद्वेति न तत्फलम् ६३

वस्तुनः– मृदादेः, अनन्तरं सत्ता घटादिकार्यरूपा, तत्तथा तां विना– मृदादेरेव तद्भावमन्तरेण, नभःपातात्– अकस्माद् वा भवेत्, असत्सत्त्वयोगाद्वा– असतः सदवस्थापत्तेर्वा, इति हेतोर्नियमायोगाद्, न तत्फलम्– न तस्यैव कार्यं तदिति ॥ ६३ ॥

उपन्यस्तशेषं निराकरोति—

असदुत्पत्तिरप्येवं नास्यैव प्रागसत्त्वतः। किन्त्वसत्सद्भवत्येवमिति सम्यग्विचार्यताम् ॥६४॥

असदुत्पत्तिरपि, एवम्– उक्तेन प्रकारेण, नास्य– अधिकृतभावस्य, प्रागसत्त्वत एव– प्राक्कालवृत्तित्वाभावमात्रादेव, किन्तु– एवं त्वदभ्युपगमरीत्या, असत् सद् भवति, इति सम्यक्– सूक्ष्माभोगेन, विचार्यताम्; तथाहि– नाशवत् प्रागभावोऽपि तव तुच्छ एव, ततस्तत्संबन्धादसत्त्वमेव वस्तुन आपतितम्, इत्यसत एवोत्पत्त्या सद्भवनं सिद्धम्। अथ प्रागभावसंबन्धित्वरूपं प्रागसत्त्वं काल्पनिकमेव, तात्त्विकं त्वधिकरणात्मकप्राक्कालवृत्तित्वाभावरूपं तदेवोत्पत्तिव्याप्यम्; अतो न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रागसत्त्वस्य तुच्छत्वे तत्त्वतस्तदभावविकल्पेनापि प्राक्सत्त्वप्रसङ्गावकाशः, धर्मिरूपतदभावे सत्युत्पत्तिरूपायाः सत्तायाः प्राच्यत्वायोगात्, प्रागेव प्रागसत्त्वाभावकल्पनायाश्च प्रागसत्त्वकल्पनाप्रतिरोधादेवानुदयात्, असद्विषयत्वे तस्या भ्रमत्वव्यवस्थितेः, तद्भ्रमत्वेनापि तदसिद्धेरिति चेत् । न, असत्या अपि प्रागसत्तायाः सत्तास्वरूपनाशे तादात्म्यसंबन्धेऽसत एव सत्त्वापत्तेः, भावरूपनाशस्य निर्हेतुकत्वानभ्युपगमेन तत्र तदुत्पत्तिरूपसंबन्धोपगमे च तुच्छस्य जनकत्वप्रसङ्गात्; असंबन्धे च प्रागसत्ता न निवर्तेतैव, नित्यनिवृत्तत्वात्; एतदनिवृत्तिमभ्युपगम्य तन्निवृत्त्यनुभवापलापे च नीलाद्यनुभवस्याप्यपलापप्रसङ्गात्, कल्पनयैव सर्वव्यवहारोपपत्तेः, उत्पत्तेः स्वभावगतपदार्थसाधारणत्वेनासति सत्त्वाधानं विना सत्त्वस्य दुर्घटत्वाच्च, इति न किञ्चिदेतत् ॥ ६४ ॥

मूलोपक्रमोपसंहारमाह—

एतच्च नोक्तवद्युक्त्या सर्वथा युज्यते यतः । नाभावो भावतां याति व्यवस्थितमिदं ततः ॥६५॥

एतच्च– असद्भवनमनन्तरापादितम्, उक्तवद्युक्त्या– अभिहितजातीयन्यायेन, सर्वथा भावावधिशून्यं न युज्यते यतः, ततो 'नाभावो भावतां याति' इति यदुक्तम्, इदं व्यवस्थितम्– उपपन्नम्, स्वाभिन्नहेतोरेव स्वोपादानत्वात् सत्कार्यवादसाम्राज्यात् ॥ ६५ ॥

१ अस्मिन्नेव स्तबके कारिका ११ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र नैयायिकः– ननु नैतत् साम्राज्यम्, स्वसमवेतकार्यकारित्वेनैव स्वोपादानत्वात्, सत्कार्यकारित्वेनैव स्वोपादानत्वसंभवात्, सत्तासमवायेनैव चार्थानां सत्त्वात्, अनुत्पत्तिदशायां प्रागभावरूपासत्त्वेऽपि सत्ताभावायोगेनाविरोधात्, घटप्रागभावदशायां घटसत्त्वाभ्युपगम एव विरोधात्; तस्य घटत्वावच्छिन्नत्वाभावेन घटत्वावच्छिन्नेन सह विरोधस्य वक्तुमशक्यत्वादिति चेत्। न, विरोधस्य विशिष्यैव कल्पनात्, 'इदानीं सन् घटः प्राग् न सन्' इति धियः 'इदानीं श्यामः प्राग् न श्यामः' इतिवदुभयैकरूपवस्त्ववगाहित्वात्, समवाये मानाभावाच्च। न हि 'गुण-क्रिया-जातिविशिष्टबुद्धयो विशेषणसंबन्धविषयाः, विशिष्टबुद्धित्वात्, दण्डीति बुद्धिवत्' इत्यनुमानात् तत्सिद्धिः, अभावज्ञानादिविशिष्टबुद्धिभिर्व्यभिचारात्। न च तासामपि स्वरूपसंबन्धविषयत्वाद् न व्यभिचारः। तर्हि तेनैवार्थान्तरत्वात्। न च लाघवात् पक्षधर्मताबलेनैकसमवायसिद्धिः, पक्षबाहुल्यलाघवस्यानुपादेयत्वात्; अन्यथा द्रव्यमपि पक्षेऽन्तर्भाव्य समवायसिद्धिप्रसङ्गात्। न चानुभवसिद्धसंयोगाद् बाधः, प्रमाणसमाहारे प्रमेयसमाहाराविरोधात्। न च नानाविशेषणसंबन्धे एकत्वा-नेकत्वादर्शनात् तत्र लघु-गुरुविषयताऽसंभवेऽपि संबन्धैकत्वाऽनेकत्वयोर्दर्शनेन तत्र तत्संभवात्, प्रत्येकविशिष्टबुद्धिपक्षीकरणे लाघवात्समवायसिद्धिः, स्वरूपसंबन्धस्य संबन्धिद्वयात्मकत्वेन गौरवात्, धर्मीतिन्यायस्याप्येककल्पनालाघवमूलत्वेनात्रानवतारादिति वाच्यम्, द्रव्येऽपि तत्सिद्ध्यापत्तेः। न च संयोगत्वावच्छेदेन संबन्धत्वकल्पनात् तत्र संबन्धान्तरकल्पने लाघववैपरीत्यम्, गुण-गुण्यादिद्वये तु नैवमनुगतं धर्मान्तरमस्ति, येन क्लृप्तलाघवाद् वैपरीत्यं स्यादिति वाच्यम्, तत्रापि वस्तुत्वसत्त्वाद्यवच्छेदेन

१ ज. 'त्वसं'। २ ख. ग. घ. 'त्राव'।

संबन्धत्वकल्पनात् । किञ्च, प्रतीतेर्विषयभेदोऽनुभवात्, सामग्रीभेदाद् वा, न तु लाघवात्, अन्यथा सविषयत्वानुमानात् संबन्धाविषयत्वमेव सिध्येदिति ।

अथ विशेषणसंबन्धनिमित्तका इति साध्यं, हेतौ च सत्यत्वं विशेषणम्, तेन विशिष्टभ्रमे न व्यभिचारः, बुद्धिपदं च प्रत्यक्षपरम्, तेन नांशतो बाध-व्यभिचाराविति समवायसिद्धिरिति चेत् । न, गुणादिविशिष्टप्रत्यक्षे विशेषणसंबन्धत्वेन न हेतुत्वम्, संबन्धत्वस्य विषयत्वादिगर्भतया जनकतानवच्छेदकत्वादिति मिश्रेणैवोक्तत्वात् । न चात एव गुणादिविशिष्टप्रत्यक्षे गुणादिसमवायत्वेन हेतुत्वम्; न च समवायत्वमपि नित्यसंबन्धत्वरूपमित्युक्तदोषानिस्तार इति वाच्यम्, समवायस्याखण्डतया तद्व्यक्तित्वेनैव हेतुत्वात्, तद्व्यक्तित्वं च तादात्म्येन सा व्यक्तिरेव; इति वाच्यम्, गुणादिसमवायत्वापेक्षया गुणत्वादिनैव हेतुत्वौचित्यात् । न चाभावादिविशिष्टबुद्धिव्यावृत्तानुभवसिद्धवैलक्षण्यविशेषवद्बुद्धित्वावच्छिन्नं प्रति समवायं विना नान्यद् नियामकम्, गुणत्वादिना हेतुत्वे व्यभिचारादिति वाच्यम्, वैलक्षण्यस्य जातिरूपस्य स्मृतित्वा-ऽनुमितित्वादिना सांकर्यात्, विषयितारूपस्य च समवायासिद्ध्या दुर्वचत्वात् । एतेन 'संबन्धांशे विलक्षणविषयताशालिगुणादिविशिष्टप्रत्यक्षे तद्धेतुत्वम्' इति परास्तम्, वस्तुनस्तथाज्ञेयत्वस्वभावविशेषादेव ज्ञानविशेषाच्च; अन्यथा समूहालम्बन-विशिष्टबुद्ध्योरविशेषापातात्, भासमानवैशिष्ट्यप्रतियोगित्वरूपप्रकारताया दण्ड-पुरुष-संयोगा इत्यत्रापि सत्त्वात्, स्वरूपतो भासमानं यद् वैशिष्ट्यं तत्प्रतियोगित्वोक्तौ संयुक्तसमवायादेः संबन्धत्वे 'स्वरूपतः' इत्यस्य दुर्वच- ॥१४२॥

१ इतः 'व्यक्तिरेव' पर्यन्तोऽन्तर्भूतपूर्वपक्षोत्तरपक्षः पूर्वपक्षः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वात्, संयोगितादात्म्यसंयोगादिसंसर्गकबुद्धेरवैलक्षण्यापत्त्या संबन्धतावच्छेदकज्ञानस्वीकारात्, सांसर्गिकज्ञानस्यानुपनायकत्वेन निरुक्तप्रकारत्वस्यानुव्यवसायग्राह्यत्वासंभवात्, विषयविशेषं विना ज्ञाननिष्ठप्रकारिताविशेषाभ्युपगमे च साकारवादापातादिति दिग्।

यत्तु– 'प्रथमानुमानादेव समवायसिद्धिः, समवायबाधोत्तरकालकल्पनीयेन स्वरूपसंबन्धेनार्थान्तराभावात्' इति मिश्रेणाभिहितम्। तदसत्, स्वरूपसंबन्धत्वस्य परिणामविशेषरूपत्वात्, एकक्षेत्रावस्थितधर्मिद्वयस्वरूपसंयोगस्थलेऽपि स्वरूपस्यैव संबन्धत्वात्, अन्यथा 'कुण्ड एव बदरविशिष्टधीः, न तु बदरे कुण्डविशिष्टधीः' इति नियमायोगात्, स्वरूपसंबन्धत्वस्य संयोगसमवायातिरिक्तत्वाघटितत्वात्, समवायसंबन्धतयाऽप्यस्यैवोपजीव्यत्वादिति। यदपि तद्घट-रूपयोर्विशिष्टबुद्धौ विनिगमनाविरहादुभयोः संबन्धिनोः संबन्धत्वं कल्पनीयम्, तथाच लाघवादेक एव समवायः संबन्धत्वेन कल्प्यते, अभावस्थले त्वधिकरणानां नानात्वेऽप्येकस्यैवाभावस्य संबन्धत्वं युक्तम्, इति न तत्र संबन्धान्तरकल्पनप्रतिबन्द्यवकाश इति। तदपि न, 'समवायः, तत्र समवायत्वम्, क्लृप्तभावभेदः, नानाधिकरणवृत्तित्वम्' इत्यादिकल्पनायां महागौरवात्।

एतेन 'गुण-गुण्यादिस्वरूपद्वये संबन्धत्वम्, अतिरिक्तसमवाये वेति विनिगमनाविरहादप्यन्ततः समवायसिद्धिः' इति पदार्थमालाकृतो वचनमपहस्तितम्, जातेरनुगतत्वेन व्यक्तिसंबन्धत्वौचित्ये जाति-व्यक्त्योः समवायोच्छेदापत्तेश्च। किञ्च, रूपि-नीरूपिव्यवस्थानुरोधेन रूपादीनां संबन्धत्वकल्पनावश्यकत्वाद् न समवायस्य संबन्धत्वम्, वाय्वादेर्नीरूपत्वस्य रूपीयतद्धर्मताख्यसंबन्धाभावादेव पक्षधरमिश्रैरुपपादितत्वात्, तद्धर्मतायाश्च तद्रूपानतिरिक्तत्वात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्तु 'रूपसमवायसत्त्वेऽपि वायौ स्वभावतो रूपाभावादेव नीरूपत्वम्' इति चिन्तामणिकृतोक्तम्। तदसत्, प्रतियोगिसंबन्धसत्त्वे तत्संबन्धावच्छिन्नाभावायोगात्। अथ प्रतियोगिसंबन्धसत्त्वेऽपि तद्वत्ताया अभावात् तत्र तदभावाविरोधः। न च तत्संबन्धस्तद्वत्तानियतः, गगनीयसंयोगे व्यभिचारात्। न च 'वृत्तिनियामक-' इति विशेषणाद् न दोष इति वाच्यम्, करवृत्तितानियामककपालसंयोगवति कपाले कपालाभावसत्त्वेन व्यभिचारात्। यत्र यद्वृत्तितानियामकः संबन्धः, तत्र तद्वत्त्वनियम इति चेत्। तर्हि रूपसमवायस्य वायुवृत्तित्वानियामकत्वादेव वायौ न तद्वत्त्वम्;[1] इति चेत्। न, तत्र तद्वृत्तितानियामकत्वं हि तत्र तद्विशिष्टबुद्धिजनकत्वम्। अस्ति च वायावपि 'इह रूपम्' इति धीः, [2]तदभावप्रत्यक्षवादिनापि तत्रावश्यं [3]तत्स्वीकारात्। साऽऽरोपरूपा, न तु प्रमेति चेत्। न, 'तदभावधियः सत्यत्वासिद्धौ तदप्रमात्वासिद्धेः' इति मिश्रेणैवोक्तत्वात्, प्रतियोगित्वादेरनतिरेकेण तदनुयोगितानिरूपिततत्प्रतियोगिताकवैशिष्ट्यस्य तत्र तद्वृत्तिनियामकत्वस्य वक्तुमशक्यत्वात्। यत्तु 'एकस्यैव समवायस्य किञ्चिदधिकरणावच्छेदेन रूपसंबन्धत्वकल्पनेनैव व्यवस्थोपपत्तिः' इति। तन्न, रूपसंबन्धत्वं हि रूपप्रकारकविशिष्टज्ञानीयसंसर्गताख्यविषयताशालित्वम्, तच्च तत्तदधिकरणावच्छेदेन तत्तदधिकरणान्तर्भावेन विशिष्टधीहेतुतयैव निर्वहतीति महागौरवात्, [4]अस्माकं तु रूपप्रकारकविशिष्टबोधे रूपसंबन्ध एव तन्त्रमिति लाघवात्। किञ्च, एवं 'रूपसंबन्धे न रूपसंबन्धत्वम्' इति व्यवहारः प्रामाणिकः स्यात्।

अन्ये तु— 'रूपि-नीरूपिव्यवस्थानुरोधाद् नानैव समवायः, समनियतकाल-देशावच्छेदकानां संख्या-परिमाण-पृथ-

१ इतः 'तद्वत्त्वम्' इति पर्यन्तो नैयायिकपूर्वपक्षः। २ नैयायिकेन। ३ इह रूपमिति धियस्तदा परामर्शः। ४ जैनानाम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्त्वादीनां चैक एवायम्, तदभिप्रायेणैव समवायैकत्वप्रवादः, युक्तं चैतत्, इत्थमेव चक्षुःसंयुक्तघटादिसमवायात् पटत्वादेः प्रत्यक्षानापत्तेः' इति वदन्ति । तदपि न, गुणत्वावच्छेदेन गुणिस्वरूपसंबन्धत्वकल्पनादतिरिक्तसंबन्धकल्पनानौचित्यात्, 'जले स्नेहस्य समवायः, न गन्धस्य' इति प्रतीतिवद् 'घट-रूपयोः संबन्ध एव न घट-रसयोः संबन्धः' इति प्रतीतेरपि सत्त्वात्, अतिरिक्तसमवायाननुभवात्, अपृथग्भावस्यैव समवायपदार्थत्वात् । यदि पुनरेवमप्यनुगतसंबन्धधीनिर्वाहायाप्रामाणिकसमवायाभ्युपगमो न त्यज्यते, तदा लाघवादभावादिसाधारणं वैशिष्ट्यमेव किमिति नाभ्युपैषि ?। न चैवं पटवति भूतले पटाभावधीप्रसङ्गः[1], तदानीं तदधिकरणतास्वाभाव्याभावस्य वक्तुमशक्यत्वात्, स्वभावस्य यावद्द्रव्यभावित्वात्, रक्ततादशायां घटे श्यामाधिकरणतास्वाभाव्येऽपि श्यामाभावेन तदंशे लौकिकप्रत्यक्षाभावादिति वाच्यम्, शाखावच्छिन्नसंयोगसमवायस्य मूलावच्छेदेनेव वैशिष्ट्यस्य तत्काले तदधिकरणावच्छेदेन पटाभावं प्रत्यसंबन्धत्वात् । न च तत्र शाखासमवायोभयमेव संबन्धः, न तु समवायस्य संबन्धत्वे शाखावच्छेदिकेति वाच्यम्, शाखावच्छेदेन समवायसंबन्धावच्छिन्नसंयोगाभावग्रहेऽपि 'शाखायां संयोगी' इति बुद्ध्यापत्तेः, तत्र शाखासमवायोभयसंबन्धावच्छिन्नसंयोगाभावग्रहस्यैव विरोधित्वात्, तत्रोक्ताभावग्रहप्रतिबन्धकत्वस्यापि कल्पने गौरवात्। अस्तु वा 'इदानीं पटाभावः' इत्यत्रापि तत्कालवैशिष्ट्योभयसंबन्धेन पटाभाव एव विषय इति न किञ्चिदनुपपन्नम् । न च समवायेन जन्यभावत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुत्वात् तत्सिद्धिः, कालिकविशेषणताभिन्नवैशिष्ट्येनैव तदुपपत्तेः । अथ प्रतियोगितया घटादिसमवेतनाशं प्रति स्वप्रतियोगिसमवे-

---

१ अतः 'प्रसङ्गात्' पर्यन्तः पूर्वपक्षः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्वस्वाधिकरणत्वोभयसंबन्धेन घटादिनाशस्य हेतुत्वात् समवायसिद्धिः, स्वप्रतियोगिवृत्तित्वेन तथात्वे घटादिवृत्तिध्वंसध्वंसापत्तेः । न च द्वित्रिक्षणस्थायिघटादिसमवेतनाशे स्वप्रतियोगिसमवेतत्वेनैव तथात्वात् सत्त्वेन नाशहेतुत्वे कल्पनाद् न तदापत्तिरिति वाच्यम्; तत्रापि कालावच्छिन्नस्वप्रतियोगिसमवेतत्वेनैव तथात्वेऽनतिप्रसङ्गात्; इति चेत् । न, उक्ते हेतुतावच्छेदकेऽक्लृप्तसमवायनिवेशापेक्षया क्लृप्तसत्त्वनिवेशस्यैवोचितत्वात् । 'द्रव्यजात्यन्यचाक्षुषे महदुद्भूतरूपवद्भिन्नसमवेतत्वेन प्रतिबन्धकत्वात् समवायसिद्धिः' इत्यपि वार्तम्, द्रव्यान्यसचाक्षुषत्वावच्छिन्नं प्रति महदुद्भूतरूपवद्भिन्नवृत्तित्वेन तत्त्वसंभवादिति न किञ्चिदेतत् । अधिकं ज्ञानार्णव-स्याद्वादरहस्य-न्यायालोकादौ ॥ ६५ ॥

सामग्रीपक्षमपि स्फुटतरं विक्षिपति–

यापि रूपादिसामग्री विशिष्टप्रत्ययोद्भवा । जकनत्वेन बुद्ध्यादेः कल्प्यते साऽप्यनर्थिका ६६

यापि रूपादिसामग्री– रूपा-ऽऽलोक-मनस्कार-चक्षुःसंनिधानादिरूपा, विशिष्टप्रत्ययोद्भवा– स्वहेतुसंनिधिपरम्परोपजनितविशेषा, बुद्ध्यादेः– कार्यजातस्य, जनकत्वेनाऽन्त्यैव[1] कल्प्यते, समर्थस्य कालक्षेपायोगेन कार्याजनकानां सामग्र्यामनुप्रवेशात् । साऽपि- स्वोपक्लृप्ता सामग्र्यपि, अनर्थिका– प्रयोजनविकलकल्पनाविषया ॥ ६६ ॥ ॥१४४॥

१ अन्त्या– यदव्यवहितोत्तरक्षणे कार्यं संपद्यते, अविकलेति यावत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाहि—

सर्वेषां बुद्धिजनने यदि सामर्थ्यमिष्यते । रूपादीनां ततः कार्यभेदस्तेभ्यो न युज्यते ॥६७॥

सर्वेषां– रूपादीनां, बुद्धिजनने– बुद्धिलक्षणैकजातीयकार्योत्पादने, यदि सामर्थ्यं– शक्तिः, इष्यते– अङ्गीक्रियते। एकं कार्यं तु सौत्रान्तिक-वैभाषिकमते रूपादिजन्यमप्रसिद्धम्, तन्मते संचितेभ्यः परमाणुभ्यः संचितानां परमाणूनामेवोत्पादात्, संवृतिसत एकस्य घटादेस्तदजन्यत्वात्, ज्ञानस्यापि ग्राह्य-ग्राहकाकारद्वयप्रतिभासनादिति बोध्यम्। ततः– तेषामेकजनकत्वात्, तेभ्यः सकाशात्, कार्यभेदः– रूपादिकार्यविशेषः, न घटते, किन्तु बुद्धिरेवैका स्यात् ॥ ६७ ॥

न चैवमेवास्तु, इत्याह—

रूपालोकादिकं कार्यमनेकं चोपजायते । तेभ्यस्तावद्भ्य एवेति तदेतच्चिन्त्यतां कथम् ?६८

रूपा-ऽऽलोकादिकं कार्यं स्वस्वसंततिगतम्, अनेकं च– विभिन्नं च, उपजायते। तदेतत्– विभिन्नकार्यभवनम्, तेभ्यः– रूपादिभ्यः, तावद्भ्य एव– तावत्संख्याकेभ्य एव, कथम्?, इति चिन्त्यताम्; सर्वेषामेव बुद्धिजननसमर्थत्वात्, रूपादौ जननीयेऽतिरिक्तानागमनात्? ॥ ६८ ॥

दोषान्तरमाह—

प्रभूतानां च नैकत्र साध्वी सामर्थ्यकल्पना। तेषां प्रभूतभावेन तदेकत्वविरोधतः ॥६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभूतानां च– विभिन्नानां च रूपादीनाम्, एकत्र– एकजातीये बुद्ध्यादिकार्ये, सामर्थ्यकल्पना– शक्तिसमर्थना, साध्वी न– न्याय्या न। कुतः ? इत्याह– तेषां– समर्थानां, प्रभूतभावेन– विभिन्नत्वेन, तदेकत्वविरोधतः– कार्यैकत्वविरोधात् ॥ ६९ ॥

एतदेव भावयन्नाह—

तानशेषान् प्रतीत्येह भवदेकं कथं भवेत् ? । एकस्वभावमेकं यत्तत्तु नानेकभावतः ॥७०॥

तान्– समर्थान्, अशेषान्, प्रतीत्य– आश्रित्य, इह– लोके, भवत् कार्यम्, एकं कथं भवेत् ?– नैव भवेदित्यर्थः। अत्रोपपत्तिमाह– यद्– यस्मात्, एकस्वभावमेकम् 'उच्यते' इति शेषः, तत्तु– एकस्वभावं तु, अनेकभावतः– अनेकेभ्यो रूपादिभ्यो हेतुभ्य उत्पत्तेः, न घटते ॥ ७० ॥

कथम् ? इत्याह—

यतो भिन्नस्वभावत्वे सति तेषामनेकता । तावत्सामर्थ्यजत्वे च कुतस्तस्यैकरूपता ? ७१

यतः– यस्मात्, भिन्नस्वभावत्वे– नानास्वभावत्वे सति, तेषां– रूपादीनाम्, अनेकता, नान्यथा; तावत्सामर्थ्यजत्वे च– तावत्कारणशक्तिजन्यत्वे च, तस्य– बुद्ध्यादेः– कार्यस्य, कथमेकरूपता– एकस्वभावता, रूपादिशक्तिजन्यत्वस्वभावभेदात् ? ॥ ७१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव समर्थयन्नाह—

यज्जायते प्रतीत्यैकसामर्थ्यं नान्यतो हि तत् । तयोरभिन्नतापत्तेर्भेदे भेदस्तयोरपि ॥७२॥

यत् कार्यम्, एकसामर्थ्यं कारणगतं, प्रतीत्य, जायते, तद्धि– तदेव, अन्यतः– कारणसामर्थ्यान्तरात्, न जायते। कुतः ? इत्याह– तयोः– कारणसामर्थ्ययोः, अभिन्नतापत्तेः– एकत्वप्रसङ्गात्, एककार्यजनकत्वेनैकस्वभावत्वौचित्यात्। भेदे तयोः– सामर्थ्ययोः कुतश्चिदन्यतो निमित्तात् स्वभावभेदेऽभ्युपगम्यमाने, तयोरपि– तदुभयजन्यबुद्ध्यादेरपि भेदः स्यात्, प्रत्येकजन्यत्वस्वभावभेदात् ॥ ७२ ॥

पराभिप्रायमाशङ्क्य परिहरति—

न प्रतीत्यैकसामर्थ्यं जायते तत्र किंचन। सर्वसामर्थ्यभूतिस्वभावत्वात्तस्य चेन्न तत् ॥७३॥

एकसामर्थ्यं प्रतीत्य– आश्रित्य, तत्र– कार्ये, न किञ्चन– तज्जन्यतानियतं रूपं (जायते)। कुतः ? इत्याह– तस्य– अधिकृतकार्यस्य, सर्वसामर्थ्यभूतिस्वभावत्वात्– अधिकृतसकलहेतुशक्त्यपेक्षोत्पत्त्येकस्वभावत्वात्, इति चेत्। न तत्– नैतदुक्तं युक्तम् ॥ ७३ ॥

कुतः ? इत्याह–

प्रत्येकं तस्य तद्भावे युक्ता ह्युक्तस्वभावता । न हि यत्सर्वसामर्थ्यं तत्प्रत्येकत्ववर्जितम् ॥७४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य- बुद्ध्यादेः कार्यस्य, प्रत्येकं- रूपादिकमेकैकमपेक्ष्य, तद्भावे- तेभ्य उत्पत्तिस्वभावत्वे, हि- निश्चितम्, उक्त-स्वभावता- सर्वसामर्थ्यभूतिस्वभावता, युक्ता। अत्रोपपत्तिमाह- न हि यत् सर्वसामर्थ्यं नाम, तत् प्रत्येकत्ववर्जितम्- प्रत्येकसामर्थ्यभिन्नम्, प्रत्येकाऽवृत्तेः समुदायाऽवृत्तित्वनियमादिति भावः ॥ ७४ ॥

प्रत्येकसामर्थ्यं च परिहृतमेवेति दर्शयति—

अत्र चोक्तं न चाप्येषां तत्स्वभावत्वकल्पना। साध्वीत्यतिप्रसङ्गादेरन्यथाप्युक्तिसंभवात्।७५।

अत्र च- प्रत्येकजन्यत्वस्वभावपक्षे च, उक्तम्- 'यज्जायते' इत्यादि। दोषान्तरमाह- न चापि, एषाम्- अधिकृत-समग्रहेतूनाम्, तत्स्वभावत्वकल्पना- प्रकृतफलजननस्वभावत्वकल्पना, अतिप्रसङ्गादेर्दोषात्, साध्वी- न्याय्या; समग्रान्तराण्यपि तज्जननस्वभावानि भवन्त्वित्यतिप्रसङ्गः, आदिशब्दादेक एव तज्जननस्वभावोऽस्तु, शेषा उपनिमन्त्रितकल्पा इत्यादिदोषसंग्रहः। एवमपि तत्स्वभावत्वोक्तौ दोषमाह- अन्यथाऽप्युक्तिसंभवात्- समग्रान्तराणामपि तत्स्वभावत्ववचनसंभवात्, युक्तिवैकल्यस्य चोभयसाधारणत्वात्। इतिराद्यपक्षसमाप्त्यर्थः ॥ ७५ ॥

मौलं विकल्पमधिकृत्य पक्षान्तरमाह—

अथान्यत्रापि सामर्थ्यं रूपादीनां प्रकल्प्यते। न तदेव तदित्येवं नाना चैकत्र तत्कुतः?॥७६॥

---

१ कारिका ७२।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ, अन्यत्रापि– बुद्ध्यादिव्यतिरेकेण स्वसंततावपि, सामर्थ्यं– रूपादिजननी शक्तिः, रूपादीनां समग्राणां, प्रकल्प्यते। अत्र दोषमाह– न तदेव– बुद्ध्यादिजननसामर्थ्यमेव, तत्– अन्यत्रापि सामर्थ्यम्, अन्यस्यापि बुद्ध्यादित्वव्याप्तेः, इति– उक्तहेतोः, नाना– अनेकं बुद्धि-रूपादिजननसामर्थ्यम्। एवं च– नानात्वे च, एकत्र– एकस्वभावे रूपादौ, तत्– सामर्थ्यम्, कुतः, नानासामर्थ्यस्वभावत्वेन सर्वथैकत्वविरोधात्? ॥ ७६ ॥

परपक्ष एव दोषान्तरमाह—

सामग्रीभेदतो यश्च कार्यभेदः प्र[1]गीयते। नाना[2]कार्यसमुत्पाद एकस्याः सोऽपि बाध्यते ॥७७॥

यश्च परैः सुगतसुतैः सामग्रीभेदतः– सामग्रीविशेषात्, कार्यभेदः– कार्यविशेषः, प्रगीयते– प्रतिज्ञायते, सोऽपि, एकस्या एव सामग्र्या रूपा-ऽऽलोकादिनानाकार्यसमुत्पादेऽभ्युपगम्यमाने, बाध्यते, सामग्र्यविशेषेऽपि कार्यविशेषादिति भावः ॥ ७७ ॥

अत्रैव पराभिप्रायं निषेधति—

उपादानादिभावेन न चैकस्यास्तु संगता। युक्त्या विचार्यमाणेह तदनेकत्वकल्पना ॥७८॥

न च, एकस्यास्तु– सामान्यत एकस्या एव सामग्र्याः, उपादानादिभेदेन– ज्ञानादौ मनस्कारादेरुपादानत्वेन, इतरेषां

१ ज. 'प्रतीय'। २ ख.ग.घ. च. 'नाकर्मस'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च सहकारित्वेन कारणताघटितेनावान्तरसामग्रीभेदेन, युक्त्या विचार्यमाणा, इह- प्रस्तुतविचारे, तदनेकत्वकल्पना- सामग्र्यनेकत्वकल्पना, संगता- युक्ता ॥ ७८ ॥

तथाहि—

रूपं येन स्वभावेन रूपोपादानकारणम्। निमित्तकारणं ज्ञाने तत्तेनान्येन वा भवेत्? ॥७९॥

रूपं येन स्वभावेन रूपोपादानकारणं, तेनैव स्वभावेन ज्ञाने निमित्तकारणं, अन्येन वा स्वभावेन भवेत्? इति पक्षद्वयम् ॥ ७९ ॥

आद्ये आह—

यदि तेनैव, विज्ञानं बोधरूपं न युज्यते। अथान्येन, बलाद् रूपं द्विस्वभावं प्रसज्यते॥८०॥

यदि तेनैव- रूपोपादानस्वभावेनैव ज्ञानजननस्वभावं रूपं, तदा विज्ञानं बोधरूपं न युज्यते, कार्ये सकलस्वगतविशेषाधायकत्वं ह्युपादानत्वम्, तत्स्वभावत्वं च रूपादेर्यदि ज्ञानेऽपि जननीये, तदा तद्रूपादिस्वरूपतामास्कन्देद् बोधरूपतां जह्यादिति भावः। द्वितीये आह- अथान्येन- उपादेयजननस्वभावभिन्नस्वभावेन रूपं बोधजनकं, तदा बलात्- त्वदिच्छाननुरोधात्, द्विस्वभावं रूपं प्रसज्यते। अनिष्टं चैतद् भवतः, उपादान-सहकारिशक्तिभेदेऽपि स्वसंविद्येकत्वेनावभास-

१ भवतः- तथागततनयस्य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नात्, एकत्वाभ्युपगमे जनकत्वा-ऽजनकत्वाभ्यामप्यक्षणिकस्य तत एव तथात्वाभ्युपगमे बाधकाभावात् । अथ न स्वभावभेदाद् भावभेदः, अपि तु विरुद्धस्वभावभेदात्, तत्कार्यजनकत्वा-जनकत्वे चाक्षणिकस्य विरुद्धौ स्वभावौ, उपादानत्व-सहकारित्वशक्त्योश्च न विरोध इति न दोष इति चेत् । न, तथाप्यनेकशक्तितादात्म्यानुविद्धैकरूपक्षणाद्यभ्युपगमेऽनेकान्तप्रसङ्गात् । शक्तीनां शक्तिमतोऽभेद एवेत्यभ्युपगमे च 'इदमुपादानम्, इदं च सहकारिकारणम्' इत्यादिविभागाभावप्रसङ्गात् ॥ ८० ॥

कल्पनयाऽयं विभागो भविष्यतीति पराभिप्रायमाशङ्क्य परिहरन्नाह—

अबुद्धिजनकव्यावृत्त्या चेद् बुद्धिप्रसाधकः। रूपक्षणो ह्यबुद्धित्वात्कथं रूपस्य साधकः?॥८१॥

अबुद्धिजनकव्यावृत्त्या– 'अबुद्धिजनकेभ्यो व्यावृत्तः' इति कृत्वा, चेत्– यदि, बुद्धिप्रसाधकः– बुद्ध्युपधायकः, रूपक्षणो विकल्प्यते; तदा हि– निश्चितम्, अबुद्धित्वात्– बुद्धिभिन्नत्वात्, कथं स रूपस्य साधकः ? । न ह्यबुद्धिजनकव्यावृत्तमबुद्धिजनकं भवतीति ॥ ८१ ॥

पर आह—

स हि व्यावृत्तिभेदेन रूपादिजनको ननु। उच्यते व्यवहारार्थमेकरूपोऽपि तत्त्वतः ॥ ८२ ॥

स हि– रूपक्षणः, 'ननु' इति निश्चये, तत्त्वतः– परमार्थतः, एकरूपोऽपि– एकस्वभावोऽपि, व्यवहारार्थं, व्यावृत्तिभेदेन– अरूपजनकादिव्यावृत्तिविशेषेण, रूपादिजनक उच्यते, विरुद्धरूपस्यैकत्राभावेऽपि विभिन्नरूपेण कल्पनाया अप्रतिरो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धात्, कल्पनायां विषयसत्त्वस्यानियामकत्वादिति भावः ॥ ८२ ॥

अत्राह—

अगन्धजननव्यावृत्त्यायं कस्मान्न गन्धकृत्। उच्यते, तदभावाच्चेद्भावोऽन्यस्याः प्रसज्यते ॥

अगन्धजननव्यावृत्त्या, अयं- रूपक्षणः, व्यवहारार्थमेव कस्माद् न गन्धकृदुच्यते ? । अगन्धजननव्यावृत्त्यभावाच्चेद् यदि नोच्यते, तदाऽन्यस्याः- अबुद्धिजनकव्यावृत्तेः, भावः- पारमार्थिकसत्त्वं, प्रसज्यते ॥ ८३ ॥

ततः किम् ? इत्याह—

एवं व्यावृत्तिभेदेऽपि तस्यानेकस्वभावता। बलादापद्यते सा चायुक्ताभ्युपगमक्षतेः॥ ८४ ॥

एवम्- उक्तप्रकारेण, व्यावृत्तिभेदेऽपि- विभिन्नकारणतावच्छेदके भेदविशेषेऽप्यङ्गीक्रियमाणे, तस्य- वस्तुनः, बलादनेकस्वभावताऽऽपद्यते। सा चाऽभ्युपगमक्षतेः- प्रतिज्ञातविरोधात्, अयुक्ता। अथ 'आरोपे सति०' इत्यादिन्यायेन रूपक्षणस्यागन्धजनकत्वव्यावृत्त्या गन्धजनकत्वाकल्पनायामप्यबुद्धिजनकव्यावृत्त्यादिना बुद्ध्यादिजनकत्वकल्पनाद् न दोष इति चेत्। न, रूपत्वादिनाऽन्वय-व्यतिरेकग्रहेण रूपत्वादिनैव रूपादेर्बुद्ध्यादिहेतुत्वौचित्यात्, इतरव्यावृत्तेर्दुर्ग्रहत्वाद्, कल्पनातः कारणतावच्छेदकत्वांश इव कारणतांशेऽप्यनाश्वासात्, स्वलक्षणासंस्पर्शेऽपि कल्पनाप्रसरात्, व्यावृत्तिभेदस्यापि स्वलक्षणसंस्पर्शे च व्यावृत्तिभेदानुगतनानाक्षणवृत्तित्वस्यापि स्वलक्षणसंस्पर्शप्रसङ्गात्, व्यावृत्तिभेदेन कारणक्षणानां कार्यक्षणानां चानुगमे एकै- ॥ १४८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कग्रह-विनिर्मोकाभ्यामविनिगमात्, विशिष्य हेतुताग्रहे चापायाभावादिति । अन्यत्र विस्तरः ॥ ८४ ॥

दोषान्तरमाह—

विभिन्नकार्यजननस्वभावाश्चक्षुरादयः । यदि ज्ञानेऽपि भेदः स्यान्न चेद्भेदो न युज्यते ८५

विभिन्नकार्यजननस्वभावाश्चक्षुरादयः कारणविशेषा यदीष्यन्ते, तदा तज्जन्ये ज्ञानेऽपि भेदः स्यात्; न चेद् भिन्नकार्यजननस्वभावत्वं, तदा रूप-बुद्ध्यादेरपि भेदो न युज्यते । प्रत्येकं विभिन्नकार्यजननस्वभावत्वादयमदोष इति चेत् । न, तथाप्येकत्र कार्ये प्रत्येकं विभेदापत्तेः ॥ ८५ ॥

प्रस्तुतपक्षमुपसंहरति—

सामग्र्यपेक्षयाप्येवं सर्वथा नोपपद्यते । यद्धेतु-हेतुमद्भावस्तदेषाऽप्युक्तिमात्रकम् ॥८६॥

एवम्– उक्तयुक्त्या, सामग्र्यपेक्षयापि, यद्– यस्मात् कारणात्, सर्वथा हेतु-हेतुमद्भावो नोपपद्यते; तत्– तस्मात्, एषा– सामग्र्यपि, उक्तिमात्रकं– प्रकृतपक्षासाधिका ॥ ८६ ॥

अभ्युपगम्यापि हेतु-हेतुमद्भावं दोषमाह—

---

१ ख. ग. घ. च. 'कं भे'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नानात्वाबाधनाच्चेह कुतः स्वकृतवेदनम् ? ।
सत्यप्यस्मिन्मिथोऽत्यन्ततद्भेदादिति चिन्त्यताम् ॥ ८७ ॥

च- पुनः, इह- क्षणिकत्वपक्षे, सत्यप्यस्मिन्- हेतु-हेतुमद्भावे पूर्वो-त्तरक्षणरूपकर्तृ-भोक्त्रोः, मिथः- परस्परम्, अन्वयाभावेनाऽत्यन्तभेदात्, स्वकृतवेदनम्- स्वार्जितहिता-ऽहितकर्म-फलानुभवः, कुतः ? इति चिन्त्यताम्- माध्यस्थ्यमवलम्ब्य विमृश्यताम् ॥ ८७ ॥

पर आह—

वास्यवासकभावाच्चेन्नैतत्तस्याप्यसंभवात् । असंभवः कथं न्वस्य, विकल्पानुपपत्तितः॥८८॥

वास्यवासकभावात् स्वकृतवेदनं युज्यते, 'स्ववासककृतं स्वेन भुज्यते' इति नियमात्, स्ववासककृते स्वकृतत्वव्यवहाराच्च । अत्रोत्तरम्- इति चेत् । नैतदेवम्, तस्यापि- वास्यवासकभावस्यापि, असंभवात् । पर आह- 'नु' इति वितर्के, कथमस्य- वास्यवासकभावस्य, असंभवः ?। अत्रोत्तरम्- विकल्पानुपपत्तितः- विकल्प्यमानस्य सतस्तत्त्वनीत्याऽघटमानत्वात् ॥ ८८ ॥

तथाहि—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वासकाद्वासना भिन्नाऽभिन्ना वा भवेद्यदि । भिन्ना स्वयं तया शून्यो नैवान्यं वासयत्यसौ ।८९।

वासकात् सकाशाद् वासना भिन्ना वा भवेत्, अभिन्ना वा ?, इति द्वयी गतिः । तत्र यदि वासकाद् वासना भिन्ना, तदा स्वयं तया शून्योऽसौ वासकः क्षणः, नैवान्यं वासयेत्, अन्यक्षणाविशेषात् ॥ ८९ ॥

अथाभिन्ना न संक्रान्तिरस्या वासकरूपवत् । वास्ये सत्यां च संसिद्धिर्द्रव्यांशस्य प्रजायते९०

अथाभिन्ना वासकक्षणाद् वासना, तदा तस्या वासकरूपवद् निरन्वयविनष्टत्वेन वास्ये संक्रान्तिरन्वयरूपा न स्यात् । सत्यां च– अभ्युपगतायां च संक्रान्तौ, द्रव्यांशस्य संसिद्धिः प्रजायते, अन्वयस्यैव द्रव्यसंज्ञितत्वात् ॥ ९० ॥

संक्रान्तिं विनैव वासना भविष्यतीत्यत आह—

असत्यामपि संक्रान्तौ वासयत्येव चेदसौ । अतिप्रसङ्गः स्यादेवं स च न्यायबहिष्कृतः॥९१॥

असत्यामपि संक्रान्तौ– वासकसंवेधरूपायाम्, चेदसौ– वासकक्षणः, वासयत्येव वास्यम्, तदेवं सति, अतिप्रसङ्गः स्यात्, अन्यस्यापि वासनप्रसङ्गात्, स च न्यायबहिष्कृतः– युक्तिबाधितः ॥ ९१ ॥

---

१ क्रियमाणेऽत्र संधौ सप्ताक्षरत्वप्रसङ्गेन च्छन्दोहानिः, संधेरविधाने च 'संहितैकपदवत् पादेऽर्धान्तवर्जम्' इति काव्यसमयातिक्रमः, इति 'न्ना वाऽभिन्ना' इति पाठश्चेत् स्यात्, सुसंगतः स्यात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ नेयं वासना वासकसंसर्गरूपा, किन्तु मृगमदक्षणपरम्परावत् स्वहेतुप्रसूततत्तत्क्षणपरम्परारूपैव, इत्यभिप्रायमाकलय्याभ्युपगतमप्यसंगतत्वात् परित्यजन्नाह—

वास्यवासकभावश्च न हेतुफलभावतः। तत्त्वतोऽन्य इति न्यायात्स चायुक्तो निदर्शितः॥९२॥

वास्यवासकभावश्चायं भवत्कल्पितो न हेतुफलभावतः सकाशात् तत्त्वतोऽन्यः– किन्तु स एव । स च न्यायात्– सत्तर्कात् , अयुक्तो निदर्शितः ॥ ९२ ॥

परः सिंहावलोकितेन स्वाभिप्रायमाह—

तत्तज्जननस्वभावं जन्यभावं तथा परम्। अतः स्वभावनियमान्नायुक्तः स कदाचन ॥९३॥

तत्– कारणं मृदादि, तज्जननस्वभावं– घटादिजननस्वभावम् , तथा, परं– घटादि, जन्यभावं– मृदादिजन्यस्वभावम्। अतः स्वभावनियमाद् हेतु-फलयोः, सः– हेतु-फलभावः, न कदाचनाऽयुक्तः, अन्त्यावस्थायां सर्वेषां प्रत्येकमभिमतकार्योत्पादकत्वात् , अन्यसंनिधेस्तु स्वहेतुप्रत्ययसामर्थ्यनिमित्तत्वेनोपालम्भानर्हत्वात् । न च भिन्नकार्योत्पत्तिः, सर्वेषां तस्यैव जनने सामर्थ्यात् । अथवा, मृदादिक्षण एव शक्तिरूपा घटादिहेतुता वास्तवी, अन्यत्र तु पौर्वापर्यनियममात्रम् , इति न विभागाभावादिदोष इति ॥ ९३ ॥ ॥१५०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्राह—

उभयोर्ग्रहणाभावे न तथाभावकल्पनम् । तयोर्न्याय्यं न चैकेन द्वयोर्ग्रहणमस्ति वः॥९४॥

उभयोः– हेतु-फलयोः, ग्रहणाभावे न तथाभावकल्पनं– तज्जननस्वभावादिकल्पनम्, तयोः– हेतु-फलयोः, न्याय्यम्, उभयघटितत्वात् तस्य । न चैकेन ग्राहकेण, द्वयोर्भिन्नकालयोः, ग्रहणमस्ति, वः– युष्माकम् ॥ ९४ ॥

एतदेव दर्शयति—

एकमर्थं विजानाति न विज्ञानद्वयं यथा । विजानाति न विज्ञानमेकमर्थद्वयं तथा ॥९५॥

यथा विज्ञानद्वयं भिन्नकालं क्षणिकत्वादेकमर्थं न विजानाति, तथा विज्ञानमेकमर्थद्वयं भिन्नकालं क्षणिकत्वादेव न विजानाति 'नाननुकृतान्वय-व्यतिरेकं कारणं, नाकारणं विषयः' इति हि सौगतानां मतम्; न च ज्ञानद्वय एकस्यार्थस्येव, ज्ञानेऽर्थद्वयस्यापि हेतुत्वम्, इति नैकेनोभयग्रहणमिति भावः ॥ ९५ ॥

पराभिप्रायमाह—

वस्तुस्थित्या तयोस्तत्त्व एकेनापि तथाग्रहात् । नो बाधकं न चैकेन द्वयोर्ग्रहणमस्त्यदः ॥९६॥

वस्तुस्थित्या, पौर्वापर्यभावेन तयोः– हेतु-फलयोः, तत्त्वे– तज्जननादिस्वभावत्वे, एकेनापि– धर्मिग्राहकेण, तथाग्रहात्– तदभिन्नतद्धर्मप्रकारकग्रहात्, नो बाधकं प्रागुक्तम्; न चादः– एतत्, एकेन द्वयोर्ग्रहणमस्ति, धर्म-धर्मिणोरनर्थान्तरत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकैकैकस्यैव ग्रहात् ॥ ९६ ॥

एतत् परिजिहीर्षन्नाह—

तथाग्रहस्तयोर्नैतरेतरग्रहणात्मकः । कदाचिदपि युक्तो यदतः कथमबाधकम् ? ॥९७॥

तयोः– हेतु-फलयोः, तथाग्रहः– तज्जननस्वभावत्वादिना ग्रहः, इतरेतरग्रहणात्मकः– घटकग्रहसापेक्षग्रहरूपः, धर्मिमात्रग्रहात् कदाचिदपि युक्तः, अतः कथमबाधकं प्रागुक्तम् ? । न हि स्वलक्षणाध्यक्षं स्वस्य याथात्म्ये प्रमाणम्, क्षणिकत्व-स्वर्गप्रापणशक्त्यादावपि तथात्वप्रसङ्गात्, "यत्रैव[1] जनयेदेनां[2] तत्रैवास्य[3] प्रमाणता" इत्यस्य व्याघातापत्तेश्च ॥ ९७ ॥

न च हेतु-फलमात्रस्वरूपग्रहाद् हेतु-फलभावविकल्प इति सांप्रतम्, अतिप्रसङ्गात्, इत्याह—

तथाग्रहे च सर्वत्राविनाभावग्रहं विना । न धूमादिग्रहादेव ह्यनलादिगतिः कथम् ? ॥९८॥

सर्वत्र तथाग्रहे च– सर्वत्र धर्मिमात्रग्रहात् तत्स्वभावत्वविकल्पने च, अविनाभावस्य ग्रहो यस्मादित्यविनाभावग्रहः– सहचारादिज्ञानं तद् विना, धूमादिग्रहादेव– धूमादिस्वरूपमात्रग्रहादग्न्यादिव्याप्तिविकल्पनादेव, हि– निश्चितम्, अनलादिगतिः– अग्न्याद्यनुमानम्, कथं न भवेत् ? । भवेदेवाभ्यास-पाटवादिना क्वचिदिति चेत् । अगृहीतसहचारस्य नालिकेरद्वीपवासिनोऽपि धूमदर्शनमात्रादग्निव्याप्तिविकल्पादग्न्यनुमानं किं न स्यात् ? ॥ ९८ ॥

१ यत्रैव– विषये । २ कल्पनाम् । ३ अस्य– प्रत्यक्षस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रैवाक्षेपं समाधानं चाह—

समनन्तरवैकल्यं तत्रेत्यनुपपत्तिकम् । तुल्ययोरपि तद्भावे हन्त ! क्वचिददर्शनात् ॥९९॥

तत्र नालिकेरद्वीपवासिधूमादिज्ञानादग्न्याद्यगतिस्थले, समनन्तरवैकल्यं स्यात्, एतदप्यनुपपत्तिकं- निर्युक्तिकम् । कुतः? इत्याह– तुल्ययोरपि– समनन्तरयोः, उत्तरं तद्भावे– धूमादिग्रहोत्पादे, हन्त! क्वचित्– अगृहीताविनाभावे पुंसि, तददर्शनात्– अनलाद्यननुभवात् ॥ ९९ ॥

ननु न समनन्तरत्वमात्रेण समनन्तरतौल्यमपेक्षितम्, किन्तु गृह्यमाणकारणताश्रयकारणविषयत्वेन, इत्यभिमेत्य परः शङ्कते—

न तयोस्तुल्यतैकस्य यस्मात्कारणकारणम् । ओघात्तद्धेतुविषयं न त्वेवमितरस्य तु॥१००॥

न तयोः– गृहीताविनाभावनालिकेरद्वीपवासिसमनन्तरयोः, तुल्यता, यस्मादेकस्य गृहीताविनाभावस्य, कारणकारणं– धूमज्ञानोपादानम्, ओघात्– सामान्यतः, तथाविकल्पानुपरागेणेति यावत्, तद्धेतुविषयं– गृह्यमाणधूमहेत्वग्निविषयम्, न तु, एवम्– उक्तवत्, इतरस्य तु– नालिकेरद्वीपवासिनस्तु, तेन सदा तदग्रहणात् ॥ १०० ॥

अत्रोत्तरम्—

---

१ ख.ग.घ.च. 'नज्ञाने ओ' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यः केवलानलग्राहिज्ञानकारणकारणः । सोऽप्येवं न च तद्धेतोस्तज्ज्ञानादपि तद्गतिः ॥१०१॥

यः– कश्चिद् नालिकेरद्वीपवासिप्रत्ययः, केवलानलग्राहिज्ञानकारणकारणः– दैवादयोगोलकाङ्गारादिज्ञानसमुत्थः, सोऽपि, एवं– गृह्यमाणधूमहेत्वग्निगोचरसमनन्तराविकलः । न च तद्धेतोरप्येवं– निमित्तसमनन्तरहेतोरपि, तज्ज्ञानात्– नालिकेरद्वीपवासिधूमज्ञानात्, तद्गतिः– अनलादिगतिः, तथा च व्यभिचार एवेति भावः ॥ १०१ ॥

परः समाधानान्तरमाह—

तज्ज्ञानं यन्न वै धूमज्ञानस्य समनन्तरः । तथाभूदित्यतो नेह तज्ज्ञानादपि तद्गतिः ॥१०२॥

तज्ज्ञानम्– अग्निज्ञानम्, यद्– यस्मात्, वै– निश्चितम्, धूमज्ञानस्य समनन्तरः– उपादानहेतुः, न तथाऽभूत्, इत्यतो हेतोः, इह– नालिकेरद्वीपवासिनि, तज्ज्ञानादपि– दैवादग्निविषयकज्ञानोत्थधूमज्ञानादपि, न तद्गतिः– नानलादिगतिः, तथा चाग्निज्ञानोपादेयधूमज्ञानत्वेनाग्निगमकत्वाद् न दोष इति भावः ॥ १०२ ॥

अत्रोत्तरम्—

तथेति हन्त ! को न्वर्थस्तत्तथाभावतो यदि । इतरत्रैकमेवेत्थं ज्ञानं तद्ग्राहि भाव्यताम् ॥१०३॥

'न तथाऽभूत्' इत्यत्र 'तथा' इति हन्त ! को न्वर्थः ? । वाक्यार्थमविचार्यैव वाक्यं प्रयुञ्जानस्य महदनौचित्यमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'हन्त' इत्यनेन सूच्यते । यदि तत्तथाभावतः–तस्यैवाग्निज्ञानस्यैव तथाभावतो धूमज्ञानभावेन परिणामो नाभूदिति नाग्न्यादिगतिरित्यभिमतम्, तदा भवत्विहेदं समाधानम् । परमितरत्र– अविनाभावग्रहस्थले, इत्थम्– उक्तप्रकारेण, एकमेव ज्ञानं एकाकारपरित्यागान्याकारोपादानेन, तद्ग्राहि– धूमानलग्राहि, भाव्यतां– विमृश्यतामेतत्, अन्यथा विशेषासिद्धेः ॥१०३॥

पक्षान्तरनिरासेनाधिकृतमेव समर्थयन्नाह—

तदभावेऽन्यथा भावस्तस्य सोऽस्यापि विद्यते। अनन्तरचिरातीतं तत्पुनर्वस्तुतः समम् १०४

अन्यथा– तत्तथाभावेन विशेषानभ्युपगमे, तदभावे– अग्निज्ञानाभावे, तस्य– धूमज्ञानस्य, भावः– उत्पादः, अभ्युपगतो भवति, गत्यन्तराभावात् । न चैवं विशेष इत्याह– सः– तदभावे भावः, तस्यापि– नालिकरद्वीपवासिधूमज्ञानस्य, विद्यते । तत्काले यथोक्ताग्निज्ञानाभावादानन्तर्याद् विशेषः स्यादित्यत आह– अनन्तरचिरातीतं, तत्पुनरग्निज्ञानम्, वस्तुतः– परमार्थतः, तदानीमसत्त्वात् समम्, अनुपयोगाविशेषात्, हेतुसत्त्वस्यैव कार्ये उपयोगात्; वस्तुतो नाग्निज्ञानजधूमज्ञानत्वेनाग्निगमकत्वम्, अनग्निज्ञानादपि धूमं ज्ञात्वा मानसाध्यक्षेण, ऊहाख्यप्रमाणेन वा व्याप्तिग्रहेऽग्निज्ञानोदयात्, अग्निज्ञानकुर्वद्रूपत्वं च न धूमज्ञानहेतुतायां पक्षपाति, पिशाचस्यापि तथाहेतुत्वसंभवादिति न किञ्चिदेतत् ॥ १०४ ॥

एतेनैतद् निरस्तमित्याह—

अग्निज्ञानजमेतेन धूमज्ञानं स्वभावतः । तथाविकल्पकृन्नान्यदिति प्रत्युक्तमिष्यताम् १०५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतेन– परमते तत्स्वभावत्वापरिज्ञानप्रतिपादनेन, 'अग्निज्ञानजं धूमज्ञानं, तथाविकल्पकृत्– 'अग्निजन्योऽयं धूमः' इति विकल्पहेतुः, नान्यत्' इति प्रत्युक्तं– निरस्तम्, इष्यताम्– अङ्गीक्रियताम् ॥ १०५ ॥

प्रस्तुतं निगमयति—

अतः कथंचिदेकेन तयोरग्रहणे सति । तथाप्रतीतितो न्याय्यं न तथाभावकल्पनम्॥१०६॥

अतः– उक्तयुक्तेः, कथञ्चित्– अन्वयाविच्छेदात्, एकेन– ग्राहकेण, तयोः– हेतु-फलयोः, अग्रहणे सति, तथाप्रतीतितः– तदितरावधिकत्वेनाऽप्रतीतेः, तथाभावकल्पनं– प्रक्रमाद् हेतु-फलयोस्तज्जननस्वभावत्वादिकल्पनं, न न्याय्यं– न युक्तम् ॥ १०६ ॥

एवं चाभ्युपगमक्षतिरित्याह—

प्रत्यक्षानुपलम्भाभ्यां हन्तैवं साध्यते कथम्?। कार्यकारणता तस्मात्तद्भावादेरनिश्चयात् ॥

'हन्त' इति खेदे, एवं– तत्तथाभावानवगतौ, [1]प्रत्यक्षा-ऽनुपलम्भाभ्यां कार्यकारणता कथं साध्यते?। कुतः? इत्याह– तस्मात् तद्भावादेः– तदन्वयानुकृतान्वयप्रतियोगित्वादेः, अनिश्चयात्– अनुपलम्भात्, आदिना तद्व्यतिरेकानुकृतव्यतिरेकप्रतियोगित्वग्रहः ॥ १०७ ॥

१ उपलब्ध्य-ऽनुपलब्धिभ्यां, अन्वय-व्यतिरेकाभ्यामिति यावत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव स्पष्टयन्नाह—

न पूर्वमुत्तरं चेह तदन्याग्रहणाद् ध्रुवम् । गृह्यतेऽत इदं नातो नन्वतीन्द्रियदर्शनम् ॥१०८॥

इह– परदर्शने, पूर्वं– कारणताश्रयः, उत्तरं च– तत्प्रतियोगि, न गृह्यते, ध्रुवं– निश्चितम्, तदन्याग्रहणात्– अधिकृतदर्शनवेलायामन्यादर्शनात् । ततः 'अत इदम्–' 'अग्न्यादेर्धूमादि' इत्यन्वयज्ञानम्, 'नातः– जलादेः, इदम्– अग्न्यादि' इति व्यतिरेकज्ञानम्, 'ननु' अक्षमायाम्, अतीन्द्रियदर्शनम्– इन्द्रियातीतमपूर्वं प्रत्यक्षम् । न चान्वय-व्यतिरेकाग्रहादेव कारणताग्रहः, कार्यानुकृतान्वय-व्यतिरेकप्रतियोगित्वरूपकारणतायां तयोर्घटकत्वात्, घट्यग्रहस्य च घटकग्रहाधीनत्वात्, अनन्यथासिद्धनियतपूर्ववर्तित्वरूपतद्ग्रहेऽपि सहचारग्रहत्वेन, अन्वय-व्यतिरेकाभ्यां वा तद्ग्रहहेतुत्वावश्यकत्वात् । न च शक्तिरूपकारणतापि धर्मिग्रहमात्रात् सुग्रहा, तस्या अनुमेयत्वादिति दिग् ॥ १०८ ॥

एवं च विकल्पोऽपि न घटत इत्याह—

विकल्पोऽपि तथान्यायाद्युज्यते न ह्यनीदृशः । तत्संस्कारप्रसूतत्वात्क्षणिकत्वाच्च सर्वथा १०९

विकल्पोऽपि– निश्चयोऽपि, तथान्यायात्– उक्तन्यायात्, तत्संस्कारप्रसूतत्वात्– पूर्वोत्तरसंवित्संस्कारजत्वात्, सर्वथा क्षणिकत्वाच्च– अन्वय(?)विच्छेदेन क्षणिकत्वाभ्युपगमाच्च, अनीदृशः– असंस्पृष्टविप्रतिषेधः, न हि– नैव, युज्यते । न हि पूर्वानुभूतसंस्कारं विना स्मरणात्मा निश्चयः । न च क्षणभङ्गे प्राच्यसंस्कारावस्थानमिति ॥ १०९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपसंहरन्नाह—

नेत्थं बोधान्वयाभावे घटते तद्विनिश्चयः । माध्यस्थ्यमवलम्ब्यैतच्चिन्त्यतां स्वयमेव तु ॥११०॥

इत्थम्– उक्तप्रकारेण, बोधान्वयाभावे सति, तद्विनिश्चयः– तत्तथास्वाभाव्यविनिश्चयः, न घटते । एतत्– उक्तम्, माध्यस्थ्यमवलम्ब्य स्वयमेव तु चिन्त्यताम्, नानाकारानुविद्धस्यैकोपयोगस्यानुभूतेरन्यथानुपपत्तेः ॥ ११० ॥

परः शङ्कते—

अग्न्यादिज्ञानमेवेह न धूमज्ञानतां यतः । व्रजत्याकारभेदेन कुतो बोधान्वयस्ततः ? ॥१११॥

इह– तत्तथाभावग्रहस्थले, अग्न्यादिज्ञानमेवाकारभेदेन धूमज्ञानतां यतो न व्रजति, अन्यथा नील-पीतज्ञानयोरप्यैक्यप्रसङ्गात्, तत् कुतो बोधान्वयः ? इति ॥ १११ ॥

अत्रोत्तरम्—

तदाकारपरित्यागात्तस्याकारान्तरस्थितिः । बोधान्वयः प्रदीर्घैकाध्यवसायप्रवर्तकः ॥११२॥

तदाकारपरित्यागात्– अग्न्याद्याकारतिरोभावात्, तस्य– बोधस्य, आकारान्तरस्थितिः– धूमाद्याकारेणाविर्भावः, बोधान्वयः, सर्वथाऽसत्सद्भावविरोधात् । स च प्रदीर्घः प्रवाहवान् य एकः– एकसंततिमान् अध्यवसायस्तत्प्रवर्तकः– ॥१५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्निमित्तम्, नील-पीताकारयोर्भिन्नसंततिगतत्वेन विरोधेऽप्यग्नि-धूमाद्याकाराणामेकसंततिगतत्वेनाऽविरोधात्, एकत्र स्वसंविदि ग्राह्य-ग्राहकाकारवत्। न च समानकालीनाकारभेदेनाकारवतोऽभेदेऽपि क्रमिकाकारभेदात् तद्भेदः, तद्वदेव तस्याविरुद्धत्वेनाभेदकत्वात् 'मुहूर्तमात्रमहमेकविकल्पपरिणत एवासम्' इत्यबाधितानुभवात्। न च नैयायिकेनाप्येतदनुभवापह्नवः कर्तुं शक्यः, प्रदीर्घाध्यवसायस्य धारावाहिकतया समर्थने स्थूलकालमादाय 'पश्यामि' इति प्रत्ययस्य भ्रान्तत्वे, तदैक्यप्रत्यभिज्ञायाश्च तज्जातीयाभेदविषयकत्वे, घटादौ वर्तमानताप्रत्यय-प्रत्यभिज्ञयोरपि तथात्वे बौद्धसिद्धान्तप्रवेशात्। न चैवं गोदर्शनकाल एवाश्वविकल्पानुभवात् तयोरप्येकदाऽभ्युपगमः स्यात्, अनुभवस्य प्रत्याख्यातुमशक्यत्वात्, एवं च तं[१]वापि, 'जुगवं दो णत्थि उवओगा'[२] इति वचनव्याघात इति वाच्यम्; 'उक्तवचनस्य समानसविकल्पद्वययौगपद्यनिषेधपरत्वात्, इन्द्रिय-मनोज्ञानयोरेकदाप्युपपत्तेः' इति सम्मतिटीकाकारः। भिन्नेन्द्रियज्ञानयौगपद्यं तु बाधकात् त्यज्यते। प्रकृते च नैकोपयोगानुभवे किञ्चिद् बाधकं पश्यामः। न चोत्तरक्षणवर्तिविभुविशेषगुणानां स्वपूर्ववृत्तियोग्यविभुविशेषगुणनाशकतया प्रदीर्घाध्यवसायस्य बाधः, सुषुप्तिप्राक्कालीनज्ञानादेरिव सर्वस्यैवोत्तरक्षणवृत्तित्वविशिष्टस्य स्वनाशकत्वेन क्षणिकत्वप्रसङ्गात्, स्वत्वस्य नानात्वेन विशिष्यैव नाशकत्वकल्पनाच्चेति। अन्यत्र विस्तरः।

न च स्वतन्त्राग्नि-धूमाद्युपयोगभेदवदत्रापि तद्भेद इति कुचोद्यमाशङ्कनीयम्, एकसामग्रीप्रभवैकविचाराङ्गीभूताकारभेदेऽप्यङ्गिनो न भेद इत्युक्तत्वात्। न चाऽग्न्यादिविषयकारणभेदात् सामग्रीभेदः, योग्यतातो विषयप्रतिनियमोपपत्तौ विषय-

१ आर्हतस्य। २ युगपद् द्वौ न स्त उपयोगौ।

स्याध्यक्षाहेतुत्वात्, अन्यथा योगिज्ञानस्यावर्तमानार्थग्राहित्वानुपपत्तेः । अर्थैवमेकत्र प्रमातरि एक एवोपयोगः स्यात्, तदाकारभेदादखिलव्यवहारोपपत्तेरिति चेत् । सत्यम्, घटादेर्मृदादिरूपतयेवात्मद्रव्यतयैकयेऽप्यविच्युतरूपभेदस्यानुभवसिद्धत्वेनाविरोधादिति दिग् ॥ ११२ ॥

न चायं भ्रान्त इत्याह—

स्वसंवेदनसिद्धत्वान्न च भ्रान्तोऽयमित्यपि । कल्पना युज्यते युक्त्या सर्वभ्रान्तिप्रसङ्गतः ११३

न चायं–बोधान्वयः, भ्रान्तः– भ्रान्तिविषयः, इत्यपि कल्पना (युक्त्या) युज्यते । कुतः ? इत्याह– स्वसंवेदनसिद्धत्वात्– स्वसंविदितज्ञानपरिच्छिन्नत्वात्, अध्यक्षप्रमितस्यापि भ्रान्तत्वे, सर्वभ्रान्तिप्रसङ्गतः– घटादीनामप्यसत्त्वापत्त्या प्रमाण-प्रमेयादिविभागोच्छेदप्रसङ्गात् ॥ ११३ ॥

नन्वन्वयग्राहिणो विकल्पस्य भ्रान्तत्वेऽपि स्वलक्षणनिर्विकल्पस्याध्यक्षत्वेनाभ्रान्तत्वाद् नोक्तदोषः । न च नामाद्युल्लेखपरिष्वक्तमूर्तिविकल्पोऽप्यध्यक्षः, असंनिहितनामादियोजनाकरम्बितत्वात्, प्रत्यक्षस्य च संनिहितमात्रविषयत्वात् । एतेन

"वाग्रूपता चेद् व्युत्क्रामेदवबोधस्य शाश्वती । न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥ १ ॥"

इति वाक्संस्पृष्टस्यैव सकलार्थस्य संवेदनम्, इति शाब्दिकमतं निरस्तम्, अर्थदर्शने तद्वाक्स्मृतेस्तत्संस्पर्शः, तत्संस्पर्शे च तत्संस्पृष्टार्थग्रहणमित्यन्योन्याश्रयात्, अगृहीतसंकेतस्य च बालस्य वागसंस्पर्शेनार्थाग्रहणप्रसङ्गात्, 'किम् ?' इति वाक्सं-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्पर्शे च सामान्यग्रहेऽपि विशेषाग्रहात्। किञ्च, वैखरीं वाचं न नायनं ज्ञानमुपस्पृशति, तस्याः श्रोत्रमात्रग्राह्यत्वाभ्युपगमात्; नापि स्मृतिविषयां मध्यमाम्, तामन्तरेणापि शुद्धसंविदो भावात्। संहृताशेषवर्णादिविभागा पश्यन्ती च वागेव न भवति, बोधरूपत्वात्, वाचश्च वर्णरूपत्वात्, अतो न तद्युक्ता प्रतिपत्तिः, अपि त्वविकल्पिकैवेति।

अथाद्यमध्यक्षं वाचकस्मृत्यभावादविकल्पकमेवास्तु, न स्मृतिसहकृतेन्द्रियजम्, उत्तरं तु तत् सविकल्पकमित्यत्र को दोषः? इति चेत्। न, स्मृत्युपनीतेऽपि शब्दे परिमल इवाविषयत्वाद् नयनस्याप्रवृत्तेः। न चैवं नामविशिष्टस्याग्रहणेऽपि द्रव्यादिविशिष्टग्राहि प्रत्यक्षं सविकल्पकमस्तु, बाधकाभावादिति वाच्यम्; विशेषण-विशेष्यभावस्य वास्तवत्वे दण्ड-पुरुषयोरिव प्रतिनियतस्यैव संभवात् 'कदाचिद् दण्डस्यैव विशेषणत्वम्, कदाचिच्च पुरुषस्यैव' इति विशेषानुपपत्तेः, अर्थक्रियाजनकत्व-तत्प्रयोजकत्वापेक्षया प्रधानो-पसर्जनभावरूपस्य तस्य कल्पनाऽविषयत्वात्। तस्मादध्यक्षसंविद् निरस्तविशेषणमर्थमवगच्छति, विशेषणयोजना तु 'स्मरणादुपजायमानाऽपास्ताक्षार्थसंनिधिर्मानसी' इति प्रतिपत्तव्यम्, बहिरर्थावभासिकाभ्यो विशदसंविद्भ्यः स्वग्रहणमात्रपर्यवसितानां सुखादिसंविदामिवार्थसाक्षात्करणास्वभावायास्तस्या भिन्नत्वेन बाधकाभावात्। न च जात्यादि-विशिष्टार्थप्रतिपत्तेः सविकल्पिका मतिः, जात्यादेः स्वरूपानवभासनात्। न हि व्यक्तिद्वयाद् व्यतिरिक्तवपुर्ग्राह्याकारतां बहिर्बिभ्राणा विशददर्शने जातिराभाति। न चाम्र-बकुलादिषु 'तरुस्तरुः' इत्युल्लिखन्ती बुद्धिराभातीति नासती जातिरिति वाच्यम्, विकल्पोल्लिख्यमानतयापि बहिर्ग्राह्याकारतया जातेरनुद्भासनात् प्रतीतिरेव तत्र तुल्याकारतां बिभर्तीति। न च शब्दः प्रतीतिर्वा जातिमन्तरेण तुल्याकारतां नानुभवति, 'जातिर्जातिः' इत्यपरजातिव्यतिरेकेणापि गोत्वादिसामान्येषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तयोस्तुल्याकारतादर्शनात् । न च तेष्वप्यपरा जातिः, अनवस्थाप्रसक्तेः, घटत्वादिसामान्येषु जातित्ववज्जातित्वसहितेष्वपि तेषु तत्कल्पनानुपरमात् ।

अथ तुल्याकारापि प्रतिपत्तिर्यदि निर्निमित्ता, तदा सर्वदा भवेत्, न वा कदाचित्; व्यक्तिनिमित्तत्वे आम्रादिष्विव घटादिष्वपि तत्प्रसङ्गात्, व्यक्तिरूपताया अन्यत्रापि समानत्वादिति चेत् । न, प्रतिनियतव्यक्तिनिमित्तत्वेनानतिप्रसङ्गात्; यथा हि ताः प्रतिनियता एव कुतश्चिद् निमित्तात् प्रतिनियतजातिव्यञ्जकत्वं प्रपद्यन्ते, तथा प्रतिनियतां तुल्याकारां प्रतिपत्तिमपि तत एव जनयिष्यन्ति, इति किमपरजातिकल्पनया ? । यथा वा गुडूच्यादयो भिन्ना एकजातिमन्तरेणापि ज्वरादिशमनात्मकं कार्यं निर्वर्तयन्ति, तथाऽऽम्रादयस्तरुत्वमन्तरेणापि 'तरुस्तरुः' इति प्रतीतिं जनयिष्यन्तीति किं तरुत्वादिकल्पनया ?। ततो जात्यादेरभावाद् न तद्विशिष्टाध्यवसायिनी मतिरिति चेत् ।

अत्रोच्यते– स्पष्टधूमाध्यवसायानन्तरमस्पष्टावभासाग्न्यनुमानाकारस्येव विशददर्शनवपुषोऽर्थाकारादनन्तरमस्पष्टाकारविकल्पधियोऽननुभवादेकहेलयैव स्वलक्षणसंनिधौ जायमानाऽन्तर्बहिश्च स्थूलमेकं स्वगुणावयवात्मकं ज्ञानं घटादिकं वाऽवगाहमाना मतिर्न निर्विकल्पिका । न चानध्यक्षा, विशदस्वभावतयानुभूतेः । न च (स)विकल्पा-ऽविकल्पयोर्मनसोर्युगपद्वृत्तेः क्रमभाविनोर्लघुवृत्तेरेकत्वमध्यवस्यति जनः, इत्यविकल्पाध्यक्षगतं वैशद्यं विकल्पे स्वांशस्वार्थाध्यवसायिन्याऽध्यारोपयतीति वैशद्यावगतिरत्रेति वाच्यम्; एवं ह्यनुभूयमानमेकाध्यवसायमपलप्याननुभूयमानस्यापरनिर्विकल्पस्य परिकल्पने, बुद्धेश्चैतन्यस्याप्यपरस्य परिकल्पनया सांख्यमतमप्यनिषेध्यं स्यात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च, कोऽयं सविकल्पा-ऽविकल्पयोरैक्याध्यवसायः ?। किं तयोर्वस्तुसदभेदपरिच्छेदः, उत मिथस्तादात्म्याध्यासः ?। आद्ये, विरोधः। अन्त्ये च, निर्विकल्पकं 'सविकल्पकम्' इति, सविकल्पकं च 'निर्विकल्पकम्' इति प्रतीयेत, 'शुक्ताविदं रजतम्' इतिवत्, न तु विशदाध्यक्षस्वरूपम्। अथ प्रमुष्टनिर्विकल्पकत्वस्य विशदत्वावच्छिन्नस्य निर्विकल्पकस्यैव सविकल्पकेऽध्यारोपाद् न दोषः। एतेन 'अविकल्पकाज्ञानाद् न तदध्यारोपः, न ह्यप्रातिपन्नरजतः 'शुक्ताविदं रजतम्' इत्यध्यवस्यति, न वेश्वराध्यवसाय ईश्वराद्यध्यासवदुपपत्तिः, भ्रमविशेषाव्यवस्थितेः' इत्युक्तावपि न क्षतिः, प्रागनुभूतस्यैव विशदस्यात्राभेदाध्यासात्; इति चेत्। न, वैशद्यावलीढस्यैव तस्य प्रमीयमाणत्वेन तत्र तदारोपायोगात्। न हि तदपरं किञ्चिदनुभूयते यस्य वैशद्यं धर्मः कल्प्येत। एवमपि तत्र तत्परिकल्पने ततोऽप्यपरमनुभूयमानं विशदत्वादिधर्माधारं परिकल्पयतः कस्तव मुखं पाणिना पिधत्ते ?। अर्थसामर्थ्यप्रभवं वैशद्यं नालीकग्राहिणि सविकल्पके, किन्तु निर्विकल्पक एवेति चेत्। न, अर्थसामर्थ्यप्रभवेऽपि दूरस्थितपादपादिज्ञाने वैशद्यादेरभावात्, अनीदृशेऽपि च बुद्ध्यादिज्ञाने तद्भावाद् वैशद्यादेरर्थप्रभवत्वानियमात्। अथ दूरत्वादिदोषाभावोऽपि वैशद्ये नियामकः, बुद्धज्ञाने च चिरातीतभाविनामपि विषयाणां हेतुत्वाभ्युपगमाद् न दोष इति चेत्। न, चिरातीतादिविषयाणां येन स्वभावेन तत्तदनन्तरभाविकार्योत्पादकत्वम्, तेनैवेदानींतनसुगतज्ञानोत्पादकत्वे प्राक् पश्चाद् वैतदुत्पादप्रसङ्गात्, समनन्तरप्रत्ययस्येदानीमेव हेतुत्वे चोभयहेतुस्वभावविप्रतिषेधात् तदनुत्पत्तिप्रसङ्गात्। अथान्येन स्वभावेन, तर्हि सांशं तत् प्रसज्यते, इति तद्ग्राहिणोऽपि ज्ञानस्य सांशैकवस्तुग्राहकत्वेन सवि-

१ इतः 'ध्यासात्' इत्यन्तः पूर्वपक्षः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्पकताप्रसक्तेः । दृष्टविपरीता च चिरातीतादीनां जनकत्वकल्पना, अन्यथाऽव्यापारेऽपि धनप्राप्तेर्विश्वमदरिद्रं स्यात् । तस्माद् बुद्धज्ञानस्येव विकल्पस्याऽर्थाप्रभवस्यापि वैशद्यमविरुद्धम् । अथ विकल्पस्य स्वभावत एव वैशद्यविरोधः, तदुक्तम्—

"न विकल्पानुबन्धस्य स्पष्टार्थप्रतिभासिता । स्वप्नेऽपि स्मर्यते स्मार्त्तं न च तत्तादृगर्थदृग् ॥ १ ॥"

इति चेत् । न, स्वप्नदशायामपि स्मरणविलक्षणस्य पुरोवृत्तिहस्त्याद्यवभासिनो बोधस्य निर्विकल्पकत्वे, अनुमानस्यापि सांशवस्तुग्राहिणस्तथात्वप्रसङ्गे विकल्पवार्ताया एव व्युपरमप्रसङ्गात् । अथ संहृतसकलविकल्पावस्थायां पुरोवर्तिवस्तुनिर्भासि कल्पनाव्युपरमतो विशदमक्षप्रभवमविकल्पकमेवानुभूयते; तदुक्तम्— "प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति" इत्यादि । तथा,

"संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना । स्थितोऽपि चक्षुषा रूपं वीक्षते साऽक्षजा मतिः ॥ १ ॥"

इति । अतो विकल्पे कदाचित् समनन्तरपृष्ठभाविनि तद्वैशद्यमेवाध्यारोप्यत इति चेत् । मैवम्, तस्यामप्यवस्थायां स्थिरस्थूरस्वभावशब्दसंसर्गयोग्यपुरोऽवस्थितगवादिप्रतिभासस्यानुभूतेः सविकल्पकज्ञानानुभवस्यापह्नोतुमशक्यत्वात् । न हि शब्दसंसर्गप्रतिभास एव सविकल्पत्वम्, तद्योग्यावभासस्यापि कल्पनात्वाभ्युपगमात्, अन्यथाऽव्युत्पन्नसंकेतस्य ज्ञानं शब्दसंसर्गविरहात् कल्पनावद् न स्यात् । अवश्यं च शब्दयोजनामन्तरेणाप्यर्थनिर्णयात्मकमध्यक्षमुपगन्तव्यम्, अन्यथा विकल्पाध्यक्षेण लिङ्गस्याऽप्यनिर्णयात्, अनुमानात् तन्निर्णयेऽनवस्थानात्, अनुमानस्याऽप्युच्छेदप्रसङ्गात् । किञ्च, एवं तस्य प्रामा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ण्यमेवानुपपन्नं स्यात्; यत्रैव हि पाश्चात्यं विधि-निषेधविकल्पद्वयं तज्जनयति तत्रैव तस्य प्रामाण्यम्, विकल्पश्च शब्दसंयोजितार्थग्रहणम्, तत्संयोजना च शब्दस्मरणाधीना, तच्च संबन्धितावच्छेदकप्रकारकसंबन्धिग्रहरूपार्थधीजन्यमिति, न चेदेवम्, गवानुभवाद् गोशब्दसंयोजनावत् क्षणिकत्वानुभवात् क्षणिकत्वशब्दसंयोजनापि स्यात्। एतेन 'अश्वं विकल्पयतो गोदर्शनेऽपि तदा गोशब्दसंयोजनाभावाद् युगपद्विकल्पद्वयानुपपत्तेश्च निर्विकल्पकमेव गोदर्शनम्' इति निरस्तम्, गोशब्दसंयोजनामन्तरेणापि तद्दर्शनस्य निर्णयात्मकत्वात्, अन्यथा तत्स्मरणानुपपत्तेः, समानप्रकारकानुभवस्यैव समानप्रकारकस्मरणहेतुत्वात्, तत्संशयापत्तेश्च तत्प्रकारकनिश्चयस्यैव तत्प्रकारकसंशयविरोधित्वात्; अन्यथा क्षणिकत्वादावपि स्मरणासंशयप्रसङ्गात्।

अथ क्षणिकत्वादेर्निर्विकल्पकैकवेद्यत्वात् तद्गृहीतकल्पत्वाद् न दोषः, तदाह धर्मकीर्तिः– "पश्यन्नपि न पश्यतीत्युच्यते" इति न दोष इति चेत्। न, तच्चित्तांशेऽपि तथात्वप्रसङ्गात्। तत्र विकल्पोत्पत्तेर्न दोष इति चेत्। न, स्मरणरूपतदनुत्पत्तेरनुत्तरत्वात्। तव विस्तीर्णप्रघट्टकानुभवे सकलवर्णपदाद्यस्मरणवदुपपत्तिरिति चेत्। न, मम विस्तीर्णप्रघट्टकस्थले वर्णादीनां तज्ज्ञानानां च व्यक्तिभेदाद् दृढसंस्कारस्यैव निश्चयस्य स्मृतिजनकत्वेन नियमसंभवात्; तव तु निरंशानुभवस्यांशे विकल्पजनना-ऽजननस्वभावभेदस्य, शक्तिभेदस्य, पाटवा-ऽपाटवादेर्वा न संभव इत्युक्तत्वात्; 'एकस्यापि सहकारिसाचिव्येन तद्विकल्पस्यैव जनकत्वं, नान्यविकल्पस्य' इत्यभ्युपगमे स्थिरस्यापि सहकारिसाचिव्या-ऽसाचिव्याभ्यां कार्यजनकत्वा-ऽजनकत्वाभ्युपगमप्रसङ्गात्; कुम्भकारादिसहकृतस्य मृदादेर्घटाद्यन्वय-व्यतिरेकदर्शनवदभ्यासादिसहकृतस्य निर्विकल्पस्य कदापि विकल्पान्वय-व्यतिरेकाग्रहणेनाभ्यासादिसहकृतस्याविकल्पस्य विकल्पजनकत्वकल्पनाया अन्याय्यत्वाच्च।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ तत्फलसाधर्म्यात्, अक्षणिकत्वादिसमारोपाद् वा क्षणिकत्वाद्यनुभवेऽपि न विकल्पः, अनिश्चयरूपस्याध्यक्षस्य समारोपाप्रतिपन्थित्वात्, तदुक्तम्—

"एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् । कोऽन्यो न दृष्टो भागः स्याद् यः प्रमाणैः परीक्ष्यते ॥ १ ॥
नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम् । शुक्तौ वा रजताकारो रूप्यसाधर्म्यदर्शनात् ॥ २ ॥"

इति चेत् । न, क्षणिकत्वादाविव सचेतनत्वादावप्यनिश्चयप्रसङ्गात्, वस्तुतो निरंशत्वात्, अनिश्चितस्यानुभवे मानाभावाच्च । नान्तरीयकत्वादेकानुभवोऽन्यानुभवे मानमिति चेत् । न, चन्द्रग्रहणेऽपि तदेकत्वाग्रहणतस्तैमिरिकदर्शनेन व्यभिचारात्, द्वित्वे तस्य भ्रान्तत्वेऽपि चन्द्रेऽभ्रान्तत्वात्, प्रमाणेतरव्यवस्थाया व्यवहारिजनापेक्षत्वात् "प्रामाण्यं व्यवहारेण शास्त्रं मोहनिवर्तनम्" इति त्वयैवाभिहितत्वात्, अन्यथैकचन्द्रदर्शनस्यापि चन्द्ररूपे प्रमाणता, क्षणिकत्वे चाप्रमाणता, इति रूपद्वयस्याभ्युपगमविरोधात् ।

यस्य तु मतम्— 'दृश्य-प्राप्ययोरेकत्वेऽविसंवादाभिमानिनः प्रत्यक्षं प्रमाणम्, इतरस्य तयोर्विवेके सत्यनुभूतेऽपि न प्रमाणम्;' तस्य चन्द्रप्राप्त्यभिमानिनः किमिति चन्द्रमात्रे तद् न प्रमाणम् ? । अथ दोषजन्ये द्विचन्द्रादिज्ञाने चन्द्रस्यापि न परमार्थसतो भानम्, किन्तु प्रातिभासिकसत्तावलीढस्यारोपितस्यैव, इति न तद्ग्रहात्तदेकत्वग्रहः, अध्यक्षस्यांशे प्रामाण्या-

१ ज.'थात' । २ इतः 'प्रवृत्तिः' इतिपर्यन्तः पूर्वपक्षः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽप्रामाण्यद्वैरूप्यमपि व्यावहारिकमेव, परमार्थतस्तु तत्र सद्विषयत्वरूपं प्रामाण्यमेव, अभ्यासदशायां दृश्य-प्राप्ययोरेकत्वाध्यवसायात्, 'प्रत्यक्षमेव प्रमाणम्' इत्यपि व्यवहारादेव प्रज्ञाकरस्याभिमतम्, मण्यादिप्राप्यसंसर्गिदृश्यमणिप्रभात्रवच्छेदेनोपप्लुतमहिम्ना मण्याद्यारोपाददूरदेशप्रवृत्तिदर्शनात् तथाव्यवहारप्रवृत्तिरिति चेत्। न, चन्द्रे द्वित्वस्येव चन्द्रस्य मिथ्यात्वेनाननुभवात्, तस्य परमार्थतोऽसत्त्वे मानाभावात्, अध्यक्षेऽपारमार्थिकद्वैरूप्यस्य संबन्धाभावात्, तद्व्यवहारायोगात्; अन्यथाऽतिप्रसङ्गात्, आरोपिताध्यक्षे, आरोपिततद्वैरूप्यस्य विकल्पेन विषयीकरणे च पारमार्थिकस्य तस्याप्रवर्तकत्वात्, विकल्पस्यैव प्रवर्तकस्य परमार्थतः प्रामाण्यौचित्यात्।

'अर्थाप्रभवत्वेनार्थाग्राहित्वाद् न विकल्पस्य प्रामाण्यम्' इत्यपि परिभाषामात्रम्, अर्थप्रभवत्वाज्ज्ञानस्यार्थग्राहकत्व इन्द्रियादिप्रभवत्वादिन्द्रियादेरपि ग्राहकतापत्तेः, योग्यतातः प्रतिनियमे च किमनिमित्तमर्थस्य ज्ञानहेतुत्वकल्पना?। ज्ञाने स्वाकाराधायत्वादर्थो हेतुरिति चेत्। न, अर्थेन सर्वात्मना तत्र स्वाकाराधाने ज्ञानस्य जडताप्रसक्तेः, उत्तरार्थक्षणवत्; एकदेशेन तदाधायकत्वे सांशताप्रसक्तेः। 'समनन्तरप्रत्ययस्य तत्र स्वाकाराधायकत्वाद् न जडत्वम्' इत्युक्तावपि समनन्तरप्रत्यया-ऽर्थक्षणयोर्द्वयोरपि तत्र स्वाकारार्पकत्वे तज्ज्ञानस्य चेतना-ऽचेतनरूपद्वयापत्तेः। किञ्च, तदाकारं तत उत्पन्नं तदुत्पत्ति-सारूप्ययोर्व्यभिचारित्वादर्थेऽपि न प्रमाणं स्यात्।

अथ यदाकारं यदुत्पन्नं यदध्यवस्यति तत्र तत्प्रमाणम्। नन्वत्र यदाकारं यदुत्पन्नं विज्ञानमेवाऽर्थाध्यवसायं जन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतीत्यर्थः, उत तमेवेति, आहोस्विज्जनयत्येवेति ?। आद्ये, विकल्पवासनापि तत्कारणं न भवेत् । एवं च निर्विकल्पकबोधाद् यथा सामान्यावभासी विकल्पः, तथाऽर्थादेव तथाभूताद् भविष्यति, इति किमन्तरालवर्तिनिर्विकल्पककल्पनया ?। न चाविकल्पताविशेषेऽपि दर्शनादेव विकल्पोत्पत्तिः, नार्थात्, वस्तुस्वाभाव्यादित्युत्तरम्, तस्य स्वरूपेणैवासिद्धेः, 'स्तम्भः स्तम्भोऽयम्' इतिवत् स्थिरैकस्तम्भावगाहिज्ञानस्य सामान्यविषयत्वात्, ऊर्ध्वतासामान्यापलापे तिर्यक्सामान्यस्याप्यपलापाज्जगतः प्रतिभासवैकल्यप्रसङ्गात्, निरंशक्षणिकानेकपरमाण्वाकारस्य तस्य सांशत्वेनाभ्युपगन्तुमशक्यत्वात्, प्रतिविविक्तपरमाणु तद्भेदस्य दुःश्रद्धानत्वात् । किञ्च, यथाऽविकल्पादर्थादविकल्पदर्शनप्रभवः, तथा दर्शनादपि तथाभूताद् विकल्पस्यैव प्रभव इति विकल्पकथाऽप्युच्छिन्ना । द्वितीये, धारावाहिकनिर्विकल्पकसंततिर्न स्यात् । तृतीयेऽपि, अत्यन्तायोगव्यवच्छेदः स्वभावभेदं विना दुर्घट इति न किञ्चिदेतत् । तस्मात् तदुत्पत्ति-सारूप्यार्थग्रहणमन्तरेणाप्यध्यवसायस्य प्रामाण्यं युक्तम्, अनाद्यसत्यविकल्पवासनात एव तदुत्पत्त्यभ्युपगमे दर्शनस्याप्यहेतुत्वात् "यत्रैव जनयेदेनां" इत्याद्यभ्युपगमव्याघातात् ।

न च वासनाप्रबोधविधायकत्वेन तस्यापि हेतुत्वम्, इन्द्रियार्थसंनिधानस्यैव तत्प्रबोधहेतुत्वात्, 'तद्धेतोः०' इति न्यायात् । न च वासनाप्रभवत्वेनाऽक्षजस्यैवं भ्रान्तता स्यात्, अर्थप्रभवत्वेनानुमानवत् प्रमाणत्वात् सामान्यादिविषयत्वस्य तुल्यत्वात् । न च स्वग्राह्यस्यावस्तुत्वेऽप्यध्यवसायस्य स्वलक्षणत्वाद् दृश्य-विकल्प्यावर्थावेकीकृत्य प्रवृत्तेरनुमानप्रामाण्यम्, प्रकृतविकल्पेऽपि समानत्वात् । न च गृहीतग्राहित्वाद् विकल्पो न प्रमाणम्, क्षणक्षयानुमानस्याप्यप्रामाण्यप्रसक्तेः । अनिर्णी-

१ तमेव– अर्थाध्यवसायमेव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तमनुमेयं निश्चिन्वत् प्रमाणं यद्यनुमानम्, तर्ह्यनिश्चितं नीलं निश्चिन्वन् विकल्पोऽपि किं न तादृशः ?। अथ समारोपव्यवच्छेदकरणादनुमानं प्रमाणम्, तर्हि विकल्पोऽपि तत एव किं न तथा, शुक्तिका-रज्ज्वादिषु रजत-सर्पादिसमारोपाणां तथाभूतविकल्पाद् निवृत्तिदर्शनात् ?। अथ विकल्पस्य प्रामाण्येऽपि नानुमानबहिर्भावः, अनभ्यासदशायां ह्यनुमानं प्रमाणम्, अभ्यासदशायां तु दर्शनमेव, न च तृतीया दशास्ति, यस्यां विकल्पः स्वातन्त्र्येण प्रमाणभावमनुभवेदिति चेत्। न, विकल्पं विना त्रैरूप्यानिश्चयेनानुमानस्यैव न प्रवृत्तिरित्युक्तत्वात्। न च तदपेक्षं दर्शनमेव प्रमाणम्, स्वत एव तस्याप्रमाणत्वात्, विकल्पस्यापि विकल्पान्तरापेक्षया प्रमाणत्वेऽनवस्थाया दुष्परिहरत्वादिति वाच्यम्, सम्यग्विकल्पस्य स्वत एव प्रमाणत्वात्, दर्शनस्यागृहीतभाव्यर्थप्रवर्तकत्वेऽतिप्रसङ्गात्, अन्यथा 'शाब्दमपि सामान्यमात्राविषयं विशेषे प्रवृत्तिं विधास्यति' इति मीमांसकमतमनिषेध्यं स्यात्।

यत्तु 'स्मृत्युपनीतेऽपि नामादाविन्द्रियाप्रवृत्तेर्न नामादिविशिष्टार्थग्राहिण्यक्षजा मतिः' इत्युक्तम्। तत्प्रलापमात्रम्, अर्थात्मकस्य नामवाच्यतादिधर्मस्य विशिष्टक्षयोपशमसव्यपेक्षयाऽक्षधिया प्रतिपत्त्यभ्युपगमात्। तद्वाच्यताप्रतिपत्तिर्मतिः, श्रुतं वा, इत्यन्यदेतत्।

न च 'विशेषणविशेष्यभावस्यानवस्थानाद् न वस्तुनो विशिष्टप्रतीतिः' इत्यप्युक्तं युक्तम्, अनेकधर्मकलापाक्रान्तस्य वस्तुनो विशिष्टसामग्रीप्रभवप्रतिपत्त्या प्रतिनियतधर्मविशिष्टतया ग्रहणात्। न चार्वाग्दर्शनेऽशेषधर्माध्यासितवस्तुस्वरूप-

---

१ पक्षसत्त्व सपक्षसत्त्व-विपक्षासत्त्वरूपम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिभासः, कस्यचित् कथंचित् कयाचित्प्रतिपत्त्या यथाक्षयोपशमं ग्रहणात् । एतेनातीतविशेषणादिग्रहणेऽतिप्रसङ्गः परास्तः; अन्यथैकस्तम्भपरिणत्यापन्नैकपरमाणुग्रहणप्रवृत्ताक्षस्यापरपरमाणुग्रहणेऽपि सकलपदार्थग्रहणप्रसङ्गस्य दुष्परिहरत्वात् ।

यदपि 'मानस्येव विकल्पमतिः' इत्यभिहितम् । तदप्यसत्, स्तम्भादिप्रतिभासस्य मानसत्वे विकल्पान्तरतो निवृत्तिप्रसङ्गात् । न चैवमस्ति, क्षणक्षयित्वमनुमानाद् निश्चिन्वतोऽश्वादिकं वा विकल्पयतस्तदैवास्य प्रतिभासस्य संवेदनात् । यदपि 'जात्यादेः स्वरूपानवभासनात् तद्विशिष्टार्थधीरयुक्ता' इति गदितम् । तदपि निर्युक्तिकम्, स्वसंवेदनवत् सदृशपरिणामस्य प्रमीयमाणत्वेन सत्यत्वात्, एकान्तभेदाभेदपक्षस्यानिष्टेः, 'त एव विशेषाः कथञ्चित् परस्परं समानपरिणतिभाजः' इत्यस्मदभ्युपगमे दोषाभावात्, चित्रैकविज्ञानवत् समाना-ऽसमानपरिणत्योरेकत्वाविरोधाद् । तस्मात् 'सविकल्पकमेव प्रमाणम्' इति व्यवस्थितम् । ततः कथं न बोधान्वयोऽर्थान्वयो वा ? इति परिभावनीयं रहसि । मा स्तु वा त्वन्नये सर्वसविकल्पकप्रामाण्यम्, तथापि नश्वरत्वादिग्राहिणो विकल्पस्य त्वया प्रामाण्यमवश्यमभ्युपेयम् । तस्य च व्याप्त्यादिपर्यालोचनप्रवणस्यान्वयित्वमपि स्वसंवेदनासिद्धम् । तदंशे तत्र भ्रान्तत्वे, क्षणिकत्वांशेऽपि तथात्वप्रसङ्गात्, एकस्य भ्रान्ता-ऽभ्रान्तोभयरूपत्वाभावात्, भ्रान्तिबीजसाम्याच्चेत्यभ्युच्चयमाह—

प्रदीर्घाध्यवसायेन नश्वरादिविनिश्चयः । अस्य च भ्रान्ततायां यत्तत्तथेति न युक्तिमत् ।११४।

प्रदीर्घाध्यवसायेन– अन्वयिव्याप्त्यादिपर्यालोचनप्रवाहरूपतयाऽनुभूयमानेन लिङ्गादिविकल्पेन, नश्वरादिविनिश्चयः–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावप्रधाननिर्देशाद् नश्वरत्वादिपरिच्छेदः, अभ्युपेयः । अस्य च प्रकृतप्रदीर्घाध्यवसायस्य, भ्रान्ततायामुच्यमानायाम्, यत्- यस्मात्, तत्- अधिकृतं वस्तु; तथा- नश्वरम्, इति- एतत्, न युक्तिमत्- न संभवदुक्तिकम् ॥ ११४ ॥

तस्मादवश्यमेष्टव्या विकल्पस्यापि कस्यचित् । येन तेन प्रकारेण सर्वथाऽभ्रान्तरूपता ११५

तस्माद् विकल्पस्यापि कस्यचित्- नश्वरत्वादिग्राहिणः, येन तेन स्वपरिभाषानुसारिणा प्रकारेण, सर्वथा- सर्वविषयावच्छेदेन, अभ्रान्तरूपता- परमार्थविषयता, अवश्यमेष्टव्या- अकामेनाप्यङ्गीकर्तव्या, तथा च स्वसाक्षिका स्वान्वयिता सिद्धैवेत्यभिप्रायः ॥ ११५ ॥

इदमेवाह--

सत्यामस्यां स्थितोऽस्माकमुक्तवन्न्याययोगतः । बोधान्वयो दलोत्पत्त्यभावाच्चातिप्रसङ्गतः ॥

सत्यामस्याम्- कस्यचिद् विकल्पस्याभ्रान्ततायाम्, स्थितः- सिद्धः, अस्माकमुक्तवत्- प्रागुक्तरीत्या, न्याययोगतः- युक्तन्यायात्, बोधान्वयः- ज्ञानाविच्छेदः स्वद्रव्यात्मा । युक्त्यन्तरमाह- दलोत्पत्त्यभावाच्च- अतथाभाविहेतुकस्योत्पत्त्ययोगाच्च, अन्यथा, अतिप्रसङ्गतः- तद्वत् तदन्यभावापत्तेः ।

न चास्माद् विकल्पादनित्यत्वसिद्धिरित्युपचयमाह--

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यादृशपदार्थेभ्यः स्वयमन्यादृशोऽप्ययम् । यतश्चेष्टस्ततो नास्मात् तत्रासंदिग्धनिश्चयः

अन्यादृशपदार्थेभ्यः– अनित्यादिरूपेभ्य आलम्बनभूतेभ्यः, स्वयम्– आत्मना, अयं– विकल्पः, अन्यादृशोऽपि– नित्यत्वादिग्रहरूपोऽपि, यतश्चेष्टः– अङ्गीकृतः; ततो नास्मात्– अधिकृतविकल्पात् अप्रत्यायितात्, तत्र– अनित्यत्वादौ, असंदिग्धनिश्चयः, अप्रामाण्यज्ञानास्कन्दितत्वात् ।

अथालीकविषयत्वरूपाप्रामाण्यज्ञानेऽपि तत्र दृश्य-विकल्प्ययोरर्थयोरेकीकरणात् तदभाववति तदवगाहित्वरूपाप्रामाण्यज्ञानाभावाद् न दोष इति चेत् । न, रजतत्वारोपस्यासत्यरजतधीस्थलेऽपि सत्त्वात् सत्यरजतधीस्थले तत्तुल्यताज्ञानेनार्थसंशयात् । एकत्रारजते रजतत्वारोपः, अन्यत्र तु रजते, इति न तत्तौल्यमिति चेत् । न, 'रजते रजतत्वारोपः' इतिवदत एव व्याघातात्, विकल्पस्य विशेषणमात्रविषयत्वे स्वलक्षणासंस्पर्शाभ्युपगमाच्च । एकत्र स्वजनकाजनकरजतग्रहाभेदग्रहात् सत्यासत्यरजतधीविशेष इति चेत् । न, बाधेऽपि प्रवृत्त्यौपयिकरूपाव्याघाताद् गृहीतरजतग्रहाभेदग्रहत्वेनैव रजतार्थिप्रवृत्तिहेतुत्वात् ।

अथागृहीतरजतग्रहभेदं दर्शनमेव रजतार्थिप्रवृत्तिहेतुः, स्वतो निश्चितप्रामाण्यकत्वात्, असत्यरजतधीस्थले च शुक्तिदर्शने रजतग्रहभेदग्रहाद् न प्रवृत्तिः, केवलनिर्विकल्पकादप्रवृत्तेश्च रजतविकल्पसाहित्यं कारणतावच्छेदकमिति न दोष इति चेत् । न, दृश्यविषयस्य दर्शनस्य प्राप्यविषयप्रवृत्त्यहेतुत्वात्, विकल्पा-ऽविकल्पयोर्भिन्नकालत्वेनासाहित्याच्च । अथ दर्शन-प्रवृत्त्योरेकसंततिगामित्वेन सामान्यत एव हेतु-हेतुमद्भावः, समानविषयतया तु रजतत्वविकल्पस्यैव रजतार्थिप्रवृत्तिहेतुता, अली- ॥१६१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कविषयत्वेन तस्य स्वभावत एवासंनिहितप्राप्यविषयत्वात्; इदमेव हि दृश्य-प्राप्ययोरेकीकरणं यद् दृश्यविषयतयाध्यस्यमानस्य प्राप्यविषयत्वं, विशेषणमात्रविषयत्ववचनं च विकल्पस्य संनिहितविशेष्यानवगाहित्वाभिप्रायात्, शुक्तौ रजतधीस्थले बाधावतारे च रजतविशेष्यकरजतत्वप्रकारकत्वाभावरूपाप्रामाण्यग्रहादिति न दोष इति चेत्। न, एवं सति विकल्पस्य विशिष्टविषयत्वावश्यकत्वेऽलीकतदाकारायोगात्, सतोऽसदसंस्पर्शित्वात्, अन्यथा निर्विकल्पकेऽप्यनाश्वासात्, निर्विकल्पकप्रामाण्यस्य सविकल्पैकग्राह्यत्वेन तदप्रामाण्ये तदप्रामाण्यादिति न किञ्चिदेतदिति दिग्। एवं तत्तज्जननभावत्वग्रहो न क्षणिकपक्षे, बोधान्वय एव तद्ग्रहसंभवात्, अतो न तत्र तज्जननभावत्वसिद्धिरिति मघट्टकार्थः ॥ ११७ ॥

अथ तत्तज्जननभावत्वशब्दार्थपर्यालोचनयाऽप्यन्वयसिद्धिरित्याह—

तत्तज्जननभावत्वे ध्रुवं तद्भावसङ्गतिः। तस्यैव भावो नान्यो यज्जन्याच्च जननं तथा॥

तत्तज्जननभावत्वे– तस्य कारणस्य मृदादेस्तज्जननभावत्वे घटादिकार्यजननस्वभावत्व उच्यमाने, ध्रुवं– निश्चितम्, तद्भावसङ्गतिः– कारणभावपरिणतिः, कार्ये उक्ता भवति। कुतः? इत्याह– यद्– यस्मात्, तस्यैव– जननस्यैव, भावो नान्यः– न जननादर्थान्तरभूतः, असंबन्धप्रसङ्गात्; जन्याच्च जननं तथा– न भिन्नमित्यर्थः।

अयं भावः– 'मृद् घटजननस्वभावा' इत्यत्र घटस्य जनने निरूपितत्वाख्यस्वरूपसंबन्धेन, तस्य च स्वभावे तादात्म्याख्यस्वरूपसंबन्धेन, तस्य च मृदि तेनान्वयाद् घटाभिन्नजननाभिन्नस्वभावाभिन्नत्वेन मृदि घटाभिन्नत्वं स्फुटमेव प्रतीयते;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घटादतिरिक्ते जनने निरूपितत्वसंबन्धकल्पने तत्रापि संबन्धान्तरकल्पनेऽनवस्थानात्, अभेदे च चित्रप्रतीतेर्भेदानुवेधेन समाधानात्, तथोल्लेखेन प्रतीतेस्तथाक्षयोपशमाधीनत्वात्। न चैवं 'मृद् घटीभूता' इतिवद् 'दण्डोऽपि घटीभूतः' इति व्यवहारः स्यात्, तज्जननस्वभावत्वघटकाभेदाविशेषादिति वाच्यम्; तस्य तज्जननस्वभावत्वव्यवहारनियामकत्वेऽप्युपादानत्वघटकाभेदस्यैवं व्यर्थत्वादिति दिग्॥ ११८॥

तत् तज्जन्यस्वभावमित्यत्राप्येवमेवान्वयबोध इत्यातिदेशमाह—

एवं तज्जन्यभावत्वेऽप्येषा भाव्या विचक्षणैः। तदेव हि यतो भावः स चेतरसमाश्रयः ११९॥

एवम्– उक्तन्यायेन, तज्जन्यभावत्वेऽपि– मृदादिकारणजन्यस्वभावत्वेऽपि घटादिकार्यस्योच्यमाने, एषा– तद्भावसंगतिः, भाव्या– पर्यालोचनीया, विचक्षणैः– न्यायज्ञैः। कुतः? इत्याह– यतः– यस्माद्, हि– निश्चितम्, तदेव–जन्यत्वमेव, भावः– घटादेः स्वसत्तालक्षणः, स चेतरसमाश्रयः– मृदादिकारणस्वरूप इति। एवं च घटेऽभेदेन मृदन्वितजन्यत्वान्वितस्वभावान्वयाद् घटान्वय इति तात्पर्यार्थः॥ ११९॥

उपसंहरति—

इत्येवमन्वयापत्तिः शब्दार्थादेव जायते। अन्यथाकल्पनं चास्य सर्वथा न्यायबाधितम् १२०

१ ज॰'व व्यर्थ'। 'व तदर्थं' इति तु योग्यं प्रतिभाति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्येवम्– उक्तप्रकारेण, शब्दार्थादेव– उक्तवाक्यतात्पर्यपर्यालोचनादेव, अन्वयापत्तिः– अन्वयधीः, जायते। अनिरूपितत्वादेरभेदस्य वस्तुतः संसर्गत्वेऽपि सार्वज्ञ्यापत्त्या सांसर्गिकज्ञानस्यानुपनायकत्वात् कथमन्वयापत्तिः? इति चेत्। 'घटो नास्ति' इत्यादौ घटत्वावच्छिन्नप्रतियोगिकत्वादेरिवाक्षेपलभ्यत्वात् 'मृद् घटजननस्वभावा' इत्यादिवाक्याद् मृदि घटान्वयबोधदर्शनात्। अन्यथाकल्पनं चास्य– शब्दार्थस्य 'तत् तज्जननभावम्' इत्यादेः 'तदनन्तरं तद्भावः' इत्यादिरेवार्थः, तत्परिणामित्वबोधस्तु नौत्तरकालिकोऽपि, इत्यादिकल्पनं च; सर्वथा– सर्वप्रकारेण, न्यायबाधितम्– अनुभवविरुद्धम्, तदानन्तर्यस्याऽप्येकान्तभेदे वक्तुमशक्यत्वाद् युक्तिविरुद्धं च ॥ १२० ॥

किञ्च,

तद्रूपशक्तिशून्यं तत्कार्यं कार्यान्तरं यथा। व्यापारोऽपि न तस्यापि नापेक्षासत्त्वतः क्वचित्॥

तद्रूपशक्तिशून्यं– मृदादिकारणरूपशक्तिशून्यम्, तत्– अधिकृतं घटादि कार्यम्, कार्यान्तरं– पटादि यथा तथा विलक्षणं न स्यात्, मृदाद्यन्वयाभावेन तदानन्तर्यमात्रस्य पटादिसाधारण्येनानियामकत्वात्। तथा, व्यापारोऽपि न तस्यापि– कारणस्यापि कार्ये कश्चिद् नियामकः, क्षणिकत्वेन निर्व्यापारत्वात् सर्वधर्माणाम्। तथा, स्वतोऽसत्त्वात् तुच्छत्वात् कार्यस्य स्वसत्त्वप्रतिपत्तिं प्रति नापेक्षाऽपि, क्वचित्– कारणे 'क्वचिदेवासति कारणेन सत्त्वाधानम्, नान्यत्र' इत्यत्र बीजाभावात्, अविशिष्टसत्त्वस्य विशिष्टता तु दृष्टत्वात् कारणाधेया नानुपपन्नेति भावः ॥ १२१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमप्यनन्वयाभ्युपगमो न युक्त इत्याह—

तथापि तु तयोरेव तत्स्वभावत्वकल्पनम् । अन्यत्रापि समानत्वात्केवलं स्वान्ध्यसूचकम् ॥

तथापि तु– कार्यस्य तद्रूपशक्त्यादिवैकल्येनातिप्रसङ्गेऽपि स्वदर्शनानुरागेण, तयोरेव– अधिकृतहेतु-फलयोः, तत्स्वभावत्वकल्पनं– तत्तज्जननस्वभावत्वसमर्थनम्, अन्यत्रापि– अनभिप्रेतहेतुफलभावेऽपि, समानत्वात्– वाङ्मात्रेण सुवचत्वात्, केवलं स्वान्ध्यसूचकं– वक्तुरज्ञानव्यञ्जकम् ॥ १२२ ॥

क्षणिकत्वे परेषामागमविरोधमप्याह—

किंचान्यत्क्षणिकत्वे व आर्षार्थोऽपि विरुध्यते । विरोधापादनं चास्य नाल्पस्य तमसः फलम् ॥

किञ्च, अन्यद्– दूषणान्तरम्, यत् क्षणिकत्वेऽभ्युपगम्यमाने, वः– युष्माकम्, आर्षार्थोऽपि– आगमार्थोऽपि, विरुध्यते– असंगतो भवति । अस्य च– आर्षार्थस्य, विरोधापादनं, नाल्पस्य तमसः– अज्ञानस्य, फलम्, किन्तु महत एव, तदप्रामाण्यापत्तौ तन्मूलकामुष्मिकप्रवृत्तिमात्रविच्छेदादिति भावः ॥ १२३ ॥

किं तदार्षं, यस्य विरोधः क्षणिकत्व आपद्यते ? इति जिज्ञासायामाह—

'इत एकनवते कल्पे शक्त्या मे पुरुषो हतः । तेन कर्मविपाकेन पादे विद्धोऽस्मि भिक्षवः !॥१२४॥ ॥१६३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतः– अस्माद् वर्तमानात् कालात्, अतीते काले, मे– मया, शक्त्या– स्वव्यापारेण, पुरुषो हतः– व्यापादितः। तेन कर्मविपाकेन– पुरुषव्यापादनजनितकर्मभोगकालाभिमुख्येन 'रागेण वेदनावान्' इत्यादौ पुरुषान्वितवेदनायां रोगजन्यत्वान्वयवद् विपाकान्विते कर्मणि तज्जन्यत्वान्वयात्, भिक्षवः! अहं पादे विद्धोऽस्मि कण्टकेन। तेन 'सर्वज्ञत्वात् पश्यतोऽपि कण्टकं, कथं पादे कण्टकवेधः? इत्याशङ्का निवर्ततां भवताम्, नियमवेदनीयत्वात् प्रागर्जितकर्मणः, न ह्येतद् ममापि फलमदत्त्वा निवर्तते, इति मा कार्षीत् कोऽपीदृशं कर्म' इति शिष्यान् बोधयितुं बुद्धस्यैवमुक्तिः॥ १२४॥

अत्र च यथा विरोध आपद्यते तथाह—

मे मयेत्यात्मनिर्देशस्तद्गतोक्ता वधक्रिया। स्वयमाप्तेन यत्तद्वः कोऽयं क्षणिकताग्रहः?॥१२५॥

अत्र 'मे मया' इत्यात्मनिर्देशः, अस्मच्छब्दस्य स्वतन्त्रोच्चारयितरि शक्तत्वात्। षष्ठ्यन्तास्मच्छब्दस्य 'मे' इति रूपभ्रमवारणाय 'मया' इति विवरणम्। तद्गता– आत्मगता, वधक्रिया स्वयमाप्तेनोक्ता, यद्– यस्मात्, तृतीयाया आधेयत्वार्थत्वात्, हन्तेः प्राणवियोगानुकूलव्यापारार्थत्वात्, क्तप्रत्ययस्य च तज्जन्यफलशालित्वरूपकर्मत्वार्थत्वात्; तत्– तस्मात् कारणात्, कोऽयम्– अप्रामाणिकः, वः– युष्माकं, क्षणिकताऽऽग्रहः?, बुद्धेन कर्तृ-भोक्त्रोरभेदे प्रतिपादिते तदवगणनेन तद्भेदाभ्युपगमानौचित्यादिति भावः॥ १२५॥

अत्रैवाक्षेप-परिहारावाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संतानापेक्षयैतच्चेदुक्तं भगवता ननु । स हेतुफलभावो यत्तद् 'मे' इति न संगतम् ॥१२६॥

एतत्– 'इत एकनवते'[1] इत्यादि, चेद् भगवता संतानापेक्षयोक्तम्, 'ननु' इत्याक्षेपे, सः– संतानः, यद्– यस्मात्, हेतु-फलभावः, तत्– तस्मात्, 'मे' इति न संगतम्, हन्तृक्षणनिष्ठाया वधक्रियाया उच्चारयितृक्षणवृत्तित्वाभावादिति भावः ॥ १२६ ॥

अभिप्रायान्तरं निराकुरुते—

ममैव हेतुशक्त्या चेत्तस्यार्थोऽयं विवक्षितः । नात्र प्रमाणमत्यक्षा तद्विवक्षा यतो मता ॥१२७॥

तस्य– 'शक्त्या मे' इत्यस्य, 'ममैव हेतुशक्त्या' इत्ययमर्थो विवक्षितः, शक्तिपदस्य हेतुशक्त्यर्थत्वात् 'मे' इत्यस्य च 'मम' इत्यर्थात्; 'मे' इत्यस्यैव लक्षणया 'मदीयहन्तृक्षणेन' इत्यर्थाद् वेति चेत् । नात्र– ईदृशेऽर्थे, प्रमाणं किञ्चित्, यतस्तद्विवक्षा– बुद्धविवक्षा, अत्यक्षा– अतीन्द्रिया, मता; अतस्तादृशबुद्धविवक्षायां नाध्यक्षं, न वा तन्मूलमनुमानमिति भावः ॥१२७॥

तदीयक्षणिकत्वदेशनान्यथानुपपत्त्या तादृशी बुद्धविवक्षाऽनुमास्यत इत्यत्राह—

तद्देशना प्रमाणं चेन्न सान्यर्थां भविष्यति । तत्रापि किं प्रमाणं चेदिदं पूर्वोक्तमार्षकम् ॥१२८॥

१. कारिका १२४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्देशना– 'क्षणिकाः सर्वसंस्काराः' इत्याद्या बुद्धदेशना, प्रमाणं चेत् तादृशबुद्धविवक्षायाम् । न– नैवम्, यतः सा– उक्तदेशना, अन्यार्था– संसाराऽऽस्थानिवृत्त्यर्था, भविष्यति । तथाच तस्यास्तात्पर्ये प्रामाण्यम्, न तु यथाश्रुतार्थे इति भावः । तत्रापि– तद्देशनाया अन्यार्थतायामपि, किं प्रमाणम् ? इति चेत् । इदं पूर्वोक्तम्, 'इत एकनवते' इत्यादिकम्, आर्षम् । न च क्षणिकत्वदेशनान्यथानुपपत्त्या उक्तदेशनाया अन्यार्थत्वम्, एतदन्यथानुपपत्त्या वा क्षणिकत्वदेशनाया इत्यत्र विनिगमकाभावः, क्षणिकत्वपक्ष उक्तदोषोपनिपातस्य तद्देशनाया अन्यार्थत्वे विनिगमकत्वादिति भावः ।। १२८ ।।

आर्षान्तरविरोधमाह—

तथान्यदपि यत्कल्पस्थायिनी पृथिवी क्वचित् । उक्ता भगवता भिक्षूनामन्त्र्य स्वयमेव तु १२९

तथा, अन्यदपि विरुद्धम्, यत् क्वचित्– सूत्रान्तरे, भगवता– बुद्धेन, भिक्षूनामन्त्र्य स्वयमेव कल्पस्थायिनी पृथिव्युक्ता, 'कप्पट्ठाई पुहई भिक्खवो !' इति वचनात् । पृथिवीसंततेः कल्पस्थायित्वोक्तेर्न दोष इति चेत् । न, एकवचनतानुपपत्तेः । सांवृतमेकत्वमिति चेत् । कल्पस्थायित्वाद्यपि तथास्तु, इति सर्वं विलुप्येत । तस्माद् यथाश्रुतार्थ एव ज्यायान् ।। १२९ ।।

तथा,

पञ्च बाह्या द्विविज्ञेया इत्यन्यदपि चार्षकम् । प्रमाणमवगन्तव्यं प्रक्रान्तार्थप्रसाधकम् ।। १३० ।।

---

१ कारिका १२५ । २ कल्पस्थायिनी पृथिवी भिक्षवः ! । ३ काल्पनिकं भवत्वित्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'पञ्च बाह्याः– रूपादयः, द्विविज्ञेयाः– इन्द्रिय-मनोविज्ञानग्राह्याः, इत्यन्यदपि चार्षं प्रक्रान्तार्थप्रसाधकम्– अक्षणिकत्वप्रसाधकं परापेक्षया, प्रमाणमवगन्तव्यम् ॥ १३० ॥

कथमेतदेवम् ? इत्याह—

क्षणिकत्वे यतोऽमीषां न द्विविज्ञेयता भवेत् । भिन्नकालग्रहे ह्याभ्यां तच्छब्दार्थोपपत्तितः १३१

यतोऽमीषां रूपादीनाम्, क्षणिकत्वे– क्षणानन्तरं नाशशीलत्वे, द्विविज्ञेयता न भवेत्, हि– यतः, आभ्यां– इन्द्रिय-मनोभ्यां, भिन्नकालग्रहे कालभेदेन ज्ञानद्वयजनने, तच्छब्दार्थोपपत्तितः, द्विविज्ञेयत्वशब्दार्थस्य घटमानत्वात् ॥ १३१ ॥

एकदापि ताभ्यां ज्ञानद्वयजननाद् द्विविज्ञेयत्वमुपपत्स्यत इत्यत्राह—

एककालग्रहे तु स्यात्तत्रैकस्याप्रमाणता । गृहीतग्रहणादेवं मिथ्या ताथागतं वचः ॥१३२॥

एककालग्रहे तु– एकदेन्द्रिय-मनोभ्यां ज्ञानद्वयजनने तु, तत्र– तयोर्मध्ये, एकस्य– अभिमतैकस्य, गृहीतग्रहणादप्रमाणता स्यात् । एवं सति ताथागतं– बौद्धं, वचः– 'पञ्च बाह्या द्विविज्ञेयाः' इति, मिथ्या– अप्रमाणं स्यात् ॥ १३२ ॥

पराभिप्रायमाह—

इन्द्रियेण परिच्छिन्ने रूपादौ तदनन्तरम् । यद् रूपादि ततस्तत्र मनोज्ञानं प्रवर्तते ॥१३३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इन्द्रियेण– इन्द्रियज्ञानेन परिच्छिन्ने–गृहीते, रूपादौ विषये, तदनन्तरम्– इन्द्रियपरिच्छेद्यरूपाद्यनन्तरम्, यद्रूपादि–तज्ज्ञानसमानकालभावि, ततः– इन्द्रियपरिच्छेदात् समनन्तरात्, तत्र– तज्ज्ञानसमानकालभाविनि रूपादौ, मनोविज्ञानं प्रवर्तते– ग्रहणव्यापृतं भवति। तदाह न्यायवादी– "स्वविषयानन्तरविषयसहकारिणेन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं मनोविज्ञानम्" इति ॥ १३३ ॥

निगमयति—

एवं च न विरोधोऽस्ति द्विविज्ञेयत्वभावतः। पञ्चानामपि चेन्न्यायादेतदप्यसमञ्जसम् १३४

एवं च न्यायात्– उक्तयुक्तेः, पञ्चानामपि रूपादीनाम्, द्विविज्ञेयत्वभावतः– इन्द्रिय-मनोविज्ञेयत्वोपपत्तेः, न विरोधोऽस्त्युक्तवचनस्य, इति चेत्। अत्रोत्तरम्– एतदपि– उक्तम्, असमञ्जसम्– अयुक्तिमत् ॥ १३४ ॥

कुतः? इत्याह—

नैकोऽपि यद् द्विविज्ञेय एकैकेनैव वेदनात्। सामान्यापेक्षयैतच्चेन्न तत्सत्त्वप्रसङ्गतः॥१३५॥

यद्– यस्मात् कारणात्, एकोऽपि पञ्चानां मध्य एवं न द्विविज्ञेयः, एकैकेन–इन्द्रियज्ञानादिना, एतदुत्तरं 'एकैकस्य' इति शेषः, एकैकस्यैव वेदनात्, तथा च न केषुचिद् द्विविज्ञेयत्वमित्यर्थः। परः शङ्कते– सामान्यापेक्षया– रूपादिसामान्यापेक्षया,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतत्– द्विविज्ञेयत्वम्, चेत्– यदि, उपपद्यते तदा को दोषः ? इत्युपस्कारः । अत्रोत्तरम्– नैतदेवम्, तत्सत्त्वप्रसङ्गतः– सामान्यसत्त्वप्रसङ्गात् ॥ १३५ ॥

सत्त्वेऽपि दोषमाह—

सत्त्वेऽपि नेन्द्रियज्ञानं हन्त! तद्गोचरं मतम् । द्विविज्ञेयत्वमित्येवं क्षणभेदे न तत्त्वतः१३६

सत्त्वेऽपि सामान्यस्य, नेन्द्रियज्ञानं, मनोज्ञानोपलक्षणमेतत्, हन्त ! तद्गोचरं– सामान्यगोचरं, मतम्– अङ्गीकृतम्, स्वलक्षणविषयत्वेन तदभ्युपगमात् । उपसंहरन्नाह– इत्येवं– उक्तप्रकारेण, क्षणभेदे तत्त्वतः– परमार्थतः, द्विविज्ञेयत्वं न शोभते ।

ननु शोभत एव, 'घट-पटयो रूपम्' इत्यादौ नैयायिकादीनां रूपे प्रत्येकमुभयवृत्तित्वान्वयवत् प्रत्येकं द्विविज्ञेयत्वान्वयोपपत्तेः, न हि तेषां रूपत्वे घट-पटोभयवृत्तित्वान्वयः, रूपत्वस्य द्रव्यावृत्तित्वादिति चेत् । न, [1]तेषामपि सामान्यविशेषरूपवस्त्वनभ्युपगमे एतदन्वयानुपपत्तेः, संग्रहनयाश्रयणेन घट-पटोभयरूपसामान्योद्भूतत्वाविवक्षयैव तदुपपत्तेः, अन्यथोद्भूतैकद्वित्वक्रोडीकरणेनैकतापन्नयोर्घट-पटयोर्वृत्तित्वान्वयायोगात्, द्वित्वाद् द्वयोर्भेदविवक्षणेन प्रत्येकान्वयस्य तु तदाधेयद्वित्वनिरूपकधर्मद्वयावच्छिन्नवाचकपदोपसंदानस्थल एव व्युत्पन्नत्वात्; यथा 'घट-पटयोर्घट-पटरूपे' इति । [2]व्यवहाराश्रयणात्तु प्रकृतप्रयोगोऽनुपपन्न एव, रूपपदादेकरूपेणोपस्थितियोग्यस्यापि रूपस्य भिन्नाश्रयवाचकपदसमभिव्याहारेण भेदविवक्षावश्यकत्वात्,

---

१ नैयायिकानाम् । २ व्यवहारनयापेक्षया तु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उभयत्र मिलितवृत्तित्वान्वयायोगात् । अत एव न तन्मते 'पञ्चानां प्रदेशः' किन्तु 'पञ्चविधः' एव, इति व्युत्पादितं नयरहस्ये । अत एव च 'स्याद् घट-पटयोर्न रूपं, स्याद् घट-पटयो रूपम्' इति वाक्यात् तात्पर्यज्ञस्य क्रमिकविधि-निषेधान्वयानुभवः सुघटः, भिन्ननयजन्यान्वयबोधे भिन्ननयजन्यबोधधियोऽप्रतिबन्धकत्वात्; प्रत्युत महावाक्यार्थबोधेऽवान्तरवाक्यार्थज्ञानस्य हेतुत्वेनानुगुणत्वात् ।

यत्तु– 'घट-पटयोर्न रूपम्' इति वाक्यं तात्पर्यभेदेन योग्यायोग्यम्, घट-पटयो रूपत्वावच्छिन्नाभावान्वयतात्पर्ये योग्यमेव, रूपत्वावच्छेदेन घट-पटोभयवृत्तित्वाभावान्वयतात्पर्ये चायोग्यमेव; 'घट-पटयो रूपम्' इत्यादौ च तद्वृत्तित्वस्यापि रूपत्वादिसामानाधिकरण्येनान्वयबोध एव साकाङ्क्षत्वे तु 'एतयोर्घटरूपम्' इत्यपि स्यात्' इति परेषां वासनाविजृम्भितम् । तदसत्, उभयरूपसामान्यस्य प्रत्येकरूपविशेषात्, कथञ्चिद् भेदानभ्युपगमे व्युत्पत्तिभ्रमात् 'घट पटयोर्घटरूपम्, इति जायमानस्य बोधस्य प्रामाण्यापत्तेः, मम तु स्यादंशबाधेन तदभावात् । किञ्च, एवं 'द्वयोर्गुरुत्वं न गन्धः' इत्यादौ का गतिः, गुरुत्वसामानाधिकरण्येनेव गन्धत्वसामानाधिकरण्येनापि पृथिवी-जलोभयत्वाश्रयवृत्तित्वसाम्यात्, विधिनिषेधविषयार्थानिरुक्तेः ? । अत्र सप्तम्याः स्वार्थान्वयितावच्छेदकस्वरूपा तत्समव्याप्यातिरिक्तैव वाऽऽधेयताऽर्थः, तत्र च प्रकृत्यर्थस्य तन्निष्ठनिरूपितत्वविशेषणान्वयात्, पृथिवी-जलोभयविशिष्टाधेयतात्वेन गुरुत्वं विधेयतया, गन्धश्च निषेध्यतया प्रतीयत इत्युक्तौ च नामान्तरेण गुरुत्वसामान्यस्यैव विधेयत्वम्, गन्धसामान्यस्यैव च निषेध्यत्वमुक्तमायुष्मता, अतिरिक्ताधेयताऽनिरूपणात्, अन्यथा 'घट-पटयोर्न घटरूपम्' इत्यादौ सप्तम्यर्थान्वयितावच्छेदकघटरूपत्वादिस्वरूपाया आधेयताया घट-पटोभयनिरूपिताया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्रसिद्धत्वेनानिषेध्यत्वेऽपि 'जाति-घटयोर्न सत्ता' इत्यादाविव 'घट-पटोभयनिरूपितत्वाभाववदाधेयतावद्घटरूपम्' इत्यन्वयोपपादनेऽपि 'घट-पटयोर्घटरूप-पटरूपे' इत्यस्यानुपपादनात्, घटरूपत्वादिस्वरूपाया आधेयताया उभयानिरूपितत्वात्। तत्र तद्द्वित्वादिस्वरूपैवाधेयतेति चेत्। द्वयोः प्रत्येकरूपावच्छेदेन द्वित्वाभावाद् निषेधस्यापि प्रवृत्तिः स्यात्। अनुयोगितावच्छेदकावच्छेदेनैव सप्तम्यर्थाधेयत्वान्वयव्युत्पत्तेर्नायं दोष इति चेत्। तथापि 'घट-पटयोर्न घटरूपा-ऽऽकाशे' इत्यादिकं कथम्, एतद्द्वित्वादिस्वरूपाया आधेयताया उभयानिरूपितत्वात्, नञ्स्तात्पर्यवशाद् द्वेधान्वयेऽप्युभयस्यानाधेयत्वाभावात्?। अनुभवविरुद्धं च सर्वमेतत् कल्पनमिति न किञ्चिदेतत्। शबलात्मकमेव हि वस्तु कदाचिदनुगतम्, कदाचिच्च व्यावृत्तमनुभूयमानं शोभते, भेदाभेदशक्तिवैचित्र्यात्, आर्थन्यायेन यथाक्षयोपशमं ग्रहणादिति परिभावनीयम्।

संरम्भमस्मासु वितत्य सत्यमतो बतोच्चैर्निपपात बौद्धः।
अनेन शोच्यां तु दशां सहायीकृतोऽपि योगो यदसौ जगाम ॥ १ ॥ १३६ ॥

सौत्रान्तिकनिराकरणवार्ता उपसंहरति—

सर्वमेतेन विक्षिप्तं क्षणिकत्वप्रसाधनम्। तथाप्यूर्ध्वं विशेषेण किञ्चित्तत्रापि वक्ष्यते॥

एतेन– उक्तदोषजालेन, सर्वं क्षणिकत्वप्रसाधनं– नाशहेत्वयोगादि पूर्वं नाममात्रेणोक्तम्, विक्षिप्तं– निराकृतम्, बाधकतर्कप्राबल्यात्। तथाप्यूर्ध्वं– योगाचारमतनिराकरणानन्तरं, तत्रापि– नाशहेत्वयोगादीनामुभयसाधारणत्वेनोभयनिराकरणा- ॥१६७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्तरमवसरप्राप्ते तन्निराकरणग्रन्थेऽपि, किंचित्– उपपादनस्थानानुरोधेन, वक्ष्यते, विशेषेण– प्रतिस्वं तदाशयोद्भावनेन ॥१३७॥

ताथागतानां समयं समुद्रं तर्कोऽयमौर्वानलवद् ददाह ।
पश्यन्तु नश्यन्ति जवेन भीता दीना न मीना इव किं तदेते ? ॥ १ ॥
रक्तः प्रसक्तः क्षणिकत्वसिद्धौ यदुक्तसूत्रं हतवान् स्वकीयम् ।
सूत्रान्तकोऽप्येष लिपिभ्रमेण सौत्रान्तिको लोक इति प्रसिद्धः ॥ २ ॥
क्षणक्षयक्षेपकरीं सकर्णाः ! कर्णामृतं वाचमिमां निपीय ।
जैनेश्वरं सिद्धिकृते प्रवादिप्रशासनं शासनमाश्रयन्तु ॥ ३ ॥

इति पण्डितश्रीपद्मविजयसोदरन्यायविशारदपण्डितयशोविजयविरचितायां स्याद्वादकल्पलताभिधानायां शास्त्रवार्तासमुच्चयटीकायां चतुर्थः स्तबकः ।

अभिप्रायः सूरेरिह हि गहनो दर्शनततिर्निरस्या दुर्धर्षा निजमतसमाधानविधिना ।
तथाप्यन्तः श्रीमन्नयविजयविज्ञाहिभजने न भग्ना चेद् भक्तिर्न नियतमसाध्यं किमपि मे ॥ १ ॥
यस्यासन् गुरवोऽत्र जीतविजयप्राज्ञाः प्रकृष्टाशया भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरस्तेन न्यायविशारदेन रचिते ग्रन्थे मतिर्दीयताम् ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

अथ पञ्चमः स्तबकः ।

स्वामी सतामीहितसिद्धयेऽन्तर्यामी स चामीकरकान्तिराप्तः ।
वामीभवन्तोऽपि परे बतामी क्षमा न यद्दर्शनलङ्घनाय ॥ १ ॥

अनाकलितमन्यथाकलितमन्यतीर्थेश्वरैः स्वरूपनियतं जगद् बहिरिवान्तरालोकते ।
य एष परमेश्वरश्चरणनम्रशक्रस्फुरत्किरीटमणिदीधितिस्नपितपादपद्मः श्रिये ॥ २ ॥

समीहितं कल्पतरूपमश्चेत् शङ्खेश्वरः पार्श्वजिनः पिपर्ति ।
तदाऽसदालापसमुद्भवेभ्यो भयं न किञ्चिद् मम दुर्नयेभ्यः ॥ ३ ॥

'विज्ञानमात्रमेव जगत्' इति योगाचारमतं निराकुरुते—

२९ **विज्ञानमात्रवादोऽपि न सम्यगुपपद्यते । मानं यत्तत्त्वतः किञ्चिदर्थाभावे न विद्यते ॥ १ ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विज्ञानमात्रवादोऽपि परपरिकल्पितः, सम्यग्– विचार्यमाणः, नोपपद्यते; यद्– यस्मात्, तत्त्वतः– स्वतन्त्रनीत्यैव, अर्थाभावे किञ्चिद् मानं– प्रमाणं, न विद्यते । न चार्थाभावनिश्चयमन्तरेण ज्ञानमात्रमेवेत्यवधारणं युज्यते, तदुक्तम्—

"अयमेवेति यो ह्येष भावे भवति निर्णयः । नैष वस्त्वन्तराभावसंवित्त्यनुगमादृते ॥ १ ॥" इति ॥ १ ॥

न चाध्यक्षमर्थाभावे मानमित्याह—

न प्रत्यक्षं यतोऽभावालम्बनं न तदिष्यते । नानुमानं तथाभूतसल्लिङ्गानुपलब्धितः ॥२॥

न प्रत्यक्षमर्थाभावे मानम्, यतस्तदभावालम्बनं नेष्यते, तस्य तुच्छत्वात्, अध्यक्षस्य च स्वलक्षणालम्बनत्वात् । अत एव नानुमानं[1] तत्र मानम्, तस्य तन्मूलत्वेन तदभावे तथाभूतसल्लिङ्गानुपलब्धितः– अर्थाभावप्रतिबद्धसाधुलिङ्गानुपलम्भात् ॥२॥

स्वभाव-कार्यलिङ्गकयोरनुमानयोरत्राभावेऽप्यनुपलब्धिरेव तत्र मानम्, इत्याशङ्कते—

उपलब्धिलक्षणप्राप्तोऽर्थो येनोपलभ्यते । ततश्चानुपलब्ध्यैव तदभावोऽवसीयते ॥ ३ ॥

येन कारणेन, उपलब्धिलक्षणप्राप्तोऽर्थः– बाह्यो घटादिः, परनीत्योपलभ्यते । ततश्चानुपलब्ध्यैव– अदर्शनरूपया, तदभावः– बाह्यार्थाभावः, अवसीयते ॥ ३ ॥

१ ख, ग. घ. च. 'नं तस्य' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रोत्तरमधिकृत्याह—

उपलब्धिलक्षणप्राप्तिस्तद्धेत्वन्तरसंहतिः। तेषां च तत्स्वभावत्वे तस्यासिद्धिः कथं भवेत् ?॥४॥

उपलब्धिलक्षणप्राप्तिरिह परेषां तद्धेत्वन्तरसंहतिः– प्रतियोगिं-प्रतियोगिव्याप्येतरयावत्प्रतियोग्युपलम्भकसमवधानम्। तेषां च– तदपराभिमतघटाद्युपलम्भकानां तत्स्थानाभिषिक्तप्रत्ययान्तराणां वा, तत्स्वभावत्वे– बाह्यार्थोपलम्भजननस्वभावत्वे त्वयाभ्युपगम्यमाने, तदसिद्धिः– बाह्यासिद्धिः, कथं भवेत्, तदुपलम्भजननस्वभावहेतुसाकल्यविरोधात्, बाह्यार्थस्य ज्ञानजनकत्वापत्त्या त्वया प्रतियोगि-प्रतियोगिव्याप्येतरत्वस्य निवेशयितुमशक्यत्वात्, तत्स्थाने तदुपलम्भजनकसमनन्तरान्यत्वनिवेशेऽपि सामग्र्यननुप्रविष्टानां हेतुत्वोपगमेऽपसिद्धान्तात् ? ॥ ४ ॥

कल्पितं तत्र तज्जननस्वभावत्वं न तु वास्तवमिति नापसिद्धान्तः, इत्यभिमेत्य शङ्का-परिहारावाह—

सहार्थेन तज्जननस्वभावानीति चेन्ननु। जनयन्त्येव सत्येवमन्यथाऽतत्स्वभावता ॥५॥

सहार्थेन परपरिकल्पितेन, तज्जननस्वभावानि– अर्थोपलम्भजननस्वभावानि प्रत्ययान्तराणि, यदाह न्यायवादी– "स्वभावविशेषश्च यः स्वभावः सत्स्वन्येषूपलम्भप्रत्ययेषु सन् प्रत्यक्ष एव भवति" इति; तथाचार्थस्य क्लृप्तत्वात् तत्साहित्ये-

---

१ ख. ग. घ. च. 'गिव्या'।

नार्थोपलम्भजननस्वभावत्वं विशिष्टं क्लृप्तमित्याशय इति चेत् । नन्वेवं सत्येव– क्लृप्तेऽप्यर्थे, जनयन्ति– जनयेयुस्तान्यर्थोपलम्भम्, तत्साहित्यघटितस्वभावत्वात्, अन्यथाऽतत्स्वभावता– सहार्थेन तज्जननस्वभावताविलयः स्यादित्यर्थः ॥ ५ ॥

सति बाह्येऽर्थे कदाचित् तेन सह तदुपलम्भं जनयेयुरिति योग्यतायां तज्जननस्वभावत्वं कल्प्यत इत्याशये त्वाह—

योग्यतामधिकृत्याथ तत्स्वभावत्वकल्पना । हन्तैवमपि सिद्धोऽर्थः कदाचिदुपलब्धितः॥६॥

अथ तेषां प्रत्ययान्तराणां योग्यतामधिकृत्य तत्स्वभावत्वकल्पना– यदाऽर्थो भवति तदा तदुपलम्भं जनयन्ति, हन्त ! एवमपि, अर्थः– बाह्यो घटादिः, सिद्धः, कदाचित्– यस्मिन् कस्मिंश्चित् काले, उपलब्धितः– उपलम्भसंभवात् ॥६॥

विपक्षे बाधकमाह—

अन्यथा योग्यता तेषां कथं युक्त्योपपद्यते ?। न हि लोकेऽश्वमाषादेः सिद्धा पक्त्यादियोग्यता॥

अन्यथा– कदापि तदुपलम्भाजनने, कथं तेषाम्– अभिमतप्रत्ययान्तराणाम्, योग्यता– बाह्यार्थोपलम्भजननयोग्यता, युक्त्या– न्यायेन, उपपद्यते, कारणान्तरवैकल्यप्रयुक्तकार्याभावत्वस्यैव कारणान्तरे योग्यताया लोके व्यवह्रियमाणत्वात् ? । एतदेव समर्थयति– न हि लोके–व्यवहारिणि लोके, अश्वमाषादेः– कङ्कटुकादेः कदापि पक्त्याद्यजनकस्य, पक्त्यादियोग्यता सिद्धेति ॥ ७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधिकृतशेषमाह—

पराभिप्रायतो ह्येतदेवं चेदुच्यते न यत् । उपलब्धिलक्षणप्राप्तोऽर्थस्तस्योपलभ्यते ॥८॥

पराभिप्रायतः– बाह्यार्थवादिनैयायिकाद्यभिप्रायतः, हि– निश्चितम्, एतदेवमुच्यते यदुत– 'उपलब्धिलक्षणप्राप्तोऽर्थो नोपलभ्यते' इति । अत्र किं तदभिमतानुपलब्ध्यङ्गीकारेण तदभावः साध्यते, उत घटज्ञानात् प्रागपि घटसत्ताभ्युपगमे तदा तदुपलम्भप्रसङ्गापादनं परं प्रति क्रियत इति ? । आद्ये, तदभिमतेश्वराद्यनुमानाङ्गीकारेणेश्वरादेरभ्युपगमप्रसङ्ग इति स्फुट एव दोषः । अन्त्ये त्वाह– न– नैतदेवम्, यद्– यस्मात्, तस्योपलब्धिलक्षणप्राप्तोऽर्थस्तेनोपलभ्यत एव, अन्यस्य तु न, तदुपलम्भप्रसङ्गात्, तद्ग्राहकेन्द्रिय-संनिकर्षाद्यभावादिति न किञ्चिदेतत् ॥ ८ ॥

अतत्स्वभावत्वपक्ष आह—

तद्ग्रहणभावैश्च[1] यदि नाम न गृह्यते । तत एतावता सत्त्वं न तस्यातिप्रसङ्गतः ॥ ९ ॥

तद्ग्रहणभावैश्च– बाह्यार्थाग्रहणस्वभावैश्च प्रत्ययान्तरैः, यदि नाम न गृह्यते बाह्योऽर्थः, तत एतावता हेतुना, न तस्यासत्त्वम्, अतिप्रसङ्गतः, पीतासंवेदनस्वभावेन तदसंवेदने पीतसंवेदनाभावप्रसङ्गात् । नन्वन्य[2]दर्शनाभ्यासवासनाप्रबोधादुपस्थितस्य बाह्यघटस्यानादिवासनाविशेषप्रबोधोपस्थितस्य शशविषाणस्येवाऽभावग्राहकसमनन्तरे सत्यभावग्रहः सर्वदैव भवति, घटाकारज्ञान-

---

१ मुद्रितमूलादर्शे 'अतद्ग्रह' इति पाठः । २ ख. ग. घ. च. 'न्वद' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यापि बाह्यघटाभावग्रहाप्रतिरोधित्वात्, विषाणाकारग्रहस्य शशविषाणाभावग्रहाप्रतिरोधित्ववत्, अतः किमुच्यते– 'योग्यानुपलब्ध्यभावाद् न बाह्यघटाभावग्रहः' इति, तत्तदभावाकारज्ञाने तत्तत्समनन्तरस्यैव योग्यतात्वात् ?। न हि परेणाप्येका योग्यता स्वमतानुरोधेनापि वक्तुं शक्यते; तथाहि– प्रतियोगि-तद्व्याप्येतरयावत्प्रतियोग्युपलम्भकसमवधानमुदयनाभिमता योग्यता । न चैकत्र कुत्रापि न यावत्तदुपलम्भकसमवधानमिति वाच्यम्, स्वाश्रयसंबन्धे तु तदुपलम्भकतावच्छेदकसमवधानोक्तेः । प्रतियोगिव्याप्यत्वं चात्र न कालिकेन, संनिकर्षस्य घटाद्यव्याप्यत्वात्, घटनाशोत्तरं तन्नाशात्, अग्नौ पृथिवीत्वाभावग्रहाप्रसङ्गात्, महत्त्वादेरपि तद्व्याप्यत्वात्, कालिकेन नित्यव्याप्येतराप्रसिद्धेर्वा; न च दैशिकेन, संनिकर्षस्यापि प्रतियोग्यव्याप्यत्वात्, किन्तु प्रतियोगिग्रहासाधारणकारणत्वम् । अत एव संयोगिनाशजन्यसंयोगनाशप्रत्यक्षम्, तत्र संयोगिनो हेतुत्वेऽप्यसाधारणत्वात् । अत एव च प्रतियोग्युपलम्भप्रागभावस्याभावप्रत्यक्षे हेतुत्वेऽपि न दोषः, तस्यासाधारणत्वात् । संसर्गाभावग्रहे चेयं योग्यता, तेन नातीन्द्रियान्योन्याभावप्रत्यक्षानुपपत्तिदोषः । प्रतियोगितावच्छेदकावच्छिन्नोपलम्भकसमवधानग्रहणाच्च न पिशाचवद् घटाभावप्रत्यक्षता । न च गुणे रूपाभावाप्रत्यक्षतापत्तिः, तदुपलम्भकमहत्त्वस्य तत्राभावादिति वाच्यम्, एकार्थसमवायेन तदुपलम्भकमहत्त्वस्य तत्र सत्त्वादित्येतन्निष्कर्षः ।

सोऽयमनुपपन्नः, असाधारणत्वस्य दुर्वचत्वात्, विषयतासंबन्धेन हेतुत्वरूपासाधारणत्वविवक्षण आलोकसंयोगादेरप्यसाधारणत्वापत्तौ तमसि घटाभावादेः प्रत्यक्षतापातात्, प्रागभावादेरपि साधारणत्वात्, उपलम्भपदेन प्रतियोगितावच्छेदकाश्रयाणां यावतामुपलम्भस्वरूपयोग्यत्वग्रहणे महति वायादुद्भूतरूपाभावाप्रत्यक्षतापत्तेः, अणुरूपोपलम्भाप्रसिद्धेः, ॥१७१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्किञ्चिदुपलम्भयोग्यत्वग्रहणे च रूपसामान्याद्यभावप्रत्यक्षतापत्तेः । किञ्च, यत्किञ्चित्संबन्धेन तदुपलम्भकतावच्छेदकाश्रयसत्त्वमतिप्रसक्तम्, नियतसंबन्धेन च रूपादेर्वाय्वावभावात् तत्र तदभावप्रत्यक्षतानापत्तिः । एतेन 'प्रतियोगिग्राहकत्वाभिमतेन्द्रियजन्यभावविषयकयावद्ग्रहनिष्ठकार्यताभिन्नप्रतियोगिग्रहनिष्ठकार्यताप्रतियोगिककारणताकत्वमसाधारणत्वम्, 'भावविषयक-' इति विशेषणाद् नालोकादेरसाधारण्यम् । प्रतियोगिग्राहकत्वाभिमतेन्द्रियजन्यभावविषयकयावद्ग्रहजनकतावच्छेदकावच्छिन्नं प्रतियोगिभिन्नं यावत्तत्समवधानं योग्यतेति फलितम् । वायौ रूपाभावाप्रत्यक्षतावारणाय प्रतियोगिभिन्नेति तीति (?) निरस्तम्, ब्राह्मण्याभावादेः प्रत्यक्षतापातात्, यावदुपलम्भकावच्छिन्नाभावत्वेन स्वरूपयोग्यत्वेऽविनिगमात्, अभावावच्छिन्नतावदुपलम्भकानामपि हेतुत्वसंभवात्, अनुपलब्धिकुक्षिनिक्षिप्तत्वेनेन्द्रियादेरभावप्रत्यक्षहेतुत्वोच्छेदाच्च ।

केचित्तु– 'यद्धर्मावच्छिन्नप्रतियोगिनि प्रतियोगितत्सन्निकर्षविरहमात्रप्रयुक्तो यदधिकरणविशेष्यकलौकिकोपलम्भविषयत्वाभावस्तदधिकरणे तद्धर्मावच्छिन्नाभावो योग्यः। तत्प्रयुक्तत्वं च स्वरूपसंबन्धविशेषः, 'कारणाभावप्रयुक्तः कार्याभावः' इति प्रत्ययात् । अस्ति चेदमालोकादिमति भूतले, तत्र घटानुपलम्भस्य तन्मात्रप्रयुक्तत्वात् । एवं स्तम्भे पिशाचानुपलम्भेऽपि बोध्यम्, पिशाचत्वादेरयोग्यत्वे मानाभावात्, सहकारिविरहादेव कार्याभावाद् नित्यस्येति व्याप्तेरसिद्धेः । भूतले पिशाचानुपलम्भस्तु न तन्मात्रप्रयुक्तः, उद्भूतरूपाभावस्यापि तत्र(।?)प्रयोजकत्वात् । अस्तु वाऽन्योन्याभावे प्रतियोगितावच्छेदकतत्संनिकर्षविरहमात्रप्रयुक्तस्तदधिकरणीयलौकिकोपलम्भप्रकारत्वाभावः प्रतियोगितावच्छेदकनिष्ठ एव, तथा पिशाचादेरनुपलम्भस्य योग्यत्वप्रयोज्यत्वेऽपि पिशाचत्वादेः स्तम्भेऽनुपलम्भस्यातथात्वात्, योग्यव्यक्तिवृत्तित्वेनैव जातेर्योग्यत्वात् । अ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यन्ताभावे तु पूर्वैव योग्यता। अत एव न जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षम्, तत्र तदनुपलम्भस्य तन्मात्रप्रयुक्तत्वाभावात्, अधिकरणे महत्त्वाभावस्यापि प्रयोजकत्वात्। ब्राह्मण्याभावस्तु शूद्रादौ न प्रत्यक्षः, विशुद्धिज्ञानस्य तद्व्यञ्जकस्याभावात्। न च य एव गगनादौ भूतलविशेष्यकोपलम्भविषयत्वाभावः, स एव घटादौ, आश्रयभेदेनाभावाभेदादित्यनुपपत्तिः, व्याप्यवृत्तित्वा-ऽव्याप्यवृत्तित्वाभ्यां तद्भेदात्, यद्धर्मावच्छिन्नप्रतियोगिकत्वावच्छेदेनोक्तप्रयुक्तत्वविवक्षणाद् वा। संयोगप्रत्यक्षे च न संयोगिद्वयप्रत्यक्षमपि हेतुः, मिथःसंयुक्तयोरन्यावच्छेदेनोपलम्भेऽपि संयोगाप्रत्ययात्, संयोगिनः संनिकर्षघटकतयैवोपयोगित्वात्, इति न तदभावप्रत्यक्षानुपपत्तिः' इत्याहुः।

तदपि न, धारावाहिकाभावप्रत्यक्षानुपपत्तेः, तत्र बाधस्याऽप्यनुपलम्भप्रयोजकत्वात्। न च धर्मितावच्छेदकाभिश्रितोपलम्भस्याभावस्तन्मात्रप्रयुक्त इति स एव वाच्यः, बाधाभावोऽपि वा विरहप्रतियोगिकोटौ निवेश्य इति वाच्यम्, तथापि भूतले घटानुपलम्भस्य घटालोकसंयोगाभावप्रयुक्तत्वेन तन्मात्रप्रयुक्तत्वाभावात्। न च तत्संनिकर्षातिरिक्तप्रतियोग्युपलम्भकतावच्छेदकावच्छिन्नविरहाप्रयुक्त इति मात्रान्तार्थः, भूतले आलोकसंयोगसत्त्वाद् न तद्विरहः, द्रव्यचाक्षुषे आलोकसंयोगत्वेनैव हेतुत्वात्, अतिप्रसङ्गस्य विषयनिष्ठसामानाधिकरण्येनैव वारितत्वात्, अत एव घटाकाशसंयोगाद्यध्यक्षत्वस्य घटाकाशसंयोगादीनां गुरुत्वादिवदयोग्यत्वेन प्रयुक्तत्वेऽपि न क्षतिः, गुरुत्वादिभेदस्य सामान्यत एव प्रत्यक्षहेतुत्वादिति वाच्यम्; संनिकर्षस्यापि त्यागापत्तेः; यद्विरहमात्रप्रयुक्तत्वोपादानेऽपि दोषाभावाचक्षुःसंयोगत्वेनैव चाक्षुषहेतुत्वात्, घटाभावभ्रमानुपपत्तेश्च, तत्र घटानुपलम्भस्य दोषप्रयुक्तत्वात्। न च तत्तद्दोषाभावोऽपि तत्तुल्यतया निवेश्यः, ह्रदादौ वह्न्यादिभ्रमाभावरूपवह्न्याद्यनुप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लम्भस्य दोषाभावप्रयुक्तत्वात्, तत्तद्दोषाणामपि तत्तुल्यतया निवेशे चातिगौरवात्, भङ्ग्यन्तरेणोदयनीययोग्यतोक्तिरेवेयमिति दिक्।

'प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोग्युपलम्भाभावः' इति चिन्तामणिकारीया योग्यता, प्रतियोगिसत्त्वव्यापकोपलम्भविषयप्रतियोगिकाभावत्वं योग्यतावच्छेदकमिति फलितम्। तत्त्वापादनात्मकज्ञानमप्युपयुज्यते, तदभावेऽप्यभावप्रत्यक्षात्। तत्र शुद्धं प्रतियोगिसत्त्वं व्याप्यम्, किञ्चिदवच्छिन्नं वा ?। नाद्यः, तत्सत्त्वेऽपि कारणान्तराभावादनुपलम्भेन व्यभिचारात्। न द्वितीयः, जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षतापातात्, तत्रापि महत्त्वादिविशिष्टपृथिवीत्वेनोपलम्भापादनसंभवात्। न च पक्षावृत्तिविशेषणानवच्छिन्नयत्सत्त्वोक्तौ निस्तारः, तथापि गन्धवदणुभिन्नत्वे सति पृथिवीत्वेन तत्र तदापादनसंभवात्।

अथ यदधिकरणवृत्तिप्रतियोग्युपलम्भकातिरिक्तानवच्छिन्नं यत्सत्त्वमुपलम्भव्याप्यमिति वाच्यम्, गन्धवदणुभिन्नत्वादिकं च न प्रतियोग्युपलम्भकमिति न दोषः, यद्धर्मावच्छिन्नसत्त्वं यद्धर्मावच्छिन्नोपलम्भव्याप्यं तद्धर्मावच्छिन्नोपलम्भाभावस्य तद्धर्मावच्छिन्नाभावप्रत्यक्षहेतुत्वाद् न गुरुत्ववद् घटाभावादिप्रत्यक्षता, न वाकाशादिभेदस्य तथात्वम्, शब्दाश्रयत्वादेरयोग्यत्वात्, न वा घटत्वात्यन्ताभावस्य, घटेतरावृत्तित्वघटितत्वेनायोग्यत्वात्। शूद्रत्वादौ ब्राह्मणत्वाभावस्तु सुतरां न प्रत्यक्षः, तदधिकरणवृत्तिप्रतियोग्युपलम्भकमात्रावच्छिन्नेन तत्सत्त्वेनापादयितुमशक्यत्वात्, तत्र विशुद्धमातापितृजन्यत्वज्ञानस्यापि व्यञ्जकत्वात्। न चैवं तमस्यालोकनियतघटाद्यभावप्रत्यक्षापत्तिः, तत्र प्रतियोगिसत्त्वस्यैव व्याप्यत्वादिति वाच्यम्; प्रतियोगिसत्त्वस्योपलम्भव्याप्यतायां निरुपाधिसहचारातिरिक्ततर्कवत्त्वस्य विवक्षितत्वात्, प्रतियोग्युपलम्भकाव

च्छिन्नतत्सत्त्वस्य व्याप्यतायां कार्यकारणभावस्यापि तर्कत्वात् । न चैवमभावानुपलब्धिर्भावप्रत्यक्षेऽपि हेतुः स्यात्, भावज्ञानस्य निर्विकल्पादेरधिकरणानिश्रितस्याप्युत्पादार्थं तत्र महत्त्वादेरेव हेतुत्वस्वीकारात्; इति चेत् ।

न, व्यापकत्वेनाभिमतस्योपलम्भस्य लौकिकस्य विवक्षणे स्तम्भपिशाचान्योन्याभावादेः, गुडतिक्तत्वाभावादेश्चाप्रत्यक्षत्वप्रसङ्गात् । प्रतियोग्यंशेऽधिकरणांशे च तादृशलौकिकोपलम्भरूपसाध्याप्रसिद्ध्या व्याप्यताया असंभवात् । एतेन 'पिशाचत्वं यदि स्तम्भवृत्तिजातिः स्यात् स्तम्भविशेष्यकलौकिकोपलम्भकप्रकारः स्यात्, इत्यापादनं संभवत्येव, इति स्तम्भविशेष्यकलौकिकप्रत्यक्षे पिशाचत्वप्रकारत्वाभावस्य हेतुत्वाद् न दोषः' इत्यपि निरस्तम्, तस्य सदासत्त्वेनाहेतुत्वात्; तादृशोपलम्भस्यालौकिकस्य विवक्षणे च प्रतियोगिसत्त्वस्याव्याप्यत्वात्; तदधिकरणवृत्त्यलौकिकोपलम्भकावच्छिन्नप्रतियोगिसत्त्वस्यालौकिकोपलम्भव्याप्यत्वे च भूतलादौ पिशाचात्यन्ताभावादिग्रहप्रसङ्गात्; यावत्प्रतियोग्युपलम्भकावच्छिन्नस्य व्याप्यत्वोक्तावुदयनीययोग्यतायामेव पर्यवसानाच्च । 'योग्यप्रतियोगिकत्वं संसर्गाभावग्रहे योग्यता, योग्याधिकरणत्वं चान्योन्याभावग्रहः' इत्यपि तुच्छम्, मनस्त्वात्यन्ताभावादेरप्रत्यक्षत्वापातात्, घटादौ परमाणुभेदादेः प्रत्यक्षतापाताच्चेति ।

तस्माद् भावप्रत्यक्ष इवाभावप्रत्यक्षेऽपि महत्त्वादीनां हेतुत्वाद् विशिष्य घटाभावप्रत्यक्ष आलोकसंयोगादीनां हेतुता वाच्या; सापि वक्तुं न शक्यते, मेचकादिचाक्षुषे व्यभिचारात्, इति घटाभावाद्याकारे तत्कुर्वद्रूपसमनन्तरत्वेनैव हेतुता युक्तेति चेत् । न, स्ववासनया कथंचित् स्वयं बाह्याभावानुभवेऽपि परं प्रति तत्साधनार्थं प्रयोगानुपपत्तेः, तूष्णींभावेन कथायां निग्रहात्, बाह्यत्वस्य ज्ञानभिन्नत्वरूपस्यातीन्द्रियत्वेन तद्घटितघटोपलम्भस्य तु पिशाचवद् घटोपलम्भस्यैवापादयितुमशक्यत्वेन ॥१७३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्भावप्रत्यक्षस्यानापादनादिति दिक् ॥ ९ ॥

'घटादिर्न ज्ञानभिन्नः, प्रत्यक्षत्वात्, तत्स्वरूपवत्' इत्याशयेनाह—

विज्ञानं यत्स्वसंवेद्यं न त्वर्थो[1] युक्त्ययोगतः। अतस्तद्वेदने तस्य ग्रहणं नोपपद्यते ॥१०॥

विज्ञानं, यत्– यस्मात्कारणात्, स्वसंवेद्यं– स्वत एव स्फुरद्रूपम्, तथानुभूतेः; न त्वर्थः परपरिकल्पितः स्वसंवेद्यः। कुतः? इत्याह– युक्त्ययोगतः– युक्त्यभावात्, सर्वस्य सर्वज्ञताद्यापत्तेः। अतस्तद्वेदने–विज्ञानानुभवे, तस्य– परपरिकल्पितस्यार्थस्य, ग्रहणं– ज्ञानम्, नोपपद्यते; तथाहि– 'ज्ञानविषयताया इन्द्रिय-संनिकर्षादिनियम्यत्वाज्ज्ञानस्याऽर्थस्य च परतः प्रकाश एव' इति नैयायिकादीनां मतं न युक्तम्, स्वसंवेदनस्य प्रसाधितत्वात्, प्रत्यक्षव्यवहारे प्रत्यक्षत्वस्यैव प्रयोजकत्वात्, क्वचित् प्रत्यक्षत्वस्य क्वचिच्च प्रत्यक्षविषयत्वस्य तथात्वे गौरवात्, नीलज्ञानत्वाद्यपेक्षया नीलत्वादेरेव चक्षुरादिजन्यतावच्छेदकत्वे लाघवाच्च। एतेन 'ज्ञानाभेदः संनिकर्षादिश्च ज्ञानविषयतायां नियामकः, इति ज्ञानस्य स्वप्रकाशत्वम्, अर्थस्य च परतः प्रकाशत्वम्' इत्यन्येषामपि मतं प्रत्याख्यातम्, विषयताया ज्ञानस्वरूपत्वात्, ज्ञानभिन्नस्य ज्ञानाविषयत्वात्। अथ 'नीलस्य प्रकाशः' इति प्रतीतेर्नील-प्रकाशयोर्भेद इति चेत्। न, विवेकेनाप्रतीयमानयोर्नील-तत्संविदोर्भेदाभावात्; 'अन्यथा नीलस्य स्वरूपम्' 'प्रकाशस्य प्रकाशता' इत्यादावपि भेदसिद्धिप्रसङ्गात्, अभेददर्शनबाधकस्याप्युभयत्र तुल्यत्वात्। न चार्थमन्तरेणाप्रतीयमाना बुद्धिरर्थ-

---

१ ख. ग. घ. च. ज. 'युक्तियो' मुद्रितेऽपि चायमेव पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्येति संयोज्य प्रत्येतुं शक्या, शक्यत्वे वा नियतसहोपलम्भयोः पृथगपोद्धारकल्पनाया अभेदनिश्चयपर्यवसायित्वादिति; तदुक्तम्– "सहोपलम्भनियमादभेदो नील-तद्धियोः" इति ।

नन्वेवं कथमर्थाकारो ग्राह्य एव, बोधाकारस्तु ग्राहक एवेति नियमः ? इति चेत् । न, कथंचिद् भिन्नकालयोर्ग्राह्य-ग्राहकाभावात्, समानकालयोरप्येकस्य ग्राह्यत्वम्, अन्यस्य च ग्राहकत्वमित्यत्राविनिगमात् । ग्रहणक्रियाकर्तृ ज्ञानं ग्राहकम्, तदाश्रयश्चार्थो ग्राह्य इति चेत् । न, अन्तः सुखाकारव्यतिरेकेण बहिश्च नीलाद्याकारव्यतिरेकेणापराया ग्रहणक्रियाया अभानात् । भाने च तस्य 'स्वतः परतो वा ?' इति विकल्पावतारः । आद्ये, एकदा नील-बोध-ग्रहणानां स्वरूपनिमग्नानां प्रतिभानाद् न कर्तृ-कर्म-क्रियाव्यवहृतिः । अन्त्ये च तत्राप्यपरग्रहणक्रियाग्राहकान्तरापेक्षायामनवस्था, इति विनिर्मुक्तग्राह्य-ग्राहक-भावस्वसंवित्तिमात्रवाद एव साधीयान्; तदुक्तम्—

"नान्योऽनुभाव्यो बुद्ध्यास्ति तस्य नानुभवोऽपरः ।
ग्राह्य-ग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥ १ ॥" इति ।

कथं तर्हि 'नीलमहं वेद्मि' इति कर्म-कर्तृ-भावाभिनिवेशी प्रत्ययः, कर्म-कर्तृभावस्याभावात् ? इति चेत् । यथा रजतमन्तरेणापि शुक्तिकायां रजतावगमः । बाधकाभावाद् न तद्वदस्य भ्रान्तत्वमिति चेत् । न, स्वरूपासंसक्तयोर्द्वयोः स्वातन्त्र्योपलम्भस्य कर्म-कर्तृभावोल्लेखे बाधकत्वात् । किं तत्र भ्रान्तिबीजम् ? इति चेत् । पूर्वभ्रान्तिरेव, तत्रापि पूर्वभ्रान्तिः, इति बीजाङ्कुरस्थलीयाऽनवस्था; तदुक्तम्—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अवेद्य-वेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते । विभक्तलक्षणग्राह्य-ग्राहकाकारविप्लवा ॥ १ ॥
तथा कृतव्यवस्थेयं केशादिज्ञानभेदवत् । यदा तदा न संनोद्यग्राह्य-ग्राहकलक्षणा ॥ २ ॥" इति ।

अनयोरयमर्थः– स्वरूपेणाविद्यमानवेद्य-वेदकाकारापि बुद्धिर्यथा भ्रान्तैर्व्यवहर्तृभिर्निरीक्ष्यते तथैव कृतव्यवस्थेयं व्यवह्रियते, तैस्तु केशादिज्ञानभेदवत्– तिमिराद्युपप्लुताक्षाणां बोधभिन्नाविद्यमानकेशादिप्रतिपत्तिवदियं विभक्तलक्षणग्राह्य-ग्राहकाकारविप्लुवा निरीक्ष्यते, विभक्तलक्षणौ ग्राह्य-ग्राहकाकारावेव विप्लुवौ– असन्निभासविभागौ यस्याः सा तथोक्ता । यदा-यमविद्यानिबन्धनो बुद्धेः प्रविभागस्तदा न संनोद्यग्राह्य-ग्राहकाकारलक्षणा– संनोद्ये पर्यनुयोज्ये ग्राह्य-ग्राहकलक्षणे यस्याः सा तथा न भवति । न ह्यविद्यासमारोपिताकारः पर्यनुयोगमर्हति । अतो न 'भ्रान्तेः प्रकाशमानत्वेनाबोधरूपता, बोधरूपतायां वा नासदाकारसंस्पर्शः, तत्संस्पर्शे वा सत्त्वापत्तिः' इत्यादिपर्यनुयोगावकाशः । ' 'नीलमहं वेद्मि' इति परस्परासंसक्तं प्रतीतित्रयं क्रमवत् प्रतिभाति, न कर्म-कर्तृभावः' इत्यन्ये, तेषां द्वितीयाद्यर्थानुपपत्तिः ।

अथ सुख-स्तम्भाद्याकारव्यतिरिक्तसंवदेनाभावे कथं 'चक्षुरादिना मया रूपं प्रतीयते' इत्यादिप्रतीतिः ? इत्युपलभ्ये रूपादिके चक्षुरभिमुखीभूतं तत्प्रकाशत्वं विदधाति सैव बुद्धिरिति चेत् । न, 'चक्षुरादिना रूपमुपलभ्यते' इत्यादौ बाह्यार्थवादिपरिकल्पिते परोक्षे रूपादौ तदाकारा प्रकाशता चक्षुरादिना जन्यत इति वासनाविशेषेण तथा व्यपदेशसंभवात्, पूर्वसामग्रीतश्चक्षुरादिरूपाद्याकारप्रकाशता बुद्धिस्वभावोपजायत इत्येकसामग्र्यधीनतया वा तथा व्यपदेशात् । दृश्यते हि प्रदीप-प्रकाशयोः समानकालयोः 'प्रदीपेन घटः प्रकाशितः' इत्येकसामग्र्यधीनतया व्यपदेश इति । दर्शनात् प्रागर्थसद्भावे तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न मानमस्ति, येन तत्र प्रकाशतां चक्षुरादिकमादध्यात्। दर्शनमेव तत्र मानमिति चेत्। न, तेन स्वकालावधेरेवाऽर्थस्य ग्रहणात्। अथ 'पूर्वदृष्टं पश्यामि' इति व्यवसायात् प्रागर्थः सिध्यति, प्रागर्थसत्तां विना दृश्यमानस्य पूर्वदृष्ट एकत्वगतेरयोगादिति चेत्। केन तयोरेकत्वं गम्यते ?– इदानींतनदर्शनेन, पूर्वदर्शनेन वा ? । नाद्यः, इदानींतनदर्शनकाले पूर्वदृक्कालस्याऽस्तमयात्, तेनाविद्यमानपूर्वदृग्गर्भपूर्वदृष्टताया अग्रहणात्, अन्यथा वितथत्वप्रसङ्गात्। अत एव न द्वितीयः, पूर्वदर्शनेन वर्तमानकालदर्शनव्याप्तेरनवसायात्। तस्मादपास्तपूर्वदृगादियोगं सर्वं वस्तु दृशा गृह्यते, पूर्वदृष्टतां तु स्मृतिरुल्लिखतीति। न च 'स एवायम्' इति प्रतीतिरेका, 'सः' इत्यस्य स्मृतिरूपत्वात्, 'अयम्' इत्यस्य च दृक्स्वरूपत्वात्, परोक्षत्वा-ऽपरोक्षत्वाभ्यां तद्भेदात्। न च 'पश्यामीति प्रतीतेः प्रत्यक्षमेव प्रत्यभिज्ञानम्, न च संस्कारजन्यत्वेन स्मृतित्वापत्तिः, संस्कारमात्रजन्यत्वस्यैव स्मृतित्वव्याप्यत्वात्, तत्तास्मृतेरेव वा तत्ताप्रत्यभिज्ञाहेतुत्वात्' इति नैयायिकादिमतमपि युक्तम्, तेषामपि 'पश्यामि' इत्याद्यनुगतमत्या चाक्षुषत्वासिद्धेर्निर्विकल्पकासाधारण्यात्, वैशद्यविशेषस्यैव 'पश्यामि' इति प्रतीतौ विषयत्वादिति न किञ्चिदेतत्।

अथानुमानात् प्राग् भावोऽर्थस्य सिध्यति, प्राक् सत्तां विना पश्चाद्दर्शनायोगादिति चेत्। न, प्राक् सत्ताया असिद्ध्या तया सह पश्चाद्दर्शनस्य नियमासिद्धेः। अथ ज्ञाने नीलाद्याकारस्य कादाचित्कस्यान्यथानुपपद्यमानत्वात् तत्प्रसिद्धयेऽर्थः परिकल्प्यत इति चेत्। न, स्वप्नाद्यवस्थायां वासनाविशेषसामर्थ्यवशादविद्यमानकरि-तुरग-रथाद्याकारप्रतिपत्तिनियमवज्जाग्रद्दशायामपि तत एव दर्शनस्य प्रतिनियतविषयत्वोपपत्तेः, तद् न प्रागर्थसत्त्वम्। प्रागसत्त्वे तु धर्मिस्वरूपे दर्शनमेव प्रमाणम्, यद् येनैव रूपेणोपलभ्यते तत् तेनैव रूपेणास्ति, यथा नीलं नीलरूपतयैव, इत्थं च वर्तमानत्वेनानुभव एव पूर्वकाले संबन्धित्वं ॥१७५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवच्छिनत्तीति । अथ नीलं तद्दर्शनाविरतावपि परदृशि प्रतिभातीति साधारणतया ग्राह्यम्, विज्ञानं त्वसाधारणतया ग्राहकमिति भेदो युक्त इति चेत् । न, नीलस्य साधारणतयाऽप्रतीतेः । न हि नीलं परदृशि प्रतिभातीत्यत्र प्रत्यक्षप्रसरोऽस्ति । अथानुमानात् तत्साधारणता प्रतीयते, स्वसंताने नीलादानार्थप्रवृत्तेः, नीलदर्शनमूलकत्वदर्शनेन परसंतानेऽपि प्रवृत्तिदर्शनात् तद्विषयदर्शनानुमानादिति चेत् । न, परप्रवृत्त्यादिना परदृष्टनीलानुमानेऽपि स्व-परदृष्टयोरैक्यासिद्धेः, सामान्येनान्वयपरिच्छेदात्, अपरधूमदर्शनादपरवह्नयनुमानात्, अपरवह्नौ पूर्वदृष्टवह्निसदृशताविकल्पवत् परदृष्टे स्वदृष्टसदृशतामात्रविकल्पावतारात् । प्रतिभासभेदेऽपि स्व-परदृष्टयोः सदृशव्यवहारादिकार्यदर्शनादभेदः स्यात्, तदा सदृशरोमाञ्चोद्भवादिकार्यदर्शनात् सुखादेरपि स्व-परसंतानभुवस्तत्त्वं भवेत् । न च संतानभेदात् तद्भेदः, तत्रापि भेदकान्तरगवेषणायामनवस्थानात् । स्वरूपत एव तद्भेदे च सुखादेरपि तत एव भेदसंभवात् । न च देशैकत्वात् स्व-परदृष्टनीलादीनामेकत्वम्, देशस्यापि स्व-परदृष्टस्योक्तवदेकत्वायोगात् । तस्माद् ग्राहकाकारवत् प्रतिपुरुषमुद्भासमानं नीलादिकमपि भिन्नमेव, तच्चैककालोपलम्भाद् ग्राहकवत् स्वप्रकाशम् ।

अथ ग्राहकाकारश्चिद्रूपत्वाद् वेदकः, नीलाकारस्तु जडत्वाद् ग्राह्य इति चेत् । न, अपरोक्षस्वरूपस्य चिद्रूपत्वस्य नीलादिसाधारण्यात् । नीलादेरपरोक्षस्वरूपमन्यस्माद् भवति, न तु बोधस्येति विशेष इति चेत् । न, बोधस्यापीन्द्रियाद्यपेक्षत्वात् । स्वोत्पत्तावेव बोध इन्द्रियादिकमपेक्षते, न तु स्वापरोक्षतायामिति चेत् । न, एकत्रापेक्षा-ऽनपेक्षाऽयोगात् । एवं चान्तर्बहिराकारयोस्तुल्यत्वेऽपि 'एकत्र ग्राहकताशक्तिः, अन्यत्र च ग्राह्यताशक्तिः' इति परेषां वासनामात्रम्, असिद्धे ग्राह्यग्राहकभावे तच्छक्तिकल्पनाया अयोगात्, तस्याः कार्यानुमेयत्वात् । एवं च 'यदवभासते तज्ज्ञानम्, यथा सुखादिकम्, अव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भासते च नीलादिकम्, अतो ज्ञानमेव' इति स्वभावहेतुः।

कथं तर्हि 'भूतले घटः' इति प्रतीतिः, न तु 'भूतलं न घटज्ञानवत्' इतिवद् 'भूतलं न घटवत्'? इति; कथं वा 'अहं घटज्ञानवान्' इतिवत् 'अहं घटवान्' इति न प्रतीतिः? इति चेत्। पृच्छैतद् नियताधाराधेयभावकल्पनाबीजम्। न हि परेणाप्याधाराधेयभावो वास्तवो वक्तुं शक्यते, संयोगमात्रस्य तत्त्वे कुण्ड-बदरयोस्तद्विपर्ययस्य विनिगन्तुमशक्यत्वात्, तिर्यक्संयुक्तयोर्द्वयोस्तदव्यवहाराच्च। न च बदरादिप्रतियोगिकत्वविशिष्टसंयोगादेरेव बदराद्याधारता, क्षणभङ्गापत्त्या विशिष्टस्यातिरिक्तस्यानभ्युपगमात्, प्रतियोगित्वाद्यविवेचनाच्च। न च कुण्डादिस्वरूपैव बदराद्याधारता, तत्स्वरूपस्य साधारणत्वाद् बदरं प्रतीव करभं प्रत्यप्यविशेषात्। तस्माद् भूतलादौ घटाद्याधारताप्रतीतिरविद्याविशेषादेव नियतेति प्रतिपत्तव्यम्। एतेन 'अर्थाभावेऽन्तर्बहिर्विभाग एव न स्यात्' इति निरस्तम्, भिन्नदेशसंबन्धित्वेन तदसंभवेऽपि विश्वरूपभेदेन तत्संभवात्; अन्यथा स्वप्नादौ रथादिज्ञाने बहिर्ज्ञानत्वं न स्यात्। एतेन चाहमिदमाकारभेदोऽपि व्याख्यातः, स्वरूपतस्तद्भेदात्, 'इदं नीलं' इत्यत्रेदमाकार-नीलाकारयोर्दोषादेवैकज्ञानत्वाभिमानात्। बहिर्नीलादिस्वरूपमिदंत्वं त्वनुपपन्नम्, असत्यप्यर्थे दोषवशात् 'इदम्' इति प्रतीतेः। 'इदं नीलम्' इत्यादिसहप्रयोगानुपपत्तेश्च'घटो घटः' इत्यादिवदिति दिग्॥ १०॥

निगमयति—

एवं चाग्रहणादेव तदभावोऽवसीयते। अतः किमुच्यते मानमर्थाभावे न विद्यते?॥११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च– उक्तरीत्या, अग्रहणादेव– अदर्शनादेव, तदभावः– बाह्यार्थाभावः, अवसीयते । अतः किमुच्यते– 'अर्थाभावे मानं न विद्यते' इति, नीलादौ ज्ञानाभिन्नत्वग्रहे समीहितासिद्धेः ? । एतेन 'अदर्शनादेवाभावनिश्चये पुत्रादर्शनात् तदभावनिश्चयेनोरस्ताडनादिना शोकप्रसङ्गः' इति दुर्भाषितमपास्तम्, परेषां पुत्रध्वंसग्रहसामग्रीनियतत्वात् तदाकारस्य, पुत्रध्वंसग्रहस्य च शोकहेतुत्वादिति । कथं तर्हि प्राक् पूर्वकालसंबन्धित्वेनादर्शनात् तदभावग्रह उक्तः ? इति चेत् । धर्म्यतिरिक्तस्य तस्य दुर्वचत्वाद् धर्मिस्वरूपत्वे योग्यत्वेन तदापादनसंभवादित्याकलय । एवं च विज्ञानस्वसंवेदनस्यैव मानत्वादित्याशयव्याख्याने 'मानत्वात्' इत्यस्य 'मानोत्थापकत्वात्' इत्यर्थो बोध्यः ॥ ११ ॥

अत्रोच्यते—

अर्थग्रहणरूपं यत् तत्स्वसंवेद्यमिष्यते । तद्वेदने ग्रहस्तस्य ततः किं नोपपद्यते ? ॥१२॥

यद्– यस्मात्, तद्– विज्ञानम्, अर्थग्रहणरूपं– बाह्यार्थपरिच्छेदात्मकं सत्, स्वसंवेद्यमिष्यते– 'नीलमहं वेद्मि' इति विच्छिन्नार्थग्रहणरूपतयाऽनुभूतेः; तद्वेदने– एवंभूतविज्ञानानुभवे, तद्ग्रहः– बाह्यार्थग्रहः, ततः– तस्मात् कारणात्, किं नोपपद्यते– अधिकृतवेदनस्यैवार्थमन्तरेणायोगात् ? इति ।

खलस्य योगाचारस्य ज्ञात्वार्थद्वेषितामिव । सभायामधुना सभ्याः ! अनर्थ उपतिष्ठते ॥ १ ॥

तथाहि– यत् तावदुक्तम्– 'ज्ञानभिन्नस्य ज्ञानाविषयत्वाद् न बाह्यार्थः' इति । तद् विपरीतम्, तद्विषयताप्रयोगस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदगर्भत्वात् । किञ्च, ग्राह्य ग्राहकाकारस्वरूपभेदः प्रत्यक्षसिद्ध एव । अत एव नीलाकारं नाहमाद्याकारमिति चेत् । न, अनेकाकारकरम्बितैकविज्ञानानभ्युपगमे नील-धवलाद्यवगाहिचित्रज्ञानानुपपत्तेः, 'क्रमिकाण्येव तज्ज्ञानानि' इत्यभ्युपगमेऽप्येकमपि नीलादिज्ञानं न व्यवतिष्ठेत, नीलाकारेऽपि नीलत्वोपरागात्, एकापलापेऽन्यापलापस्य तुल्यत्वात् । चित्रज्ञानाभ्युपगमे च चित्रार्थोऽप्यनिवारितः, ग्राह्य-ग्राहकभेदस्य सत्यस्य प्रतिभासात् । एतेन 'विवेकेनाग्रहणाद् न तद्भेदः सत्यः' इति निरस्तम्, आकारयोरसंभेदेन वेदनस्यैव विवेचनत्वात् ; प्रकाश-प्रकाशतयोस्तु मिथोऽनुपरागलक्षणेनासंभेदेन वेदनाभावात् ।

यदपि 'सहोपलम्भनियमात्' इत्याद्युक्तम् । तदपि न युक्तम्, यतः सहोपलम्भो युगपदुपलम्भः, क्रमेणोपलम्भाभावः, एकोपलम्भो वाभिप्रेतः ? । आद्ये, बुद्धचित्तसन्तानान्तरचित्तानां सहोपलम्भनियमेऽपि तदभेदाभावेन व्यभिचारः । यत्तु– "यो हि ज्ञानोपलम्भ एव ज्ञेयोपलम्भः, ज्ञेयोपलम्भ एव च ज्ञानोपलम्भः स युगपदुलम्भनियमोऽभिधीयते' इति धर्मोत्तरानुसारिणः समाधानम्, बुद्धज्ञाने च नायं नियमः, पृथक् संतानान्तरैः स्वचित्तसंवेदनादिति । तत्र 'यज्ज्ञेयं यज्ज्ञानोपलम्भनियतसहोपलम्भं तत् तज्ज्ञानाभिन्नम्' इत्यर्थे पारमार्थिकज्ञाने सांवृतज्ञेयाभेदसाधने बाधात्, 'यज्ज्ञेयोपलम्भो यज्ज्ञानोपलम्भसहभावनियतः स तज्ज्ञानाभिन्नः' इत्युक्तौ च पूर्वोक्तदोषानतिवृत्तेः, यदीयत्वस्यापि व्याप्तौ निवेशे च बुद्धचित्तस्य संतानान्तरग्राहित्ववदभेदं विनापि कयाचित् प्रत्यासत्त्या ज्ञेयग्राहित्वोपपत्तावप्रयोजकत्वम्, तदग्राहित्वे च तस्य सार्वज्ञ्यानुपपत्तिः, विशुद्धज्ञानत्वेनैव तस्य गलितग्राह्य-ग्राहकाकारकलङ्कत्वात् सर्वज्ञत्वम्' इति कश्चित् । तदसत्, सर्वाग्रहे सर्वज्ञतापदार्थस्यैवाघटमानत्वादिति न किञ्चिदेतत् । द्वितीये, तुच्छस्य तस्य न प्रतीतिः । तृतीये च साध्याविशेषः । किञ्च, एकान्तैक्ये सह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दार्थानुपपत्तिरिति न किञ्चिदेतत् ।

एवं च 'नीलमहं वेद्मि' इत्यत्र कर्म-कर्तृ-भावप्रत्ययस्याविप्लवकत्वं परास्तम्, बाधाभावात्, अन्यथा नीलादिप्रत्ययानामपि तथात्वापत्त्या शून्यतायां पर्यवसानप्रसङ्गात् । न च 'स्वातन्त्र्योपलम्भो बाधकः' इत्युक्तं युक्तम्, 'नीलमहं वेद्मि' इति परस्परोपरागेणैव प्रतीतेः । न च समकालयोर्भिन्नकालयोर्वा ग्राह्य-ग्राहकभावासंभवात् 'अर्थाग्राहि ज्ञानम्' इति युक्तम्, अनुमानोच्छेदप्रसङ्गात्, तत्रापि लिङ्गा-ऽनुमानयोः कार्यकारणभावे उक्तविकल्पदोषानतिवृत्तेः । एतेन 'नीलादि ज्ञानम्, ज्ञानकार्यत्वात्, उत्तरज्ञानवत्' इत्यपि निरस्तम्, अनुमानस्यापि लिङ्गजन्यत्वेनोत्तरलिङ्गक्षणवल्लिङ्गतापत्तेः, उपादान-निमित्तशक्तिस्वभावभेदाभ्यां समाधानस्यापि तुल्यत्वात् ।

एवं च 'यया प्रत्यासत्त्या ज्ञानं स्वरूपं गोचरयति तयैव चेदर्थम्, तदा तयोरैक्यापत्तिः; अन्यथा चेत्, स्वभावद्वयापत्तिः, तदपि चापरेण स्वभावद्वयेन, तदपि चान्येन तेन ग्राह्यमित्यनवस्था, स्वसंविदितस्यासंविदितरूपायोगात्' इत्यपि निरस्तम्, लिङ्गस्य समानक्षणानुमानकरणेऽप्यस्य पर्यनुयोगस्य समानत्वात् । लिङ्गं तदुभयकरणैकस्वभावं चेत् । 'ज्ञानमपि स्व-परग्रहणैकस्वभावम्' इति स्वीकारे कस्तव कर्णशूलनिवारणोपायः ? । एवं ज्ञानाद् ग्रहणक्रियाया अर्थान्तरत्वा-ऽनर्थान्तरत्वपक्षदोषेऽप्यनुमाने लिङ्गादुत्पत्तेस्तत्पक्षदोषतौल्यं विभावनीयम् ।

परमार्थतो लिङ्गं नानुमानकारणम्, व्यवहारात्तु तथेष्यत इति चेत् । अर्थस्यापि तत एव ज्ञानग्राह्यत्वं किं नेष्यते ? । व्यवहाराप्रामाण्याल्लिङ्गमप्यनुमानकारणं तत्त्वतो नेष्यत एव, ग्राह्य-ग्राहकभाववत् कार्यकारणभावस्यापि निषेधात्, समारोप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवच्छेदकरणात् त्वनुमानं प्रमाणमिष्यत इति चेत् । न, तत्र समारोपव्यवच्छेदस्य तन्मते कथमपि कर्तुमशक्यत्वात्, नाशस्य निर्हेतुकत्वाभ्युपगमात्, तत्कारणानां सामर्थ्येऽसामर्थ्ये वा तदुत्पत्तिप्रतिबन्धस्यापि वक्तुमशक्यत्वात्;

"यस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता । नित्यत्वादचिकित्स्यस्य कस्तां क्षपयितुं क्षमः ? ॥१॥"

इति स्वयमेवाभ्युपगमात् । न चानुमानसहायस्य प्राक्तनसमारोपक्षणस्योत्तरसमारोपक्षणानन्तरजननासमर्थक्षणजननाद् द्वितीयक्षणे कारणाभावादेव समारोपानुत्पत्तेरनुमानप्रामाण्यम्; लिङ्गा-ऽनुमानयोरिव पूर्वोत्तरसमारोपक्षणयोर्हेतुफलभावाभावात्, न्यायस्य समानत्वात् ।

यदपि 'पूर्वदृष्टैकत्वगतेरयोगाद् नानुभवात् प्रागर्थसिद्धिः' इत्यभिहितम्, तत्रापि न सम्यगवहितम्, प्रत्यभिज्ञयैव तदेकत्वावगतेः । न च 'सोऽयमिति नैकं ज्ञानम्' इत्युक्तं युक्तम्, प्रत्यक्षत्वजातिवादिनां तदैक्यासंगतावप्यस्माकं स्वरूप इवेदमंशेऽपि स्पष्टतया प्रत्यक्षत्वेऽपि तदुपयोगसामान्ये विलक्षणक्षयोपशमबलायातप्रत्यभिज्ञात्वाविरोधात्, 'इदं पश्यामि' इतिवत् 'तमिमं प्रत्यभिजानामि' इत्यनुभवात् । न चैवं "स्पष्टं प्रत्यक्षम्"[1] इति लक्षणातिव्याप्तिः, बहिर्विषयसामान्ये स्पष्टताया लक्षणघटकत्वात्, 'बहिरर्थग्रहणापेक्षया हि' इत्याकरस्वारस्याविरोधादित्यन्यत्र विस्तरः । यदप्यर्थं विनापि स्वापादाविव जाग्रद्दशायां भानमुक्तम्, तदसिद्धमसिद्धेन साधयतः स्वस्य महामोहमग्नतां व्यञ्जयति, न हि स्वप्नादावप्यर्थं विना भानं भवादृशं

१ प्रमाणनयतत्त्वालोकालङ्कारे २।१।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विना स्वीकुरुतेऽन्यः कश्चित्, अनुभूतस्यैव रथादेस्तदा सन्निहितत्वेन दोषमहिम्ना भानात्, असदाकारस्यैव जनने च वासना शशविषाणमपि किं न जनयेत्? । न ह्यत्र न पर्यनुयोग इति राज्ञामाज्ञा । 'प्रतिनियतशक्तिविशेषश्चाविद्यायामेव, न शशविषाणे' इत्यत्र श्रद्धामात्रमेव शरणम् ।

यदपि 'प्रागसत्त्वे तु दर्शनमेव मानम्' इति । तदपि न पेशलम्, तद्रूपेणानिश्चयात्, अन्यथा संशयायोगात् । यदपि 'स्व-परदृष्टनीलयोर्भेदाद् न साधारणं नीलं ग्राह्यतयाभिमतं सिद्ध्यति, किन्तु ग्राहकत्वाभिमतमेव तद् युक्तम्' इति । तदप्यसत्, विना साधारणतां परदृष्टे नीलेऽनुमानस्यैवानवतारात् । न हि धूमेऽप्यसाधारणवह्निना समं व्याप्तिग्रहोऽस्ति । न चागृहीतव्याप्तिकमनुमाने विषयीभवितुमर्हतीति । एतेन '

"लिङ्गस्याव्यभिचारस्तु धर्मिणान्यत्र गृह्यते । तत्र प्रसिद्धं तद्युक्तं धर्मिणं गमयिष्यति ॥ १ ॥"

इति वह्निविशिष्टदेश एवानुमेयः' इति दिङ्नागोक्तमपास्तम्, असाधारणेन तेनापि समं व्याप्त्यग्रहात् । नन्वेवं सुखादिकमपि साधारणं स्यादिति चेत् । स्यादेव तिर्यक्सामान्येन । एवं नीलादिसाधारण्यं न दोषायेति चेत् । न, 'इदं देवदत्तदर्शनविषयः, देवदत्तप्रवृत्तिविषयत्वात्' इत्यूर्ध्वतासामान्येनापि साधारण्यसिद्धेः, क्षणभङ्गस्य निरस्तत्वात्, निरसिष्यमाणत्वाच्च ।

यदपि 'चिद्रूपत्वस्यापरोक्षरूपस्य नीलादिसाधारण्याज्ज्ञानवद् न ग्राह्यत्वम्' इति । तदप्यवद्यम्, स्फुरद्रूपत्वेनापरोक्षत्वे वह्न्यादेरपि तथात्वे प्रत्यक्षा-ऽनुमानविभागव्याघातात् । तत्त्वतस्तदविभागाद् न दोष इति चेत् । नील-पीताद्याकाराणामपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथं तत्त्वतो विभागः ?। प्रतिभासभेदादिति चेत् । प्रत्यक्षा-ऽनुमानयोरपि किं न विशदाविशदप्रतिभासभेदः ?। नीलाद्याकारव्यतिरेकेण तत्र वैशद्याद्याकारानानुभवाद् न तद्भेद इति चेत् । न, प्रदीर्घाध्यवसाये तदनुभवस्याबाधितत्वात् ; क्षणिकाध्यवसाये तु प्रतिनियतैकाकारानुभवस्यापि दुर्घटत्वात् । एवं च 'यदवभासते तज्ज्ञानं, यथा सुखादिकम्' इत्यनुमानमपि निरस्तम् , सुखादीनां सर्वथा ज्ञानाभिन्नत्वाभावेन दृष्टान्तासिद्धेश्च । न च 'सुखादयो ज्ञानात्मकाः, ज्ञानाभिन्नहेतुजत्वात्' इत्यतः सुखादीनां ज्ञानात्मकतासिद्धिः, कुम्भादिभङ्गजस्य शब्दस्य कपालखण्डादिना तुल्यहेतुजत्वेऽप्यतद्रूपत्वेन व्यभिचारात् , सुखादीनां विशिष्टादृष्टविपाक-स्रग्-वनितादिनिमित्तजन्यत्वेन सर्वथा ज्ञानाभिन्नहेतुजत्वाभावाच्च; अन्यथा विभिन्नस्वभावत्वानुपपत्तेः । न च तदसिद्धिरेव, सुखादेराह्लादनाद्याकारत्वात् , ज्ञानस्य च प्रमेयानुभवस्वभावत्वात् ; तदुक्तम्– "सुखमाह्लादनाकारं विज्ञानं मेयबोधनम्" इति । न च ज्ञानक्षणोपादानत्वादुत्तरज्ञानक्षणवत् सुखादीनां ज्ञानाभिन्नत्वम् , आत्मद्रव्योपादानत्वात् तेषाम् । न खलु पर्यायाणां पर्यायान्तरोत्पत्तावुपादानत्वं क्वचिद् दृष्टम् , द्रव्यस्यैवान्तर्बहिर्वोपादानत्वोपपत्तेः । तदुक्तम्–

"व्यक्ताव्यक्तात्मरूपं यत् पौर्वापर्येण वर्तते । कालत्रयेऽपि तद् द्रव्यमुपादानमिति स्मृतम् ॥ १ ॥" इति ।

'यदि च सुखादयो ज्ञानात् सर्वथाऽप्यभिन्नाः, तर्हि तद्वदेवैषामप्यर्थप्रकाशकत्वं स्यात्, न चात्र तदस्ति, सुखादीनामपि स्वज्ञानप्रकाश्यत्वेन बहिरर्थाविशिष्टत्वात्' इति देवसूरिप्रभृतयः । अन्ये तु–'सुखादीनामहङ्कार-क्रोधादिवदन्तर्मुखत्वेऽपि विभिन्नकर्मजत्वात् ज्ञानभिन्नत्वम्' इत्यभिमन्यन्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदपि घटादेर्ज्ञानाकारत्वेऽपि 'भूतले न घटः' इत्यादेर्नियताधाराधेयभावकल्पनाबीजसाम्राज्याद् वारणमकारि। तदप्यसत्, आधारा-ऽऽधेयाभ्यां कथंचिदपृथग्भूतस्याधाराधेयभावस्याबाधितानुभवसिद्धत्वेनाकाल्पनिकत्वात्; अन्यथा नीलादावप्यनाश्वासात्। यदपि 'अर्थाभावेऽपि धियामन्तर्बहिर्विभागः स्वरूपभेदादेव' इति भणितम्, तदपि न तथ्यम्, व्यक्तिभेदस्यातिप्रसङ्गित्वात्, जातिभेदस्य चानभ्युपगमात्। न चान्तर्बहिर्विभागो मिथ्या, सुख-नीलाद्यनुभवानामन्तर्बहिर्भावस्यागोपालाङ्गनं प्रसिद्धत्वात्। एतेनाहमिदमाकारभेदव्याख्यानमपि सुप्रत्याख्यातम्, अहमाकारस्य शरीरालम्बनत्वे 'इदं गौरम्' इत्यनुपपत्तेः, निरालम्बनत्वे च भ्रान्तत्वापत्तेः, दानाद्याकारकालेऽहमाकारानुपपत्तेश्च। न चेदंताया अन्यस्या अनुपपत्तेर्ज्ञानाकारमात्रत्वं युक्तम्, प्रत्यक्षसमानकालीनार्थपर्यायविशेषरूपत्वात् तस्याः, अनन्तधर्मात्मकवस्त्वभ्युपगमे दोषलेशस्याप्यभावादिति न किञ्चिदेतत्।

इत्थं विलक्षीभूतस्य तूष्णींभावमुपेयुषः। योगाचारस्य योगाय च्छलमद्य विजृम्भते ॥ १ ॥ १२ ॥

प्रकृतमेव भावयन्नाह—

घटादिज्ञानमित्यादिसंवित्तेस्तत्प्रवृत्तितः। प्राप्तेरर्थक्रियायोगात्स्मृतेः कौतुकभावतः ॥१३॥

घटादिज्ञानमित्यादिसंवित्तेः— 'घटमहं जानामि' इत्याद्यन्तर्बहिर्मुखसांशानुभवात्, विमुखज्ञानमात्रस्यावेदनात्, अनुभवापलापे निराकारस्यैव दर्शनस्य सिद्धेः, आकारव्यवस्थायाः कल्पनयोपपत्तेरतिप्रसङ्गाद् न ज्ञानमात्रं जगत्। तथा, तत्प-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृत्तितः– तत्र घटादावेव प्रवृत्तेः, बहिरर्थाभावे तु बहिष्प्रवृत्तिर्न स्यात् । तथा, प्राप्तेः– घटज्ञानात् प्रवृत्तस्य घटोपलम्भात् । एतेन 'घटाकारज्ञानस्य स्वभावतो घटप्रवृत्तिहेतुत्वात् शुक्तौ रजतज्ञानादिव बहिष्प्रवृत्तिः' इति निरस्तम्, प्रवृत्तिसंवादा-ऽसंवादनिर्वाहार्थं प्राप्या-ऽप्राप्यघटविषयकज्ञानभेदस्वीकारस्यावश्यकत्वात् । अथ प्राप्तिरपि प्रवृत्तस्य सतो घटोपलम्भ एव, तथाच घटप्राप्तौ सत्यघटाकारज्ञानस्य हेतुत्वाद् न दोष इति चेत् । न, सत्यघटज्ञानोत्तरं घटभङ्गेऽपि तत्प्राप्तेः प्रसङ्गात्, [1]मम त्वर्थसंनिधानाधीनत्वात् तदप्राप्तेः । न च [2]तवापि घटाभावज्ञानात् तदप्राप्तिः, तद्ज्ञानेऽपि तत्र प्राप्तेरयोगात् । न च घटाकारज्ञानमात्रात् तत्प्राप्तिः, भूतले घटज्ञानात् पर्वते तत्प्राप्तिप्रसङ्गात् । न च विशिष्टज्ञानं तवास्ति । न चागृहीतासंसर्गकज्ञानद्वयं प्रापकम्, भ्रमादपि प्राप्तिप्रसङ्गात्, सत्यत्वस्य चार्थाभावेऽव्यवस्थानात् । तथा, अर्थक्रियायोगात्– जलानयनादिसिद्धेः । यदि च ज्ञानाकार एव घटो जलानयनसमर्थः स्यात् तदा घटो बुद्ध्यैव जनो जलमानयेत्, इति हता देवानांप्रियेण कुम्भकारादीनामाजीविका ॥ 'घटप्रवृत्त्याख्यज्ञानं घटानयनाख्यज्ञानजनकम्' इति पुनरर्थे विज्ञप्तिरिति नामान्तरकरणं प्रतारकस्यायुष्मतः । तथा, स्मृतेः– गृहीतस्य घटादेः 'स घटः' इति स्मरणात्, उपलक्षणमेतत् 'सोऽयं घटः' इति प्रत्यभिज्ञायाः, निरूपिततत्त्वमेतत्, कौतुकभावतो बुभुत्सादिरूपकौतुकयोगात् । न चासत्यर्थे तुरङ्गशृङ्गादाविव बुभुत्सादिकमिति ॥ १३ ॥

उक्तमेव विपक्षे दोषं सूत्रयति—

---

१ जैनस्य । २ योगाचारस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानमात्रे तु विज्ञानं ज्ञानमेवेत्यदो भवेत् । प्रवृत्त्यादि ततो न स्यात्प्रसिद्धं लोक-शास्त्रयोः १४

ज्ञानमात्रे तु जगत्यभ्युपगम्यमाने, 'विज्ञानं ज्ञानमेव घटादि' इत्यदो भवेत्– इत्येतत् स्यात्, परिच्छेद्यान्तराभावात् । ततो लोक-शास्त्रयोः प्रसिद्धं प्रवृत्त्यादि– घटार्थि-स्वर्गार्थियत्नादि, न स्यात्– उक्तरीत्या नोपपद्येत ॥ १४ ॥

अस्तु तर्हि घटादिग्रहणमित्यत आह—

तदन्यग्रहणे चास्य प्रद्वेषोऽर्थेऽनिबन्धनः । ज्ञानान्तरेऽपि सदृशं तदसंवेदनादि यत् ॥१५॥

तदन्यग्रहणे च– ज्ञानान्यघटादिग्रहणे चाभ्युपगम्यमाने, अस्य– ज्ञानस्य, अर्थे प्रद्वेषः– अनभ्युपगमलक्षणः, अनिबन्धनः– निर्निमित्तः, यद्– यस्मात्, ज्ञानान्तरेऽपि– सन्तानान्तरवृत्तिज्ञानेऽपि, तदसंवेदनादि– विज्ञानान्तरासंवेदनादपि तत्सत्त्वादि, तुल्यम्– अर्थेऽपि तुल्यसमर्थनम्, अनुपलभ्यमानस्यासत्त्वे संतानान्तरचित्तस्यापि तथात्वप्रसङ्गात् । यदुपलभ्यमानं यथा नोपलभ्यते तत् तथा नास्ति, उप[1]लभ्यमानं च नीलादि बाह्यत्वेन नोपलभ्यत इति तथा नास्तीति चेत् । न, एवं हि नीलाद्याकाराणामद्वयत्वेनाननुभूयमानानां तथात्वेनाभावप्रसङ्गात् । गृहीतेऽपि तस्मिन् निरंशत्वादद्वयबोधरूपे भ्रान्तिबीजानुगमनाद् न यथाबोधमध्यवसायो जायत इति गृहीतमपि तदगृहीतकल्पम्, इत्यननुभूतिरद्वयस्य तत्त्वत इति चेत् । न, एवं द्वयानुभवमनुभूयमानमपलप्याननुभूयमाना[2]द्वयानुभवसमर्थनेऽतिप्रसङ्गात्; नीलाद्याकारबोधादप्यन्यरूप एव बोधोऽनुभूयते,

१ ज. 'लभमा' । २ ज. 'यायानु' ।

नीलादिभ्रान्तिबीजानुगमनात्तु न यथाबोधमवसीयत इत्यस्यापि वक्तुं शक्यत्वात्। तत्राद्वयत्वमनुमास्यत इति तु न पेशलम्, स्व-परदृष्टयोरिव साक्षात्क्रियमाणा-नुमीयमानयोर्भेदेन तत्राद्वयत्वानुमानस्य वक्तुमशक्यत्वात्; अन्यथा नीलादौ बाह्यत्वानुमानस्यापि सुवचत्वादिति न किञ्चिदेतत् ॥ १५ ॥

यथार्थे युक्त्ययोग उक्तस्तस्य ज्ञानेऽपि तुल्यतामुपदर्शयन्नाह—

युक्त्ययोगश्च योऽर्थस्य गीयते जातिवादतः। ग्राह्यादिभावद्वारेण ज्ञानवादेऽप्यसौ समः॥१६॥

युक्त्ययोगश्चार्थस्य यः परैर्महता प्रबन्धेन, जातिवादतः– अनुभवविरुद्धवादेन, गीयते– स्वेच्छामात्रेण प्रकल्प्यते, असौ– युक्त्ययोगः, ग्राह्यादिभावद्वारेण– वक्ष्यमाणलक्षणेन ग्राह्यादिभावविकल्पेन, ज्ञानवादेऽपि समः, तत्पक्षनिराकरणव्यापाराविशेषात् ॥ १६ ॥

अत्र ज्ञानं हि ग्राह्यमात्रस्वभावम्, ग्राहकमात्रस्वभावम्, उभयस्वभावम्, अनुभयस्वभावं वा स्यात्?, इति विकल्प्याह–

नैकान्तग्राह्यभावं तद् ग्राहकाभावतो भुवि। ग्राहकैकान्तभावं तु ग्राह्याभावादसंगतम्॥१७॥

नैकान्तग्राह्यभावं तत्– न सर्वथा ग्राह्यस्वभावं ज्ञानम्। कुतः? इत्याह– भुवि– पृथिव्याम्, ग्राहकाभावतः– ग्राहकस्वभावस्य कस्याप्यभावात्। संबन्धिशब्दश्चायं न संबन्ध्यन्तरेण विना प्रवर्तत इति। अत एव, ग्राहकैकान्तभावं तु– सर्वथा

१ 'विज्ञानं यत्स्वसंवेद्यं' इति दशम्या कारिकया।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्राहकस्वभावं तु, ग्राह्याभावादसंगतम्– अयुक्तमेतत्। न हि ग्राहकस्वभावाज्ज्ञानाद् ग्राह्यं किञ्चिदन्यदस्ति, यदपेक्षया नियतस्वभावतां बिभृयादिदमिति भावः ॥ १७ ॥

विरोधान्नोभयाकारमन्यथा तदसद्भवेत्। निःस्वभावत्वतस्तस्य सत्त्वं युज्यते कथम् ?॥१८॥

विरोधात्– एकस्य ग्राह्य-ग्राहकाकारोभयविमिश्रणेन द्वित्वविरोधात्, नोभयाकारं– न ग्राह्य-ग्राहकोभयस्वभावम्। अन्यथा– अनुभयस्वभावत्वपक्षे, तत्– ज्ञानम्, स्वभावविशेषनिषेधेन निःस्वभावत्वतः– स्वभावसामान्याभावात्, असद् भवेत्। एवं तस्य शशविषाणस्येव सत्ता कथं युज्यते ?। अत्र केचित् ताथागताश्चित्रप्रतिभासामेकां बुद्धिं स्वीकुर्वन्तस्तृतीयपक्षे विरोधमाहुः, तदुक्तम्—

"नीलादिश्चित्रविज्ञाने ज्ञानोपाधिरनन्यभाक्। अशक्यदर्शनस्तं हि पतत्यर्थे विवेचयन् ॥ १ ॥"

अत्र देवेन्द्रव्याख्या– 'चित्रज्ञाने हि यो नीलादिः प्रत्यवभासते, ज्ञानोपाधिर्ज्ञानविशेषणोऽनुभवस्वात्मभूत इति यावत्, स एवैकोऽनन्यभाक्– तज्ज्ञानस्वभावत्वादन्यमर्थं ज्ञानवदेव न भजते। तादृशश्च सन्नसौ तच्चित्रदर्शनप्रतिभासी तदन्यपीतादिप्रतिभासविवेकेन न केवलः शक्यते द्रष्टुम्, तस्मिन् प्रतिभासमाने सर्वेषामेव तज्ज्ञानतया तदन्येषामपि नियोगतः प्रतिभासनात्। तस्माद् यदैवमेकं नीलादिकमाकारं तदन्येभ्यः पीतादिभ्यः 'अयं नीलः' इति ज्ञानान्तरेण विवेचयति प्रमाता, तदैव तथा विवेचयन्नसौ न तज्ज्ञानमामृशति, अतद्रूपत्वात्तस्य, किं तर्हि ?, अर्थे पतति–अर्थ एव तज्ज्ञानं प्रवृत्तं भवतीत्यर्थः। तस्मा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देकस्मिन्नप्याकारे प्रतिभासमाने सर्वमाभाति, न वा किञ्चिदपि, इत्यशक्यो विवेकतो दर्शने नीलादिप्रतिभास इति। न च चित्रताया बहिरर्थधर्मता, नीलादीनामवयविभेदा-ऽभेदाभ्यामनुपपत्तेः। सुखादीनां च ज्ञानाभिन्नहेतुजत्वादपि ज्ञानात्मकत्वम्' इति।

तदसत्, बाह्यस्यापि द्रव्यस्य चित्रपर्यायात्मकस्याशक्यविवेचनत्वेन चित्रैकरूपताया दुरपह्नवत्वात्, अन्तर्विज्ञानात् तदाकाराणामिव बहिष्पुद्गलादे रूपादीनामशक्यविवेचनत्वात्। मणिसमूहे 'पद्मरागोऽयम्' 'चन्द्रकान्तोऽयम्' इत्यादिपृथग्बुद्धिरूपं विवेचनमस्त्येवेति चेत्। नीलाद्याकारैकज्ञानेऽपि 'नीलाकारोऽयम्' 'पीताकारोऽयम्' इति विवेचनं किं न प्रतीतम्?। चित्रप्रतिभासकाले नेदृग् विवेचनम्, पश्चात्तु नीलाद्याभासानि ज्ञानान्तराण्यविद्योदयाद् विवेकेन प्रतीयन्त इति चेत्। तर्हि मणिराशिप्रतिभासकाले पद्मरागादिविवेचनमपि नास्त्येव, पश्चात्तु तत्प्रतीतिरविद्योदयादिति शक्यं वक्तुम्। मणिराशेर्देशभेदेन विभजनं विवेचनमिति चेत्। न, एकमण्याकारेषु तदभावात्। मणेरेकस्य खण्डने तदाकारेषु देशविभजनमस्त्येवेति चेत्। ज्ञानस्याप्येकस्य बुद्ध्या खण्डने तदस्त्येव। बुद्ध्यन्तराण्येव तत्खण्डने तानीति चेत्। पराण्येव मणिखण्डने मणिखण्डद्रव्याणि तानीति समानम्। चित्रज्ञानं विवेचयन्नर्थे पततीति तदविवेचनमिति चेत्। एकत्वपरिणतद्रव्याकारान् विवेचयन् नानाद्रव्याकारेषु पततीति तदविवेचनं तुल्यम्। एतेन 'ग्राहकैकस्वरूपस्य नानाग्राह्याकारकृतवास्तवैकत्वाविघातोऽविवेचनम्' इत्यपि निरस्तम्, वस्तुत एकस्य बाह्यस्य नानाधर्मकृतैकत्वाविघाततौल्यात्, शब्दपराहृत्तिमात्रत्वात्। एतेन विविच्यमानस्यावास्तवानेकत्वपरिग्रहोऽपि व्याख्यातः। बाह्यस्य विवेच्यमानस्यानुपपद्यमानत्वाज्ज्ञानस्यैव चित्ररूपतेति चेत्। न, बाह्यस्यात्यन्तानुपलभ्यस्य[1] स्वभा-

१ ख. ग. घ. च. 'भ्यस्व'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वस्य तथात्वासंभवात्, ज्ञानस्यैवोपलम्भयोग्यस्य तथात्वसंभवात् । ज्ञानाकारस्य बाह्यत्वेनाभिमतस्य दृश्यत्वाद् विवेचनोपपत्तिरिति चेत् । तद्विवेचनात् तस्यैवानुपपत्तिः, अन्यस्य वा ? । आद्ये, ज्ञानस्य नीलाद्याकारत्वायोगाच्चित्रैकरूपताव्याघातः । द्वितीये, अतिप्रसङ्गः, अन्यविवेचनादन्यानुपपत्तौ त्रैलोक्यस्याप्यभावप्रसङ्गात् ।

किञ्च, बाह्यस्य विवेचनं ज्ञानम्, इति कथं तेन तदसत्त्वव्यवस्था, अतिप्रसङ्गात् ? । भ्रान्तं तदिति चेत् । न, तस्याप्रमाणत्वात् । भ्रान्तिरप्यर्थसंबन्धतः प्रमेति चेत् । न, असता सह संबन्धाभावात् । असंबन्धेऽपि दोषमहिम्ना तज्ज्ञानसंभवाद् न दोष इति चेत् । तथापि भ्रान्तं ज्ञानं भ्रान्तत्वेन प्रतिसंधीयमानमर्थासत्त्वव्यवस्थापकम्, अन्यथा शुक्तौ रजतज्ञानं प्रागेव रजतासत्त्वं व्यवस्थापयेत्; तत्त्वप्रतिसंधानं चाऽसदर्थाकारत्वप्रतिसंधानेन, ततश्च तदसत्त्वव्यवस्थेत्यन्योन्याश्रयः । किञ्च, नीलादेरवयविनोऽवयवबुद्ध्या विवेच्यमानस्यासत्त्वम्, अवयवबुद्ध्या वा ? । नाद्यः, तद्बुद्ध्या तत्सत्त्वस्यैव ग्रहात् । न द्वितीयः, अवयवबुद्धेरवयविनः सत्त्वं विधातुं निषेद्धुं वाऽसमर्थत्वात् । यापि नीलादेरवयविभेदा-ऽभेदाभ्यामनुपपत्तिरुक्ता; साऽप्ययुक्ता, कथञ्चिद्वैरूप्यस्वीकारे दोषाभावात्; अन्यथा तवाप्येतद्दोषानतिवृत्तेः, एकज्ञानस्य नानाकारतादात्म्ये प्रत्याकारं भेदप्रसङ्गात्, नानाकाराणां चैकज्ञानतादात्म्ये नानात्वव्याहतेः । सुखादीनां ज्ञानात्मकत्वं तु प्रागेव पराहतमिति नेदानीं प्रयास इति ॥१८॥

परः स्वाभिप्रायमाह—

प्रकाशैकस्वभावं हि विज्ञानं तत्त्वतो मतम् । अकर्मकं तथा चैतत्स्वयमेव प्रकाशते ॥१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकाशैकस्वभावं हि- गगनतलवर्त्यालोककल्पम्, मतम्- इष्टम्, तत्त्वतः-परमार्थतः, अकर्मकम्- विचाराक्षमत्वेन ग्राह्यस्याभावात् तदपेक्षाप्रकल्पितग्राहकत्वाभावात् कर्तृ-कर्म-भावोपरागरहितम्, तदुक्तम्- "परस्परापेक्षया तयोर्व्यवस्थानात्" इति। तथा च- ग्राह्य-ग्राहकाकारासंस्पर्शि च, एतत्- विज्ञानम्, स्वयमेव- स्वसंविदितमेव, प्रकाशते, तदुक्तम्—

"नील-पीतादि यज्ज्ञानाद् बहिर्वदवभासते। तद् न सत्यमतो नास्ति विज्ञानं तत्त्वतो बहिः ॥ १ ॥
तदपेक्षा च संवित्तेर्मता या कर्तृरूपता। साप्यतत्त्वमतः संविदद्वयेति विभाव्यते ॥ २ ॥" इति ॥ १९ ॥

नन्वकर्मको न कश्चित् प्रयोगो दृष्ट इत्यत आह—

यथास्ते शेत इत्यादौ विना कर्म स एव हि। तथोच्यते जगत्यस्मिंस्तथा ज्ञानमपीष्यताम् ॥

यथा 'आस्ते' 'शेते' इत्यादौ प्रयोगे, विना कर्म, स एव- आसनादिक्रियोपरक्तो देवदत्तः, तथा- कर्मानुपरागेण, उच्यते, न तु 'कटं करोति' इत्यादाविव कर्मोपरागेण, उपवेशनादिक्रियाणामकर्मकत्वात्, तथा अस्मिन्- जगति, ज्ञानमप्यकर्मकमिष्यताम्, क्रियात्वात्। न चैवं तद्वदेवाकर्मकप्रयोगप्रसङ्गः, [1]अप्रयोगादेवाप्रयोगात्, शब्दानां विकल्पयोनित्वेन वासनासामर्थ्यात् कर्मोपसंदानेनैव 'जानाति' इत्यादिप्रयोगात् ॥ २० ॥

अत्रोत्तरम्—

---

१ लोके तस्याकर्मकत्वेन प्रयोगाभावादेवाकर्मकत्वेनाप्रयुज्यमानत्वादिति हृदयम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्यते सांप्रतमदः स्वयमेव विचिन्त्यताम्। प्रमाणाभावतस्तत्र यद्येतदुपपद्यते ॥२१॥

उच्यते सांप्रतम्– अदः– एतत्, अभिनिवेशत्यागेन स्वयमेव विचिन्त्यताम्– आलोच्यताम्, प्रमाणाभावतः, तत्र– अविशिष्टप्रकाशमात्रे विज्ञाने, यद्येतत्– एवं तत्त्वव्यवस्थापनम्, उपपद्यते ॥ २१ ॥

कथं नोपपद्यते ? इत्याह—

एवं न यत्तदात्मानमपि हन्त ! प्रकाशयेत्। अतस्तदित्थं नो युक्तमन्यथा न व्यवस्थितिः।२२।

एवं– गगनतलवर्त्यालोककल्पतायां, प्रकाशैकमात्रस्वभावत्वाद् निर्विषयं, तदात्मानमपि– तत्स्वरूपमपि, न प्रकाशयेत्। अत इत्थं तत्– प्रकाशमात्रं, न युक्तम्, अबुध्यमानस्य बोधरूपत्वायोगात्; अन्यथा– प्रकाशैकमात्रत्वे तस्य, न व्यवस्थितिरकर्मकस्वरूपस्य ॥ २२ ॥

एतदेव समर्थयति—

व्यवस्थितौ[1] च तत्त्वस्य तथाभावप्रकाशकम्। ध्रुवं यतस्ततोऽकर्मकत्वमस्य कथं भवेत् ?॥

---

१ सर्वत्र मूलादर्शे 'तौ च त' इति पाठेऽपि, टीकाकाराभिप्रायेण 'तौ तत् त' इति युज्यते, 'तद्– विज्ञानम्' इत्यस्य टीकापाठस्यान्यथानुपपद्यमानत्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवस्थितौ तत्त्वस्य– तत्तथाभावस्य, ध्रुवं– निश्चितम्, तद्– विज्ञानम्, तथाभावप्रकाशकं– व्यवस्थाप्यज्ञानस्याकर्मकप्रकाशमात्रत्वद्योतकम्, यतः– यस्मात्; ततोऽस्य– ज्ञानस्य, अकर्मकत्वं कथं भवेत्, सविषयकत्वस्यैव सकर्मकत्वात्?। न हि शाब्दं सकर्मकत्वमत्र विचार्यत इति ॥ २३ ॥

पराभिप्रायमाशङ्क्य परिहरन्नाह—

व्यवस्थापकमस्यैवं भ्रान्तं चैतत्तु भावतः। तथेत्यभ्रान्तमत्रापि ननु मानं न विद्यते ॥२४॥

अस्य– व्यवस्थाप्यस्य, एवं व्यवस्थापकम्– प्रकाशमात्रत्वद्योतकं ज्ञानान्तरमस्ति, एतत्तु भावतः–परमार्थतः, तथेति–सविषयकमिति भ्रान्तम्। व्यवस्थाप्यं तु स्वतःस्फुरद्रूपत्वाद् ग्राह्य-ग्राहकभावविनिर्मुक्तत्वात् प्रमाणम्, स्वाविषयकत्वेऽपि परानपेक्षस्फूर्तिकत्वेन स्वसंविदितत्वाव्याहतेः। ज्ञानाकारं वा तद् नीलाद्याकारं वेति चेत्। नीलादिस्वलक्षणाकारमेव, न तु सामान्याकारमिति। नन्वेवमत्रापि– अकर्मकप्रकाशमात्रत्वेऽपि, अभ्रान्तं मानं न विद्यते, सविषयकत्वेनास्यापि भ्रान्तत्वादित्यर्थः ॥ २४ ॥

यदि नामैवं ततः किम्? इत्याह—

भ्रान्ताच्चाभ्रान्तिरूपा न युक्तियुक्ता व्यवस्थितिः। दृष्टा तैमिरिकादीनामक्षादाविति चेन्न तत् ॥१८४॥

भ्रान्ताच्च– व्यवस्थापकात्, अभ्रान्तरूपा व्यवस्थितिरधिकृता, न युक्तियुक्ता– न न्यायोपपन्ना। पर आह– ननु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नायं नियमो यत्- 'भ्रान्तादभ्रान्तव्यवस्थितिर्न' इति, यतस्तैमिरिकादीनां- तिमिरादिदोषवताम्, तज्जनितद्विचन्द्रादिज्ञानाद् भ्रान्तादपि, अक्षादौ- तिमिराद्यक्षदोषादौ, अभ्रान्तव्यवस्थितिर्दृष्टेति चेत्। अत्रोत्तरम्- न तत्- नैतदेवम् ॥ २५ ॥

कथम्? इत्याह—

नाक्षादिदोषविज्ञानं तदन्यभ्रान्तिवद्यतः। भ्रान्तं तस्य तथाभावे भ्रान्तस्याभ्रान्तता भवेत् ॥

यतः- यस्मात्, तदन्यभ्रान्तिवत्- द्विचन्द्रादिभ्रमवत्, अक्षादिदोषविज्ञानं- तिमिरादिदोषविज्ञानम्, न भ्रान्तं- किन्त्वभ्रान्तमेव, कार्यलिङ्गकानुमानादिमभवत्वात्। विपक्षे बाधकमाह- तस्य- अक्षादिदोषविज्ञानस्य, तथाभावे- भ्रान्तत्वे, भावतोऽक्षादीनां दोषानुपप्लुतत्वात्, भ्रान्तस्य- द्विचन्द्रादिज्ञानस्य, अभ्रान्तता भवेत्- निर्दोषहेतुजत्वादिति भावः ॥ २६ ॥

दोषान्तरमाह—

न च प्रकाशमात्रं तु लोके क्वचिदकर्मकम्। दीपादौ युज्यते न्यायादतश्चैतदपार्थकम् ॥२७॥

न च प्रकाशमात्रं तु- सर्वथैकस्वभावमेव, लोके, क्वचित्- अनवलम्बनदीपादौ, न्यायाद् रूपं युज्यते, प्रकाशकत्वेनोपलब्धेः। अतश्चैतत्- विज्ञानाकर्मकत्वकल्पनम्, अपार्थकम्- निष्प्रयोजनम् ॥ २७ ॥

'[1]यथास्ते' इत्यादावाह—

---

१ अत्रैव स्तबके कारिका २०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्टान्तमात्रतः सिद्धिस्तदत्यन्तविधर्मिणः । न च साध्यस्य यत्तेन शब्दमात्रमसावपि॥२८॥

दृष्टान्तमात्रात्– परपरिभाषितात् 'आस्ते' 'शेते' इत्यादेस्तत्र तत्क्रियाकर्तुः, अत्यन्तविधर्मिणः– नानाधर्मानुविद्धात्, न च साध्यस्य– बोधमात्रस्य, सिद्धिः, यत् तेनासावपि– उक्तदृष्टान्तोऽपि, शब्दमात्रं– न तु लक्षणयुक्त इति यत् किञ्चिदेतत् ॥ २८ ॥

अत्रैव प्रधानदोषमाह—

किञ्च विज्ञानमात्रत्वे न संसारा-पवर्गयोः । विशेषो विद्यते कश्चित्तथा चैतद् वृथोदितम् ॥२९॥

किञ्च, विज्ञानमात्रत्वे– ज्ञानाद्वयत्वे जगतोऽभ्युपगम्यमाने, संसारा-ऽपवर्गयोर्विशेषः कश्चिद् न विद्यते, ज्ञानमात्रस्योभयदशयोरविशेषात्, अधिकस्यापवर्गे प्राप्यस्याभावात्, भावे वाऽद्वैतव्याघातात् । तथा चैतद् वृथोदितं भवतामागमे ॥ २९ ॥

किम् ? इत्याह—

'चित्तमेव हि संसारो रागादिक्लेशवासितम् । तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते' ॥३०॥

रागादिक्लेशवासितं चित्तमेव हि संसारः, तैर्विनिर्मुक्तं च तदेव– चित्तमेव, 'भवान्तः' इति कथ्यते– 'मोक्षः' इत्युपदिश्यत इति ॥ ३० ॥

---

१ 'मात्रतः' इति पाठो यदि स्यात्, युक्ततरः स्यात्, मूलपाठानुरोधात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथमेतद् वृथा ? इत्याह—

रागादिक्लेशवर्गो यन्न विज्ञानात्पृथग्मतः। एकान्तैकस्वभावे च तस्मिन्किं केन वासितम्? ३१

यद्- यस्मात्, रागादिक्लेशवर्गो विज्ञानात् पृथग्- भिन्नः, न मतः, द्वैतापत्तेः। एकान्तैकस्वभावे च तस्मिन्- विज्ञाने, किं केन वासितम्, वासकाभावात् ? ॥ ३१ ॥

पर आह—

क्लिष्टं विज्ञानमेवासौ, क्लिष्टता तत्र यद्वशात्। नील्यादिवदसौ वस्तु तद्वदेव प्रसज्यते॥३२॥

असौ- रागादिक्लेशवर्गः, क्लिष्टं विज्ञानमेव न तु ततो भिन्नः। एवं चाक्लिष्टत्वं क्लिष्टभिन्नत्वं, न तु पृथग्भूत-क्लेशादिराहित्यमिति न दोषः, अक्लिष्टस्य प्राप्यस्य सत्त्वाच्च नापवर्गप्रवृत्त्यनुपपत्तिरित्याशयः। अत्राह- तत्र- संसारिचित्ते, यद्वशात् क्लिष्टता, नील्यादिवत्- नीलीद्रव्याद्युपरागात् पटादिक्लिष्टतावत्, असौ- चित्तक्लिष्टतापादकः, तद्वदेव- ज्ञानवदेव, वस्तु प्रसज्यते- पृथग् वस्त्वापद्यते, क्लिष्टताया उभयजनितत्वादिति भावः ॥ ३२ ॥

तथा,

मुक्तौ च तस्य भेदेन भावः स्यात्पटशुद्धिवत्। ततो बाह्यार्थतासिद्धिरनिष्टा संप्रसज्यते ॥३३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुक्तौ च तस्य– क्लिष्टतापादकस्य, भेदेन– पृथग्भावेन, भावः स्यात्– स्वरूपाविर्भावलक्षणा शुद्धिः स्यात् । किंवत्? इत्याह– पटशुद्धिवत्– यथा पटादेर्नील्यादिद्रव्यसंसर्गापगमे प्राक्तनस्वरूपाविर्भावस्तद्वदित्यर्थः । यत एवम्; ततो बाह्यार्थतासिद्धिः, अनिष्टा– भवदनभिमता, संप्रसज्यते । तेनाक्लिष्टत्वं क्लेशराहित्यं क्लिष्टभिन्नत्वं वोच्यताम्, नोभयथापि विशेषः, प्रतियोगिनस्तदवच्छेदकस्य वा पृथग्भावावश्यकत्वेऽद्वैतासाम्राज्यात् । 'बाह्यार्थता' इत्यत्र तलः 'तत्स्वभावत्वम्' इत्यादाविव प्रकृत्यर्थमात्रे निरूढलक्षणायामपि तस्याः प्रयोगविशेषनियन्त्रितत्वादत्रासंभवत्प्रसरत्वेऽपि 'सत्पदप्ररूपणता' इत्यादाविवार्षत्वाद् न दोषः । वस्तुतो यथाश्रुतार्थेऽपि नानुपपत्तिः, बाह्यत्वसमानाधिकरणार्थतापादनेऽर्थताया बाह्यत्वसामानाधिकरण्यमात्रस्य फलत आपादनादिति ध्येयम् ॥ ३३ ॥

ननु पटादेः क्लिष्टतावद् न चित्तक्लिष्टता येन तज्जनकबाह्यार्थसिद्धिः स्यात्, किन्त्वन्यथा, इत्याशङ्कते—

प्रकृत्यैव तथाभूतं तदेव क्लिष्टेति चेत् । तदन्यूनातिरिक्तत्वे केन मुक्तिर्विचिन्त्यताम्?॥३४॥

प्रकृत्यैव– स्वभावेनैव, तथाभूतं– क्लिष्टं चित्तं, तदेव क्लिष्टता नातिरिक्तेति न दोषः । अत्रोत्तरम्– तदन्यूनातिरिक्तत्वे– बोधाद् न्यूनस्याधिकस्य वाऽभावे चित्तमात्राच्चित्तभावे सति, केन मुक्तिः, क्लिष्टस्य चित्तस्य स्वभावतस्तथाभूतस्य प्रवाहविच्छेदायोगादिति भावः ॥ ३४ ॥

---

१ आवश्यकनिर्युक्तौ पीठिकायां त्रयोदशी गाथा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु स्वभावादपि किञ्चिदेव नीलयादिवत् क्लिष्टं, किञ्चिदेव च प्रदीपादिवदक्लिष्टं चित्तं भविष्यतीत्याशङ्कते—

असत्यपि च या बाह्ये ग्राह्ये ग्राहकलक्षणे। द्विचन्द्रभ्रान्तिवद् भ्रान्तिरियं नःक्लिष्टतेति चेत्॥

असत्यपि बाह्ये ग्राह्ये ग्राहकलक्षणे च परस्परापेक्षाप्रकल्पिता ग्राह्य-ग्राहक-भावावगाहिनी 'नीलमहं वेद्मि' इत्याद्याकारा या द्विचन्द्रभ्रान्तिवद् भ्रान्तिः, इयं– अनुभवसिद्धा, नः– अस्माकं, क्लिष्टता। अत्रोत्तरम्– इति चेत्– यद्येवमुपगम्यते ॥३५॥

अस्त्वेतत्किन्तु तद्धेतुभिन्नहेत्वन्तरोद्भवा। इयं स्यात्तिमिराभावे न हीन्दुद्वयदर्शनम् ॥३६॥

अस्त्वेतदापाततः, किन्त्वियं– क्लिष्टता, तद्धेतुभिन्नहेत्वन्तरोद्भवा– क्लिष्टचित्तहेत्वतिरिक्तहेत्वपेक्षा स्यात्, हि– यतः, तिमिराभाव इन्दुद्वयदर्शनं न दृष्टम्, शङ्खपीतिमादिदर्शनहेतुकामलाद्युपलक्षणमेतत्। इत्थं च यथा तिमिरादि एकचन्द्रादिबोधहेतुभ्योऽधिकम्, तथा सत्यैतो बोधहेतोर्बोधमात्रादधिकेन क्लिष्टबोधहेतुना भवितव्यमित्यैदंपर्यम् ॥ ३६ ॥

ननु द्विचन्द्रादिज्ञान उपप्लववासनावत् सकर्मकत्वभ्रान्तावप्यनादिवासना हेतुभूतोक्तैवेति चेत्। सा किं सती, असती वा? । आद्ये द्वैतापत्तिः। अन्त्ये त्वाह—

न चासदेव तद्धेतुर्बोधमात्रं न चापि तत्। सदैव क्लिष्टतापत्तेरिति मुक्तिर्न युज्यते ॥३७॥

१ मुद्रितमूलादर्शे स्वोपज्ञटीकापुस्तके च 'ग्राह्यग्रा' इति पाठः। २ ख.ग.घ.च. 'त्याका'। ३ ज. 'त्वबो'।

न चासदेव– तुच्छमेव, तद्धेतुः, शशविषाणादेरपि तत्त्वप्रसङ्गात्। अथ सदिवासदपि किञ्चिदेव कस्यचिज्जनकम्, एवं चानाद्यविद्याख्यवासनैव क्लिष्टचित्तजननी, निवर्तते च साऽद्वयतत्त्वज्ञानात्, असतो ज्ञाननिवर्त्यत्वनियमात्, असत्यरजताकारे शुक्तितत्त्वज्ञाननिवर्त्यत्वदर्शनात्। अत एव प्रकाशमात्रमपि संसारदशायामविद्याशक्तिप्राबल्यादन्यथा प्रकाशते, तदाह धर्मोत्तरः— "तस्मादविद्याशक्तियुक्तं ज्ञानमसत्यरूपमादर्शयति, इत्यविद्यावशात् प्रकाशत इत्युच्यते" इत्यनवद्यमिति चेत्। न, अविद्याया इव तन्निवृत्तेरप्यसत्त्वे तन्निवृत्त्या[1] मुक्तस्य पुनः संसारितापत्तेः, सत्त्वे च द्वैतापत्तेः, ज्ञानरूपत्वे च ज्ञानमात्रस्य सर्वदा सत्त्वेन सदा मुक्त्यापत्तेः।

अस्तु तर्हि प्राच्यः क्लिष्टचित्तक्षण एवोत्तरक्लिष्टचित्तहेतुरित्यत्राह— न चापि बोधमात्रं तदिति तद्धेतुः, सदैव क्लिष्टतापत्तेः, मुक्तिप्राच्यक्षणस्यापि क्लिष्टत्वेनोत्तरक्लिष्टक्षणजननस्वभावत्वात्, इति हेतोः, मुक्तिर्न युज्यते भवताम्। अथ संसारोपान्त्यक्षणेनोत्तरक्लिष्टचित्तक्षणजननासमर्थस्यैवान्त्यक्षणस्य जननाद् न दोष इति चेत्। कुत एतत्?। स्वभावादिति चेत्। न, मुक्तेः स्वभावत उपपत्तौ तदर्थं प्रवृत्त्यनुपपत्तेः। भ्रमात् प्रवृत्तौ च तदर्थशास्त्रप्रणयनानुपपत्तेः। तस्मात् काल्पनिकीयं मुक्तिः, न तु परमानन्दादिमयीति न किञ्चिदेतत् ॥ ३७ ॥

इदमेवाह—

1 तन्निवृत्त्या– अविद्यानिवृत्तिनिवृत्त्या।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुक्त्यभावे च सर्वैव ननु चिन्ता निरर्थिका । भावेऽपि सर्वदा तस्याः सम्यगेतद्विचिन्त्यताम् ॥

मुक्त्यभावे च तपस्विनां सर्वैव चिन्ता– तत्त्वविचारणा, निरर्थिका, सर्वस्या एव तस्यास्तदेकपरमप्रयोजनत्वात् । बोधरूपायास्तस्या मुक्तेः सर्वदा भावेऽपि निरर्थिका चिन्ता, साध्यस्य सिद्धत्वात् । एतत् सम्यग् विचिन्त्यताम् ॥ ३८ ॥

उपसंहरन्नाह—

विज्ञानमात्रवादोऽयं नेत्थं युक्त्योपपद्यते । प्राज्ञस्यापि निवेशो न तस्मादत्रापि युज्यते ॥३९॥

[1]विज्ञानमात्रवादो यद्– यस्मात्, इत्थम्– उक्तरीत्या, युक्त्या– न्यायेन विचार्यमाणः, नोपपद्यतेः, तस्मादत्रापि– विज्ञानवादेऽपि, प्राज्ञस्यापि– कल्पनानिपुणस्यापि पुंसः, निवेशः– कदाग्रहः, न युज्यते ॥ ३९ ॥

हंसः किं सद्मपद्मं श्रयति परिगलत्पर्णमर्णः पिबेद् वा चाण्डालानां पिपासाकुलितमतिरपि श्रोत्रियः किं कदाचित् ? ।
दुष्टानां हन्त ! गोष्ठीमनुसरति रसात् सज्जनः किं गतार्थो त्याज्यस्तज्जैनतर्कैरयमिह निहतो विज्ञ ! विज्ञप्तिवादः ॥ १ ॥

अभिप्रायः सूरेरिह हि गहनो दर्शनततिर्निरस्या दुर्धर्षा निजमतसमाधानविधिना ।
तथाप्यन्तः श्रीमन्नयविजयविज्ञांह्रिभजने न भग्ना चेद् भक्तिर्न नियतमसाध्यं किमपि मे ॥ २ ॥

---

१ मुद्रितमूलपुस्तके स्वोपज्ञटीका-मूलयोश्च 'स्याभिनि' इति पाठः । २ ख. ग. घ. च. 'ज्ञा' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्यासन् गुरवोऽत्र जीतविजयप्राज्ञाः प्रकृष्टाशया भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरस्तेन न्यायविशारदेन रचितस्तर्कोऽयमभ्यस्यताम् ॥ ३ ॥

इति पण्डितश्रीपद्मविजयसोदरन्यायविशारदपण्डितयशोविजयविरचितायां स्याद्वादकल्पलताभिधानायां शास्त्रवार्तासमुच्चयटीकायां पञ्चमः स्तबकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

अथ षष्ठः स्तबकः ।

दृप्यद्यन्नखदर्पणप्रतिफलद्वक्त्रेण वृन्ददुहा शोभा कापि दशावतारसुगभा लब्धाऽनुजस्पर्धिनी ।
मुक्तिद्वारकपाटपाटनपटू दौर्गत्यदुःखच्छिदौ तावंह्री शरणं भजे भगवतो वीरस्य विश्वेशितुः ॥ १ ॥

यत्स्नात्रनीरेण नरायणस्य जरा भटानां न पराभवाय । जाग्रत्प्रभावं भगवन्तमेतं शङ्खेश्वराधीश्वरमाश्रयामः ॥ २ ॥

'सर्वमेतेन' इत्याद्यतिदिष्टमभिधित्सुराह—

यच्चोक्तं पूर्वमत्रैव क्षणिकत्वप्रसाधकम् । नाशहेतोरयोगादि तदिदानीं परीक्ष्यते ॥१॥

यच्च पूर्वमत्रैव— सुगतसुतवार्तायामेव, नाशहेतोरयोगादि क्षणिकत्वप्रसाधकं "तेयाहुः क्षणिकं सर्वम्" इत्यादिकारिकयोक्तं पूर्वपक्षिणा, तदिदानीमवसरप्राप्ततया परीक्ष्यते ॥ १ ॥

---

१ चतुर्थस्तवकेऽन्तिमा कारिका । २ चतुर्थे स्तबके कारिका २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र प्रथमहेतुं परीक्षितुं तदाशयमाविष्करोति—

हेतोः स्यान्नश्वरो भावोऽनश्वरो वा विकल्पयंत् । नाशहेतोरयोगित्वमुच्यते तन्न युक्तिमत् ॥

'हेतोः सकाशाद् नश्वरो भावः स्यात्, अनश्वरो वा?' इति विकल्पयत्– विकल्पयुगलमुत्थापयत्, नाशहेतोरयोगित्वं क्षणिकत्वप्रसाधकमुच्यते परेण। आद्ये, स्वतो नश्वरे नाशहेतूनामकिञ्चित्करत्वात्; अन्त्येऽपि स्वभावस्य पराकर्तुमशक्यत्वेन तथात्वात्। न चोत्पादेऽप्ययं पर्यनुयोगः– स्वभावतो ह्युत्पत्तिस्वभाव उत्पत्तिहेतुव्यापारवैयर्थ्यात्, अनुत्पत्तिस्वभावस्य च वक्तुमशक्यत्वादिति वाच्यम्; उत्पत्तिस्वभाव इत्यस्याऽभूत्वा भवनलक्षणोत्पत्तिरेव स्वभावो यस्येत्यर्थेऽभूतस्य भवनायोगेनोक्तदोषानिवृत्तावपि, उत्पत्तौ सत्तायां स्वभाव आभिमुख्यलक्षणो यस्य नियतहेत्वन्तरभाविन इत्यर्थे दोषाभावात्, तथैव तद्व्यपदेशोपपत्तेः; द्वितीयविकल्पस्य चानभ्युपगमादेव, अनुत्पत्तिस्वभावस्य सर्वसामर्थ्याभावलक्षणस्यानुत्पाद्यत्वादेव। न ह्युत्पत्तिहेतवोऽभावं भावीकुर्वन्तीत्यभ्युपगम्यते, 'असदुत्पद्यते' इत्यस्य 'उत्पद्यमानं प्राग् नास्ति' इत्येवार्थात्। प्राग्नास्तितायां च न भावाश्रयाणां विकल्पानां शशविषाण इव तीक्ष्णतादिगोचराणां संभवः। न च 'भावधर्मत्वाविशेषाद् नाशवदुत्पत्तेरपि किं न निर्हेतुकत्वम्?' इति शङ्कनीयम्, उदयापवर्गिणो भावाद् व्यतिरिक्तस्य नाशस्याभावात्, तस्य च स्वहेतोरेव तथाभूतस्योत्पन्नत्वेन तद्धर्मस्यानिमित्तत्वाभावात्; केवलं तमस्य स्वभावं न विवेचयति मन्दधीः, दर्शनपाटवाभावात्, विसदृशकपा-

१ मुद्रिते 'यत्' पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लादिक्षणोत्पत्तावेव भ्रान्तिकारणविगमेन प्रत्यक्षनिबन्धनतन्निश्चयोत्पादात्, विषयरूपदर्शनेऽप्यतत्कारिपदार्थसाधर्म्यविप्रलब्धस्य प्राक्कारणशक्त्यविवेचनेऽपि विकारदर्शनानन्तरं तन्निश्चयवदिति। अत्रोत्तरम्– तद् न युक्तिमत्– एतदुक्तं न युक्तम्॥२॥

कुतः? इत्याह—

हेतुं प्रतीत्य यदसौ तथानश्वर इष्यते। यथैव भवतो हेतुर्विशिष्टफलसाधकः॥३॥

हेतुं– मुद्गरादिकम्, प्रतीत्य, यदसौ– भावः, तथानश्वरः– प्रायोगिकादिनाशापेक्षया नश्वरस्वभावः, इष्यते। निदर्शनमाह– यथैव भवतः– सुगतसुतस्य, हेतुः– घटादिः, विशिष्टफलसाधकः– मुद्गरादिकं प्रतीत्य विजातीयकपालादिक्षणजननस्वभाव इष्टः। एतेन'

"स्वभावोऽपि स तस्येत्थं येनापेक्ष्य निवर्त्यते। विरोधिनं यथान्येषां प्रवाहो मुद्गरादिकम्॥ १॥"

इति समाधानं न युक्तम्, यतो नास्माभिर्विशरारुक्षणव्यतिरिक्तोऽपरः प्रवाहोऽभ्युपगम्यते, यः स्वनिवृत्तावकिञ्चित्करं मुद्गरादिकमपेक्षते, किन्तु परस्परव्यतिरिक्ताः पूर्वापरक्षणा एव, ते च स्वरसत एव विरुध्यन्त इति न काचिदकिञ्चित्करापेक्षा निवृत्तिः' इत्युक्तावपि न क्षतिः, विलक्षणहेतुं प्रतीत्य नश्वरस्वभावस्य तस्य तं प्रतीत्य विलक्षणजननस्वभावत्वाभ्युपगमसमसमाधानत्वात्॥ ३॥

एतदेव भावयन्नाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथास्वभाव एवासौ स्वहेतोरेव जायते । सहकारिणमासाद्य यस्तथाविधकार्यकृत् ॥४॥

तथास्वभाव एवासौ घटादिः, स्वहेतोरेव सकाशाज्जायते, यः सहकारिणं– मुद्गरादिकम्, आसाद्य, तथाविधकार्यकृत्– विजातीयकपालादिकार्यकारी । तदपेक्षस्यैव हि घटक्षणस्य समानक्षणान्तरोत्पादनासमर्था-ऽसमर्थतरा-ऽसमर्थतमादिक्षणान्तरोत्पादनमक्रमेण घटसंततिनिवृत्तौ कपालादिक्षणोत्पत्तेरभ्युपगमात् ॥ ४ ॥

उपचयमाह—

न पुनः क्रियते किञ्चित्तेनास्य सहकारिणा । समानकालभावित्वात्तथाचोक्तमिदं तव ॥५॥

न पुनस्तेन मुद्गरादिना सहकारिणा, तस्य– घटस्य, क्रियते किञ्चित्– अतिशयाधानम् । कुतः ? इत्याह– द्वयोः सहकार्य-सहकारिणोः, समानकालभावित्वात्– एककालोत्पत्तिकत्वात्, अतिशयस्य च सहकार्यगतस्य तत्स्वरूपत्वात्, कार्यकारणभावस्य च पौर्वापर्यनियतत्वात् । संवादमाह– तथाचोक्तमिदं– वक्ष्यमाणम्, तव स्वशास्त्रे ॥ ५ ॥

'उपकारी विरोधी च सहकारी च यो मतः । प्रबन्धापेक्षया सर्वो नैककाले कथंचन ॥६॥'

उपकारी– क्षीरादिर्बालादेः, विरोधी– नकुलादिः सर्पादेः, सहकारी– मुद्गरादिः कपालादेः, यो मतः– इष्टः, स प्रबन्धापेक्षया– सन्तानापेक्षया, सर्वः– निरवशेषः, नैककाले कथंचन, बालादिसत्ताया एव बालाद्युपकारकत्वात् । स्वसभाग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षणोत्पत्तिर्हि उपकारः, स्वविसभागक्षणोत्पत्तिश्च विरोधः, स्वोत्पत्तिरेव च सहकार इति ॥ ६ ॥

तथैव चोक्तमन्यत्—

'सहकारिकृतो हेतोर्विशेषो नास्ति यद्यपि । फलस्य तु विशेषोऽस्ति तत्कृतातिशयाप्तितः ७'

सहकारिकृतो हेतोः– घटादेः, विशेषो नास्ति, यद्यपि– समानकालत्वाद् द्वयोः, तथापि फलस्य तु– कलापादेः, तत्कृतातिशयाप्तितः– सहकारिकृतातिशयाप्तेर्विलक्षणक्षणाभिन्नायाः, विशेषोऽस्ति विद्यत एव, तदपेक्षयैव घटक्षण-मुद्गरक्षणयोः सहकार्यसहकारिभावादिव्यवहारात् ॥ ७ ॥

इदं चोक्तं यथोक्तस्वभावाभ्युपगमं विना न निर्वहेदित्याह—

न चास्यातत्स्वभावत्वे स फलस्यापि युज्यते । सभागक्षणजन्माप्तेस्तथाविधतदन्यवत् ॥८॥

न चास्य हेतोः– घटादेः, अतत्स्वभावत्वे– मुद्गरादिकमवाप्य कपालादिजननास्वभावत्वे, सः– विशेषो विलक्षणक्षणात्मा, फलस्यापि– कपालादेः, युज्यते । कुतः ? इत्याह– सभागक्षणजन्माप्तेः– घटादिक्षणोत्पत्तिप्रसङ्गात् । किंवत् ? इत्याह– तथाविधतदन्यवत्– घटादिजननस्वभाववद्घटादिवत् । यद्यप्यत्र 'अन्त्यघटक्षणः कपालादिजननास्वभावः स्याद् घटक्षणजनकः स्यात्' इति नापादनं संभवति, पटादौ व्यभिचारात्; तथाप्यन्यक्षणजननहेत्वभावादर्थात् तदापत्तिः; असमर्थत्वादन्त्यघटक्षणो नाग्रिमसमानक्षणारम्भक इति मुद्गराद्यभावे समानक्षणान्तरोत्पादकापरसमर्थजननं, तत्संनिधाने स्वसमर्थक्षणान्तरजननमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवस्थाया मुद्गरादिना तत्सामर्थ्यविघातं विना वक्तुमशक्यत्वात्; अन्यथा तत्रापि समर्थक्षणान्तरजननस्वभावस्य कारण-परम्परायातस्यानपायात्, स्वहेतुतोऽसमर्थजननस्वभावस्यैव तस्योत्पत्तौ च प्रथमत एव संतत्युच्छेदप्रसङ्गात् ।

अथ स्वत एव निवर्तमाना घटक्षणजननी शक्तिः, प्रवर्तमाना वा कपालक्षणजननी शक्तिरवर्जनीयसंनिधिकं मुद्गरादिकं नापेक्षत इति चेत् । साधु बुद्धं बुद्धदर्शनम्, येनैवं नियतान्वय-व्यतिरेकदर्शनावगणनादग्न्यादौ पाकाद्यर्थिनामपि नियमतः प्रवृत्तिमपोहितुं व्यवसितोऽसि । तस्माद् मुद्गरादिना घटसामर्थ्याव्याहतावयं तर्कः-अन्त्यघटक्षणो यद्यव्याहतघटजननस्वभावः स्यात् समानक्षणोपहितः स्यादिति । अथ घटाकुर्वद्रूपत्वादेवान्त्यघटक्षणो घटं न कुरुते, कपालकुर्वद्रूपत्वात्तु कपालं कुरुत इति चेत् । तथापि मुद्गरादिसंनिधावेव तत्कुर्वद्रूपमिति "तद्धेतु०" इति न्यायात् स्थिरोऽपि तत्संनिहित एव कपालादिजननस्वभावो नश्वरस्वभावो वा घटोऽस्त्विति किमनुपपन्नम्? ॥ ८ ॥

एवं चान्यदप्यसमीक्षिताभिधानं परस्येति दर्शयन्नाह—

अस्थानपक्षपातश्च हेतोरनुपकारिणः । अपेक्षायां नियुङ्क्ते यत्कार्यमेतद् वृथोदितम् ॥९॥

अस्थानपक्षपातश्च- अयमयुक्तापेक्षात्मा, हेतोः- घटादिजनकस्य, यदनुपकारिणो मुद्गरादेरपेक्षायां नियुङ्क्ते कार्यम्-घटादि, तदपेक्षस्यैव नश्वरत्वाभ्युपगमात् । तदुक्तम्- "हेतवश्चानुपकार्यपेक्षायां नियुञ्जानाः स्वकार्यम्, आत्मनोऽस्थानपक्षपातित्वमाविष्कुर्युः" इति । एतद् वृथोदितं शुभगुप्तादिना ॥ ९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथम् ? इत्याह—

यस्मात्तस्याप्यदस्तुल्यं विशिष्टफलसाधकम् । भावहेतुं समाश्रित्य ननु न्यायान्निदर्शितम्

यस्मात् तस्यापि– परस्यापि, एतत्– अस्थानपक्षपातापादनम्, तुल्यं, विशिष्टफलसाधकं– विजातीयकपालादिक्षणजननस्वभावम्, भावहेतुं– घटादिकं, समाश्रित्य, ननु– निश्चितम्, न्यायाद् निदर्शितम्– तुल्ययोग-क्षेमतयोपदर्शितम् । एतदुक्तं भवति– अस्थानपक्षपातित्वं यदि दण्डादिनाऽनश्वरस्वभावस्यैव घटस्योत्पादितत्वाद् नश्वरस्वभावस्य तस्य मुद्गरादिनैव जनितत्वाद् घटमात्रे दण्डादिनां व्यभिचारित्वम्, तदा तवापि तस्य दण्डादिनाऽसमानक्षणाजननस्वभावस्यैवोत्पादितत्वाद्तादृशस्य तस्यान्यत एवोत्पत्तेस्तुल्यम् । अथ तत्रान्येन तज्जननस्वभावतैव कृतेत्यदोषः, तदा ममापि तन्निवृत्तिस्वभावतैव कृतेत्यदोष इति । एवं 'स्वकार्यकारित्वमेव मुद्गरादेर्न तु स्वकारित्वम्' इत्ययमपि परिहारस्तुल्य इत्यादि सूक्ष्मधियाऽभ्यूहनीयम् ॥ १० ॥

इत्थं चान्यदप्यत्र दूषणं न युक्तमित्याह—

एवं च व्यर्थमेवेह व्यतिरिक्तादिचिन्तनम् । नाश्यमाश्रितस्य नाशस्य क्रियते यद्विचक्षणैः

एवं च नाश्यं घटादिकमाश्रित्य नाशस्य विचक्षणैर्व्यतिरिक्तादिचिन्तनं यत् क्रियते, तदपीह– नाश्यविचारे, व्यर्थम्, भावतुल्यत्वात्; तथाहि– परेषामिदमाकूतं यद्– नाशो नाश्याद्‌तिरिच्यते, नवा ? । अन्त्ये भाव एव नाशः, स च सहेतुक

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवेति न परेषां साध्यसिद्धिः। आद्ये, अग्न्यादेरवस्तुरूपध्वंसोपगमेऽपि काष्ठादेस्तदवस्थत्वात् पुनरुपलब्धिप्रसङ्गः, वस्तुरूपतदुपगमे च काष्ठादेरङ्गारादिकमेव ध्वंसो नापर इत्यत्र किं निबन्धनम्?। तस्मिन् सति तन्निवृत्तिरिति चेत्। न, अन्यनिवृत्त्यनभ्युपगमेनैतदर्थाभावात्। किञ्च, एवं भावनिवृत्तावभिधेयायां भावान्तरविधानमभिहितमित्यप्रस्तुताभिधानम्। किञ्च, भावान्तरस्य प्रध्वंसत्वे तद्विनाशाद् घटाद्युन्मज्जनप्रसक्तिः। न च कपालादेर्भावरूपतैव ध्वस्ता न स्वभावरूपतेति नायं दोष इति वाच्यम्, भावान्तररूपस्याभावस्य तदभावे प्रच्युतत्वात्। किञ्च, अभावस्तुच्छैकरूपतयैवानुभूयते, न तु भावरूपानुविद्धः, तस्य च कार्यत्वे हेत्वनन्तरं भवितृत्वेन भावत्वं स्यात्, अभावात्मकतयैवासौ भवतीति च व्याहतमेतत्।

अपि च, यदि हेतुमान् विनाशस्तदा तद्भेदादात्मभेदं किं नानुभवेत्?। दृष्टो हि घटादीनां कार्यरूपाणां कारणभेदाद् भेदः। ध्वंसस्य त्वग्न्यभिघातादिहेतुभेदेऽपि न भेदोऽनुभूयते, सर्वत्र विकल्पज्ञाने तुल्यरूपस्यैवाभावस्यावभासनात्। किञ्च, अस्य हेतुमत्त्वे विनाशप्रसङ्गो दुरुद्धरः, तद्विनाशहेत्वदर्शनात्। तदविनाशे बुद्ध्यादीनामप्यनाशप्रसङ्गः। कार्यत्वेन प्रतियोगितया नाशहेतुत्वाद् बुद्ध्यादीनां विनाशः कल्प्यत इति चेत्। तुल्यमिदमन्यत्र। भावकार्यत्वेनैव तथात्वाद् न दोष इति चेत्। न, भावत्वप्रवेशे गौरवात्, प्रागभावासंग्रहाच्च। यस्तु घटनाशनाशादिधारामेव घटविरोधिनीमङ्गीकुरुते, तस्य 'घटनाशो नष्टः' इत्यपि धीर्दुर्निवारा। तस्माद् मुद्गरादेः कपालाद्युत्पत्तावन्तरा कस्यचिद् ध्वंसस्यादर्शनादकिञ्चिद्रूपतयानुभूयमानोऽसन्नेवाऽयम्, न तु सहेतुकः, अनन्ततद्धेत्वादिकल्पने गौरवाच्चेति।

१ कपालादेरभावरूपताया अभावे स्वीक्रियमाण इत्यर्थः।

अत्र ब्रूमः– अङ्गारादिसदंशानुविद्धासदंशरूपायाः काष्ठादिनिवृत्तेरभ्युपगमे किं दूषणम् ? । 'काष्ठादेरङ्गारादिकमेव ध्वंसो नापरः' इत्यत्र किं निबन्धनम् ? इत्यत्र 'अङ्गारादिरूपध्वंसे काष्ठादिनिरूपितत्वे किं प्रमाणम् ?' इति प्रश्ने तत्प्रतियोगिकत्वेनानुभवस्यैवोत्तरत्वात् । 'अङ्गारादेस्तद्ध्वंसत्वे किं मानम् ?' इति प्रश्ने च 'तस्मिन् सति तन्निवृत्तिः' इत्येवोत्तरम्, 'अङ्गारादिकं काष्ठध्वंसः, काष्ठानुपलब्धिनियतोत्पत्तिककाष्ठपरिणामत्वात्, काष्ठचूर्णवत्' इत्यनुमानात् । अन्यस्य तथात्वं किं न भवति ? इत्यत्र च स्वभाव एव नियामकः । कपालस्वरूपानुभवे घटनिवृत्त्यननुभवाद् न तद्रूपा तन्निवृत्तिरिति चेत् । न, कपालोत्पादस्याऽप्येवमतद्रूपत्वापत्तेः । कपालाद्यभिन्नायां निवृत्तौ, उत्पत्ताविव घटीयत्वं न स्यादिति चेत् । न, 'घटादुत्पन्नः' इत्युत्पत्तौ घटावधिकत्ववद् 'घटस्य नाशः' इत्यत्र निवृत्त्यंशेऽपि घटप्रतियोगिकत्वेऽविरोधात्, एकान्त एव तत्प्रसरात् । एवं चाप्रस्तुताभिधानमपि निरस्तम्, निवृत्त्यंशस्याधिकत्वात् । एतेन भावान्तररूपत्वे ध्वंसस्य तन्नाशे प्रतियोग्युन्मज्जनमपि निरस्तम्, कपालद्रव्यस्य भावात्मकरूपान्तरपरिग्रहेऽपि निवृत्त्यात्मकरूपान्तरापरिग्रहात् । कपालात्मना भङ्गुरं कपालं घटनिवृत्त्यात्मनापि किं न भङ्गुरम् ? इति चेत् । कपालैक्योपलम्भजनकदोषात्मना निवर्तमाना कपालक्षणसंततिर्मृदैक्योपलम्भजनकदोषात्मनापि किं न निवर्तते ? इति वक्तव्यम् । सा संततिः प्रदीर्घेति चेत् । निवृत्तिसंततिरपि तथा । इयांस्तु विशेषः– यदियं निवृत्त्यात्मना प्रत्यभिज्ञा विशेषात्मकमृदविखण्डैकतां, प्रतिकपालादिविशेषं च भावात्मना सखण्डैक-
३३ तामनुभवतीति । कपालात् पृथक्कृत्य 'घटनाशं कपालं नष्टं' इतिवद् 'घटनाशो नष्टः' इति किं न प्रयोगः ? इति चेत् । न यथा मृद्द्रव्यं नष्टमिति । विवक्षाभेदेन तत्र योग्या-योग्यत्वमिति चेत् । तुल्यमेतदन्यत्र ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्तु– 'तुच्छैकरूपतयाऽनुभूयतेऽभावः' इत्युक्तम् । तदनभ्युपगमोपहतम्, उभयरूपस्यैव तस्यानुभवात् । अभावांशानुभवकाले भावत्वेनाननुभूयमानत्वं तुच्छत्वमिति चेत् । भावांशानुभवकालेऽभावत्वेनाननुभूयमानत्वमपि किं न तथा ? । शशविषाणादिवद् निःस्वभावतयाऽनुभूयमानत्वं तुच्छत्वं चेत् । न, असिद्धेस्तत्तुल्यत्व उत्पादादियोगितयाऽननुभवप्रसङ्गात् । किञ्च, अयमीदृशः सन् मुद्गरादिव्यापारानन्तरमेव कथमुपलभ्यते, नान्यदा ? इति । असतोऽपि शुक्तौ रजतादेः शुक्तिभ्रमदशायामेव दर्शनवदसन्नपि घटध्वंसः परैस्तद्धेतुत्वाभिमतानां समवधान एवोपलभ्यत इति चेत् । नन्वेवमनन्यथासिद्धान्वय-व्यतिरेकप्रतियोगिमुद्गरादिजन्यत्वस्य घटध्वंसेऽपलापे घटादेरप्यसत एव दण्डादिसमाजे भानोपपत्तावपलापप्रसङ्गः । न चेष्टापत्तिरत्र योगाचारस्येति वाच्यम्, ज्ञानाकारस्यापि घटादेरसत एव तदा स्फुरणापत्तेः । घटाद्यर्थिप्रवृत्त्याद्यन्यथानुपपत्त्या घटादेः सत्त्वोपगमे घटध्वंसाद्यर्थिप्रवृत्त्यन्यथानुपपत्त्या घटध्वंसादेरपि सत्त्वं किं नेष्यते ? ।

यदपि 'भवितृत्वेऽभावस्य भावत्वं स्यात्' इति । तदप्यवद्यम्, अभावप्रत्ययविषयत्वेन भवितृत्वेऽप्यभावरूपत्वात्; यथा भवितृत्वेनाविशेषेऽपि घट-पटयोः 'घटोऽयम्' 'पटोऽयम्' इति विभिन्नधीविषयत्वाद् विशेषस्तथा भवितृत्वेनाविशेषेऽपि भावा-ऽभावयोः 'अस्ति' 'नास्ति' इति धीविषयत्वेन विशेषसंभवात् । यदपि 'अभावात्मकतयैव चासौ भवतीति च व्याहतमेतत्' इति । तदपि तुच्छम्, अभावपदस्याभवनरूपक्रियार्थत्वाभावात्, भावत्वस्य भावपदस्येवाभावत्वस्यैवाभावपदस्य प्रवृत्तिनिमित्तत्वात्; अन्यथा 'भावो भवति' इति 'भवनं भवति' इतिवद् निराकाङ्क्षं स्यात् । अथ 'नास्ति' इति धीविषयत्वादेव शशविषाणादिवद् न नाशः कार्य इति चेत् । 'अस्ति' इति धीविषयत्वादाकाशादिवद् घटादेरपि न तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात्; हेत्वन्वय-व्यतिरेकानुविधानं चोभयत्र तुल्यमिति।

अथ मुद्गराद्यन्वय-व्यतिरेकानुविधानं कपालजनन उपक्षीणम्, यथा नैयायिकादीनां भूतले घटानयनं भूतलघटसंयोगजनने, तस्य प्राग्वर्तिघटात्यन्ताभावानाशकत्वात्; घटानुपलम्भस्तु तदा स एव स्वरसतो न भवतीति हेतोरिति चेत्। न, 'स न' इत्यत्र नञ्शब्दवाच्यस्यैवाभावस्याभ्युपगमात्। किञ्च, तदा 'घटो न भवति' इत्येतावन्मात्रं न प्रतीयते, किन्तु 'घटो नष्टः' इति। यदपि 'यदि हेतुमान् विनाशस्तदा तद्भेदादात्मभेदं किं नानुभवेत्?' इत्याद्युक्तम्। तदप्ययुक्तम्, उत्पादेऽप्यस्य पर्यनुयोगस्य समानत्वात्। उत्पत्त्याश्रयविशेषादुत्पादविशेष इष्ट एवेति चेत्। नाशाश्रयविशेषाद् नाशविशेषोऽपीष्यताम्। उत्पादाद्यन्वितधर्मिण एव स्वहेतुजन्यत्वादुत्पादस्य स्वातन्त्र्येणाजन्यत्वाद् न विशेष इति चेत्। नाशाद्यन्वितकपालादिधर्मिण एव मुद्गरादिजन्यत्वाद् नाशस्यापि तथात्वाद् न विशेष इति तुल्यम्।

किञ्च, हेतुभेदकृतो व्यक्तिविशेषो नाशेऽभ्युपगम्यत एव, जातिरूपविशेषस्तु भावधर्मत्वादेव तत्र नास्तीति किमपरमापाद्यते? न हि विजातीयहेतुजन्यत्वं कार्यवैजात्यप्रयोजकम्, एकत्रापि घटे दण्डादिनानाजातीयहेतुजन्यत्वेन नानाजातीयत्वप्रसङ्गात्, किन्तु तज्जातीयसामग्रीजन्यत्वं तज्जातीयत्वप्रयोजकमिति। तथा च घट-पटादीनां विजातीयानां स्वस्वसामग्रीप्रयोज्यवैजात्यसंभवेऽपि नाशानां सर्वेषामेकरूपाणां स्वस्वसामग्रीभेदजन्यत्वेऽप्येकत्वं न विहन्यत इति। एतेन 'प्रतिपुरुषं कर्मणां विशेषात् तत्क्षयस्यापि जन्यस्य सतो विशेषसंभवात् प्रतिपुरुषं मुक्तिवैचित्र्यं स्यात्' इति निरस्तम्, अविशिष्टस्वभावस्य हेतुसहस्रेणापि विशेषयितुमशक्यत्वात्, विभिन्नसामग्रीजन्यतायां च प्रतियोगिभेदस्यैव निवेशनीयत्वादिति विपश्चित-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्यत्र। एतेन 'तद्रूपावच्छिन्नजन्यतारूपं स्वातन्त्र्यं नोत्पादे नाशे च तदव्याहतम्, घटध्वंसार्थितया प्रवृत्तेः' इत्युक्तावपि न क्षतिः।

यदपि 'किञ्च, अस्य हेतुमत्त्वेऽपि नाशप्रसङ्गो दुरुद्धरः' इत्याद्यभाणि। तदपि न निरवद्यम्, समुदयकृतादिनाशविशेषस्य नष्ट इति व्यवहारहेतोर्विशेषसामग्र्यभावादेवाभावात् [1]त्रैलक्षण्यरूपवस्तुलक्षणघटकस्य तु कस्यचिद् नाशस्य तत्राभ्युपगमादेव। न च कपालादिनाश एव तदाश्रितघटनाशादिनाशहेतुरिति वाच्यम्, [2]अस्माकमाश्रयनाशस्याश्रितनाशाहेतुत्वात्, घट-तद्रूपादीनामेकदैव नाशात्, तत्तन्नाशविशेषे तत्तच्छक्तिविशेषस्यैव नियामकत्वात्। किञ्च, कार्यत्वेन नाशहेतुत्वमप्याकाशादीनां नाशानुपपत्त्यैव कल्प्यते, अन्यथा सत्त्वेनैव तत्त्वं स्यात्; तथाच नाशस्यापि तदनुपपत्त्या नाशेतरत्वमपि निवेश्यताम्, गौरवस्य प्रामाणिकत्वादिति। यदपि मुद्गरादेः कपालाद्युत्पत्तावन्तरा ध्वंसादर्शनमुक्तम्। तदनुक्तोपालम्भमात्रम्। तस्माद् नाकिञ्चिद्रूपो नाश इति सिद्धः सहेतुकोऽयम् ॥ ११ ॥

अत्रैव दोषान्तरमाह—

किञ्च निर्हेतुके नाशे हिंसकत्वं न युज्यते। व्यापाद्यते सदा यस्मान्न कश्चित्केनचित्क्वचित् ॥

किञ्च, निर्हेतुके नाशेऽभ्युपगम्यमाने, हिंसकत्वं न युज्यते क्वचित् कस्यचित्। कथमित्याह– यस्माद्धेतोः, सदा,

१ उत्पाद-व्यय-ध्रौव्यस्वरूपम्। २ आर्हतानाम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केनचित्– लुब्धकादिना, क्वचित्– अरण्यादौ, कश्चित्– शूकरादिः, न व्यापाद्यते, अहिंसादशायामिव हिंसादशायामपि प्राणिक्षणानां स्वत एव नश्वरत्वात्, सांवृतनाशस्य च खपुष्पवदनुत्पाद्यत्वादिति भावः ॥ १२ ॥

पराभिप्रायमाशङ्क्य परिहरति—

कारणत्वात्स संतानविशेषप्रभवस्य चेत् । हिंसकस्तन्न संतानसमुत्पत्तेरसंभवात् ॥१३॥

सः– लुब्धकादिः, संतानविशेषप्रभवस्य– शूकरादिविसभागसंतानोत्पादस्य, कारणत्वाद् हिंसकः– शूकरादिव्यापादकः, चेत्– यद्येवं मन्यसे । तन्न– तदयुक्तम्, संतानसमुत्पत्तेस्त्वदभिप्रायेणासंभवात् ॥ १३ ॥

असंभवमेव विवृणोति—

सांवृतत्वाद् व्ययोत्पादौ संतानस्य खपुष्पवत् । न स्तस्तद्धर्मत्वाच्च हेतुस्तत्संभवे कुतः ?॥

सांवृतत्वात्– अपरमार्थसत्त्वात्, व्ययो-त्पादौ– नाशो-त्पत्ती, संतानस्य, खपुष्पवत्– वियत्कुसुमस्येव, न स्तः– न संभवतः, नाशो-त्पादयोर्वस्तुधर्मत्वात्; तद्धर्मत्वाच्च– संतानाधर्मत्वाच्चोत्पादस्य, तत्संभवे– संतानविशेषप्रभवे, हेतुः कुतः ?– न कुतश्चिदित्यर्थः ॥ १४ ॥

पुनः पराशयमाशङ्क्य परिहरति—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विसभागक्षणस्याथ जनको हिंसको, न तत् । स्वतोऽपि तस्य तत्प्राप्तेर्जनकत्वाविशेषतः ॥

अथ विसभागक्षणस्य– शूकरक्षणात् शशक्षणादेः, जनकः, हिंसको लुब्धकक्षणः, चरमशूकरक्षणात् शशक्षणसमानकालभावी तज्जनितकर्मवासनया चाग्रिमलुब्धकक्षणेषु तत्कर्मविपाकफलोपभोग इति भावः । न तत्– नैतदेवम् । कुतः ? इत्याह– स्वतोऽपि– स्वात्मनोऽपि, तस्य– हिंस्यस्य शूकरक्षणादेः, तत्प्राप्तेः– हिंसकत्वप्राप्तेः । कथम् ? इत्याह– जनकत्वाविशेषतः– लुब्धकक्षणस्येव शूकरक्षणस्यापि जनकत्वमात्रेऽविशेषात् । निमित्तकारणतया विसभागक्षणजनकत्वं हिंसकत्वम्, शूकरक्षणस्तूपादानतया तज्जनक इति न दोष इति चेत् । न, आत्महिंसासंग्रहानुरोधेन हिंसकतायां जनकताविशेषस्यानुपादानात् । तथाप्यत्र परहिंसकत्वे विशेषोऽयमुपादीयत इति चेत् । किं ततः ?– एवमपि शूकरक्षणादेरात्महिंसकताकृतदोषापत्तेर्वज्रलेपायमानत्वादिति भावः ॥ १५ ॥

इहैवाक्षेप-परिहारावाह—

हन्म्येनमिति संक्लेशाद्धिंसकश्चेत्प्रकल्प्यते । नैव त्वन्नीतितो यस्मादयमेव न युज्यते॥१६॥

‘हन्म्येनम्’ इति संक्लेशाद् हेतोः, हिंसकः प्रकल्प्यते लुब्धकादिक्षणः, क्लिष्टविज्ञानक्षणस्यैव क्लिष्टकर्मक्षणहेतुत्वात्– मृगमव्यापादयन्नपि ‘मृगं हन्मि’ इति संक्लेशपरिणतः पापेन बध्यते, यतमानश्च विचरन्ननाभोगाद् घ्नन्नपि कथंचिल्लघुप्राणिनं न पापेन बध्यते त्वसंक्लिष्ट इत्यन्वय-व्यतिरेकदर्शनात् । न चैवं व्यापादिता-ऽव्यापादितमृगयोः संक्लिष्टक्षणयोरविशिष्टकर्मार्जन- ॥१९५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रसङ्गः, तत्सामर्थ्यविशेषेण कार्यविशेषात् । हिंसकत्वव्यवहारस्तु तथाविधविकल्परूपः सांवृतं नाशमाद्रायैवेति न दोष इति चेत् । नैतदेवम्, यस्मात् त्वन्नीतितः– त्वदभ्युपगतन्यायात्, अयमेव– संक्लेश एव, न युज्यते ॥ १६ ॥

कथम्? इत्याह—

संक्लेशो यद् गुणोत्पादः स चाक्लिष्टान्न केवलात् । न चान्यसचिवस्यापि तस्यानतिशयात्ततः ॥

यद्– यस्मात्, संक्लेशो गुणोत्पादः– क्लिष्टचित्तोत्पादः, स च केवलात्– अन्यसहकारिरहितात्, अक्लिष्टादुपादानात्, न भवति, ततोऽसंक्लिष्टचित्तस्यैवोत्पादात् । न चान्यसचिवस्यापि– हिंस्यादिसहकारिसमवहितस्यापि; तस्य– उपादानस्य, अनतिशयात्, ततः– अन्यसहकारिणः सकाशात् संक्लेश इति योगः, अनतिशयस्य समानासमानकालकरणायोगात् ॥१७॥

पराशयमाशङ्क्य परिहरति—

तं प्राप्य तत्स्वभावत्वात्ततः स इति चेन्ननु । नाशहेतुमवाप्यैवं नाशपक्षेऽपि न क्षतिः॥१८॥

तं– हिंस्यादिकं, प्राप्य, तत्स्वभावत्वात्– संक्लेशजननस्वभावत्वात् तदुपादानस्य, ततः– सहकारिणः, सः– संक्लेश इति चेत् । नन्वेवं नाशहेतुं– मुद्गरादिकम्, अवाप्य, एवं– स्वभावकल्पनायां, अनाशपक्षेऽपि न क्षतिः– न विरोधः, तस्यापि तं प्राप्य स्वनिवृत्तिस्वभावत्वात् । न च वस्तुमात्रजनका एव नाशजनका इति नाशजनने न सहकार्यनुप्रवेशापेक्षा, असंक्लेशमात्रजनका एव च न संक्लेशजनका इति संक्लेशे जननीये तदुपादानक्षणानां तदपेक्षा, शिंशपाक्षणानामिव चलशिंशपायां जननीयायां नोदना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्यपेक्षेति वाच्यम्; लुब्धक-शिंशपामात्रजनकानामेवासंक्लेशा-ऽचलशिंशपाजनकत्वाभावेन तत्रापि सहकार्यन्तरापेक्षावश्यकत्वात्, आर्थिकत्वस्यापि विनिगमात्, सहकारिप्रसूतविशेषस्यापि क्षणपरम्परासंक्रान्तस्यापरित्यागे विशेषान्तरानुपादानप्रसङ्गात्, तत्परित्यागश्चान्यत एव । इति सिद्धं 'नाशहेतुता' इत्याम्रेडिततत्त्वमेतत् ॥ १८ ॥

विकल्पमात्रेण नाशकत्वोच्छेदे[1] जनकत्वस्याप्युच्छेद इति प्रतिबन्द्या केचित् समादधत इत्याह—

अन्ये तु जन्यमाश्रित्य सत्स्वभावाद्यपेक्षया । एवमाहुरहेतुत्वं जनकस्यापि सर्वथा ॥१९॥

अन्ये त्वाचार्याः, एवं–नाश्यमाश्रित्य नश्वरस्वभावत्वाद्यपेक्षावत्, जन्यं– कार्यम्, आश्रित्य, सत्स्वभावाद्यपेक्षया– हेतुत्वेनाभिमतः किं सत्स्वभावजन्यजनकस्वभावः, उतासत्स्वभावजन्यजनकस्वभावः, आहोस्विदुभयस्वभावजन्यजनकस्वभावः, उताहो अनुभयस्वभावजन्यजनकस्वभावः ? इति विकल्पचतुष्टयरूपया; जनकस्यापि– उत्पादकस्यापि, न केवलं नाशहेतोरेवेत्यर्थः, अहेतुत्वमाहुः– आपादयामासुः ॥ १९ ॥

एतदेव स्पष्टयन्नाद्यविकल्पे दोषमाह—

न सत्स्वभावजनकस्तद्वैफल्यप्रसङ्गतः । जन्मायोगादिदोषाच्च नेतरस्यापि युज्यते ॥२०॥

न सत्स्वभावजनकः– नोत्पादहेतुः सत्स्वभावजन्यजनकस्वभावः । कुतः ? इत्याह– तद्वैफल्यप्रसङ्गतः– सत्स्वभावत्वे-

[1] ज. 'देन ज'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैव जन्यस्य जनकव्यापारवैफल्यात्, सत एव करणे चानिष्ठितेः। यदि च स्वकारणादुत्पत्तिरात्मलाभो यस्य स स्वोत्पत्तिधर्मा तं यदि स्वहेतुर्नोत्पादयेत्, तदा विरुद्धमभिधानं स्यात्, उत्पत्त्यनन्तरं च तस्य स्वत एव नाशात् कस्य पुनरुत्पत्तिरिति नानिष्ठितिरित्युच्यते; तदा विनाशकारणाद्द विनाश आत्मप्रच्युतिलक्षणो धर्मो यस्य तं यदि विनाशहेतुर्न विनाशयेत् तदा विरुद्धाभिधानं स्यादित्याद्यपि तुल्यम्। द्वितीये दोषमाह– जन्मायोगादिदोषाच्च– इतरस्याप्यसत्स्वभावस्य जन्यस्यापि, जनक इति पृथक्कृतयोगः, न युज्यते 'जननस्वभावः' इति शेषः। असतो जन्मायोगश्च जन्मनः सत्तारूपत्वेन प्रकृत्यन्यथात्वानुपपत्तेः, उत्पत्तौ वोत्पादहेतुनाऽसतः सत्करणवद्द नाशहेतुनापि सतोऽसत्करणसंभवात्, असत्कार्यपक्षोक्तसकलदोषप्रसङ्गाच्च ॥ २० ॥

अन्त्यविकल्पद्वये दोषमाह––

न चोभयादिभावस्य विरोधासंभवादितः। स्वनिवृत्त्यादिभावादौ कार्याभावादितोऽपरे॥

न चोभयादिस्वभावस्य– उभयस्वभावस्य, अनुभयस्वभावस्य वा जन्यस्य जननस्वभावो जनकः। कुतः? इत्याह– विरोधासंभवादितः– उभयस्वभावजन्यजनकत्वे वस्तुविरोधेऽपि स्वमतविरोधात्, अनुभयस्वभावजन्यजनकत्वे चासंभवात्– तादृशस्य जन्यस्य निःस्वभावत्वेनानुपलब्धेः। आदिना जन्यस्योभयस्वभावत्वे वस्तुन एव स्थिरा-ऽस्थिरोभयस्वभावत्वे किमीदृशप्रयासेन? इत्यादि द्रष्टव्यम्। परेषां पुनरिह प्रकारान्तरेणानिष्टापादनविधिमाह– स्वनिवृत्त्यादिभावादौ– जनकस्य निवृत्त्यादिस्वभावत्वे, कार्याभावादितः– कार्यानुत्पत्त्यादिदोषप्रसङ्गात्, अपर आचार्याः, जनकस्याहेतुत्वमाहुः। इदमुक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति– स जनकः स्वनिवृत्तिस्वभावः स्यात्, कार्यजननस्वभावो वा, उभयस्वभावो वा, अनुभयस्वभावो वा ?। आद्ये, स्वयं निवर्तेतैव न कार्यं जनयेत्। द्वितीये, कार्यमेव जनयेद् न निवर्तेत। तृतीय-चतुर्थयोस्तु विरोधा-ऽसंभवौ। अथ स्वनिवृत्तिरेव कार्यजननमिति न विरोध इति चेत्। तर्हि जननं कार्याव्यतिरिक्तमिति कार्यमेव, तच्च स्वनिवृत्तिः, सा च स्वात्मिकेत्यनिवारितोऽन्वयः, कार्याभावो वा, क्रमिकनिवृत्तिकार्यजननस्वभावकं च नैकं क्षणिकमित्यादि स्वधियाऽभ्यूहनीयम् ॥२१॥

नन्वेवं हेतुफलभावनिषेधः कृतः स्यात्, स च प्रत्यक्षबाधित इत्याशङ्कापोहायाह—

न चाध्यक्षविरुद्धत्वं जनकत्वस्य मानतः। असिद्धेरत्र नीत्या तद्व्यवहारनिषेधतः ॥२२॥

न चाध्यक्षविरुद्धत्वमत्र बाधकमुद्भावनीयम्, जनकत्वस्य मानतः– प्रमाणात्, असिद्धेः, अत्र नीत्या– न्यायेन, तद्व्यवहारनिषेधतः– जनकत्वव्यवहारनिषेधात्, प्रमाणाभावस्य सद्व्यवहारविषयत्वानुमापकत्वात्, अपेक्षया चोक्तरीत्यात्रार्थे प्रमाणाभावाव्याघातादिति भावः ॥ २२ ॥

अयं च परेणाप्याश्रित एव न्याय इत्याह—

मानाभावे परेणापि व्यवहारो निषिध्यते। सज्ज्ञानशब्दविषयस्तद्वदत्रापि दृश्यताम् ॥२३॥

परेणापि– बौद्धेनापि, मानाभावे– प्रमाणाभावे, क्वचिद् वस्तुनि प्रधाने-श्वरादौ सज्ज्ञानशब्दविषयो व्यवहारो निषिध्यते– प्रधानादिकं 'सद्' इति न ज्ञेयम्, 'सद्' इति नाभिधेयं वा, प्रमाणेनानुपलभ्यमानत्वादिति। तद्वदत्रापि– जनक- ॥१९७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वेऽपि, दृश्यतां प्रमाणाभावेन सद्व्यवहारनिषेधः, न्यायस्य समानत्वात् । निरस्तो 'नाशहेतोरयोगतः'[1] इत्याद्यो हेतुः ॥ २३ ॥

अथ 'अर्थक्रियासमर्थत्वात्' इति द्वितीयं हेतुं दूषयितुमाह—

अर्थक्रियासमर्थत्वं क्षणिके यच्च गीयते । उत्पत्त्यनन्तरं नाशाद्विज्ञेयं तदयुक्तिमत् ॥२४॥

अर्थक्रियासमर्थत्वं क्षणिके– निरन्वयनश्वरे वस्तुनि, यच्च गीयते परैः, तदुत्पत्त्यनन्तरं नाशादयुक्तिमद् विज्ञेयम् ॥२४॥

कथम् ? इत्याह—

अर्थक्रिया यतोऽसौ वा तदन्यो[2] वा द्वयी गतिः । तत्त्वे न तत्र सामर्थ्यमन्यतस्तत्समुद्भवात् ॥

अर्थक्रिया यतोऽसौ वा– जनकत्वाभिमतः पदार्थ एव वा स्यात्, तदन्यो वा– तदनन्तरभावी पदार्थ एव वा, द्वयी गतिः– द्वाविमावत्र प्रकारौ । आद्ये दूषणमाह– तत्त्वे– अर्थक्रियायास्तदात्मकत्वे, न तत्र– अर्थक्रियायाम्, सामर्थ्यं 'तस्य' इति योगः । कुतः ? इत्याह– अन्यतः– स्वहेतोः, तत्समुद्भवात्– तस्याखिलस्वधर्मान्वितस्योत्पादात्, स्वस्य जनकत्वं च दृष्टेष्टाभ्यां विरुद्धम् । तस्माद् नार्थक्रियायास्तदभेदे तस्यार्थक्रियाया उत्पादे सामर्थ्यम् ॥ २५ ॥

नापि तद्धारण-नाशयोरित्याह—

---

१ चतुर्थस्तबके द्वितीयकारिकायां प्रतिपादितः ।   २ 'दन्या वा' इति सर्वत्र, मुद्रितपुस्तके च पाठः ।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

न स्वसंधारणे न्यायाज्जन्मानन्तरनाशतः। न च नाशोऽपि सद्युक्त्या तद्धेतोस्तत्समुद्भवात्॥

न स्वसंधारणे– अर्थक्रियास्थापने, न्यायादस्य सामर्थ्यम्। कुतः? इत्याह– जन्मानन्तरनाशतः– उत्पत्त्यनन्तरं स्वधर्ममादायैव स्वस्य नाशात्। न च नाशेऽप्यर्थक्रियायाः, तत्सामर्थ्यं, सद्युक्त्या– युक्तम्। कुतः? इत्याह– तद्धेतोस्तत्समुद्भवात्– स्वहेतोरेव नश्वरस्वभावोत्पत्तेः ॥ २६ ॥

द्वितीयप्रकारे दोषमाह—

अन्यत्वेऽन्यस्य सामर्थ्यमन्यत्रेति न संगतम्। ततोऽन्यभाव एवैतन्नासौ न्याय्यो दलं विना॥

अन्यत्वे– अर्थक्रियायाः स्वभिन्नत्वेऽभ्युपगम्यमाने, अन्यस्य– हेतोः, अन्यत्र– अर्थक्रियायाम्, सामर्थ्यम्, इत्यसंगतम्– अयुक्तम्, सामर्थ्य-सामर्थ्यवतोरभेदात् सामर्थ्यवदन्यत्र तदभावात्। स्यादेतत्, ततः– दण्डादेः, अन्यभाव एव– घटाद्युत्पाद एव, एतत्– सामर्थ्यम्, नान्यदिति। अत्राह– नासौ– अन्यभावः, न्याय्यः– घटमानकः, दलं विना– तथाभाविनमुपादानमन्तरेण ॥ २७ ॥

एतदेव स्पष्टयति—

नासत्सज्जायते यस्मादन्यसत्त्वास्थितावपि। तस्यैव तु तथाभावे नन्वसिद्धोऽन्वयः कथम्? ॥१९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्मादन्यसत्त्वास्थितावपि. किमुत तन्निवृत्तौ, असत् सद् न जायते, तच्छक्त्यभावेनातिप्रसङ्गात् । तस्यैव च–पूर्वक्षणस्य, तथाभावे– उत्तरक्षणरूपतया भवने, ननु– निश्चितम्, अन्वयः कथमसिद्धः, भावाविच्छेदस्यैवान्वयत्वात्? ॥२८॥

दोषान्तरमाह—

भूतिर्येषां क्रिया सोक्ता न चासौ युज्यते क्वचित्। कर्तृभोक्तृस्वभावत्वविरोधादिति चिन्त्यताम्॥

या एषां– प्रस्तुतभावानाम्, भूतिः, सा क्रियोक्ता भवता, न चासौ– भूतिः, न्यायतः क्वचिद् युज्यते। कथम्? इत्याह– कर्तृ-भोक्तृस्वभावत्वविरोधात्; तथाहि– सा किं कर्तृस्वभावा वा स्यात्, भोक्तृस्वभावा वा? । कर्तृस्वभावत्वे न भोक्तृत्वम्, भोक्तृस्वभावत्वे च न कर्तृत्वं स्यात्। न च कर्तृस्वभावत्वमेव भोक्तृस्वभावत्वम्, घट-कलशादिपदानामिव कर्तृ-भोक्तृपदयोरभिन्नप्रवृत्तिनिमित्तकत्वेन पर्यायत्वापातात्, चरमस्य कर्तृत्वाभावाच्च, भावे वा चरमत्वविरोधात्। न चादौ कर्तृस्वभावैव, अन्ते च भोक्तृस्वभावा, अन्तरा तूभयस्वभावेति वाच्यम्; द्वैरूप्यविरोधादिति चिन्त्यतां सूक्ष्मधिया ॥ २९ ॥

प्रस्तुतमुपसंहरति—

३४ **न चातीतस्य सामर्थ्यं तस्यामिति निदर्शितम्।**
न चान्यो लौकिकः कश्चिच्छब्दार्थोऽत्रेत्ययुक्तिमत् ॥ ३० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न चातीतस्य वस्तुनः, सामर्थ्यं स्वहेतोरव्यतिरिक्तम्, तस्यां– अर्थक्रियायां द्वितीयक्षणलक्षणायाम्, इति– एतत्, निदर्शितम्, 'अन्यस्य सामर्थ्यमन्यत्रेति न संगतम्'[1] इत्यनेन । न चान्यो लौकिकः– लोकप्रसिद्धः, कश्चिच्छब्दार्थः, अत्र– अर्थक्रियायां सामर्थ्यमिति वाक्ये, इति– एवम्, अयुक्तिमदर्थक्रियासमर्थत्वं क्षणिकत्वे यद् गीयत इति ।

यच्च क्रम-यौगपद्याभ्यामर्थक्रिया स्थिराद् व्यावर्तमाना क्षणिकतायामेवावतिष्ठत इत्युच्यते । तत् कदाशामात्रम्, स्वभिन्नक्रमिकार्थक्रियाभेदेऽपि हेतोरभेदात् । न च हेतोः प्रतिक्षणमभिन्नरूपत्वेऽर्थक्रियापि युगपद् भवेदिति वाच्यम्, नियमाभावात्, यथा दर्शनम्, हेतोरभेदस्यार्थक्रियाभेदस्य च संभवात् । न च प्रतिक्षणविशरारुताऽविनाभूतः क्रमवदर्थक्रियोत्पादः क्वचिदुपलब्धः, येन तदुदयक्रमात् तद्धेतोः प्रतिक्षणभेदः सिद्धिमासादयेत् । न चार्थक्रियापि प्रतिक्षणं भेदवती सिद्धा, तत् कथं स्वयमसिद्धहेतोः प्रतिक्षणभेदमवगमयेत् ? । न च सौगतानां कालाभावादर्थक्रियाक्रमोऽपि युक्तः, कार्यपरम्पराव्यतिरिक्तस्य कालस्य तैरनभ्युपगमात् । न च फलभेदमात्राद् हेतुभेदव्यवस्था, एकेनापि प्रदीपादिनानेककार्याणामेकदा करणात् । परपरिकल्पितकालाभ्युपगमेन कार्यक्रमश्च प्रमाणाभावे दुर्घटः । न च तदभ्युपगमेन कारणक्रमोपपत्तावपि स्थैर्यभङ्गः[2] । जनकत्वाऽजनकत्वस्वभावभेदादसौ स्यादिति चेत् । न, क्रमोपेतकार्योपलम्भात्, कल्पनाध्यवसितेन जनका-ऽजनकत्वस्वभावभेदेनापि भावाभेदात्; अन्यथा भावानामेकत्वमध्यवस्यन्ती कल्पना तत्र स्थैर्यमपि किं न दर्शयेत् ? । तस्मादुदितफलापेक्षया कल्पना भावानां जनकत्वमध्यवस्यति, अनुदितफलापेक्षया तु तत्रैव जनकत्वमध्यारोपयतीति न भेदः, न चेदेवम्; एकस्यापि

१ प्रस्तुतस्तबके कारिका २७ । २ ख. ग. घ. च. 'यसङ्गः' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षणस्य परोपजनितकार्यापेक्षयाऽजनकत्वम्, स्वोत्पाद्यकार्यापेक्षया तु जनकत्वमिति भेदः स्यात्। कल्पनाप्रदर्शितभेदे[1]बाधकोऽभेदनिर्भासस्तूभयत्र तुल्य इति ध्येयम्। समर्थो यदि हेतुः, तदोत्पन्नमात्र एव कार्यं किं न जनयेत्? इति चेत्। तव कुर्वद्रूपः क्षणस्तदा किं न भवेत्?। सहकार्यभावादिति चेत्। तुल्यमिदमन्यत्र।

स्यादेतत्, मम कुर्वद्रूपाणां दण्ड-घटादिक्षणानामेकेन घटकुर्वद्रूपत्वेनैव घटव्याप्यत्वम्, परेषां त्वितरसहकारिसमवहितदण्डत्वादिना घटादिव्याप्यत्वम्, तत्रावच्छेद्यावच्छेदकभावेऽविनिगमश्चेत्यतिगौरवम्। न च घटसामग्रीत्वेन घटव्याप्यता, सामग्र्या एवानिरुक्तेः, तथाहि– न तावद् यावन्ति कारणानि सामग्री, क्रमिककारणसमुदायेऽतिव्याप्तेः, नाप्येकक्षणावच्छिन्नानि यावन्ति कारणानि, यागादेश्चिरातीतत्वेन स्वर्गादिसामग्र्यामव्याप्तेः। न च तादृशयावत्कारणसमवधानं सा, अस्ति च चिरातीतस्यापि हेतोर्व्यापाररूपसमवधानमिति वाच्यम्, विशकलिततावत्कारणसमवधाना(नासामग्री ?)भावात्। न चेतरकारणविशिष्टचरमकारणमेव सा; न च विनिगमनाविरहः, कार्यैकदेशताया विनिगमकत्वादिति वाच्यम्, इतरेषामपि कयाचित् प्रत्यासत्त्या कार्यैकदेशत्वात्, अन्यथा चरमकारणे तद्वैशिष्ट्यानिरुक्तेः। न च चरमकारणमेव सा, तस्य संयोगत्वादिनाऽसामग्रीत्वात्; चरमत्वेन तत्त्वे वाऽव्यवहितपूर्ववर्तिना संबन्धेन फलविशिष्टोत्पत्तिकत्वं तदिति लाघवात् तेन संबन्धेन फलवत्त्वस्यैव सामग्रीत्वौचित्यात्। एवं च 'सामग्र्यभावात् कार्याभावः' इत्यत्र फलतः 'स्वाभावादेव स्वाभावः' इति सामग्रीभेदात् कार्यभेद इति; अत्र च फलतः स्वभेदादेव स्वभेद इत्यापतितमिति न किञ्चिदेतत्। एतेन 'प्रागभावेतरकादाचित्कयावत्कार-

1 ख. ग. घ. च. 'भेदे बा'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णप्रागभावानाधारः कार्यप्रागभावाधारः क्षण एव सामग्री, नेयं कार्यजनिका, किन्तु तद्व्याप्या, कार्याधिकरणीभूतस्य क्षणस्य कार्यप्रागभावानधिकरणत्वात्, तदधिकरणीभूतस्य च कार्यानधिकरणत्वात्, अधिकरणीभूतानामेव च कालोपाधीनां हेतुत्वात्' इत्यपि निरस्तम्, एतस्यास्तत्र तदुत्पत्तिनियामकत्वादिति।

मैवम्, सामग्र्याः समग्रव्यतिरिक्ता-ऽव्यतिरिक्तपरिणामविशेषरूपत्वात्, घनस्य विविच्यमानस्य भूतादाविव विविच्यमानायास्तस्या दण्डादौ विश्रामेऽप्यविविच्यमानायास्तद्वदेकत्वात्। अभिन्नकालकृतार्थान्तरभावेन च सा विभिन्नव्यवहारनिबन्धनम्, भिन्नकालकृतार्थान्तरभावेन च कार्योपधायिकेति तत्त्वम्। नैयायिकादिनापि हि मानसादौ चाक्षुषसामग्र्यादिप्रतिबन्धकतादिना लाघवादपि तस्या अर्थान्तरभूतायाः कल्पयितुं युक्तत्वात्। इति नैकान्तदोषेऽप्यनेकान्ते किमपि दूषणं पश्यामः। तत्र 'तत्कार्योत्पत्तौ तदवच्छिन्नयावत्कारणसमवधानरूपायाः सामग्र्या नियामकत्वम्' इत्यपरेषां शब्दान्तरम्। अधिकं स्वधियाऽभ्यूह्यम् ॥ ३० ॥

'परिणामात्' इति तृतीयहेतुं दूषयितुमाह—

परिणामोऽपि नो हेतुः क्षणिकत्वप्रसाधने। सर्वदैवान्यथात्वेऽपि तथाभावोपलब्धितः ॥३१॥

परिणामोऽपि— अतादवस्थ्यलक्षणः, नो हेतुः— न समर्थः, क्षणिकत्वप्रसाधने— निरन्वयनाशसाधने। कथम्? इत्याह— सर्वदैव— सर्वकालमेव, अन्यथात्वेऽपि— बाल-कुमारादिभावेन घट-शरावादिभावेन च विभिन्नरूपत्वेऽपि, तथाभावोपलब्धितः— ॥२००॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देह-मृदादिभावोपलब्धेः । अयं भावः– चित्रज्ञाने नानाकारोपलम्भेऽप्येकरूपोपलम्भाद् यथा चित्रैकरूपताऽविरोधः, तथा परिणामित्वेन भेदसिद्धावपि 'सोऽयं देहः' इत्याद्यभेदोपलम्भाद् न स्थैर्यबाधः, अनुभवसिद्धयोर्भेदा-ऽभेदयोरपि समावेशात् । प्रपञ्चयिष्यते चेदमुपरिष्टात् ॥ ३१ ॥

इत्थं चैतदङ्गीकर्तव्यमित्याह—

नार्थान्तरगमो यस्मात्सर्वथैव न चागमः । परिणामः प्रमासिद्ध इष्टश्च खलु पण्डितैः ॥३२॥

यस्मात् कारणाद् नार्थान्तरगमः– न सर्वथाऽर्थान्तरगमनम्, न च सर्वथैवागमः– एकान्तेनार्थान्तरागमनम्, परिणामः, प्रमासिद्धः– प्रमाणप्रतिष्ठितः । इष्टश्च खलु– निश्चितम्, पण्डितैः– "तद्भावः परिणामो यत् तत्तेन तथा भूयते" इति वचनात् । युक्तं चैतत्, सुवर्णं हि कुण्डलतया परिणममानं न सर्वथैव कुण्डलभावं भजते, सुवर्णरूपस्यापि परित्यागापत्तेः; न च सर्वथा न भजतेऽपि, अकुण्डलत्वप्रसङ्गात् । येन च रूपेण यत्र स्वकालीनस्वाभिन्नोत्पादप्रतियोगित्वं तेन रूपेण तत्र तत्परिणामत्वव्यवहारः, यथा 'कुण्डलं सुवर्णपरिणामः' इति, न तु 'सुवर्णं परिणामः' इति ॥ ३२ ॥

अत्र परोक्तानित्यतामपाकुर्वन्नाह—

यच्चेदमुच्यते ब्रूमोऽतादवस्थ्यमनित्यताम् । एतत्तदेव न भवत्यतोऽन्यत्वे ध्रुवोऽन्वयः ॥३३॥

यच्चेदमुच्यते निरन्वयनाशवादिभिः । किम्? इत्याह– ब्रूमोऽतादवस्थ्यं भावानामनित्यताम्, परिणामित्व इष्टसिद्धि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तदस्माकमिति । अत्रोत्तरम्- एतत्- अतादवस्थ्यम्, तदेव न भवतीति- '[1]न तत्र किञ्चिद् भवति' इत्याद्युक्तेः, तथाचाभवनलक्षणमनित्यत्वं न वस्तुलक्षणम् । अतः- अस्मादभवनात्, अन्यत्वेऽतादवस्थ्यस्य, ध्रुवोऽन्वयः, तस्यैव तथाभवनादिति ॥ ३३ ॥

अतोऽभिन्नत्वे नायं दोष इत्याह—

तदेव न भवत्येतत्तच्चेन्न भवतीति च । विरुद्धं हन्त किञ्चान्यदादिमत्तत्प्रसज्यते ॥ ३४ ॥

तदेव न भवत्येतद् वाक्यम्, तच्चेद् न भवतीति च विरुद्धम्, भवनस्वभावस्याभवनत्वायोगात्, 'न भवति' इत्यतश्च त्वन्नीत्याऽभवनस्वभावत्वस्यैव प्रतीतेः 'घटोऽघटः' इति तुल्यत्वात् । 'हन्त' इत्युपदर्शने । 'किञ्चान्यत्' इति दोषान्तरख्यापने । तच्चेदमभवनमादिमत् प्रसज्यते, तदा भवनात्, इत्याद्युक्तपूर्वम् ॥ ३४ ॥

प्रकृतमेव समर्थयन्नाह—

क्षीरनाशश्च दध्येव यद् दृष्टं गोरसान्वितम् । न तु तैलाद्यतः सिद्धः परिणामोऽन्वयावहः ॥

दध्येव चोत्पद्यमानं, क्षीरनाशः- क्षीरनाशाभिन्नम्, गोरसान्वितम्- गोरसस्थित्यनुविद्धम्, न तु तैलादि तदनन्वितं तदत्यन्तभिन्नस्वभावम्, यद्- यस्मात्, दृष्टम्; अतः- अस्माद्धेतोः, परिणामोऽन्वयावहः- अन्वयाक्षेपकः, सिद्धः, उत्पादस्य

---

[1] चतुर्थे स्तबके कारिका ३२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यय स्थित्यविनाभूतत्वात्। 'दध्न उत्पाद आद्यक्षणसंबन्धरूपो भाव इति कथं स एव दुग्धनाशः ?' इति केषांचिदविचारिताभिधानम्, स्वयमेव प्रागभावनाशस्य प्रतियोगिरूपस्याभ्युपगमात्। यदपि केचिदभिमन्यन्ते– 'दुग्ध-दध्नोर्गोरसान्वयस्तैलादिव्यावृत्तो न द्रव्याविच्छेदरूपः किन्तु जात्यविच्छेदरूपः' इति। तदपि प्रत्यभिज्ञाप्रतिहतम्, गोरसानन्वये निराश्रयस्य दध्न एवानुत्पत्तेश्च। 'दुग्धोपादानान्येव दध्न आश्रयः' इत्युक्त्या च नामान्तरेण गोरसान्वय एवाभिहितो भवति, त्यक्तोपात्तोभयरूपस्योभयोपादानस्य कथञ्चिदुभयापृथग्भूतत्वादिति दिग् ॥ ३५ ॥

एतदेव समर्थयन्नाह—

नासत्सज्जायते जातु सच्चासत्सर्वथैव हि। शक्त्यभावादतिव्याप्तेः सत्स्वभावत्वहानितः ३६

नासत्– एकान्ततुच्छम्, सज्जायते– अतुच्छं जायते, जातु– कदाचित्, शक्त्यभावादतिव्याप्तेः– तुच्छस्य प्रतिनियतातुच्छजननशक्त्यभावेन तदभावाविशेषात्, तद्वदन्यभवनापत्तेः। तथा, सर्वथैव हि सच्चासद् न जायते, सत्स्वभावत्वहानितः– असद्भवनस्वभावस्य सद्भवनस्वभावस्य विरोधात् सद्भावस्याप्यप्राप्तेः। निरूपिततत्त्वमेतत् ॥ ३६ ॥

प्रस्तुतमुपसंहरन्नाह—

नित्येतरदतो न्यायात्तत्तथाभावतो हि तत्। प्रतीतिसचिवात्सम्यक्परिणामेन गम्यते।३७।

अतः– असदादेः सदाद्यनापत्तेः, तत्तथाभावतः– तस्यैव तथाभवनेन, हि– निश्चितम्, तत्– वस्तु, परिणामेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतीतिसाचिव्यात्– अनुभवसध्रीचीनात्, सम्यग्– न्यायात्, नित्येतरद् गम्यते, नित्यं च तदितरच्चेति कर्मधारयः, इतरत्– अनित्यम् ।

अत्र वैशेषिकादयः– प्रत्यभिज्ञया तत्तेदंताविशिष्टयोरभेदलक्षणे स्थैर्ये सिद्धेऽपि कथमेकस्य नित्यानित्यरूपस्य वस्तुनः सिद्धिः, घटप्रतियोगिकत्वेन ध्वंसानुभवकाले समानसंवित्संवेद्यतया घटे ध्वंसप्रतियोगित्वलक्षणानित्यत्वानुभवेऽपि नित्यत्वाननुभवात्, ध्वंसप्रतियोगित्व-तदप्रतियोगित्वलक्षणयोर्नित्यत्वा-ऽनित्यत्वयोर्विरोधाच्च ? । अथ प्रतियोगिसत्त्वमात्रेण नाभावविरोधः, किन्तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसत्त्वेन, अत एवैकघटवत्यपि द्वित्वावच्छिन्नतदभावः । न च 'घट-पटौ न स्तः' इति धीरेकवत्यन्याभावावगाहिनी, तदितरत्रैव चोभयावगाहिनी। न चैकैकाभावधियो 'द्वौ न स्तः' इति धियोऽवैलक्षण्यम्, शब्दादिना 'द्वौ न स्तः' इति निश्चयेऽप्येकैकाभावसंशयापत्तिः, विषयानुगमं विनाऽनुगताकारप्रत्ययायोगश्च । द्वित्वाधिकरणप्रतियोगित्वमात्रावगाहित्वे च तादृशद्वित्वाधिकरणव्यक्तिविशेषविरहिणि तथाविधोभयशालिनि 'तादृशौ द्वौ न स्तः' इति प्रत्ययापत्तिः; सामानाधिकरण्याद्यभावेऽपि प्रतीतेरनुगताकारत्वाच्च न तस्या द्वित्वविशेष्यतावच्छेदकावच्छिन्नत्वसंसर्गेण द्वित्वसमानाधिकरणविशिष्टाभावावगाहित्वम्, घटत्व-पटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयत्वं वा, द्वित्वाधिकरणयोरेव प्रतियोगित्वोल्लेखात् सपर्याप्त्यधिकरणसंबन्धेन द्वित्वाभावविषयत्वमपि न युक्तमिति वाच्यम्, द्वित्वावच्छिन्नप्रतियोगिताकत्वेन घटादिमति पटत्वावच्छिन्नप्रतियोगिताकाभावादिविषयतया, तत्तद्घटादिमति च तत्तद्घटान्यघटत्वावच्छिन्नाभावादिविषयतयोपपत्तेरिति वाच्यम्; अनन्ताभावे द्वित्वावच्छिन्नप्रतियोगिताकत्वकल्पने गौरवात्, एका-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावसिद्धेः । एवं च घटस्य घटत्वावच्छिन्नध्वंसप्रतियोगित्वेऽपि द्रव्यत्वावच्छिन्नध्वंसाप्रतियोगित्वमुपपत्तिमत्, तदुक्तम्– "तद्भावाव्ययं नित्यम्"[1] इति; इति चेत् । न, तद्भावेन व्ययस्याप्रसिद्धौ तदभावस्य वक्तुमशक्यत्वात्, असतोऽनिषेधात्; स्वीकृतं चैतदन्यैरपि– "असओ नत्थि निसेहो"[2] इत्यादिना ।

किञ्च, 'घटो नास्ति' इति प्रतीत्याऽत्यन्ताभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वेऽपि ध्वंसस्य न तथात्वम्, 'कपाले घटध्वंसः' इत्यत्र प्रतियोगितामात्रेणैव घटस्य ध्वंसेऽन्वयात्; 'अन्तरा श्यामे घटे रक्तं नास्ति' इति प्रतीतौ च सामयिकरक्तात्यन्ताभावस्यैव विषयत्वात्; अन्यथा रक्ततादशायामपि तथाप्रत्ययापत्तेः । न च ध्वंस-प्रागभावयोरव्याप्यवृत्तिरक्तत्वावच्छिन्नप्रतियोगिताकत्वकल्पनाद् रक्ततादशायां ध्वंसादेस्तदसत्त्वाद् न तथाप्रत्यय इति वाच्यम्; अनन्तध्वंसप्रागभावेषु तादृशप्रतियोगिताकत्व-तदव्याप्यवृत्तित्वयोः 'रक्तं नास्ति' इत्यादिप्रतीतावनन्तध्वंसादिविषयकत्वस्य च कल्पनामपेक्ष्यान्यत्र क्लृप्ततादृशप्रतियोगिकात्यन्ताभावस्यैवान्तरा श्यामादौ सामयिकसंबन्धस्य युक्तत्वात्, तत्कारणबाधेन भाविरक्तादिध्वंसाद्यसंभवाच्च । इत्थं च "तद्भावाव्ययं नित्यम्" इत्यस्य 'ध्वंसप्रतियोगितानवच्छेदकरूपवद् नित्यम्' इत्यर्थः, ध्वंसप्रतियोगितावच्छेदकरूपवच्चानित्यम्, इति नोभयासमावेशः, न चाप्रसिद्धिः; इत्यपि न सुष्ठु समाधानम् । अथ वृक्षे शाखा-मूलाद्यवच्छेदेन कपिसंयोग-तदभाववदेकत्रापि द्रव्यतया पर्यायतया च नित्या-नित्यत्वमुपपत्स्यते, गुञ्जाफलादौ श्यामता-रक्ततयोर्विभिन्नदेशावच्छेदरूपायाः खण्डशो व्याप्तेर्वैलक्षण्येनैवान्योन्यव्याप्तिव्यवस्थितेर्विभिन्नदेशानवच्छिन्नापृथग्भावस्यै-

---

१ तत्त्वार्थसूत्रे ५।३०। २ विशेष्यावश्यकभाष्ये प्रथमगणधरवादे गाथा २६ ।

व तदर्थत्वादिति चेत्। न, आश्रयन्यूनवृत्तेरेवावच्छेदकत्वेन घटत्वेन घटेऽनित्यतायाः, द्रव्यत्वेन च नित्यताया असंभवात्। न हि भवति शाखायां शाखात्वावच्छेदेन कपिसंयोगाभावः, वृक्षत्वावच्छेदेन च कपिसंयोग इति। किञ्च, एवं नित्यत्वादिज्ञानस्यानित्यत्वादिधीप्रतिबन्धकतायामव्याप्यवृत्तित्वज्ञानाद्युत्तेजकत्वं वाच्यमिति गौरवमिति।

अत्र ब्रूमः– प्रत्यभिज्ञैव वस्तुनो नित्यानित्यत्वे मानम्, पूर्वोत्तरतत्तेदंतास्वभावभेदानुविद्धस्यैवोर्ध्वतासामान्याख्याभेदस्य तथा विषयीकरणात्। न च तत्तेदंतोभयनिरूपितैकस्वभावमेव तत्, भिन्नकाले तदभावादेव च तदननुभव इति सांप्रतम्, 'इदानीं तत्तास्वभावमिदम्' इति व्यवहारप्रामाण्यप्रसङ्गात्। किञ्च, विशिष्टात्यन्ताभाववद् विशिष्टध्वंसोऽपि परेणाकामेनापि स्वीकर्तव्यः, 'शिखी विनष्टः' इति प्रतीतेरन्यथानुपपत्तेः। न च विशेष्य नाशसामग्र्यभावाद् विशिष्टनाशानुपपत्तिः, विशेषणाद्यत्यन्ताभावकृतविशिष्टात्यन्ताभाववद् विशेषणादिनाशकृतविशिष्टनाशसंभवात्। विशेषणनाशादेव परम्परासंबन्धेन तत्प्रतीत्युपपत्त्या विशिष्टनाशासिद्धौ च स्वपर्याप्त्यधिकरणसंबन्धेन द्वित्वाभावादिनैव 'द्वौ न स्तः' इत्यादिप्रतीत्युपपत्तौ द्वित्वावच्छिन्नाभावादेरप्युच्छेदप्रसङ्गः। एवं च क्षणविशिष्टध्वंसादस्थैर्यसंवलितं स्थैर्यं सिद्धम्, विशिष्टातिरिक्तत्ववादिनः सार्वभौमस्य मते च सुतराम्। न च तन्मते विशिष्टसत्तानिश्चयेऽपि सत्तासंदेहापत्तिः, परस्यापि विशिष्टसत्तानिश्चयस्य सत्तानिश्चयत्वशून्यतया विशिष्टसत्तानिश्चयत्वेन पृथक्प्रतिबन्धकतावश्यकत्वात्। न चानन्तविशिष्टपदार्थकल्पनापत्तिः, परस्यापि विशिष्टनिरूपिताधिकरणतानन्त्यकल्पनस्यावश्यकत्वात्। विना च विशिष्टातिरेकं 'शिखरविशिष्टे पर्वते न वह्निधीः' 'इति धीर्न सुघटा। वस्तुतः क्षणानामिदानीमिति धीव्यपदेशनियामकः संबन्धविशेषः क्षणेषु क्षणपरिणतेषु च द्वेधा परेण वक्तव्यः, ॥२०३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्मिन्नपि तथाधीव्यपदेशप्रवृत्तेः, तथा चान्तरङ्गत्वात् तादात्म्यनियत एव स उचितः । इति सिद्धं क्षणरूपतया जगतः पर्यायतया क्षणभङ्गुरत्वम्, तदुक्तं ग्रन्थकृतैव धर्मसंग्रहण्याम्– "[1]जं वत्तणादिरूवो कालो दव्वस्स चेव पज्जाओ" इति । "[2]किमेयं भंते ! कालो त्ति पवुच्चइ ? । गोयमा ! जीवा चेव, अजीवा चेव" इति पारमर्षमप्येतदर्थानुपाति । यस्मिन्नेव क्षणे घटस्तस्मिन्नेव पट इति तु शब्दमात्रम्, इति न साधारणातिरिक्तक्षणसाधकम् ।

प्रतियन्ति च लोका अपि नित्यानित्यत्वं वस्तुनः– 'घटरूपेण मृद्द्रव्यं नष्टं, मृद्रूपेण न नष्टम्' इति 'घटरूपेण घटो नष्टः, न तु मृद्रूपेण' इत्यादि; अत्र च 'दण्डत्वेन दण्डस्य घटहेतुत्वम्, न तु द्रव्यत्वेन' इत्यत्रेवावच्छिन्नत्वं तृतीयार्थः, स्वाश्रयन्यूनवृत्तेरेवावच्छेदकत्वमित्यस्य च प्रकृतदृष्टान्त एव भङ्गः । अथाऽन्यथासिद्धिनिरूपकतानवच्छेदकनियतपूर्ववर्तितावच्छेदकरूपवत्त्वं हेतुत्वं नाव्याप्यवृत्ति, इति दण्ड इति तत्र दण्डवृत्तित्वम्, दण्डत्वेनेति च दण्डत्वाभिन्नत्वम्, न द्रव्यत्वेनेति च द्रव्यत्वाभेदाभावो भासत इति चेत् । न, विशिष्टरूपेऽविशिष्टरूपाभेदान्वयस्य निराकाङ्क्षत्वात्; अन्यथा 'दण्डत्वं घटहेतुत्वम्' इत्यस्यापि प्रसङ्गात् । तथाप्येकविशेष्यकत्वानुरोधाद् 'न द्रव्यत्वेन' इत्यत्र द्रव्यत्वावच्छिन्नत्वाभाव एवार्थः । न हि 'दण्डत्वेन दण्डो घटहेतुर्न द्रव्यत्वेन' इत्यत्र दण्डवृत्तिघटहेतुत्वं दण्डत्वावच्छिन्नं, दण्डवृत्तिस्तदभावश्च द्रव्यत्वावच्छिन्न इति भिन्नाश्रयो बोधोऽनुभूयते; किन्तु दण्डवृत्ति घटहेतुत्वं दण्डत्वावच्छिन्नं द्रव्यत्वानवच्छिन्नं चेत्येकाश्रय एवेति चेत् । सत्यम्, तात्पर्यभेदेनोभयथापि बोधदर्शनात् 'मृद्रूपेण घटो (न) नष्टः' इत्यत्रापि कदाचिद् मृद्रूपानवच्छिन्ननष्टत्वबोधात्, नानापर्यायत्वाद् वस्तुनः । यदि

---

१ यद् वर्तमादिरूपः कालो द्रव्यस्यैव पर्यायः । २ क एष भगवन् ! काल इति प्रोच्यते ? । गौतम ! जीवश्चैव, अजीवश्चैव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च तत्र तदभावावच्छेदकत्वालम्बनः प्रत्ययस्तत्र तदवच्छेदकत्वाभावावलम्बनतयैवान्यथासिद्धः क्रियते, तदा संयोगाभावोऽप्यव्याप्यवृत्तिर्न स्यात्, 'मूले वृक्षे न कपिसंयोगः' इत्यस्यापि मूले वृक्षनिष्ठकपिसंयोगावच्छेदकत्वाभावविषयतयैवोपपत्तेः ।

अथ 'कपिसंयोगाभावो न वृक्षवृत्तिः' इति बाधकाभावाद् मूलस्य वृक्षवृत्तिकपिसंयोगाभावावच्छेदकत्वम्, 'नष्टत्वाभावो न घटवृत्तिः' इति बाधकसत्त्वाच्च न घटवृत्तिनष्टत्वाभावावच्छेदकत्वं मृद्रूपस्येति चेत् । न, तत्र तद्वृत्तित्वाभावस्याप्यव्याप्यवृत्तित्वेन तद्धियस्तत्र तद्वृत्तिताधियोऽप्रतिबन्धकत्वात् । यत्तु– 'वृत्तित्वस्य नाव्याप्यवृत्तित्वम्, 'अग्रे वृक्षे न कपिसंयोगः' इत्यत्राग्रावच्छिन्नकपिसंयोगाभावे वृक्षवृत्तित्वस्य, 'गुणान्यत्वविशिष्टा सत्ता न गुणवृत्तिः' इत्यत्र गुणान्यत्वविशिष्टसत्ताभावे गुणवृत्तित्वस्य, 'घट-पटत्वोभयं न घटवृत्ति' इत्यत्र च घटत्व-पटत्वोभयाभावे घटवृत्तित्वस्य विषयत्वात्' इति; तत्तु 'मूले वृक्षे कपिसंयोगो न शाखायाम्' 'द्रव्ये गुणान्यत्वविशिष्टसत्ता न गुणे' इत्यादिधियामेकविशेष्यकत्वाननुरोधाद् न शोभते । नन्वेवं 'वृक्षे पटे न कपिसंयोगः' इत्यपि स्यादिति चेत् । न, देशनिष्ठावच्छेदकत्वस्य पटेऽभावात्, इतरावच्छेदकत्वविवक्षायां चेष्टत्वादिति दिग् । गौरवादिकं च नित्यत्वा-ऽनित्यत्वयोर्वास्तवेऽवच्छिन्नत्वे न दोषायेति । एवमनुभवसिद्धं नित्यानित्यैकरूपं वस्तु प्रतिक्षिपन् विरोधभीतो वैशेषिकश्चित्रपटे चित्रैकरूपमपि कथमभ्युपेयात्? इति संप्रदायः; तदाहुः—

"चित्रमेकमनेकं च रूपं प्रामाणिकं वदन् । योगो वैशेषिको वापि नानेकान्तं प्रतिक्षिपेत्[1] ॥ १ ॥" इति ।

अत्र नव्याः– 'चित्रपटेऽव्याप्यवृत्तीन्येव नील-पीतादीनि नानारूपाणि' 'एकं रूपम्' इति प्रतीतेः 'एको धान्यराशिः'

---

१ हेमचन्द्राचार्यविरचिते वीतरागस्तोत्रेऽष्टमप्रकाशे श्लो० ९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतिवत् समूहैकत्वविषयत्वात् । सविषयावृत्तिव्याप्यवृत्तिवृत्तिजातेरव्याप्यवृत्तिवृत्तित्वविरोधस्त्वप्रामाणिक एव । अत एव

"लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः । श्वेतः खुर-विषाणाभ्यां स नीलो वृष उच्यते ॥ १ ॥"

इत्यादिकमुपपद्यते । तत्र चित्रैकरूपकल्पने तु गौरवम् ; तथाहि– चित्रत्वावच्छिन्नं प्रति न नीलत्वादिना हेतुत्वम्, व्यभिचारात् ; नापि रूपत्वेन, नीलमात्रारब्धेऽपि तदापत्तेः । अथ नीलेतर-पीतेतररूपादेरपि तत्र हेतुत्वाद् न तदापत्तिः, यत्रैकावयवे नीलम्, अपरत्र च पीतजनकाग्निसंयोगः, तत्रावयवे पीतरूपोत्पत्त्यनन्तरमेवावयविनि चित्रोत्पत्तिस्वीकाराद् न व्यभिचारः । न च नीलाभावादिषट्कस्यैव समवायेन विजातीयचित्रं प्रति स्वाश्रयसमवेतत्वेन हेतुत्वमस्त्विति वाच्यम्, नील-पीतोभयकपालारब्धे घटे पाकनाशितावयवपीतस्वचित्रेऽवयवे व्याप्यवृत्तिनीलोत्पत्तिकाले चित्रोत्पत्त्यापत्तेः । न च कार्यसहभावेन नीलाभावादीनां तद्धेतुत्वाद् नायं दोष इति वाच्यम्, नील-पीत-श्वेतत्रितयकपालारब्धे पाकेन पीत-श्वेतयोः क्रमेण नाशे श्वेतनाशकालेऽपि तदापत्तेः । नील-नीलजनकतेजःसंयोगान्यतरत्वावच्छिन्नाभावत्वादिना हेतुत्वे तु गौरवम् ; संयोगस्याव्याप्यवृत्तित्वेन प्रतियोगिव्यधिकरणत्वनिवेशे च सुतराम् । न चानवच्छिन्नविशेषणतया प्रतियोगितावच्छेदकाविशेषितोक्ताभावहेतुत्वसंभवः, प्रतियोगिकोटावुदासीनप्रवेशा-ऽप्रवेशाभ्यामविनिगमादिति चेत् । न, पाकमात्रादपि चित्रोत्पत्तेः । अथ रूपजन्यतावच्छेदकं विजातीयचित्रत्वम्, अग्निसंयोगजन्यतावच्छेदकं चापरम्, अग्निसंयोगजचित्रं प्रत्यवच्छेदकत्वसंबन्धावच्छिन्नप्रतियोगिताका नीलजनकाग्निसंयोगादेरभावा उक्तप्रत्यासत्त्या हेतवः, रूपजनकविजातीयाग्निसंयोगोऽपि, इति न

१ अतः 'विनिगमात्' इति पर्यन्तोऽभ्यन्तरीकृताक्षेपपरिहारः पूर्वपक्षः । २ इतः 'स्वीकारात्' इत्यन्तो विहितपूर्वपक्षोत्तरपक्षः पूर्वपक्षः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाय्वादौ तदापत्तिः। अस्तु वा तेजःसंयोगमात्रजन्ये विजातीयचित्रे, विजातीयतेजःसंयोगस्य पाकरूपोभयजन्ये विजातीयचित्रे चोभयोरेव हेतुत्वम्, रूपमात्रजातिरिक्त एव वा विजातीयतेजःसंयोगो हेतुः, फलबलेन वैजात्यकल्पनात्, अग्निसंयोगमात्रजातिरिक्ते रूपहेतुताया वक्तुमशक्यत्वात्, नीलेतरादिसमाजाभावात्, नीलाभावादिहेतुतावादिन एवात्र वैयर्थ्यात्; पाकजचित्रे वा मानाभावः, पाकादवयवे नानारूपोत्पत्त्यनन्तरमेवावयविनि चित्रस्वीकारे लाघवात्। न चावयविनि चित्रजनकत्वाभिमतस्य पाकस्यावयवनील-पीतादिजनकत्वे नील-पीतादिजनकत्वावच्छेदकजातिसांकर्यम्, तत्र पाकनानात्वस्वीकारादिति चेत्। न, चित्रस्थले नीलादिसामग्रीसत्त्वाद् नीलाद्यापत्तिवारणाय नीलादौ नीलेतररूपादेः प्रतिबन्धकत्वकल्पने गौरवात्' इत्याहुः।

तन्नेति संप्रदायानुसारिणः- 'अव्याप्यवृत्तिनीलादिकल्पन एव गौरवात्; तथाहि- अवच्छेदकतासंबन्धेन नीलादिकं प्रति समवायेन नीलेतररूपादीनां प्रतिबन्धकत्वं वाच्यम्, अन्यथा पीतावयवावच्छेदेन नीलोत्पत्तिप्रसङ्गात्। न च नीलस्य स्वाश्रयावच्छेदेन नीलजनकत्वस्वाभाव्यादेव न तदापत्तिरिति वाच्यम्, विनैतादृशप्रतिबध्यप्रतिबन्धकभावं तथास्वाभाव्यानिर्वाहात्। ननु समवायेन नीलं जायत एव पीतावयवावच्छेदेनेत्यत्र चापादकाभाव इति चेत्। न, समवायस्येवावच्छेदकताया अपि कारणनियम्यत्वात्। एवं च नीलादौ नीलेतररूपादीनां, पीतेतररूपादौ वा नीलादीनां प्रतिबन्धकत्वे विनिगमकाभावः, मम तु नीलेतररूपादौ नीलादीनां न प्रतिबन्धकत्वम्, नील-पीतारब्धे नीलरूपत्वप्रसङ्गस्य बाधकत्वात्। अथ ममापि नीलत्वादिकमेव प्रतिबध्यतावच्छेदकम्, न तु पीतेतररूपत्वादिकम्, गौरवात्। न च नीलत्वेन प्रतिबन्धकत्वम्, न तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नीलेतरत्वेन, गौरवात्, इत्येव किं न स्यात्? इति वाच्यम्; प्रतिबन्धकतावच्छेदकगौरवस्यादोषत्वात्। अस्तु वाऽवच्छेदकतया नीलादौ समवायेन नीलादीनामेव हेतुत्वम्। न च नानारूपवत्कपालारब्धघटनीलस्य तत्कपालावच्छेदेनोत्पत्तिप्रसङ्गः, केवलनीलत्वादिनैव तद्धेतुत्वात्। समवायेन नीलादौ च स्वसमवायिसमवेतत्वसंबन्धेन नीलादीनां हेतुत्वम्। व्याप्यवृत्तिनीलस्थलेऽव्याप्यवृत्तित्ववारणाय चावच्छेदकतया नीलादौ स्वसमवायिसमवेतद्रव्यसमवायित्वसंबन्धेन नीलेतररूपादीनां हेतुत्वम्, इत्यष्टादश कार्यकारणभावाः। चित्ररूपेऽप्येतावन्त एव, चित्ररूपे नीलेतररूपादिषट्कस्य, नीलादौ नीलादिषट्कस्य हेतुत्वात्, नीलादौ नीलेतरादिषट्कस्य प्रतिबन्धकत्वाच्चेति नाधिक्यम्। वस्तुतोऽवच्छेदकतया नीलादावुक्तसंबन्धेन नीलेतररूपविशिष्टनीलत्वादिनैव हेतुत्वम्। न च नीलेतरत्वाद्यवच्छिन्नं प्रति नीलविशिष्टनीलेतरत्वादिना हेतुत्वे विनिगमकाभावः, नीलत्वापेक्षया नीलेतरत्वस्य गुरुत्वात्। एतेन 'उक्तसंबन्धेन नीलेतरादेर्नीलादिकं प्रति हेतुत्वम्, नीलादीनां नीलेतरादिकं प्रति वा, इति विनिगमनाविरहाद् द्वादशकार्यकारणभावापत्तिः' इत्यपास्तम्। इत्थं चातिनिष्कर्षादस्माकं द्वादशैव कार्यकारणभावाः, तव त्वष्टादशेति चेत्। न, ममापि नीलादौ नीलेतरादिप्रतिबन्धकत्वेनैव शुक्लावयवमात्रारब्धे नीलाद्यनुत्पत्तिनिर्वाहात्, नीलादौ नीलादिहेतुत्वाकल्पनात् कार्यकारणभावसंख्यासाम्यात्, अव्याप्यवृत्तिनानारूपतत्प्रागभावध्वंसादिकल्पनागौरवस्य च तवाधिकत्वात्।

किञ्च, अव्याप्यवृत्तिरूपपक्षेऽवच्छेदकतासंबन्धेन रूप उत्पन्ने पुनस्तेनैव संबन्धेनावयवे रूपोत्पत्तिवारणायावच्छेदकतासंबन्धेन रूपं प्रत्यवच्छेदकतासंबन्धेन रूपं प्रतिबन्धकं कल्पनीयमिति गौरवम्। न चावयविनि समवायेनोत्पद्यमानमेवावयवे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽवच्छेदकतयोत्पत्तुमर्हतीत्यवयविनि रूपस्य प्रतिबन्धकस्य सत्त्वेन रूपसामग्र्यभावादेव नावयवेऽवच्छेदकतया तदा रूपोत्पत्त्यापत्तिरिति वाच्यम्; एवं ह्यवयविनिष्ठरूपाभावोऽवच्छेदकतासंबन्धेन रूपं प्रति हेतुर्वाच्यः, तथा च नानारूपवत्कपालारब्धघटस्य नीलरूपादेर्नीलकपालिकावच्छेदेनानुत्पत्तिप्रसङ्गात्, तदवयविनि कपाले रूपसत्त्वात्। अपिच, नीलपीतवत्यग्निसंयोगात्, कपालनीलनाशात् तदवच्छेदेन रक्तं न स्यात्, समवायेन रूपं प्रति तेन रूपस्य प्रतिबन्धकत्वात्; तदवच्छिन्नरूपे तदवच्छिन्नरूपस्य प्रतिबन्धकत्वकल्पने चातिगौरवम्। अथावच्छिन्ननीलादौ नीलाभावादिषट्कमवयवगतमवयविगतं च हेतुः, रक्तनीलारब्धे रक्तनाशकपाकेन व्याप्यवृत्तिनीलोत्पत्तिदशायां चावयविनि न नीलाभावः, इति न तत्रावच्छिन्ननीलोत्पत्तिः, नीलमात्रारब्धे पाकेन क्वचिद्रक्तरूपोत्पत्तौ च प्राक्तननीलनाशादेवावच्छिन्ननीलोत्पत्तिरिति चेत्। न, नील-पीत-श्वेताद्यारब्धे श्वेताद्यवच्छेदेन नीलजनकपाके सति प्राक्तननीलनाशेन तत्तदवच्छिन्ननानानीलकल्पनापेक्षयैकचित्रकल्पनाया एव लघुत्वात्।

अथ व्याप्यवृत्तिरूपस्याप्यवच्छेदकस्वीकारादवच्छेदकतया नीलादिकं प्रत्येव समवायेन नीलादेर्हेतुत्वम्। न चैवं घटेऽपि तया नीलाद्यापत्तिः, अवयवनीलत्वेन द्रव्यविशिष्टनीलत्वेन वा तद्धेतुत्वात्। न च नीलमात्र-पीतमात्रकपालिकाद्वयारब्धनीलपीतकपाले तदापत्तिः, नीलकपालिकावच्छिन्नतदवच्छेदेन तदुत्पत्तेरिष्टत्वात्। अस्तु वा तया नीलादौ नीलेतररूपादेरेव विरोधित्वमिति चेत्। न, नीलादौ नीलेतररूपादिप्रतिबन्धकतयैवोपपत्तौ तत्र नीलादिहेतुतायां मानाभावेन नानारूपवदवयवारब्धे चित्ररूपस्यैव प्रामाणिकत्वात्, व्याप्यवृत्तेरवच्छेदकायोगात्, नीलेतरादौ नीलादेः प्रतिबन्धकत्वेऽविनिगमाच्च। यदि च स्वाश्रयसंबन्धेन नीलं प्रति स्वव्यापकसमवायेन नीलरूपं हेतुरुपेयते, नील-पीताद्यारब्धस्थले च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वाश्रयसंबन्धेन नीलरूपस्य पीतकपालेऽपि संभवेन व्यभिचाराद् रक्तसंबन्धेन हेत्वभावादेव न तत्र नीलोत्पत्तिरिति विभाव्यते; तदा नीलं प्रति नीलेतररूपादेः प्रतिबन्धकत्वं चित्ररूपवादिना न कल्पनीयमित्यतिलाघवम् । एवं च 'सामान्याधिकरण्यसंबन्धावच्छिन्नप्रतियोगिताको नीलेतराभावः समानावच्छेदकत्वप्रत्यासत्त्या नीलहेतुः' इत्यपि निरस्तम्, सामानाधिकरण्यस्य व्याप्यवृत्तित्वाच्च' इत्याहुः ।

केचित्तु– 'विजातीयचित्रं प्रति स्वविजातीयत्व-स्वसंवलितत्वोभयसंबन्धेन रूपविशिष्टरूपत्वेनैव हेतुत्वम् । स्ववैजात्यं च चित्रत्वातिरिक्तं यत्स्ववृत्ति तद्भिन्नधर्मसमवायित्वम् । स्वसंवलितत्वं च स्वसमवायिसमवेतद्रव्यसमवायिवृत्तित्वम् । न च स्वत्वाननुगमः, संबन्धमध्ये तत्प्रवेशात्' इत्याहुः ।

परे तु– 'नीलपीतोभयाभाव-पीतरक्तोभयाभावादीनां स्वसमवायिसमवेतत्वसंबन्धावच्छिन्नप्रतियोगिकानां, समवायावच्छिन्नप्रतियोगिताकानां च विजातीयविजातीयपाकोभयाभावादीनां यावत्त्वावच्छिन्नप्रतियोगिताक एकोऽभावश्चित्रत्वावच्छिन्नं प्रति हेतुः' इत्याहुः । 'रूपत्वेनैव चित्रं प्रति हेतुत्वम्, कार्यसहभावेन चित्रेतराभावस्य हेतुत्वेनानतिप्रसङ्गात्' इत्यन्ये । परे तु– 'चित्रत्वावच्छिन्ने रूपत्वेनैव हेतुत्वम्, नील-पीतोभयारब्धवृत्तिचित्रत्वावान्तरवैलक्षण्यावच्छिन्ने च नीलत्वेन पीतत्वेन च हेतुता, एवं त्रितयारब्धे तत्त्रितयत्वेन, नीलपीतोभयादिमात्रारब्धे च नील-पीतान्यतरादीतररूपत्वेन प्रतिबन्धकत्वाद् न त्रितयारब्धचित्रवति द्वितयारब्धचित्रप्रसङ्गः, न चैवं गौरवम्, प्रामाणिकत्वात् । वस्तुतः समवायेन द्वितयजचित्रादौ स्वाधिकरणपर्याप्तवृत्तिकत्वसंबन्धेनैव द्वितयादीनां हेतुत्वम्, नातः प्रागुक्तप्रतिबन्धकत्वकल्पनागौरवम्' इत्याहुः । उच्छृङ्खलास्तु–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'नील-पीत-रक्ताद्यारब्धघटादौ नील-पीत-रक्तादिभ्य एव नील-पीतोभय-पीतरक्तोभयजतत्त्रितयजादिचित्राणामुत्पत्तिः, सर्वेषां सामग्रीसत्त्वात् । न चैकमेव तदस्त्विति वाच्यम्, तत्तदवयवद्वयमात्रावच्छेदेनेन्द्रियसंनिकर्षे विलक्षणचित्रोपलम्भात्, जातेरव्याप्यवृत्तित्वे पुनरस्त्वेकमेव तत्, किञ्चिदवच्छेदेन तत्र नीलत्व-पीतत्व-रक्तत्वविलक्षणचित्रत्वादिसंभवात्' इत्याहुः ।

परे तु– 'तत्र व्याप्यवृत्तीन्येव नील-पीतादीन्युत्पद्यन्ते, नीलादिकं प्रति नीलेतरादिप्रतिबन्धकत्व-नीलाभावादिकारणत्वकल्पनापेक्षया व्याप्यवृत्तिनीलपीतादिकल्पनाया एव न्याय्यत्वात्' इत्याहुः । तन्नेत्यन्ये– नीलकपालावच्छेदेन चक्षुःसंनिकर्षे पीतादेरुपलम्भापत्तेः, नीलाद्यवयवावच्छेदेन संनिकर्षस्य नीलादिग्राहकत्वकल्पने च गौरवात् । यत्तु– 'एतत्कपालावच्छिन्नसंयोगादिप्रत्यक्षानुरोधेनैतत्कपालानवच्छिन्नवृत्तिकत्वे सति यत्तन्नीलान्यत्तद्भिन्नं यदेतद् घटसमवेतं तस्यैतत्कपालविषयकसाक्षात्कारं प्रत्येतत्कपालावच्छेदेनैतद्धटचक्षुःसंनिकर्षस्य हेतुत्वाद् न पीतावयवावच्छेदेन संनिकर्षे नीलादिचाक्षुषापत्तिः' इति । तन्न, तथाहेतुतायामतिगौरवात्, तत्कपालावच्छिन्नप्रत्यक्ष एव तत्कपालावच्छिन्नसंनिकर्षस्य हेतुत्वात् । केचित्तु– 'नानारूपवदवयवारब्धो नीरूप एव घटः, स्वाश्रयसमवेतवृत्तित्वसंबन्धेनैव रूपस्य द्रव्यतत्समवेतचाक्षुषसाधारण्येन हेतुत्वादेतच्चाक्षुषात्' इत्याहुः । तन्नेत्यपरे– चित्रकपालिकास्थले तदसंभवात् । अन्ये तु– 'उद्भूतैकत्वस्यायोग्यव्यावृत्तधर्मविशेषस्यैव वा द्रव्यचाक्षुषहेतुत्वेन रूपं विनापि तादृशघटचाक्षुषत्वोपपत्तिः, घटाकाशसंयोगादीनां गुरुत्वादिवदयोग्यत्वादेव संयोगादिचाक्षुषे स्वाश्रयसमवेतत्वसंबन्धेन रूपाभावस्य प्रतिबन्धकत्वाकल्पनात्, तद्वृत्तिसंयोगादिप्रत्यक्षानुपपत्तेरभावात्' इत्याहुः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्येवमस्मिन् बत चित्ररूपे मिथ्यादृशां दृक् तिमिरावृते(ति)। परोपकृत्यै सुधियोऽत्र चैतज्ज्योतिर्मयं तत्त्वमुदीरयन्ति ॥ १ ॥

तथाहि— चित्रावयविनो नीरूपत्वं तावदनुभवबाधितम्, तत्र रूपवत्ताधियः सार्वजनीनत्वात्। न च संबन्धविशेषेणावयवरूपमेव तत्र प्रतीयत इति वाच्यम्, अन्यत्राप्यवयवरूपस्यैवैकत्वपरिणामाख्यसंबन्धेनावयविगततया प्रतीतावसंमन्मतप्रवेशात्। न चान्यत्रावयवगतेभ्योऽनेकरूपेभ्य एकस्यावयविगतस्य विलक्षणस्यैव रूपस्यानुभवादयमदोष इति वाच्यम्, अत्रेव तत्रापि घटवृत्तित्वावच्छेदेनैकत्वस्य, तदवयववृत्तित्वावच्छेदेन च नानात्वस्याविरुद्धत्वात्। एतेन 'सर्वैश्च नीलैरारब्धेऽवयविनि नीलाद् नीलं स्वस्वावच्छेदेनोत्पद्यमानं रूपमविरोधाद् व्यापकमेवोत्पद्यते, सजातीय-विजातीयेषु नानापदार्थेषु जायमानं समूहालम्बनमिवैकं ज्ञानम्' इति दीधितिकृदुक्तं निरस्तम्, समूहालम्बनेऽप्येकत्वस्य संख्यारूपस्य त्वयानभ्युपगमात्, आश्रयगतैकत्वस्य चातिप्रसङ्गात्, 'एकम्' 'एकम्' इत्यनुगतधिया सकलैकवृत्त्यतिरिक्तैकत्वस्वीकारे च द्वित्वादेरपि तादृशस्य स्वीकर्तुमुचितत्वेनैकत्व-द्वित्वाद्यविरोधात्, एवमेव घटज्ञान-पटज्ञानयोरैक्यमित्यत्र द्विवचनस्य सुघटत्वात्, भिन्नाभिन्नावच्छेदेन तत्रैकत्व-द्वित्वोभयसमावेशसंभवात्, प्रयोगस्य च विवक्षाधीनत्वात्; उवाच च वाचकमुख्यः— "अर्पितानर्पितसिद्धेः"[1] इति। एकत्व-द्वित्वयोर्वृत्त्यावच्छेदकौ च तद्व्यक्ति-तदंशौ। तथाप्येतद्व्यक्त्यवच्छेदेन 'इदमेकं ज्ञानम्' इत्येकत्वभानवद् घटे 'इदमेकं रूपम्' इत्युपपत्तावपि नानावयवरूपेष्वपि 'इदमेकं रूपम्' इति धीः स्यादिति चेत्। न, अभेदविवक्षायामिष्टत्वात्, भेदविवक्षायां च 'इदमुभयं नैकम्' इत्यत्रोभयत्वेनापृथक्कृततद्व्यक्तेः पृथक्कृतैकत्वानवच्छेदकत्ववत् पृथक्कृततद्व्यक्तेरपृथक्कृतैकत्वानवच्छेदक-

१ तत्त्वार्थसूत्रे ५।३१।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वात् । 'इदमुभयात्मकम्' इत्युभयत्वविशिष्टेदंत्वस्यैकत्वपर्याप्त्यनवच्छेदकत्वेन न स्यात्, 'इदमेकं रूपम्' इति तु शुद्धेदंत्वस्यैकत्वपर्याप्त्यवच्छेदकत्वेन स्यादिति चेत् । स्यादेव यदि मदीर्घाध्यवसायिना तेनेदंत्वमेकत्वं च विविच्य न पर्यालोच्येतेति दिग् ।

व्याप्यवृत्तिशुक्लादिनानारूपवदवयव्युपगमे च शुक्लाद्युपलम्भे नीलाद्युपलम्भापत्तिरेव दोषः; तदाह— सम्मतिटीकाकारः— "आश्रयव्यापित्वेऽप्येकावयवसहितेऽप्यवयविन्युपलभ्यमानेऽपरावयवानुपलब्धावप्यनेकरूपप्रतिपत्तिः स्यात्, सर्वरूपाणामाश्रयव्यापित्वात्" इति । चित्रैकरूपप्रतिपत्तिरप्यनुभवविरुद्धा, शुक्लादिरूपाणामपि निर्विगानं तत्र प्रतीतेः; यदाहुः– "न च चित्रपटादावपास्तशुक्लादिविशेषं रूपमात्रं तदुपलम्भान्यथानुपपत्त्याऽस्तीत्यभ्युपगन्तव्यम्, कथम्?, 'चित्ररूपः पटः' इति प्रतिभासाभावप्रसक्तेः" इति । किञ्च, एवं शुक्लावयवावच्छेदेनापि चित्रोपलम्भः स्यात् । न च चित्रत्वग्रहे परम्परयावयवगतनीलेतररूप-पीतेतररूपादिमत्त्वग्रहो हेतुः, अत एव 'त्र्यणुकचित्रं चक्षुषा न गृह्यते' इत्याचार्याः । न च नीलेतररूपत्वाद्यवच्छिन्नप्रकारताकग्रहो न हेतुः, नीलत्व-पीतत्वादिनाऽवयवगतनील-पीतादिग्रहेऽप्यवयविचित्रप्रत्यक्षादिति वाच्यम्; विलक्षणचित्रप्रत्यक्षे तेन तेन रूपेण तत्तद्ग्रहस्यापि हेतुत्वात् । वस्तुतो नीलेतररूपत्वादिव्याप्यत्वेन नीलेतररूपत्व-पीतत्वाद्यननुगमाद् न क्षतिरिति चेत् । न, त्र्यणुकचित्ररूपाग्रहे चतुरणुकचित्रप्रत्यक्षानुपपत्तेः; नीलेतररूप-पीतेतररूपादिमदवयवावच्छेदेनेन्द्रियसंनिकर्षस्यावयवनीलादिगतनीलत्वादिग्रहविरोधिदोषाभावानां च हेतुत्वे गौरवात् । अवयविनि साक्षान्नीलपीतादिग्रहस्य तद्ग्रहहेतुत्वे च तत्र नीलादिसिद्धिः, तद्ग्रहस्य भ्रमत्वायोगात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यादेतत्, अव्याप्यवृत्तिनीलादिकल्पे तादृग्नीलादिप्रत्यक्षे द्रव्यतत्समवेतप्रत्यक्षत्वावच्छिन्नं प्रति, अव्याप्यवृत्तिद्रव्यसमवेतप्रत्यक्षत्वावच्छिन्नं प्रति वा चक्षुःसंयोगावच्छेदकावच्छिन्नसमवायसंबन्धावच्छिन्नाधारतासंनिकर्षो निरूपकतया विषयनिष्ठो हेतुः संयोगादिप्रत्यक्षस्थले क्लृप्त एव। न च नीलकपालिकावच्छेदेन चक्षुःसंनिकर्षस्य तत्समवेतनील-पीतोभयकपालावच्छिन्नत्वनियमात् तदवच्छेदेन संनिकर्षे पीतादिग्रहापत्तिः, संयोगव्यक्तिर्यद्देशव्यापिनी तत्र परम्परया तद्देश एवावच्छेदको न तु संपूर्णोऽवयव इत्यभ्युपगमाद् न दोषः। नीलविशिष्टपीतादिना नीलपीतोभयादिना वाऽन्यान्तरचित्रधीसंभवाद् नावान्तरचित्रसिद्धिः, चित्रत्वेन समप्रवान्तरचित्रत्वसामानाधिकरण्यप्रत्ययस्यापि नील-पीतविशिष्टचित्रत्वसामानाधिकरण्यावगाहित्वात्, नीलाद्यविशेषितनीलादिभेदाश्रयरूपसमुदायेनानुगतचित्रप्रतीतिसंभवाच्चित्रत्वसामान्यमप्यसिद्धमेवेति।

मैवम्, अनुभवसिद्धस्य चित्रत्वस्योक्तरीत्यापलापे नीलादिप्रतीतेरपि भेदविशेषावगाहित्वेन नीलत्वादेरप्यपलापप्रसङ्गात्। अस्तु तर्हि तत्र तत्रावयविनि नीलत्वादितत्तच्चित्रत्वाश्रयमेकमेव व्याप्यवृत्तिरूपादिकं लाघवान्नीलत्वादिकमेव; तत्राव्याप्यवृत्तिगुणविशेषाणामिव जातिविशेषाणामप्यव्याप्यवृत्तित्वेऽविरोधात्, परस्परव्यभिचारिजात्योः सामानाधिकरण्यस्य बाधकविरहसत्तर्कप्रमाणसिद्धस्यानभ्युपगममात्रेण निराकरणायोगात्। अत एव ककारादिषु सर्वेषु ताराद्याकारानुगतमतिरुपपद्यते, एकस्यैव तारत्वादेः ककारादिवृत्तित्वात्, उपपद्यते न मार्त-पाषाण-सौवर्णघटादावनुगतानुगतमतिरिति स्वतन्त्र एव पन्था इति चेत्। सत्यम्, एवमप्येकानेकवस्तुरूपाव्याहतावपि सत्यामपि चित्रत्वग्राहकसामग्र्यां नीलभागावच्छेदेन 'इह न

१ ज. 'माद् नी'।

चित्रम्' इति प्रतीतेस्तत्तदवच्छेदेन पर्याप्तापर्याप्ततया स्वरूपतोऽपि तस्यैकानेकात्मकस्य युक्तत्वात्। एवं हि चित्रप्रतिभासे नीलपीतादिमत्त्वग्रहहेतुत्वमपि न कल्पनीयम्, पनसमात्रदेशावच्छेदेन 'वनम्' इति बुद्ध्यभावस्येव नीलभागमात्रावच्छेदेन चित्रप्रतिभासाभावस्य विषयाभावादेवोपपत्तेः, तद्देशेनाचित्रादिधियश्च नयाधीनत्वात्। तदिदमाह सम्मतिटीकाकारः- "अत एवैकानेकरूपत्वाच्चित्ररूपस्यैकावयवसहितेऽवयविन्युपलभ्यमाने शेषावयवाऽऽवरणे चित्रप्रतिभासाभाव उपपत्तिमान्, सर्वथा त्वेकरूपत्वे तत्रापि चित्रप्रतिभासः स्यात्, अवयविव्याप्त्या तद्रूपस्य वृत्तेः। न चावयवनानारूपोपलम्भसहकारीन्द्रियमवयविनि चित्रप्रतिभासं जनयति, इति तत्र सहकार्यभावाच्चित्रप्रतिभासानुत्पत्तिरिति वाच्यम्; अवयविनोऽप्यनुपलब्धिप्रसङ्गात्। न हि चाक्षुषप्रतिपत्त्याऽगृह्यमाणरूपस्यावयविनो वायोरिव ग्रहणं दृष्टम्। न च चित्ररूपव्यतिरेकेणापरं तत्र रूपमात्रमस्ति, यतस्तत्प्रतिपत्त्या पटग्रहणं भवेत्" इत्यादि। तदेवं चित्ररूपवत् सिद्धं नित्याऽनित्यत्वादिरूपेणैकानेकं वस्त्विति परिभावनीयं सुधीभिः। विस्तरस्तु स्याद्वादरहस्ये ॥ ३७ ॥

'क्षयेक्षणात्' इति तुर्यहेतुं दूषयन्नाह—

अन्ते क्षयेक्षणं चाद्यक्षणक्षयप्रसाधनम्। तस्यैव तत्स्वभावत्वाद्युज्यते न कदाचन ॥३८॥

अन्ते क्षयेक्षणं च- अन्ते नाशदर्शनं च, आद्यक्षणक्षयप्रसाधनं- प्रथमक्षणे वस्तुनः सर्वथा नाशस्यानुमापकं यदुक्तम्, तस्यैव- वस्तुनः, तत्स्वभावत्वात्- अन्त एव क्षयस्वभावत्वात्; न युज्यते कदाचन तत्, अन्यथाऽतत्स्वभावत्वापत्तेः॥३८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव समर्थयन्नाह—

आदौ क्षयस्वभावे च तत्रान्ते दर्शनं कथम् ?। तुल्यापरापरोत्पत्तिविप्रलम्भाद्यथोदितम्३९

आदौ– प्रथमक्षण एव, क्षयस्वभावे च– नाशस्वभावे च, तत्र– वस्तुन्यभ्युपगम्यमाने, अन्ते दर्शनं कथम् ?– आदावेव किं न तद्दर्शनम् ? इति भावः। पराभिप्रायमाह– तुल्यापरापरोत्पत्तिविप्रलम्भात्– सदृशोत्तरोत्तरक्षणप्रतिरोधात् अन्त एव तद्दर्शनम्, नादौ, प्रतिबन्धकसत्त्वादिति। अत्र स्वाभियुक्तसम्मतिमाह– यथोदितं पूर्वग्रन्थे वृद्धैः ॥ ३९ ॥

किमुदितम् ? इत्याह—

'अन्ते क्षयेक्षणादादौ क्षयोऽदृष्टोऽनुमीयते। सदृशेनावरुद्धत्वात्तद्ग्रहाद्धि तदग्रहः' ॥४०॥

अन्ते क्षयेक्षणात्– अन्ते नाशदर्शनात्, आदौ– उत्पत्तिकाले, क्षयः– नाशः, अदृष्टोऽप्यनुमीयते, अनश्वरस्यान्तेऽपि तदयोगात्। कथं तर्हि प्राक् तदग्रहः ? इत्याह– सदृशेन– तुल्यक्षणेन, अवरुद्धत्वात्; तद्ग्रहाद्धि– सदृशग्रहादेव, तदग्रहः– आद्यक्षयाग्रहः। अत्र 'घटोत्पत्तिक्षणो घटध्वंसाधिकरणः, घटध्वंसाधिकरणक्षणपूर्वक्षणत्वात्' इत्यनुमाने घटोत्पत्तिप्राच्यक्षणे व्यभिचारः, हेतौ घटोत्पत्त्यपूर्वत्वविशेषणे च संतानेन व्यभिचार इति दूषणं स्फुटमेवेति ॥ ४० ॥

तदग्रहहेतुं दूषयन्नाह ग्रन्थकारः—

---

१ ज. 'हृ ए'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदप्यसदेवेति सदृशो भिन्न एव यत् । भेदाग्रहे कथं तस्य तत्स्वभावत्वतो ग्रहः ? ॥४१॥

एतदपि- परोक्तम्, असदेव- अनुपपद्यमानार्थकमेव, यद्- यस्मात्, सदृशो भिन्न एव- भेदघटित एव। तद्भिन्नत्वे सति तद्वृत्तिधर्मवत्त्वं हि सादृश्यम् । तद्वृत्तिश्च धर्मो विधिरूपो निषेधरूपो वेत्यन्यदेतत् । ततः किम्? इत्याह- भेदाग्रहे सति, कथं तस्य- सदृशस्य, ग्रहः? । कुतः? इत्याह- तत्स्वभावत्वतः- भेदघटितस्वभावत्वात् । न च तद्घटितं तदग्रहे गृह्यते, जलत्वाग्रहे जलत्वस्वभावत्वाग्रहदर्शनात् ॥ ४१ ॥

पराभिप्रायमाशङ्कते—

तदर्थनियतोऽसौ यद्भेदमन्याग्रहाद्धि तत् । न गृह्णातीति चेत्तुल्यः सोऽपरेण कुतो गतिः ?॥

तदर्थनियतः- अधिकृतैकक्षणार्थविषय इत्यर्थः, असौ- ग्रहः सदृशपरिच्छेदः, यद्- यस्मात्, भेदं- नानात्वलक्षणम्, तत्- तस्मात्, अन्याग्रहाद्धि- तदा प्रतियोग्यग्रहणादेव, न गृह्णाति, तत्त्वतस्त्वस्त्येव स वस्तुतः सदृशग्रहे । एवं हि तन्नाशग्रहप्रतिबन्धको दोषः । न तु सदृशत्वग्रहोऽप्यपेक्षितः । न हि शुक्तौ रजतसारूप्यग्रहोऽप्युल्लिखितरजतभेद एव रजतत्वभ्रमजनकः, रजतभेदग्रहे रजतत्वभ्रमस्यैवाभावात्; किन्तु स्वरूपत एव, तद्वदत्रापीति भावः । अत्र शुक्तौ रजतसहचरितचाकचिक्यादिधर्मवत्त्वग्रहादेव रजतभ्रमः, प्रकृते तु सदृशदर्शनं निर्विकल्पतयाऽसत्कल्पं न नाशग्रहविरोधि, अतिप्रसङ्गात् । अस्तु वा यथा कथञ्चिदेतत्, तथापि सादृश्यस्य दुर्ग्रहत्वात् तदुक्तेरेवानुपपत्तिः, इत्यभिप्रायवानुत्तरयति- इति चेत्- यद्युक्ताभिप्राय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वानभवान्, तदा सः– गृह्यमाणः क्षणः, अपरेण– प्राग्गृहीतेन क्षणेन, तुल्यः– सदृशः । 'इति' इति शेषः, कुतो गतिः– कथं परिच्छित्तिः ?– उपायाभावाद् न कथञ्चिदित्यर्थः ॥ ४२ ॥

तदगतौ को दोषः ? इत्यत आह—

तथागतेरभावे च वचस्तुच्छमिदं ननु । सदृशेनावरुद्धत्वात्तद्ग्रहाद्धि तदग्रहः ॥४३॥

तथागतेः– भेदपरिच्छित्तेः, अभावे च सति, इदं– प्रागुक्तम्, भवतो वचः, 'ननु' इत्याक्षेपे, तुच्छं– असारम्, अन्वयाबोधकत्वात् । किम् ? इत्याह– यदुत 'सदृशेनावरुद्धत्वात् तद्ग्रहाद्धि तदग्रहः' इति ॥ ४३ ॥

दर्शने भेदानुल्लेखेऽपि विकल्पे तदुल्लेखात् सादृश्यविकल्पसंभवात् कथमुक्तवचसोऽनुपपत्तिः ? इत्याशङ्कायामाह—

भावे वास्या बलादेकमनेकग्रहणात्मकम् । अन्वयि ज्ञानमेष्टव्यं सर्वं तत्क्षणिकं कुतः ? ॥४४॥

भावे वाऽस्याः– भेदगतेः, बलात्– अस्वरसादपि, अनेकग्रहणात्मकं– पूर्वापरग्रहणरूपम्, एकमन्वयि ज्ञानमेष्टव्यम्, अन्यथा भेदग्रहदशायां प्रतियोगिग्रहाभावात् तद्ग्रहानुपपत्तेः, प्रदीर्घपर्यालोचनानुपपत्तेश्च । यत एवम्; तत्– तस्मात्, सर्वं क्षणिकं कुतः, उक्तज्ञानस्यैवान्वयैकत्वात् ? ॥ ४४ ॥

३६ प्रसङ्गात् क्षणिकत्वे दोषान्तरमाह—

---

१ अत्रैव स्तबके कारिका ४० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानेन गृह्यते चार्थो न चापि परदर्शने । तदभावे तु तद्भावात्कदाचिदपि तत्त्वतः ॥४५॥

न च परदर्शने– बौद्धमते, ज्ञानेनार्थोऽपि– नीलादिरपि, गृह्यते– ग्रहीतुं शक्यते, तत्त्वतः– परमार्थतः, कदाचिदपि । कुतः ? इत्याह– तदभावे तु तद्भावात्– नीलाद्युत्पत्त्यनन्तरमेव ज्ञानोत्पत्तेः, अर्थ-ज्ञानयोर्हेतु-हेतुमद्भावाभ्युपगमात्, तस्य च पौर्वापर्यनियतत्वात् । एवं च वर्तमानसंबन्धित्वावगमोऽर्थस्य क्षणद्वयावस्थितत्वं विना दुर्घटः । न च जनकोऽर्थो वर्तमानकालतया नाक्षसंविदि प्रतिभाति, किन्तु तस्यां तत्समानकालभाव्याकारः, तस्य च तथावभासाद् वर्तमानार्थावगमोक्तिरिति वाच्यम्; ज्ञानकाले बहिरवभासमानस्य नीलादेर्ज्ञानाकारत्वासिद्धेः, अन्यथाऽन्तरवभासमानस्य सुखादेरप्यर्थाकारताप्रसक्तिः, इति ज्ञानसत्तैवोत्सीदेत् । न च न गृह्यमाणस्य ज्ञानसमानसमयस्य जनकता, जनकस्य च क्षणिकत्वेन वर्तमानतयाऽतीतस्य न प्रतिभासः, इति समारोपिताकारग्राहि सर्वमेव ज्ञानमिति सांप्रतम्; नील-द्विचन्द्रज्ञानयोरविशेषापत्तेः । न च बाह्यार्थत्वादिना तयोरविशेषोऽभ्युपगन्तव्यः, प्रमाणा-ऽप्रमाणविभागविलयप्रसक्तेः । न च ज्ञाना-ऽर्थयोरेकसामग्रीजन्ययोः सहभावित्वेन वर्तमानग्रहणं क्षणिकत्वेऽपि वैभाषिकमताश्रयणेनाभ्युपगन्तव्यम्, क्रियानियमस्य कर्मशक्तिनिमित्तत्वेन व्यवस्थापितत्वादिति ॥४५॥

अभ्युपगम्याप्यर्थग्रहं दोषान्तरमाह—

ग्रहणेऽपि यदा ज्ञानमपैत्युत्पत्त्यनन्तरम् । तदा तत्तस्य जानाति क्षणिकत्वं कथं ननु ? ॥४६॥ ॥२११॥

ग्रहणेऽप्यर्थस्य यदा ज्ञानमुदेति तदा तद्– ग्राह्यम्, उत्पत्त्यनन्तरं– उत्पत्तिनाशकाले, अपैति– नश्यति । अतस्तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षणिकत्वं कथं ननु ?– नैव जानाति, वस्तुत्वात् तस्य, ज्ञानस्य च वस्तुग्राहकत्वात् ॥ ४६ ॥

जानात्येव वस्तुदर्शनं क्षणिकत्वमपि, स्वरूपतोऽविकल्पस्वभावत्वात्, विकल्पयति तु न, इति पराशयमाह—

तस्यैव तत्स्वभावात्स्वात्मनैव तदुद्भवात् । यथा नीलादि ताद्रूप्यान्नैतन्मिथ्यात्वसंशयात् ४७

तस्यैव–अर्थस्य, तत्स्वभावत्वात्– क्षणिकत्वस्वभावत्वात्, स्वात्मनैव– ज्ञानात्मनैव, जानाति क्षणिकत्वम् । कुतः ? तदुद्भवात्– क्षणिकस्वभावादर्थादुत्पत्तेः । निदर्शनमाह– यथा नीलादि जानाति, ताद्रूप्यात्– विषयसारूप्यात्, न तु विकल्पविधया, तथेदमपीति भावः । अत्रोत्तरम्– नैतद्– यदुक्तं परेण, तत्रास्यैव मिथ्यात्वसंशयात्–क्षणिकत्वबोधे सांख्यानामालोचने शुक्ले पीतदर्शनादुत्तरकाले तत्र पीतानिश्चयात् । प्राक् पीतानालोचनमनुमीयते चेत् । क्षणिकत्वदर्शनेऽपि तुल्ययोगक्षेममेतदिति ॥ ४७ ॥

स्वानुमानतोऽपि न क्षणिकत्वबोध इत्याह—

न चापि स्वानुमानेन धर्मभेदस्य संभवात् । लिङ्गधर्मातिपाताच्च तत्स्वभावाद्ययोगतः ४८

न चापि स्वानुमानेन जानाति क्षणिकत्वं, यथा मद्रूपमनित्यं तथाऽयमपीति । कुतः ? इत्याह– धर्मभेदस्य संभवात्– चेतनेतररूपधर्मभेदोपपत्तेः, किञ्चित्ताद्रूप्येऽपि तथा ताद्रूप्याभावेन साधारण्या व्याप्तेरविकल्पनात् । दोषान्तरमाह— लिङ्गधर्मातिपाताच्च– लिङ्गरूपातिलङ्घनाच्च तदात्मन एव स्वानुमानपक्षे । कुतः ? इत्याह– तत्स्वभावाद्ययोगतः– तस्यार्थस्य न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तज्ज्ञानं स्वभावः, नापि कार्यम्, न चान्येन गम्य इति यावत्, तद्रूपविशेषाभावात् । न चार्थक्रियालक्षणसत्त्वेन क्षणिकत्वानुमानमपि युक्तम्, ततः क्षणावस्थितिमात्रसाधने सिद्धसाधनात्, क्षणावस्थितिनिबन्धनत्वाद् बहुक्षणस्थितेः, क्षणादूर्ध्वमभावस्य च तेन सह प्रतिबन्धाग्रहेण साधयितुमशक्यत्वादिति भावः ॥ ४८ ॥

अथ नित्यस्यार्थक्रियाऽक्षमत्वात् पारिशेष्यात् क्षणिकत्वं सेत्स्यतीत्याशङ्कयाह—

नित्यस्यार्थक्रियायोगोऽप्येवं युक्त्या न गम्यते । सर्वमेवाविशेषेण विज्ञानं क्षणिकं यतः ॥४९॥

एवं सति नित्यस्यार्थक्रियाऽयोगोऽपि न गम्यते युक्त्या– नित्यस्यैवाज्ञानात् । अत्र हेतुमाह– यतः सर्वमेव विज्ञानमविशेषेण क्षणिकम् । एवं च बहुक्षणस्थायित्वरूपं नित्यत्वं कथं बहुक्षणाग्रहे सुग्रहम् ? इति भावः ॥ ४९ ॥

न चार्थक्रियाऽभावोऽप्यक्षणिके, इति वस्तुस्थितिमाह—

तथाचित्रस्वभावत्वान्न चार्थस्य न युज्यते । अर्थक्रिया ननु न्यायात्क्रमाक्रमविभावनी ॥५०॥

तथाचित्रस्वभावत्वात्– क्रमवत्परिणामानुविद्धाक्रमवद्द्रव्यरूपत्वात्, न चार्थस्य न युज्यतेऽर्थक्रिया– किन्तु युज्यते, ननु– निश्चितम्, न्यायात्– अनुभवसहितात् तर्कात् । कीदृशी ? इत्याह– क्रमाक्रमविभावनी– युगपदयुगपदुत्पत्तिका सुखदुःख ज्ञानजननजलाद्यानयनादिरूपा । तत्र च काचिदस्मदादिसंवेद्या, अन्या चातादृशी । तेन न येन घटेन कदापि जला-

१ ज. 'म्यत इ' । २ ज. प्रहणे सा' । ३ ख.ग.घ.च.ज.'भावनी' । ४ ख. ग. घ. च. 'दाचिन्न' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नयनादि न कृतं तस्यार्थक्रियाकारित्वाभावादसत्त्वम्, अन्ततस्तथासिद्धज्ञानज्ञेयत्वादिपर्यायरूपाया अप्यर्थक्रियायास्तेन करणादिति द्रष्टव्यम् ॥ ५० ॥

इतस्ततो नोड्डयनं विधातुं पक्षी समर्थः सुगतात्मजोऽयम् । विसृत्वरस्तार्किकतर्कशस्त्या यतो विलूनः क्षणिकत्वपक्षः ॥१॥
निरीक्ष्य साक्षादवलम्ब्यमानं परैर्विशीर्णं क्षणिकत्वपक्षम् । स्याद्वादविद्यामवलम्बनं भोः श्रयन्तु विज्ञाः ! सुदृढं हिताय ॥२॥

क्षणिकत्ववादतात्पर्यविषयवार्तामाह—

अन्ये त्वभिदधत्येवमेतदास्थानिवृत्तये । क्षणिकं सर्वमेवेति बुद्धेनोक्तं न तत्त्वतः ॥५१॥

अन्ये तु– मध्यस्थाः, एवमभिदधति यदुत– एतदास्थानिवृत्तये– रागनिबन्धनविषयनित्यत्ववासनापरित्यागाय, 'क्षणिकं सर्वमेव' इति बुद्धेनोक्तम्, न तत्त्वतः– न यथाश्रुततत्त्वबोधनाभिप्रायेण । उच्यते चानित्यताभावनाभावनायैवमस्मदीयैरपि; तदुक्तम्—

"यत्प्रातस्तद् न मध्याह्ने यद् मध्याह्ने न तन्निशि । निरीक्ष्यते भवेऽस्मिन् हि पदार्थानामनित्यता ॥ १ ॥" इति ॥५१॥

विज्ञानवादतात्पर्यविषयप्रतिपादनायाह—

विज्ञानमात्रमप्येवं बाह्यसङ्गनिवृत्तये । विनेयान् कांश्चिदाश्रित्य यद्वा तद्देशनार्हतः ॥५२॥

एवं– क्षणिकत्ववत्, विज्ञानमात्रमपि, ज्ञानातिरिक्तस्यालीकत्वज्ञाने तन्मात्रप्रतिबन्धेन बाह्यसङ्गनिवृत्तये– धन-धान्यादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाह्यार्थपरिष्वङ्गपरित्यागाय, सामान्यतो विनेयानाश्रित्योक्तम्। विशेषविषयमाह– यद्वा, अर्हतः– ज्ञाननयावधारणयोग्यान्, काँश्चिद् विनेयानतिनिपुणानाश्रित्य, तद्देशना– ज्ञानवाददेशना ॥ ५२ ॥

न चैतदुक्तं बुद्धाकूतं न युक्तमित्याह—

न चैतदपि न न्याय्यं यतो बुद्धो महामुनिः। सुवैद्यवद् विना कार्यं द्रव्यासत्यं न भाषते ॥५३॥

न चैतदपि– अनन्तरमुक्तम्, न न्याय्यं– न सांप्रतमिति वाच्यम्, यतो बुद्धो महामुनिः– विदिततत्त्वो निरुपधिपरदुःखप्रहाणेच्छामूलकदेशनाप्रवृत्तिशाली च परैरिष्यते, अतोऽयं सुवैद्यवत् कार्यं विना– परहितानुबन्धि प्रयोजनं विना, न भाषते द्रव्यासत्यम्। यथा हि सुवैद्यः कटुकमप्यौषधं कटुकौषधपानभीतस्य परस्य प्रवृत्तयेऽकटुकमपि वदन् नाऽनाप्तः स्यात्, तथा बुद्धोऽप्यक्षणिकैकरूपं ज्ञप्तिमात्रास्वभावं च विनेयमतिपरिष्काराय तथा वदन्नपि नाऽनाप्तः स्यात्; अन्यथा तु स्यादेव। तथा च तदाप्तत्वे तद्देशनाया अत्र तात्पर्यम्, अन्यथा तु तस्यानाप्तत्वमेवेति भावः ॥ ५३ ॥

वार्तान्तरमाह—

ब्रुवते शून्यमन्ये तु सर्वमेव विचक्षणाः। न नित्यं नाप्यनित्यं यद्वस्तु युक्त्योपपद्यते ॥५४॥

अन्ये तु विचक्षणाः– वितण्डापण्डिता माध्यमिकाः, सर्वमेव वस्तु शून्यं ब्रुवते। कुतः ? इत्याह– यद्– यस्मात्, वस्तु युक्त्या विचार्यमाणं न नित्यं नाप्यनित्यमुपपद्यते ॥ ५५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव प्रकटयन्नाह—

नित्यमर्थक्रियाभावात्क्रमाक्रमविरोधतः। अनित्यमपि चोत्पादव्ययाभावान्न जातुचित् ॥५५॥

क्रमाक्रमविरोधतः– क्रमवद्विज्ञानादिकार्यकारित्वे भेदप्रसङ्गात्, अक्रमवत्कार्यकारित्वे चैकदा सर्वकार्योत्पत्तेः, अर्थक्रियाऽभावाद् नित्यं वस्तु न युक्तम्। अनित्यमप्युत्पाद-व्ययाभावाज्जातुचिद् न युक्तम्। न हि तौ स्वतः, परतः, उभाभ्याम्, अनिमित्तौ वा संभवतः। आद्ये, कारणापेक्षाऽभावेन देशादिनियमाप्रसक्तेः। द्वितीयेऽपि, सत्त्वे कारणवदुत्पत्तिविरोधात्, असत्त्वे खरविषाणवदुत्पाद-नाशायोगात्, उभयस्वभावत्वे च विरोधात्। तृतीये चोभयदोषानुषङ्गात्, "प्रत्येकं यो भवेद् दोषो द्वयोर्भावे कथं न सः?" इत्युक्तत्वात्। चतुर्थे चानभ्युपगमात्। तदुक्तम्–

"न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः। उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन॥ १ ॥" इति ॥ ५५ ॥

नन्वेवं कथं पुत्रोत्पादज्ञाने सुखम्, तद्ध्वंसे च ज्ञाते दुःखम्? इत्यत आह—

उत्पाद-व्ययबुद्धिश्च भ्रान्तानन्दादिकारणम्। कुमार्याः स्वप्नवज्ज्ञेया पुत्रजन्मादिबुद्धिवत् ५६

उत्पाद-व्ययबुद्धिश्च लौकिकी, परमार्थेन भ्रान्ता– न वस्तुसती। किंवत्? इत्याह– कुमार्याः स्वप्नवत्– स्वापदशायामकृतसंभोगायाः कन्यायाः संभोगानुभववत्। ईदृश्यपि साऽऽनन्दादिकारणम्, आदिना शोकग्रहः। किंवत्? इत्याह– पुत्रज-

१ नागार्जुनविरचिते माध्यमिककारिकाग्रन्थे प्रत्ययपरीक्षाप्रकरणे श्लो० १।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्मादिबुद्धिवत्, आदिना पुत्रमरणग्रहः, 'कुमार्याः स्वप्ने' इति योज्यते ।

अत्रायममीषां संप्रदायः– नीलादयो न परमार्थसद्व्यवहारानुपातिनः, विशददर्शनावभासित्वात्, तिमिरपरिकरितदृगवभासीन्दुद्वयवत् । न च चन्द्रद्वयज्ञानं बाध्यत्वाद् भ्रान्तम्, नीलादिज्ञानं त्वबाध्यत्वाद् न तथेति सांप्रतम्, बाध्यत्वानुपपत्तेः; तथाहि– बाधकेन न विज्ञानस्य तत्कालभावि स्वरूपं बाध्यते, तदानीं तस्य स्वरूपेण प्रतिभासनात् । नाप्युत्तरकालम्, क्षणिकत्वेन तस्य स्वयमेवोत्तरकालेऽभावात् । नापि प्रमेयं प्रतिभासमानेन रूपेण बाध्यते, तस्य विशदप्रतिभासादेवाभावासिद्धेः । अप्रतिभासमानेन तु रूपेण स्वत एव बाधः । नापि प्रवृत्तिरुत्पन्ना बाध्यते, उत्पन्नत्वादेवासत्ताऽयोगात्; अनुत्पन्नायास्तु स्वत एव बाधः । किञ्च, बाधकं न बाध्यापेक्षया भिन्नसंतानम्, अतिप्रसङ्गात् । एकसंतानमपि न तदेककालम्, असंभवात् । नापि भिन्नकालमेकार्थम्, उत्तरघटज्ञानस्य पूर्वघटज्ञानबाधकतापत्तेः । नापि भिन्नार्थम्, उत्तरपटज्ञानस्य तथात्वापत्तेः । नाप्यनुपलब्धिर्बाध्यज्ञानसमानकाला तद्बाधिका, तस्या असिद्धेः । नाप्युत्तरकालभाविनी बाध्यज्ञानैकार्थविषया, एकविषयकस्य तदर्थसाधकत्वेनाबाधकत्वात् । नापि विभिन्नविषया, तस्यास्तदानीं स्वविषयसाधकत्वेन बाध्यज्ञानविषयाभावासाधकत्वात् । न च दुष्टकारणप्रभवत्वेनेन्दुद्वयधियोऽसत्यार्थविषयत्वावगमो बाध्यत्वम्, असिद्धेः, इन्द्रियेण दोषाग्रहणात् । न च समानसामग्रीकस्य नरान्तरस्य तदग्रहणादितरत्र दुष्टकारणानुमानम्, तिमिराभावाद् नरान्तरे सामग्रीसाम्यासिद्धेः । न च मिथ्यारूपत्वेन तत्र दुष्टकारणजन्यत्वानुमानम्, इतरेतराश्रयात् । न चेन्दुद्वयज्ञानस्य विसंवादित्वादसत्यत्वम्, समानजातीयतद्विज्ञानानुत्पत्तिरूपविसंवादस्य यावत्तिमिरमसिद्धेः, विजातीयज्ञानोत्पत्तेर्विसंवादत्वे च स्तम्भादिप्रतिभासेऽतिप्रसङ्गात् । ॥२१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो न नील-द्विचन्द्रादिज्ञानयोः कश्चिद् विशेषः, द्विचन्द्रवद् नीलस्य विचार्यमाणस्यानुपपन्नत्वात् ।

न चैवं नीलादेर्भिन्नस्यानुपपत्तेरभेदस्य न्यायप्राप्तत्वाज्ज्ञानाद्वैतापत्तिः, न शून्यतेति वाच्यम्; नीलादेर्विचित्रस्य प्रतिभासे जगतोऽपि चित्रताप्राप्तेः; तदुक्तम्– "किं स्यात्सा चित्रतैकस्याम्" इत्यादि । न च नीलाद्यनुपरक्तं प्रकृतिपरिशुद्धज्योतिर्मात्रमेव तत्त्वमस्तु न शून्यतेति वाच्यम्; तथाभूतज्योतिर्मात्रस्य कदाचनाप्यप्रतिपत्तेः । नीलादेरवभासशून्यतापि न प्रतीयत इति चेत् । किं ततः ?, न हि वयं प्रतिभासविरतिलक्षणां शून्यतां ब्रूमः, किन्तु प्रतिभासोपमत्वं सर्वधर्माणाम्; उक्तं च– "प्रतिभासोपमाः सर्वे धर्माः" इति । प्रतिभासश्च सर्वो भेदा-ऽभेदशून्यः । न हि नीलस्वरूपं सुखाद्यात्मना भिन्नमभिन्नं वानुभूयते, अन्यापेक्षत्वात् तथानुभवस्य । न च भेदवेदनमेवैकत्वावेदनम्, एकत्वावेदनस्यैव भेदवेदनत्वप्रसङ्गात् । एतेन 'प्रतिभासे सति कथं शून्यता' इत्यपास्तम्, 'तस्यैकानेकस्वभावयोगतः शून्यता' इति प्रतिपादनात् । तदुक्तमाचार्येण–

"भावा ये न निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः । यस्मादेकमनेकं वा रूपं तेषां न विद्यते ॥ १ ॥"

इति । ततो बाह्यमाध्यात्मिकं वा रूपं न तत्त्वम्, स्थूल-परमाण्वादिरूपानुपपत्तेः, किन्तु सांवृतमेव । संवृतिश्च त्रिधा– एका लोकसंवृतिर्मरीचिकादिषु जलभ्रान्तिरूपा, अपरा तत्त्वसंवृतिः सत्यनीलादिप्रतीतिरूपा, अन्या चाभिसमयसंवृतिर्योगिप्रतिपत्तिरूपा, योगिप्रतिपत्तेरपि ग्राह्य-ग्राहकाकारतया प्रवृत्तेः; उक्तं च भगवद्भिः– "कतमत् संवृतिसत्त्वं यावल्लोकव्यवहारः" इति । ततो मध्यमक्षणरूपा संविदेव सर्वधर्मरहिता परमार्थसतीति सिद्धम् । आह च––

" मध्यमा प्रतिपत् सैव सैव धर्मनिरात्मता । भूतकोटिश्च सैवेयं तथ्यता सैव शून्यता ॥ १ ॥ " इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा चाविभागरूपाप्यविद्यावशाद् विभक्तरूपेव भासते, तदुक्तम्—

" अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः। ग्राह्य-ग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ १ ॥ "

इति। समस्ताविद्याविलये तु स्वच्छसंविन्मात्रमाभासते; तदुक्तम्—

" नान्योऽनुभाव्यो बुद्ध्यास्ति तस्य नानुभवोऽपरः। ग्राह्य-ग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥ १ ॥ " इति ॥५६॥

एतन्निराकरणवार्तामाह—

अत्राप्यभिदधत्यन्ये किमित्थं तत्त्वसाधनम्। प्रमाणं विद्यते किञ्चिदाहोस्विच्छून्यमेव हि ५७

अत्रापि– शून्यतावादेऽपि, अन्ये– वादिनः, अभिदधति यदुत– किमित्थं तत्त्वसाधनं शून्यतातत्त्वसाधनम्, किञ्चित् प्रमाणं– वस्तुसद् विद्यते, आहोस्वित् शून्यमेव हि– न विद्यते प्रमाणम् ? इत्यर्थः ॥ ५७ ॥

पक्षद्वये दोषमाह—

शून्यं चेत्सुस्थितं तत्त्वमस्ति चेच्छून्यता कथम्?। तस्यैव ननु सद्भावादिति सम्यग्विचिन्त्यताम्।

शून्यं चेत् शून्यतायां प्रमाणं, तदा सुस्थितं– सम्यग् व्यवस्थितं, तत्त्वम्, अवस्तुसता प्रमाणेन प्रमेयव्यवस्थितेरित्युपहासः। अस्ति चेत् प्रमाणं तत्साधकम्, तदा कथं शून्यता, तस्यैव– प्रमाणस्य, सद्भावात्– तत्त्वरूपत्वात् सकलपदार्थाभावासिद्धेः, इति सम्यग् विचिन्त्यतां माध्यस्थ्यमवलम्ब्य ॥ ५८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ न शून्यता नाम काचिद् विविक्ता प्रतिभासते यस्यां प्रमाणान्वेषणं फलवत् स्यात्, किन्तु प्रतिभासोपमत्वं सर्वधर्माणामित्याशङ्कयाह—

प्रमाणमन्तरेणापि स्यादेवं तत्त्वसंस्थितिः। अन्यथा नेति सुव्यक्तमिदमीश्वरचेष्टितम्॥५९॥

प्रमाणमन्तरेणापि— विनापि व्यवस्थापकम्, एवं तत्त्वसंस्थितिः— सर्वधर्माणां मायोपमत्वव्यवस्थितिः, स्यात्; अन्यथा— अनुभूयमानानन्तधर्मात्मकत्वे च, न स्याद् व्यवस्थितिः। इदमीश्वरचेष्टितम्— स्वतन्त्राज्ञामात्रम्। सर्वधर्मराहित्येऽपि मानमवश्यमन्वेषणीयमिति भावः॥ ५९॥

पराशयमाशङ्कय निराकुरुते—

उक्तं विहाय मानं चेच्छून्यतान्यस्य वस्तुनः। शून्यत्वे प्रतिपाद्यस्य ननु व्यर्थः परिश्रमः॥६०॥

उक्तं शून्यतासाधकं मानं विहाय चेद् यद्यन्यस्य वस्तुनः शून्यता, मानं पुनरशून्यमेवेति न दोष इति भावः, तदा प्रतिपाद्यस्य— यमुद्दिश्य शून्यतासाधकं मानं प्रयुज्यते, तस्य शून्यत्वे व्यर्थः परिश्रमः प्रकृतप्रयोगस्य; अन्यथा शशशृङ्गमुद्दिश्याप्येतत्प्रयोगं किं न कुरुषे?। तथा च सुष्ठूक्तं भट्टेन—

"सर्वदा सदुपायानां वादमार्गः प्रवर्तते। अधिकारोऽनुपायत्वाद् न वादे शून्यवादिनः॥ १॥" इति॥ ६०॥

तदशून्यतायां दोषमाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्याप्यशून्यतायां च प्राश्निकानां बहुत्वतः । प्रभूताशून्यतापत्तिरनिष्टा संप्रसज्यते ॥६१॥

तस्यापि– प्रतिपाद्यस्यापि– अशून्यतायामभ्युगम्यमानायाम्, प्राश्निकानां– पर्यनुयोक्तॄणाम्, बहुत्वतः– बाहुल्यात्, प्रभूताऽशून्यतापत्तिः– बहूनां तात्त्विकतापत्तिः, अनिष्टा तव, संप्रसज्यते– बलादापतति ॥ ६१ ॥

इदमेव स्पष्टयति—

यावतामस्ति तन्मानं प्रतिपाद्यास्तथा च ये । सन्ति ते सर्व एवेति प्रभूतानामशून्यता ॥६२॥

यावतां प्रमातॄणामस्ति तन्मानं– शून्यतासाधकं प्रमाणम्, तथा ये प्रतिपाद्यास्ते सर्व एव सन्ति– परमार्थतो न तु शून्याः, इति हेतोः, प्रभूतानामशून्यतेति । ननु य एव परिशीलितसुगतश्रुतोपनिषद्दलितनिखिलाविद्याकलङ्कः, स एवाशून्यः, तस्यैव च निर्धर्मकसंविन्मात्रं मानमशून्यं, परमार्थसत्त्वात्; इतरेषां तु वादि-प्रतिवादिप्राश्निकानां व्यवहारत एव सत्त्वम् । तत एव च साध्य-साधन-दृष्टान्तादिभेदेनोक्तप्रपञ्चासत्यतानुमानसंभवः; तदुक्तमाचार्येण– "सर्व एवायमनुमानानुमेयव्यवहारः सांवृतः" इत्यादीति चेत् । न, तव तत्त्वज्ञानिनः शून्यतानुभवस्य त्वयैव श्रद्धाविषयत्वात् । अनुमानेन च प्रागुक्तेन न नीलादिज्ञाने द्विचन्द्रादिज्ञानतुल्यमसत्यत्वं साधयितुं शक्यम्, बाध्यत्वा-ऽबाध्यत्वाभ्यामुभयवैलक्षण्यात् । न च बाध्यबाधकभावो निराकृत एवेति वाच्यम्, व्यवहारसिद्धस्य तस्य निराकर्तुमशक्यत्वात्; बाधकेन ज्ञानस्य, स्वरूपस्य, विषयस्य, फलस्य वाऽबाधेऽपि बाध्यज्ञानेऽप्रामाण्यज्ञापनात्; तदुक्तं सूरिणा– "किन्तु ज्ञानस्यासद्विषयत्वम्, अर्थस्य चासत्प्रतिभासनं तेन ज्ञाप्यते" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र ज्ञानस्यासद्विषयत्वं तदभाववति तत्प्रकारकत्वम्, अर्थस्यासत्प्रतिभासनं च स्वाभाववद्विशेष्यकज्ञानप्रकारत्वम्, तथाभानं च तदभावस्फूर्त्या मानसाध्यक्षोहादिना दीर्घाध्यवसायिनेति तत्त्वम्। कथं च बाध्यबाधकभावानभ्युपगमे स्कन्ध-संतानादि-विकल्पानां निर्विषयत्वोपवर्णनं युक्तिमत् स्यात्?, कथं वा बाध्यबाधकभावप्रतिषेधविधायियुक्त्युपन्यासो न व्यर्थः स्यात्?, समारोपव्यवच्छेदार्थं तदुपन्यासे तद्व्यवच्छेदस्य स्वरूपापहाररूपत्वे बाध्यबाधकभावोपगमप्रसङ्गात्?, उदयकाल एव तदपहारे तदर्थं शास्त्रप्रणयनानुपपत्तेश्च।

अथ शास्त्रादेः प्राक्तनसमारोपक्षणादुत्तरसमारोपक्षणजननासमर्थः क्षणः समुपजायत इति तन्निवृत्तिः, तर्हि बाधकाद् बाध्यनिवृत्तिरपि तथैव संपत्स्यत इति न तन्निराकरणं युक्तम्। ईदृशं बाध्यत्वमेव फलतो नीलादिज्ञाने साध्यत इति चेत्। न, प्रत्यक्षबाधात्। न हि द्विचन्द्रादिज्ञान इव सत्यनीलादिज्ञानेऽवतरति कस्यापि बाध इति। अथ द्विचन्द्रादौ बाधोऽपि लोकाभिमत एव, तत्र लोकसंवृतिसिद्धं सत्त्वम्, इति लोकानां सत्त्वाभिमानः, इति परमार्थतोऽसत्त्वं तत्र शास्त्रेण ज्ञाप्यते। एवं च नीलादौ परमार्थासत्त्वसाधने लोकबाध्यत्वाभावेऽपि न दोषः, 'प्रकाशस्य प्रकाशता' इत्यत्र लोकसिद्धस्यापि भेदस्य 'नीलादीनां स्वभावः' इत्यत्र चाभेदस्य विचारासहत्वेन परमार्थतोऽसत्त्वादिति चेत्। न, लोकसिद्धस्य साध्यस्य साधने लोकसिद्धस्य बाधस्य दोषत्वात्, अलौकिकस्य च साध्यस्याऽसिद्धेः, परमार्थसत्त्वज्ञानं नास्त्येव नीलादौ लोकानाम्, सत्त्वमात्रमेव हि तैस्तत्रानुभूयते, तच्च न प्रकृतबाधकम्, घटज्ञानेऽपि नीलघटाभावज्ञानवत् सत्त्वज्ञानेऽपि परमार्थसत्त्वाभाव-ज्ञानोपपत्तेरिति चेत्। तर्हि द्विचन्द्रादावप्यसत्त्वमात्रमनुभूयते, न तु परमार्थतोऽसत्त्वम्, इति क्व साध्यसिद्धिः?।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च, सकलशून्यतापक्षस्य यथा स्वप्रेऽप्यप्रत्ययेन निरासः, तथा स्वच्छसंविदतिरिक्तशून्यतापक्षस्य द्रष्टव्यः, मध्यमक्षणस्थायिनः संविन्मात्रस्य कदाप्यनुपलम्भात्, स्वपरव्यवसायिन एव ज्ञानस्य स्फुटमुपलम्भात् । न चानुपलब्धप्रत्ययेनोपलब्धप्रत्ययबाधा सुघटा, अतिप्रसङ्गात् । न चासतां नीलाद्याकाराणां परिस्फुरणं न तु तुरङ्गशृङ्गादीनामित्यत्र बीजमस्ति । न च निर्धर्मके संविन्मात्रे क्षणिकत्वादिधर्मोऽपि घटते । इति वासनामात्रमेतत् परेषाम् । तस्माद् यथानुभवमेकानेकस्वरूपमेव वस्तु श्रद्धेयम्, तत्र विरोधस्य निरस्तत्वात्, निरसिष्यमाणत्वाच्चेत्यवसेयम् ॥ ६२ ॥

सौगत ! प्रणयिनीव नितान्तं शून्यता तव न मुञ्चति चित्तम् । प्राज्ञपर्षदि न कश्चन हर्षस्तेन शून्यहृदयस्य तवास्ति ॥ १ ॥

मुग्धमाध्यमिक ! मध्यमसंवित् किं सता बत समाश्रयणीया । उत्तमां सुविदितामिह चित्रां तामनाप्य न हताश ! हतः किम् ? ॥ २ ॥

अस्य विषयविभागाभिधित्सयाह—

एवं च शून्यवादोऽपि सद्विनेयानुगुण्यतः । अभिप्रायत इत्युक्तो लक्ष्यते तत्त्ववेदिना ॥६३॥

एवं च— उक्तरीत्याऽघटमानत्वे चेत्यर्थः, शून्यवादोऽपि, तद्विनेयानुगुण्यतः— शून्यताविषयविभागावधारणप्रवणशिष्यहितानुरोधात्, तत्त्ववेदिना— बुद्धेन, अभिप्रायतः— तत्प्रयोजनाभिप्रायात्, उक्तः, न तु तत्त्वाभिधित्सया, इति लक्ष्यते— संभाव्यते । विना तूपकारकं कारणं द्रव्यमृषाभाषित्वे बुद्धस्यानाप्तत्वप्रसङ्गादिति ॥ ६३ ॥

पूर्णा सुगतसुतमतवार्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्यासन् गुरवोऽत्र जीतविजयप्राज्ञाः प्रकृष्टाशया भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरस्तेन न्यायविशारदेन रचिते तर्के मतिर्दीयताम् ॥ १ ॥

इति पण्डितश्रीपद्मविजयसोदरन्यायविशारदपण्डितयशोविजयविरचितायां स्याद्वादकल्पलताभिधानायां शास्त्रवार्तासमुच्चयटीकायां षष्ठः स्तबकः ।

श्रमो ममोच्चैरियता कृतार्थः सन्तोऽत्र संतोषभृतो यदस्मात् ।
खलैः किमस्मिन्, भ्रमरस्य भोग्यं सौभाग्यमब्जस्य न वायसस्य ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

अथ सप्तमः स्तबकः ।

चञ्चत्काञ्चनकान्तकान्तिरनिशं गीर्वाणजुष्टान्तिको विक्रान्तिक्षतशत्रुरस्तजननभ्रान्तिः सतां शान्तिभूः ।
शान्तिस्तान्तिमपाकरोतु भगवान् कल्याणकल्पद्रुमो धीरा यस्य सदा प्रयान्ति शरणं पादौ शुभप्रार्थिनः ॥ १ ॥

आसीद् यत्पदयोः प्रणामसमये शक्रस्य चक्रभ्रमो लोलन्मौलिमयूखमांसलरुचां विस्तारिणीनां रयात् ।
श्रीवामातनयस्य तस्य हृदये धत्तः पदौ चेत्पदं तर्कि नाम सुरद्रु-कामकलश-स्वर्धेनवो नान्तिके ? ॥ २ ॥

आगच्छत्त्रिपदीनदीसमुदयभङ्गभ्रमप्रोच्छलत्तर्कोर्मिप्रसरस्फुरन्नयरयस्याद्वादफेनोच्चयः ।
यस्याद्यापि विसृत्वरो विजयते स्याद्वादरत्नाकरस्तं वीरं प्रणिदध्महे त्रिजगतामाधारमेकं जिनम् ॥ ३ ॥

पीतेऽन्यवार्ताकलुषोदकेऽपि नोच्छिद्यते तत्त्वपिपासया वः ।
आकर्णयन्त्वार्हतशास्त्रवार्तां कर्णामृतं संप्रति तत् सकर्णाः ! ॥ ४ ॥

अज्ञानतिमिरध्वंसदीपिकां परमतत्त्वोपनिषद्भूतां हित-सुख-निःश्रेयसकरीमार्हतमतवार्तामाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ये त्वाहुरनाद्येव जीवाजीवात्मकं जगत् । सदुत्पादव्ययध्रौव्ययुक्तं शास्त्रकृतश्रमाः ॥१॥

अन्ये तु शास्त्रकृतश्रमाः– कृतप्रवचनोपनिषदध्ययनभावना जैनाः, जगत्– जगत्पदप्रतिपाद्यम्, अनाद्येव– प्रवाहापेक्षया सदातनमेव, आहुः । एवकारो व्यवस्थायाम्, तेन नेश्वरादिकृतं, नवा प्रधानपरिणामादिकृतमिति लभ्यते। तथा, जीवाऽजीवात्मकं– जीवाश्चाजीवाश्च जीवा-ऽजीवास्त आत्मानः समुदायिनो यस्य तत् । तेन चिन्मात्रादिवादनिरासः। तथा, सदुत्पाद-व्यय-ध्रौव्ययुक्तम्– सन्ति पारमार्थिकानि यानि न तु कल्पितानि उत्पाद-व्यय-ध्रौव्यानि तद्युक्तं तन्मयम्। ''मौक्तिकादिसहिता माला' इतिवत् तत्सहितमित्यपि न दुष्यति' इत्यन्ये। अत्रोत्पादः 'उत्पन्नमिदम्' इति धीसाक्षिको धर्मः। स द्विविधः– प्रयोगजनितः, विस्रसाजनितश्च । पुरुषव्यापारजनित आद्यः । स च मूर्तिमद्द्रव्यारब्धावयवकृतत्वात् समुदयवादः । तत एव चासावपरिशुद्ध इति गीयते; तदुक्तम्—

''उप्पाओ[1] दुवियप्पो पओगजणिओ अ विससा चेव । तत्थ य पओगजणिओ समुदयवाओ अपरिसुद्धो[2] ॥ १ ॥'' इति ।

अत्रापरिशुद्धत्वं स्वाश्रययावदवयवोत्पादापेक्षया पूर्णस्वभावत्वम् । न ह्यपूर्णावयवो घट उत्पद्यमानः कार्त्स्न्येनोत्पन्न इति व्यवह्रियत इति। ननु न प्रयोगजन्य उत्पादः, घटादेरेव प्रयत्नजन्यत्वात्, उत्पादस्य स्वाद्यक्षणसंबन्धरूपस्यातथात्वादिति चेत् । न, 'मुद्गरपाताद् नष्टो घटः' इति व्यपदेशाद् नाशे मुद्गरपातजन्यत्ववत् 'पुरुषव्यापारादुत्पन्नो घटः' इति व्यवहारादुत्पा-

---

१ उत्पादो द्विविकल्पः प्रयोगजनितश्च विस्रसा चैव । तत्र च प्रयोगजनितः समुदयवादोऽपरिशुद्धः ॥ १ ॥ २ सम्मतिसूत्रे गाथा १२९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देऽपि पुरुषव्यापारजन्यत्वस्यावश्यकत्वात्; विविच्यानुभूयमानत्वेनोत्पादापलापे च नाशस्याप्यपलापप्रसङ्गात्, उत्पत्तेराद्यक्षणसंबन्धेनान्यथासिद्धौ नाशस्यापि चरमक्षणसंबन्धनाशेनान्यथासिद्धेः सुवचत्वात्, अन्यत्र तदाधारताप्रत्ययस्योत्पस्याधारताप्रत्ययस्यैवावच्छेदकत्वेनोपपत्तेः। घटप्रतियोगिकत्वेन नाशो विलक्षण एवानुभूयत इति चेत्। तथोत्पादोऽपीति तुल्यम्। किञ्च, एवमाद्यक्षणे 'आद्यक्षणसंबन्धवान् घटः' इतिवत् 'आद्यक्षण उत्पन्नो घटः, इति प्रयोगो न सूपपदः स्यादिति न किञ्चिदेतत्।

यत्तु– 'एवं नाशवदुत्पादस्य जन्यत्वेऽपि तत्र प्रतियोग्यतिरिक्तकृतविशेषाभावात्, भावेऽपि सर्वस्येश्वरप्रयत्नजन्यत्वात् प्रयोगजनितत्वं न विभाजकम्' इति। तत्तुच्छम्, नाशेऽपि सामान्यापेक्षया भावांशमादाय कारणकृतविशेषदर्शनादेव तदप्रत्यूहात्, ईश्वरस्य निरासाच्च; न चेदेवम्, व्यापारजन्यत्वमपोह्य यत्नजन्यत्वेन स्वयमेवोपपादितः कृताकृतविभागो घटाऽङ्कुरादौ दुर्घटः स्यात्। यत्नजन्यताविशेषेण तदुपपादने च व्यापारजन्यताविशेषेणापि तदुपपत्तेः, तथाऽप्रतिसंधानेऽपि विलक्षणस्वभावोत्पादानुभवसाम्राज्याच्च। अत एव देवकुलादावनुभूयमानं विलक्षणोत्पादवत्त्वरूपं[3] विशिष्टकार्यत्वमेव यत्नजन्यतानियतम्, न तु कार्यसामान्यम्, इति शिपिविष्टखण्डनेऽभिहितमिति।

पुरुषव्यापाराजन्य उत्पादो द्वितीयः। पुरुषेतरकारकव्यापारजन्यत्वं तु स्वरूपकथनमस्य, न तु लक्षणम्, प्रायोगिकेऽतिव्याप्तेः। 'तन्मात्रन्यत्वं गुरुत्वादत्रैव विश्राम्यति, इति प्रायोगिकस्यापि द्रव्यापेक्षया स्वाभाविकत्वाद् नैतद्

१ ख. ग. घ. च. 'पन्ने घ'। २ ज. 'नादत्र त'। ३ ख. च. छ. ज. रूपवि'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युक्तम्' इति त्वपरिणतनयस्याभिधानम्, तदपेक्षयोत्पादस्याभावादेव । प्रायोगिक-स्वाभाविकयोरुत्पादयोर्भेदे प्रायोगिककाले यत्नेतरकारणानां सत्त्वे स्वाभाविकोत्पादापत्तिवारणाय तत्र यत्नप्रतिबन्धकत्वादिगौरवात् कल्पित एवायमिति चेत् । न, अभ्रादौ विलक्षणोत्पादस्यानुभवसिद्धत्वेन तत्प्रतिबन्धकत्वादिकल्पनागौरवस्याबाधकत्वात्, यत्नेतरहेतूनां स्वभावोत्कर्षाभावेन प्रायोगिककाले स्वाभाविकानुत्पत्त्या तत्प्रातिबन्धकत्वाकल्पनाच्चेति ।

स च द्विविधः– समुदयजनितः, ऐकत्विकश्च । तत्र मूर्तिमद्द्रव्यावयवारब्धः समुदयजनितः, इतरश्चैकत्विकः। आद्योऽभ्रादीनामुत्पादः, घटादीनामप्यप्रथमतया विशिष्टनाशस्य विशिष्टोत्पादनियतत्वात् । न हि मूर्तावयवसंयोगकृतत्वं समुदयजनितत्वम्, विभागकृतपरमाण्वाद्युत्पादेऽव्याप्तेः, किन्तु मूर्तावयवनियतत्वम् । तच्च तदवस्थावयवस्याप्यवस्थाविशेषात् संभवीति । द्वितीयस्तु गगन-धर्मा-ऽधर्मास्तिकायानामवगाहक-गन्तृ-स्थातृद्रव्यसंनिधानतोऽवगाहन-गति-स्थितिक्रियोत्पत्तेरनियमेन स्यात्परप्रत्ययः, मूर्तिमदमूर्तिमदवयवद्रव्यद्वयोत्पाद्यत्वात्, अवगाहनादीनां स्यादैकत्विकः, स्यादनैकत्विकश्चेति भावः; तदुक्तम्—

"साभाविओ वि समुदयकओ व्व एगत्तिउ व्व होज्जाहि । आगासाईआणं तिण्हं परपच्चओ णियमा ॥१॥" इति ।

अथाकाशादीनां मूर्तिमद्द्रव्यानारब्धत्वे निरवयत्वमेव स्यादिति तन्नायमनेकान्त इति चेत् । न, प्रदेशव्यवहारस्याकाशेऽपि दर्शनेन तस्य सावयवत्वात् । न च 'आकाशस्य प्रदेशाः' इति व्यवहारो मिथ्या, आरोपनिमित्ताभावात् । न चाव्याप्यवृत्तिसंयोगाधारत्वकृतस्तदध्यारोपः, तथा सति तत्र तत्त्वस्यैवानुपपत्तेः, अवयविनि देशेन संयोगस्यावयवावच्छिन्नत्वनिय-

१ स्वाभाविकोऽपि समुदयकृतो वैकत्विको वा भविष्यति । आकाशादिकानां त्रयाणां परप्रत्ययो नियमात् ॥ १ ॥ २ सम्मतौ गाथा १३० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मात्, वृक्षादौ तथादर्शनात्, अन्यथा मूलादेरिवान्यस्याप्यवच्छेकत्वापत्तेः । नन्वेवं परमाणोरपि षड्दिक्संयोगात् षडंशता स्यादिति चेत् । स्यादेव, द्रव्यार्थतयैव तस्य निरंशत्वात्, पर्यायार्थतया तु सांशताया अप्यभ्युपगमात् । अत एव 'सावयवमाकाशम्, समवायिकारणत्वात्, पटवत्' इत्यपि प्रसङ्गापादनं संगच्छते। संगच्छते च 'सावयवमाकाशम्, हिमवद्-विन्ध्यावरुद्धभिन्नदेशत्वात्, तदवष्टब्धदेशभूभागवत्' इत्यादि । किञ्च, आकाशस्य सावयवत्वाभावे 'इह पक्षी' इति धीरनुपपन्ना स्यात्। न च 'इह' इत्यालोकमण्डलमेव प्रतीयत इति वाच्यम्, तदालोकव्यक्तेरन्यत्र गतावपि तद्दर्शनात् । न चालोकान्तरं तद्विषयः, 'तत्रैव' इति प्रत्यभिज्ञानात्। न चालोकत्वेनैव तदाधारत्वाद् न तदनुपपत्तिरिति वाच्यम्, आलोकाभावेऽपि 'तत्रैव' इति प्रत्यभिज्ञानात्। न च मूर्तद्रव्याभावाधारत्वेन तदुपपत्तिः, आलोके सति तदभावात् । न च निविडमूर्तद्रव्याभावस्तदाप्यस्त्येवेति वाच्यम्, तस्यान्यत्रापि सत्त्वेनान्यत्र गतेऽपि पक्षिणि प्रत्यभिज्ञापत्तेः, देशविशेषमवच्छेदकं प्रतीत्यैव 'इह पक्षी' इति प्रयोगाच्च। न चाकाशदेशस्यातीन्द्रियत्वेनावच्छेदकप्रतीत्यनुपपत्तिः, अक्षबुद्धौ तादृशस्यापि क्षयोपशमविशेषेण विशेष्याकृष्टतया भावात्। एतेन 'पृथिवीभागोर्ध्वत्वादिभेदापेक्षया तत्रैव मूर्तद्रव्याभावे भेदाभेदव्यवहारोपपत्तिः, अत एवान्यत्र गतेऽपि पतत्रिणि पूर्वानुभूताधःस्थितपृथिव्यादियावद्भागोर्ध्वताभ्रमे 'तत्रैव पतत्री' इति भवति प्रत्यभिज्ञानम्' इति निरस्तम्, 'इह गगने पतत्री' इत्यत्र निरवच्छिन्नस्यैवावच्छेदकस्य स्फुरणात्, आकाशदेशभेदाभावे पृथिवीभागोर्ध्वतादिभेदस्यैवानुपपत्तेश्च। एवं च तत्तत्प्राच्यादिव्यवहारभेदेनाप्याकाशभेदसिद्धिः 'ततः प्राच्यामयम्' इत्यत्र तदपेक्षया संनिहितोदयाचलसंयोगावच्छिन्नाकाशवृत्तिरयम्' इत्यर्थात्, दिशोऽनतिरेकात्, तदपेक्षत्वस्य संनिहितत्वस्य च तथास्वभावविशेषत्वात् । 'प्रयागात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राच्यां काशी' इत्यतः 'प्रयागनिष्ठोदयाचलसंयुक्तसंयोगपर्याप्तसंख्यापर्याप्त्यधिकरणोदयाचलसंयुक्तसंयोगशालिमूर्तवृत्तिः काशी' इत्यन्वयस्तूच्छृङ्खलानां कल्पनामात्रम्, तथाननुभवात्, अनुभव-प्रवचनाभ्यामाकाशस्यैव सर्वाधारत्वेन क्लृप्ततया दिक्त्वेन मूर्तस्यानाधारत्वाच्चेति दिग्।

व्ययोऽपि स्वाभाविकः प्रयोगजनितश्चेति द्विविधः। तदुद्वयातिरिक्तस्य वस्तुनोऽभावात्, पूर्वावस्थाविगमव्यतिरेकेणोत्तरावस्थोत्पत्त्यनुपपत्तेः। न हि बीजादीनामविनाशेऽङ्कुरादिकार्यप्रादुर्भावो दृष्टः। न चावगाह-गति-स्थित्याधारत्वं तदनाधारत्वस्वभावप्राक्तनावस्थाध्वंसमन्तरेण संभवतीति। तत्र समुदयजनित उभयत्रापि द्विविधः– समुदयविभागरूप एकः, यथा पटादेः कार्यस्य तन्त्वादिकारणपृथक्करणम्। अन्यश्चार्थान्तरभावगमनलक्षणः, यथा मृत्पिण्डस्य घटार्थान्तरभावः। नाशत्वं चास्याजनकस्वभावापरित्यागे जनकत्वायोगात्। न चैवं घटविनाशे मृत्पिण्डप्रादुर्भावप्रसक्तिः, पूर्वोत्तरावस्थयोः स्वभावतोऽसंकीर्णत्वात्, वस्त्वन्तररूपे वस्त्वन्तररूपस्यापादयितुमशक्यत्वात्। ऐकत्विकनाशश्चैकत्विकोत्पादवद् वैश्रसिकभेद एवेतिः तदुक्तम्—

"[1]विगमस्स वि एस विही समुदयजणिअम्मि सो उ दुविअप्पो। समुदयविभागमेत्तं अत्थंतरभावगमणं वा ॥ १ ॥"[2]

इति स्थितिश्चाविचलितस्वभावरूपत्वाद् न विभज्यते। तद्युक्तत्वं च जगतः कथञ्चित्तद्रूपत्वात्; तथाहि– त्रयोऽप्युत्पादादयो भिन्नरूपावच्छेदेन भिन्नकालाः, घटोत्पादसमये घटविनाशस्य, घटविनाशसमये घटोत्पादस्य, तदुत्पाद-विनाशयोरुत्पत्ति-

१ विगमस्याप्येष विधिः समुदयजनिते स तु द्विविकल्पः। समुदयविभागमात्रमर्थान्तरभावगमनं वा ॥ १ ॥ २ सम्मतौ गाथा १३१।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनाशानवच्छिन्नकालसंबन्धरूपायास्तत्स्थितेर्घटविनाशविशिष्टघटरूपमृत्स्थित्योर्वा विरोधात्। तथा, प्रत्येकमपि देश-कार्त्स्न्याभ्यां भिन्नकालता, उत्पद्यमानस्यापि पटस्य देशेनोत्पन्नत्वात्, देशेन चोत्पत्स्यमानत्वात्, प्रबन्धेन चोत्पद्यमानत्वात्; विगच्छतोऽपि देशेन विगतत्वात्, देशेन च विगमिष्यत्त्वात्, प्रबन्धेन च विगच्छत्त्वात्; तिष्ठतोऽपि देशेन स्थितत्वात्, देशेन च स्थास्यत्त्वात्, प्रबन्धेन च तिष्ठत्त्वादिति। एकस्वरूपाद् द्रव्यादर्थान्तरभूतादभिन्नकालाश्चैतेऽविशिष्टाः सन्तो भिन्नप्रतियोगिविशिष्टा वा, कुशूलनाश-घटोत्पाद-मृत्स्थितीनामेककालत्वादिति, ततोऽनर्थान्तरभूता अपीति। एवं चोत्पादादित्रयेण त्रैकाल्येन भेदा-ऽभेदाभ्यां भङ्गसंततिर्द्रव्यस्य भावनीया सूक्ष्मधिया, त्र्यात्मक-त्रिकालात्मकतयाऽनन्तपर्यायात्मकत्वादेकवस्तुनः। न चैवमनन्ते काले भवतोऽनन्तपर्यायात्मकैकद्रव्यस्योपपत्तावप्येकक्षणे कथं तदुपपत्तिः? इति शङ्कनीयम्, एकक्षणेऽप्यनन्तानामुत्पादानां, तत्समानां विगमानां, तन्नियतस्थितीनां च संभवात्; तथाहि— यदैवानन्तानन्तप्रदेशिकाहारभावपरिणतपुद्गलोपयोगोपजातरस-रुधिरादिपरिणतवशाविर्भूतशिरोऽङ्गुल्याद्यङ्गोपाङ्गभावपरिणतस्थूल-सूक्ष्म-सूक्ष्मतरादिभिन्नावयव्यात्मकस्य कायस्योत्पत्तिः, तदैवानन्तानन्तपरमाणूपचितमनोवर्गणापरिणतिलभ्यमनउत्पादोऽपि, तदैव च वचनस्यापि कायाकृष्टान्तरवर्गणोत्पत्तिप्रतिलब्धवृत्तिरुत्पादः, तदैव च काया-ऽऽत्मनोरन्योन्यानुप्रवेशाद् विषमीकृतासंख्यातात्मप्रदेशे कायक्रियोत्पत्तिः, तदैव च रूपादीनामपि प्रतिक्षणोत्पत्तिनश्वराणामुत्पत्तिः, तदैव च मिथ्यात्वा-ऽविरति-प्रमाद-कषायादिपरिणतिसमुत्पादितकर्मबन्धनिमित्तागामिगतिविशेषाणामप्युत्पत्तिः, तदैव चोत्सृज्यमानोपादीयमानानन्तानन्तपरमाण्वापादिततत्प्रमाणसंयोग-विभागाना-

१ ख.ग.घ.च. 'नन्तप्र'।

मुत्पत्तिः, तदैव च तत्तज्ज्ञानविषयत्वादीनामुत्पत्तिः, किं बहुना ? यदैवैकद्रव्यस्योत्पत्तिः, तदैव त्रैलोक्यान्तर्गतसमस्तद्रव्यैः सह साक्षात् पारम्पर्येण वा संबन्धानामुत्पत्तिः, सर्वद्रव्यव्याप्तिव्यवस्थिताकाश-धर्मा-ऽधर्मादिद्रव्यसंबन्धात् । ईदृशप्रतिपत्त्यभावश्चास्मदाद्यध्यक्षस्य तथा तथोल्लेखेन निरवशेषधर्मात्मकवस्त्वग्राहकत्वात्, त्रैलोक्यव्यावृत्तस्वलक्षणान्यथानुपपत्त्याऽनुमीयते तु निर्बाधमेव तथात्वम्, इतरप्रतियोगिकत्वेनेतराप्रिपृथग्भूतानां व्यावृत्तीनां स्ववृत्तित्वेन स्वापृथग्भूतत्वात् । न चैवं घटे स्वोत्पादादितदन्योत्पादादिकमपि प्रमीयेतेति वाच्यम्, व्यावृत्तिद्वारेष्टत्वात्, अनुवृत्त्या तु तदभावादेव । अत एव 'स्व-परविभागोऽप्येवमुच्छिद्येत' इति निरस्तम्, स्ववृत्त्यनुवृत्तिप्रतियोगित्वेन स्वस्य, स्ववृत्तिव्यावृत्तिप्रतियोगित्वेन च परत्वस्य व्यवस्थितेः । अत एव परत्रापि स्वसंबन्धितामात्रव्यवहारो व्युत्पन्नानामबाध एव; उक्तं च भाष्यकृता[2]—

"जेसु अणाएसु तओ ण णज्जए, णज्जए अ णाएसु । किह ते ण तस्स धम्मा घडस्स रूवाइधम्म व्व ॥ १ ॥" इति ।

तत्र च परपर्यायैर्विसदृशैः पटत्वादिभिर्नास्ति घटद्रव्यम्, सदृशैस्तु सत्त्व-द्रव्यत्व-पृथित्वादिभिर्व्यञ्जनपर्यायैरस्त्येव, साधारणासाधाणस्य सामान्यविशेषरूपस्य वस्तुनो गुण-प्रधानभावेन सदादिशब्दवाच्यत्वात् । अर्थपर्यायैस्तु ऋजुसूत्राभिमतैः सदृशैरपि नास्ति, अन्योन्यव्यावृत्तस्वलक्षणग्राहकत्वात् तस्य, स्वपर्यायैरपि प्रत्युत्पन्नैस्तत्समयेऽस्त्येव, विगत-भविष्यद्भिस्तु कथञ्चिदस्ति, कथञ्चिद् नास्ति, तत्काले तच्छक्त्या तस्यैकत्वात्, तद्रूपव्यक्त्या च भिन्नत्वादिति । प्रत्युत्पन्नैरप्येकगुणकृष्णत्वादिभिरनैकगमैर्भजनेति । एवं स्वतः परतो वाऽनुवृत्ति-व्यावृत्त्याद्यनेकशक्तियुक्तोत्पादादित्रैलक्षण्यलक्षणमनेकान्तात्मकं जगद्

१ येष्वज्ञातेषु ततो न ज्ञायते, ज्ञायते च ज्ञातेषु । कथं ते न तस्य धर्मा घटस्य रूपादिधर्मा इव ॥ १ ॥ २ विशेषावश्यकभाष्ये गाथा ४८५ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विभावनीयम् ॥ १ ॥

उत्पादादित्रयात्मकत्व उपपत्तिमाह—

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम्। शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम्॥

अयमधिकृतो जनः, सामान्यापेक्षयैकवचनम्, एकस्यैकदा त्रिविधेच्छाऽभावात्, कालभेदेनेच्छात्रयस्य च त्र्यात्मकैकनिमित्तत्वाप्रयोजकत्वादिति द्रष्टव्यम्; घट-मौलि-सुवर्णार्थी सन्– प्रत्येकं सौवर्णघट-मुकुट-सुवर्णान्यभिलषन्, एकदा तन्नाशोत्पाद-स्थितिषु सतीषु, शोक-प्रमोद-माध्यस्थ्यं सहेतुकं याति। तदैव हि घटार्थिनो घटनाशात् शोकः, मुकुटार्थिनस्तु तदुत्पादात् प्रमोदः, सुवर्णार्थिनस्तु पूर्वनाशा-ऽपूर्वोत्पादाभावाद् न शोको न वा प्रमोदः, किन्तु माध्यस्थ्यमिति दृश्यते। इदं च वस्तुनस्त्रैलक्षण्यं लक्षणं विना दुर्घटम्, घटनाशकाले मुकुटोत्पादानभ्युपगमे तदर्थिनः शोकानुपपत्तेः, घटादिविवर्तातिरिक्तसुवर्णद्रव्यानभ्युपगमे च सुवर्णार्थिनो माध्यस्थ्यानुपपत्तेः। न च सुवर्णसामान्यार्थिनो यत्किञ्चित्सुवर्णनाशेऽपि शोकाभावात्, अपूर्वेच्छाऽभावेन च प्रमोदाभावादर्थादुपपद्यते माध्यस्थ्यमिति वाच्यम्, तथापि घटनाशानन्तरमेव मुकुटोत्पादाभ्युपगमेऽन्तरा यावत्सुवर्णाभावे शोकस्यैव प्रसङ्गात्, दोषविशेषात् तदननुभवेन शोकाभावोऽपि विशेषदर्शिनो दुर्घटः। न च सुवर्णसामान्याभावोऽपि सुवर्णसामान्येच्छाविघातकज्ञानविषय एकः परस्य युज्यते, अनुभवेन तदैक्याभ्युपगमे च तत्तद्विवर्तानुगतसुवर्णसामान्यस्याप्यनुभवसिद्धस्य प्रत्याख्यातुमशक्यत्वात्, गौणीकृतविशेषायास्तद्विषयकेच्छाया एव तद्विषयकप्रवृत्तिहेतुत्वादिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न च शोकादिकं निर्हेतुकमिति वक्तुं युक्तम्, नित्यं सत्त्वस्याऽसत्त्वस्य वा प्रसङ्गात्। न च युष्माकमपि तत्र घट-मुकुटोभयार्थिनो युगपच्छोक-प्रमोदोत्पाद इति वाच्यम्, एकत्रोभयार्थिप्रवृत्त्ययोगात्। एकत्र देशे तत्प्रवृत्तौ चोभयस्य कथञ्चित्प्रत्येकातिरेकेण दोषाभावात्, येन रूपेण यत्रेच्छा तेन रूपेण तन्नाशो·त्पाद-स्थितिज्ञानानामेव शोक-प्रमाद-माध्यस्थ्य-हेतुत्वात्, अनेकान्तस्याप्यनेकान्तानुविद्धैकान्तगर्भत्वात्; तदुक्तम्—

"[1]भयणा वि हु भइयव्वा जह भयणा भयइ सव्वदव्वाइं। एवं भयणानियमो वि होइ समयाविराहणया ॥ १ ॥ इति।

अत एव "[3]रयणप्पहा सिय सासया, सिय असासया" इत्यनेकान्तवाक्ये तदनुविद्धं "[4]दव्वट्ठयाए सिय सासया, पज्जवट्ठयाए सिय असासया" इति भगवद्वचनं व्यवस्थितम्। एतेन 'उत्पाद-स्थिति-भङ्गानामेकत्र समवायतः प्रीति-मध्यस्थता-शोकाः स्युर्न स्युरिति दुर्घटम्' इत्यभिप्रायापरिज्ञानविजृम्भितं मण्डनमिश्रकृतखण्डनमपास्तम्। न हि घट-मुकुटरूपापेक्षावुत्पाद-नाशावेव सुवर्णरूपापेक्षावपि, येनाव्यवस्था स्यादिति। न चानेकान्तवादे तत्सत्त्वेऽपि तदभावज्ञानात् प्रवृत्त्यव्यवस्थया प्रीत्याद्य-व्यवस्थापि, येन रूपेणेच्छा तेन रूपेण तदभावज्ञानस्यैव प्रवृत्तिविघातकत्वात्। एतेनापि

"नैकान्तः सर्वभावानां यदि सर्वविधा गतः। अप्रवृत्ति-निवृत्तीदं प्राप्तं सर्वत्र ही जगत् ॥ १ ॥"

---

१ भजनापि खलु भक्तव्या यथा भजना भजति सर्वद्रव्याणि। एवं भजनानियमोऽपि भवति समयाविराधनया ॥ १ ॥

२ सम्मतौ गाथा १२४। ३ रत्नप्रभा स्याच्छाश्वती, स्यादशाश्वती। ४ द्रव्यार्थतया स्याच्छाश्वती, पर्यायार्थतया स्यादशाश्वती।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति सर्वस्वहानिजनित इव महान् मण्डनमिश्रगृहशोको निवारितः ! । परिहरिष्यते च पूर्वपक्षोट्टङ्कितोऽनिश्चयप्रसङ्गः स्वयमेव ग्रन्थकृता । इति तत्रैवाधिकं विवेचयिष्यते ॥ २ ॥

एतदुपपत्तेरेव स्थलान्तरमाह—

पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः । अगोरसव्रतो नोभे तस्मात्तत्त्वं त्रयात्मकम् ॥३॥

पयोव्रतः– क्षीरभोजनव्रतः, न दध्यत्ति– न दधि भुङ्क्ते । यदि च दध्नः पयस एकान्ताभेदः स्यात् तदा तस्य दधि भुञ्जतोऽपि न व्रतभङ्गः स्यात् । तथा, दधिव्रतः– दधिभोजनव्रतः, पयः– दुग्धम्, अत्ति । पयसो दध्न एकान्ताभेदे च तद् भुञ्जतो न दधिभोजनव्रतभङ्गः स्यात् । ततो दधि-पयसोः कथञ्चिद् भेदः । तथा, अगोरसव्रतः– आलनालादिभोजनव्रतः, उभे– दुग्ध-दधिनी, नात्ति, इति गोरसभावेन द्वयोरभेदः; अन्यथा कृतगोरसप्रत्याख्यानस्य दुग्धाद्येकैकभोजनेऽपि न व्रतभङ्गः स्यादिति । तस्मात्– द्रव्यपर्यायोभयात्मकत्वात्, त्रयात्मकं– उत्पाद-व्यय-ध्रौव्यापृथग्भूतं वस्तु । तथाच समयपरमार्थवेदिनः—

"दव्वं[1] पज्जवविउअं दव्वविउत्ता य पज्जवा णत्थि । उप्पाय-ट्ठिइ-भंगा हंदि ! दवियलक्खणं एयं[2] ॥१॥" इति ।

ननु दुग्ध-दध्नोरेकान्तेन भेद एव, इति तस्योत्पाद-व्ययौ युक्तौ, ध्रौव्यं तु गोरसत्वसामान्यस्यैव न तु गोरसस्येति चेत् । न, इदमेव गोरसं दुग्धभावेन नष्टम्, दधिभावेन चोत्पन्नम्, इत्येकस्यैवैकदोत्पाद-व्ययाधारत्वलक्षणध्रौव्यभागितया

१ द्रव्यं पर्यायवियुतं द्रव्यवियुक्ताश्च पर्यवा न सन्ति । उत्पाद-स्थिति-भङ्गा हन्त ! द्रव्यलक्षणमेतत् ॥ १ ॥ २ सम्मतौ गाथा १२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यभिज्ञायमानस्य पराकर्तुमशक्यत्वात् ।

न च विशेषेभ्योऽत्यन्तव्यतिरिक्तं ध्रुवं सामान्यमस्ति, तदव्यवस्थितेः । तथाहि– "नित्यमेकमनेकसमवेतं सामान्यम्" इति तल्लक्षणमाचक्षते परे । 'अत्र 'एकम्' इति स्वरूपाभिधानं न तु लक्षणम्' इत्येके । 'नित्यमेकम्' इत्येकं लक्षणम्, लक्षणान्तरं वा, समवायित्वे सत्यनेकसमवेतत्वमिति सूचनायेदम्' इत्यन्ये । 'अनेकवृत्तित्वमनेकाधारकत्वम्, तच्चाभाव-समवाययोरपि, इत्यत उक्तम्– 'एकम्– असहायम्', अभाव-समवाययोश्च प्रतियोगिसंबन्धिनौ सहायौ' इत्यपरे । तत्र नित्यत्वं तावत् श्यामत्व-रक्तत्वाद्युपाधीनामिव दधित्व-दुग्धत्वादीनां साक्षादेवोत्पाद-विनाशानुभवादसिद्धम् । दुग्ध-दध्नोरेवोत्पाद-विनाशानुभवोऽस्ति, न दधित्व-दुग्धत्वयोरिति चेत् । तर्हि श्याम-रक्तयोरेव तदनुभवः, न तु श्यामत्व-रक्तत्वयोः, इति तयोरपि नित्यत्वं किं न स्यात् ?। 'श्यामाद्युत्पादाद्यनुभवो भ्रान्तः, तत्कारणबाधात्' इति तु न युक्तम्, दण्डादिकं विनापि खण्डदण्डादिवत् तदुत्पादादिसंभवात् । 'सहेतुकत्वाच्छ्यामरूपादेर्न नित्यत्वम्' इत्यत्रापि विवादकलह एव । भावकार्यस्य नाशनियमाद् न तत्र नित्यत्वमिति चेत् । अनुत्तरमेतदपि, कार्यत्वस्यैवेत्थमसिद्धेः । किञ्च, एवं लाघवाद् भावस्यैव नाशनियमाज्जातेरपि नित्यत्वक्षतिरस्तु । अनित्यत्वे सति प्रतिव्यक्ति भिन्नं सत् सामान्यं सामान्यरूपतां जह्यादिति चेत् । उपाधिरप्यनुगतव्यवहारनियामिकां तां किं न जह्यात् ?। उपाधावपि परम्परया जातिरेवानुगमिका, प्रमेयत्वादेरपि परम्परासंबन्धेन प्रमात्वादिरूपत्वादिति चेत् । न, घटे घटत्वादेरिव प्रमेयत्वादेरपि साक्षादेवानुभवात् ।

१ ज. 'दिति' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकत्वमपि न तत्र संख्यारूपम्, अनभ्युपगमात् । नाप्याश्रयभेदकृतभेदप्रतियोगित्वादिकम्, आश्रयभेदेन तद्भेदावश्यकत्वात्; अन्यथाऽण्वेकत्वादावप्याश्रयभेदकृतभेदे मानाभावादतिव्याप्त्यनिरासात् । असहायत्वरूपमेकत्वमपि तत्र प्रतिनियतव्यक्तिव्यङ्ग्यत्वाभ्युपगमाद् दुर्वचम् । अनेकसमवेतत्वमपि समवायनिरासाद् निरस्तमेव ।

किञ्च, सामान्यस्यैकव्यक्तावेकदेशेन वृत्तिर्भवेत्, सर्वात्मना वा ? । सर्वात्मना वृत्तावेकस्मिन्नेव पिण्डे सर्वात्मना परिसमाप्तत्वाद् यावन्तः पिण्डास्तावन्ति सामान्यानि स्युः, न वा सामान्यम्, एकपिण्डवृत्तित्वात्, रूपादिवत् । एकदेशवृत्तावपि न सामान्यं स्यात्, सामान्यस्य निरंशत्वेनैकदेशासंभवात्, संभवेऽपि तस्य ततो भेदा-ऽभेदविकल्पानुपपत्तेः । न च सामान्यस्यानुवृत्तैकरूपत्वात् कार्त्स्न्यै-कदेशशब्दयोस्तत्राप्रवृत्तिः, निरवयवैकरूपेऽपि व्याप्त्य-ऽव्याप्तिशब्दयोर्भवतैवाभ्युपगमात्, तत्र च कृत्स्नै-कदेशपक्षोक्तदोषाणां समानत्वात् । एतेन 'किमनेन प्रसङ्ग आपाद्यते परस्य, आहोस्वित् स्वतन्त्रसाधनम् ? इति । न तावत् प्रसङ्गसाधनम्, पराभ्युपगमेनैव तस्य वृत्तेः । न च परस्य कार्त्स्न्येन, एकदेशेन वा निरंशस्य वृत्तिः सिद्धा, किन्तु वृत्तिमात्रं समवायस्वरूपं सिद्धम्, तच्च विद्यत एव, समवायस्य प्रमाणतः सिद्धेः । तद् न प्रसङ्गसाधनमेतत् । स्वतन्त्रं तु साधनं न भवति, सामान्यलक्षणस्य धर्मिणोऽसिद्धेर्हेतोराश्रयासिद्धिप्रसङ्गात् । धर्मिसिद्धौ वा तत्प्रतिपादकप्रमाणबाधितत्वात् तदभावसाधकप्रमाणस्याप्रवृत्तिरेव' इति निरस्तम्, लोक-शास्त्रसिद्धकार्त्स्न्यै-कदेशवृत्तिविशेषनिषेधेन वृत्तिसामान्याभावस्य परं प्रत्यापादनात्, समवायवृत्तावपि संयोग-रूपादौ द्वैरूप्यस्य सिद्धत्वात् ।

अथ व्याप्यवृत्त्य-ऽव्याप्यवृत्त्योर्वृत्तित्वेऽनवच्छिन्नत्वमवच्छिन्नत्वं चेति कार्त्स्न्यै-कदेशविशेषो नापरः । तत्र च सामा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यस्यापि व्याप्यवृत्तित्वादेकत्राप्यनवच्छिन्नवृत्तित्वरूपं कात्स्न्येन वृत्तित्वमुपगम्यत एव। न चैवं यावद्व्यक्तिभेदापत्तिः, ज्ञानेऽनेकविषयत्ववज्जातावनेकवृत्तित्वस्याप्यविरोधादिति चेत्। न, 'एकत्वमेकत्रैव पर्याप्तम्, न द्वयोः' इति धियैकत्व-द्वित्वयोरेकत्रोभयोश्च पर्याप्तिवद् 'घटत्वमत्र पर्याप्तम्' इति धिया घटत्वस्यापि प्रत्येकं पर्याप्तिस्वीकार एकत्व-द्वित्वावच्छिन्नपर्याप्तिकयोरेकत्व-द्वित्वयोरिव तत्तद्व्यक्तित्वावच्छिन्नपर्याप्तिकत्वेन तद्भेदस्याप्यावश्यकत्वात्। किञ्च, उत्पद्यमानेन पिण्डेन सह संबध्यमानं सामान्यं किमन्यत आगत्य संबध्यते, उत तत्पिण्डेन सहोत्पादात्, आहोस्वित् पिण्डोत्पत्तेः प्रागेव तद्देशावस्थानात्? । नाद्यः, अमूर्तस्य पूर्वाधारवृत्तिस्वभावापरित्यागेनान्यत्रागमनासंभवात्। न द्वितीयः, अनुत्पन्नस्वभावत्वाभ्युपगमात्। न तृतीयः, घटदेशे घटत्वावस्थितौ तत्रापि 'घटः' इत्यनुगतधीव्यपदेशप्रसङ्गात्। तदुक्तम्—

" नायाति न च तत्रासावस्ति पश्चाद् न चांशवत्। जहाति पूर्वं नाधारमहो! व्यसनसंततिः ॥ १ ॥ "

तथा,

" यत्रासौ वर्तते भावस्तेन संबध्यते न च। तद्देशं न च व्याप्नोति किमप्येतद् महाद्भुतम् ॥ १ ॥ " इति।

'अनुत्पन्नेऽपि घटे घटपदवाच्यत्ववद् घटत्वसमवायसत्त्वात् तदुत्पत्तौ तदभिव्यक्तेर्न दोषः' इत्यप्यनालोचिताभिधानम्, द्रव्यार्थतया सत्त्वाभ्युपगमं विना 'अनुत्पन्नो घटः' इत्यभिधानस्यैव दुःशकत्वात्; यत एव निमित्तात् तावद्व्यक्तिषु तदाधारतानियमस्तत एव तदन्यथासिद्धेश्च। किञ्च, पिण्डेभ्योऽव्यतिरिक्तं यद्यनुस्यूतं सामान्यमभ्युपगम्येत तदैकपिण्डोपलम्भे तस्याभिव्यक्तत्वात् पिण्डान्तरालेऽप्युपलब्धिः स्यात्। न च तत्र तदुपलम्भहेतोश्चक्षुःसंयुक्तसंयोगस्याभावात् तदनुपलम्भ इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सांप्रतम्, अन्तराले चक्षुःसंयोगे तदापादनात् । न च तत्र तदभावात् तदनुपलम्भः, तत्संबन्धसत्त्वे तदभावायोगात्, तत्र तदभावज्ञाने तत्र तद्विशिष्टबुद्ध्यनुत्पादेऽपि तदुभयसमूहालम्बनस्य दुर्निवारत्वाच्च । एतेन 'अन्तरालशब्देन किं पिण्डान्तरमश्वादिरूपमभिधीयते, आहोस्विद् मूर्तद्रव्याभावः, उताकाशादिप्रदेशः ? इति विकल्पाः । यद्यश्वादिपिण्डान्तराभिधानम्, तदा तत्र गोत्वसामान्यस्य वृत्तेरग्रहणमुपपन्नमेव । न हि यद् यत्र नास्ति तत्तत्र गृह्यत इति परस्याभ्युपगमः । एवं मूर्तद्रव्याभावा-ऽऽकाशादिदेशयोरपि तदग्रहणम्, अभावादेव' इति निरस्तम् । न च चक्षुःसंयोगावच्छेदकावच्छेदेन तस्यासमवेतत्वात् तदग्रहणम्, अव्याप्यवृत्तिद्रव्यसमवेतग्रह एव तथाहेतुत्वकल्पनात् । यैरपि 'समवायोऽपि नैकः, जलादेर्गन्धादिमत्ताप्रसङ्गात्' इत्यादिना समवायनानात्वं स्वीक्रियते, तेषामपि घटत्व-सत्त्वादिसमवायनानात्वाभावादयं दोषस्तदवस्थ एव ।

अपि च, अक्षणिकव्यापकैकस्वभावत्वे सामान्यं किं येनैव स्वभावेनैकस्मिन् पिण्डे वर्तते तेनैव पिण्डान्तरे, आहोस्वित् स्वभावान्तरेण ? । यदि तेनैव, ततः सर्वपिण्डानामेकत्वप्रसक्तिः, एकदेश-काल-स्वभावनियतपिण्डवृत्त्यभिन्नसामान्यस्वभावक्रोडीकृतत्वात् तेषाम्, प्रतिनियतदेश-काल-स्वभावैकपिण्डवत् । अथ स्वभावान्तरेण, तदानेकस्वभावयोगात् सामान्यस्यानेकत्वप्रसक्तिरिति न किञ्चिदेतत् । एतेन

"[1]पिण्डभेदेषु गोबुद्धिरेकगोत्वनिबन्धना । गवाभासैकरूपाभ्यामेकगोपिण्डबुद्धिवत् ॥ १ ॥
न शाबलेयाद् गोबुद्धिस्ततोऽन्यालम्बनापि वा । तदभावेऽपि सद्भावाद् घटे पार्थिवबुद्धिवत् ॥ २ ॥

१ श्लोकवार्तिकमुद्रितपुस्तके 'तस्मात् पिण्डेषु गो' इति पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्येकसमवेतार्थविषया वापि गोमतिः । प्रत्येकं कृत्स्नरूपत्वात् प्रत्येकव्यक्तिबुद्धिवत् ॥ ३ ॥
प्रत्येकसमवेतापि जातिरेकैकबुद्धितः । नञ्युक्तेष्विव वाक्येषु ब्राह्मणादिनिवर्तनम् ॥ ४ ॥
नैकरूपा मतिर्गोत्वे मिथ्या वक्तुं च शक्यते । नापि कारणदोषोऽस्ति बाधकः प्रत्ययोऽपि वा[4] ॥ ५ ॥"

इत्यादि कुमारिलोक्तमपास्तम्, उक्तरीत्या स्फुटदोषत्वात् । इत्थं च कार्यकारणताऽवच्छेदकतया जातिसिद्धिरप्यपास्ता, कार्य-कारणयोः कथंचिदैक्येनापि कार्यकारणभावनिर्वाहात् । किञ्च, एवं गगनादौ सत्तायां मानमन्वेषणीयं स्यादायुष्मतः, द्रव्यजन्यतावच्छेदकतया सिद्धस्य सत्त्वस्य तत्राभावात् । न च द्रव्यत्वादिना साङ्कर्यभिया तत्र सत्तास्वीकारः, सत्तया तद्द्वयापरिज्ञानात् । न चोपाधिसांकर्यस्येव जातिसांकर्यस्यापि दोषत्वे बीजमस्ति, जात्योः सांकर्ये गोत्वा-ऽश्वत्वयोरपि तथात्वापत्तिस्तद्दोषत्वे बीजमिति चेत् । न, आपादकाभावात् । न हि सङ्कीर्णयोर्जातित्वं गोत्वा-ऽश्वत्वसामानाधिकरण्येन व्याप्तम् । तथापि शङ्का भविष्यतीति चेत् । सा यदि स्वरसवाहिनी, तदा लोकयात्रामात्रोच्छेदकतया न दोषाय । यदि च जातित्वसाधारणधर्मदर्शनजन्या, तदा प्रत्यक्षायां गवि विरोधावधारणादेव निवर्तते; अन्यथोपाधिसांकर्यदर्शनजन्या सास्नाकेसरादिसांकर्यशङ्का दुरुच्छेदैव स्यात् ।

अथ जात्योः परस्परविरहसमानाधिकरणत्वस्य परस्परविरहव्याप्यतावच्छेदकत्वात् परस्परविरहसमानाधिकरणौ धर्मौ यदि जाती स्याताम्, परस्परविरहव्याप्यौ स्यातामिति बाधकमिति चेत् । न, परस्परविरहसमानाधिकरणत्वस्यैकस्या-

१ श्लोक० 'त्वबुद्धित्वा' । २ श्लोक० 'केष्वपि वा' । ३ श्लोक० 'नात्र का' । ४ श्लोकवार्तिके वनवादे कारिका ४४-४५-४६-४७-४९ । ५ ख.ग.घ.च.'यात्रो' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावेन गोत्वाभावसमानाधिकरणत्वे गोत्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वादिकमेवाश्वत्वादौ विरोधितावच्छेदकं यथादर्शनं कल्पनीयमिति न संकीर्णयोस्तथात्वम्, मानाभावात्, सामानाधिकरण्यग्राहकमानविरोधाच्च । किञ्च, संकीर्णयोरजातित्वे घटत्वमपि जातिर्न स्यात्, पृथिवीत्वेन परापरभावानुपपत्तेः । अथ पृथिवीत्वादिव्याप्यं नानैव घटत्वम्, कुलाल-स्वर्णकारादिजन्यतावच्छेदकतया तन्नानात्वस्यावश्यकत्वात्, अत एव घटत्वव्याप्यं पृथिवीत्वादिकमेव किं न स्यात्? इति नाविनिगमः, तन्नानात्वे तज्जन्यतावच्छेदकनीलत्व-गन्धत्व-भास्वरत्वादिनानात्वापत्तेः, अनुगतधीस्तु कथञ्चित्सौस(?)दृश्यादिति चेत् । न, नीलादौ नीलादेरसमवायिकारणत्वेनानतिप्रसङ्गे पृथिवीत्वेन तत्राहेतुत्वात्, भावकार्ये ससमवायिकारणकत्वनियमाभावात्, भावे वा जन्यसत्त्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुतयैवोपपत्तेः; घटत्वस्य नानात्वे तज्जनकतावच्छेदकसंयोगनिष्ठजातिनानात्वस्याभिघातत्वादेस्तद्व्याप्यत्वस्य कल्पने चातिगौरवात् ।

न च जन्यद्रव्यजनकतावच्छेदिकैव संयोगनिष्ठा जातिरुपेयते, न तु घटादिजनकतावच्छेदिकापि, यत्र कपालयोः संयोगविशेषाद् द्रव्यान्तरं भवति तत्र कपालत्वस्यैवास्वीकारेण घटोत्पत्त्यनापत्तेरिति वाच्यम्; ताभ्यामेवोत्तरकालं संयोगविशेषेण घटारम्भदर्शनात् । न चोत्तरकालं द्व्यणुकादिलक्षणकिञ्चिदवयवापगमात् खण्डकपालान्तरमुत्पद्यते तत्रैव घटजनकतावच्छेदिका जातिरिति वाच्यम्; तत्र किञ्चिदवयवापगमात् खण्डकपालोत्पत्तिः, किञ्चिदवयवसंश्लेषाद् महाकपालोत्पत्तिर्वेति विनिगन्तुमशक्यत्वात्, ततः कपालान्तरोत्पत्तेरपि तत्र कपालत्वस्वीकारं विना दुर्घटत्वाच्च । हन्त! एवं घटत्वस्य नानात्वे

१ ख.ग.घ.च. 'मानावि' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घटसामान्ये कपालत्वेनापि हेतुत्वं भज्यत इति चेत् । भज्यताम्, किं वश्छिद्यते ?। न ह्यत्रार्थे वेदोऽस्ति । न च घटजनकसंयोगविशेषं प्रत्यपि कपालत्वेन हेतुत्वमुपेयमिति घटत्वनानात्वमावश्यकमिति वाच्यम्; कपालत्वेन तदुपादानत्वे घटत्व-घटजनकसंयोगनिष्ठजात्यादिनानात्वकल्पने गौरवात्, तदुपादानतावच्छेदिकाया एवैकस्याः स्वीकर्तुमुचितत्वात् ।

किञ्च, एवं सामयिकः शक्तिविशेषः, अभावविशेषो वा घटहेतुः स्यात्, स्याद् वा घटकुर्वद्रूपत्वेनैव घटहेतुत्वम्, प्रत्यभिज्ञानुरोधस्य त्वयैवोपेक्षितत्वात् । यदि चानुभवोऽनुरुध्यते, तदा भेदाभेदविचित्रशक्त्यनुविद्धसामान्यविशेषभावाभ्युपगमं विना दुर्घट एव हेतु-हेतुमद्भावः । एतेन 'घटत्व-दण्डत्वादिकमेकत्ववृत्ति कार्यकारणतयोरवच्छेदकम्, मृत्त्वादिकमेकमेव वैकत्ववृत्ति घटत्वादिकं तु सर्वत्रोपत्थम्भकपृथिवीवृत्ति, कार्यकारणभावानां बहूनां साक्षात्समानाधिकरणेनावच्छेदौचित्यात्, कुम्भकार-स्वर्णकारादेर्विजातीयकृतिमत्त्वेन, चक्रादि-वर्तुलादेश्च कथञ्चिद्विजातीयसंयोगव्यापारकत्वेन हेतुत्वम्, अन्यथा चक्रादिकं विना क्वचिद् मृदादिघटस्याप्युत्पत्तेर्व्यभिचारो दुर्वारः स्यात् । रूपादिवृत्त्येव तत् किं न स्यात् ? इति चेत् । रूपादौ नीलत्व-तिक्तत्व-सुरभित्व-कठिनत्वादिना सांकर्यात्, द्वित्व-द्विपृथक्त्वादेरनन्तत्वात्, आश्रयभेदाग्रहेऽग्रहाच्च; एकपृथक्त्वस्यावधिज्ञानव्यङ्ग्यत्वेन विलम्बोपस्थितिकत्वात्, नव्यमते गुणत्वाभावाच्च' इत्यादि निरस्तम्; दोषादेकत्वाग्रहेऽपि घटत्वग्रहात्, घटे घटत्वस्यासंनिकर्षादग्रहप्रसङ्गात्, चक्षुःसंयुक्ते स्वाश्रयसंबन्धेन वृत्तित्वस्य संनिकर्षत्वे गौरवात्, एकत्वत्वग्रहापत्तेश्चेति न किञ्चिदेतत् ।

किञ्च, अतिरिक्तसामान्यवत् तत्संबन्धोऽपि वैशिष्ट्याख्योऽतिरिक्तः स्वीक्रियताम्, इति भावाभावसाधारणजात्यनभ्युपगमे विनापसिद्धान्तं किं बाधकम् ?, कथं वा ध्वंसादावनुगतव्यवहारः ?, कथं वा तादात्म्येन जन्यसतः प्रतियोगितया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्वंसत्वं जन्यतावच्छेदकम् ?। न हि जन्याभावत्वं तत्, जन्यत्वस्य ध्वंसगर्भत्वेनात्माश्रयात् । न च कालिकेन घटत्व-पटत्वादिमत्त्वं तत्, अनन्तकार्यकारणभावप्रसङ्गात् । यदि चाखण्डोपाधिरूपमेव ध्वंसत्वादिकम्, तदा घटत्वादिकमप्यखण्डोपाधिरूपमेवास्तु, इति जातिविलय एवायातो देवानांप्रियस्य ! । यत्तु– 'घटत्वादेर्जातित्वे घटे समवायेन तद्वत्ताधीव्यपदेशादिकमिति लाघवम्, अखण्डोपाधित्वे तु स्वरूपसंबन्धेनेति गौरवम्' इति पद्मनाभादिभिरभिदधे । तत्तुच्छम्, स्वरूपसंबन्धस्याप्युपाधिरूपत्वेऽनुगतत्वेन लाघवापच्यवात्, समवायापेक्षया स्वरूपसंबन्धस्य गुरुत्वेऽननुगमस्यैव बीजस्य भवताभ्युपगमात् ।

यदपि 'जातावखण्डोपाधित्वापादने फलतोऽसमवेतत्वमेवापाद्यते, तच्चाशक्यम्, समवेतत्वस्य तत्र प्रत्यक्षसिद्धत्वात्' इति । तदपि न, समवेतत्वस्य त्वदतिरिक्तेनाननुभवात्, संबन्धांशे विलक्षणप्रतीतेरप्यसिद्धेः 'इह घटत्वम्' 'इह भावत्वम्' इति धियोर्वैलक्षण्यासिद्धेः । इष्यते च भावत्वमखण्डोपाधिरूपं नवीनैः, 'द्रव्यादौ सत्तादौ च 'भावः' 'भावः' इत्यनुगतधियः संबन्धांशे वैलक्षण्याननुभवेन समवाय-स्वाश्रयसमवायान्यतरसंबन्धेन सत्तैव भावत्वम्' इति प्राच्यमतस्य दूषणादिति न किञ्चिदेतत् । तस्मात् सामान्यविशेषरूपमेव वस्तु स्वीकर्तव्यम्, यदविशिष्टं प्रतिस्वमनुगतं, विशिष्टं च विशिष्टानुगतमविशिष्टस्व-परव्यावृत्तं स्वभावत एव चित्रक्षयोपशमवशाद् गुण-प्रधानभावेन परस्परकरम्बितं भासते । अत एव घटत्वांश इव घटांशेऽप्यनुगताकारा धीः, अत एव च महानसीयधूम एवाभिमुखीभूते सामान्यतो गृह्यमाणा व्याप्तिः पर्वतीयधूमेऽपि पर्यवस्यति, संवृतविशेषाकारे धूमसामान्य एव तद्ग्रहात् । न हि तदुत्तरं सामान्यप्रत्यासत्त्या सकलधूमविशेष्यकं व्याप्तिज्ञानं जायमानमनुभूयते, किन्तु प्रथममेव तथाक्षयोपशमवशात्, सामान्यप्रत्यासत्त्यादिकल्पनागौरवेणैकव्यक्तेरेव कथञ्चित्प्रातिनियतव्यक्त्यभेदस्य प्रत्यभिज्ञा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धस्य स्वीकर्तुमुचितत्वादिति । तस्मात् सामान्यविशेषरूपतया गोरसदृष्टान्तेनोत्पाद-व्यय-ध्रौव्यात्मकं वस्तु सिद्धम् ॥ ३ ॥

अत्र परेषां पूर्वपक्षवार्तामाह—

अत्राप्यभिदधत्यन्ये विरुद्धं हि मिथस्त्रयम् । एकत्रैवैकदा नैतद्धटां प्राञ्चति जातुचित् ॥४॥

अत्रापि— त्र्यात्मकतत्त्ववादेऽपि, अन्ये— सौगतादयः, अभिदधति यदुत— विरुद्धं हि— विरुद्धमेव, मिथः— परस्परम्, त्रयम्— उत्पादादि; यत एवम्, अत एकत्रैव वस्तुनि, एकदा— एकस्मिन् काले, एतत्— त्रयम्, जातुचित्— कदाचित्, न घटां प्राञ्चति— न घटते ॥ ४ ॥

मिथो विरोधमेवोपदर्शयति—

उत्पादोऽभूतभवनं विनाशस्तद्विपर्ययः । ध्रौव्यं चोभयशून्यं यदेकदैकत्र तत्कथम् ? ॥५॥

उत्पादोऽभूतभवनम्— प्रागसतः सामग्रीबलादात्मलाभः, विनाशस्तद्विपर्ययः— भूतस्यानन्तरमभावः, ध्रौव्यं चोभयशून्यम्— उत्पाद-विनाशरहितम्, यत्— यस्मात्; तत्— तस्मात्, एकत्र वस्तुनि, एकदा— एकस्मिन् काले, कथम् ? ॥ ५ ॥

नन्वेकस्मिन्नेकदोत्पादादित्रयकार्यशोक-प्रमोद-माध्यस्थ्यदर्शनाद् न विरोधः, प्रमाणसिद्धेऽर्थे विरोधाप्रसरात्, इत्यत आह—

शोक-प्रमोद-माध्यस्थ्यमुक्तं यच्चात्र साधनम् । तदप्यसांप्रतं यत्तद्वासनाहेतुकं मतम् ॥६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यच्चात्र– स्यात्मकत्वे जगतः, शोक-प्रमोद-माध्यस्थ्यं साधनमुक्तम्, घट-मौलि-सुवर्णार्थी' इत्यादिना। तदप्यसांप्रतम्– अविचारितरमणीयम्, यत्–यस्मात्, तत्– शोकादिकम्, आन्तरवासनानिमित्तम्, मतम्–अभीष्टम्, न वस्तुनिमित्तम्, वस्तुदर्शनेनान्तरशोकादिवासनाप्रबोधादेव घटनाशादिविकल्पात् शोकाद्युत्पत्तेः। यदि च वस्तुनिमित्तमेव शोकादिकं स्यात् तदा राजपुत्रादिवदन्यस्याप्यविशेषेण तत्प्रसङ्गः ॥ ६ ॥

उपचयमाह—

किञ्च स्याद्वादिनो नैव युज्यते निश्चयः क्वचित्। स्वतन्त्रापेक्षया तस्य न मानं मानमेव यत्।

'किञ्च' इति दूषणान्तरे, स्याद्वादिनः क्वचित्– अधिकृते वस्तुनि, निश्चयो नैव युज्यते, यद्– यस्मात्, तस्य स्वतन्त्रापेक्षया– स्वसिद्धान्तापेक्षया, मानं– प्रमाणम्, मानमेव न– प्रमाणमेव न, अनेकान्तव्याघातात्। एवं चानेकान्तानुरोधादप्रमाणीभूतं प्रमाणं न निश्चायकं घटादिवत् ॥ ७ ॥

किञ्च,

संसार्यपि न संसारी मुक्तोऽपि न स एव हि। तदतद्रूपभावेन सर्वमेवाव्यवस्थितम् ॥८॥

संसार्यपि संसार्येव न, एकान्तप्रसङ्गात्; मुक्तोऽपि हि– निश्चितम्, स एव– मुक्त एव न, तत एव। एवं च सर्वमेव

---

१ प्रस्तुते स्तबके कारिका २।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्वम्, तदतद्रूपभावेन– तदतत्स्वभावत्वेन, अव्यवस्थितम्– अनिश्चितमिति ॥ ८ ॥

अत्र सिद्धान्तवार्तामाह—

तयाहुर्मुकुटोत्पादो न घटानाशधर्मकः। स्वर्णान्न चान्य एवेति न विरुद्धं मिथस्त्रयम् ॥९॥

ते– जैनाः, आहुर्यदुत– मुकुटोत्पादो न घटानाशधर्मकः– धर्मपदस्य स्वभावार्थत्वात्, नञ्व्यत्ययाच्च न घटनाशास्वभाव इत्यर्थः; तुल्यहेतुप्रभवयोर्द्वयोस्तयोरेकस्वभावत्वात् । न च स्वर्णात्– अन्वयिनः स्वाधारभूतात्, अन्य एव। इति हेतोः, मिथस्त्रयम्– उत्पादादिकम्, न विरुद्धम्, एकत्रैकदा प्रमीयमाणत्वादिति ॥ ९ ॥

एतदेव समर्थयन्नाह—

न चोत्पादव्ययौ न स्तो ध्रौव्यवत्तद्धिया गतेः। नास्तित्वे तु तयोर्ध्रौव्यं तत्त्वतोऽस्तीति न प्रमा ॥

न चोत्पाद-व्ययौ न स्तः– न विद्येते, कल्पितत्वादिति वाच्यम् । कुतः ? इत्याह–ध्रौव्यवत् तद्धिया– स्वबुद्ध्या, गतेः– परिच्छेदात् । तथापि नास्तित्वे तु– नास्तित्व एव तयोरुपगम्यमाने, ध्रौव्यं तत्त्वतः– परमार्थतः, अस्तीति न प्रमा, उत्पाद-व्ययप्रतीतितुल्ययोगक्षेमत्वाद् ध्रौव्यधियः । एतेन द्रव्यास्तिकमतं निराकृतम् ॥ १० ॥

पर्यायास्तिकमतं निराचिकीर्षन्नाह—

न नास्ति ध्रौव्यमप्येवमविगानेन तद्गतेः। अस्याश्च भ्रान्ततायां न जगत्यभ्रान्ततागतिः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवम्– उत्पाद-व्ययवत्, ध्रौव्यमपि नास्तीति न, अविगानेन– अबाधितत्वेन, तद्गतेः– ध्रौव्यपरिच्छेदात् । अस्याश्च– ध्रौव्यगतेश्च, भ्रान्ततायामुच्यमानायाम्, जगति– त्रैलोक्ये, अभ्रान्ततागतिः– अभ्रान्तताप्रकारः, नास्ति कश्चित् ।

ननु यद्येवं द्रव्यास्तिक-पर्यायास्तिकयोर्द्वयोरपि प्रत्येकं मिथ्यात्वम्, तदा सिकतासमुदाये तैलवत् तत्समुदायेऽपि सम्यक्त्वाभावात् कथं "प्र[1]माण-नयैरधिगमः" ? इति चेत् । सत्यम्, न ह्यत्र दलप्रचयलक्षणः समुदाय उच्यते, पर्यायस्यादलत्वात्, इतरेतरविषयापरित्यागवृत्तीनां ज्ञानानां समुदायाभावात्, क्वचित् क्रमिकतत्समुदायस्याव्यापकत्वाच्च; किन्त्वितरनयविषयीकृतरूपाव्यवच्छेदकत्वम्, तदेव चान्योन्यनिश्रितत्वं गीयते । इदमेव च प्रवृत्तिनिमित्तीकृत्य तत्र सम्यक्त्वपदं प्रवर्तते; तदिदमुक्तम्—

"त[2]म्हा सव्वे वि णया मिच्छदिट्ठी सपक्खपडिबद्धा । अण्णोण्णणिस्सिआ उण हवंति सम्मत्तसब्भावा[3] ॥ १ ॥" इति ।

ननु यद्येवम्, तदा यथा बहुमूल्यान्यपि रत्नान्यननुस्यूतानि 'रत्नावली' इति व्यपदेशं न लभन्ते, अनुस्यूतानि च तान्येव 'रत्नावली' इति व्यपदेशं लभन्ते, जहति च प्रत्येकसंज्ञाः, तथा नया अपि प्रत्येकं सम्यक्त्वव्यपदेशं न लभन्ते, समुदितास्तु तं लभन्ते, जहति च दुर्नयसंज्ञाः, इति कथं दृष्टान्तः ? इति चेत् । निमित्तभेदेन व्यपदेशभेद एवायं दृष्टान्तः, न तु प्रत्येकसमुदायभाव इति दोषाभावात् । तथापि नयानां प्रमाणत्वे "प्रमाण-नयैः०" इति पुनरुक्तं स्यात्, अप्रमाणत्वे चापरि-

१ तत्त्वार्थसूत्रे १.६। २ तस्मात् सर्वेऽपि नया मिथ्यादृष्टयः स्वपक्षप्रतिबद्धाः । अन्योन्यनिश्रिताः पुनर्भवन्ति सम्यक्त्वसद्भावाः ॥ १ ॥

३ सम्मतिग्रन्थे गाथा २१ । ४ ख. ग. घ. च. 'स्याद्वादप्र' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छेदकत्वं स्यादिति चेत् । न, नयवाक्ये तद्वति तत्प्रकारकबोधजनकत्वस्य समारोपव्यवच्छेदकत्वस्य निर्धारकत्वस्य वा, इतरांशाप्रतिक्षेपित्वस्य वा प्रमाणत्वस्य सत्त्वेऽप्यनेकान्तवस्तुग्राहकत्वरूपस्य प्रमाणवाक्यनिष्ठस्य प्रामाण्यस्याभावेन 'नय-प्रमाणैः' इति पृथगुक्तेः । एतेन 'घटोऽस्ति' इत्यादिवाक्ये लोकसिद्धं प्रामाण्यं परित्यज्य 'स्याद् घटोऽस्ति' इत्यादावेव प्रामाण्यं परिकल्पयतामपूर्वा चातुरी' इत्यव्युत्पन्नकल्पना निरस्ता । निरस्ता च शुक्तौ रजतभ्रमे इदमंशे प्रामाण्यवद् दुर्नयेऽप्यधिकृतांशे प्रमाणत्वेन नयत्वापत्तिः, लोकसिद्धप्रामाण्यापरित्यागादंशव्याप्तस्य प्रमाणत्वस्य प्रमाणावकाशसंभवेऽपि समूहव्याप्तस्य नयत्वस्यांशावकाशासंभवात् ।

ननु 'घट उत्पन्न एव' इति स्यादंशविनिर्मुक्तस्य दुर्नयस्यापि नयवत् स्वविषयावधारकत्वमस्त्येव, एवकारेणानुत्पन्नत्वाभावज्ञापनेऽप्युत्पन्नत्वप्रकाशनव्यापारापरित्यागात्, अनेकान्तबलादुभयोपपत्तेः, रक्ततादशायां घटे 'न श्यामः' इति बुद्धिवदिति चेत् । सत्यम्, इतरनयविषयविरोधावधारणे भजनां विना स्वविषयावधारणस्यैवाप्रवृत्तेः, प्राक् श्यामत्वेन ज्ञाते 'इदानीम्' इति विनिर्मोकेण 'न श्यामः' इति बुद्धिवत्, प्रवृत्तस्यापि च तस्यान्यथाविषयत्वरूपमिथ्यात्वोपस्थितेः । तदिदमुक्तम्—

" [3]णिययवयणिज्जसच्चा सव्वणया परविआलणे मोहा । ते उण ण दिट्ठसमओ विभयइ सच्चे व अलिए वा ॥ १ ॥"

अस्यार्थः– निजकवचनीये स्वविषये परिच्छेद्ये सत्याः सम्यग्ज्ञानरूपाः सर्व एव नयाः संग्रहादयः, तद्वति तदव-

२ निजकवचनीयसत्याः सर्वनयाः परविचालने मोहाः । तान् पुनर्न दृष्टसमयो विभजते सत्यान् वाऽलीकान् वा ॥ ३ ॥ २ सम्मतिसूत्रे गाथा २८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गाहित्वात् । परविचालने परविषयोत्खनने मोहा मुह्यन्तीति मोहा असमर्थाः, परविषयस्यापि सत्यत्वेनोन्मूलयितुमशक्यत्वात्, तदभावे स्वविषयस्याप्यव्यवस्थितेः, मिथो नान्तरीयकत्वात् । अतः परविषयस्याभावे स्वविषयस्याप्यसत्त्वात् तत्प्रत्ययस्य मिथ्यात्वमेवेत्यवधारयन् दृष्टसमयो ज्ञातानेकान्तः पुनस्तान् नयान् न विभजते सत्यानलीकान् वा, किन्त्वितरनयविषयसव्यपेक्षतया 'अस्त्येव द्रव्यार्थतः' इत्येवं भजनया स्वनयाभिप्रेतमर्थं सत्यमेवावधारयति, यद् यत्र यदपेक्षयास्ति तस्य तत्र तदपेक्षया ग्राहकत्वेनैव नयप्रामाण्यात् । अत एव द्रव्यास्तिकादेः प्रत्येकमित्थंरूपतया सत्त्वम्, अनित्थंरूपतया चासत्त्वं परिभाषितम्—

"दव्वट्ठिउ त्ति तम्हा णत्थि णओ णियमसुद्धजातीओ । न य पज्जवट्ठिओ णाम कोइ भयणाइ उ विसेसो[3] ॥१॥"

इति । अनेन हि विषयभेदकृतोऽनयोर्भेदः, द्वयात्मकस्यैव प्रातिस्विकरूपेण द्वाभ्यां ग्रहात्, किन्तु भजनया विवक्षाभेदकृतप्रतिभासभेदादित्युत्तरार्धतात्पर्यम् । तस्मात् पर्यायार्थिक उत्पाद-व्ययप्रतिभासे सत्यत्वमवगच्छति, ध्रौव्यप्रतिभासे त्वसत्यत्वम्, न तु तत्प्रतिभासमेव प्रतिक्षिपति, अनुभूयमानतद्विषयताकेऽतद्विषयताकत्वस्य व्यवस्थापयितुमशक्यत्वात् । न खलु सहस्रेणापि बाधकैः 'इदं रजतम्' इति प्रतीतेरङ्गत्वावलम्बनत्वं व्यवस्थापयितुं शक्यते । द्रव्यास्तिकोऽपि ध्रौव्यप्रतिभासे सत्यत्वमवगच्छति, उत्पाद-व्ययप्रतिभासे त्वसत्यत्वम्; तदुक्तम्—

---

१ ज.'सत्वेनो' । २ द्रव्यास्तिक इति तस्माद् नास्ति नयो नियमशुद्धजातीयः । न च पर्यवास्तिको नाम कोऽपि भजनया तु विशेषः ॥१॥ ३ सम्मतौ गाथा ९ ।

"[3]दव्वट्ठियवत्तव्वं अवत्थु नियमेण होइ पज्जाए। तह पज्जववत्थु अवत्थुमेव दव्वट्ठियणयस्स ॥ १ ॥
उप्पज्जंति चयंति अ भावा निअमेण पज्जवनयस्स। दव्वट्ठियस्स सव्वं सया अणुप्पन्नमविणट्ठं[1] ॥ २ ॥" इति।

अयं च स्वविषयपक्षपातोऽयुक्तः, उभयप्रतिभासप्रामाण्यस्य तुल्ययोग-क्षेमत्वादित्युक्तम्। ततश्च त्र्यात्मकं वस्तु प्रमाणतः पर्यवसितमिति ॥ ११ ॥

उत्पादादिलक्षणाभिधानेन पूर्वपक्षितं विरोधं परिहरन्नाह—

उत्पादोऽभूतभवनं स्वहेत्वन्तरधर्मकम्। तथाप्रतीतियोगेन विनाशस्तद्विपर्ययः ॥१२॥

उत्पादोऽभूतभवनं– प्रागनुभूतरूपाविर्भवनम्, स्वहेत्वन्तरधर्मकं– स्वनान्तरीयकप्राक्पर्यायनाशरूपहेत्वन्तरस्वभावम्। कुतः? इत्याह– तथाप्रतीतियोगेन– अधिकृतरूपोत्पाद एव प्राक्तनरूपनाशप्रतीतेर्युक्तत्वात्, तदजनकस्वभावपरित्यागसमनियतत्वात् तज्जननस्वभावत्वस्य। तथा, विनाशस्तद्विपर्ययः– भूताभवनमन्यभवनस्वभावम्, प्रकृतरूपनाशस्येतररूपोत्पादनान्तरीयकत्वानुभवात्, दीपादिनाशेऽपि तमःपर्यायोत्पादानुभवस्य जागरूकत्वात्, एकसामग्रीप्रभवत्वाच्च तदतद्रूपनाशो-त्पादयोः। ये तु लाघवप्रणयिनोऽपि कपालोत्पादिकां भिन्नां सामग्रीम्, घटनाशोत्पादिकां च भिन्नामेव कल्पयन्ति, तेषां काचिदपूर्वैव वैदग्धी ॥ १२ ॥

---

१ द्रव्यास्तिकवक्तव्यमवस्तु नियमेन भवति पर्यायाः। तथा पर्यववस्तु अवस्त्वेव द्रव्यार्थिकनयस्य ॥ १ ॥
उत्पद्यन्ते च्यवन्ते च भावा नियमेन पर्यवनयस्य। द्रव्यास्तिकस्य सर्वं सदाऽनुत्पन्नमविनष्टम् ॥ २ ॥ ३ सम्मतौ गाथा १०-११।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथैतदुभयाधारस्वभावं ध्रौव्यमित्यपि। अन्यथा त्रितयाभाव एकदैकत्र किं न तत्?॥१३॥

तथा, एतदुभयाधारस्वभावम्– उत्पाद-व्ययाधारस्वभावात्मकम्, ध्रौव्यम्, इत्यपि– इदमपि, 'तथाप्रतीतेस्तदुभयाविनाभूतम्, नान्यथाभूतम्' इति योज्यते। अन्यथा– उक्तानभ्युपगमे, त्रितयाभावः– त्रयमपि कथाशेषमापद्येत, परस्परानुविद्धत्वात् त्रितयस्य, अधिकृतान्यतराभावे तदितराभावनियमात्। तथाहि– न ध्रौव्यव्यतिरेकेणोत्पाद-व्ययौ संगतौ, सर्वदा सर्वस्यानुस्यूताकारव्यतिरेकेण विज्ञान-पृथिव्यादिकस्याप्रतिभासनात्। न चानुस्यूताकारावभासो बाध्यः, तद्बाधकत्वेनाभिमतस्य विशेषप्रतिभासस्य तदात्मकत्व एकबाधेऽपरस्यापि बाधात्, तद्व्यतिरिक्तत्वपक्षस्तु ध्रौव्यधियं विना स्थास-कोशादिप्रतिभासाननुभवादनुपपन्नः। न च प्रथमाक्षसंनिपातानन्तरमन्वयप्रतिभासमन्तरेण विशेषप्रतिभास एव जायत इति वाच्यम्, तदा प्रतिनियतदेशस्य वस्तुमात्रस्यैव प्रतीतेः; अन्यथा तत्र विशेषावभासे संशयाद्यनुत्पत्तिप्रसक्तेः, विशेषावगतेस्तद्विरोधित्वात्। न च तदुत्तरकालभाविसादृश्यनिमित्तैकत्वाध्यवसायनिबन्धनेयं संशयाद्यनुभूतिः, प्राग् विशेषावगमे एकत्वाध्यवसायस्यैवासंभवाद् भेदज्ञानविरोधित्वात्। अनुभूयते च दूरदेशादौ वस्तुनि सर्वजनसाक्षिकी प्राक् सामान्यप्रतिपत्तिः, तदुत्तरकालभाविनी च विशेषावगतिः।

अत एवावग्रहादीनां कालभेदानुपलक्षणेऽपि क्रममभ्युपयन्ति समयविदः, अवग्रहादेरीहादौ हेतुत्वात्। यदि च मूल-मध्या-ऽग्रानुस्यूतस्थूलैकाकारप्रतिभासोऽपह्नूयते, तदा विविक्ततत्परमाणुप्रतिभासस्याप्यपह्नवात् शून्यताप्रसङ्गः। न चैकत्वप्रतिभासस्य तद्विषयस्य विकल्प्यमानस्याघटमानत्वाद् मिथ्यात्वम्, तस्यान्यानालम्बनत्वात्। संचितपरमाण्वालम्बनः स प्रतिभास

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति चेत्। न, संचयस्यैकस्य द्रव्यस्थानीयत्वात्। न चैवं परमाणुष्वपि परस्य मानमस्ति, प्रत्यक्षस्य विप्रतिपन्नत्वात्, उपलभ्यमानस्थूलैकस्वभावस्य चावस्तुत्वेन तत्कार्यत्वस्य परैरनभ्युपगमात्। न च वनादिप्रत्ययात् शिंशपाद्यवगतिवत् स्थूलावभासात् तत्प्रत्ययः, वनादेः शिंशपाधर्मत्वात्, स्थूलाकारस्य च परमाणुधर्मत्वानभ्युपगमात्। कथं च परः कल्पनाज्ञाने भ्रान्तसंविदि वा स्वसंवेदनापेक्षया विकल्पेतरयोर्भ्रान्तेतरयोश्च परस्परव्यावृत्तयोराकारयोः कथञ्चिदनुवृत्तिमभ्युपगच्छन्नध्यक्षां हेतु-फलयोर्व्यावृत्त्यनुविद्धामप्यनुवृत्तिं प्रतिक्षिपेत्?, संशयज्ञानं वा परस्परव्यावृत्तोल्लेखद्वयं बिभ्रद् यद्येकमुपेयते तदा किं न पूर्वापरक्षणप्रवृत्तमेकं स्वीकुर्यात् फलरूपं वस्तुहेतुम्, शब्द-विद्युत्-प्रदीपादीनामुत्तरपरिणामाप्रत्यक्षत्वेऽपि तत्सद्भावसाधनात्, पारिमाण्डल्यादिवत् संविद्ग्राह्याकारविवेकवद् वाऽध्यक्षस्यापि केनचिद् रूपेण परोक्षत्वाविरोधात्?। न च पारिमाण्डल्यादेः प्रत्यक्षता, शब्दाद्युत्तरपरिणामेऽप्यस्या वाङ्मात्रेण सुवचत्वात्। न च शब्दादेरनुपादानोत्पत्तिर्युक्तिमती, सूक्ष्मबुद्बुदैरपि निरुपादानत्वप्रसङ्गात्। नापि निरन्वया संततिविच्छित्तिः, चरमक्षणस्याकिञ्चित्करत्वेनावस्तुत्वे पूर्वपूर्वक्षणानामपि तथात्वापत्तौ सकलसंतत्यभावप्रसक्तिरिति। तस्माद् दृष्टस्याप्यर्थस्य पारिमाण्डल्यादेः, ग्राह्याकारविवेकादेर्वांशस्य यथाऽदृष्टत्वं, तथोत्पन्नस्वभावस्यापि कस्यचिदंशस्यानुत्पन्नत्वम्। इति सिद्धं ध्रौव्यम्।

उत्पाद-व्ययव्यतिरेकेण ध्रौव्यमप्यसंगतम्; तथाहि– 'दुग्धादौ दध्यादिकं सदेव' इति सांख्यः, दुग्धादेरेव दध्यादिरूपेण व्यवस्थितत्वात्। 'तदव्यतिरिक्तं विकारमात्रमेव कार्यम्' इति सांख्यविशेषः। 'न कार्यं कारणे प्रागस्ति, किंतु ततः पृथग्भूतमेव सामग्रीतो भवति, न तु कारणमेव कार्यरूपेण व्यवतिष्ठते परिणमते वा' इति वैशेषिकादयः। 'न च कार्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारणं वास्ति, ध्रुवमद्वैतमात्रमेव तत्त्वम्' इत्यपरः ।

तत्र 'दुग्धादौ दध्यादिकं सदेव' इति सांख्यमते कारणव्यापारवैफल्यम् । न हि तेन कार्योत्पत्तिः, तदभिव्यक्तिः, आवरणविनाशो वा कर्तुं शक्यते, तदुत्पत्त्य-ऽभिव्यक्त्योरपि सत्त्वे कारकव्यापारवैफल्यात्, असत्त्वेऽपसिद्धान्तात् । आवरणविनाशेऽपि न तत्साफल्यम्, असतो भावस्योत्पादवत् सतो भावस्य नाशाभावात् । न चान्धकारवत् तदावारकं तदा किञ्चिदुपलभ्यते । न च कारणमेव कार्यावारकम्, तस्य तदुपकारकत्वेन प्रसिद्धेः । किञ्च, अन्धकारवत् तद्दर्शनप्रतिबन्धकत्वेन तदावारकत्वे तददर्शनेऽपि तत्स्पर्शोपलम्भप्रसङ्गः । पटादिवद् व्यधायकत्वेन तदावारकत्वे च तद्ध्वंस इव मृत्पिण्डध्वंसेऽपि तदुपलब्धिप्रसङ्गः । क्षीर-नीरादिवदात्यन्तिकसंश्लेषेण तदावारकत्वे च तत्पृथग्भावं विना तदनुपलब्धिप्रसङ्गः । अपिच, कारणकाले कार्यस्य सत्त्वे स्वकाल इव कथमसौ तेनाव्रियते ?, कथं च मृत्पिण्डकार्यतया घटो व्यपदिश्यते, न त्वन्यथा, पटादिवत् ? । असत्त्वे च नावृत्तिः, अविद्यमानत्वादपसिद्धान्तश्च । विवेचितं चेदं चार्वाकवार्तायाम् । निरस्तश्च सत्कार्यवादः सांख्यवार्तायाम् । इति न किञ्चिदेतत् ।

एवं चानर्थान्तरभूतपरिणामवादोऽपि प्रतिक्षिप्त एव । न ह्यर्थान्तरपरिणामाभावे परिणाम्येव कारणलक्षणोऽर्थ एको युज्यते, पूर्वापरयोरेकत्वविरोधात् । न च परिणामानतिरेके परिणामित्वमपि व्यवतिष्ठते, विशेषणव्यवस्थाधीनत्वाद् विशिष्टव्यवस्थायाः । न ह्येकमेव विशेषणं विशेष्यं च । इति न किञ्चिदेतत् ।

यदपि 'कारणात् कार्यमत्यन्तपृथग्भूतमेव, तदाश्रितत्वेन तस्योत्पत्तेश्च न पृथगुपलम्भः' इति वैशेषिकादीनां मतम्;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदपि समवायनिषेधात्, अन्यस्य च संबन्धस्याभावादनुपपन्नमेव । किञ्च, अवयवेभ्योऽवयविन एकान्तभेदे एकदेशरागे सर्वस्य रागः स्यात्, एकदेशावरणे च सर्वस्यावरणं भवेत्, रक्ता-ऽरक्तयोरावृता-ऽनावृतयोश्च भवदभ्युपगमेनैकत्वात् । यत्तु– 'एकस्मिन् भेदाभावे सर्वशब्दप्रयोगानुपपत्तिः' इत्युद्द्योतकरेणोक्तम्; तत्तु 'स्वशस्त्रं स्वोपघातायैव' इति न्यायमनुसृतम्, अवयवानामवयविभाव एव 'सर्वं वस्त्रं रक्तम्' 'किञ्चिद् वस्त्रं रक्तम्' इति चित्रलोकव्यवहारसिद्धेः । न च वस्त्रपदस्य वस्त्रावयवे लक्षणया तत्र सर्वपदप्रयोगानुपपत्तिर्नेति वाच्यम् । अस्खलद्वृत्तित्वात् तत्प्रयोगस्य । यदपि शङ्करस्वामिनोक्तम्– 'वस्त्रस्य रागः कुङ्कुमादिद्रव्येण संयोग उच्यते, स चाव्याप्यवृत्तिः, तत एकत्र रक्ते न सर्वस्य रागः, न च शरीरादेरेकदेशावरणे सर्वस्यावरणं युक्तम्' इति । तदप्ययुक्तम्, पटादेर्निरंशस्यैकद्रव्यस्य कुङ्कुमादिना व्याप्ता-ऽव्याप्तांशाभावेन तत्र संयोगाव्याप्यवृत्तित्वस्यासंभवदुक्तिकत्वात् । तदारम्भकावयवस्यैव रक्तत्वे च न तस्य किञ्चिदव्याप्यवृत्तित्वं नाम, अवयवं व्याप्यैव रागस्य वृत्तेः, अवयविनश्चारक्तत्वादेव न च स्यादवयविनि रक्तत्वप्रतीतिः ।

अथ तत्तदवयवे कुङ्कुमसंयोगाख्यो रागो जातस्तत्तदवयवावच्छेदेनावयविनि रागं जनयति, कारणा-ऽकारणसंयोगात् कार्याकार्यसंयोगोत्पत्तेः; अतस्तस्यावच्छिन्नत्वरूपमव्याप्यवृत्तित्वं युक्तमिति चेत् । न, तत्रावयवा-ऽवयविवृत्तिक्रमोत्पद्यमानरागद्वयानुपलम्भात्, संयोगजन्यसंयोग-तत्सामग्र्यादिकल्पने गौरवात् । तत्र रक्तरूपेणारक्तरूपस्याभिभवेऽन्यावयवेऽप्यरक्तानुपलम्भप्रसङ्गात्, तदनभिभवे च तदवयवेऽपि तदुपलम्भप्रसङ्गात् । न च तदवयवावच्छिन्नं रक्तत्वं तदवयवावच्छेदेनैवारक्तत्वाभिभावकमिति वाच्यम्; अरक्तत्वग्रहप्रतिबन्धकत्वरूपस्याभिभावकत्वस्यानवच्छिन्नत्वात् । न च रक्तावयवविषयक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्रक्तत्वग्रहे तद्रागः प्रतिबन्धक इति वाच्यम्; गौरवात्, रक्तावयवावच्छेदेन चक्षुःसंनिकर्षे रक्तावयवाविषयकतदरक्तत्वप्रतीतिप्रसङ्गाच्च। किञ्च, 'किञ्चिद् वस्त्रं रक्तम्' इति प्रतीतौ 'किञ्चित्' इति 'सर्वम्' इति च वस्त्रविशेष एव प्रतीयते; न तु संयोगविशेषरूपरागे किञ्चिदवयवावच्छिन्नत्वं सर्वावयवावच्छिन्नत्वं च। 'मूले वृक्षः कपिसंयोगी' इत्यत्रापि 'मूलवृत्तिकपिसंयोगवान् वृक्षः' इत्येव स्वारसिकोऽर्थः। यदि च मूलेऽवच्छेदकत्वं भासते तदा तदपि वृक्षापेक्षमेव स्वनिरूपितैकत्वसंवलितभेदप्रतियोगित्वरूपम्। अत एव नयभेदेन प्रामाण्याप्रामाण्यविभागः। एवं च 'अवच्छेदकभेदाद् न रक्तारक्तत्वादिविरोधः' इति निरस्तम्, अव्याप्यवृत्तिभेदाभ्युपगमप्रसङ्गाच्च।

न च रक्तत्वं पटे रञ्जकद्रव्यनिष्ठमेव परम्परासंबन्धेन प्रतीयते, अरक्तत्वं च समवायेन रक्तभेद एवेत्यपि युक्तम्, परम्परासंबन्धाप्रतीतेः, 'इह रक्तम्' 'नेह रक्तम्' इति विभागाप्रसङ्गात्, अरक्तावयवेऽपि परम्परासंबन्धेन रक्तत्वधीप्रसङ्गाच्च। अपिच, प्रतिनियतानावृतावयवोपलम्भे घटस्याऽपृथु-पृथु-पृथुतर-पृथुतमत्वाद्युपलम्भोऽवयवाभेदं विना दुर्घटः, अंशेष्वेव तद्वैचित्र्यसंभवात्। परिणामभेदेऽध्यक्षस्य भ्रान्तत्वे 'स्थूलाकारेऽपि भ्रान्तत्वमेव, इति स्वलक्षण एवाध्यक्षमभ्रान्तम्, अवयवी तु सांवृत एव' इति वदन् सौगत एव विजयेत। एतेन 'उपलभ्यमानोऽवयव्यनावृत एव, तद्गतपरिमाणग्रहोऽपीष्ट एव, तद्गतहस्तत्वादिजातिग्रहे तु यावदवयवावच्छेदेन संनिकर्षोऽपि हेतुः' इति लीलावतीकारप्रभृतीनामभिप्रायो निरस्तः, यावदवयवावच्छेदेन संनिकर्षस्यासंभवाच्च। परभागमध्यावयवाद्यवच्छेदेन तदनुपपत्तेः, प्रतिनियतावयवावच्छेदेन संनिकर्षाद् हस्तत्वादिग्रहे च प्रतिनियतावयवावभासे परिमाणभेदाद्यवभासोऽपि किं नाभ्युपेयते, चित्रप्रतिभासान्वितस्यैव वस्तुनो युक्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वात्, अधिकावयवापगमे तावत एव तस्य दर्शनात् ?। तदान्यदेव स्वल्पपरिमाणं द्रव्यमिति चेत् । प्रागपि तावदन्यदेव । नानात्व एकत्वानुपपत्तिरिति चेत् । तवैवायं दोषः । कथं चैवं प्रासादादावेकत्वप्रत्ययः ?। न हि प्रासादादिकमेकद्रव्यं भवद्भिरभ्युपगम्यते, विजातीयानां द्रव्यानारम्भकत्वात् । समूहकृतं तत्रैकत्वमिति चेत् । पटादावपि किं न तथा ?। न हि पटादौ प्रासादादौ च विलक्षणमेकत्वमनुभूयते । न स्यादेवं धान्यराशावप्येकत्वं पटाद्येकत्वाद् विलक्षणमिति चेत् । न स्यादेव, निश्चयतः सर्वस्यैव परमाणुसमूहकृतत्वात् । द्रव्यपरिणामकृतत्वात्तु व्यवहारतः स्याच्चेत्, व्यावहारिकमेकत्वमतिरिच्यताम्, का नाम हानिरनेकान्तवादिनामियता ? ।

अपि च, अवयवेष्ववयवी एकदेशेन समवेयात्, कार्त्स्न्येन वा ? । आद्ये, तद्देशस्यापि देशादिकल्पनायामनवस्था । द्वितीये च प्रत्यवयवसमवेतावयविबहुत्वप्रसक्तिः । न च देश-कार्त्स्न्यातिरेकेणान्या वृत्तिरस्तीति विवेचितं प्राक् । द्वित्वस्य द्वयोः पर्याप्तत्ववद् यावदवयवेष्ववयविनः पर्याप्तत्वे यावदवयवाग्रहे तद्ग्रहो न स्यात्, प्रत्येकं पर्याप्तत्वे च प्रत्येकं पर्याप्तत्वव्यवहारः स्यादिति निष्कर्षः । किञ्च, एकस्य निरंशस्यावयविनः पृथुतरदेशावस्थानमयुक्तं स्यात्, न चेदेवम्, एकत्वाविशेषाद् दुर्घटः स्यात् सर्वत्र स्थूल-सूक्ष्मादिभेदः । अल्प-बह्ववयवारम्भादिकृतोऽसौ विशेष इति चेत् । तर्हि तद्विशेषविशिष्टा अवयवा एवावयविव्यपदेशं भजन्ताम्, किमवयविपृथग्भावकल्पनाकष्टेन ? । अवयवादपृथग्भवन्नवयवी परमाणुसादभेदमश्नुवन्नध्यक्षो न स्यादिति चेत् । न, न ह्यवयविनोऽपि सर्वेऽध्यक्षा एव, वायु-पिशाचादावनेकान्तात्; किन्तु केचिदेव; तथा च परिणामविशेषनियता योग्यता परमाणुसादभेदेऽपि नासंभविनी । न च तत्र महत्त्वाध्यवसायोऽप्यनुपपन्नः, परमाणुसमूहेऽपि विशिष्टे महत्त्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिणामाबाधात् । अत एव धान्यराशौ महत्त्वविशेषाध्यवसायः सूपपदः ।

किञ्च, अवयविनोऽवयवाभेदेऽनभ्युपगम्यमाने 'मृदेवेयं घटतया परिणता' 'तन्तव एवैते पटतया परिणताः' इत्यादयो व्यवहाराः, विभक्तेषु तन्तुषु 'त एवैते तन्तवः' इत्यादिप्रत्यभिज्ञा, अवयवगुरुत्वादेरवयविगुरुत्वाद्यविशेषादिकं च न घटेत । अवयवरूपादिसमुदायेनैवैकावयवरूपाद्युपपत्तिमुपेक्ष्य पृथगवयव्यनुरोधेन रूपादौ रूपादेर्नानाकार्यकारणभावादिकल्पने गौरवं चानिवारितप्रसरं स्यादिति । एतेन 'वस्तुगत्या विलक्षणसंस्थानावच्छेदेन संनिकर्षाद् यद्द्रव्यगतघटत्वादिग्रहस्तत्तद्व्यक्तेरुत्पाद-विनाशभेदादिप्रत्ययान्यथानुपपत्त्याऽवयवी पृथगेवेति सिद्धम्' इत्यपि निरस्तम्, 'पृथगेव' इत्यसिद्धेः, उत्पाद-विनाशभेदादेर्ध्रौव्याभेदादिसंवलितत्वसंभवात्, तथाप्रतीतिप्रामाण्यात् । एवं च 'पृथिव्यादयश्चत्वारः परमाणुरूपा नित्या एव, कार्यरूपास्त्वनित्याः' इति तेषां प्रक्रियापि निरस्ता, परमाणूनामपि कार्याभिन्नतयाऽर्थान्तरभावगमनरूपस्य नाशस्य, विभागजातस्य चोत्पादस्य समर्थनात् । यथा हि बहूनामेकशब्दव्यपदेशनिदानं समुदयजनित उत्पादः, तथैकस्य बहुशब्दव्यपदेशनिदानं विभागजातोऽपि स किं नाभ्युपेयः ?। व्यवहरन्ति हि भग्ने घटे 'बहूनि कपालान्युत्पन्नानि' इति । एवं परमाणूनामप्येकनाशे युक्तो बहुत्वेनोत्पादः; तदाहुः—

बहुआण[1] एगसद्दे जइ संजोगाहि होइ उप्पाओ । णणु एगविभागम्मि वि जुज्जइ बहुआण उप्पाओ[2] ॥ १ ॥ इति ।

योऽप्याह— 'कार्यकारणातिरिक्तं ध्रुवमद्वैतमात्रं तत्त्वम्' इति । तन्मतमपि मिथ्या, कार्यकारणोभयशून्यस्याद्वैतस्य

---

१ बहुकानामेकशब्दे यदि संयोगाद् भवत्युत्पादः । नन्वेकविभागेऽपि युज्यते बहुकानामुत्पादः ॥ १ ॥ २ सम्मतिसूत्रे गाथा १२७ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्योमोत्पलसगोत्रत्वात्। किञ्च, 'अद्वैतम्' इति प्रसज्यप्रतिषेधः, पर्युदासो वा? । प्रसज्यपक्षे प्रतिषेधमात्रपर्यवसानाद् नाद्वैतसिद्धिः, प्रधानोपसर्जनभावेनाङ्गाङ्गिभावकल्पनायां द्वैतप्रसक्तेः। पर्युदासपक्षेऽपि द्वैतप्रसक्तिरेव, प्रमाणप्रतिपन्ने द्वैते तत्प्रतिषेधेनाऽद्वैतासिद्धेः। द्वैतादद्वैतस्य व्यतिरेके पररूपव्यावृत्तस्वरूपाव्यावृत्तात्मकत्वेन द्विरूपत्वात्, अव्यतिरेके च सुतरामिति । किञ्च, प्रमाणादिसद्भावे न द्वैतवादाद् मुक्तिः, तदभावे च शून्यतापातादिति । अपिच, द्रव्याद्वैते रूपादिभेदाभावप्रसङ्गः। न च चक्षुरादिसंबन्धात् तदेव द्रव्यं रूपादिप्रतिपत्तिजनकमिति वाच्यम्; सर्वात्मना तत्संबन्धे सर्वदा तथैव प्रतीतिप्रसक्तेः, रूपान्तरस्य तद्व्यतिरिक्तस्याभ्युपगमे चाद्वैतव्याघातात्। प्रधानाद्वैतमपि महदादिविकाराभ्युपगमे न युक्तम्, विकारस्य विकारिणोऽत्यन्तमभेदे 'विकारी' इति व्यपदेशायोगात्, भेदाभेदेऽनेकान्तसिद्धेः, व्यतिरेके च द्वैतापत्तेः। निरस्तश्च प्रधानाद्वैतवादः सांख्यवार्तायाम्। ब्रह्माद्वैतवादोऽप्यनन्तरमेव निपेत्स्यते वेदान्तिवार्तायाम्।

शब्दाद्वैतमतमपि न युक्तम्, एवं हि तदनादि-निधनं शब्दब्रह्मैव जगतस्तत्त्वम्, तत्प्रकृतित्वात्, घटशरावादीनामिव मृत्। तदुक्तं भर्तृहरिणा--

"अनादि-निधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ १ ॥" इति।

अत्रादिः– उत्पादः, निधनं– विनाशः, तदभावादनादि-निधनम्, प्रकृतेरविकृतैकरूपत्वात्। अक्षरमित्यकाराद्यक्षरस्य निमित्तत्वात्, अनेनाभिधानरूपो विवर्त उक्तः, 'अर्थभावेन' इत्यनेन त्वभिधेयरूपः। प्रक्रियेति भेदानामेव संकीर्तनम्। ब्रह्मेति विशुद्धस्वनामकीर्तनम्। शब्दब्रह्मैव खल्वेकमनवच्छिन्नम्, तच्चावच्छिन्नेषु स्वविकारेष्वनुस्यूतमवभासते, सर्वस्यैव प्रत्ययस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दानुविद्धत्वात्; तदनुवेधपरित्यागे च प्रकाशरूपताया एवाभावप्रसङ्गात्। तदुक्तम्—

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन वर्तते ॥ १ ॥

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती। न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥ २ ॥"

सा चेयं वाक् त्रिविधा– वैखरी, मध्यमा, पश्यन्ती च। यत्र येयं स्थान-करण-प्रयत्नक्रमव्यज्यमानाकारादिवर्णसमुदायात्मिका वाक् सा 'वैखरी' इत्युच्यते। तदुक्तम्—

"स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा। वैखरी वाक् प्रयोक्तृणां प्राणवृत्तिनिबन्धना ॥ १ ॥"

अस्यार्थः– स्थानेषु– ताल्वादिस्थानेषु, वायौ प्राणसंज्ञे, विधृते– अभिघातार्थं निरुद्धे सति। कृतवर्णपरिग्रहेति हेतुगर्भं विशेषणम्। ततः ककारादिवर्णपरिणामाद् वैखरी– विशिष्टायां खरावस्थायां स्पष्टरूपायां भवा वैखरीति निरुक्तेः, वाक् प्रयोक्तृणां संबन्धिनी, तेषां स्थानेषु वा, तस्याश्च प्राणवृत्तिरेव निबन्धनम्, तत्रैव निबद्धा सा, तन्मयत्वादिति। या पुनरन्तः संकल्प्यमाना क्रमवती श्रोत्रग्राह्यवर्णरूपाऽभिव्यक्तिरहिता वाक् सा मध्यमेत्युच्यते। तदुक्तम्—

"केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी। प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥ १ ॥"

अस्यार्थः– स्थूलां प्राणवृत्तिमतिक्रम्य– हेतुत्वेन वैखरीवदनपेक्ष्य, क्रमरूपमनुपततीत्येवंशीला, केवलं बुद्धिरेवोपादानं हेतुर्यस्याः सा, प्रवर्तते– संकल्प-विकल्पादिधारानुबन्धिनी भवति। मध्यमा वाक्– वैखरी-पश्यन्त्योर्मध्ये भावाद् मध्यमेति संज्ञा, मनोभूमाववस्थानमस्याः। या तु ग्राह्य भेद-क्रमादिरहिता स्वप्रकाशा संविद्रूपा वाक् सा पश्यन्तीत्युच्यते। तदुक्तम्—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा। स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥ १ ॥"

पश्यन्ती– प्रत्यक्षस्वरूपा वागियम्। यस्यां वाच्य-वाचकयोर्विभागेनावभासो नास्ति, सर्वतश्च सजातीयविजातीयापेक्षया संहृतो वाच्यानां वाचकानां च क्रमो देश-कालकृतो यत्र, क्रमाविवर्तशक्तिस्तु विद्यते। स्वरूपज्योतिः– स्वप्रकाशा वेद्यते, वेदकभेदातिक्रमात्। सूक्ष्मा– दुर्लक्षा, अनपायिनी, कालभेदास्पर्शादिति। अत एव शब्दार्थयोः संबन्धस्तादात्म्यमेव। न हि 'अयं घटः' इतीदमर्थे तटस्थघटपदस्योपरागोऽस्ति, किन्तु घटपदाभेद एव भासते। इति व्यवहारोऽपि सकलः शब्दानुविद्ध एव दृश्यते। न हि 'भोक्ष्ये' 'दास्यामि' इत्याद्यनुल्लिखितशब्दः कश्चिदपि स्वयं भोजन-दानाद्यर्थं प्रयतते; परं वा 'भुङ्क्ष्व' 'देहि' इत्यादिशब्दं विना प्रवर्तयति। जीवित-मरणस्वरूपाविर्भावोऽपि शब्दाधीन एव, सुषुप्तदशायामनुल्लिखितशब्दस्य मृताविशेषात्। तदुत्तरसमये च कुतश्चित् शब्दात् प्रबुद्धस्यान्तर्जल्पात्मना शब्देनैव जीवितानुसंधानात्। न चाद्वयरूपे तत्त्वे कथमाविर्भाव-तिरोभावादिरूपप्रपञ्चभेदप्रतिभासः? इति वाच्यम्; तिमिरतिरस्कृतलोचनस्य विशुद्धेऽप्याकाशे विचित्ररेखाभेदप्रतिभासवदनाद्यविद्योपप्लुतचित्तस्य प्रपञ्चभेदप्रतिभासात्। यथा च तिमिरविलये विशुद्धाकाशदर्शनं तथा निखिलाविद्याविलये शुद्धशब्दब्रह्मदर्शनम्। तच्चाभ्युदयनिःश्रेयसफलधर्मानुगृहीतान्तःकरणैः प्रणवस्वरूपमवाप्यत इति।

अत्र[1] च शब्दप्रत्ययादौ को नाम शब्दानुवेधः परस्याभिमतः? न नाम संयोगः, समवायो वा, द्रव्ययोरेव संयोगात्; गुणादीनामेव च समवायात्। 'घटो नीलानुविद्धः' इत्यत्रेव तादात्म्येऽनुवेधपदप्रयोग इति चेत्। न, एकान्ताभेदे तदनुप-

१ ख. ग. घ. च. 'तत्र'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्तेः। न हि 'घटो घटानुविद्धः' इति प्रयुञ्जते प्रामाणिकाः। विवक्षा-ऽविवक्षाभ्यां तथाप्रयोगा-ऽप्रयोगोपपत्तिः, यथा 'कुण्डे कुण्डस्वरूपम्' इति प्रयोगः, न तु 'कुण्डे कुण्डम्' इति, इति चेत्। न, तथापि शब्द-बोधयोरेकान्ततादात्म्ये शब्दस्य जडत्वाद् बोधस्यापि जडतापत्तेः, शब्दस्य बोधरूपत्वेन बोधमात्रवादापत्तेः। तथा चान्यस्यान्यबोधाबोद्धृवदन्यशब्दश्रोतृत्वं न भवेत्।-भात्रे वा सकलप्रमातृबोधाभिन्नशब्दग्राहित्वाद् निरुपायं सर्वस्य सर्वचित्तवित्त्वं स्यात्। तथाच समन्तभद्रः—

"बोधात्मता चेच्छब्दस्य न स्यादन्यत्र तच्छ्रुतिः। यद् बोद्धारं परित्यज्य न बोधोऽन्यत्र गच्छति ॥ १ ॥

न च स्यात्प्रत्ययो लोके यः श्रोत्रा न प्रतीयते। शब्दाभेदेन सत्येवं सर्वः स्यात्परचित्तवित् ॥ २ ॥" इति।

अतः शब्दानुविद्धः प्रत्ययो न जगतः शब्दमयत्वे साक्षी। किञ्च, शब्दमयत्वं जगतः शब्दपरिणामरूपत्वम्, नीलादिपरिणामश्च शब्दस्य स्वाभाविकशब्दस्वरूपपरित्यागे, तदपरित्यागे वा ? । आद्ये, अनादि-निधनत्वविरोधः। द्वितीये, नीलादिसंवेदनकाले बधिरस्यापि शब्दसंवेदनापत्तिः। स्थूलशब्दपरिणामपरित्यागेऽपि सूक्ष्मशब्दरूपापरित्यागात् प्रथमविकल्पे न दोष इति चेत्। न, सूक्ष्मस्य सतस्तादृशदलोपचयाभावे तादृशस्थूलरूपासंभवात्; सूक्ष्मस्य शब्दस्य तादृशार्थपरिणामः, सूक्ष्मस्याऽर्थस्य वा तादृशशब्दपरिणाम इति विनिगन्तुमशक्यत्वाच्च। घटादिरर्थो घटादिशब्दोपरागेणानुभूयत इत्यर्थ एव शब्दपरिणाम इति चेत्। न, 'अयं घटः' इत्यत्र हि 'अयं घटपदवाच्यः' इत्येवानुभवः, न तु 'अयं घटपदात्मा' इति। किञ्च, शब्दा-ऽर्थयोरेकान्ताभेदे खड्गादिशब्दोच्चारणे वदनविदारणमपि वैयाकरणस्य प्रसज्येत। यत्नेन मुखे निवेश्यमानस्य खड्गभागस्यैव खड्गशब्दस्यावस्थाविशेषाद् न वदनविदारकत्वमिति चेत्। न, अद्वैतेऽवस्थाभेदस्यैवासिद्धेः। स्वयमेव विचित्रस्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावं शब्दब्रह्मेति प्रत्यवस्थं भेदोपपत्तिः, स्वातिरिक्तभेदकाभावाच्च नाद्वैतव्याघात इति चेत्। हन्त ! तर्हि जगद्वैचित्र्यस्यैव 'शब्दब्रह्म' इति नामान्तरकीर्तनमायुष्मतः। आविद्यकः[1] सकलो भेदानुपाती प्रपञ्चः, इति तत्त्वतोऽभिन्नमेव शब्दब्रह्मेति चेत्। एवं तर्हि द्विचन्द्रादिवदसन् प्रपञ्च इति तत्प्रकृतित्वं शब्दब्रह्मणो न स्यात्। न हि सतोऽसत्प्रकृतित्वं नाम। एवं च

"अनुविद्धैकरूपत्वाद् वीचीबुद्बुदफेनवत्। वाचः सारमपेक्षन्ते शब्दब्रह्मोदकाद्वयम् ॥ १ ॥"

इत्यभिधानमयुक्तं स्यात्, सारजलस्य स्वावस्थाविशेषबुद्बुदादितिरोभावक्षमत्वेऽपि शब्दब्रह्मणः स्वावस्थानाक्रान्तप्रपञ्चतिरोभावाक्षमत्वात्। अविद्यादशायां शब्दब्रह्मणस्तत्त्वा-ऽन्यत्वाभ्यामनुपाख्यः प्रपञ्चो भासते, तद्विलये तु न, इत्यद्वितीयशब्दब्रह्मावसाय इति चेत्। कस्यायमीदृगवसायः ?। योगिन इति चेत्। स एव तर्हि संशयपथं पृच्छ्यताम्– किमसौ शब्दाद्वयमात्रं जगत् पश्यति, विचित्रस्वरूपं वेति। किञ्च, अविद्या ब्रह्मणो भिन्ना, अभिन्ना वा ?। भिन्ना चेत्। वस्तुभूता, अवस्तुभूता वा ?। न तावदवस्तुभूता, अर्थक्रियाकारित्वात्, ब्रह्मवत्। न च नार्थक्रियाकारित्वमप्यस्याः, तिमिरवद् भ्रमजनकत्वाभिधानात्, अवस्तुमाहात्म्याद् वस्तुनोऽन्यथाभावेऽतिप्रसक्तेः। वस्तुभूता चेत्। तदा ब्रह्म विद्या चेति द्वैतमापन्नम्। अभिन्ना चेत्। ब्रह्मवद् मिथ्याधीनिमित्तं न स्यात्। तस्मादिदानीं शब्दब्रह्मण आत्मज्योतीरूपेणाप्रकाशनं नाविद्याभिभूतत्वात्, किन्तु तथा सत्त्वादेवेति प्रतिपत्तव्यम्। एवं चास्य वैखर्यादिवाग्भेदकल्पनमपि न युज्यते, एक-द्व्यात्मकतत्त्वानुपगमे भेदपरिगणनस्याशक्यत्वात्।

१ अविद्याजन्य इत्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्माद् द्रव्य-भावभेदाद् द्विविधा वाक्। तत्राद्या द्विविधा— द्रव्यात्मिका, पर्यायात्मिका च। तत्र शब्दपुद्गलरूपा द्रव्यात्मिका, श्रोत्रग्राह्यपरिणामापन्ना च सैव पर्यायात्मिका। तामन्ये 'वैखरी' इति परिभाषन्ते। द्वितीयापि द्विविधा— व्यक्तिरूपा, शक्तिरूपा च। आद्या सविकल्पिका धीरन्तर्जल्पाकारप्रतिनियतशब्दोल्लेखजननी। तामन्ये 'मध्यमा' इत्यध्यवस्यन्ति। द्वितीया च सविकल्पबुद्ध्यावारककर्मक्षयोपशमशक्तिरूपा, तामन्ये पश्यन्तीमाचक्षत इति दिक्। तस्मादुत्पाद-व्ययाभावे ध्रौव्यस्याप्यसंभव इति युक्तमुक्तम्; अन्यथा त्रितयाभाव इति। तत्— तस्मात् कारणात्, एकदैकत्र किं नोत्पादादित्रयम्?। यदेव ह्युत्पन्नं तदेव कथञ्चिदुत्पद्यते, उत्पत्स्यते च। यदेव नष्टं तदेव नश्यति, नङ्क्ष्यति च। यदेवावस्थितं तदेवावतिष्ठते, अवस्थास्यते चेति ॥ १३ ॥

इदमेवोपसंहरन्नाह—

एकत्रैवैकदैवैतदित्थं त्रयमपि स्थितम्। न्याय्यं भिन्ननिमित्तत्वात्तदभेदे न युज्यते॥१४॥

एकत्रैव— अधिकृतघटादिवस्तुनि, एकदैव— विवक्षितकाले, एतत् त्रयम्— उत्पाद-व्यय-ध्रौव्यलक्षणम्, इत्थम्— उक्तरीत्या, भिन्ननिमित्तत्वात्— भिन्नापेक्षत्वात्, अभूतभवन-भूताभवन-तदुभयाधारस्वभावत्वभेदादिति वा, न्याय्यं— घटमानम्, तदभेदे— निमित्ताभेदे, न युज्यत एकत्र त्रयम्, भिन्नापेक्षाणामेकापेक्षत्वायोगात्, एकस्य भेदायोगाद् वेति भावः॥१४॥

परे पुनरित्थमनुभवन्तोऽपि प्रतिक्षिपन्तीति तेषामज्ञानमाविष्कुर्वन्नाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इष्यते च परैर्मोहात्तत्क्षणस्थितिधर्मणि। अभावेऽन्यतमस्यापि तत्र तत्त्वं न यद्भवेत्॥१५॥

इष्यते च- अनुभूयते च, परैः- सौगतैः, मोहात्- अज्ञानात्, तत्- उत्पादादित्रयम्, क्षणस्थितिधर्मणि वस्तुन्यभ्युपगम्यमाने। कथम्? इत्याह- अभावेऽन्यतमस्याप्युत्पादादीनां मध्ये, तत्र- वस्तुनि, तत्त्वं- क्षणस्थितिकत्वम्, यद्- यस्मात्, न भवेत्। तत्क्षणे भवनादुत्पन्नम्, अग्रिमक्षणेऽभवनाच्च नष्टम्, तदावस्थितेश्च ध्रुवमेव हि क्षणस्थितिस्वभावमुच्यमानं पर्यवस्येदिति, अग्रिमक्षणेऽन्यस्याभवने तदन्यथाभावाभावे क्षणिकत्वव्याघातादित्युपपादितचरम्। एवं च परैस्त्र्यात्मकं वस्त्वनुभूयमानमपि त्र्यात्मकत्वेन नाभ्युपगम्यते। तत्र च त्र्यात्मकत्वं विना स्वाभ्युपगमान्यथानुपपत्त्यैव त्र्यात्मकत्वं बलादेष्टव्यमिति भावः॥ १५॥

पराभिप्रायमाशङ्क्य परिहरति—

भावमात्रं तदिष्टं चेत्तदित्थं निर्विशेषणम्। क्षणस्थितिस्वभावं तु न ह्युत्पाद-व्ययौ विना १६

भावमात्रं तद् वस्तु क्षणस्थितिकमिष्टम्, न तु क्षणस्थितिकत्वमपि तत्र तदतिरिक्तमस्तीति चेत्। इत्थं तद् वस्तु निर्विशेषणं जातम्। एवं च 'किंरूपं तत्' इति न निश्चयोऽद्यापि देवानांप्रियस्य। क्षणस्थितिस्वभावं तु तदुच्यमानं, हि- निश्चितम्, उत्पाद-व्ययौ विना न युक्तम्, क्षणोर्ध्वमस्थित्यपेक्षयैव क्षणस्थितिस्वभावत्वव्यवस्थितेः॥ १६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाङ्मात्रेण तथाऽभ्युपगमे त्वाह—

तदित्थंभूतमेवेति द्राङ्नभस्तो न जातुचित्। भूत्वाऽभावश्च नाशोऽपि तदेवेति न लौकिकम् १७

तादित्थंभूतमेव– क्षणस्थितिकमेव, स्वभावात्, न त्वितरावध्यपेक्षयेति भावः, इति चेत् । न जातुचित्– कदाचित्, द्राक्– शीघ्रम्, परिणामिकारणं विना, नभस्तः– आकाशात्, उपपद्यते, प्रमाणाभावात् । नभस्त एव वा न व्यवतिष्ठते, भूत्वाऽभावश्च नाशोऽपि, तदेव– भावमात्रमेव, तदेव न भवतीति प्रतीतेः, इति न लौकिकमेतत्, किन्तु प्रामाणिकम् । एवं च भावाभावरूपत्वाद् वस्तुनो भिन्नकाले स्वकाले चोत्पादादित्रयात्मकत्वमेव । इत्थं च 'ये यद्भावं प्रत्यनपेक्षास्ते तद्भावनियताः, यथाऽन्त्या कारणसामग्री स्वकार्योत्पादने, विनाशं प्रत्यनपेक्षाश्च भावा इति विनाशनियतास्ते' इति परेषामभिधानमपि न प्रकृतबाधकम्, प्रत्युतानुकूलमेव, भावस्योत्तरपरिणामं प्रत्यनपेक्षतया तद्भावनियतत्वोपपत्तेः, पूर्वक्षणस्य स्वयमेवोत्तरीभवतोऽपरापेक्षाभावतः क्षेपायोगात्, उत्पन्नस्य चोत्पत्ति-स्थिति-विनाशेषु कारणान्तरानपेक्षस्य पुनः पुनरुत्पत्ति-स्थिति-विनाशत्रयमवश्यंभावि, अंशेनोत्पन्नस्यांशान्तरेण पुनः पुनरुत्पत्तिसंभवात् । इति सिद्धमेकदैकत्र त्रयम् ।

ये त्वाहुः– 'घटोत्पादकाले घटनाशाभ्युपगमे 'घटो नष्टः' इति प्रयोगः स्यात्, अन्यनाशे च घटस्योत्पन्नत्वैकान्त एव' इति । तेऽप्यतात्पर्यज्ञाः, स्यादुपस्यन्दनेन द्रव्यार्थतया घटपदस्य तथाप्रयोगस्येष्टत्वात्, अंशे तत्प्रतियोगित्वस्य, अंशे तदाधारत्वस्य च संभवात्; विरोधस्यापि तृतीयार्थावरुद्धस्यात्पदप्रतिरुद्धत्वात् । न खलु निःक्षेपतत्त्ववेदिनां क्वचन कापि प्रयोग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहाराद्यव्यवस्था। तदिदमुवाच वाचकमुख्यः– "नाम-स्थापना-द्रव्य-भावतस्तन्न्यासः"[1] इति। 'घटः' इत्यभिधानमपि घट एव, "अर्था-ऽभिधान-प्रत्ययास्तुल्यनामधेयाः" इति वचनात्, वाच्य-वाचकयोर्भेदे प्रतिनियतशक्त्यनुपपत्तेश्च। इति नामनिःक्षेपः। घटाकारोऽपि घट एव, तुल्यपरिणामत्वात्; अन्यथा तत्त्वायोगात्, मुख्यार्थमात्राभावादेव तत्प्रतिकृतित्वोपपत्तेः। इति स्थापनानिःक्षेपः। मृत्पिण्डादिर्द्रव्यघटोऽपि घट एव, अन्यथा परिणामपरिणामिभावानुपपत्तेः। इति द्रव्यनिःक्षेपः। घटोपयोगः, घटनक्रियैव वा घटः, तस्यैव स्वार्थक्रियाकारित्वात्। इति भावनिःक्षेपः। एतद्विषयविस्तरस्तु विशेषावश्यकादौ।

अत्रेदं विचार्यते– ननु नामादीनां सर्ववस्तुव्यापित्वमुपगम्यते नवा ?। आद्ये व्यभिचारः, अनभिलाप्यभावेषु नामनिःक्षेपाप्रवृत्तेः, द्रव्यजीव-द्रव्यद्रव्याद्यसिद्ध्याऽभिलाप्यभावव्यापितायाा अपि वक्तुमशक्यत्वाच्च। अन्त्ये "जत्थ वि य ण याणिज्जा चउक्कयं निक्खिवे तत्थ"[2] इति सूत्रविरोधः, अत्र यत्तत्पदयोर्व्याप्त्यभिप्रायेणोक्तेरिति चेत्।

अत्र वदन्ति–– तत्तद्व्यभिचारस्थानान्यत्वविशेषणाद् न दोषः, संभवद्व्याप्त्यभिप्रायेणैव 'यत्र तत्र' इत्युक्तेः। तदिदमुक्तं तत्त्वार्थटीकाकृता– "यद्यत्रैकस्मिन् न संभवति नैतावता भवत्यव्यापिता" इति। अपरे त्वाहुः– 'केवलिप्रज्ञारूपमेव नामानभिलाप्यभावेष्वस्ति, द्रव्यजीवश्च मनुष्यादिरेव, भाविदेवादिजीवपर्यायहेतुत्वात्। द्रव्यद्रव्यमपि मृदादिरेव, आदिष्टद्रव्यत्वानां घटादिपर्यायाणां हेतुत्वात्' इति। एतच्च मतं नातिरमणीयम्, द्रव्यार्थिकेन शब्दपुद्गलरूपस्यैव नाम्नोऽभ्युपगमात्, मनुष्यादीनां द्रव्यजीवत्वे च सिद्धस्यैव भावजीवत्वप्रसङ्गात्, आदिष्टद्रव्यहेतुद्रव्यद्रव्योपगमे भावद्रव्योच्छेदप्रसङ्गाच्चेति। ॥२३९॥

१ तत्त्वार्थसूत्रे १।५। २ यत्रापि च न जानीयात् चतुष्कं निक्षिपेत् तत्र।

'गुण-पर्यायवियुक्तः प्रज्ञास्थापितो द्रव्यजीवः' इत्यन्येषां मतम्। तदपि न सूक्ष्मम्, सतां गुण-पर्यायाणां बुद्ध्याऽपनयस्य कर्तुमशक्यत्वात्। न हि यादृच्छिकज्ञानायत्ताऽर्थपरिणतिरस्ति। 'जीवशब्दार्थज्ञस्तत्रानुपयुक्तः, जीवशब्दार्थज्ञस्य शरीरं वा जीवरहितं द्रव्यजीव इति नाव्यापिता नामादीनाम्' इत्यपि वदन्ति।

अत्र च पर्यायार्थिकस्य भावनिःक्षेप एवाभिमतः, द्रव्यार्थिकस्य तु चत्वारोऽपीति। यदाह भगवान् जिनभद्रगणिक्षमाश्रमणः– "भावं चिय सद्दणया सेसा इच्छंति सव्वणिक्खेवे" इति। अत एव चरणगुणस्थितस्य साधोः सर्वनयविशुद्धत्वे सर्वनयानां भावग्राहित्वं हेतुतयोद्भावितम्। अत एव नैगम-संग्रह-व्यवहार-ऋजुसूत्राणामपि चत्वारो निःक्षेपाः, तेषां द्रव्यार्थिकभेदत्वात्। शब्द-समभिरूढै-वंभूतानां तु भावनिःक्षेप एव, पर्यायार्थिकभेदत्वादेषाम्।

'संग्रहः स्थापनां नेच्छति' इत्येके, संग्रहप्रवणेनानेन नामनिक्षेप एव स्थापनाया उपसंग्रहात्। न च "णामं आवकहियं होज्जा; ठवणा इत्तरिया वा होज्जा, आवकहिआ वा होज्जा" इति सूत्र एव तयोर्विशेषाभिधानात् कथमैकरूप्यम्? इत्याशङ्कनीयम्, पाचक-याचकादिनाम्नामप्ययावत्कथिकत्वात् तदव्यापकत्वात्, स्थूलभेदमात्रकथनात्। पद-प्रतिकृतिभ्यां नाम-स्थापनयोर्भेद इति चेत्। कथं तर्हि गोपालदारके नामेन्द्रत्वम्?। अथ नामेन्द्रत्वं द्विविधम्– इन्द्र इति पदत्वमेकम्, अपरं चेन्द्रपदसंकेतविषयत्वम्। आद्यं नाम्नि, द्वितीयं च पदार्थे, इति न दोष इति चेत्। तर्हि व्यक्त्याकृतिजातीनां पदार्थत्वेनेन्द्रस्थापनाया अपीन्द्रपदसंकेतविषयत्वात् कथं न गोपालदारकवद् नामेन्द्रत्वम्?। नाम भावनिःक्षेपसांकर्यपरिहारायेन्द्रपदसंकेतविशेषविषयत्व-

---

१ भावमेव शब्दनयाः शेषा इच्छन्ति सर्वनिक्षेपान्। २ नाम यावत्कथिकं भवेत्; स्थापनेत्वरी वा भवेत्, यावत्कथिका वा भवेत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेव नामेन्द्रत्वं निरुच्यत इति चेत् । हन्त ' तर्हि सोऽयं विशेषो नाम-स्थापनासाधारण एव संगृह्यतामित्येतन्निष्कर्षः ।

अत्र वदन्ति– अनुपपन्नमेतद् मतम्, उपचाररूपसंकेतविशेषग्रहे द्रव्यनिःक्षेपस्याप्यनतिरेकप्रसङ्गात्, यादृच्छिकविशेषोपग्रहस्य चाप्रामाणिकत्वात्, पित्रादिकृतसंकेतविषयस्यैव ग्रहणाद् नाम-स्थापनयोरैक्यायोगात् । एवं च बहुषु नामादिषु प्रातिस्विकैकरूपाभिसंधिरेव संग्रहव्यापार इति प्रतिपत्तव्यम् । यदृच्छयैव संग्रहव्यापारोपगमे तु नाम्नोऽपि भावकारणतया कुतो न द्रव्यान्तर्भाव इति वाच्यम् ? । द्रव्यं परिणामितया भावसंबद्धम्, नाम तु वाच्यवाचकभावेनेत्यस्ति विशेष इति चेत् । तर्हि स्थापनाया अपि तुल्यपरिणामतया भावसंबद्धत्वात् किं न नाम्नो विशेषः, उपधेयसांकर्येऽप्युपाध्यसांकर्यात्, विभाजकान्तरोपस्थितौ निःक्षेपान्तरस्येष्टत्वात् "[1]जत्थ य जं जाणिज्जा णिक्खेवं णिक्खिवे णिरवसेसं" इति सूत्रप्रामाण्यादिति पर्यालोचनीयम् ।

स्यादेतत् षण्णां प्रदेशस्वीकर्तुर्नैगमात् पञ्चानां स्वीकारत इवात्रापि चतुर्निःक्षेपस्वीकर्तुस्ततस्तत्त्रयस्वीकारेणैव संग्रहस्य विशेषो युक्त इति । मैवम्, देशप्रदेशवत् स्थापनाया उपचरितविभागाभावेन संग्रहविशेषात्; अन्यथा यथाक्रमविशुद्ध्या एवंभूतस्य निःक्षेपशून्यत्वप्रसङ्गादिति न किञ्चिदेतत् । एतेन 'व्यवहारोऽपि स्थापनां नेच्छति' इति केषांचिद् मतं निरस्तम् । न हीन्द्रप्रतिमायां नेन्द्रव्यवहारो भवति, न वा भवन्नपि भ्रान्त एव, न वा नामादिप्रतिपक्षव्यवहारसांकर्यमस्ति, इत्यर्धजरतीयमेतद् यदुत– लोकव्यवहारानुरोधित्वम्, स्थापनानभ्युपगन्तृत्वं चेति ।

---

१ यत्र च यजानीयाद् निक्षेपं निक्षिपेद् निरवशेषम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ऋजुसूत्रो द्रव्यमपि नाभ्युपैति, अत एवाद्यास्त्रयो नया द्रव्यार्थिकभेदाः, अग्रिमाश्च चत्वारः पर्यायार्थिकभेदाः' इति वादी सिद्धसेनः । अस्मिन्नभ्युपगमे "[1]उज्जुसुअस्स एगे अणुवउत्ते एगं दव्वावस्सयं पुहत्तं णेच्छइ" इति सूत्रविरोधः स्यादिति सिद्धान्तवृद्धाः । 'अतीतानागतपरकीयभेदपृथक्त्वपरित्यागात्, ऋजुसूत्रेण स्वकार्यसाधकत्वेन स्वकीयवर्तमानवस्तुन एवोपगमाद् नास्य तुल्यांशध्रुवांशलक्षणद्रव्याभ्युपगमः । अत एव नास्यासद्घटितभूत-भाविपर्यायकारणत्वरूपद्रव्यत्वाभ्युपगमोऽपि, उक्तसूत्रं त्वनुपयोगांशमादाय वर्तमानावश्यकपर्याये द्रव्यपदोपचारात् समाधेयम्, पर्यायार्थिकेन मुख्यद्रव्यपदार्थस्यैव प्रतिक्षेपात् । अध्रुवधर्माधारांशद्रव्यमपि नास्य विषयः, शब्दनयेष्वतिप्रसङ्गात्' इति केचन सिद्धसेनमतानुसारिणः । नैतत् कमनीयम्, नामादिवदनुपचरितद्रव्यनिःक्षेपदर्शनपरत्वादुक्तसूत्रस्य, न चेदेवम्, शब्दादिष्वपि कथञ्चिदुपचारेण द्रव्यनिःक्षेपप्रसङ्गात्, पृथक्त्वनिषेधेऽपृथक्त्वेन द्रव्यविधेरावश्यकत्वात्, एकविशेषनिषेधस्य तदितरविशेषविधिपर्यवसायित्वात्' इत्यादिस्तु जिनभद्रमुखारविन्दनिर्गलद्वचनमकरन्दसंदर्भोपजीविनां ध्वनिः ।

स्यादेतद् द्रव्यार्थिकेन नामादिचतुष्टयाभ्युपगमे द्रव्यार्थिकत्वव्याहतिः । द्रव्यं प्रधानतया, पर्यायं च गौणतयाऽभ्युपगच्छन् द्रव्यार्थिकोऽपि भावनिःक्षेपसह इति चेत् । हन्त ! तर्हि त्वदुक्तरीत्या शब्दनया अपि द्रव्यनिःक्षेपसहा इति [2]कथमुक्तव्यवस्था ? । एतेन 'द्रव्यार्थिक-पर्यायार्थिकयोर्द्वयोस्तुल्यवदेवोभयाभ्युपगमः, परमाद्यस्य सर्वथाऽभेदेन, अन्त्यस्य तु सर्वथा भेदेन, इति द्रव्यार्थिकस्यापि पर्यायसहत्वम्' इत्यपास्तम्, एवं सति पर्यायार्थिकस्य शब्दादेरपि द्रव्यसहत्वापत्तेः, अत्यन्तभेदा-

---

१ ऋजुसूत्रस्यैकोऽनुपयुक्त एकं द्रव्यावश्यकं पृथक्त्वं नेच्छति । २ ख.ग.घ.च. 'कथं युक्त' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽभेदग्राहिणोर्द्वयोः समुदितयोरपि मिथ्यादृष्टित्वात्, अभेदे पर्यायद्रया(द्रव्या)सहोक्तिप्रसङ्गात्, भेदे पर्यायार्थिकेनापि द्रव्यग्रहे द्रव्यार्थिकस्यान्तर्गडुत्वप्रसक्त्यैतन्नयस्य भाष्यकृतैव निरस्तत्वाच्चेति ।

मैवम्, अविशुद्धानां नैगमादिभेदानां नामाद्यभ्युपगमप्रवणत्वेऽपि विशुद्धनैगमभेदस्य द्रव्यविशेषणतया पर्यायाभ्युपगमाद् न तत्र भावनिःक्षेपानुपपत्तिः, अत एवागमः– “[1]जीवो गुणपडिवन्नो णयस्स दव्वट्ठिअस्स सामइअं” इति । अत्र हि समतापरिणामविशिष्ट जीवे सामायिकत्वं विधीयत इति । न चैवं पर्यायार्थिकत्वापत्तिः, इतराविशेषणत्वरूपप्राधान्येन पर्यायानभ्युपगमात् । शब्दादीनां पर्यायार्थनयानां तु नैगमवदविशुद्ध्यभावाद् न नामाद्यभ्युपगन्तृत्वम् । वास्तवं तद्विषयत्वं तु नोक्तविभागव्याघाताय, स्वातन्त्र्येण पर्यायविषयत्वं त्वव्याहतमिति पर्यालोचयामः ।

ननु तथापि “[2]णामाइतियं दव्वट्ठियस्स भावो अ पज्जवणयस्स[3]” इति मङ्गलाधिकारेऽभिधाय, उपोद्घाते “[4]भावं चिय सद्दणया सेसा इच्छंति सव्वणिक्खेवे” इति वदतां भाष्यकृतां कोऽभिप्रायः ? इति चेत् । अयमभिप्रायः– पूर्वं शुद्धचरणोपयोगरूपभावमङ्गलाधिकारसंबन्धाद् नैगमादिना जलाहरणादिरूपभावघटाभ्युपगमेऽपि घटोपयोगरूपभावघटानभ्युपगमात् तथोक्तिः, पृथग्निःक्षेपाच्च न प्रत्ययस्याभिधानतुल्यता । अग्रे तु व्यवस्थाधिकाराद् विशेषोक्तिः, इति 'द्रव्यार्थिकस्य नामादित्रयम्' इत्यत्र नावधारणम्, 'पर्यवनयस्य भावः' इत्यत्र चावधारणम्, इत्यनेन स्वातन्त्र्येण नामादित्रयविषयत्वमेव द्रव्यार्थिक-

१ जीवः गुणप्रतिपन्नो नयस्य द्रव्यार्थिकस्य सामायिकम् । २ नामादित्रिकं द्रव्यास्तिकस्य भावश्च पर्यायास्तिकस्य ।
३ विशेषावश्यकभाष्ये गाथा ७५ । ४ भावमेव शब्दनयाः शेषा इच्छन्ति सर्वनिक्षेपान् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्येत्यभिप्रेत्य नयान्तरेण वा पूर्वं तथोक्तिः । अत एवोक्तं तत्त्वार्थवृत्तौ– अत्र चाद्या नामादयस्त्रयो विकल्पा द्रव्यार्थिकस्य, तथा तथा सर्वार्थत्वात्; पाश्चात्यः पर्यायनयस्य, तथापरिणति-विज्ञानाभ्याम्" इति । अत एव च

"नामं[1] ठवणा दविए[2] त्ति एस दव्वट्ठियस्स णिक्खेवो । भावो[3] अ पज्जवट्ठिअपरूवणा एस परमत्थो ॥ १ ॥"

इति सम्मतिगाथायाम्[4] । अथवा, 'वस्तुनिबन्धनाध्यवसायनिमित्तव्यवहारमूलकारणतामनयोः प्रतिपाद्याधुनाऽध्यारोपिता-ऽनध्यारोपितनाम-स्थापना-द्रव्य-भावनिबन्धनव्यवहारनिबन्धनतामनयोरेव प्रतिपादयन्नाहाचार्यः' इति द्वितीयावतरणिका । इति दृढतरं सुधीभिर्विभावनीयम् ।

इत्येवं वुद्धनिक्षेपो मौढ्यक्षेपोद्यतः सुधीः । तथा तथा प्रयुञ्जीत यथा संधा न वाधते ॥ २ ॥ इति ॥ १७ ॥

यच्चोत्पादादित्रयात्मकत्वे शोक-प्रमोद-माध्यस्थ्योदयसाधकस्यान्यथासिद्धिर्वासनाविशेषेणेति पूर्वपक्षिणोक्तम्, तद् दूषयितुमाह—

वासनाहेतुकं यच्च शोकादि परिकीर्तितम्। तदयुक्तं यतश्चित्रा सा न जात्वनिबन्धना ॥१८॥

यच्च शोकादि वासनाहेतुकं परिकीर्तितम्, न तु भिन्नवस्तुनिमित्तकम् । तदयुक्तम्, यतश्चित्रा शोकादिजनकत्वेन

---

१ नाम स्थापना द्रव्य इत्येष द्रव्यास्तिकस्य निक्षेपः । भावश्च पर्यवास्तिकप्ररूपणैष परमार्थः ॥ १ ॥

२ मुद्रितसम्मतिमूलपुस्तके 'ए तिएसु द' इति पाठः । ३ मुद्रितमूलसम्मतौ 'वो उ प' इति । ४ 'नयकाण्डे षष्ठ्यां' इति शेषः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नानाप्रकारा, सा– वासना समनन्तरज्ञानक्षणलक्षणा, न जातु– कदाचित्, अनिश्चन्धना– निर्हेतुका ॥ १८ ॥

अत्र हेतुमाह—

सदाभावेतरापत्तिरेकभावाच्च वस्तुनः । तद्भावेऽतिप्रसङ्गादि नियमात्संप्रसज्यते ॥१९॥

सदाभावेतरापत्तिः– अत्र भाव उत्पत्तिः, इतरपदार्थोऽनुत्पत्तिः, निर्हेतुकत्वे तस्या उत्पत्तिशीलत्वे सदोत्पत्त्यापत्तिः, अनुत्पत्तिशीलत्वे च सदानुत्पत्त्यापत्तिरित्यर्थः । चित्रवासनायां दोषान्तरमाह– एकभावाच्च– एकस्वभावाच्च वस्तुनः, तद्भावे– चित्रवासनोत्पादेऽभ्युपगम्यमाने, नियमादतिप्रसङ्गादि । आदिना विपर्यया ऽनेकस्वभावत्वादिग्रहः । तथाहि– एकस्माद् विचित्रवासनाभ्युपगमेऽधिकृतात् कुतश्चित् सकलव्यवहारनियामकवासनोत्पत्तौ तन्मात्रं जगदित्यतिप्रसङ्गः । जातिभेदाद् नियमोपपत्तेर्नायं दोष इति चेत् । न, जातेरवस्तुत्वात् । कल्पितश्च जातिभेदो न कार्यभेदनियामकः, अन्यथा कल्पितात् तदभेदात् कार्याभेदोऽपि स्यात् । अस्तु वा यत्किञ्चिदेतत्, मा भूत् तथापि रूपादे रसादिवासना, नीलादेः पीतादिवासना तु स्यात्, जातिभेदाभावात् । नीलादेः पीतादिवासनानां सजातीयानामप्यजननस्वभावत्वाद् नायं दोष इति चेत् । न, वाङ्मात्रत्वात् । नीलं हि नीलवासनामेव जनयति न तु भिन्नां पीतादिवासनामितिवद् घटोऽपि शोकवासनामेव जनयेद् न तु प्रमोदवासनामिति । एकस्यैव तस्य शोकादिनानावासनाजननस्वभावत्वाद् न दोष इति चेत् । हन्त ! एवं येन स्वभावेन तस्य शोकजनकत्वं तेनैव प्रमोदजनकत्वे, शोकस्थलेऽपि प्रमोद इति विपर्ययः स्यात्; अन्यथा च स्वभावभेदापत्तिः । एतेन 'उपादा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नभूतमातिस्विकमनस्कारभेदात् कार्यभेदः' इत्यपि निरस्तम्, एकस्य घटादेरनेकोपादान-सहकारित्वायोगात् । न च तथादर्शनादेव तथाभ्युपगमः, तस्य तथाभूतचित्रवस्तुनिमित्तत्वात्, अन्यथैकस्वभावत्वाभ्युपगमविरोधात् । व्यवस्थापितश्चायमर्थः

"यतः स्वभावतो जातमेकं नान्यततो भवेत् । कृत्स्नं प्रतीत्य ते भूतिभावत्वात् तत्स्वरूपवत् ॥ १ ॥
अन्यथैवंविधं चेति यदि स्यात्किं विरुध्यते । तत्स्वभावस्य कात्स्न्येंन हेतुत्वं प्रथमं प्रति ? ॥ २ ॥"

इत्यादिना ग्रन्थेन ग्रन्थकृतैवानेकान्तजयपताकादौ । एकानेकस्वभावे च वस्तुनि न किञ्चिद् दूषणमुत्पश्यामः । न हि शोकवासनानिमित्तस्वभावत्वमेव प्रमोदादिवासनानिमित्तस्वभावत्वमिति, व्ययो-त्पादादिशक्तिभेदात्, एकस्मादेव घटनाशादनेकेषां घटार्थिनां युगपच्छोकोत्पादेऽप्यनेकोपादानसंबन्धनिमित्ततास्वभावभेदात् । तदिदमुक्तम्– "न चैकानेकस्वभावेऽप्ययमिति, तथादर्शनोपपत्तेः" इति ॥ १९ ॥

'किञ्च स्याद्वादिनो नैव' इत्यादिनोक्तं दोषं परिहरन्नाह—

न मानं मानमेवेति सर्वथाऽनिश्चयश्च यः । उक्तो न युज्यते सोऽपि यदेकान्तनिबन्धनः ॥२०॥

'न मानं मानमेव' इत्यभिसंधाय सर्वथाऽनिश्चयश्च यः पूर्वपक्षवादिनोक्तः, सोऽपि न युज्यते, यत्– यस्मात्, एकान्तनिबन्धनः, सः– अनिश्चयः । तथाहि– न तावदस्माकं माने कथञ्चिदमानत्वसमावेशादप्रामाण्यसंशयादर्थानिश्चयः,

---

१ अस्मिन् स्तबके कारिका ७ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानत्वा-ऽमानत्वयोः कथञ्चिदविरोधात्, अवधृतविरोधयोर्धर्मयोरेकत्र धर्मिणि प्रतिभासस्यैव संशयत्वात्, "स्वपर्युदास-परिकुण्ठितं चित्तम्" इति भाष्यप्रतीकेनैतदर्थलाभात्। धर्मयोर्विरोधावरणं च कचित् प्राक्, कचित् पश्चात्, कचिच्च सहैव। अत एव प्रागुपस्थितविरोधयोः स्थाणुत्व-पुरुषत्वयोर्विरोधानुल्लेखेनापि स्थाणौ प्रतिभासः; तथा, अत एव च श्यामत्वा-ऽश्यामत्वयोरेकत्र ग्रहेऽपि विरोधस्फूर्तौ तथात्वम्; अत एव च कचित् संसर्गशब्दादिना सहैव विरोधस्फूर्तौ तथात्वम्। इत्थं च नया एवेतरनयविषयविरोधावधारणे संशेरतेऽपि, तदुक्तम्– 'परविचारणे मोहाः' इति, न तु स्याद्वाद इत्यवधेयम्। ये तु– 'एकत्र तत्तदभावोभयप्रकारकज्ञानमेव संशयः, एकत्रेत्यस्यैकविशेष्यताकत्वार्थत्वाद् न समुच्चयेऽतिव्याप्तिः, तत्र तत्तदभावप्रकारतानिरूपितविशेष्यताभेदात्' इति नैयायिकादयो वदन्ति; तेषां 'स्थाणुर्वा पुरुषो वा' इति संशयानुपपत्तिः। न च तत्र चतुष्कोटिक एव संशयः, द्विकोटिकस्यैवानुभवात्। 'समुच्चये प्रकारताभेदाद् विशेष्यताभेदो न तु संशये' इत्यत्र च शपथमात्रस्य शरणत्वादिति। येऽपि 'तत्-तदभाव-तत्तद्व्याप्यादिविषयता अन्यतमत्वेनानुगतीकृत्य तदघटितं संशयत्वमाचक्षते; तेषामप्यन्यापोहपर्यवसानम्।

इत्थं च विरोधः किमिह तद्वदवृत्तित्वम्, तद्वत्ताग्रहप्रतिबन्धकग्रहविषयत्वं वा?। तज्ज्ञानमपि प्रकारतया, संसर्गविधया वा?। नाद्यः, तद्वदवृत्तित्वलक्षणविरोधस्य तदभावव्याप्तिपर्यवसायिनः संशयेनास्पर्शात्, तदभावव्याप्यवत्तानिश्चयस्य संशयप्रतिबन्धकत्वात्, तदभावस्य च कार्यसहभावेन हेतुत्वात्। तदभावव्याप्यवत्तानिश्चयत्वं च न तदभावाप्रकारकत्वघटितम्, गौरवात्; अन्यथा 'वह्न्यभावव्याप्यवान् वह्निव्याप्यवान् पर्वतः' इति परामर्शद्वयात् 'पर्वतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वह्निमान्, तदभावव्याप्यवांश्च' इति संशयरूपानुमितेर्दुर्वारत्वात्, विरोधविषयकैकधर्मिकस्थाणुत्व-तदभावप्रकारकज्ञानेऽपि संशयव्यवहाराच्च; अन्यथा तस्य संशयान्यत्वे ततो निश्चयकार्यापत्तेः। अत एव न द्वितीयादिरपि। इति स्वतन्त्रनीत्या मुह्यन्तो ज्ञानविषयतया परस्परग्रहप्रतिबन्धकतावच्छेदकधर्ममेव विरोधपदार्थमाचक्षाणाः प्रतिक्षिप्ताः, क्वचिद् रूप-रसयोरपि तथात्वेनैकत्र तदुभयग्रहस्यापि संशयत्वापत्तेः, संशये तदभावव्याप्तिपर्यवसायिविरोधभानेऽपि तदभावव्याप्यवत्तानिश्चयत्वाभावात्, तदंशेऽवधारणात्मकविषयताया एव तदंशे निश्चयत्वात्; अन्यथाऽनध्यवसायेऽतिव्याप्तेः। न चानुत्कटैककोटिकः संशय एवानध्यवसायः, अनुत्कटत्वानिरुक्तेः, (अ)स्पष्टतावदवधारणाख्यानध्यवसायविलक्षणविषयतानुभवाच्चेति। अन्यत्र विस्तरः। एवकारप्रयोगानुपपत्तिरूपोऽनिश्चयोऽपि नास्माकम्, स्यात्कारगर्भत्वेन तदुपपत्तेः, चित्रे घटेऽंशापेक्षया 'कथञ्चिद् नील एव' इतिवत्; श्यामे घटे कालापेक्षया कथञ्चिद् 'न श्याम एव' इतिवत्, एतत्कालवृत्तौ स्वभावापेक्षया कथञ्चित् 'स एवायम्' इतिवदित्याद्यूह्यम् ॥ २० ॥

परस्य तु दुर्घटोऽयमित्युक्तमेव प्रकटयति—

मानं चेन्मानमेवेति प्रत्यक्षं लैङ्गिकं ननु। तत्तच्चेन्मानमेवेति स्यात् तद्भावादृते कथम् ॥२१॥

मानं चेदधिकृतं मानमेव– सर्वथा प्रमाणमेव, इति हेतोः, सर्वथा प्रमाणत्वात्, 'ननु' इत्याक्षेपे, प्रत्यक्षं लैङ्गिकं स्यात्, तस्य सर्वथा मानत्वात्, मानसामान्यव्यापकस्वभावत्व एव तथात्वोपपत्तेः। पराशयमाशङ्क्याह– तत्– अधिकृतं मानं, तत्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यक्षं नानुमानम्, प्रत्यक्षस्वभावत्वाचेत् । एवं तद्भावादृते– अनुमानमानत्वमन्तरेण, कथं मानमेवेति स्यात्, प्रत्यक्षस्य स्वमानत्वेनैव मानत्वात्, अनुमानमानत्वेन चामानत्वात् ? इति ।

अत्र नैयायिकादयः–'नन्वनुमानान्यत्वेऽपि प्रत्यक्षस्य, 'प्रत्यक्षं मानमेव' इति प्रयोगो न दुर्घटः । न हि 'मानमेव' इत्यत्र कार्त्स्न्यमेवकारार्थः, कस्याप्येकस्य कृत्स्नमानरूपत्वाभावात्; किन्त्वयोगव्यवच्छेदः, तत्र च व्युत्पत्तिवशाद् मानत्वावच्छिन्नप्रतियोगिताकायोगोपस्थितेर्न दोषः, प्रत्यक्षेऽनुमानत्वावच्छिन्नायोगसत्त्वेऽपि मानत्वावच्छिन्नायोगाभावादिति । अत्रेयमेवकारमर्यादा–– विशेष्यसंगतैवकारस्यान्ययोगव्यवच्छेदोऽर्थः, यथा 'पार्थ एव धनुर्धरः' इत्यादौ । विशेषणसंगतैवकारस्यायोगव्यवच्छेदोऽर्थः, यथा 'शङ्खः पाण्डुर एव' इत्यादौ । क्रियासंगतैवकारस्याऽत्यन्तायोगव्यवच्छेदोऽर्थः, यथा 'सरोजं नीलं भवत्येव' इत्यादौ । अत्र तत्तद्विशेष्यसंगतैवकारादेस्तत्तदन्ययोगव्यवच्छेदादौ शक्तिः ।'

नव्यास्तु– 'अत्यन्तायोगव्यवच्छेदो नैवकारार्थः । अत्यन्तायोगो हि न सर्वस्य तज्जातीयस्यायोगवत्त्वम्, तद्व्यवच्छेदस्य सिद्ध्यसिद्धिपराहतत्वात् । नापि तज्जातीये सर्वत्रायोगव्यवच्छेदः, 'सरोजं नीलं भवत्येव' इत्यादौ बाधात् । किन्त्वयोगे तज्जातीयावच्छिन्नत्वस्य व्यवच्छेदः । स च तज्जातीयस्य कस्यचिदयोगव्यवच्छिन्नत्वे पर्यवसित इत्ययोगव्यवच्छेद एव तज्जातीयैकदेशान्वयित्वेनात्यन्तायोगव्यवच्छेदो गीयते । अयोगव्यवच्छेदस्तु 'ज्ञानमर्थं गृह्णात्येव' इत्यादौ । स चान्वयितावच्छेदकावच्छेदेन प्रत्याय्यते, 'ज्ञानं रजतं गृह्णात्येव' 'नरो वेदानधीत एव' इत्याद्यप्रयोगात् । नियामकस्तु क्रियाविशेषयोगादिरेव । एवं चैवकारस्य द्वयमेवार्थः– अयोगव्यवच्छेदः, अन्ययोगव्यवच्छेदश्चेति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ययोगव्यवच्छेद एव वार्थः, सर्वत्र शक्तिद्वयकल्पने गौरवात् 'शङ्खः पाण्डुर एव' इत्यादौ पाण्डुरत्वाद्यनुपस्थित्या पाण्डुरत्वाद्ययोगव्यवच्छेदस्य प्रत्याययितुमशक्यत्वात् ,पाण्डुरान्ययोगव्यवच्छेदस्यैव तत्रान्वयात् ; 'नीलं सरोजं भवत्येव' इत्यादावपि नीलाद्यन्ययोगस्य व्यवच्छेद्यत्वात् , अयोगव्यवच्छेदस्येवान्ययोगव्यवच्छेद्यस्यापि क्वचिदन्वयितावच्छेदकसामानाधिकरण्यमात्रेणान्वये क्रियाविशेषयोगादेर्नियामकत्वात् ; 'ज्ञानमर्थं गृह्णात्येव' इत्यादौ च तिङो धर्मिपरतयाऽर्थग्राहकाद्यन्ययोगव्यवच्छेदान्वयसंभवात् । अन्ययोगश्च प्रातिस्विकरूपेण तात्पर्यसमभिव्याहारविशेषवशाद् भासते। तेन गन्धादेः संयुक्तसमवायादिनाऽन्यवृत्तित्वेऽपि 'पृथिव्यामेव गन्धः' इत्यादेर्नानुपपत्तिः, अन्यसमवेतत्वादेर्व्यवच्छेदान्वयात् । अत्र च गन्धादौ तद्वृत्तित्वं तदन्यवृत्तित्वव्यवच्छेदश्चेति द्वयं प्रतीयते, इति 'पृथिव्यामेवाकाशम्' इत्यादेर्न प्रसङ्गः । 'चैत्रस्यैवेदं धनम्' इत्यादौ चैत्रान्यस्वत्वादेर्धने व्यवच्छेदः, न तु चैत्रादिस्वत्वाद्ययोगस्य, उभयस्वामिकादावपि 'चैत्रस्यैव' इत्यादेः प्रसङ्गात् । एवं 'शीतस्यैव स्पर्शस्य जलवृत्तित्वम्' इत्यत्र जलवृत्तित्वे शीतान्यस्पर्शसंबन्धस्य, 'चैत्रो जलमेव भुङ्क्ते' इत्यत्र चैत्रे जलान्यभक्षणकर्तृत्वस्य, 'चैत्रेणैवायं दृश्यते' इत्यत्रास्मिंश्चैत्रान्यवृत्तिदर्शनविषयत्वस्य, न तु दर्शने चैत्रान्यवृत्तित्वस्य, चैत्रदर्शनस्य तदन्यावृत्तित्वेनोभयदृश्यमानेऽपि तादृशप्रयोगप्रसङ्गात् । एवं च साधारण्यादन्यसंबद्धमेव व्यवच्छेद्यम् , अन्यसमवेतत्वादेरप्यन्यसंबद्धत्वात् , साक्षात् पारम्पर्येण विशेषात् । 'शङ्खः पाण्डुर एव' इत्यादौ पाण्डुरान्यतादात्म्यस्य व्यवच्छेदः, पाण्डुरान्यत्वस्यैव वा । इत्थं चान्यत्वे व्यवच्छेदे च शक्तिः, अन्यसंबद्धे लक्षणाव्यवच्छेद एव वा शक्तिः समभिव्याहारादिबलोपस्थिते च पार्थान्यत्वादौ लक्षणा, लक्ष्य-शक्ययोश्चैवकारार्थयोरेवकारानियन्त्रितव्युत्पत्तिविशेषात् परस्परमन्वयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'गुणवदेव द्रव्यम्' इत्यादौ द्रव्यादावेव गुणवदाद्यन्यत्वस्य व्यवच्छेदः, न तु द्रव्यत्वादौ गुणवदाद्यन्यवृत्तित्वस्य, 'चैत्र एव पचति' इत्यादौ लक्षणयोपस्थिते तादृशकर्त्रादौ चैत्रान्यत्वादिव्यवच्छेदः। 'आत्मनैव ज्ञायते' इत्यादौ ज्ञानादावात्मान्यसमवेतत्वस्य व्यवच्छेदः। 'शीत एव स्पर्शो जलवृत्तिः' इत्यत्र जलवृत्तौ शीतान्यस्पर्शतादात्म्यस्य, जलवृत्तिस्पर्शे वा शीतान्यत्वस्य। 'जातिमत्येव सत्ता, इत्यादौ 'समवैति' इत्यध्याहारेण समवाये जातिमदन्यवृत्तित्वविशेषस्य व्यवच्छेदः। 'इह भवने मैत्रेणैव पक्ष्यते तेमनम्' इत्यत्र मैत्रान्यस्मिंस्तादृशकृतिव्यवच्छेदो लक्षणया बोध्यते, तत्रैतद्भवनवृत्तितेमनादौ मैत्रान्यपक्ष्यमाणत्वादेर्व्यवच्छेत्तुमशक्यत्वात्। एवं 'आत्मनैव तेमनं ज्ञायते, इष्यते', पच्यते, भुज्यते' इत्यादावात्मान्यज्ञेयत्वादेरप्रसिद्धत्वेन व्यवच्छेदासंभवादियमेव रीतिरनुसर्तव्या।'

अपरे पुनः- 'एवकारस्यात्यन्ताभावः, अन्योन्याभावश्चार्थः। 'पृथिव्यामेव गन्धः' इत्यत्र पृथिवीपदे पृथिव्यन्यस्मिँल्लक्षणया गन्धे प्रकृत्यर्थान्वितविभक्त्यर्थस्य, लाक्षणिकार्थान्वितविभक्त्यर्थान्वितस्यैवकारार्थव्यवच्छेदस्य वाऽन्वयः। 'पार्थ एव धनुर्धरः' इत्यत्र शक्ये पार्थे विशेषणस्य धनुर्धरस्य तादात्म्येन, लक्ष्ये च पार्थान्यस्मिन् धनुर्धरान्योन्याभावस्याधाराधेयभावेन। 'शीत एव स्पर्शो जलवृत्तिः' इत्यत्र शीतपदोपस्थापितयोः शीत-तदन्ययोरभेदेन स्पर्शेऽन्वयः, शीतान्वितस्पर्शे जलवृत्तितादात्म्यम्, शीतान्यस्पर्शे च जलवृत्तेरन्योन्याभाववत्त्वं प्रतीयत इत्याहुः[1]।'

अन्ये तु- 'अन्यव्यवच्छेदश्चार्थः। व्यवच्छेदोऽपि च द्वयी- अत्यन्ताभावश्च, अन्योन्याभावश्च। एवकारे च प्रायेण

१ ख. 'ते भु'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समभिव्याहृतप्रातिपदिकसमानविभक्तिकत्वम्, विभक्तेरश्रवणं तु लुप्तत्वात्, स्वभाववैचित्र्याच्च। तदर्थेऽन्यस्यान्वयो न व्यवच्छेदस्य, समभिव्याहृतप्रातिपदिकार्थस्य चैवकारोपस्थितेऽन्यस्मिन्नप्यन्वयः । एवमन्वयान्तरानियमोऽपि, स्वीयैकार्थान्वितार्थान्तरबोधकत्वमपि तस्य स्वभाववैचित्र्यादेव। एवं च 'पृथिव्यामेव गन्धः' इत्यत्र पृथिव्यां गन्धः, 'पृथिव्यन्यस्मिन् न गन्धः' इत्यन्वयः। 'चैत्रो जलमेव भुङ्क्ते' इत्यत्र 'चैत्रो जलं भुङ्क्ते, जलान्यद् न भुङ्क्ते' इति। 'पार्थ एव धनुर्धरः' इत्यत्र 'पार्थो धनुर्धरः, पार्थान्यो न धनुर्धरः' इति। 'शङ्खः पाण्डुर एव' इत्यत्र 'शङ्खः पाण्डुरः, न पाण्डुरान्यः' इति' इति वदन्ति।

अत्र ब्रूमः– 'प्रत्यक्षं मानमेव' इत्यत्रास्तु मानत्वायोगव्यवच्छेदः, मानान्ययोगव्यवच्छेदो वा, तथापि प्रत्यक्षेऽनुमानत्वेन न मानत्वम्, 'प्रत्यक्षमनुमानत्वेन न मानम्' इति प्रतीत्या विशेषरूपेण सामान्याभावस्य, विशेषरूपेण सामान्यभेदस्य वा सिद्धौ न सर्वथा तद्व्यवच्छेदः शक्यः। शक्य एव मानत्वत्वपर्याप्तावच्छिन्नप्रतियोगिताकोऽयोगः, मानत्वापर्याप्तावच्छिन्नप्रतियोगिताको वाऽन्ययोगो व्यवच्छेत्तुम्, विशेषरूपेण सामान्याभावस्यातिरेके तस्य विशेषरूपपर्याप्तावच्छिन्नप्रतियोगिताकत्वात्, अनतिरेके च विशिष्टरूपपर्याप्तावच्छिन्नप्रतियोगिताकत्वादिति चेत्। न, तत्र विशिष्टानतिरेकेण शुद्धापर्याप्तस्य विशिष्टापर्याप्तत्वात्, अतिरिक्तपर्याप्तिकल्पने तत्र विशिष्टनिरूपितत्व-तत्संबन्धादिगवेषणायामनवस्थानात्, 'अनुमानत्वेन न मानत्वम्' इत्यत्रामानत्वस्य मानत्वावृत्तितया व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावपर्यवसानात्, अनुमानेऽपि तथाप्रयोगप्रसङ्गात्।

किञ्च, व्यधिकरणधर्मावच्छिन्नाभावस्य प्रामाणिकत्वाद् मानत्वावच्छिन्नप्रतियोगिकताकस्य घटाभावस्य प्रत्यक्षे सत्त्वात् कथं तद्व्यवच्छेदः?। मानत्वावच्छिन्नमाननिष्ठप्रतियोगिताकस्य सामान्यरूपेण विशेषाभावसत्त्वे वा तादृशतत्सामा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यनिष्ठप्रतियोगिताकस्याभावस्य व्यवच्छेद्यत्वाद् न दोष इति चेत्। न, मानत्वेन मान-घटोभयाभावस्य तथात्वात्। मानमात्रनिष्ठप्रतियोगितोपादानाद् न दोष इति चेत्। न, तथापि 'प्रत्यक्ष-घटौ न मानम्' इति प्रतीतेः, प्रत्यक्ष-घटोभयत्वावच्छेदेन तादृशमानत्वावच्छिन्नाभावस्य सत्त्वात् तत्र तद्व्यवच्छेदायोगात्। प्रत्यक्षत्वावच्छिन्नाधिकरणताकस्य च तादृशाभावस्य सिद्ध्यसिद्धिपराहतत्वेन व्यवच्छेत्तुमशक्यत्वात्। अथ वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणताकाभावसत्त्वे तदन्यत्वमभ्युपोदयमिति चेत्। न, 'य एव ह्रदे वह्न्यभावः स एव ह्रद-पर्वतयोः' इत्येकत्वप्रत्ययात्, व्यधिकरणधर्मावच्छिन्नाधिकरणताकाभावस्य सत्त्वाच्च। शुद्धाधिकरणताकत्वविशिष्टविशेषणतया तदन्यत्वस्य व्यवच्छेत्तुं शक्यत्वाद् न दोष इति चेत्। न, 'मानत्वेन घटो मानमेव' इति प्रसङ्गात्। तत्र निरुक्तविशेषणतयापि मानान्यत्वमस्तीति चेत्। तर्यैव तर्हि प्रत्यक्षेऽपि तदिति तदवस्थो दोषः, तदधिकरणवृत्तित्वान्तर्भावे च भावाभावकरम्बितैकवस्त्वापात इति दिक्।

तस्मात् तत्तदपेक्षागर्भतत्तदनेकपर्यायकरम्बितत्वाद् वस्तुनस्तथा तथा प्रयोगे तत्तदपेक्षालाभार्थं स्यात्कारमेव प्रयुञ्जते सर्वत्र प्रामाणिकाः, अन्यथा निराकाङ्क्षमेव सर्वं वाक्यं प्रसज्येत। न च समभिव्याहारविशेषादपेक्षालाभः, इतरसमभिव्याहारबलात् किञ्चिद्वाक्यार्थापेक्षालाभेऽपि तत्तन्नय-निःक्षेपाद्यनुगतपदार्थापेक्षायाः स्यात्कारसमभिव्याहारं विनाऽलाभात्। इत्थं च 'स्यात्प्रत्यक्षं मानमेव' 'स्याद् न मानमेव' इत्याद्येव प्रयुज्यमानं शोभते, अनेकान्तद्योतकेन स्यात्पदेन तत्तदपेक्षोपस्थितेः; अन्यथा मानत्वस्य मानान्यत्वव्यवच्छेदस्य च सकलमानव्यक्त्यपृथग्भूतस्य सापेक्षप्रत्यक्षापृथग्भावप्रतीतौ तदपेक्षाऽविषयत्वरूपाप्रामाण्यापातात्। न चेदेवम्, पाकरक्ते घटे 'अयं श्याम एव' इति कुतो न प्रयोगः? कथं चैतद्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रामाण्यं सकलसिद्धम् ? । न ह्यत्र न श्यामत्वाभावस्य श्यामान्यत्वस्य वा व्यवच्छेदः, श्यामान्यत्वस्याव्याप्यवृत्तित्वेऽपि प्राक् तदभावात्, व्याप्यवृत्तित्वे च सुतराम् । 'श्याम एव' इत्यत्र श्यामान्यरूपवान् व्यवच्छेद्यः, व्यवच्छेदश्चात्रान्योन्याभावः, स चाव्याप्यवृत्तिरिति न दोष इति चेत् । न, 'प्राक् श्याम एव' इत्यस्य साधुत्वापत्तेः । श्यामान्यरूपवत्त्वस्य व्यवच्छेद्यत्वे च साधुत्वापत्तिरेव 'अयं श्याम एव' इत्यस्य । न चात्रैतद्वृत्तिश्यामान्यरूपे एतत्कालवृत्तित्वव्यवच्छेदं लक्षणादिना प्रतियतोऽप्रामाण्यम्, अन्यस्य तु प्रामाण्यमेवेति वाच्यम्, स्वरसत एव तत्राप्रामाण्यव्यवहारात् ।

कथं च चित्रे घटेऽव्याप्यवृत्तिनानारूपसमावेशवादिनाम् 'अयं नील एव' इति न प्रयोगः ? । नीलान्यसमवेतत्वस्यैवात्र व्यवच्छेद्यत्वाद् नायं दोष इति चेत् । न, 'गगनं नीलमेव' इति प्रसङ्गात् । नीलसमवेतत्वमप्यत्र प्रतीयत इति चेत् । न, तथापि 'रूपं नीलमेव' इति प्रसङ्गात् । रूपत्वावच्छेदेन नीलसमवेतत्वाभावाद् न दोष इति चेत् । न, तथापि 'नीलं नीलमेव' इति प्रसङ्गात् । जायत एव 'नीलं नीलमेवेति' इति चेत् । यदि जायते तदा गुणवृत्तिना नीलपदेन, न तु द्रव्यवृत्तिना; आपाद्यते तु द्रव्यवृत्तिना तेनेति । नीलसमवेतद्रव्यत्वमप्यत्र प्रतीयत इति चेत् । न, अन्यत्र 'नील एव' इत्यतोऽनीलत्वव्यवच्छेदमात्रस्यैव प्रत्ययात् । प्रकृतेऽपि नीलावयवमधिकृत्य 'इह नील एव' इत्यप्रत्ययप्रसङ्गाच्च । तस्मात् तत्तत्काल-देशाद्यंशापेक्षयैव विधिः, व्यवच्छेदो वा प्रतीयते, इति सम्यगवहितैः परिभावनीयम् ॥ २१ ॥

यस्तु दुर्विदग्धः 'प्रत्यक्षस्य स्वमानत्वमेवाऽनुमानत्वेनामानत्वमिति न सर्वथा मानत्वक्षतिः' इत्याह, तं शिक्षयितुमाह—

न स्वसत्त्वं परासत्त्वं तदसत्त्वविरोधतः । स्वसत्त्वासत्त्ववन्न्यायान्न च नास्त्येव तत्र तत् ॥२२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इह सर्वभावानामेव न स्वसत्त्वं परासत्त्वम्, किं तर्हि ? कथञ्चिदन्यत् । कुतः ? इत्याह– तदसत्त्वविरोधतः– अभिन्ननिमित्तत्वे सत्त्वस्यैवासत्त्वविरोधात्, भिन्ननिमित्तत्वे तु कथञ्चिद् भिन्नमुभयमेकरूपतामासादयेदपि, यथैकापेक्षयाऽण्वेवापरापेक्षया महदिति । यदवदाम प्रतीत्यसत्याधिकारे भाषारहस्ये—

"[1]भिन्ननिमित्तत्तणओ ण य तेसिं हंदि ! भण्णइ विरोहो । वंजय-घडयाईअं होइ णिमित्तं पि इह चित्तं ॥१॥" इति ।

अन्ये त्वाहुः– दृष्टान्त एवायमसिद्धः, भिन्नापेक्षयोरणुत्व-महत्त्वयोरेवाभावात्, महत्यपि महत्तमादणुव्यवहारस्यापकृष्टमहत्त्वनिबन्धनत्वेन भाक्तत्वात्, नित्यानित्ययोरणुत्वयोः परमाणु-द्व्यणुकयोरेव भावात्, एतत्त्रुटावेव विश्रामाद् नास्त्येवाणुत्वम् । त्रुटौ चापकृष्टं महत्त्वमेवाणुत्वव्यवहारनिबन्धनम् । तच्च नित्यमेव । गगनमहत्त्वावधिकस्त्वपकर्षो न बहुत्वजन्यतावच्छेदकः, त्रुटिमहत्त्वावधिकोत्कर्षेण सांकर्यापत्त्या तस्यानुगतस्याभावात्, त्रुटिमहत्त्वावधिकोत्कर्षस्य तज्जन्यतावच्छेदकत्वात्, गगनमहत्त्वादेरपि जन्यत्वापातात् । व्यञ्जकत्वं च जातिविशेषेण शक्तिविशेषेण वा, इति नेन्धनादिसंसर्गिणां सूक्ष्मवह्न्यादीनां महतां सतामन्धकारे इन्धनादिव्यञ्जकत्वापत्तिः, इति तु मीमांसकानुसारिणः ।

ते भ्रान्ताः, 'अयमितो महान्, इतश्चाणुः' इति बुद्ध्यैकत्र भिन्नापेक्षयोरणुत्व-महत्त्वयोर्विलक्षणयोरेवानुभवात् । 'इतोऽणुः' इति प्रयोगं 'एतदपकृष्टमहत्त्ववान्' इत्युपचारेण विवृत्यैतदपेक्षाणुत्वपर्यायापलापे 'इतो महान्' इत्यपि 'एतदपकृष्टाणुत्ववान्' इति विवृत्य समर्थयतो महत्त्वमेव चापलपतः कः प्रतीकारः ? । महत्त्वमपेक्षां विनैव स्वरसतोऽनुभूयत इति चेत् ।

१ भिन्ननिमित्तत्वतो न च तेषां हन्त ! भण्यते विरोधः । व्यञ्जक-घटकातीतं भवति निमित्तमपीह चित्रम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽयं स्वरसः परस्परमस्वरसग्रस्तः परिमाणमात्रमेव निरपेक्षमनुभूयते, महत्त्वा-ऽणुत्वे तु सापेक्षे एवेति पुनरनेकान्तेऽनुभवसिद्धो विवेकः। अथ महत्त्वापलापे तदाश्रयस्य प्रत्यक्षत्वं दुर्घटम्, महदुद्भूतरूपवद्द्रव्यस्यैव चाक्षुषत्वनियमात्, अणुत्वापलापे तु न किञ्चिद् बाधकमिति चेत्। न, लाघवादुद्भूताणुत्वस्यैव द्रव्यचाक्षुषहेतुत्वात्। उत्कर्षा-ऽपकर्षावपि परस्यापेक्षिकाणुत्व-महत्त्वातिरिक्तौ दुर्वचौ, सांकर्येण जातिरूपयोस्तयोर्वक्तुमशक्यत्वात्।

किञ्च, एवमणुत्ववत् परिमाणमात्रमेव काल्पनिकम्, इति 'महदादिपरिमाणं रूपादिभ्योऽर्थान्तरम्, तत्प्रत्ययविलक्षणबुद्धिग्राह्यत्वात्, सुखादिवत्' इत्यत्र यदि रूपादिविषयेन्द्रियबुद्धिविलक्षणबुद्धिग्राह्यत्वादिति हेत्वर्थः, तदा हेतुरसिद्धः, तथाव्यवस्थितरूपादिव्यतिरेकेण महदादिपरिमाणस्याध्यक्षप्रत्ययग्राह्यत्वेनासंवेदनात्। अथ 'अणु' 'महत्' इत्याकारतत्प्रत्ययविलक्षणकल्पनाबुद्धिग्राह्यत्वादिति हेतुः, तदा विपर्यये बाधकप्रमाणाभावादनैकान्तिकः। न ह्यस्याः किञ्चिदपि परमार्थतो ग्राह्यमस्ति। कल्पना त्वेकदिङ्मुखादिप्रवृत्तेषु विशिष्टरूपादिषूपलब्धेषु तद्विलक्षणरूपादिभेदप्रकाशनायासद्विषयिण्येव प्रवर्तत इति। युक्तं चैतत्, परपरिकल्पिततदभावेऽपि प्रासाद-मालादिषु महदादिप्रत्ययप्रादुर्भूतेरनुभवात्। न चायमौपचारिकः, अस्खलद्वृत्तित्वात्; तदुक्तम्—

"मालादौ च महत्त्वादिरिष्टो यश्चौपचारिकः। मुख्याविशिष्टविज्ञानग्राह्यत्वाद् नौपचारिकः॥ १॥"

इति वदन्तस्ताथागताः कथं प्रतिक्षेप्याः?। एकस्य स्वलक्षणस्य भिन्नपुरुषीयनानाकल्पनाहेतुसमनन्तरसहकारित्वे स्वभावभेदप्रसङ्गाद् वयमेव हि तान् प्रत्याचक्षाणाः शोभेमहि, न तु यूयमेकान्तेनानेककार्यजननैकस्वभावमेकं वाङ्मात्रेणाभ्युपयन्त

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति दिक्। एतेन मीमांसकानुसारिणोऽपि निरस्ताः, घटादिवत् त्रुटीनां दृश्यमानानां द्रव्यपर्यायत्वेन सूक्ष्मतदुपादानावश्यकत्वात्; अन्यथा घटादीनामप्युत्पादाद्यनुभवापलापेन संग्रहनयाश्रयणप्रसङ्गात्। इदमेवाशयतः प्राह– न च तत्– परासत्त्वम्, तत्र– स्वस्मिन्, स्वसत्त्वासत्त्ववद् नास्त्येव, न्यायाद् विचार्यमाणम्। स्वसत्त्वं हि स्वसत्त्वासत्त्वविरोधीति तत्र तद् न स्यात्, परासत्त्वविरोधि तु न तदिति तत् स्यादेव; प्रत्युत यदि तन्न स्यात् तदा तदभावनियतं परसत्त्वमेव स्यादिति भावः ॥२२॥

अत्रैवाक्षेप-परिहारावाह—

परिकल्पितमेतच्चेन्नन्वित्थं तत्त्वतो न तत्। ततः क इह दोषश्चेन्ननु तद्भावसंगतिः॥२३॥

एतत्– परासत्त्वम्, परिकल्पितम्; अतो न स्वसत्त्वव्याघातकमिति चेत्। नन्वित्थं तत्– परासत्त्वम्, तत्त्वतो नास्ति, शशशृङ्गवत्। ततः– परासत्त्वस्य तत्त्वत इह स्वस्मिन्नभावात् को दोषः? इति चेत्। ननु– निश्चये, तद्भावसंगतिः– परसत्त्वस्यापत्तिः।

अत्र नैयायिकादयः– ननु वयं 'शृङ्गे शशीयत्ववत् सत्त्वा-ऽसत्त्वयोः स्व-परापेक्षत्वं कल्पितम्' इत्येव ब्रूमः। न हि सत्त्वे स्वापेक्षत्वं पृथक्त्वादाविव सावधिकत्वरूपम्, निरवधिकत्वात् सत्तायाः। नापि घटाभावे घटापेक्षत्ववत् सप्रतियोगिकत्वरूपम्, निष्प्रतियोगिकत्वात्। भावस्य सत्ताभावस्य च सप्रतियोगिकत्वेऽपि सत्ताप्रतियोगिकत्वमेव न तु परप्रतियोगिकत्वम्, इति न परापेक्षत्वमस्ति। नापि वृक्षे संयोग-तदभावयोर्मूल-शाखाद्यवच्छिन्नत्ववद् घटे सत्त्वा-ऽसत्त्वयोः स्व-परावच्छेद्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वरूपं स्व-परापेक्षत्वम्, जातेरेवाव्याप्यवृत्तित्वाभावात्, किं पुनः सत्तायाः ? इति । ततः कथं 'स्वापेक्षया सत्त्वम्, परापेक्षया चासत्त्वम्' इत्यार्हतानामयं प्रवादः ? इति ।

अत्र ब्रूमः-

रूपं यदध्यक्षमवैति लोको वाचाट ! वाचा किमपह्नुषे तत् ।
वक्तुं न शक्तः किमुतासि मन्दो गुडस्य माधुर्यमिवातिमूकः ? ॥ १ ॥

तथाहि- त्वदभिमता सत्ता तावत् सत्तर्कताडिता दूरमेव पलायिता । न हि स्वरूपसतां भावानामतिरिक्तसत्तया कश्चिदुपकारोऽस्ति, स्वतो मधुराया इव सुधाया मधुरद्रव्यान्तरसंयोगेन । नापि स्वरूपासतां तेषां तया कश्चिदुपकारः, खलानामिव सकलार्थसिद्धिहेतुना विपश्चित्प्रपञ्चितकलालापेन । कथं च तव जात्यादिषु सद्व्यवहारः, तत्र सत्ताया अभावात् ? । एकार्थसमवायेन तत्र स इति चेत् । न, 'सत्' 'सत्' इति प्रतीतेः सर्वत्रैकाकारत्वात् । संबन्धांशे तत्र तस्या वैलक्षण्यमेवेति चेत् । हन्त ! तर्हि प्रकारांशेऽपि तथात्वमेवास्तु । अस्तु वा 'हरिः' 'हरिः' इत्यादौ हरिपदवाच्यत्वमिव सत्पदवाच्यत्वमेव सर्वत्रानुगतम् । सत्पदसंकेतविषयतावच्छेदकतयैव तत्सिद्धिरिति चेत् । न, तान्त्रिकाणां परस्परं तत्संकेतभेदात्, स्वसंकेतमात्रस्य चार्थाव्यवस्थापकत्वात् । 'घटः सन्' इत्यादावनुभवसिद्धैव सत्तेति चेत् । सिद्धैव सा, केवलं तस्या अतिरेकः, साधारण्यं च न सिद्धम् । 'द्रव्यजन्यतावच्छेदकतया तत्सिद्धिः' इति तु निरस्तमधस्तात् । तस्मादुत्पाद-व्यय-ध्रौव्य-

१ ज. 'त्र तत्र त' । २ ख. ग. घ. च. 'हरिरित्या' ।

योगरूपैव सत्ता युक्ता, नाऽन्या ।

न चात्रापि 'यद्युत्पाद-व्यय-ध्रौव्ययोगादसतां सत्त्वम्, तदा शशशृङ्गादेरपि स्यात् । स्वतश्चेत्, स्वरूपसत्त्वमायातम् । तथा, उत्पाद-व्यय-ध्रौव्याणामपि यद्यन्यतः सत्त्वम्, अनवस्थाप्रसक्तिः । स्वतश्चेत्, भावस्यापि स्वत एव तद् भविष्यति, इति व्यर्थमुत्पादादिकल्पनम्' इत्यादिपर्यनुयोगावकाशः, एकान्तपक्षोदितदोषस्य जात्यन्तरात्मके वस्तुन्यप्रसरात् । न हि भिन्नोत्पाद-व्यय-ध्रौव्ययोगाद् भावस्य सत्त्वमस्माभिरभ्युपगम्यते, किन्तूत्पाद-व्यय-ध्रौव्ययोगात्मकमेव सदित्यभ्युपगम्यत इति । तत्र सत्त्वं सकलव्यक्त्यनुगतं व्यञ्जनपर्यायताम्, प्रतिव्यक्त्यनुगतं चार्थपर्यायतामास्कन्दति; इत्थमेव सादृश्यास्तित्व-स्वरूपास्तित्वमित्यपि गीयते । तच्च सत्त्वं सापेक्षमेव सर्वैरनुभूयते, 'मार्तत्वादिना घटः सन्, न तु तन्तुजनितत्वादिना' 'इदानीं घटः सन्, न तु प्राक्' इत्याद्यनुभवात् । बुद्धिविशेषकृतापेक्षयाप्यादेशापराभिधानया सापेक्षमेव तत्, यथा 'अयमेकः, अयं चैकः' इति कल्पनाकृतापेक्षया द्वित्वादीति ।

एवं चेह सप्तभङ्गी प्रवर्तते, तामिदानीं दिङ्मात्रेण दर्शयामः; तथाहि– स्यादस्त्येव, स्यान्नास्त्येव, स्यादवक्तव्यमेव, स्यादस्त्येव स्यान्नास्त्येव, स्यादस्त्येव स्यादवक्तव्यमेव, स्यान्नास्त्येव स्यादवक्तव्यमेव, स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेव, इत्येतदुल्लेखः । अत्र सर्वत्रैवकारप्रयोगोऽनभिमतार्थव्यावृत्त्यर्थम्, इतरथा प्रतिनियतस्वार्थानभिधानेनानभिहिततुल्यतापत्तेः; तदुक्तम्—

"वाक्येऽवधारणं तावदनिष्टार्थनिवृत्तये । कर्तव्यम्, अन्यथानुक्तसमत्वात्तस्य कुत्रचित् ॥ १ ॥" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात्कारप्रयोगश्च सापेक्षप्रतिनियतस्वरूपप्रतिपत्तये। यत्रापि चासौ न प्रयुज्यते, तत्रापि व्यवच्छेदफलैवकारवदर्थात् प्रतीयते, तदुक्तम्—

"सोऽप्रयुक्तोऽपि वा तज्ज्ञैः सर्वत्रार्थात् प्रतीयते। यथैवकारोऽयोगादिव्यवच्छेदप्रयोजनः॥ १॥" इति।

तत्र स्वरूपेण घटादिनाऽस्तित्वविवक्षयाऽसत्त्वोपसर्जनसत्त्वप्रतिपादनपरः प्रथमो भङ्गः। पररूपेण पटादिना नास्तित्वविवक्षया च सत्त्वोपसर्जनासत्त्वप्रतिपादनपरो द्वितीयो भङ्गः। शब्दशक्तिस्वाभाव्यादेकोपसर्जनेतरप्रधानभावेनैव शाब्द्याः प्रतीतेः। यदा तु तद् वस्तु द्वाभ्यामपि धर्माभ्यां युगपदभिधातुमिष्टम्, तदा तृतीयो भङ्गः। न हि द्वयोर्धर्मयोर्युगपत् प्राधान्येन गुणभावेन वा प्रतिपादने किञ्चिद् वस्तु समर्थम्। तथाहि— न तावत् समासस्तथा, बहुव्रीहेरन्यपदार्थप्रधानत्वात्; अव्ययीभावस्य चोभयपदप्रधानत्वेऽप्यत्रार्थेऽप्रतीतेः, द्वन्द्वस्यापि द्रव्यवृत्तेः प्रकृतार्थाप्रतिपादकत्वात्, एकमनूद्य तदप्रवृत्तेः; गुणवृत्तेरपि द्रव्याश्रितगुणप्रतिपादकत्वेन प्रधानभूतयोर्गुणयोरप्रतिपाद्यत्वात्; तत्पुरुषस्याप्युत्तरपदप्रधानत्वात्, द्विगोः संख्यावाचिपूर्वपदत्वात्, कर्मधारयस्य गुणाधारद्रव्यविषयत्वात्, एकशेषस्य चासंभवात्, द्वन्द्वतुल्यत्वाच्च। न च समासान्तरसद्भावोऽस्ति, येन युगपद् गुणद्वयं समासपदवाच्यतामास्कन्देत्। अत एव न विग्रहवाक्यमपि तथा, तस्य द्व्यभिन्नार्थत्वात्। न च केवलं पदं वाक्यं वाऽन्यल्लोकप्रसिद्धं तथा, तस्यापि परस्परापेक्षद्रव्यादिविषयतया तथाभूतार्थप्रतिपादकत्वायोगात्। न च सूर्याचन्द्रमसोः पुष्पदन्तपदवत्, शतृ-शानयोः सत्पदवद् वा सांकेतिकमेकं पदं तथा वक्तुं समर्थम्, तस्यापि क्रमेणार्थद्वयप्रत्यायकत्वात् "सकृदुच्चरितं पदं सकृदर्थं बोधयति" इति न्यायात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकं पदमेकदैकधर्मावच्छिन्नमेवार्थं बोधयति' इत्येतन्न्यायार्थः। तेन नानार्थकशब्दस्थल एकपदादुभयोपस्थितावपि नोभयबोधः, पुष्पदन्तादिपदाद् रवि-चन्द्राबुभयत्वेनोभयबोधस्तु सुघट एव, अन्यथा घटपदाद् घटत्वेनाखिलघटबोधोऽपि न स्यादिति चेत्। 'अस्त्वेतदापाततः, तथापि प्रातिस्विकरूपेणावक्तव्यत्वमेव। एतेन 'सत्' इति पदादेव शक्त्या सत्त्वस्य, लक्षणया चासत्त्वस्योपस्थितिरस्तु, शक्य-लक्ष्ययोर्युगपदन्वयस्तु 'गङ्गायां मत्स्य-घोषौ' इत्यादाविवोपपद्यते, इत्युच्छृङ्खल-वावदूकोक्तावपि न क्षतिः, क्रमिकभङ्गद्वयजन्यप्रतीत्यपेक्षया युगपदवक्तव्यत्वस्याबाधात्, श्रोतुस्तथा जिज्ञासयैव तथोक्तेः, एकत्र जनितापेक्षान्वयस्य स्यात्पदस्येतरत्र व्युपरताकाङ्क्षत्वेनोक्तवदन्वयायोगात्। अत एव न निजार्थान्तरैकताभ्युपगमेऽप्यर्थस्य तथा वाच्यता, तथाभूतस्य तस्यात्यन्तासत्त्वात्, सर्वथा सत्त्वेऽन्यतोऽव्यावृत्तत्वात्, महासामान्यवत्, घटार्थत्वानुपपत्तेः; अर्थान्तरत्वे पररूपादिवत् स्वरूपादपि व्यावृत्तेः, खरविषाणवदसत्त्वादवाच्यतैव' इति वदन्ति।

न च घटशब्दप्रवृत्तिनिमित्ते विधिरूपे सिद्धेऽसंबद्ध एव तत्र पटाद्यर्थप्रतिषेध इति वाच्यम्; पटादेस्तत्राभावाभावे घटशब्दप्रवृत्तिनिमित्तस्य घटत्वस्यैवासिद्धेः। शब्दानां चार्थज्ञापकत्वं न कारकत्वम्, इति तथाभूतार्थप्रकाशनं तथाभूतेनैव शब्देन विधेयम्, इति नासंबद्धस्तत्र पटार्थप्रतिषेधः। अथवा, 'सर्वं सर्वात्मकम्' इति सांख्यमतव्यवच्छेदार्थं तत्प्रतिषेधो विधीयते। न च तदभिमतार्थस्य सिद्ध्यसिद्धिभ्यां व्याहतो निषेध इति वाच्यम्; विकल्पतः सिद्धस्यापि तं प्रति व्यवहार-व्युदासाय निषेधौचित्यात्। विकल्पतः सिद्धिश्च खण्डशोऽखण्डशो वेत्यन्यदेतत्।

यद्वा, नाम-स्थापना-द्रव्य-भावभिन्नेषु घटेषु विधित्सिता-ऽविधित्सितप्रकारेण प्रथम-द्वितीयौ भङ्गौ। तत्प्रकाराभ्यां युगपद- ॥२५०॥

वाच्यः। यद्यविधित्सितरूपेणापि घटः स्यात् तदा प्रतिनियतनामादिभेद[illegible]भावप्रस[illegible] विधित्सितस्यापि नात्मलाभ इति सर्वाभाव एव भवेत्। यदि च विधित्सितप्रकारेणाप्यघटः स्यात् तदा तन्निबन्धनव्यवहा[illegible]दप्रसक्तिरेव। एकान्ताभ्युपगमे च तथाभूतार्थस्याप्रामाणिकत्वादवाच्यः। अथवा, स्वीकृतप्रतिनियतप्रकारे तत्रैव नामादिके यः संस्थानादिस्तत्स्वरूपेण घटः, इतरेण चाघटः, इति प्रथम-द्वितीयौ। ताभ्यां युगपदभिधातुमशक्तेरवाच्यः। विवक्षितसंस्थानादिनेव यदीतरेणापि घट स्यात् ,एकस्य सर्वघटात्मकत्वप्रसक्तिः, अ(प्र?)थ विवक्षितेनाप्यघटः,पटादाविव घटार्थिनस्तत्राप्यप्रवृत्तिप्रसक्तिः। एकान्तपक्षेऽप्ययमेव दोष इत्यसत्त्वादवाच्यः।

अथवा, स्वीकृतप्रतिनियतसंस्थानादौ मध्यावस्था स्वं रूपम् , कुशूल-कपालादिलक्षणे पूर्वोत्तरावस्थे पररूपम्, ताभ्यां सदसत्त्वात् प्रथम-द्वितीयौ। युगपत्ताभ्यामभिधातुमसामर्थ्यात् तृतीयः। मध्यावस्थावदितरावस्थाभ्यामपि यदि घटः स्यात् , तस्यानाद्यनन्तत्वप्रसक्तिस्तदा स्यात्। यदि च मध्यावस्थारूपेणाप्यघटस्तदा सर्वदा घटाभावापत्तिः। एकान्तपक्षेऽप्ययमेव प्रसङ्ग इत्यसत्त्वादवाच्यः। अथवा, तस्मिन्नेव मध्यावस्थास्वरूपे वर्तमाना-ऽवर्तमानक्षणरूपतया सदसत्त्वात् प्रथम-द्वितीयौ। ताभ्यां युगपदनभिधेयत्वात् तृतीयः। यदि वर्तमानक्षणवत् पूर्वोत्तरक्षणयोर्घटः स्यात्, वर्तमानक्षणमात्रमेवासौ प्राप्तः, पूर्वोत्तरयोर्वर्तमानताप्राप्तेः। न च वर्तमानक्षणमात्रमपि पूर्वोत्तरापेक्षस्य, तदभावेऽभावात्। अथातीता-ऽनागतक्षणवद् वर्तमानक्षणरूपतयाप्यघटः, सर्वदा तस्याभावः स्यात्। एकान्तपक्षेऽप्ययमेव दोष इत्यसत्त्वादवाच्यः।

अथवा,क्षणपरिणतिरूपे घटे लोचनजप्रतिपत्तिविषयत्वा-ऽविषयत्वाभ्यां स्वरूप-पररूपाभ्यामाद्य-द्वितीयौ। ताभ्यां युगपदादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष्टस्तृतीयः । यदीन्द्रियान्तरजप्रतिपत्तिविषयत्वेनापि घटः स्यात्, इन्द्रियसंकरः स्यात् । यदि च चक्षुर्जप्रतिपत्तिविषयत्वेनापि न घटः, तर्हि तस्यारूपत्वप्रसक्तिः । एकान्तपक्षेऽप्ययमेव दोष इत्यसत्त्वादवाच्यः । अथवा, दृश्यमान एव घटे घटशब्दवाच्यता स्वं रूपम्, कुटशब्दाभिधेयत्वं पररूपम्, ताभ्यां सदसत्त्वात् प्रथम-द्वितीयौ । युगपत्ताभ्यामर्पितोऽवाच्यः । यदि हि घटशब्द-वाच्यत्वेनेव कुटशब्दवाच्यत्वेनापि घटः स्यात्, तर्हि त्रिजगत एकशब्दवाच्यताप्रसक्तिः, घटस्य वाऽशेषपटादिशब्दवाच्यत्व-प्रसक्तिः, घटशब्दवाच्यताप्रतिपत्तौ समस्ततद्वाचकशब्दप्रतिपत्तिप्रसङ्गश्च । घटपदेनापि यद्यवाच्यः स्यात्, तदा घटशब्दोच्चार-णवैयर्थ्यप्रसक्तिः । एकान्ताभ्युपगमेऽपि घटस्यैवासत्त्वात् तद्वाचकशब्दसंकेताभावादवाच्य एव ।

अथवा, घटशब्दाभिधेये तत्रैव घटे हेयोपादेया-ऽन्तरङ्गबहिरङ्गो-पयोगानुपयोगरूपतया सदसत्त्वात् प्रथम-द्वितीयौ । ताभ्यां युगपदादिष्टोऽवाच्यः । यदि हि हेयादिरूपेणाप्यर्थक्रियाक्षमादिरूपेणैव घटः स्यात्, पटादीनामपि घटत्वप्रसक्तिः । यदि चोपादेयादिरूपेणाप्यघटः स्यात्, अन्तरङ्गस्य वक्तृ-श्रोतृगतहेतु-फलभूतघटाकारावबोधकविकल्पोपयोगस्याप्यभावे घट-स्याभावः । एकान्ताभ्युपगमेऽयमेव दोष इत्यवाच्यः । अथवा, तत्रैवोपयोगेऽभिमतार्थावबोधकत्वा-ऽनभिमतार्थानवबोधकत्वतः सदसत्त्वात् प्रथम-द्वितीयौ । ताभ्यां युगपदादिष्टोऽवाच्यः । विवक्षितार्थप्रतिपादकत्वेनेवेतररूपेणापि यदि घटः स्यात्, तदा प्रतिनियतोपयोगानुपपत्तिः, एवं च विविक्तरूपोपयोगप्रतिपत्तिर्न भवेत् । तदुपयोगप्रतिनियतरूपेणापि यद्यघटः स्यात् तदा सर्वाभावोऽविशेषप्रसङ्गो वा, न चैवम्, तथाप्रतीतेः । एकान्तपक्षेऽप्ययमेव प्रसङ्ग इत्यवाच्यः ।

अथवा, घटत्वं स्वं रूपं सत्त्वम्, असत्त्वं च पररूपे, ताभ्यां प्रथम-द्वितीयौ । अभेदेन ताभ्यां निर्दिष्टो घटोऽवक्तव्यः;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाहि– यदि सत्त्वमनूद्य घटत्वं विधीयते, तदा सत्त्वस्य घटत्वेन व्याप्तेर्घटस्य सर्वगतत्वप्रसङ्गः, तथाभ्युपगमे प्रतिभासबाधा व्यवहारविलोपश्च । तथाऽसत्त्वमनूद्य यदि घटत्वं विधीयते तदा प्रागभावादेश्चतुर्विधस्यापि घटत्वेन व्याप्तेर्घटत्वप्रसङ्गः । अथ घटत्वमनूद्य सदसत्त्वे विधीयेते, तदा घटत्वं यत् तदेव सदसत्त्वे इति घटमात्रं सदसत्त्वे प्रसज्येते, तथाच पटादीनां प्रागभावादीनां चाभावप्रसक्तिः । इति प्राक्तनन्यायेन विशेषणविशेष्यलोपात् 'सन् घटः' इत्येवमवक्तव्यः, 'असन् घटः' इत्येवमप्यवक्तव्यः स्यात् । अनेकान्तपक्षे तु कथंचिदवाच्य इति न कश्चिद् दोषः ।

यद्वा, घटोऽर्थपर्यायः स्वान्यत्राप्रवृत्तेः स्वं रूपं, 'घटः' इति नाम व्यञ्जनपर्यायस्तदतद्विषयत्वात् पररूपम्, ताभ्यां प्रथम-द्वितीयौ । अभेदेन ताभ्यां निर्देशेऽवक्तव्यः, यतोऽत्रापि यदि व्यञ्जनमनूद्य घटार्थपर्यायविधिः, तदा तस्याशेषघटात्मकताप्रसक्तिः, इति भेदनिबन्धनतद्व्यवहारविलोपः । अथार्थपर्यायमनूद्य व्यञ्जनपर्यायविधिः, तथापि सिद्धविशेषानुवादेन घटत्वसामान्यस्य विधानादकार्यत्वादिप्रसङ्ग इति घटस्याभावादवाच्यः । अनेकान्तपक्षे तु युगपदभिधातुमशक्यत्वात् कथञ्चिदवाच्यः । यद्वा, सत्त्वमर्थान्तररूपं, तस्य विशेषणदेकत्वादनन्वयिरूपता, अत एव न तद् वाच्यम्, अन्त्यविशेषवत् । अन्त्यविशेषस्तु स्वं रूपं सोऽप्यवाच्यः, अनन्वयात् । प्रत्येकावक्तव्याभ्यां ताभ्यामादिष्टो घटोऽवक्तव्यः । अनेकान्ते तु कथञ्चित् तथा ।

अथवा, संद्रुतरूपाः सत्त्वादयो घट इत्यत्र दर्शने सत्त्वादयः पररूपं, संद्रुतरूपं स्वं, ताभ्यामादिष्टो घटोऽवक्तव्यः, यतः संद्रुतरूपस्य सत्त्व-रजः-तमस्सु सत्त्वे सत्त्व-रजः-तमसामभावप्रसक्तिः, तेषां परस्परवैलक्षण्येनैव सत्त्वादित्वात्, संद्रुतरूपत्वे च वैलक्षण्याभावादभाव इति विशेष्याभावादवाच्यः । असत्त्वे चासत्कार्योत्पादप्रसङ्गः । न चैतदभ्युपगम्यते । अभ्यु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पगमेऽपि विशेषणाभावादवाच्यः। अनेकान्ते तु कथञ्चित्तथा। यद्वा, रूपादयः पररूपम्, असंद्रुतरूपत्वं स्वं रूपम्, ताभ्यामादिष्टोऽवक्तव्यः, यतो रूपादिव्यावृत्ता रूपादयः, एवं च रूपादीनां घटताऽवाच्या, अरूपादित्वाद् घटस्य। न हि परस्परविलक्षणबुद्धिग्राह्या रूपादय एकानेकात्मकप्रत्ययग्राह्यारूपादिरूपघटतां प्रतिपद्यन्त इति विशेष्यलोपादवाच्यः। अथाप्यरूपादिरूपा रूपादयः, नन्वेवं रूपादय एव न भवन्ति, इति तेषामभावे केऽसंद्रुतरूपतया विशेष्या येनासंद्रुतरूपरूपादयो घटो भवेत्? इत्येवमप्यवाच्यः। अनेकान्तवादे तु कथञ्चित्तथा।

यदि वा, रूपादयः पररूपं, मतुबर्थः स्वरूपम्, रूपाद्यात्मकैकाकारावभासप्रत्ययविषयव्यतिरेकेणापररूपसंबन्धयनवगतेर्विशेष्याभावाद् न रूपादिमान् घट इत्यवाच्यः। न चैकाकारप्रतिभासग्राह्यव्यतिरेकेणापररूपादिप्रतिभासः, इति विशेषणाभावादप्यवाच्यः। अनेकान्ते तु कथञ्चित् तथा। अथवा, बाह्यः पररूपम्, उपयोगस्तु स्वं रूपम्, ताभ्यामादिष्टोऽवक्तव्यः, तथाहि—य उपयोगः स घट इत्युक्तौ उपयोगमात्रमेव घट इति सर्वोपयोगस्य घटत्वप्रसक्तिः, इति प्रतिनियतस्वरूपाभावादवाच्यः। यो घटः स उपयोग इत्युक्तावुपयोगस्यार्थत्वप्रसक्तेरुपयोगाभावे घटस्याप्यभाव इति कथं नावाच्यः?। तदिदमुक्तम्—

"अत्थंतरभूएहि य णियएहि अ दोहि समयमाइट्ठं। वयणविसेसाईयं दव्वमवत्तव्वयं पडइ॥ १॥" इति।

यदा च देशोऽस्तित्वे नियम्यते, देशश्च नास्तित्वे; तदाऽवयवा-ऽवयविनोः कथञ्चिद्भेदादवयवद्वारा 'कुण्ठो देवदत्तः' इत्यत्रेव तद्धर्माणामवयविनि व्यपदेशाच्चतुर्थभङ्गप्रवृत्तिः। अवयविनि त्वेकत्र तथाविवक्षायामवक्तव्यतायामेव पर्यवसानं स्यादिति

१ अर्थान्तरभूताभ्यां च नियताभ्यां च द्वाभ्यां समकमादिष्टम्। वचनविशेषातीतं द्रव्यमवक्तव्यतां पतति॥ १॥ २ सम्मतिसूत्रे गाथा ३६।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नातिप्रसङ्गः । अवयवेन च विशिष्टधर्मेण त्रिभङ्ग्यैकमादिश्यमानं सुप्रसिद्धमेव । यथैक एव पुरुषो विवक्षितपर्यायेण बालादिना परिणतः कुमारादिना चापरिणत इति । तदिदमुक्तम्—

“[1]अह देसो सब्भावे देसोऽसब्भावपज्जए णियओ । तं दवियमत्थि णत्थि य आएसविसेसिअं जम्हा[2] ॥ १ ॥” इति ।

यदा च देशोऽस्तित्वेऽवक्तव्यत्वानुविद्धस्वभाव आदिश्यते, अपरश्च देशोऽस्तित्व-नास्तित्वाभ्यामेकदैव विवक्षितोऽस्तित्वानुविद्ध एवावक्तव्यत्वस्वभावे, तदा पञ्चमभङ्गप्रवृत्तिः, प्रथम-तृतीयकेवलभङ्गव्युदासोऽत्र विवक्षाभेदकृतो द्रष्टव्यः, प्रथम-तृतीययोः परस्परानुपरक्तयोः प्रतिपाद्येनाधिगन्तुमिष्टत्वात्, प्रतिपादकेनापि तथैव विवक्षितत्वात्, अत्र तु तद्विपर्ययात्, अनन्तधर्मात्मकस्य धर्मिणः प्रतिपाद्यानुरोधेन तथाभूतधर्माक्रान्तत्वेन वक्तुमिष्टत्वात् । तदिदमाह—

“[3]सब्भावे आइट्ठो देसो देसो अ उभयहा जस्स । तं अत्थि अवत्तव्वं च होइ दवियं विअप्पवसा[4] ॥ १ ॥”

यदा च वस्तुनो देश एकोऽसत्त्वेऽवक्तव्यत्वानुविद्धे निश्चितः, अपरश्चासत्त्वानुविद्धो युगपदुभयथा विवक्षितस्तदा तथाव्यपदेश्यावयववशादवयविनि षष्ठभङ्गप्रवृत्तिः, केवलद्वितीय-तृतीयभङ्गव्युदासः प्राग्वत्, प्रतिपाद्यजिज्ञासावशात् । तदिदमाह—

“[5]आइट्ठोऽसब्भावे देसो देसो य उभयहा जस्स । तं णत्थि अवत्तव्वं च होइ दविअं विअप्पवसा[6] ॥ १ ॥”

---

१ अथ देशः सद्भावे देशोऽसद्भावपर्यवे नियतः । तद् द्रव्यमस्ति नास्ति चादेशविशेषितं यस्मात् ॥ १ ॥ २ सम्मतिप्रकरणे गाथा ३७ ।

३ सद्भाव आदिष्टो देशो देशश्चोभयथा यस्य । तदस्त्यवक्तव्यं च भवति द्रव्यं विकल्पवशात् ॥ १ ॥ ४ सम्मतौ गाथा ३८ ।

५ आदिष्टोऽसद्भावे देशो देशश्चोभयथा यस्य । तद् नास्त्यवक्तव्यं च भवति द्रव्यं विकल्पवशात् ॥ १ ॥ ६ सम्मतौ गाथा ३९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदा च वस्तुनो देश एकः सत्त्वे नियतः, द्वितीयश्चासत्त्वे, तृतीयस्तूभयथाऽभिधित्सितस्तदा तथाभूतविशेषणाध्यासितस्यानेनैव प्रकारेण प्रतिपादनादीदृशेऽर्थेऽपरभङ्गविषयाप्रसरात् सप्तमभङ्गप्रवृत्तिः। तदिदमाह—

"सब्भावासब्भावे देसो देसो अ उभयहा जस्स। तं अत्थि णत्थवत्तव्वयं च दविअं विअप्पवसा ॥१॥" इति।

अथानन्तधर्मात्मके वस्तुनि तत्प्रतिपादकवचनस्य सप्तधा परिकल्पनेऽष्टमोऽपि विकल्पः किं न स्वीक्रियते? इति चेत्। न, तत्परिकल्पनानिमित्ताभावात्, सावयवात्मकस्य निरवयवात्मकस्य चान्योन्यनिमित्तकस्य जिज्ञासायां चतुर्थादि-प्रथमादिविकल्पानामेव प्रवृत्तेः। किञ्च, क्रमेण धर्मद्वयं गुण-प्रधानभावेन प्रतिपादयन् प्रथम-द्वितीयावेव भङ्गावाददीत, युगपत्तु द्वयमभिधित्सुस्तृतीयमेव, क्रमेण प्राधान्येन द्वयमभिधित्सुराद्य-द्वितीयसंयोगनिष्पन्नं चतुर्थमेव, एकं विभज्यापरं चाविभज्याभिधित्सुः प्रथम-तृतीयसंयोगनिष्पन्नं पञ्चमम्, द्वितीय-तृतीयसंयोगनिष्पन्नं षष्ठं वा, द्वौ देशौ विभज्य तृतीयं चाविभज्याभिधित्सुराद्य-द्वितीय-तृतीयसंयोगनिष्पन्नं सप्तममेव, इति चतुरादिदेशोपादानेऽपि द्वित्र्यादीनामेकविभाजकोपरागविश्रामाद् न सप्तमाद्यतिक्रमः, एककरदण्डसंयोगे करद्वयदण्डसंयोगे वा दण्डित्वाविशेषात्। अनेकान्त उद्भूतद्वित्वादिविवक्षया स्यादेव विशेष इति चेत्। स्यादेव तर्हि भङ्गावान्तरभेदोऽपि। अत एव मल्लवादिप्रभृतिभिरेते कोटीशो भवन्तो भेदा अभिहिताः। विभाजकोपाध्यनतिक्रमात्तु न विभागव्याघात इति तत्त्वम्।

१ सद्भावासद्भावे देशो देशश्चोभयथा यस्य। तदस्ति नास्त्यवक्तव्यं च द्रव्यं विकल्पवशात् ॥ १ ॥ २ सम्मतिप्रकरणे गाथा ४०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इयं च सप्तभङ्गी प्रतिभङ्गं सकलादेशस्वभावा विकलादेशस्वभावा च[1]। प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यात्, अभेदोपचाराद् वा यौगपद्येन प्रतिपादकं वचः सकलादेशः[2]। तद्विपरीतो विकलादेशः[3]। अभेदवृत्तिप्राधान्यम्— द्रव्यार्थिकनयगृहीतसत्ताद्यभिन्नानन्तधर्मात्मकवस्तुशक्तिकस्य सदादिपदस्य कालाद्यभेदविशेषप्रतिसंधानेन पर्यायार्थिकनयपर्यालोचनप्रादुर्भवच्छक्यार्थबाधप्रतिरोधः। अभेदोपचारश्च— पर्यायार्थिकनयगृहीतान्यापोहपर्यवसितसत्तादिमात्रशक्तिकस्य तात्पर्यानुपपत्त्या सदादिपदस्योक्तार्थे लक्षणा।

कालादयश्चाष्टाविमे— कालः, आत्मरूपम्, अर्थः, संबन्धः, उपकारः, गुणिदेशः, संसर्गः, शब्द इति च। तत्र यत्कालमस्तित्वं तत्कालाः शेषानन्तधर्मा वस्तुन्येकत्रेति तेषां कालेनाभेदवृत्तिः। यदेव चास्तित्वस्य तद्गुणत्वमात्मरूपं तदेवान्यगुणानामपीत्यात्मरूपेणाभेदवृत्तिः। य एव चाधारोऽर्थो द्रव्याख्योऽस्तित्वस्य स एवान्यपर्यायाणामित्यर्थेनाभेदवृत्तिः। य एव चाविष्वग्भावः संबन्धोऽस्तित्वस्य स एवान्येषामिति संबन्धेनाभेदवृत्तिः। य एव चोपकारोऽस्तित्वेन वस्तुनः स्वप्रकारकप्रतीतिविषयत्वलक्षणः, स एवान्येषामित्युपकारेणाभेदवृत्तिः। य एव च गुणिनः संबन्धी देशः क्षेत्रलक्षणोऽस्तित्वस्य, स एवान्येषाम्, इति गुणिदेशेनाभेदवृत्तिः। य एव च वस्तुनः संसर्गोऽस्तित्वस्याधाराधेयभावलक्षणः, स एवान्येषाम्, इति संसर्गेणाभेदवृत्तिः। य एव च 'अस्ति' इति शब्दोऽस्तित्वधर्मात्मकस्य वस्तुनो वाचकः, स एवाशेषानन्तधर्मात्मकस्यापि, इति शब्देनाभेदवृत्तिः।

---

१ प्रमाणनयतत्त्वालोकालङ्कारे ४।४३। २ प्रमा० ४।४४। ३ प्रमा० ४।४५।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केचित्तु– 'अनन्तधर्मात्मकवस्तुप्रतिपादकत्वाविशेषेऽप्याद्यास्त्रय एव भङ्गा निरवयवप्रतिपत्तिद्वारा सकलादेशाः, अग्रिमास्तु चत्वारः सावयवप्रतिपत्तिद्वारा विकलादेशाः' इति प्रतिपन्नवन्तः। एते च सप्तापि भङ्गाः स्यात्पदालाञ्छिता अवधारणैकस्वभावा विषयासत्त्वाद् दुर्नयाः, स्यात्पदलाञ्छितस्त्वेतदन्यतमोऽरीतरांशाप्रतिक्षेपादेकदेशव्यवहारानिबन्धनत्वात् सुनय एव। 'अस्ति' इत्यादिकस्तु स्यात्कारैवकारविनिर्मुक्तो धर्मान्तरोपादानप्रतिषेधाकरणात् स्वार्थमात्रप्रतिपादनप्रवणः सुनयोऽपि न व्यवहाराङ्गमिति द्रष्टव्यम्।

अयं च सप्तविधोऽपि वचनमार्गोऽर्थनयेऽविशिष्टः। तत्र प्रथमः संग्रहे सामान्यग्राहिणि, द्वितीयो व्यवहारे विशेषग्राहिणि, तृतीय ऋजुसूत्रे पृथक्त्वमनिच्छति, चतुर्थः संग्रह-व्यवहारयोः, पञ्चमः संग्रह-र्जुसूत्रयोः, षष्ठो व्यवहार-ऋजुसूत्रयोः, सप्तमः संग्रह-व्यवहार-र्जुसूत्रेषु। व्यञ्जननये च सविकल्पो निर्विकल्पश्च। प्रथमेऽर्थैकत्वेऽपि पर्यायशब्दवाच्यताविकल्पसद्भावात् प्रथमः सविकल्पः। द्वितीय-तृतीययोर्द्रव्यार्थनिर्गतपर्यायाभिधायकत्वाद् निर्विकल्पो द्वितीयः, शब्दादिषु तृतीयः। संयोगादन्ये।

अथवा, वक्तृस्थप्रत्ययरूपेऽर्थनये सप्ताप्येते संभविनः। श्रोतृस्थप्रत्ययरूपे व्यञ्जननये तु शब्द समभिरूढयोः संज्ञाक्रियाभेदेऽप्यभिन्नार्थप्रतिपादनात् सविकल्पः प्रथमभङ्गः। एवंभूतस्तु क्रियाभेदाद् भिन्नमेवार्थं प्रतिपादयतीति तत्र निर्विकल्पो द्वितीयभङ्ग एव। अवक्तव्यस्तु शब्दाविषयत्वाद् नास्त्येवेति वदति, सद्भावाद्यर्पणया ऋजुसूत्राद् विशेषिततरार्थाभ्युपगमस्य शब्दनये भाष्यकृता पक्षान्तरमधिकृत्याभिहितत्वात्, तदपेक्षया तत्र सप्तापि सविकल्पाः, यथाश्रुते तु निर्विकल्पा इत्यप्यनुजानीमः ॥ २३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेवं सप्तभङ्ग्यात्मकप्रमाणेनानेकान्त एव निश्चयो युज्यते, नैकान्त इति निगमयन्नाह—

अनेकान्तत एवातः सम्यग्मानव्यवस्थितेः। स्याद्वादिनो नियोगेन युज्यते निश्चयः परम् ॥

अतः– उक्तयुक्तेः, अनेकान्तत एव– अनेकान्तमतमवलम्ब्यैव, सम्यग्मानव्यवस्थितेः– अविसंवादिप्रमाणव्यवस्थानात्, स्याद्वादिनो नियोगेन– नियमेन, निश्चयो युज्यते, परं–केवलम्। 'परम्' इत्यनेनैकान्ते मानस्यैवानवतार इति सूचितम्। तथाहि– न तावदध्यक्षादेकान्तसिद्धिः, अनेकान्तस्यैव सर्वैरध्यक्षमनुभवात्, एकस्यैव वस्तुनो वस्त्वन्तरसंबन्धाविर्भूतानेकसंबन्धिरूपत्वात्, पितृ-पुत्र-भ्रातृ-भागिनेयादिविशिष्टैकपुरुषवत्, पूर्वा-ऽपरा-ऽन्तरिता-ऽनन्तरित-दूरा-ऽऽसन्न-नव-पुराण-समर्था-ऽसमर्थदेवदत्त-चैत्रस्वामिकलब्ध-कृत-हृतादिरूपघटवद् वा। यत्पुनरुच्यते मण्डनेन–

"पित्रादिविषयेऽपेक्षा जननादिप्रभाविता। एकक्रियाविशेषेण व्यपेक्षा ह्रस्व-दीर्घयोः" ॥ १ ॥ इति।

तत्तु दृष्टान्त-दार्ष्टान्तिकयोरापेक्षिकपर्यायस्वपर्यवसानाद् नातिचतुरस्रम्। यदप्येतद् विवृण्वतोक्तम्– 'शब्दार्थस्तत्र सापेक्षो न वस्तु' इति। तदप्यशब्दार्थस्य वस्तुतः सिद्धौ शब्दस्य च कल्पनामात्रपर्यवसितत्वे शोभते। येषामपि मतम्– 'पितृत्व-पुत्रत्वादयो धर्मा एव तत्तन्निरूपिता भिद्यन्ते, धर्मी त्वेकस्वभाव एव'। तेषामपि 'एतदपेक्षयाऽयं पिता, एतदपेक्षया च न पिता' इत्यादिप्रतीत्यननुरोध एव, धर्मिभेदप्रतीतेर्धर्माभावावगाहितायां 'घटः पटो न' इत्यादावपि तथात्वापत्त्या च भेदकथैवोत्सीदे-

१ ज. 'तत्कृतचै'। २ ख. ग. घ. 'विना'।

दिति । येऽपि नगर-त्रैलोक्यादिवत् पितृ-पुत्रादिभावभाग् ज्ञानाकार एव' इति प्रतिपन्नवन्तः । तेऽपि शबलार्थानुपपत्तिभीताः शबलज्ञानमाश्रयन्तो व्याघ्रात् त्रस्यन्तः कूपान्तःपातिन इति दिग् ।

एवं चानुमानादिनापि नैकान्तसिद्धिः, अध्यक्षबाधितेऽर्थेऽनुमानादिप्रमाणाप्रवृत्तेः । किञ्च, साधर्म्यतः परः साध्यं साधयेत्, वैधर्म्यतो वा ? । उभयथापि तत्पुत्रत्वादेर्गमकत्वप्रसङ्गः, प्रकरणसम-कालात्ययापदिष्टयोर्हेत्वाभासत्वाभावेनाबाधकत्वात्, निश्चितस्वसाध्याविनाभूतहेतूपलम्भस्यैव साध्यधर्मिणि साध्यप्रतिपत्तिरूपत्वेन तयोस्तदप्रतिपन्थित्वात् । न च यथा तवात्राऽगमकत्वं तथा ममापीति शङ्कनीयम्, ममाक्षिप्तपरस्परस्वरूपाजहद्वृत्तिसाधर्म्यवैधर्म्यस्वभावनिबन्धनत्रैरूप्यनिश्चयाभावेन तस्यागमकत्वात्, परस्य च तथाऽनभ्युपगमात् ।

किञ्च, परस्य स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यसाध्याभाववदवृत्तित्वसाध्यसंबन्धितावच्छेदकरूपवत्त्वादिव्याप्तीनां नानात्वात् साधने साध्यव्याप्यत्वमपि दुर्ग्रहम् । न च सर्वासामपि वह्निनिरूपितव्याप्तीनां प्रत्येकं वह्न्यनुमित्यङ्गत्वमेव, कार्यतावच्छेदके तत्तद्व्यवहितोत्तरत्वादिदानाच्च न व्यभिचार इति वाच्यम्, अनुगतहेतु-हेतुमद्भावं विनाऽनुगतव्यवहारप्रवृत्त्याद्यनुपपत्तेः, अनुमितिजनकतावच्छेदकतया सिद्धाया एकस्या एव व्याप्तेः प्रतिस्वं विभज्यानुभवाद् भेदमिश्रितत्वस्वीकारौचित्यात् । एवं विशिष्य तत्तद्धर्मावच्छिन्नकारणताश्रयेऽपि तत्तद्धर्मसामान्याधिकरण्येन सामान्यकारणताव्यपदेशसमर्थनमपि परेषां शब्दान्तरेण सामान्यविशेषभावमेव वस्तुनो द्रढयति, अर्पिताऽनर्पितासिद्धेः, इति द्रष्टव्यम्, "यत्सामान्ये यत्सामान्यं हेतुस्तद्विशेषे तद्विशेषोऽपि" इति न्यायोपपत्तेः, अर्धन्यायेना भावेनाप्रधानगुणभूतेऽपि प्रधानगुणभाव- ॥२५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगाच्चेति ।

किञ्च, परः साध्यं साधयन् न तावत् सामान्यं साधयेत्, केवलस्य तस्यासंभवात् । नापि विशेषम्, तस्याननुयायित्वेन साधयितुमशक्यत्वात् । न च सामान्योपरागेण विशेषस्याप्यनुयायित्वम्, समवायनिषेधेन तदुपरागासिद्धेः 'पर्वतो जातिमद्वान्' इत्यादावतिप्रसङ्गाच्च । नाप्युभयम्, उभयदोषानतिवृत्तेः । नाप्यनुभयम्, तस्यासत्त्वात्, इत्याद्यूह्यम् । तदिदमुक्तम्—

"[1]साहम्मओ व्व अत्थं साहिज्ज परो विहम्मओ वावि । अन्नोन्नं पडिकुंठा दो वि अ एए असव्वाया[2] ॥१॥" इति ।

अनेकान्ते तु न साध्यसिद्धिरनुपपन्ना, कथञ्चिद् वह्निमत्ताया: साध्यत्वेन 'पर्वतो द्रव्यवान्' इत्यादावनतिप्रसङ्गात्, वह्निमत्ताया द्रव्यवत्तासामान्यक्रोडीकृतत्वेऽपि कथञ्चिदतिरेकात्, विवादास्पदीभूतसामान्य-विशेषोभयात्मकसाध्यधर्माधारसाध्यधर्मिसिद्धेश्च; अन्यथा 'पर्वतसामान्यं वह्निमत्तयाऽनुमिनोमि' 'इमं पर्वतं वह्निमत्तयाऽनुमिनोमि' इत्यादि विभज्याध्यवसायाकारानुपपत्तेः, इतरत्र संशयानिवृत्तिप्रसङ्गाच्च । इत्यन्यत्र विस्तरः । तदिदमाह—

"[3]दव्वट्ठिअवत्तव्वं सामण्णं पज्जवस्स य विसेसो । एए समोवणीया विभज्ज वायं विसेसंति[4] ॥१॥" इति ।

तदेवं 'स्याद्वादिनो न क्वचिदपि निश्चयो युज्यते' इति पूर्वपक्षिणोक्तं निराकृतम् ॥ २४ ॥

---

१ साधर्म्यतो वार्थं साधयेत् परो वैधर्म्यतो वापि । अन्योन्यं परिकुण्ठौ द्वावपि चैतावसद्वादौ ॥ १ ॥ २ सम्मतिप्रकरणे गाथा १५३ ।
३ द्रव्यास्तिकवक्तव्यं सामान्यं पर्यवस्य च विशेषः । एतौ समोपनीतौ विभज्य वादं विशिंष्टः ॥ १ ॥ ४ सम्मतिप्रकरणे गाथा १५४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थं च 'संसार्यपि न संसारी' इत्याद्यप्यर्थतो निरस्तमेव, तथापि विशिष्य तद् निरसितुकामस्तत्र प्रयोजनमाह—

एतेन सर्वमेवेति यदुक्तं तन्निराकृतम् । शिष्यव्युत्पत्तये किञ्चित्तथाप्यपरमुच्यते ॥ २५ ॥

एतेन– अनन्तरोदितेन स्याद्वादसाधनेन, सर्वमेव यदुक्तं पूर्वपक्षिणा, तद् निराकृतम्, अधिकस्याप्युक्ततुल्ययोगक्षेमत्वात् । तथापि शिष्यव्युत्पत्तये– प्रपञ्चज्ञशिष्यमतिविस्फारणाय, किञ्चिदपरम्– अवशिष्टविषयम्, उच्यते ॥ २५ ॥

तथाहि—

संसारी चेत्स एवेति कथं मुक्तस्य संभवः?। मुक्तोऽपि चेत्स एवेति व्यपदेशोऽनिबन्धनः ॥

संसारी चेत् स एव– संसार्येव, एवकार एकान्ते, इति हेतोः, संसारिणः सर्वथा संसारित्वात्, कथं मुक्तस्य संभवः– संसारिण्ययं मुक्त इत्यादिव्यपदेशः? । क्षणभेदस्त्वत्र न परिहारः, सर्वथाऽसारूप्यात् । स्यान्मतमन्येषाम्– स एव संसारी स एव च मुक्तः, न तु न संसारी न मुक्तश्च, संसारित्व-मुक्तत्वयोः संसारिमुक्तभेदविरोधित्वात्, प्रतियोगितावच्छेदकेन सहान्योन्याभावस्य विरोधे कालभेदानिवेशादिति । असदेतत्, 'इदानीमयं संसारी न मुक्तः 'इदानीं स मुक्तो न संसारी' इत्यादिव्यवहारात् संसारि-मुक्तयोरसंसार्य-ऽमुक्तयोश्च कालभेदेन विभिन्नतया व्यवस्थितेः । विभेदे कथमेकत्रोभयथा व्यवहार इति चेत् । सोऽयमेकान्तवादिन एव शिरसि प्रहारः । अथ नित्यज्ञानादिमद्भिन्नः संसारी, तद्भेदश्च न तत्रेति संसा-

१ अत्र स्तबके कारिका ८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

येव स इति चेत् । कथं तर्हि मुक्ते 'असंसारी' इति व्यवहारः ? । गौणः स इति चेत् । न, स्वेच्छामात्रानुरोधेऽपि लोक-शास्त्र-व्यवहाराननुरोधात् । अत एवाह– मुक्तोऽपि चेत् स एव– मुक्त एव न संसारी, इति हेतोः प्रागप्यस्य संसारिस्वभावत्वाभावात्, अनिबन्धनः– निर्निमित्तः, व्यपदेशः– 'मुक्तः सः' इत्युल्लेखवान् ॥ २६ ॥

एतदेव स्पष्टयति—

संसाराद् विप्रमुक्तो यन्मुक्त इत्यभिधीयते । नैतत्तस्यैव तद्भावमन्तरेणोपपद्यते ॥२७॥

यत्– यस्मात्, संसाराद् विप्रमुक्तो मुक्त इत्यभिधीयते, मुचेरवधिसापेक्षत्वात् । एतत्– इत्थंभूतं मुक्तत्वम्, तस्यैव– संसारिण एव, तद्भावमन्तरेण– मुक्तभावाभ्युपगमं विना, नोपपद्यते । इष्यत एव तस्यैव तद्भावः, धर्मिण्येव धर्मोपगमात्, धर्मिणोऽपि कथञ्चित्पराष्टत्तिस्तु नेष्यत इति चेत् । न, संसारिस्वभावं परित्यज्य मुक्तस्वभावोपादानाद् धर्मिणोऽपि कथञ्चित्परावृत्तेः । विशिष्टधर्मिभेदेऽपि शुद्धधर्म्यभेदाद् न दोष चेत् । अयमेव द्रव्यतोऽभेदः, पर्यायतश्च भेद इत्यनेकान्तो यदि स्यात्पदानुविद्धः, तादृशभेदस्यापि तादृशभेदनान्तरीयकत्वात् । मुक्तेऽपि तदा संसारिभेदेऽपि प्राक् तदभेदात् । तत्कालापेक्षया तत्र तद्भेद एवेति चेत् । नैतावतैवापेक्षाविश्रामः, तत्कालेऽपि तदन्यकालाभेदादिकृतापेक्षाऽऽनन्त्यात् । तावदपेक्षानियतवस्तुप्रतीतिर्न कथमपि स्यादिति चेत् । सत्यम्, स्यात्पदमहिम्ना प्रधानो-पसर्जनभावेन तथाप्रतीत्युपपत्तेः, प्रत्यक्षेऽपि सम्यग्दर्शनगुणमहिम्ना तथाभावात्; मिथ्यादृशां तु सापेक्षयोर्धर्मयोरेकत्र निमित्तभेदं विना भानस्य संशयवद् दोष-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जन्यत्वनियमात् । अत एव 'सदसतोरविशेषणात् सर्वं ज्ञानं मिथ्यादृशां विपर्यस्तम्, सम्यग्दृशां च संशयादिकमपि तादृशदोषाजन्यत्वादविपर्यस्तम्' इति परिभाषन्ते । इत्यन्यत्र विस्तरः ॥ २७ ॥

फलितमाह—

तस्यैव च तथाभावे तन्निवृत्तीतरात्मकम् । द्रव्य-पर्यायवद्वस्तु बलादेव प्रसिध्यति ॥२८॥

तस्यैव च– संसारिणः, तथाभावे– मुक्तभावेऽभ्युपगम्यमाने, तद्– अधिकृतं वस्तु, निवृत्तीतरात्मकं निवृत्त्य-ऽनिवृत्ति-स्वभावम्, बलादेव– स्याद्वादसाम्राज्यादेव, द्रव्य-पर्यायवत् प्रसिध्यति, तस्यैव तथा भवनादिति ॥ २८ ॥

तदिदं लोकानुभवतोऽपि साधयन्नाह—

लज्जते बाल्यचरितैर्बाल एव न चापि यत् । युवा न लज्जते चान्यस्तैरायत्यैव चेष्टते२९

लज्जते बाल्यचरितैः– चौर्या-ऽसंस्पृश्यस्पर्श-क्रीडादिभिः, अतो बाल एव युवा, 'अहमेव पूर्वं चौर्याद्यनुष्ठितवान्' इति लज्जानिबन्धनाभेदमत्यभिज्ञानाद् बाल-यूनोरभेदसिद्धेः । न चाप्येकान्तो बाल एव यद् यस्माद् युवा, एवं हि ' अयमिदानीं युवा, न बालः ' इति भेदप्रतिभासो नानुरुद्धः स्यात् । न च बालस्वभावापरित्यागे युवस्वभावपरिग्रहोऽपि स्यात्, उत्तरस्व-भावे पूर्वस्वभावपरित्यागस्य हेतुत्वात् । न च तत्काले यूनि बालसामान्यभेद एव, ' इदानीं युवा न बालः ' इति प्रतीतेरिति वाच्यम्, यतो न चान्यः– भिन्नसंतानान्तरयुवा, तैः– बाल्यचरितैः, लज्जते, अतस्तत्र न तत्संतानीयबालभेद एव । ॥२५७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेवमतीत-वर्तमानयोर्भेदाभेदो भावितः। एवमनागत-वर्तमानयोरपि, यत आयत्यैव– वार्धके सुखहेतुधनाद्यर्थमेव, चेष्टते। अतो युव-वृद्धयोरभेदः। न ह्यन्योऽन्यार्थं चेष्टत इति॥ २९॥

न चाप्यभेद एवेत्याह—

युवैव न च वृद्धोऽपि नान्यार्थं चेष्टनं च तत्। अन्वयादिमयं वस्तु तदभावोऽन्यथा भवेत्॥३०॥

न च युवैव वृद्धोऽपि– सर्वथा वृद्धपर्यायापन्न एव, 'इदानीमयं युवा न वृद्धः' इति प्रतीतेः। न च तत्काले तत्र यूनि तत्संतानीयवृद्धभेद एव, यतोऽन्यार्थं संतानानन्तरवृद्धवत्, न च चेष्टनं– कायव्यापाररूपम्। तत्– तस्मात्, वस्त्वन्वयादिमयं– आदिना व्यतिरेकग्रहादन्वय-व्यतिरेकशबलम्, अन्यथा, तदभावः– अधिकृतवस्त्वभावो भवेत्, सर्वथाऽसत्सद्भावविरोधात्। तदिदमुक्तं सम्मतिकृता—

"पडिपुन्नजोव्वणगुणो[1] जह लज्जइ बालभावचरिएण[2]। कुणइ य गुणपणिहाणं अणागयसुहोवहाणत्थं॥ १॥

ण य होइ जोव्वणत्थो बालो अन्नो वि लज्जइ न तेण। ण वि अ अणागयवयगुणपसाहणं जुज्जइ विभत्ते[3]॥२॥" इति।

यत्तु– 'बाल्याद्याः शरीरस्यैवावस्थाः, आत्मा तु बाल्याद्यवस्थाभेदाद् न निवर्तते, भिद्यते वा, नित्यैकरूपत्वात्तस्य;

---

१ प्रतिपन्नयौवनगुणो यथा लज्जते बालभावचरितेन। करोति च गुणप्रणिधानमनागतसुखोपधानार्थम्॥ १॥
न च भवति यौवनस्थो बालोऽन्योऽपि लज्जते न तेन। नापि चानागततद्गुणप्रसाधनं युज्यते विभक्ते॥ २॥

२ मुद्रितमूलसम्मतौ 'एहिं' इति पाठः। ३ सम्मतिप्रकरणे गाथा ४३, ४४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शरीरं तु परिणामभेदाद् भिद्यत एव' इति नैयायिकादीनां मतम् । तदसत्, 'अहं बालः' इत्यादिप्रतीत्या बालत्वाद्यवस्थानामहंत्वसामानाधिकरण्यस्य 'प्राग् बाल आसम्, इदानीं युवाऽस्मि' इत्यादिधिया चाहंतास्पदस्य बाल्य-यौवनादिभेदेनोत्पाद-नाश-स्थित्यात्मकस्य सिद्धेः; न चेदेवम्, बाल्यादिवद् मनुष्यत्वादेरपि 'शरीरमात्रनिष्ठत्वे मनुष्यत्वादिप्रयोज्यो गुणविशेष आत्मनि न घटेत । मनुष्यत्वादिकं संयोगादिवदुभयाश्रितमिति चेत् । बाल्यादिकमपि तथैव । न चैवं 'गौरोऽहम्' इत्यादिधिया काया-ऽऽत्मनोरभेदः सिध्यंश्चार्वाकमतं न प्रतिक्षिपेदिति वाच्यम्; स्यात्कारस्यैव चार्वाक-नैयायिकयोरुभयोरपि वारणे समर्थत्वात्, मृगपतेरिव मृग-वारणयोः । 'शरीरस्यापि बाल्यादिभेदेन भेद एव' इति वदतामभेदप्रत्यभिज्ञाक्षतिः । न च विभिन्नपरिणामवत्त्वलक्षणवैधर्म्यज्ञानकालोत्पत्तिकायास्तस्यास्तज्जातीयाभेदविषयकत्वमेवेति वाच्यम्; घटे श्यामत्व-रक्तत्वयोरिव शरीरे विभिन्नपरिमाणयोर्विधर्मत्वेनाप्रतिसंधानात् । विशिष्टवैधर्म्यस्य शुद्धव्यक्त्यभेदाविरोधित्वं च समानम् ।

येऽपि 'उक्तप्रत्यभिज्ञाभीता बाल्यादिभेदेऽपि शरीरमेकमेव' इत्येकान्तेऽभिनिविशन्ते, तदुक्तं पदार्थरत्नमालाकृता—'परे तु– 'तत्राश्रय एक एव, प्रत्यभिज्ञानात्' इति मन्यमानाः परिमाणान्तरोत्पादमाहुः' इति । तेऽपि मन्दाः, अबाधितभेदव्यवहारादिविलोपात् । अथ 'युवा न बालः' इत्यत्र यूनि बालवैधर्म्यमेव भासते । तत्र नञो वृत्तिमान् भिन्नं चार्थः, वृत्तिमति बालत्वविशिष्टविशेषणावच्छेदककालावच्छिन्नाधेयतया वृत्तिमान्, भिन्ने तत्रैव कालादिरप्यन्वेति; तथा च 'इदानीं न बालः' इत्यस्य 'बालत्वविशिष्टवृत्तिमद्भिन्नैतत्कालीनधर्मवान्' इत्यर्थः । युक्तं चैतत्, 'न पृथग्' इति प्रतीतेस्तदवधिकपृथक्त्वाभाववद्द्रव्यत्वेन तदन्योन्याभावाभावसिद्धेः । तदाहुर्न्यायाचार्याः– 'श्यामाद् रक्तो विधर्मा न तु पृथग्' इति चेत् । न, 'प्राग् न ॥२५८॥

बालः' इत्यस्याप्यापत्तेः, बाल्यकालावच्छेदेन बालवृत्तिभिन्नस्य सत्त्वादेः प्राक्कालवृत्तेर्यूनि सत्त्वात्, ईदृशश्यामवैधर्म्यस्य श्यामनिष्ठत्वात् 'श्यामो न श्यामः' इत्यादेरपि प्रसङ्गात् । प्रत्यक्षसिद्धभेदप्रतीतेरपह्नवे प्रत्यभिज्ञायामप्यनाश्वासात्, अभेदसिद्धावपि भेदाविरोधात्, भेदाभेद एव प्रत्यभिज्ञाया उपपादयिष्यमाणत्वाच्चेति दिग्। तदेवमन्वय्यादिमयमेव वस्त्विति सिद्धम् ।

न चैवमनेकान्ते 'षडेव जीवनिकायाः' इति श्रद्धानवतां सम्यक्त्वभङ्गः, विभागवाक्याद् न्यूनतालाभेऽनेकान्तव्याघाताद् मिथ्यात्वापत्तेरिति वाच्यम्; भावतस्तेषामनेकान्तपरिज्ञानशून्यानामसम्यग्दृष्टित्वादेव, जीवराश्यपेक्षया तेषां कायानामपि पुद्गलतया, जीव-पुद्गलप्रदेशानां च परस्पराविनिर्भागवृत्तितयैकत्वस्याश्रद्धानात्, द्रव्यत एव च 'भगवतैवमुक्तम्' इति जिनवचनरुचिस्वभावत्वेन सम्यग्दृष्टित्वात् । तदुक्तम्—

"[1]णिअमेण सद्दहंतो छक्काए भावओ ण सद्दहइ । हंदी अपज्जवेसु वि सद्दहणा होइ अविभत्ता ॥ १ ॥" इति ।

न चैवं तत्र सम्यग्दृष्टित्वव्यवहारेऽपि सम्यग्दर्शनप्रत्ययिकनिर्जरानापत्तिः, नय-निःक्षेपादिपरिच्छेदाधीनसकलसूत्रार्थपरिज्ञानसाध्यविशिष्टप्रवचनरुचिस्वभावभावसम्यक्त्वसाध्यनिर्जरानवाप्तावपि भावसम्यक्त्वसाधकतया द्रव्यसम्यक्त्वस्वरूपव्यवस्थितेर्मार्गानुसार्यवबोधमात्रानुषक्तरुचिजन्यनिर्जरानपायात् । इदं तु ध्येयम्– ज्ञान-दर्शन-चारित्राणां शिबिकावाहकपुरुषवद् मिलितानामेव मोक्षहेतुत्वाभिधानादगीतार्थे तदभावेन मोक्षानापत्तेः, अनेकान्तपरिच्छेदरूपस्य ज्ञानस्य गीतार्थे साक्षात्, अगीतार्थे च स्वाश्रयपारतन्त्र्येण हेतुत्वम् । निश्चयतस्तद्गतफले तद्गताध्यवसायस्यैव हेतुत्वेऽपि गीतार्थापेक्ष एवागीतार्थस्य प्रतिक्षणवि-

---

१ नियमेन श्रद्दधानः षट् कायान् भावतो न श्रद्दधाति । हन्तापर्यवेष्वपि श्रद्धानं भवत्यविभक्तम् ॥ १ ॥ २ सम्मतिसूत्रे १२५ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षणस्तथाभूतपरिणामः, नान्यथा। प्रकाशकमपेक्ष्यैव हि प्रकाश्यः प्रकाश्यस्वभावो न त्वन्धकारमाकाशादिकं वेति। एवं चापवादिक एकाकिविहारविधिरपि गीतार्थमपेक्ष्यैव, न त्वगीतार्थम्, तस्य गीतार्थपरतन्त्रस्यैव कर्ममात्रेऽधिकारित्वादिति विवेचितमेतदध्यात्ममतपरीक्षायाम्।

एवं 'गच्छति' 'तिष्ठति' इत्यादौ 'दहनाद् दहनः' 'पचनात् पचनः' इत्यादौ जीवद्रव्यमजीवद्रव्यं चेत्यादावप्यन्वय-व्यतिरेकव्याप्तिर्भावनीया, गति-स्थित्यादिपरिणतस्याप्यूर्ध्वगतिभूतलस्थित्याद्यपेक्षयैव गति-स्थितिमत्त्वात्; अन्यथाऽभिप्रेतदेशप्राप्तिस्थितिवदनभिप्रेतदेशप्राप्ति-स्थित्योरपि प्रसङ्गात्, तथास्वभावसत्त्वे कारणाभावस्याप्रयोजकत्वात्, कारणसमाजेन तथास्वभावस्यैवाक्षेपात्, अन्यथाऽतिप्रसङ्गात्। दहनादेरपि दाहादिपरिणामयोग्यापेक्षयैव दहनादित्वात्, अन्यथा चात-थात्वात्, अदहनस्याप्युदकादिद्रव्यस्य स्वयमदहनत्वेऽपि पृथिव्याद्यदहनव्यावृत्ततया कथञ्चिदतथात्वात्, समयाविरोधेन भजनाप्रवृत्तेः; जीवा-ऽजीवयोरपि कुम्भाद्यपेक्षया जीवापेक्षया चातथात्वात्; अन्यथा सर्वस्य सर्वात्मकतापत्तेः। तदिदमाह—

"[1]गइपरिणयं गई चेव केइ णिअमेण दविअमिच्छंति। तं पि अ उड्ढगइअं तहा गई अण्णहा अगई ॥ १ ॥
गुणणिव्वत्तिअसण्णा एवं दहणादओ वि दट्ठव्वा। जं तु जहा पडिसिद्धं दव्वमदव्वं तहा होइ ॥ २ ॥

---

१ गतिपरिणतं गत्यैव केचिद् नियमेन द्रव्यमिच्छन्ति। तदपि चोर्ध्वगतिकं तथागतेरन्यथाऽगतेः ॥ १ ॥
गुणनिर्वर्तितसंज्ञा एवं दहनादयोऽपि द्रष्टव्याः। यत्तु यथा प्रतिषिद्धं द्रव्यमद्रव्यं तथा भवति ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कुंभो ण जीवदविअं जीवो वि ण होइ कुंभदविअं ति। तम्हा दो वि अदविअं अण्णोण्णविसेसिआ हुंति[1] ॥३॥'' इति।

नन्वेवमजीवो जीवापेक्षया नाजीव इति जीवोऽपि स्यात्। नैवम्, अभावपरिणतेः परापेक्षत्वेऽपि भावपरिणतेः स्वापेक्षत्वात्। नन्वेवं जीवदेशो नाजीवो नवा संपूर्णजीव इति नोजीवः स्यात्; स्यादेवेति चेत्; कथं त्रैराशिकनिरासः स्यात्? इति चेत्। सत्यम्, एकान्तमाश्रयत एव त्रैराशिकस्य नयान्तरेण निरासात्; सैद्धान्तिकैस्तु नयमतभेदेन तथाभ्युपगमात्। तथाहि– 'जीवो नोजीवः अजीवो नोजीवः' इत्याकारिते नैगमदेश-संग्रह-व्यवहार-ऋजुसूत्रसांप्रतसमभिरूढा जीवं प्रत्यौपशमिकादिभावग्राहिणः पञ्चस्वपि गतिषु 'जीवः' इति जीवद्रव्यं प्रतियन्ति, 'नोजीवः' इति च नोशब्दस्य सर्वनिषेधार्थपक्षेऽजीवद्रव्यमेव, देशनिषेधार्थपक्षे च देशस्याप्रतिषेधाज्जीवस्य देश-प्रदेशौ; 'अजीवः' इति चाकारस्य सर्वप्रतिषेधार्थत्वात् पर्युदासाश्रयणाच्च जीवादन्यं पुद्गलद्रव्यादिकमेव; 'नो अजीवः' इति च सर्वप्रतिषेधाश्रयणे जीवद्रव्यमेव, देशप्रतिषेधाश्रयणे चाजीवस्यैव देश-प्रदेशौ। एवंभूतस्तु जीवं प्रत्यौदयिकभावग्राहको 'जीवः' इत्याकारिते भवस्थमेव जीवं गृह्णाति, न तु सिद्धं, तत्र जीवनार्थानुपपत्तेः, आत्म-सत्त्वादिपदार्थोपपत्तेरात्म-सत्त्वादिरूपस्तु सोऽपि स्यादेव। 'नोजीवः' इति चाजीवद्रव्यं, सिद्धं वा; 'अजीवः' इति चाजीवद्रव्यमेव, 'नो अजीवः' इति च भवस्थमेव जीवम्, देश-प्रदेशौ तु न स्वीकुरुते संपूर्णवस्तुग्राहित्वादयम्। इत्यधिकं नयरहस्ये[2]।

एतेन 'अन्वयादिमयत्वे वस्तुनो घटदेशो न घटो नाप्यघट इत्यवक्तव्यः स्यात्' इति प्रावादुकोक्तिर्निरस्ता। घट-

---

१ कुम्भो न जीवद्रव्यं जीवोऽपि न भवति कुम्भद्रव्यमिति। तस्माद् द्वावप्यद्रव्यमन्योन्यविशेषितौ भवतः ॥३॥ २ सम्मतिसूत्रे गाथा १२६,१२७,१२८।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पटस्य स्कन्धवृत्तित्वे तत्र 'अपटः' इत्यवोक्तेः, "यथा न खण्डं चक्रम्, सकलं चक्रम्, तथा म धर्मास्तिकायस्य प्रदेशो धर्मास्तिकायः" इति प्रवचनवचनात्। देशवृत्तित्वे च 'नोपटः' इत्येवोक्तेः, तद्देशत्वे सति तद्देशाभावस्य नोपदार्थत्वादिति। एकान्ततिमिरविलुप्तदृशां त्वत्रार्थे महानेवान्धकारः, तथाहि— प्रतीयते तावदयं तन्त्वादिर्न पटादेः पृथगिति सर्वैरविगानेन। तथा च तत्र पटावधिकपृथक्त्वाभाववद्द्रव्यत्वात् पटभेदाभावोऽप्यावश्यकः। न च तत्रान्यादृशमेवापृथक्त्वं प्रतीयते, न तु पृथक्त्वाभावरूपम्, भिन्नयोर्द्रव्ययोरपृथक्त्वायोगादिति वाच्यम्, तयोर्भेदसिद्धावुक्तप्रतीतौ मुख्यपृथक्त्वाभावानवगाहित्वसिद्धिः, तत्सिद्धौ च तयोर्भेदसिद्धिः, अन्यथा भेदधियस्तद्धियैव बाधनादित्यन्योन्याश्रयात्, 'न पृथग्' इति प्रतीतेः सर्वत्रैकाकारत्वेन विषयवैलक्षण्यायोगाच्च।

नन्वेवं क्षीर-नीरयोरपृथक्त्वादभेदः स्यादिति चेत्। किं न स्यात्?। स्वरूपे सांकर्यादिति चेत्। न, अनेकान्ते यथादर्शनं संकीर्णा-ऽसंकीर्णोभयरूपतोपपत्तेः, स्वभावभेदं विना संबन्धसंकरस्याप्यसंभवात्। यद्येवम्, अविभक्तयोः क्षीर-नीरयोरपृथक्त्वमेव, तर्हि हंसचञ्चूविभक्तयोरपि तयोः पृथक्त्वं किं न स्यात्? इति चेत्। न, विभागे पृथक्त्वस्यैवोपपत्तेर्द्रव्याविच्छेदेऽपि पर्यायविच्छेदात्। यदि चैवमनुभवसिद्धमपि तन्तु-पटादीनामपृथक्त्वं प्रतिक्षिप्यते, तदा घटादावपि किं मानम्?। यश्चैतद्दोषभीतोऽवयवा-ऽवयविनोः स्वतन्त्रावेव भेदा-ऽभेदौ स्वीकरोति, तस्यापि पटैकदेशोऽपटः पटश्चेत्यवक्तव्यः स्यात्। तस्माद् 'न समुद्रोऽयं नाप्यसमुद्रः किन्तु समुद्रैकदेशः' इतिवत्, 'नायं पटो नाप्यपटः किन्तु पटैकदेशः' इति व्यवहारनिर्वाहार्थं परस्पराविनिर्भागवृत्त्यन्वय-व्यतिरेकवदेव स्वीकर्तव्यमिति स्थितम् ॥ ३० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तमेव स्पष्टयन्नाह—

अन्वयो व्यतिरेकश्च द्रव्यपर्यायसंज्ञितौ। अन्योन्यव्याप्तितो भेदाभेदवृत्त्यैव वस्तु तौ॥३१॥

अन्वयो व्यतिरेकश्चेत्येतावंशौ द्रव्य-पर्यायसंज्ञितौ– द्रव्यं पर्यायश्चेति द्रव्य-पर्यायपदवाच्यौ। एतेन 'द्रव्यं, गुणाः, पर्यायाश्च' इति विभागः केषाञ्चिदनभिज्ञस्वयूथ्यानां परयूथ्यानां वा निरस्तः, विभिन्ननयग्राह्याभ्यां द्रव्य-पर्यायत्वाभ्यामेव विभागात्। यदि च गुणोऽप्यतिरिक्तः स्यात् तदा तद्ग्रहार्थं द्रव्यार्थिक-पर्यायार्थिकवद् गुणार्थिकनयमपि भगवानुपादेक्ष्यत्, न चैवमस्ति, रूप-रस-गन्ध-स्पर्शानामर्हता तेषु तेषु सूत्रेषु "वण्णपज्जवेहिं" इत्यादिना पर्यायसंज्ञयैव नियमनात्। गुण एव तत्र पर्यायशब्देनोक्त इति चेत्। नन्वेवं गुण-पर्यायशब्दयोरेकार्थत्वेऽपि पर्यायशब्देनैव भगवतो देशना, इति न गुणशब्देन पर्यायस्य, तदतिरिक्तस्य वा गुणस्य विभागौचित्यम्। 'एकगुणकालः' 'दशगुणकालः' इत्यादौ गुणशब्देनापि भगवतो देशनाऽस्त्येवेति चेत्। अस्त्येव संख्यानशास्त्रधर्मवाचकगुणशब्देन, न तु गुणार्थिकनयप्रतिपादनाभिप्रायेण। येन च रूपेण विभिन्नमूलव्याकरणिनयग्राह्यता तेनैव रूपेण विभागः, अन्यथाविभागस्य संप्रदायविरुद्धत्वात्। अत एव "गुण[1]-पर्यायवद् द्रव्यम्" इति सूत्रे गुण-पर्यायपदाभ्यां युगपद-ऽयुगपद्भाविपर्यायविशेषोपादानेऽपि न त्रैविध्येन सामान्यविभाग इति तत्त्वम्। तदिदमाहुः—

"रूव[2]-रस-गंध-फासा असमाणग्गहणलक्खणा जम्हा। तम्हा दव्वाणुगया गुण त्ति ते केइ इच्छंति ॥ १ ॥

---

1 तत्त्वार्थाधिगमसूत्रे ५। ३७। 2 रूप-रस-गन्ध-स्पर्शा असमानग्रहणलक्षणा यस्मात्। तस्माद् द्रव्यानुगता गुणा इति तान् केऽपीच्छन्ति ॥ १॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दूरे ता अण्णत्तं गुणसद्दे चेव भावपारित्थं । किं पज्जवाहिए होज्ज पज्जवे चेव गुणसण्णा ॥ २ ॥
दो पुण नया भगवया दव्वट्ठिअ-पज्जवट्ठिआ णिअया । एत्तो अ गुणविसेसे गुणट्ठिअणओ वि जुज्जंतो ॥ ३ ॥
जं च पुण अरहया तेसु तेसु सुत्तेसु गोअमाईणं । पज्जवसण्णा णिअमा वागरिआ तेण पज्जाया ॥ ४ ॥
परिगमणं पज्जाओ अणेगकरणं गुण त्ति तुल्लट्ठा । तहवि न गुण त्ति भण्णइ पज्जवणयदेसणा जम्हा ॥ ५ ॥
जंपंति अत्थि समए एगगुणो दसगुणो अणंतगुणो । रूवाइपरिणामो भन्नइ तम्हा गुणविसेसो ॥ ६ ॥
गुणसद्दमन्तरेण वि तं तु पज्जवविसेससंखाणं । सिज्झइ, णवरं संखाणसत्थधम्मो ण य गुणो त्ति ॥ ७ ॥
जह दससु दसगुणम्मि य एगम्मि दसत्तणं समं चेव । अहिअम्मि वि गुणसद्दे तहेव एयं पि दट्ठव्वं[3] ॥८[1]॥" इति ।

---

१ दूरे तावदन्यत्वं गुणशब्द एव भावपारार्थ्यम् । किं पर्यवाधिके भवेत् पर्यय एव गुणसंज्ञा ॥ २ ॥
द्वौ पुनर्नयौ भगवता द्रव्यास्तिक-पर्यायास्तिकौ नियतौ । एताभ्यां च गुणविशेषे गुणास्तिकनयोऽपि युज्यमानः ॥ ३ ॥
यच्च पुनरर्हता तेषु तेषु सूत्रेषु गौतमादीनाम् । पर्यवसंज्ञा नियमाद् व्याकृता तेन पर्यायाः ॥ ४ ॥
परिगमनं पर्यायोऽनेककरणं गुण इति तुल्यार्थाः । तथापि न गुण इति भण्यते पर्यवनयदेशना यस्मात् ॥ ५ ॥
जल्पन्त्यस्ति समय एकगुणो दशगुणोऽनन्तगुणः । रूपादिपरिणामो भण्यते तस्माद् गुणविशेषः ॥ ६ ॥
गुणशब्दमन्तरेणापि तत्तु पर्यवविशेषसंख्यानम् । सिध्यति, नवरं संख्यानशास्त्रधर्मो न च गुण इति ॥ ७ ॥
यथा दशसु दशगुणे चैकस्मिन् दशत्वं सममेव । अधिकेऽपि गुणशब्दे तथैवैतदपि द्रष्टव्यम् ॥ ८ ॥
२ मुद्रितसम्मतौ 'एगट्ठा' इति पाठः । ३ सम्मतिप्रकरणे गाथा १०५, १०६, १०७, १०८, १०९, ११०, १११, ११२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तौ– द्रव्य-पर्यायसंज्ञितावन्वय-व्यतिरेकौ, अन्योऽन्यव्याप्तितो हेतोः, भेदाभेदवृत्त्यैव– एकान्तभेदाभेदनियतसंबन्ध-व्यावृत्तया जात्यन्तरात्मिकया वृत्त्यैव, वस्तु– यथास्थितार्थव्यपदेशनिबन्धनम्, अन्यथाऽन्योन्यव्याप्तत्वव्यवहारस्यैव तत्र दुर्घटत्वात् ॥ ३१ ॥

एतदेव विशदतरमाह—

नान्योऽन्यव्याप्तिरेकान्तभेदेऽभेदे च युज्यते। अतिप्रसङ्गादैक्याच्च शब्दार्थानुपपत्तितः॥३२॥

अन्योन्यव्याप्तिः– अन्योन्यव्याप्तत्वशब्दार्थः, एकान्तभेदे, अभेदे च– एकान्ताभेदे चेत्यर्थः, 'प्रतिपाद्ययोरभ्युपगम्यमाने' इति शेषः, न युज्यते– न घटते । कुतः ? इत्याह– अतिप्रसङ्गात्– एकान्तभेदेऽन्योन्यपदार्थोपपत्तावपि व्याप्तिपदार्थानुपपत्तेः, ऐक्याच्च– एकान्ताभेदे व्याप्तिपदार्थोपपत्तावप्यन्योन्यपदार्थानुपपत्तेश्च; शब्दार्थानुपपत्तितः– 'गुण-गुणिनावन्योन्यव्याप्तौ' इत्यादिप्रकृतवाक्यार्थानुपपत्तेः ॥ ३२ ॥

एतदेवान्वयमुखेनाह—

अन्योन्यमिति यद्भेदं व्याप्तिश्चाह विपर्ययम्। भेदाभेदे द्वयोस्तस्मादन्योन्यव्याप्तिसंभवः ३३

यत्– यस्मात्, 'अन्योन्यम्' इति पदं भेदमाह, तद्भिन्नतद्वृत्तित्वे सति तद्भिन्नतद्वृत्तित्वस्यान्योन्यपदार्थत्वात्, 'घट-पटावन्योन्यसंयुक्तौ' इत्यत्र 'घट-पटौ घटभिन्नपटवृत्तित्वे सति पटभिन्नघटवृत्तिर्यः संयोगस्तद्वृत्तौ' इत्यन्वयबोधदर्श-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नात् । व्याप्तिश्च– व्याप्तिपदं च, विपर्ययम्– अभेदम्, आह, 'घटो नीलव्याप्तः' इत्यत्र 'घटो नीलाभिन्नः' इति विवरणात् । तस्माद् द्वयोर्भेदाभेद एवाभ्युपगम्यमाने, अन्योन्यव्याप्तिसंभवः– अन्योन्यव्याप्तिशब्दार्थोपपत्तिः । एवं च गुण-गुण्यादिकमन्योन्यव्याप्तमिति शब्दादेव भेदाभेदसिद्धिः ।

न च 'वह्न्यालोकावन्योन्यं व्याप्तौ' इतिवदत्र परस्परं व्याप्तिप्रत्यय एव समवायेन गुणादेस्तादात्म्येन गुण्यादिव्याप्तत्वात्, तादात्म्येन गुण्यादेश्च समवायेन गुणादिव्याप्तत्वादिति वाच्यम्; नील-घटयोरन्योन्यव्याप्तिप्रतीत्यनुपपत्तेः, क्षीरनीरादिसाधारणान्योन्यव्याप्त्यभिप्रायेणैव तथाप्रयोगाच्चेति भावः । अपिच, 'घटो न नीलरूपम्' 'नीलरूपं न घटात् पृथक्' इति प्रत्यक्षतोऽपि गुण-गुण्यादावनुभूयेते एव भेदाऽभेदौ । न च 'नीलं न घटात् पृथक्' इत्यत्र घटावधिकपृथक्त्वाभाव एवार्थः, घटावृत्तिरूपे घटापृथक्त्वाप्रत्ययात् । न चात्र पृथक्पदस्यासमवेतत्वमर्थः, तथाच नीलं न घटासमवेतमित्यर्थ इति वाच्यम्; 'घटो न नीलात् पृथक्' इत्यस्यानुपपत्तेः, घटस्य नीलासमवेतत्वादेव, 'घटो घटत्वाद् न पृथक्' इत्यत्र घटत्वासमवेतत्वाप्रसिद्धेश्च ।

किञ्च, 'घटो घटाद् न पृथक्' इत्यत्राभेदरूपमपृथक्त्वं प्रतीयते, इत्यन्यत्रापि तदेव । न हि पृथक्त्वं भेदादतिरिच्यते, 'घटः पटात् पृथक्' इत्यस्य 'पटाद् भिन्नः' इतिविवरणात्; पृथगादिपदयोगे पञ्चम्या आनुशासनिकत्वादेव 'घटान्न' इत्यादेरसंभवात् । तदेव चापृथक्त्वं तादात्म्यमिति गीयते, यत् प्रत्यभिज्ञानादिनियामकम् । अत एव पाकरक्ते घटे 'अयं न श्यामः' इति 'श्यामाद् न पृथक्' इति चोपपद्यते, अन्यत्वरूपभेदस्य, पृथक्त्वरूपभेदाभावस्य चान्योन्यानुविद्धस्यो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पपत्तेः । न हि 'पृथक्त्वमन्यत्वमेव' इति नव्यनैयायिकानामिवास्माकमेकान्ताभ्युपगमः, येनानुपपत्तिः स्यात् । न च तेषामप्यत्र 'न पृथक्' इत्यस्य 'तत्तद्व्यक्तित्वावच्छिन्नभेदाभाववान्' इत्यर्थाद् नानुपपत्तिरिति वाच्यम्, सामान्यसंशयानिवृत्तेः, श्यामपदस्य लक्षणां विनापि यथाश्रुतार्थप्रतिसंधानाच्च ।

एतेन 'भेदा-ऽभेदयोरेकदैकत्र विरोध एव । न च भेदोऽन्योन्याभाव एव, अभेदस्तु तादात्म्यमिति न विरोधः, तादात्म्यस्याभेदव्यवहारेऽहेतुत्वात्' इति गङ्गेशाकूतं निरस्तम्; तादात्म्येनापि प्रकृते 'न पृथक्' इत्यभेदाभिलापरूपस्याभेदव्यवहारस्य जननादेव; 'प्रमेयमभिधेयम्' इत्यादावपि प्रमेयसामान्येऽभिधेयभेदस्तोमाभावविवक्षायां तदभेदव्यवहारोपपत्तेः, वने वनाभेदव्यवहारवत्; न चेदेवम्, प्रमेया-ऽभिधेययोस्तादात्म्यमपि दुर्घटं स्यात्, भेदाभेदविकल्पग्रासात् । अभिधेयतादात्म्यमभिधेयत्वमेव, अभिधेयवत्' इत्यादिधिया विशेषश्च । तत्र तादात्म्यस्यासंसर्गत्वात्, स्वरूपसंबन्धस्यैव संसर्गत्वादिति तु तुच्छम्, अभिधेयत्वा-ऽभिधेयस्वरूपाविशेषात् ।

एतेन 'तादात्म्यत्वादिसंसर्गतादिना विशेषः' इत्यपि निरस्तम्; अतिरिक्तमेव तादात्म्यत्वम्, इत्थमेव 'भूतलं संयोगि' भूतलं संयोगिमत्' इति ज्ञानयोर्वैलक्षण्यम्, आद्ये तादात्म्यत्वेन, अन्त्ये संयोगत्वादिना संयोगादेः प्रकारतावच्छेदकत्वस्वीकारात् । तादात्म्यमेव बाधिकम्, तत्तत्तादात्म्यत्वस्य तद्वृत्तिनानागुणादौ कल्पने, तत्र कारणतावच्छेदकत्वादिकल्पने च गौरवात् । इत्यपि न पेशलम्, अतिरिक्ततादात्म्यसंबन्धानुपपत्तेः, शबलवस्तुविशेषं विना धीविशेषानुपपत्तेः संयोगि-संयोगिमतोरेव कथञ्चिद्विशेषानुभवाच्चेति दिग् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च, अत्यन्तभिन्ना-ऽभिन्नाभ्यां व्यावृत्तं सामान्याधिकरण्यमपि भेदाभेदे प्रमाणम्, भेदाभेदोभयत्वेन साध्यत्वे साध्याप्रसिद्धेरभावात् । साध्यतावच्छेदकावच्छिन्नस्य हि प्रसिद्धिरपेक्षिता, न ह्येकत्र तत्प्रसिद्धिरपि, गौरवात्, घटे घटत्व-सत्तोभयानुमित्युच्छेदप्रसङ्गाच्च । एतेन 'एकान्तभेदाभेदान्यतराभावस्य भेदविशिष्टाभेदस्य वा साध्यतायां साध्याप्रसिद्धिः, प्रत्येकं साध्यतायां चासाधारण्यम्' इति निरस्तम् । न चोभयत्वमप्येकविशिष्टापरत्वमेवेत्युक्तदोषानतिवृत्तिरेवेति वाच्यम्, अविशिष्टयोरपि गोत्वा-ऽश्वत्वयोरुभयत्वप्रत्ययात् । न चैवं स्वतन्त्रभेदाभेदोभयसिद्धावपि मिलिततदुभयासिद्धयोद्देश्यासिद्धेरर्थान्तरत्वम्, अन्तर्मुखव्याप्त्या मिलितत्वसिद्धेः; अन्यथा पर्वते वह्निसामान्यसिद्धावपि पर्वतीयवह्नेरसिद्धिप्रसङ्गात् । इत्यन्यत्र विस्तरः ।

न च व्यतिरेकव्याप्तौ व्याप्याप्रसिद्धिः, प्रतियोगिमति तदभावायोगादिति वाच्यम्; तेन रूपेण प्रतियोगिमति तेन रूपेण तदभावस्यैवायोगात् । एतेन 'तत्रैव तत्-तदभावौ भिन्नावच्छेदेन वर्तेते, ज्ञायेते च; यथा वृक्षे मूल-शाखाद्यवच्छेदेन संयोग-तदभावौ, तदिह घटे घटत्वावच्छेदेन नीलत्वावच्छिन्नभेदो वर्तताम्, ज्ञायतां वा, तदभावस्तु किमवच्छेदेन ?' इति निरस्तम्, अन्योन्यव्याप्तयोस्तयोर्देशभेदेनावृत्तावपि द्रव्यार्थता-पर्यायार्थतारूपभेदेनोपपत्तेः, यथेदंत्व-द्वित्वाभ्यामेकत्व-द्वितयोः । विचित्ररूपत्वाच्च वस्तुनो नयभेदेन विचित्रा प्रतीतिः, यथा शाखावच्छेदेन संयोगः, तदभावश्च मूलादिनानावच्छेदेन; तथा घटे नीलभेदोऽपि घटत्वावच्छेदेन, तदभावस्तु तत्तद्व्यक्तित्वादिनानावच्छेदेन । एकप्रतियोगितावच्छेदकावच्छिन्नभेद-तदभावयोर्विरुद्धाधिकरणतावच्छेदकावच्छेदेन वृत्तित्वनियमस्त्वसिद्धः, विरुद्धत्वस्थले विभिन्नत्वस्यैव लाघवेन निवेशौचित्यात्, इत्यपि नयविशेषानुरुद्धं शुद्धमनुजानीमः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि च, 'नील-घटयोरभेदः' इत्यादिप्रयोग एव भेदाभेदाभ्युपगमं विना न सुघटः, चार्थे द्वन्द्वानुशासनात्, भेदस्य च चार्थत्वात् । अथ द्वन्द्वेन भेदस्य संसर्गतया प्रकारतया वा भानम्, द्वन्द्वस्य परस्परान्वितपदार्थबोधकत्वाच्च 'चैत्र-चैत्रपुत्रौ' इत्यादौ द्वितीयस्यैव चैत्रपदस्य स्वार्थसंसर्गधीजनकत्वात्, नामार्थयोर्भेदेनान्वयात्, द्वयोः प्राधान्यानुभवविरोधाच्चेति चेत् । न, द्वन्द्वे भेदाभानेऽभेदभ्रमाद्यनिवृत्तिप्रसङ्गात्, भिन्नतया भानादेव, द्वयोः प्राधान्यानुभवाच्च । किञ्च, भेदं विना द्विवचनानुपपत्तिः, द्वित्वस्य भेदनियतत्वात् । न च 'षडेव पदार्थाः' इत्यादौ षट्त्वादिवदत्र विभिन्नधर्मप्रकारकबुद्धिविषयत्वरूपं द्वित्वं, तच्च प्रकृते न भेदनियतमिति वाच्यम्, द्विवचनाद् निरुपचरितस्यैव द्वित्वस्य प्रतीतेः 'एको द्वौ' इत्यप्रतीतेरेकत्वावच्छिन्ने द्वित्वाविवक्षयैवोपपत्तेः । विचित्रनयविवक्षया तु तत्र द्वित्वतो(नो)द्वित्वादिकं प्रतीयत एव ।

'यद्यद्धर्मप्रकारकबुद्धिविषयत्वं गौणीकृतद्वित्वादिव्यवहारनिमित्तं तत्तद्धर्मावच्छेदेन पर्याप्तम्, तेन 'एको द्वौ' इत्यादेर्व्युदासः' इत्येकान्तस्तु न शोभते, 'रूप-रसवतोरभेदः' इतिवत् 'रूप-रसवान् द्वौ' इत्यस्य प्रसङ्गात्, अप्रसङ्गाच्च 'घटौ' इत्येकशेषस्य । तत्र घटत्वादेर्द्वित्वावच्छेदकत्वेऽन्यत्राप्येकत्र घटत्वेन द्वित्वबोधस्य प्रमाणत्वापत्तेः । किञ्च, पदार्थभेदनियतत्वादपि द्वन्द्वस्य नील-घटयोरभेदसंवलितो भेदः । 'प्रतिपाद्यभेदनियतत्वमेव तस्य, क्वचित् पदार्थभेदे, क्वचित् पदार्थतावच्छेदकभेदे तत्प्रवृत्तेः' इति त्वेकघटाभिप्रायकघटपदद्वयेऽपि द्वन्द्वापत्तेर्न शोभते ।

अथैकपदप्रतिपाद्यत्वसामानाधिकरण्येनापरप्रतिपाद्यत्वावच्छिन्नभेदे एकपदजन्यप्रतिपत्तिविषयितात्वसामानाधिकरण्येनापरपदजन्यप्रतिपत्तिविषयितात्वावच्छिन्नभेदे वा द्वन्द्वः, इत्थमेव मेयवदभिधेयवद्बोधकतदादिपदद्वन्द्वानपवाद इति चेत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न, विषयिताया ज्ञानस्वरूपत्वे तदभेदे तदभेदात्, तदिदंपदाभ्यां द्वन्द्वानुपपत्तेश्च, ताभ्यां तद्व्यक्तेरेवोपस्थापनात्, तत्तेदंतयोः परेण व्यक्त्यतिरिक्तयोरनभ्युपगमात्, संस्कारज-प्रत्यक्षज्ञानाभ्यामेव तदिदंपदोल्लेखसमर्थनात् । यदि च विषयाभेदेऽपि ज्ञानविषयताभेदः, तदा साकारवादापत्तिरित्यादि सूक्ष्ममीक्षणीयम् । 'द्रव्य-पर्याययोर्वास्तवोऽभेद एव, संख्यासंज्ञालक्षणकार्यभेदात् त्वस्वाभाविको भेदः' इति केषांचिन्मतमरमणीयम्, भेदस्यास्वाभाविकत्वे संख्यादीनां निरालम्बनत्वप्रसङ्गात्, प्रमीयमाणत्वेनावास्तवत्वायोगाच्च । प्राधान्यमप्राधान्यं पुनराभिमानिकमेव । इति विवेचितमन्यत्र ॥ ३३ ॥

तदिदमखिलमभिप्रेत्योपसंहरन्नाह —

एवं न्यायाविरुद्धेऽस्मिन्विरोधोद्भावनं नृणाम् । व्यसनं वा जडत्वं वा प्रकाशयति केवलम् ॥ ३४ ॥

एवम्– उक्तदिशा, न्यायाविरुद्धे– प्रमाणाप्रतिषिद्धे, अस्मिन्– भेदाभेदे, नृणां– तार्किकपुरुषाणां, विरोधोद्भावनम्– 'विरुद्धौ भेदा-ऽभेदौ नैकत्र संभवतः' इत्यभिधानम्, व्यसनं– जानतामप्यभिनिवेशेन स्याद्वादमात्सर्यधीः, जडत्वं वा– सूक्ष्मार्थानुत्प्रेक्षित्वलक्षणं बुद्धिमान्द्यं वा, केवलं प्रकाशयति, तत्कार्यत्वादस्य, वस्तुतो विरोधासिद्धेः ॥ ३४ ॥

एतदेव स्पष्टयति—

न्यायात्खलु विरोधो यः स विरोध इहोच्यते । यद्वदेकान्तभेदादौ तयोरेवाप्रसिद्धितः ॥ ३५ ॥

न्यायात्– प्रमाणात्, यः खलु विरोधः– अनुभवबाधलक्षणः, स एह– प्रकृतविचारे, विरोध उच्यते लोकेन, ॥२६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नान्यः । किंवत् ? इत्याह- यद्वत्- यथा, 'एकान्तभेदादावभ्युपगम्यमाने' इति शेषः, तयोरेव- द्रव्य पर्याययोरेव, अप्रसिद्धितः- स्वरसोदयदनुभवानुपपत्तेः ॥ ३५ ॥

कथम् ? इत्याह—

मृद्द्रव्यं यन्न पिण्डादिधर्मान्तरविवर्जितम् । तद्वा तेन विनिर्मुक्तं केवलं गम्यते क्वचित् ॥३६॥

मृद्द्रव्यं यद् यस्माद् न पिण्डादिधर्मान्तरविवर्जितं केवलं क्वचिद् गम्यते । तेन द्रव्यात्मकाभेदमात्राभ्युपगमे पिण्डादिभेदाप्रसिद्धिः। तद् वा- पिण्डादिधर्मान्तरं, तेन- मृद्द्रव्येण, विनिर्मुक्तं- केवलमाकारमात्रमेव, न क्वचिद् गम्यते। तेन पर्यायात्मकभेदमात्राभ्युपगमे मृद्द्रव्यादिभेदाप्रसिद्धिः ॥ ३६ ॥

ततः किम् ? इत्याह—

ततोऽसत्तत्तथा न्यायादेकं चोभयसिद्धितः । अन्यत्रातो विरोधस्तदभावापत्तिलक्षणः॥३७॥

ततः- तस्मात्, तत्- मृद्द्रव्यपिण्डादि, तथा- परस्परनिरपेक्षम्, न्यायात्- अननुभवलक्षणात्, असत्- असिद्धम्, एकं च- एकमेव मृद्द्रव्यपिण्डादि, 'असत्' इति योगः, उभयसिद्धितः- तथोभयोपलब्धेः । यत एवम्, अन्यत्र- केवलभेदपक्षेऽभेदपक्षे वा, अतो विरोधः, तदभावापत्तिलक्षणः- द्रव्य-पर्यायाभावप्रसङ्गलक्षणः, स्वानभिमतार्थोपलम्भे परस्य स्वेनैव स्वाभिमतार्थोपलम्भेऽपि परेणासद्विषयत्वस्य वक्तुमशक्यत्वात्, स्वतन्त्रधर्म-धर्मिस्वीकारेऽपि वैशेषिकादीनां तत्र भेदाभेद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

थियोरेकतरभ्रान्तत्वे तदितरभ्रान्तत्वस्य तुल्यत्वात् । ततः सामानाधिकरण्यानुभवबाधरूपो विरोधो न भेदाभेदयोरिति सिद्धम् ।

सहानवस्थानानियमादनयोर्बाधितमेव सामानाधिकरण्यमिति चेत् । न, तन्नियमासिद्धेः, वह्न्यादौ रूपस्य गन्धासामानाधिकरण्यदर्शनेऽपि पृथिव्यां तत्सामानाधिकरण्यवत् , पर्वत-महानसयोः पर्वतीय-महानसीयवह्न्यभावयोः परस्परासमानाधिकरण्यदर्शनेऽपि ह्रदे तदुभयसामानाधिकरण्यवद् भेदाभेदयोः प्रतियोगिविशेषितयोरन्यत्रासमाविष्टयोर्दर्शनेऽपि प्रकृते समावेशसंभवात् । नन्वेवं गन्ध-रूपयोरिव भेदा-ऽभेदयोरप्यनवच्छिन्नत्वं स्यादिति चेत् । अनवच्छिन्नयोरनवच्छिन्नत्वमेव, अवच्छिन्नयोश्चावच्छिन्नत्वमेवेति किं नावबुध्यसे ?। वस्तुतो न कश्चिदेकान्तः, रूप-गन्धयोरपि भिन्नस्वभावावच्छेदेन पृथिवीवृत्तित्वोपगमात् , अन्यथैकत्वापातात् , 'रूपस्वभावेन गन्धो न पृथिवीवृत्तिः' इति व्यवहाराच्चेति । एतेन परस्परग्रहप्रतिबन्धकग्रहविषयत्वरूपो विरोधोऽपि निरस्तः, भेदा-ऽभेदग्रहयोर्विलक्षणसामग्रीकत्वेनैकग्रहेऽपराग्रहात् ; तेन रूपेण च रूपवत्ताग्रहेऽपि गन्धवत्ताऽग्रहादिति द्रष्टव्यम् ॥२७॥

दोषान्तरनिराकरणायाह—

जात्यन्तरात्मके चास्मिन्नानवस्थादिदूषणम् । नियतत्वाद्विविक्तस्य भेदादेश्चाप्यसंभवात् ३८

जात्यन्तरात्मके च– अन्योन्यानुविद्धे च, अस्मिन्– भेदाभेदेऽभ्युपगम्यमाने, अनवस्थादि दूषणं न भवति– 'येन स्वभावेन भेदस्तेनाभेदः' इत्युक्तौ विरोधः, इति भिन्नाभ्यां स्वभावाभ्यां तदङ्गीकारे तयोरपि तत्र वृत्तौ स्वभावभेदगवेषणा- ॥२६५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यामनवस्था, आदिना ताभ्यां स्वभावाभ्यां भेदाभेदस्वभावयोः, भेदाभेदस्वभावाभ्यां च तयोः स्वभावयोर्वृत्तित्वे परस्पराश्रयः, स्वापेक्षितापेक्षितापेक्षायां चक्रकम्, स्वापेक्षायामेव चात्माश्रयः, येन स्वभावेन भेदस्याधिकरणं वस्तु तेनाभेदस्य, येन च स्वभावेनाभेदस्याधिकरणं तेन भेदस्य चेति संकर इत्यादि द्रष्टव्यम्। कथमेतद् दूषणं न भवति? इत्याह– नियतत्वात्– स्वभावनियतत्वाद् भेदाभेदवस्तुनः, तथा चोत्पत्ति-ज्ञप्त्यप्रतिबन्धाद् नानवस्थादिकम्। तदुक्तम्– 'न चानवस्था, अन्यनिरपेक्षस्वस्वरूपत एव तथात्वोपपत्तेः' इति। अन्यैरप्युक्तम्– "मूलक्षयकरीं प्राहुरनवस्थां हि दूषणम्" इति। तथा, विविक्तस्य– अनुभवानुपातिस्वभावबहिर्भूतस्य, भेदादेश्च– एकान्तवादिपरिकल्पितस्य, असंभवात्, तेन न संकर इति भावः॥ ३८॥

किञ्च, परेण प्रसङ्ग एव कर्तुं न शक्यते, भेदादिपदानां केवलभेदादेरदर्शनात्, तत्र शक्तिग्रहासंभवेन प्रयोगस्यैवानुपपत्तेरित्यभिप्रेत्याह—

नाभेदो भेदरहितो भेदो वाऽभेदवर्जितः। केवलोऽस्ति यतस्तेन कुतस्तत्र विकल्पनम्?॥३९॥

नाभेदो भेदरहितः, भेदो वाऽभेदवर्जितः, केवलोऽस्ति, 'ज्ञायते वा' इति शेषः; यतस्तेन कुतः, तत्र– केवले भेदेऽभेदे वा, विकल्पनं– प्रसङ्गापादनम्, परस्य युज्यते, आश्रयस्यैवासिद्धेः?। सिद्धौ वा शबलस्वभावस्य तस्य व्याघातेन परविकल्पानवतारात्, आभाससिद्धदूषणेन च वस्त्वदूषणादिति भावः॥ ३९॥

इदमेवाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

येनाकारेण भेदः किं तेनासावेव किं द्वयम् ? । असत्त्वात्केवलस्येह सतश्च कथितत्वतः ॥४०॥

येनाकारेण– येन स्वभावेन, भेदः, किं तेनासावेव– भेद एव, उत द्वयम्– भेदश्चाभेदश्चेति ?; आद्य एकान्तः, द्वितीये व्यतिकर इति भावः; एतद् विकल्पनं 'कुतः' इति प्राक्तनेन योगः ? । कुतः ? इत्याह— इह प्रक्रमे, केवलस्य भेदस्यासत्त्वात्– असिद्धत्वात्, सतश्च– सिद्धस्य च, कथितत्वतः– उक्तशबलस्वभावत्वात् । ततो निर्विषयाः सर्वे विकल्पा इति भावः ॥ ४० ॥

उपचयमाह—

यतश्च तत्प्रमाणेन गम्यते ह्युभयात्मकम् । अतोऽपि जातिमात्रं तदनवस्थादिकल्पनम् ॥४१॥

यतश्च तत्– अधिकृतवस्तु, प्रमाणेन– प्रत्यक्षेण, हि– निश्चितम्, उभयात्मकं– जात्यन्तरापन्नभेदाभेदभाजनम्, गम्यते, अतोऽपि तत्– परोक्तम्, इहानवस्थादिकल्पनम्, जातिमात्रम्– निर्युक्तिकविकल्पमात्रम्, प्रत्यक्षबाधात्; अन्यथा घटादेरपि विकल्पविशीर्णतया शून्यतापातादिति ॥ ४१ ॥

दोषान्तरनिराकरणमप्यतिदिशन्नाह—

एवं ह्युभयदोषादिदोषा अपि न दूषणम् । सम्यग्जात्यन्तरत्वेन भेदाभेदप्रसिद्धितः ॥४२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं हि– भेदाभेदात्मकवस्तुनः प्रत्यक्षसिद्धत्वे हि, उभयदोषादिदोषा अपि– उभयदोषाभ्यां साधारणाकारेण निश्चेतुमशक्यत्वात् संशयः, ततोऽप्रतिपत्तिः, ततो विषयव्यवस्थाहानिरित्यादयोऽपि, न दूषणम् । कुतः ? इत्याह– सम्यग्– नयप्रमाणोपयोगेन, जात्यन्तरत्वेन– अन्योन्यव्याप्तत्वेन, भेदाभेदप्रसिद्धितः– भेदाभेदनिश्चयात् । अयं भावः– प्रत्येकं नयार्पणया प्रत्येकरूपेण, युगपत्तदर्पणया चोभयरूपेण, सप्तभङ्ग्यात्मकप्रमाणाच्च प्रतिनियतसकलरूपैर्निश्चयाद् नोभयदोषादितः संशयादिकम् । दुर्नयवासनाजनितं संशयादिकं चेदृशविशेषदर्शननिरस्यमिति न मिथ्यात्वदोषात् तथाऽनिश्चीयमानमपि न तथा वस्त्विति स्मर्तव्यम् । न ह्ययं स्थाणोरपराधो यदेनमन्धो न पश्यतीति ॥ ४२ ॥

यदनेनापाकृतं तदुपन्यस्यति—

एतेनैतत्प्रतिक्षिप्तं यदुक्तं पूर्ववादिभिः । विहायानुभवं मोहाज्जातियुक्त्यनुसारिभिः॥४३॥

एतेन– अनन्तरोदितेन, एतत्– वक्ष्यमाणम्, प्रतिक्षिप्तं– निराकृतम्, यत्, अनुभवम्– अविगानेन प्रवृत्तं शबलाध्यक्षम्, मोहात्– कुतर्कवासनाजनितादज्ञानात्, विहाय– अप्रामाण्य-संशयादिविषयीकृत्य, जातियुक्त्यनुसारिभिः– असद्विकल्पमात्रकदाग्रहग्रहिलैः, पूर्ववादिभिः– देवबन्धुप्रमुखैः, उक्तम् ॥ ४३ ॥

तद्वचनमेवाह—

'द्रव्य-पर्याययोर्भेदे नैकस्योभयरूपता । अभेदेऽन्यतरस्थाननिवृत्ती चिन्त्यतां कथम्' ? ४४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्य-पर्याययोर्भेदेऽभ्युपगम्यमाने नैकस्य वस्तुन उभयरूपता, तयोर्भेदाभिधानात्, एवं चैकमुभयमित्यसिद्धम्। अभेदे पुनरभ्युपगम्यमाने कथमन्यतरस्थान-निवृत्ती- द्रव्यान्वय-पर्यायविच्छेदौ ? इति चिन्त्यताम्, एकस्य निवृत्ति-स्थित्य-नुपपत्तेः ॥ ४४ ॥

अत्रैव हेतुमाह—

'यन्निवृत्तौ न यस्येह निवृत्तिस्तत्ततो यतः। भिन्नं नियमतो दृष्टं यथा कर्कः क्रमेलकात्' ४५

इह- जगति, यन्निवृत्तौ यस्य न निवृत्तिस्तदनिवर्तमानं, ततः- निवर्तमानात्, यतः- यस्मात्, नियमतः- सामान्यव्याप्तिबलात्, भिन्नं दृष्टं- भिन्नमनुमितम्। निदर्शनमाह- यथा कर्कः- अश्वविशेषः, क्रमेलकात्- उष्ट्राद् निवर्तमानात्, अनिवर्तमानो भिन्नो दृष्ट इति भावः ॥ ४५ ॥

निदर्शितार्थमेव प्रकृते योजयन्नाह—

निवर्तते च पर्यायो न तु द्रव्यं ततो न सः। अभिन्नो द्रव्यतोऽभेदे-निवृत्तिस्तत्स्वरूपवत् ४६

निवर्तते च पर्यायः- पिण्डादिः, न तु द्रव्यं- मृदादि। ततः सः- पर्यायः, द्रव्यतोऽभिन्नो न, किन्तु भिन्न एव, यतोऽभेदे तत्स्वरूपवत्- मृद्द्रव्यस्वरूपवत्, अनिवृत्तिः स्यात् पर्यायस्य। अथवा, नञोऽप्रश्लेषे निवृत्तिः स्याद् मृद्द्रव्यस्य, तत्स्वरूपवत्- पर्यायस्वरूपवदिति व्याख्येयम् ॥ ४६ ॥ ॥२६७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथैतत् प्रतिक्षिप्तं तथा योजयन्नाह—

प्रतिक्षिप्तं च यद्भेदाभेदपक्षोऽन्य एव हि। भेदाभेदविकल्पाभ्यां हन्त! जात्यन्तरात्मकः॥४७॥

प्रतिक्षिप्तं चेदम्, यद्– यस्मात्, अन्य एव हि– निश्चितं विलक्षण एव, भेदाभेदविकल्पाभ्यां– प्रत्येकभेदाभेदपक्षाभ्याम्, हन्त! जात्यन्तरात्मकः– इतरेतरगर्भस्वात्मा, भेदाभेदपक्षः। 'हन्त' इति परानवबोधनिबन्धनखेदव्यञ्जकम्॥ ४७॥

यदि नामैवं ततः किम्? इत्याह—

जात्यन्तरात्मकं चैनं दोषास्ते समियुः कथम्। भेदेऽभेदे च येऽत्यन्तजातिभिन्ने व्यवस्थिताः?

जात्यन्तरात्मकं चैनं– भेदाभेदविकल्पम्, ते– दोषाः, कथं समियुः– आगच्छेयुः, येऽत्यन्तजातिभिन्ने भेदेऽभेदे च व्यवस्थिताः– लब्धप्रसराः। एकान्तभेद एव ह्येकस्योभयरूपतानुपपत्तिदोषः, एकान्ताभेद एव चान्यतरास्थिति-निवृत्त्य-नुपपत्तिः। भेदाभेदे तु न कोऽपि दोषावकाश इति।

अत्रायं संप्रदायः– प्रत्येकमुपढौकमानो दोषो न ढौकते जात्यन्तरतापत्तौ। दृष्टा हि कैवल्यपरिहारेण तत्प्रयुक्तायाः परस्परानुवेधेन जात्यन्तरभावमापन्नस्य गुड-शुण्ठीद्रव्यस्य कफ-पित्तदोषकारिताया निवृत्तिः; तदाहुः—

"गुडो हि कफहेतुः स्याद् नागरं पित्तकारणम्। द्वयात्मनि न दोषोऽस्ति गुडनागरभेषजे॥ १॥" इति।

अथोक्तदोषनिवृत्तिर्न जात्यन्तरनिमित्ता, किन्तु मिथोमाधुर्य-कटुकत्वोत्कर्षहानिप्रयुक्तेति चेत्। न, द्वयोरेकतरबलवत्त्व

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवान्यापकर्षसंभवात्, तन्मन्दतायामपि मन्दपित्तादिदोषापत्तेश्च। एतेनेतरेतरप्रवेशादेकतरगुणपरित्यागोऽपि निरस्तः, अन्यतरदोषापत्तेः, अनुभवबाधाच्च। अथ मिलितगुड शुण्ठीक्षोदेन नैकं द्रव्यमारभ्यते, विजातीयानां द्रव्यानारम्भकत्वात्, गुडत्व-शुण्ठीत्वसंकरप्रसङ्गात्; किन्तु कारणविशेषोपनीतरसविशेषवद् गुड-शुण्ठीक्षोदसमाजादेव धातुसाम्याद् गुणदोषनिवृत्तिरिति चेत्। न, समुदितगुड-शुण्ठीद्रव्यस्याप्येकत्वपरिणतिमत एवोपलम्भात्, धातुसाम्ये रसविशेषवद् द्रव्यविशेषस्यापि प्रयोजकत्वात्, द्रव्यादिवैचित्र्यादाहारपर्याप्तिवैचित्र्योपपत्तेः, अनेकान्ते सांकर्यासंभवात्, नृसिंहत्ववदुपपत्तेः। अथ समुदितगुडशुण्ठीद्रव्यं प्रत्येकगुड-शुण्ठीभ्यां विभिन्नमेकस्वभावमेव द्रव्यान्तरम्, न तु मिथोऽभिव्याप्यावस्थितोभयस्वभावं जात्यन्तरमिति चेत्। न, तस्य द्रव्यान्तरत्वे विलक्षणमाधुर्य-कटुकत्वाननुभवप्रसङ्गात्, एकस्वभावत्वे दोषद्वयोपशमाहेतुत्वप्रसङ्गात्, उभयजननैकस्वभावस्य चानेकत्वगर्भत्वेन सर्वथैकत्वायोगात्, एकया शक्त्योभयकार्यजननेऽतिप्रसङ्गात्, विभिन्नस्वभावानुभवाच्च। तस्माद् माधुर्य-कटुकत्वयोः परस्परानुवेधनिमित्तमेवोभयदोषनिवर्तकत्वमित्यादरणीयम्।

ननु जात्यन्तरत्वेऽपि प्रत्येकदोषनिवृत्तिरिति न नियमः, पृथक् स्निग्धो-ष्णयोः कफ-पित्तकारित्ववत् समुदितस्निग्धोष्णस्यापि माषस्य तथात्वादिति चेत्। न, माषे स्निग्धो-ष्णत्वयोर्जात्यन्तरात्मकत्वाभावात्, अन्योन्यानुवेधेन स्वभावान्तरभावनिबन्धनस्यैव तत्त्वात्; अत्र च स्निग्धो-ष्णत्वयोर्गुञ्जाफले रक्तत्व-कृष्णत्वयोरिव खण्डशो व्याप्यावस्थानात्, जात्यन्तरात्मकस्निग्धोष्णत्वशालिनि च दाडिमे श्लेष्म-पित्तोभयदोषाकारित्वमिष्टमेव, "स्निग्धोष्णं दाडिमं हृद्यं श्लेष्म-पित्ताविरोधि च" इति वैद्यकवचनादिति। इदमिह तत्त्वम्– तद्भेदस्य तदेकत्वाभावादिनियतत्वेऽपि जात्यन्तरानात्मकस्यैव विलक्षणस्य तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथात्वात्, विलक्षणगुडत्वस्य कफकारितानियतत्ववद् न दोषः। एतेन 'मया भेदसामान्ये तन्नियमः कल्पनीयः, त्वया तु जात्यन्तरानात्मके तत्र, इति गौरवम्' इति निरस्तम्, प्रातिस्विकरूपेणैव तन्नियमोपपत्तेरिति दिग्॥ ४८॥

देशयति—

किञ्चिन्निवर्ततेऽवश्यं तस्याप्यन्यत्तथा न यत्। अतस्तद्भेद एवेह निवृत्त्याद्यन्यथा कथम्?॥

तस्यापि— अधिकृतस्यापि वस्तुनः, किञ्चिदवश्यं निवर्तते, यदन्यत् किञ्चित् तथा न— न निवर्तत इत्यर्थः। अतः— निवर्तमानात्, तद्भेद एव— तस्यानिवर्तमानस्यांशस्य भेद एव, अन्यथा निवृत्त्यादि— निवृत्तिश्चानिवृत्तिश्चेति, कथम्?॥ ४९॥

अत्रोत्तरम्—

तस्येति योगसामर्थ्याद्भेद एवेति बाधितम्। अभिन्नदेशस्तस्येति यत्तद्व्याप्त्या तथोच्यते॥

तस्येति योगसामर्थ्यात्—'तस्य किञ्चिद् निवर्तते' इत्यत्र तस्येति षष्ठ्यर्थसंबन्धानुभवप्रामाण्यात्, भेद एवेति बाधितं परस्य वचनम्। ननु न बाधितमेतत्, 'चैत्रस्य धनम्' इत्यादौ भेद एव षष्ठ्यर्थसंबन्धदर्शनादित्याशङ्कायामाह— यत्- यस्मात्,'तस्य' इति तद्व्याप्त्या— तत्स्वभावानुवेधेन, अभिन्नदेशः, तथा निवर्तत इति क्रियोपसंदानेन, उच्यते; तथा च 'तस्य' इत्यत्र 'राहोः शिरः' इतिवदभेदे षष्ठी, समवायनिरासात्, इतरसंबन्धानुपपत्तेरिति भावः॥ ५०॥

निगमयन्नाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतस्तद्भेद एवेति प्रतीतिविमुखं वचः। तस्यैव च तथाभावात्तन्निवृत्तीतरात्मकम्॥५१॥

अतः– 'तस्य' इत्यस्याभेदं विनाऽनुपपत्तेः, 'तद्भेद एव' इति वचः, प्रतीतिविमुखं– प्रत्यक्षादिविरुद्धम्। कुतः? इत्याह— तस्यैव च– वस्तुनः, तथाभावात्– तथापरिणमनात्, तद्– वस्तु, निवृत्तीतरात्मकम्– निवृत्त्य-ऽनिवृत्त्यात्मकं यत इति ॥ ५१ ॥

इत्थं चैतदङ्गीकर्तव्यमित्याह—

नानुवृत्तिनिवृत्तिभ्यां विना यदुपपद्यते। तस्यैव हि तथाभावः सूक्ष्मबुद्ध्या विचिन्त्यताम्॥५२

नानुवृत्ति-निवृत्तिभ्यां– प्रत्यक्षसिद्धाभ्यां स्वभावाभ्यां, विना, यद् वस्तु, उपपद्यते, तस्यैव– वस्तुनः, तथाभावः– तथापरिणमनम्, इति सूक्ष्मबुद्ध्या विचिन्त्यतामेतत् ॥ ५२ ॥

उपसंहरन्नाह—

तस्यैव तु तथाभावे तदेव हि यतस्तथा। भवत्यतो न दोषो नः कश्चिदप्युपपद्यते ॥ ५३ ॥

तस्यैव तु तथाभावे सिद्धे सति, तदेव हि यतस्तथा भवति– कारणमेव कार्यतया परिणमत इत्युक्तं भवति। अतो न दोषो नः– अस्माकं, कश्चिदपि। एतदुक्तं भवति— कथञ्चिदनिवर्तमानाभिन्नस्वभावं सद् निवर्तते, तथा, निवर्तमानाभिन्नस्वभावं च कथञ्चिदवतिष्ठत इति प्रतीतिसिद्धमेतत्; 'तदेव मृद्द्रव्यं कुशूलात्मना निवर्तते' इत्यत्र च तदाऽनिवर्तमानाभि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भस्वभावपरामर्शात्, 'तदेव मृदात्मनाऽवतिष्ठते' इत्यत्र च तदा निवर्तमानाभिन्नस्वभावपरामर्शात् ॥ ५३ ॥

ननु निवर्तमाना-ऽनिवर्तमानयोरेकेनाग्रहणात् कथं निवृत्त्य-ऽनिवृत्त्यात्मकैकग्रहः ? इत्यत आह—

इत्थमालोचनं चेदमन्वयव्यतिरेकवत् । वस्तुनस्तत्स्वभावत्वात्तथाभावप्रसाधकम् ॥५४॥

इत्थं च– उक्तयुक्त्या च, इदं– निवृत्त्य-ऽनिवृत्त्यात्मकवस्तुग्राहि, आलोचनम्, अन्वय-व्यतिरेकवत्– उपयोगात्मनाऽन्वयि, अवग्रहे-हा-ऽपाय-धारणात्मना च परस्परं व्यतिरेकि, वस्तुनस्तत्स्वभावत्वात्– अन्वय-व्यतिरेकिस्वभावत्वात्, तथाभावप्रसाधकम्– अन्वय-व्यतिरेकस्वभावग्राहकम् । एकेनैव ह्युपयोगेन तदेव वस्तु सामान्यतोऽवगृह्यते, ततो निवृत्त्य-ऽनिवृत्तिभ्यामीह्यते, ततः 'इत्थं निवृत्तमित्थं चानिवृत्तम्' इति निश्चीयते, ततस्तथैव धार्यते, न चैवमुपयोगैकत्वव्याघातः, श्याम-रक्तघटवदेकत्वाविरोधात् । अक्रमैकरूपमेव ज्ञानं संवेद्यते न तु क्रमवदपीति चेत् । न, क्वचिद् दोषात् क्रमासंवेदनेऽपि क्वचित् क्रमाक्रमस्य स्फुटमेव संवेदनात् । उपयुञ्जते हि लोकाः– 'घटमेव जानन्नहं प्राक् सामान्यतः 'किमिदम् ?' इत्यवगृहीतवान्, ततः 'किमनेन घटेन भाव्यमघटेन वा ?' इतीहितवान्, ततः 'कम्बुग्रीवादिमत्त्वाद् घट एवायम्' इति निश्चितवान्, ततः 'अयमित्थमेव' इत्यवधृतवान्' इति । अत्र हि प्रतिनियतोल्लेखात् क्रमः, 'जानन्' इत्यत्र शतृप्रत्ययाच्चाक्रमः स्फुट एव ।

यस्त्वक्रमिकांशमेकमेव ज्ञानमुपैति, तस्य घटसामान्यालोचनानन्तरम् 'अनेन घटेन भाव्यम्' इतीहैव दुर्घटा, बह्वर्थपरामर्शरूपत्वात् तस्याः । ''घटत्वव्याप्यकम्बुग्रीवादिमानयम्' इत्याकारिकैवेहा' इति तु 'कम्बुग्रीवादिकं घटत्वादिव्याप्यं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्वांश्चायम्' इत्यादितोऽपि संशयनिवृत्तेर्न सर्वत्र संभवदुक्तिकम्। न चोक्ताकाराऽपीहा सहचारदर्शनादिकं विना व्याप्त्याद्यग्रहात् संभविनी। अव्यवहितनष्टं च तच्चिरतरनष्टतुल्यम्। उद्बुद्धतत्संस्कार एव तत्कार्यकारीत्युपगमे चोद्बुद्धसंस्कार एव ज्ञानमस्त्विति ज्ञानसत्त्वैवोत्सीदेत्, अनुभवविरोधश्चैवम्, इत्यादि विवेचितं ज्ञानार्णवे ॥ ५४ ॥

इत्थं च 'द्रव्य-पर्याययोर्निवृत्त्य-निवृत्तिभ्यां भेद एव' इति निरस्तम्, अथ 'भेदोऽपि' इत्युक्तौ न बाध इत्याह—

न च भेदोऽपि बाधायै तस्यानेकान्तवादिनः। जात्यन्तरात्मकं वस्तु नित्यानित्यं यतो मतम्॥५५॥

न च भेदोऽप्यधिकृतांशस्येतरांशात्, तस्य– वस्तुनः, बाधायै– अनेकान्तपक्षव्याघाताय, अनेकान्तवादिनः, यतः– यस्मात्, जात्यन्तरात्मकं– इतरेतरानुविद्धं सद् वस्तु, नित्यानित्यं मतम्, यत एव भिन्नमत एवानित्यम्, यत एव चाभिन्नमत एव नित्यमिति। न हि नित्यत्वमनित्यं वा किञ्चिदेकरूपमस्ति, किन्तु यद् यदान्वीयते तत् तदा नित्यमिति व्यपदिश्यते, यदा च यद् व्यतिरिच्यते, यदा तदनित्यमिति। अत एव प्रागभावः प्राग् नित्यः, ध्वंसश्च पश्चाद् नित्यः, अत एव च नित्या मुक्तिरुपपद्यत इति ॥ ५५ ॥

एतदेव समर्थयन्नाह—

प्रत्यभिज्ञाबलाच्चैतदित्थं समवसीयते। इयं च लोकसिद्धैव तदेवेदमिति क्षितौ ॥५६॥

प्रत्यभिज्ञाबलाच्च– प्रत्यभिज्ञान्यथानुपपत्त्या च, एतत्– वस्तु, इत्थं– नित्यानित्यं, समवसीयते। इयं च–प्रत्यभिज्ञा,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षितौ– पृथिव्याम्, 'तदेवेदम्' इति– 'तदेवेदम्' इत्युल्लेखवती, लोकसिद्धैव– आगोपालाङ्गनं प्रसिद्धैव ॥ ५६ ॥

एतद्बलमेवाह—

न युज्यते च सन्न्यायादृते तत्परिणामिताम्। कालादिभेदतो वस्त्वभेदतश्च तथागतेः५७

न युज्यते च 'इयं प्रत्यभिज्ञा' इति शेषः, सन्न्यायात्– सत्तर्काद् विचार्यमाणात्, ऋते– विना, तत्परिणामितां– तस्य वस्तुनोऽन्वितविच्छिन्नरूपताम्। कथम्? इत्याह– कालादिभेदतः– तत्कालधर्मभेदतः, वस्त्वभेदतश्च, तथागतेः– 'तदेवेदम्' इति परिच्छित्तेः, अन्वयप्राधान्येन तदेतत्कालकृत-तदेतत्कालीनधर्मकृतभेदावभासात्, अन्वयप्रधानत्वाच्च प्रत्यभिज्ञोपयोगस्य न प्राधान्येन भेदावभासः; प्रधानोपसर्जनभावस्य ज्ञाने प्रतिविषयं स्वहेतुक्षयोपशमभेदेनोपपत्तेः। एतेन 'स्वरूपविरोधाभावादेकतरानिर्भक्तभागवद् नैकस्य नानात्वम्, बुद्धे रूपभेदाद् नानात्वम्, अंशे रूपाभेदाच्चैकत्वम्, इत्युपगमे च नानारूपबुद्ध्युपग्राह्यत्वाद् नानात्वमेव, न त्वेकत्वम्' इत्यादि निरस्तम्, नानैकरूपप्रत्यभिज्ञया नानैकरूपस्यैव वस्तुनो ग्रहात् ॥ ५७ ॥

एतदेव भावयति—

एकान्तैक्ये न नाना यन्नानात्वे चैकमप्यदः। अतः कथं नु तद्भावस्तदेतदुभयात्मकम्५८

४६ एकान्तैक्ये पूर्वा-ऽपरयोः, न नाना, यत्– यस्मात् कथंचिदपि, नानात्वे च सर्वथा, एकमप्यदो 'न' इति वर्तते, अतः– अस्माद्धेतोः, कथं, 'नु' इति निश्चये, तद्भावः– 'तदेवेदम्' इति प्रत्यभिज्ञोपपत्तिः। ततस्तत्– प्रत्यभिज्ञेयं वस्तु, उभयात्मकम्–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाना-ऽनानास्वभावम्।

इदमिह हार्दम्– यैः पूर्वा-ऽपरकालीनघटादेरेकत्वमेव स्वीक्रियते तेषां स्वरूपतो विशिष्टभेदे, कालविशेषावच्छिन्नभेदे, श्याम-रक्तादिरूपावच्छिन्नभेदे वा कथं प्रत्यभिज्ञा ?। तद्व्यक्तित्वावच्छिन्नभेदाभावरूपस्यैकत्वस्य प्रत्यभिज्ञायमानस्याबाधाद् नानुपपत्तिरिति चेत्। न, परमाणु-द्व्यणुकादिदेशविगमेन खण्डघटादिसंभावनया तदनिश्चयात्, खण्डघटादिनिश्चयेऽपि तथा प्रत्यभिज्ञानाच्च। खण्डघटादौ तद्वृत्तिघटत्वावच्छिन्नभेदाभाव एव प्रत्यभिज्ञायत इति चेत्। न, तद्वृत्तिघटत्वस्य घटत्वापेक्षया गुरुत्वेन भेदप्रतियोगितानवच्छेदकत्वात्, घटत्वावच्छिन्नभेदाभावसंबन्धेन तस्यान्वये च व्यक्त्यन्तरेऽपि तथाप्रत्यभिज्ञाप्रसङ्गात्। शुद्धव्यक्त्यभेदेनैव तत्पदार्थस्येदंपदार्थे भानाद् व्यक्त्यन्तरे 'सोऽयम्' इति प्रत्यभिज्ञा भ्रान्तैवेति चेत्। व्यक्तिभेद एव देशभङ्गे न तु रूपभङ्ग इत्यत्र किं मानम्, श्याम-रक्तादिदशयोरिव खण्डा-ऽखण्डदशयोरपि विशिष्टभेदस्य सुवचत्वात्, विशिष्टनाशोत्पादरूपवैधर्म्यस्यापि तद्वदेवात्र शुद्धव्यक्त्यभेदाविरोधित्वात् ? इति।

किञ्च, एकान्तैक्ये 'सोऽयम्' इति विशेषणविशेष्यभावस्यैवानुपपत्तिः, अन्यथा 'घटो घटः' इत्यपि स्यात्, 'घटो घटस्वभाववान्' इतिवत्। क्वचिदेव किञ्चित् स्वस्मिन् प्रकारीभूय भासत इति चेत्। तर्हि घटे घटत्वं स्वात्मकमेव भासताम्। व्यक्तेर्जातिर्विलक्षणैवानुभूयत इति चेत्। तत्तेदंतयोरपि किं न वैलक्षण्यमनुभवसि ?। एवं 'रजतमिदम्' इत्यत्रेदमर्थ-रजतयोरपि भेदः स्यादिति चेत्। स्यादेवेदन्त्व-रजतत्वाभ्याम्, स्वद्रव्यान्वयेन तु न स्यादिति न किञ्चिदेतत्। यैस्त्वेकान्ततो नानात्वमेवाङ्गीक्रियते तेषामुक्तप्रत्यभिज्ञाया गन्धोऽपि नास्ति, पूर्वापरयोरेकत्वायोगात्। उक्तं चैतत् प्राक्, वक्ष्यते चानुपदमपि ॥५८॥

॥२७१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वपक्षे तदुपपत्तिमाह—

तस्यैव तु तथाभावे कथञ्चिद्भेदयोगतः । प्रमातुरपि तद्भावाद्युज्यते मुख्यवृत्तितः ॥५९॥

तस्यैव तु– पूर्वस्यैव तु वस्तुनः, तथाभावे– तदन्वयस्वभावापरित्यागेनापरस्वभावोपादाने, कथञ्चिद् भेदयोगतः– तद्द्रव्यतोऽभेदेऽपि तत्पर्यायतो भेदात्, प्रमातुरपि– तत्परिच्छेदकप्रमाणपरिणतस्यात्मनोऽपि, तथाभावात्– ग्राह्यवद् ग्राहकस्य पूर्वा-ऽपरभावेनैका-ऽनेकरूपत्वात्, युज्यते मुख्यवृत्तितस्तद्व्यवहाराबाधेन यथोक्तप्रत्यभिज्ञा । न ह्यन्य एवानुभवति, अन्य एव च प्रतिजानीते, नवा तदनुभव-प्रत्यभिज्ञयोर्भिन्नैकाश्रयत्वमपि, संबन्धानुपपत्तेः, पूर्वा-ऽपरार्थवदनुभवितृ-प्रत्यभिज्ञातृस्वभावानुभवाच्चेति ॥५९॥

परमतं दूषयति—

नित्यैकयोगतो व्यक्तिभेदेऽप्येषा न संगता । तदिहेति प्रसङ्गेन तदेवेदमयोगतः ॥६०॥

व्यक्तिभेदेऽपि– बाल-युवादिशरीरभेदेऽपि, नित्यैकयोगतः– नित्यैकशरीरत्वसामान्यसंबन्धात्, एषा– उक्तप्रत्यभिज्ञा, न संगता । कुतः ? इत्याह– भिन्नयोगाद् भूतले 'इह घटः' इतिवत्, 'तदिह' इति प्रसङ्गेन, नित्यैकस्य तत्पदार्थत्वात्; 'तदेवेदमित्यस्य' इति शेषः, अयोगतः– अनुपपत्तेः, नित्या-ऽनित्ययोस्तादात्म्याभावात् । तज्जातीयस्य तादात्म्याद् नायोग इति चेत् । तथा सति 'तज्जातीयोऽयम्' इति स्यात्, न तु 'सोऽयम्' इति । कथं च क्वचिद् नित्यस्य संबन्धः, क्वचिन्न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्गतस्तादात्म्यं भासते ?। अदृष्टभेदादिति चेत् । तत एव तर्हि शबलवस्तु तदा तदा तथा तथा भासताम्, एकस्य वैचित्र्यकल्पनाया न्याय्यत्वात्, 'धर्मी०' इति न्यायात् ॥ ६० ॥

न चेयं भ्रान्तिकारणादप्युत्पत्तुमर्हति परमत इत्याह—

सादृश्याज्ञानतो न्याय्या न च विभ्रमबलादपि । एतद्द्वयाग्रहे युक्तं न च सादृश्यकल्पनम् ॥

सादृश्याज्ञानतः– सादृश्यज्ञानाभावात्, विभ्रमबलादपि– भ्रमहेतुसामर्थ्यादपि, नैषा क्षणिकेषु विभिन्नेष्वेकत्वप्रत्यभिज्ञा न्याय्या । हेतुं समर्थयति– एतद्द्वयाग्रहे– सदृशद्वयस्य क्षणिकज्ञानेन ग्रहीतुमशक्यत्वे, न च सादृश्यकल्पनं युक्तम्, संयुक्तद्वयाग्रहे संयोगकल्पनवत् । न चासंयुक्तभागद्वयग्रहेऽपि संयोगाकल्पनात् संयुक्तभागद्वयग्रहसामग्र्या संयोगकल्पनवत् सदृशद्वयग्रहसामग्रीत एव सादृश्यकल्पनोपपत्तिः, क्रमिकसदृशद्वयग्रहसामग्र्या एकस्या अनुपपत्तेः, अनन्वयिनिरंशज्ञानोपगमे संयुक्तभागद्वयग्रहसामग्र्या अप्यनुपपत्तेः । निरस्तश्च सौगताभिमतः सामग्रीपक्षः प्रागेवेति ॥ ६१ ॥

उत्पद्यतां वा यथा कथञ्चिदेषा, तथापि बाधाभावाद् न भ्रान्तेत्याह—

न च भ्रान्तापि सद्बाधाभावादेव कदाचन। योगिप्रत्ययतद्भावे प्रमाणं नास्ति किञ्चन॥६२॥

न च भ्रान्ताप्युक्तप्रत्यभिज्ञा, कदाचन– कदाचिदपि, सद्बाधाभावादेव– सम्यग्बाधकप्रत्ययानवतारादेव । यद्धि भ्रान्तं ज्ञानं तत्र नियमतो बाधकावतारः, यथा शुक्तौ रजतज्ञाने। चेतनेऽचेतनभ्रमे नायं नियम इति चेत् । न, तत्रापि विशेष- ॥२७२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्शिनां बाधावतारात् । अत्रापि योगिनां बाधावतारोऽस्त्येवेत्याशङ्कयाह— योगिप्रत्ययतद्भावे- योगिनां ज्ञानस्योक्तप्रत्यभिज्ञाबाधकत्वे, नास्ति प्रमाणं किञ्चन, श्रद्धामात्रशरणत्वात् ॥ ६२ ॥

एतदेव प्रकटयति—

नाना योगी विजानात्यनाना नेत्यत्रे का प्रमा ?। देशनाया विनेयानुगुण्येनापि प्रवृत्तितः ६३

नाना- प्रतिक्षणभिन्नम्, योगी विजानाति- साक्षात्करोति जगत्, न त्वनाना- अक्षणिकस्वभावम्, इत्यत्र का प्रमा- किं निश्चायकम् ? । "क्षणिकाः सर्वसंस्काराः" इति देशनैवात्रार्थे प्रमाणम्, यथादृष्टार्थस्य योगिना देशनादित्याशङ्क्याह- देशनाया उक्तलक्षणायाः, विनेयानुगुण्येनापि- विनाप्यर्थं श्रोत्रनुग्रहार्थमपि, प्रवृत्तितः- संभवात्, ब्राह्मणभार्यामृतत्वदेशनावत् ॥ ६३ ॥

प्रत्यभिज्ञाभासव्यावृत्ततयाऽस्याः प्रामाण्यमुपपादयति—

या च लूनपुनर्जातनख-केश-तृणादिषु । इयं संलक्ष्यते सापि तदाभासा न सैव हि ॥६४॥

या च लूनपुनर्जातनख-केश-तृणादिषु इयं- प्रत्यभिज्ञा, संलक्ष्यते-'स एवायं नखः' 'स एवायं केशः' 'तदेवेदं तृणम्' इत्याद्युल्लिख्यते, सापि तदाभासा- प्रत्यभिज्ञाभासा, न सैव हि- न प्रत्यभिज्ञाप्रमैव हि, लूनपुनर्जातत्वप्रतिसंधाने तत्र बाधा-

---

१ मुद्रितमूले 'त्र न प्र' इति पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वतारात्; इयं च वैलक्षण्यात् प्रमैवेति भावः ॥ ६४ ॥

नन्वेवमपि लूनपुनर्जातनख-केशादिषु प्रत्यभिज्ञावत् प्रकृतप्रत्यभिज्ञाप्यप्रमाणं भविष्यतीति संशयात् कथमर्थनिश्चयः ? इत्यत आह—

प्रत्यक्षाभासभावेऽपि नाप्रमाणं यथैव हि । प्रत्यक्षं, तद्वदेवेयं प्रमाणमवगम्यताम् ॥६५॥

प्रत्यक्षाभासभावेऽपि– 'शुक्तौ रजतम्' इति मिथ्याप्रत्यक्षसद्भावेऽपि, यथैव हि नाप्रमाणं, प्रत्यक्षं– 'इदं रजतम्' इत्यादि समीचीनं प्रत्यक्षम्; तद्वदेवेयं– प्रत्यभिज्ञाभाससद्भावेऽपि, प्रमाणमवगम्यताम्– प्रमात्वेन निश्चीयताम्, भ्रमप्रमासाधारणप्रत्यक्षत्वदर्शनजनितस्य प्रत्यक्ष इव तादृशप्रत्यभिज्ञात्वदर्शनजनितस्य प्रकृतप्रत्यभिज्ञायामपि प्रामाण्यसंशयस्याबाध्यत्वविशेषदर्शनेन निवर्तनादिति भावः ॥ ६५ ॥

न चेयमतन्त्रसिद्धेत्याह—

मतिज्ञानविकल्पत्वान्न चानिष्टिरियं यतः । एतद्बलात्ततः सिद्धं नित्यानित्यादि वस्तु नः ॥

यतो मतिज्ञानविकल्पत्वाद् न चेयमनिष्टिः– प्रत्यभिज्ञाङ्गीकारो नापसिद्धान्त इत्यर्थः, वासनाधारणाफलत्वेन तदुपगमात्; तत एतद्बलात्— प्रत्यभिज्ञान्यथानुपपत्तेः, नः– अस्माकं, नित्यानित्यादि वस्तु सिद्धम्, आदिना सदसदादिग्रहः । तदेवं सिद्धो वस्तुयाथात्म्यपरिच्छेदप्रवणः स्याद्वादः । एतदेकदेशालम्बना एव परस्परनिरपेक्षाः प्रवर्तन्तेऽपरिमिताः परसम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यास्तदुक्तम्––

" जीवइआ वयणपहा तावइआ चेव हुंति णयवाया । जावइआ णयवाया तावइआ चेव परसमयाँ ॥ १ ॥" इति ।

अस्यार्थः–– यावन्तो वचनपथाः– वक्तृविकल्पहेतवोऽध्यवसायविशेषाः, तावन्तो नयवादाः– तज्जनितवक्तृविकल्पाः शब्दात्मकाः, सामान्यतो नैगमादिसप्तभेदोपग्रहेऽपि प्रतिव्यक्ति तदानन्त्यात् । यावन्तश्च नयवादास्तावन्त एव परसमयाः, निरपेक्षवक्तृविकल्पमात्रकल्पितत्वात् तेषाम् । तथाहि–– कापिलं दर्शनं निरपेक्षद्रव्यार्थिकनयविकल्पप्रसूतम् , बौद्धदर्शनं च निरपेक्षशुद्धपर्यायास्तिकनयविकल्पजनितम् , द्वाभ्यामपि च परस्परानिरपेक्षाभ्यां द्रव्यार्थिक-पर्यायार्थिकाभ्यां प्रणीतमौलूक्यदर्शनम् । तदाह––

" [3]जं काविलं दरिसणं एयं दव्वट्ठिअस्स वत्तव्वं । सुद्धोअणतणयस्स उ परिसुद्धो पज्जवविअप्पो ॥ १ ॥

दोहि वि णएहि णीअं सत्थमुलूएण, तहवि मिच्छत्तं । जं सविसयप्पहाणत्तणेण अन्नुन्नणिरवेक्खं[4] ॥ २ ॥"

एवमौपनिषददर्शनादीनामपि संग्रहनयादेः प्रादुर्भूतिर्भावनीया । अत एव परदर्शनाभिमतेऽर्थे स्यात्कारमात्रेण स्वावधारणसंभवाद् भवति साम्यसंपत्तिः स्याद्वादिनः कर्मदोषादज्ञाननिमग्नं परं पश्यतः । परेषां तु स्वपक्षसिद्धावन्योन्यं कलहाय-

१ यावन्तो वचनपथास्तावन्त एव भवन्ति नयवादाः । यावन्तो नयवादास्तावन्त एव परसमयाः ॥१॥ २ सम्मतिप्रकरणे गाथा १४४ ।

३ यत् कापिलं दर्शनमेतद् द्रव्यार्थिकस्य वक्तव्यम् । शुद्धोदनतनयस्य तु परिशुद्धः पर्यवविकल्पः ॥ १ ॥

द्वाभ्यामपि नयाभ्यां नीतं शास्त्रमुलूकेन, तथापि मिथ्यात्वम् । यत् स्वविषयप्रधानत्वेनान्योन्यनिरपेक्षम् ॥२॥ ४ सम्मतिप्रकरणे गाथा १४५।१४६।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानानां यावज्जीवमपि वक्तृविकल्पानुपरमेन द्वेषानुच्छेदाद् नास्त्येव साम्यवार्तापि, इति संसारहेतुत्वात् तेषां ज्ञानमप्यज्ञानमिति परिभाषन्ते परमप्रावचनिकाः। ततो मिथ्यादर्शनगरलव्यथानिवृत्तये स्याद्वादामृतपानमेव विधेयं विवेकिना ॥ ६६ ॥

व्यालाश्चेद् गरुडं प्रसर्पिगरलज्वाला जयेयुर्जवाद् गृह्णीयुर्द्विरदाश्च यद्यतिहठात् कण्ठेन कण्ठीरवम्।
सूरं चेत् तिमिरोत्कराः स्थगयितुं व्यापारयेयुर्बलं बध्नीयुर्बत दुर्नयाः प्रसमराः स्याद्वादविद्यां तदा ॥ १ ॥

नयाः परेषां पृथगेकदेशाः क्लेशाय नैवार्हतशासनस्य।
सप्तार्चिषः किं प्रसृताः स्फुलिङ्गा भवन्ति तस्यैव पराभवाय? ॥ २ ॥

एकश्छेकधिया न गम्यत इह न्यायेषु बाह्येषु यो देशप्रेक्षिषु, यश्च कश्चन रसः स्याद्वादविद्याश्रयः।
यः प्रोन्मीलितमालतीपरिमलोद्गारः समुज्जृम्भते स स्वैरं पिचुमन्दकन्दनिकरक्षोदाद् न मोदावहः ॥ ३ ॥

अभ्यास एकः प्रसरद्विवेकः स्याद्वादतत्त्वस्य परिच्छिदाप्यः।
कषोपलाद् नैव परः परस्य निवेदयत्यत्र सुवर्णशुद्धिम् ॥ ४ ॥

माध्यस्थ्यमास्थाय परीक्षमाणाः क्षणं परे लक्षणमस्य किञ्चित्।
जानन्ति, तानन्तिमदुर्नयोत्था कुवासना द्राक् कुटिलीकरोति ॥ ५ ॥

५ श्रीजिनभद्रगणिक्षमाश्रमणा विशेषावश्यकभाष्ये 'सदसदविसेसणाओ भवहेउ' (गाथा ११५) इत्यादिना ग्रन्थेनेत्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतो गुरूणां चरणार्चनेन कुवासनाविभ्रमपास्य शश्वत् ।
स्याद्वादचिन्तामणिलब्धिलुब्धः प्राज्ञः प्रवर्तेत यथोपदेशम् ॥ ६ ॥

यस्यासन् गुरवोऽत्र जीतविजयप्राज्ञाः प्रकृष्टाशया भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरस्तेन न्यायविशारदेन रचितस्तर्कोऽयमभ्यस्यताम् ॥ ७ ॥

इति पण्डितश्रीपद्मविजयसोदरन्यायविशारदपण्डितयशोविजयविरचितायां स्याद्वादकल्पलता-
भिधानायां शास्त्रवार्तासमुच्चयटीकायां सप्तमः स्तबकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

अथाष्टमः स्तबकः ।

समवसरणभूमौ यस्य गीर्वाणकीर्णा सुमततिरतिशोभां जानुदघ्नी ततान ।
जितकुसुमशरास्त्रत्यागमर्थापयन्ती स जयति यतिनाथः शङ्करो वर्धमानः ॥ १ ॥

स्मरणमपि यदीयं विघ्नवल्लीकुठारः श्रयति यदनुरागात् संनिधानं निधानम् ।
तमिह निहतपापव्यापमापद्भिदायामतिनिपुणचरित्रं पार्श्वनाथं प्रणौमि ॥ २ ॥

हंसीव वदनाम्भोजे या जिनेन्द्रस्य खेलति । बुद्धिमांस्तामुपासीत न कः शुद्धां सरस्वतीम् ? ॥ ३ ॥

वार्तान्तरमाह—

अन्ये त्वद्वैतमिच्छन्ति सद्ब्रह्मादिव्यपेक्षया। सतो यद्भेदकं नान्यत्तच्च तन्मात्रमेव हि ॥१॥

अन्ये तु– वेदान्तिनः, सद् ब्रह्मैव– परब्रह्मैव, आदिः सकलव्यवहारकारणं तद्व्यपेक्षया तदाश्रयणेन, अद्वैतमि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छन्ति– एकमेव तत्त्वमुपयन्ति, द्वाभ्यामितं द्वीतं, द्वीते भवं द्वैतं, न द्वैतमद्वैतमिति योगार्थः । कुतः ? इत्याह– यत्– यस्मात्, सतः– परमब्रह्मणः, अन्यत्– स्वातिरिक्तम्, न भेदकम् । तच्च– भेदकत्वाभिमतं नीलादि च, तन्मात्रमेव– ब्रह्ममात्रमेव, अनवच्छिन्नस्याकाशस्य घट-पटाद्युपाधिभिरिव, अनवच्छिन्नस्य ब्रह्मणो नीलादिभिर्भेदायोगात् ।

किञ्च, भेदस्य वस्तुस्वभावत्वे तस्यैकस्यानेकवृत्तित्वाद् वस्तूनामपि भेदो न स्यात्, नैकस्मादभिन्नमभिन्नस्वभावं भिन्नं युज्यते । अर्थान्तरत्वे च तस्य वस्त्वरूपत्वात् स्वरूपेण भावा न व्यावृत्ताः स्युः । कल्पितात्तु भेदात् कल्पितमेव नीलादिनानात्वम्, न तु पारमार्थिकम् । अथ परापेक्षं वस्तुनो भिन्नत्वं, स्वरूपेण त्वेकत्वमिति न दोष इति चेत् । न, न हि वस्तु स्वहेतुबलोदितं स्वभावव्यवस्थितये परमपेक्षत इति पुरुषप्रत्ययधर्म एव परापेक्षत्वमिति न ततो वस्तुभेदः । यदि च भेदस्वरूपो भावः प्रतियोग्यपेक्षः स्यात्, स्वहेतोरविकलस्य तस्योत्पत्तिर्न स्यात् । स्वहेतोरेव प्रतियोग्यपेक्षभेदाख्यरूपस्तदनपेक्षस्वरूपश्च भाव उत्पन्न इति चेत् । ननु क इहापेक्षार्थः ? । न तावदुत्पत्तिः, स्वहेतुत एव तदुदयात् । नाप्यर्थक्रिया, प्रतियोग्यसंनिधानेऽप्यर्थक्रियादर्शनात् । प्रतीतिश्चेत् । तर्हि रूपादेः स्वरूपस्य चक्षुरादित इव भेदस्यापि ज्ञानात् प्रतियोगिनः प्रतीतावपि न सापेक्षस्वभावत्वम् । कथं तर्ह्येकत्रापि पितृत्वादयः ? इति चेत् । एकत्र ह्रस्वत्व-दीर्घत्वादिवत् कल्पिता एव ।

स्यान्मतम्, अर्थक्रियाभेदाद् वस्तुभेदः स्यादिति । न, दाह-पाकविभागेनापि कृशानोरभेदात् तत्राऽदृष्टयाऽर्थक्रिययाऽर्थभेदः, यथा चक्षुष्मत्यपि बधिरेऽदृष्टया शब्दबुद्ध्येन्द्रियभेद इति चेत् । नाद्वैते किञ्चिदेकत्रादृष्टं नाम । ततश्च तत्रादृष्टार्थक्रियासिद्धौ तद्भेदसिद्धिः, सिद्धे च भेदे तत्रादर्शनमितीतरेतराश्रयः । अपिच, सन्मात्रे सर्वत्र प्रत्यक्षाद् निश्चिते तत्र भेदानवकाशः, ।।२७६।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[illegible]भेदाभावेन 'सोऽयम्' इत्यवमर्शाभावेऽपि निर्विकल्पकलब्धविधिरूपाबाधात्, अलब्धरूपस्य चानिषेधात्, खपुष्पादिनिषेधेऽपि सिद्धेषु खादिष्वेव पुष्पादीनां निषेधात्। 'कुतश्चिद् निमित्ताद् बुद्धौ लब्धरूपाणां तेषां बहिर्निषेधः' इत्यन्ये।

किञ्च, एकस्य श्वात्मकस्याभावात्, भेदा-ऽभेदयोरेकतरस्य मिथ्यात्वनियमे भेदानामेवं तत्त्वकल्पनमुचितम्, सर्पादिप्रतीतौ दर्शनात्, न तु वस्तुमात्रस्य। अपिच, गन्धसमवायिकारणतावच्छेदकं यथा पृथिवीत्वमेवेति तत्रैव गन्धः, तत्संबन्धादेव च जलादौ गन्धवत्त्वव्यवहारः, तथा सत्त्वाश्रयतावच्छेदकमपि चित्त्वमेवेति चिदेव सती, तदधीनत्वात् सर्वव्यवहारस्य, तत्संबन्धादेव च प्रपञ्चे सत्त्वव्यवहारः।

अपिच, पराभिमतात्मविशेषादर्शनान्वय-व्यतिरेकानुविधायित्वात् प्रपञ्चप्रतिभासस्य भ्रमत्वम्। न च तदन्वय-व्यतिरेकयोर्देहतादात्म्यप्रतिभासेनान्यथासिद्धिः, विनिगमकाभावात्, मुक्तौ देहतादात्म्याप्रतिभासवत् प्रपञ्चाप्रतिभासनात्, संसारदशायां देहतादात्म्यप्रतिभासवत् प्रपञ्चप्रतिभासनाच्च। वस्तुत आत्मविशेषादर्शनजन्यतावच्छेदकं नात्म-देहतादात्म्यभ्रमत्वम्, गौरवात्; किन्तु दृश्यदर्शनत्वमेव, लाघवात्। अत एव ब्रह्मणः सकलप्रपञ्चविषयत्वं संयोगादिसंबन्धानिरूपणात् स्वरूपस्य च संबन्धत्वाभावात् काल्पनिकज्ञेयतादात्म्याश्रयणेनोपपद्यत इति युक्तम्।

अपिच, आत्म-खपुष्पवदुत्पत्त्ययोगात् सत्त्वा-ऽसत्त्वाभ्यामनिर्वचनीयः प्रपञ्चः, रज्जौ सर्पवत्। न हि सन्नेव सः,
४७ बाधानुभवात्। नाप्यसन्, अपरोक्षानुभवात्। देशान्तरे सन्नेवेति चेत्। न, मानाभावात्, तत्र प्रतीयमाने सर्पे देशान्तर-

१ ख. ग. घ. च. 'व च त'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्त्वस्य प्रत्यक्षेणाप्रतीतेः । कल्प्यत इति चेत् । यत्र प्रतिपन्नं तत्रैव किमिति न कल्प्यते ? । बाधानुभवादिति चेत् । बाधयोग्यं तर्हि कल्प्यताम् । युक्तं ह्येतद् यद् यथा प्रतीयते तत् तथैवाभ्युपगम्यत इति । सर्पसत्त्वे तुल्येऽपि कथमेको वाच्यो नापरः ? इति चेत् । कथं प्रतीतितुल्यत्व एकत्र सत्त्वमपरत्रासत्त्वम् ? । बाधप्रतीतेरिति चेत् । तुल्यं ममापि ।

किञ्च, साधकतावच्छेदकत्वं न प्रमानुभवत्वम्, गौरवात्; किन्त्वनुभवत्वम्, लाघवात् । ततश्चावच्छेदकलाघवेन पुरोवर्तिनि सर्पसिद्धिः, तस्य च मिथ्यात्वमनुभवादेव 'मिथ्या सर्पः' इति । अज्ञानाद्युपादानकल्पनागौरवप्रसङ्ग एवमिति चेत् । न, अवच्छेदकलाघवेन तस्य फलमुखत्वात् । वस्तुतस्तु विपरीतमेव गौरवं परेषाम्, अत्र प्रतिपन्ने देशान्तरसत्त्वस्याप्रत्यासन्नस्यापरोक्षत्वस्य ज्ञानस्य प्रत्यासत्तित्वस्य दोषस्य तादृक्सामर्थ्यादेः कल्पनात् ।

किञ्च, परैरपि विशेषादर्शनस्य भ्रमहेतुत्वमुपेयते । तत्र तैरभावत्वं कल्प्यते, अस्माभिस्तु भावत्वं लघुभूतम् । तैश्च निमित्तत्वं कल्प्यते, अस्माभिस्त्वन्तरङ्गमुपादानत्वम्, इति स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वरूपं कथं मिथ्यात्वम् ? । सर्पस्य स्वाभावसामानाधिकरण्यविरोधादिति चेत् । न, पृथिव्यां रूपे गन्धसामानाधिकरण्याविरोधवद् रज्जौ सर्पे स्वाभावसामानाधिकरण्यस्याप्यविरोधात् । कथं तर्हि भ्रान्तित्वम् ? इति चेत् । स्वाभावाश्रये सत्त्वात् । परेषां स्वाभावाश्रये सत्त्वावगाहित्वं भ्रान्तित्वप्रयोजकम्, अस्माकं तु स्वाभावाश्रये सत्त्वम्, इति लाघवम् । पुरोवर्तिनि सर्पसत्त्वे व्यवहारः स्यादिति चेत् । भ्रमदशायां स्यादेव; बाधदशायां तु बाधस्य प्रतिबन्धकत्वादेव, अन्यदा च सामग्रीविरहादेव न स्यादिति । तदेवमनिर्वचनीयस्य सर्पस्य रज्जुरिव, अनिर्वचनीयस्य प्रपञ्चस्य ब्रह्मैव तत्त्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तच्चाद्वितीयम्, प्रपञ्चासिद्ध्या विजातीयभेदशून्यत्वात्; अखण्डमपि, सजातीयभेदशून्यत्वात्; तथाहि— न तावच्चेतनभेदः प्रत्यक्षसिद्धः। न हि चेतना घटादय इव भेदेनानुभूयन्ते। तत्तच्छरीरप्रवृत्त्या भिन्नाः कल्प्यन्त इति चेत्। न, एकेनैव तत्तच्छरीरप्रवृत्त्युपपत्तावनेककल्पनानुपपत्तेः। सुख-दुःखादिवैचित्र्यादनेकत्वमिति चेत्। न, तस्याप्युपाधिभेदत एवोपपत्तेः। दृष्टं हि गगनस्यैकस्यैव भेरी-कर्णाद्युपाधिभेदेन शब्दविशेषहेतुत्व-शब्दग्राहकत्वादिवैचित्र्यम्। इष्यत एव चानेकात्मवादिभिरपि प्रतिचेतनमन्तःकरणे-न्द्रियादिभेदः। ततस्तदुपाधित एव सुख-दुःखादिवैचित्र्योपपत्तिः, भानाभानव्यवस्थापि तेनैवोपपद्यते।

किञ्च, घटादयः, शरीरादयः, बुद्ध्यादयः, तदाधारश्च स्फुरन्तीत्यविवादम्। स्फुरणं चोपाधिभेदं विनाऽविभाव्यमानभेदतया, लाघवेन चैकम्। ततश्च परेषामनुव्यवसायशब्दाभिधेयं स्फुरणं नित्यमेकमात्मेत्युच्यते। तच्च न सुखादिमत्, तद्विषयत्वात्, अननुभवाच्च। एवं च सुखादिवैचित्र्येण तदाधारभेदेऽपि न स्फुरणभेदः। इष्यते च नैयायिकैरपि व्यापकमेकं नित्यमीश्वरज्ञानम्। वस्तुतः कार्यमात्रोपादानतया नित्यैकज्ञानस्यैव सिद्धिः, न तु तदाश्रयस्यापि, तस्यैव च तत्तदुपाधिभेदप्रतिभाससंभवे सुखादिवैचित्र्यबद्धमोक्षादिव्यवस्थोपपत्तौ न पारमार्थिकभेदकल्पनावकाशः, जीवे-श्वरादिविभागस्याप्यज्ञानोपाधिकत्वात्।

अज्ञानं च माया-ऽविद्यादिशब्दाभिधेयम्। मानं च तत्र 'अहमज्ञः' 'मामन्यं च न जानामि' 'त्वदुक्तमर्थं न जानामि' 'शास्त्रार्थं न जानामि' इत्याद्यनुगतः प्रत्ययः, अनुगतविषयं विना तदनुपपत्तेः, अन्यथा सत्तादिसामान्योच्छेदप्रसङ्गात्। ज्ञानसामान्याभावोऽत्र विषय इति चेत्। न, आत्मनि तस्याभावात्, अर्थेन सहानुभवाच्च। 'अर्थं न जानामि' इत्यर्थगत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संख्याज्ञानाभावो विषय इति चेत् । न, 'संख्यां न जानामि' इत्यत्रागतेः । तत्रापरोक्षज्ञानाभावो विषय इति चेत् । न, 'शास्त्रार्थं न जानामि' इत्यत्रानुपपत्तेः । क्वचित् संख्याज्ञानाभावः, क्वचिदपरोक्षज्ञानाभावः, क्वचिद् निश्चयाभावो विषय इति चेत् । न, अननुगमात् । 'तच्च चिन्मात्राश्रयविषयमिति विवरणाचार्याः, आश्रयविषयभेदकल्पनायां गौरवात् । कल्पितं चेदम्, तेनाखण्डत्वादेर्वस्तुतश्चिद्रूपत्वात्, चिद्रूपस्य चानावृतत्वाद् नानुपपत्तिः, 'चैतन्यं स्फुरति नाखण्डत्वादि' इत्येवं तेनावरणेन भेदकल्पनात् । आश्रयमेव कथमावृणोति तत् ? इति चेत् । सत्यम्, अन्धकारे तथादर्शनात् ।

अथ चैतन्यनिष्ठावरणे मानसत्त्वे तदसत्त्वे वावरणानिवृत्ति-तदसिद्धिप्रसङ्ग इति चेत् । न, साक्षिसिद्धत्वात् तस्य, 'अहं मां न जानामि' इत्यनुभवात् । अत्र च 'माम्' इति द्वितीयार्थस्य विषयत्वस्याऽज्ञानजन्यावरणरूपातिशयशालित्वस्योल्लेखात् । ननु चिन्मात्रनिष्ठ आवरणे 'घटोऽज्ञातः' इति कथम् ? । 'अस्ति' 'प्रकाशते' इति स्वतः स्फुरति चैतन्ये ब्रह्मण्यपि तथाव्यवहारप्रसक्तौ 'नास्ति' 'न प्रकाशते' इति व्यवहारार्थमेवावरणकल्पनात्; घटादौ तु स्वतोऽप्रकाशे तस्य व्यर्थत्वादिति चेत् ।

अत्राहुः– 'विषयैः सहाज्ञानस्य साक्षिचैतन्येऽध्यासात् प्रतिभासः' इति । अस्यार्थः– ईश्वरस्योपाधिवशाद् विष्ण्वादित्रैविध्यवत् साक्षिण एव ततो जीवे-श्वरभावेन द्वैविध्यात्, साक्षिणीश्वरत्वावच्छेदेन विषयाणामध्यासात्, अज्ञाना-ऽऽवरणयोरपि चिन्मात्राश्रयत्वेन तत्र सत्त्वाद् विषयनिष्ठतयाऽज्ञानावरणप्रतीतिः 'अज्ञातो घटः' इति; यथा लौहित्य-मुखयोः स्फटिकाचलप्रतिबिम्बितयोः 'लोहितं मुखम्' इति परस्परसंसर्गो भासते । तेन कुसुमादिनिष्ठलौहित्यसंसर्ग इव मुखे चिन्निष्ठावरणसंसर्गो ॥२७८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घटादावनिर्वचनीयः, अन्यथाऽन्यथाख्यात्यापत्तेः । अत एव घटादेरप्यज्ञानविषयत्वम्, अज्ञानजन्यावरणसंसर्गरूपातिशय-शालित्वात् । स चायमावरणसंसर्गो घटज्ञानेन नश्यति, घटज्ञानदशायाम् 'अज्ञातो घटः' इत्यननुभवात् । अस्मिन् पक्षे मूलाज्ञानादेवोक्तविधया शुक्तिविषयाद् रजतोत्पत्तिः, शुक्तिज्ञानेन चावरणसंसर्गनाशे शुक्तिविषयता मूलाज्ञानस्य नष्टा, इति विशिष्टाज्ञाननाशात् सविलासाज्ञाननिवृत्तिरूपबाधव्यवहारः, न त्वज्ञाननिवृत्तिः ।

अथवा, तद्विषयवृत्त्यभाव एव घटोऽज्ञात इति ज्ञानविषयः । अस्मिन्नपि पक्षे मूलाज्ञानकार्यमेव रजतम्, शुक्तिविषय-वृत्त्यभावस्त्वन्वय-व्यतिरेकाभ्यां मूलाज्ञानाद् रजतोत्पत्तौ फलोपधानावच्छेदकतया प्रयोजकः, न तु कारणम्, अभावस्य कारणत्वाभावात् । शुक्तिज्ञानेन रजताध्यासस्य स्वकारणे प्रविलयमात्रं क्रियते, नाज्ञाननिवृत्तिः, घटादिवृत्तिश्चिदुपरागार्था ना-वरणसंसर्गनिवृत्त्यर्था, घटेऽनिर्वचनीयावरणसंसर्गे मानाभावात्, जडत्वेन [illegible]रणाभावात् ।

यद्वा, 'मां न जानामि' इत्यनुभूयमानं मूलाज्ञानावरणं चैतन्यनिष्ठमन्यदेव 'तत्त्वमसि' आदिवाक्यजन्यतत्त्वज्ञान-निवर्त्यम्, अन्यच्च घटावच्छिन्नचैतन्यनिष्ठमावरणं मूलाज्ञानकृतम् । ततश्च घटावच्छिन्नचैतन्यस्य मूलाज्ञानजन्यावरणान्तरशा-लित्वात् तद्विषयत्वम्, घटत्वस्य तु जडत्वादावरणाभावेऽप्यदूरविप्रकर्षाद् विषयत्वम् । तस्मादावरणान्तरमादाय 'अज्ञातो घटः' इति प्रतीतिः । घटज्ञानेन चावरणान्तरनिवृत्तिः । अस्मिन्नपि पक्षे मूलाज्ञानकार्यमेव रजतम्, आवरणसंसर्गपक्षवद् बाधव्यवहारः ।

अथवा, 'अज्ञातो घटः' इति प्रतीतिस्तूलाज्ञानविषया, सविलासाज्ञाननिवृत्तिर्बाधः, अज्ञाननिवर्तकं ज्ञानं प्रमाणम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'इममर्थं पूर्वं ज्ञातवान्, इदानीं न जानामि' इत्यादिव्यवहारसौकर्याय तत्स्वीकारात्। तूलाज्ञानानि च मूलाज्ञानकार्याणि। 'तच्छक्तिविशेषा एव तानि, अत एवानादित्वात् तेषामनादिभावरूपं ज्ञाननिवर्त्यमज्ञानमिति लक्षणयोगात्' इत्यन्ये।

'तन्न, तेषामावरणविक्षेपहेतुत्वेन शक्तत्वात्, शक्तौ शक्त्ययोगात्, अज्ञानत्वात् तदनादित्वे तदावरणस्याप्यनादित्वापत्तेः; इष्टापत्तौ घटबोधदशायामपि समयान्तरभाविज्ञाननिवर्त्यावरणप्रसङ्गात्, अनुभवविरोधात्। व्यवहारसौकर्याय तज्जन्यत्वाश्रयणे च तूलाज्ञानानामपि जन्यत्वस्याश्रयितुं युक्तत्वात्, भ्रमोपादनत्वस्यैवाज्ञानलक्षणत्वात्, प्रागुक्तस्याविद्यासंबन्धादावतिव्याप्तेः। किञ्च, घटबोधदशायामावरणाभावेऽनादेर्घटाज्ञानस्य निर्विषयत्वप्रसङ्गः, तज्जन्यावरणरूपातिशयाभावात्। न चाज्ञानं निर्विषयं संभवति, साक्षिभास्यं वा' इत्यपरे। तत् सिद्धं चिन्मा[illegible]श्रयविषयं मूलाज्ञानम्।

वाचस्पतिमिश्रास्तु– 'जीवाश्रयं ब्रह्मविषयं च तत्। न च जीवनिष्ठत्वेऽविद्याया जीवे प्रपञ्चोत्पत्त्यापत्तिः, अहंकारादिप्रपञ्चोत्पत्तेरिष्टत्वात्, आकाशादिप्रपञ्चोत्पत्तेस्तु विषयपक्षपातिन्याऽविद्ययेश्वर एव संभवात्, तस्य सर्वज्ञत्वश्रुतेः, अज्ञातायां शुक्तौ रजतोत्पादवज्ज्ञाते ब्रह्मण्याकाशादिसकलप्रपञ्चोत्पत्त्यविरोधात्। यद्यपि चित्त्वापेक्षया-ऽविद्योपहितचित्त्वस्याविद्याश्रयतावच्छेदकत्वे गौरवम्, तथापि 'अहमज्ञः' इति प्रतीतेः, ईश्वरे च तथाऽप्रतीतेः प्रामाणिकत्वाद् न दोषः। न च 'अहमज्ञः' इति प्रतीतेरन्तःकरणावच्छिन्नचैतन्यस्यैवाविद्याश्रयत्वम्, तस्य जन्यतयाऽनाद्यविद्याश्रयत्वायोगात्' इत्याहुः।

तत्र माया-ऽविद्याशब्दद्वयनिमित्तं शक्तिद्वयम्– विक्षेपशक्तिः, आवरणशक्तिश्च। कार्यजननशक्तिर्विक्षेपशक्तिः, तिरोधानशक्तिरावरणशक्तिः; यथाऽवस्थारूपस्य रज्ज्वज्ञानस्य सर्पजननशक्तिः, रज्जुतिरोधानशक्तिश्च, एवं मूलाज्ञानस्याद्वितीय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्णानन्दैकरसंचिदावरणशक्तिः, आकाशादिप्रपञ्चजननशक्तिश्च; इति 'आवरणमेव शक्तिः' इत्यपव्याख्यानम्, तस्यात्मनिष्ठत्वात्, तच्छक्तेश्चाज्ञाननिष्ठत्वात्।

तत्रैवाज्ञाने प्रपञ्चस्य परमार्थव्यवहारप्रतिभाससत्त्वप्रतीत्यनुकूलास्तिस्रः शक्तयः। आद्या श्रवणाद्यभ्यासपरिपाकतः प्राक्, यया पश्यन्ति नैयायिकादयः 'पारमार्थिकोऽयम्' इति प्रपञ्चम्। द्वितीया तत्परिपाके तत्त्वज्ञानात् प्राक्, यया पश्यन्ति विदितवेदान्ताः 'व्यावहारिकोऽयम्' इति प्रपञ्चम्। तृतीया तु तत्त्वज्ञानोत्पत्तौ यावत् प्रारब्धमनुवर्तते। तस्याश्च कार्यं यद्यपि न प्रातिभासिकसत्त्वप्रतीतिः, व्यवहारवादे तथा वक्तुमशक्यत्वात्, व्यावहारिके प्रातिभासिकत्वप्रतीतौ तत्त्वज्ञानिनामत्यन्तभ्रान्तत्वप्रसङ्गात्, दृष्टिसृष्टिवाद एव वस्तुतः प्रातिभासिकस्याप्यन्यथाभासमानस्य शक्तित्रयेण क्रमेण तथाभानोपपत्तेः; तथापि व्यावहारिकस्यापि प्रपञ्चस्य तत्त्वज्ञानेन बाधितस्यापि प्रारब्धवशेन बाधितानुवृत्त्या प्रतिभासस्तत्कार्यम्।

प्राच्यशक्तेरुत्तरशक्तिकार्यप्रतिबन्धकत्वाच्च न युगपच्छक्तित्रयकार्यप्रसङ्गः। प्रारब्धक्षये चान्तिमतत्त्वज्ञानेन सहाज्ञाननिवृत्तिः। तथा च श्रुतिः– "तस्याभिध्यानाद् योजनात् तत्त्वभावाद् भूयश्चान्ते विश्वमायानिवृत्तिः" इति। अयमर्थः– तस्य परमात्मनः, अभिध्यानात्– अभिमुखाद् ध्यानात्, श्रवणाद्यभ्यासपरिपाकादिति यावत्, विश्वारम्भकमायानिवृत्तिः, आद्यशक्तिनाशेन विशिष्टनाशात्। युज्यतेऽनेनेति योजनं तत्त्वसाक्षात्कारस्तस्मादपि[2], द्वितीयशक्तिनाशेन विशिष्टनाशात्। तत्त्वभावो विदेहकैवल्यं तस्मात्, अन्ते– प्रारब्धक्षये, तृतीयशक्त्या सह निःशेषमायानाशः, अभिध्यान-योजनाभ्यां शक्तिद्वयनाशेन

१ ख.ग.घ.च. 'सांविदार'। २ विश्वारम्भकमायानिवृत्तिरिति योगः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशिष्टनाशापेक्षया। भूयःशब्दोऽभ्यासार्थक इति। तदेवं निरूपितमज्ञानम्।

ततो जीवेश्वरादिप्रपञ्चः। तत्र 'अविद्याप्रतिबिम्बितं चैतन्यं जीवः' इति विवरणाचार्याः। सिद्धं चैतत् "रूपं रूपं प्रतिरूपी बभूव" इति श्रुतेः, "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" इत्यादिस्मृतेश्च। न चामूर्तस्य प्रतिबिम्बायोगः, आकाशादेस्तद्दर्शनात्। नन्वविद्यावच्छिन्नं चैतन्यमेव जीवोऽस्तु। एवं सति सर्वनियन्तृत्वमीश्वरस्य न स्यात्, जीवभावेनोपाध्यवच्छिन्नस्य पुनरवच्छेदान्तरासंभवात्, घटाकाशादौ तथादर्शनात्, द्विगुणीकृत्य वृत्त्ययोगादिति चेत्। न, बिम्बचैतन्यस्यापीश्वरस्य प्रतिबिम्बान्तर्द्विगुणीकृत्य वृत्त्ययोगात्। न हि जलगते स्वाभाविकाकाशे सत्यपि बिम्बस्य दूरविशालाकाशस्य साभ्रनक्षत्रस्य जलान्तरवस्थानं संभवति, कल्पना तूभयत्र तुल्येति चेत्। अत्राहुः– बिम्बं शुद्धमेव चैतन्यम्, अज्ञानप्रतिबिम्बितं चैतन्यं साक्षी, आवरणशक्तिप्रतिबिम्बभूतो जीवः, विक्षेपशक्तिप्रतिबिम्बभूतश्चेश्वर इति न किञ्चिद् दूषणम्, उपाधिभूतस्य शक्तिद्वयस्य व्यापकतया तत्प्रतिबिम्बयोर्जीवेश्वरयोरपि व्यापकत्वात्, जीवान्तर्यामित्वस्य ब्रह्मणः श्रुतिसिद्धस्याव्याहतत्वादिति।

'अज्ञानावच्छिन्नं चैतन्यं जीवः' इति वाचस्पतिमिश्राः। न चात्रेश्वरस्य सर्वान्तर्यामित्वानुपपत्तिः, अज्ञानोपाध्यवच्छिन्नं चैतन्यं जीवः, अज्ञानविषयतोपाध्यवच्छिन्नं चैतन्यं चेश्वर इत्युपाधेर्व्यापकत्वेनोपहितस्येश्वरस्यापि व्यापकत्वात्। न च तथाप्यज्ञानचैतन्यस्येश्वरत्वे 'अहं मां न जानामि' इत्यनुभवादीश्वरस्य प्रत्यक्षत्वापातः। न चाज्ञाततया सर्वस्य साक्षिभास्यत्वादिष्टापत्तिः, अनुभूयमानस्य 'अहम्' इत्यज्ञानचैतन्यस्येश्वरस्य स्वरूपतः प्रत्यक्षत्वापातात्। इष्यते च 'ईश्वरं न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जानामि' इत्येतावान्मात्रमेवेति चेत् । न, 'अहं मां न जानामि' इत्यत्राखण्डस्यैव ब्रह्माधिष्ठानस्य चैतन्यस्यावभासनात् , अज्ञाततोपहितचैतन्यस्येश्वररूपस्यानवभासनात् , अज्ञाततारूपोपाधिस्फुरणेऽप्ययोग्यत्वेन तदुपहितास्फुरणात्, घटस्फुरणे घटोपहिताकाशास्फुरणवत् ।

आभासवादिनस्तु दर्पणादौ मुखान्तरोत्पत्तिं स्वीकुर्वाणाश्चैतन्याभासमज्ञानेऽभ्युपगच्छन्तस्तत्तादात्म्यापन्नं चैतन्यं जीवमाहुः। तत्स्वीकारश्च निरुपाधिकाध्यासमात्रे सादृश्यापेक्षणादाभासतादात्म्यापन्नेऽन्यासादृश्यापन्ने चैतन्ये तादृशाहङ्काराध्याससंभवाय । जन्याध्यास एव निरुपाधिके सादृश्यापेक्षणाच्च नाभासाध्यासेऽपि तदपेक्षायामनवस्थापत्तिः, तस्यानादित्वात् । न चाज्ञानाध्यासेन सादृश्यसिद्धिः, जाड्येन तदापत्त्यसिद्धेः । तद्धि जडतादात्म्यम् , न चाज्ञानं तादात्म्येनाध्यस्तम् , संसर्गेणाध्यस्तत्वात् 'अहमज्ञः' इति । अतोऽनाद्याभासतादात्म्याध्यासेन जाड्यापत्त्या सादृश्ये सत्यहङ्काराध्यासो युज्यत इति । न चाभासे मानाभावः, 'आदर्शे मुखम्' इति स्पष्टं मुखान्तराभासात् । 'एकत्र क्लृप्तमन्यत्रापि प्रतिसंधीयते' इति न्यायेनाज्ञानेऽपि चैतन्याभासाङ्गीकारात् । एवमन्तःकरणादावपि । अज्ञानगतचैतन्याभासस्तु जीवशब्दप्रवृत्तिनिमित्तम् , तत्तादात्म्यापन्नस्य जीवत्वादिति ।

प्रतिबिम्बवादे तु न मुखान्तरोत्पत्तिः, मुखेऽधिष्ठानभेदमात्रस्य द्वित्वापरपर्यायस्यादर्शस्थत्वस्य चानिर्वचनीयस्योत्पत्त्यैव निर्वाहात् । अधिष्ठाने मुखे कतिपयावयवावच्छेदेनेन्द्रियसंनिकर्षादपरोक्षभ्रमोपपत्तेः । नन्वादर्श एवाधिष्ठानमस्तु, तत्र

१ क. 'व भ्रमाधि' ।

सुखाभावाज्ञानेन यदि सुखमपरोक्षम्, तदा तत्संसर्गस्य, अन्यथा तस्यैवोत्पत्त्योपपत्तेः, सुखाधिष्ठानत्वस्यानुभवाननुसारित्वादिति चेत् । न, सोपाधिक-निरुपाधिकभ्रमव्यवस्थाविप्लवप्रसङ्गात्, 'लोहितः स्फटिकः' इत्यत्रापि शुक्त्यज्ञानाद् रजतभ्रमवज्जपाकुसुमत्वाज्ञानाल्लोहिते तस्मिन् स्फटिकतादात्म्यभ्रमस्य सुवचत्वात्; अधिष्ठानस्योपाधित्वे च सर्वभ्रमाणां सोपाधिकत्वप्रसङ्गः, प्रत्यभिज्ञानाच्च न सुखान्तरोत्पत्तिः। नन्वेवं ततोऽज्ञाननिवृत्तौ भेदभ्रमोऽपि निवर्तेतेति चेत् । न, सोपाधिकभ्रमनिवृत्तावुपाधिनिवृत्तेः पुष्कलकारणत्वात्, भेदाध्यासे दर्पणस्योपाधित्वात्, सत्यपि प्रत्यक्षप्रत्यभिज्ञाने यावदुपाधिभेदाध्यासानुवृत्तेः। तस्माद् सुखमधिष्ठानं, तत्र च भेदोऽध्यस्यत इति स्थितम् । एवं चाज्ञानादौ प्रतिबिम्बे सत्यपि नाभासान्तरम्, मानाभावात्, अज्ञानाध्यासेन परिच्छिन्नत्वापत्त्यैव सादृश्यसंभवादिति विशेषः।

'स च जीवोऽज्ञानबहुत्ववादे हिरण्यगर्भ-विराडादिभेदेन नाना, तदैक्येऽपि तच्छक्तिभेदात्, तज्जान्तःकरणभेदाद् वा नाना' इत्यप्याहुः। अज्ञानभेदे प्रत्यज्ञानमावरणविक्षेपशक्तिकल्पने गौरवम्, तदैक्ये त्वेकत्रैव तावच्छक्तिकल्पनाल्लाघवम्। न च तावत्यः शक्तय एव सन्तु किमज्ञानेन? इति वाच्यम्; तासां साश्रयत्वनियमात् । चैतन्यं च न तदाश्रयः, शक्तस्य प्रपञ्चोपादानत्वात्, तस्य च सत्यत्वेनातथात्वात् । ततः शक्तिभेदेन तदुपहितजीवभेदः, तत्तज्जीवगततत्त्वज्ञानेन जीवोपाधिशक्तिनाशाद् मुक्त्युपपत्तेः । एवमन्तःकरणभेदेऽपि भाव्यम्। केवलमत्र "तन्मनोऽकुरुत" इति श्रुतेरन्तःकरणस्य जन्यत्वाज्जीवस्य सादित्वप्रसङ्ग इति नातीव प्राज्ञानामादरः।

जीवभेद एव क्रममुक्तिफलानां हिरण्यगर्भाद्युपासनावाक्यानामुपपत्तिः । तथाहि– कश्चिद् वेदार्थाभिज्ञो नित्याद्यनु- ॥२८१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिष्ठन्नामरणाभ्यस्यमानकेवलहिरण्यगर्भोपासनायाः परिपाके मरणकाले 'अहं हिरण्यगर्भः' इति प्रत्ययोद्रेके देहं विसृज्यार्चिरादिमार्गेण ब्रह्मलोकं गतो हिरण्यगर्भसायुज्यं गच्छति । सायुज्यमत्र 'सयुजो भावः' इति व्युत्पत्त्या भूतावेशन्यायेन हिरण्यगर्भशरीरे चतुर्मुखे उपास्योपासकयोरवस्थानम्' इति केचित् । 'तन्न, सायुज्यशब्दस्य तादात्म्ये रूढत्वात्, योगाद् रूढेर्बलीयस्त्वात् परिच्छिन्नलिङ्गस्योपासकस्यापरिच्छिन्नलिङ्गोत्पादः' इत्यन्ये । तदपि न, सारूप्यलक्षणापत्तेः, परिच्छिन्नलिङ्गनाशे मानाभावाच्च ।

परे तु– 'अपरिच्छिन्नमेकमेव समष्टिलिङ्गं पाप्मासङ्गादिदोषेण भ्रान्त्या परिच्छिन्नतां गतमुपासनया पाप्मादिनिवृत्तौ स्वरूपेणावतिष्ठते, तेन जीवस्य ब्रह्मभाववद् हिरण्यगर्भसायुज्यम्' इत्याहुः । तदपि न, लिङ्गस्यैकत्वेन तस्य हिरण्यगर्भान्तिमतत्त्वज्ञानेन नाशे क्रममुक्तिफलसमर्पकोपासनावाक्यप्रमाण्यादिह श्रवणाद्यनुपपत्तेः । क्रममुक्तिमात्राङ्गीकारे उपासनाविचारस्यैव कर्तव्यत्वेन ब्रह्मविचारस्याकिञ्चित्करत्वप्रसङ्गाच्च । अपरिच्छिन्नलिङ्गानेकत्वेऽपि सायुज्यशब्दस्य सारूप्ये लक्षणापत्तिः । परिच्छिन्नस्यापरिच्छिन्नेन तादात्म्यमिति चेत् । न, सर्वरूपे स्थितेऽन्यस्यान्यात्मतानुपपत्तेः, नाशे मानाभावाच्च । संकोच-विकाशपक्षस्त्वत्यन्ताप्रामाणिकः । तस्माद् यथावस्थितलिङ्गस्यैवोपासकस्योपासनाफलम् । 'समष्टिलिङ्गे हिरण्यगर्भे देहादाविवानिर्वचनीयं तादात्म्यम्, उपासनादशायाम् 'हिरण्यगर्भोऽहम्' इति प्रातिभप्रत्ययाद् विलक्षणस्य सायुज्यदशायामप्रातिभस्य तत्प्रत्ययस्य फलभूतस्य विषयः' इति वदन्ति ।

अन्यस्तूपासनाया अपरिपाके हिरण्यगर्भसालोक्यादि गच्छति, परस्त्विहैव श्रवणादिपरिपाकोत्पन्नज्ञानो मुच्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरस्तु श्रवणादिपरिपाकेऽपि प्रारब्धप्रतिबन्धेनानुत्पन्नज्ञानस्तन्नाशे शरीरनाशाद् योन्यन्तरगतो गर्भस्थदेहाभिव्यक्तौ प्रथममेव 'अहं ब्रह्मास्मि' इति प्रत्ययं लभते, वामदेववत्। अन्यः पुनः साधनसंपन्नः श्रवणाद्यभ्यासे क्रियमाणे मध्ये मृतः श्रवणाद्यभ्याससामर्थ्योद्बुद्धपूर्वशुभकर्मफलानि बहुकालं भुक्त्वा शुचीनां श्रीमतां योगिनां वा कुल उत्पन्नः पूर्वाभ्यासवशेन पुनः प्रारब्धश्रवणाद्यभ्यासपरिपाकलब्धज्ञानो विमुच्यत इति। एवं विराडाद्युपासकानां विराडादिसायुज्यप्राप्तिः, प्रतीकोपासकानां च विद्युल्लोकप्राप्तिर्व्याख्येया।

अन्ये त्वज्ञानैक्यात् तदुपहितं जीवमेकमेवाङ्गीकुर्वन्ति। तेषामुपासकानां क्रममुक्तिफलश्रवणमर्थवादमात्रम्। चित्तैकाग्र्ये तूपासनोपयोगः, कर्मानुष्ठानवत्। न त्वन्तिमप्रत्ययोत्पत्त्या फलदमुपासनम्, जीवैकत्वेऽप्यन्तःकरणभेदेन प्रमातृभेदाद् वोपसनोपपत्तिः, केषाञ्चित् प्रमातॄणामनुष्ठितोपासनापरिपाके ब्रह्मलोकं गतानां यावत्कल्पमवस्थाय कल्पान्तर आवृत्तेः "इमं मानवमावर्तं नावर्तते" इति श्रुतौ 'इमम्' इति विशेषणादेतत्कल्प एवानावृत्तिपर्यवसानात्, अन्यथैतद्विशेषणानुपपत्तेः। वामदेवादीनां मुक्तत्वश्रवणं काल्पनिकाभिप्रायम्, नित्यमुक्तत्वाभिप्रायं वा। न चानाश्वासः, श्रुतेः प्रामाण्यात्, अनेकजीववादेऽत्र यावत् कस्यचिदमुक्तत्ववत्, एकजीववादे सर्वस्य तत्त्वोपपत्तेः। तदेवं निरूपितो जीवः।

तत्रान्तःकरणमध्यस्यते 'अहम्' इति, रज्ज्वामिव सर्पः। निरुपाधिकोऽयमध्यासः, उपाधेरनिरूपणात्। 'अहमज्ञः' इति त्वहंकारा-ऽज्ञानयोरेकचैतन्याध्यासात्, एवं वह्निसंबन्धाद् दग्धृत्वा-ऽयसोरिव 'अयो दहति' इतिप्रत्ययः। तच्चान्तःकरणं स्मृतिप्रमाणवृत्तिसंकल्पविकल्पाहंवृत्त्याकारेण परिणतं चित्त-बुद्धि-मनो-ऽहङ्कारशब्दैर्व्यवह्रियते। इदमेवात्मतादात्म्येनाध्य- ॥२८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यमानमात्मनि सुख-दुःखादिस्वधर्माध्यासे उपाधिः, स्फटिके जपाकुसुममिव लौहित्यावभासे। एवं प्राणादयस्तद्धर्माश्चाशनीया-पिपासादयः, तथा, श्रोत्रादयो वागादयश्च तद्धर्माश्च बधिरत्वा-ऽन्धत्वादयोऽध्यस्यन्ते, तथा, देहस्तद्धर्माश्च स्थूलत्वादयः। तत्रेन्द्रियादीनां न तादात्म्याध्यासः, 'अहं श्रोत्रम्' इत्यप्रतीतेः, देहस्तु 'मनुष्योऽहम्' इति प्रतीतेस्तादात्म्येनाध्यस्यते।

ननु कथमज्ञानादीनामध्यस्ततया प्रतीतिः, न तावदध्यक्षा, इन्द्रियाजन्यत्वात्, नाप्यनुमितिः, लिङ्गाद्यननुसंधानेऽपि भावात्? इति चेत्। उच्यते, चिदात्मनोऽज्ञानोपहितस्य साक्षित्वेन तस्य भास्यसंसर्गमात्रमपेक्ष्याज्ञानादीनामाध्यासिकसंसर्गभासकत्वात् तदवभासः। तेन यावद् विषयसत्त्वं 'अहमज्ञः, सुखी, दुःखी, मनुष्यः' इति भासमानत्वाद् न कदापि संदेहः। स चापरोक्षैकस्वभावः, अध्यस्ता-ऽधिष्ठानयोरभेदेन संविदभिन्नत्वात्। संविदभेदो ह्यपरोक्षता नाम। स च नानिर्वचनीयतादात्म्यस्वरूपः, तादात्म्यसंसर्गादीनामपरोक्षत्वाभावप्रसङ्गात्, तत्र तादात्म्यान्तराभावात्, किन्तूक्तलक्षण एवेति।

नन्वेवं घटस्य संविदभिन्नत्वाभावात् परोक्षत्वमापद्यत इति चेत्। किमीश्वरस्य, जीवस्य वा?। नाद्यः, ब्रह्मण्यभेदेनाध्यस्तत्वाद् घटादीनाम्। नापि द्वितीयः, तथाहि- परिच्छिन्नजीवपक्षे तावदिन्द्रियद्वारा निःसृतान्तःकरणवृत्त्या संसृष्टो घटः, घटसंसृष्टा वा वृत्तिः प्रमातृचैतन्यस्य घटावच्छिन्नब्रह्मचैतन्यावरणनिवृत्तौ, तदज्ञाननिवृत्तौ वा, तदुभयाभावपक्षेऽनिवृत्तौ वा विषयचैतन्याभेदेनाभिव्यक्तिहेतुः संपद्यते। ततः स्वाध्यस्तो घटः सुखवदपरोक्षः। सुखं साक्ष्यपरोक्षम्, घटः प्रमाणापरोक्ष इत्येतावान् भेदः। अपरिच्छिन्नजीवपक्षेऽप्यसङ्गस्य जीवचैतन्यस्य घटोपरागार्था वृत्तिः। उपरागस्तु न संयोगादिः, मानाभावात्, किन्तु स्वाध्यस्तत्वमेव। तच्चात्र पक्षे व्यवहारसौकर्याय घटावच्छिन्नचैतन्येष्वावरणान्तराज्ञानान्तरास्वीकाराद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृत्तेस्तन्निष्टत्त्यर्थत्वाभावेऽपि जीवचैतन्यस्यासङ्गत्वात् घटानधिष्ठानत्वाच्च न वृत्तेः प्राग् घटसंबन्धः । अन्तःकरणवृत्तिस्तु जीवेऽध्यस्तेति तया सह संबन्ध एव, इतीन्द्रियद्वारा निःसृतान्तःकरणवृत्त्या संसृष्टे घटे, घटसंसृष्टायां वा वृत्तौ जीवचैतन्यविषयाधिष्ठानचैतन्याभेदापत्त्येति ।

अथ ब्रह्माध्यस्तो घटः प्रमाणवृत्त्या जीवाध्यस्तो भवतीत्येवाभ्युपेयम्, किमुभयचैतन्याभेदापत्त्या ? इति चेत् । न, वृत्तेर्बहिर्निःसरणाभ्युपगमवैयर्थ्यप्रसङ्गात् । तदनुपगमे च बहिःस्थस्य घटस्य कथमन्तःकरणोपहिते जीवचैतन्येऽध्यासः ? । घटाव्यवहिततया घटावच्छिन्नजीवचैतन्यस्यासङ्गस्याध्यासिकघटसंसर्गार्थं तदुपगम इति चेत् । तथा सति ब्रह्माध्यस्तघटसंसर्गो जीवचैतन्ये उत्पन्नः प्रामाणवृत्त्येति स एव जीवापरोक्षः स्याद् न घटः । न हि देशान्तरीयरजततादात्म्योत्पत्तावपि रजतापरोक्षत्वं सिध्यति । लौहित्यस्य त्वपरोक्षदशायां संसर्गः स्फटिके जायते, गृह्यमाणारोपत्वादिति न संसर्गापरोक्षत्वेन संसर्गिणोऽपरोक्षत्वम् । किञ्च, उत्पद्यमानः संसर्गोऽनिर्वचनीयः प्रातिभासिको न प्रामाणिकः संभवति, विरोधात् । तस्माद् न जीवचैतन्ये घटोपरागः प्रमाणवृत्त्या जायते, किन्त्वाध्यासिकसंबन्धेन, घटस्फोरकघटाधिष्ठानचैतन्येन जीवचैतन्यस्योक्तोपाध्यवभेदोऽभिव्यज्यते । इत्येवं स्वाध्यस्ततया घटापरोक्षत्वम् ।

अथवा, आवरणाभिभवार्था वृत्तिः, सर्वगतेऽपि जीवचैतन्येऽखण्डावरणस्य स्वविषयचैतन्यगोचरप्रमात्रादिविस्पष्टव्यवहारप्रतिबन्धकेऽन्तःकरणाद्युपाधेरुत्तेजकस्थानीयत्वेन तत्प्रतिबध्यकार्योदयात् । किमर्थमस्मिन् पक्ष उभयचैतन्याभेदाभिव्यक्तिः ? प्रमातृचैतन्यमेव विषये परिणामसंसृष्टेऽभिव्यक्तं फलं भवद् घटं विषयीकुरुतामिति चेत् । ब्रह्माध्यस्तस्य तस्य संविद्- ॥२८३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदरूपापरोक्षत्वायैव । तदेवं घटादेरपरोक्षता, वह्न्यादेस्तु प्रमातृचैतन्यनिष्ठाज्ञानमात्रनिवृत्तावप्युभयचैतन्याभेदाभिव्यक्त्यभावात्, वृत्तेश्चान्तरेवोत्पादात् परोक्षता । रजतादेश्च शुक्त्याद्यज्ञानसमुत्पन्नस्यानिर्वचनीयस्येदंवृत्त्या, इदमंशस्य घटादिन्यायेनापरोक्षत्वात्, प्रमातृचैतन्याभिन्नेदमंशचैतन्येऽध्यस्तत्वात् सुखादिवदपरोक्षत्वम् । इदमंशतादात्म्येनोत्पन्नत्वाच्च 'इदं रजतम्' इति प्रत्ययः । 'सत्' इति च तत्र शुक्तिसत्तैव भासते । न चान्यथाख्यातिः, तत्संसर्गस्यानिर्वचनीयत्वात् । न चैवं भ्रमानुमित्यादौ वह्नेरिव देशान्तरीयरजतस्य संसर्गोत्पत्त्यैव निर्वाहः, वह्नेरिव रजतस्य परोक्षत्वापत्तेः । शुक्ति-सत्तयोस्त्वपरोक्षत्वं प्रमाणवृत्त्यैव, इदमंशवत् ।

अन्ये तु तत्रापि वह्न्यंशे शुक्तिसत्तांशे चान्यथाख्यातिर्मा भूदिति वह्न्युत्पत्तिं, रजते सत्तान्तरोत्पत्तिं चाचक्षते । तदुक्तम्– "अथवा त्रिविधं सत्त्वम्" इति । नन्वेवं सुखादिवदपरोक्षत्वे रजताकारा वृत्तिर्न स्यात्, तत्र हीदमंशावच्छिन्नब्रह्मचैतन्याभिन्ने प्रमातृचैतन्ये 'रजतम्' इति तत्प्रमातृचैतन्यामिदमाकारवृत्तिप्रतिफलिततयेदमंशे प्रमाणमपि, तत्रैव विषयेऽभिव्यक्ततया फलमपि रजतांशे शुद्धसाक्षिरूपं, न तु प्रमाणं वा, फलं वा, प्रमाता वा, तदाकारप्रमाणवृत्त्यभावादेव, इति रजतवृत्तेः कोपयोगः ? इति चेत् ।

अत्र केचित्– साक्षिचैतन्यं स्वतः स्फुरदप्यसङ्गतया तत्तद्विषयावभासनायासमर्थं ज्ञानसंशब्दितवृत्तिप्रतिबिम्बितमेव विषयावभासकं भवति, इत्यज्ञान-सुखादीनामपि तदाकाराविद्यावृत्तिप्रतिफलितचिद्भास्यत्वमेव, केवलसाक्षिवेद्यत्वं तु प्रमाणवृत्त्यनपेक्षत्वात्, इत्यावश्यकी रजतवृत्तिः । अन्यथा सदा विषयविशिष्टाज्ञानावभासप्रसङ्गः, साक्षिणि साक्षादध्यस्तत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलाज्ञानास्फुरणाच्च। उक्तरीत्या तु नायं दोषः, वृत्तेरसदातनत्वात्, अत एवेश्वरस्यापि सर्वज्ञता सर्वाकारमायावृत्त्यैव। 'इयं च वृत्तिरन्तःकरणपरिणाम एव, अत एव स्वप्नस्य मनोवृत्तित्वम्' इति केचित्। अन्ये तु– 'सुषुप्तावन्तःकरणाभावादज्ञानसुखाद्याकाराविद्यावृत्तेरावश्यकत्वे तथैव साक्षिवेद्यत्वोपपत्तौ न तथा' इत्याहुः।

अपरे पुनः– 'वृत्तौ तादृशसामर्थ्ये मानाभावाद् वृत्तिभानप्रयोजकाध्यासिकसंबन्धस्यैवाज्ञानादिभानप्रयोजकत्वे तत्कल्पनानवकाशाद् नाज्ञानाद्याकारावृत्तिर्भानार्था। अज्ञानविशेषणतया सदा घटादिसर्वविषयभानं त्विष्टमेव, मनुष्यत्वाद्यभिमानवत्। अत एव स्वसत्तायामव्यभिचारिप्रकाशत्वमहंकारादीनामुक्तं ग्रन्थकारैः। रजतवृत्तिस्त्वावश्यकी। तथाहि– घटस्यापरोक्षत्वं न सुखादिवदन्तरवच्छेदेन, किन्तु बहिरवच्छेदेन। न हि बहिर्निःसृता वृत्तिर्घटं शरीरावच्छेदेन स्वाध्यस्तं संपादयति, बहिष्ठत्वात् तस्य, किन्तु घटावच्छिन्नब्रह्मचैतन्यप्रमातृचैतन्याभेदमभिव्यनक्ति। घटावच्छिन्नब्रह्मचैतन्यं च घटावच्छेदेनैव घटमपरोक्षीकरोति, नान्यावच्छेदेन, अन्यावच्छिन्नस्यान्यविषयीकरणे यत्किञ्चिदेकावच्छिन्नस्य सर्वज्ञत्वप्रसङ्गात्। तदेतदुभयचैतन्याभेदाभिव्यक्तिर्घटावच्छेदेन, न शरीरावच्छेदेन। अत एव विषयावच्छिन्नस्यैव फलत्वप्रवादः। ततः शरीरावच्छेदेन घटस्फुरणं वृत्तिविषयतयैव। द्वेधा हि तत्– एकं ज्ञाततयाऽज्ञाततया वा साक्षिविषयतया, अपरं च फलव्याप्यतया। आद्यं शरीरावच्छेदेन, द्वितीयं च घटावच्छेदेनेति।

कथं तर्हि 'घटं साक्षात् करोमि' इति शरीरावच्छेदेन प्रत्ययः, बहिरवच्छेदेनैव घटादेरपरोक्षत्वात्? इति चेत्। साक्षात्कारत्वस्य वृत्तिगतधर्मत्वात् तद् विषयापरोक्षत्वनिमित्तकम्, न तु वृत्तेः स्वाध्यस्तत्वकृतापरोक्षत्वकृतम्, वाक्यादावपि ॥२८४॥

तथाप्रसङ्गात् । तच्चानुमितित्ववत् साक्षिगम्यमिति । एवमिदमंशावच्छेदेनोत्पन्नं रजतमिदमंशावच्छेदेनैवापरोक्षम्, तत्तच्छरीरप्रदेशावच्छेदेन विद्यमानं सुखमिव तत्तदवच्छेदेन, इत्यतोऽन्तरवच्छेदेन तज्ज्ञानं वृत्तिमाक्षिपतीति । न चेदंवृत्तिविशेषणतयाऽन्तस्तदवभासः, तस्यास्तदाकारत्वाभावात्; ईश्वरे मायावृत्तिस्तु वर्तमानस्य स्वाध्यस्तस्य जीवे सुखादिवदपरोक्षत्वेऽप्यतीताऽनागतभानार्थं प्रतिकल्पं सर्वाकारैका कल्प्यते, श्रुत्युक्तजगत्कर्तृत्वनिर्वाहाय च, अन्यथा कार्यानुकूलज्ञानादिमत्त्वरूपतदनुपपत्तेः, स्वरूपज्ञाने भेदाभावेनाधाराधेयभावासंभवात्' इत्याहुः ।

तदेवं केवलसाक्षिवेद्यत्वे तुल्येऽपि रजतादौ वृत्तिरपेक्षिता, नाज्ञानादौ देहपर्यन्ते । ननु कथं देहस्य केवलसाक्षिवेद्यत्वम्, घटादिवच्चक्षुर्ग्राह्यत्वेन प्रमाणवेद्यत्वात् [1] । न च तत्र स्वप्नवच्चक्षुर्ग्राह्यत्वम्, घटादावप्यनाश्वासात् । न च प्रमाणवेद्य एव देहः, अज्ञानविषयत्वेन कदाचिद् 'अहं मनुष्यो न वा' इति संदेहापत्तेः । किञ्च, अस्य ब्रह्मण्यध्यस्तत्वे घटादिवद् न केवलसाक्षिवेद्यत्वम्, जीवाध्यस्तत्वे च सुखादिवदन्यापरोक्षत्वभङ्ग इति चेत् । अत्राहुः– एक एवायं जीवो देहत्वेन ब्रह्मण्यध्यस्तः, न जीवे, 'अहं देहः' इत्यप्रतीतेः । तादात्म्याभिनिविष्टमनुष्यत्वेन जीवेऽध्यस्तो न ब्रह्मणि, 'अहं मनुष्यः' इति प्रतीतेः । तेनैव च रूपेण केवलसाक्षिवेद्यत्वम्, प्रमाणवृत्त्यनपेक्षत्वात्, देहत्वेन तु प्रमाणवेद्यत्वम् । एवमन्तःकरणादिरपि तत्त्वादिना ब्रह्मण्यध्यस्तः, अहन्त्वादिना जीव इति सिद्धमज्ञानोपहितचैतन्यरूपसाक्षिवेद्यत्वं देहस्य ।

ननु नाज्ञानं साक्षित्व उपाधिः, सुषुप्तेऽज्ञानसुखसाक्षिस्फूर्तेः पुरुषान्तरस्य 'सुखमहस्वाप्सम्' इति स्मरणप्रसङ्गात्;

---

१ ख. ग. घ. च. 'ज्ञानवृ' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किन्त्वन्तःकरणमेव, यदन्तःकरणोपहिते संस्कारस्तत्रैव स्मरणनियमेनानतिप्रसङ्गादिति चेत् । न, सुषुप्तावज्ञानाद्याकारवृत्त्या परिच्छिन्नयान्तःकरणादिसंस्कारावच्छेदेनोत्पद्य नश्यन्त्या तदवच्छेदेन संस्काराधानात् तदवच्छेदेन स्मरणादनतिप्रसङ्गात्, जीवे श्वरसाधारण्येनाज्ञानस्य साक्षित्वोपाधित्वात् । तदुक्तम्– 'मोहसंक्रान्तमूर्तिः साक्षी' इति । अयमेव प्राज्ञ इति, आनन्दमय इति च गीयते, सुषुप्तेः प्रकर्षेणाज्ञत्वात्, आनन्दप्रचुरत्वाच्च 'न किञ्चिदवेदिषम्' इति 'सुखमस्वाप्सम्' इति परामर्शात्, तत्रान्तःकरणाद्युपाधिविरहात्, जागरापेक्षयानन्दाभिव्यक्तेः, न त्वानन्दमयः शुद्धः, अनात्मत्वेन निर्णीतान्नमय-प्राणमय-मनोमय-विज्ञानमयप्रायपाठात् । स्थूलदेहसंबन्धात् 'अन्नमयः' इति, प्राणपञ्चक-कर्मेन्द्रियपञ्चकसंबन्धात् 'प्राणमयः' इति, मनःसंबन्धाद् 'मनोमयः' इति, बुद्धि-ज्ञानेन्द्रियसंबन्धाद् 'विज्ञानमयः' इति च स एवानन्दमयोऽभिधीयते ।

प्राणमयादिकोशत्रयस्यैव तैजसत्वव्यपदेशः । तत्रैव च विज्ञानमयो ज्ञानशक्त्या 'कर्ता' इत्युच्यते, मनोमय इच्छाशक्त्या करणम्, प्राणमयः क्रियाशक्त्या कार्यम् । एतेन परेषामिव नास्माकं प्रयत्नः, कोशद्वयनिष्ठज्ञाने-च्छाभ्यामनन्तरं प्राणक्रियाशक्त्यैव शरीरचेष्टासंभवात्, इष्टपदार्थज्ञानस्य 'इष्टं मे स्यात्' इतीच्छायाश्चानुभववत् प्रयत्नानुभवाभावाच्च, 'अहं प्रयते' इति चेष्टाविषयत्वात् प्रतीतेः, शब्देन च तदभिधानात् । एतेन जीवनयोनिः प्रयत्नो निरस्तः । इदमेव कोशत्रयं लिङ्गशरीरम् । तच्च द्विविधम्– समष्टि-व्यष्टिभेदात् । तत्र समष्टिर्नाम व्यापकं सूत्रमिव मणिषु सर्वलिङ्गशरीरेषु स्थूलेषु चानुस्यूतं हिरण्यगर्भाख्यं लिङ्गशरीरम् । तच्चोपासनाविशेषफलभूतं प्रभूतपुण्यस्य भोक्तुरुत्कर्षं गतस्यानन्दविशेषस्यायतनं 'ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मणः' इति श्रुतेः । एतस्य चोक्तविधानन्दभोगनियमनमस्थूलशरीरापेक्षया, ब्रह्माण्डाद् बहिरपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोगश्रवणात् । एतदुपासकानां चोक्तविधसायुज्यं गतानां विराडादिसृष्टिव्यापारवर्जं तादृशमेव भोगादि व्यष्टिर्नाम परिच्छिन्नम् । तच्च बहुविधं विराजादि पिपीलिकापर्यन्तम् । तत्र विराजोऽस्मदादिवत् परिच्छिन्नस्यैव सतः प्रभूतपुण्यभोक्तृविशेषस्य सकलस्थूलाभिमानिनः सत्यलोकाधिपतेश्चतुर्मुखभोगशरीरावच्छेदेन हिरण्यगर्भाच्छतगुणापकृष्टानन्दविशेषान् भुञ्जतः प्रजापति-वैश्वानर इत्यादयो व्यपदेशा भवन्ति । सकलस्थूलाभिमानित्वाच्च स्थूलसमष्टिरिति व्यपदिश्यते, हिरण्यगर्भस्यैव स्थूलसंबन्धाद् विराट्संज्ञा, तैजसस्यैव विश्वसंज्ञा, जीवान्तरकल्पने गौरवात् , इति न युक्तमुपासनाविधिशेषेभ्यः, देवताविग्रहन्यायेन तत्सिद्धेः । एवमग्न्यादयोऽपि श्रुत्यादिसिद्धा अवसेयाः ।

एतच्च समष्टि-व्यष्टिलिङ्गशरीरमपञ्चीकृतेभ्यो भूतेभ्य उत्पद्यते । तथाहि– मायाशबलाच्चिदात्मन आकाशः, तस्माद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी। एतानि सूक्ष्माणि व्यापकानि च सूक्ष्मत्वं विरलावयवत्वम्। एतान्येव 'तन्मात्राः' इति व्यपदिश्यन्ते । एतेभ्यश्च व्यस्तेभ्यः क्रमेण श्रोत्रादिपञ्चकं वागादिपञ्चकं च, समस्तेभ्योऽन्तःकरणं प्राणश्चोत्पद्यते । अत एव श्रोत्रं न परेषामिव कर्णशष्कुल्यवच्छिन्नं नभः, किन्तु तत्कार्यं व्यष्टिसमष्टिरूपम् , तेन नावश्यमन्तरेवोत्पन्नः श्रोत्रेण शब्दो गृह्यत इति नियमः, चक्षुर्वद् बहिर्गत्वा तेन बहिष्ठस्यापि शब्दस्य ग्रहणसंभवात् । ततश्चैक एव शब्दो यथाप्रतीति बहुभिः पुरुषैर्गृह्यत इति युक्तं समाश्रयितुम् । ततश्च न प्रतिपुरुषं शब्दान्तरग्रहणकल्पना, नापि शब्दैकत्वप्रतीतेः सजातीयनिमित्तकभ्रमत्वकल्पना ।

---

१ ख. ग. घ. च. 'क्ष्मत्ववि' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतानि च श्रोत्रादीनि 'पञ्चभूतकार्यान्तःकरणात्मकानि' इति केचित्। 'स्वतन्त्राणि' इत्यपरे । 'एवमुत्पन्नलिङ्गशरीरेभ्योऽपञ्चीकृतेभ्यः पञ्चीकृतभूतोत्पत्तिः' इति केचित्। पञ्चीकरणं तु पञ्चानामर्धदशकं विधाय पञ्चानामर्धपञ्चके इतरार्धपञ्चकस्य प्रत्येकं चतुर्धा विभक्तस्य भागचतुष्टयस्य स्वस्वार्धपरित्यागेन योजनम् । अत्र चेश्वरस्यैव कर्तृत्वम् "नासमैकैकान्निवृत्तं करवाणि" इति श्रुतेः। पृथिव्यादिभागानां बहुत्वात्तु पृथिव्यादिव्यपदेशः।

सांप्रदायिकास्तु– न पञ्चीकृतानां कार्यान्तरत्वमिच्छन्ति, आकाशादिभ्यो वाय्वादिजन्मश्रवणवदपञ्चीकृतेभ्यः पञ्चीकृतजन्मश्रवणाभावात्, किन्तु तान्येव संयोगविशेषावस्थानि पञ्चीकृतान्युच्यन्ते। अत एव 'पटोऽपि न तन्तुभ्यः कार्यान्तरम्, किन्तु संयुक्तावस्थास्तन्तव एव' इति सिद्धान्तः। एतेभ्यः पञ्चीकृतेभ्यः पञ्चभ्योऽपि ब्रह्माण्डभूधरादिचतुर्दशभुवन-चतुर्विधस्थूलशरीरोत्पत्तिः। कथं विजातीयेभ्य एककार्योत्पत्तिः? इत्याक्षिपतां तन्तुभ्यः पटकार्योत्पत्तिं स्वीकृत्य तन्तु-केश-पट्ट-सूत्रादिभ्यः प्रतीयमानाऽऽसनादिविचित्रकार्याभावमङ्गीकुर्वतां कोशपानमेवैकशरणम्। चतुर्विधानि– जरायुजा-ऽण्डज-स्वेदजोद्भिज्जानि। तदेवं निरूपितो हिरण्यगर्भादिरुद्भिज्जान्तो जीवस्य संसारोऽविद्यामूलः ॥ १ ॥

निरवयवस्यापि ब्रह्मणोऽविद्यया विचित्रतयाऽभिव्यक्तौ दृष्टान्तमाह—

यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः। संकीर्णमिव मात्राभिर्भिन्नाभिरभिमन्यते ॥२॥ ॥२८६॥

यथा विशुद्धं– वस्तुतोऽसंकीर्णम्, आकाशं, तिमिरोपप्लुतः– तिमिरदुष्टलोचनः, जनः– परिच्छेत्ता, भिन्नाभिः–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विचित्राभिः, मात्राभिः– केशमक्षिकादिरूपादिभिः, संकीर्णमिवाभिमन्यते– दोषात् पश्यति।

ननु कथमेतत् 'इदं रजतं' इत्यत्रेदमंशस्य प्रमाणतोऽपरोक्षत्वस्य, रजतांशस्य च रजताकाराविद्यावृत्त्या साक्ष्यपरोक्षत्वस्येव, अत्र केशादिसंकीर्णतांशेऽविद्यावृत्त्या साक्ष्यपरोक्षत्वेऽप्याकाशांशे घटवत्स्वावच्छिन्नब्रह्मचैतन्यप्रमातृचैतन्याभेदाभिव्यञ्जकवृत्त्यभावेन प्रमाणतोऽपरोक्षत्वाज्जीवेऽनध्यस्तत्वेन च सुखादिवत् साक्ष्यपरोक्षत्वायोगात्? इति चेत्। अत्र वदन्ति– यथा केवलसाक्षिगम्यस्याप्यज्ञानरजतादेः प्रामाणिकभावत्व-मिथ्यात्वादिधर्मपुरस्कारेण प्रमाणगम्यत्वम्, एवं प्रामाणिकस्यापि नभसः केवलसाक्षिवेद्यसंकीर्णताधर्मपुरस्कारेण केवलसाक्ष्यपरोक्षत्वम्, नभःसंकीर्णतावगाह्यैकाविद्यावृत्तिप्रतिफलितसाक्षिणा संकीर्णतायास्तदाश्रयतया नभसश्च विषयीकरणात्।

नन्वेवमविद्यावृत्तिविषयतया साक्षिविषयीकृतत्वाद् भ्रमानुमिताविवापरोक्षत्वं न स्यादिति चेत्। न, ईश्वरस्य मायावृत्तिविषयतयाऽतीता-ऽनागतानामपरोक्षत्ववत् प्रकृतेऽपि तथात्वात्, अभ्रमप्रमानुमित्यादावविद्यान्तःकरणवृत्तिविषयतया वह्नेः साक्षिसंबन्धेऽपि लिङ्गादिप्रतिसंधानापेक्षत्वादपरोक्षत्वव्यवहाराभावात्, अज्ञानविषयतया घटवह्न्यादेः साक्षिसंबन्धे तूक्तहेतोरभावात् तद्भावात्। ततो विषयपक्षपातितया नभोनिष्ठसंकीर्णताभावाज्ञानस्य नभोऽवच्छिन्नचैतन्यनिष्ठाऽपि संकीर्णता साक्षिणि स्वाकाराविद्यावृत्तिविषयतया स्वाध्यस्ता लिङ्गादिप्रतिसंधानाभावादपरोक्षैव व्यवह्रियते। अधिष्ठानज्ञानं विना कथं नभसि संकीर्णताभ्रमः, न च केवलस्याधिष्ठानस्याविद्यावृत्तिरूपं ज्ञानं संभवति, प्रामाणिकत्वात्? इति चेत्। न, तज्ज्ञानस्यानुमितिरूपत्वात्, भ्रमात् प्रागधिष्ठानस्य परोक्षत्वेऽपि भ्रमदशायामपरोक्षत्वात्, प्रागपरोक्ष एवाधिष्ठानेऽपरोक्षभ्रम इति नियमाभा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वादिति । ततः स्थितमेतदाकाशमसंकीर्णमप्यविद्यावृत्त्या संकीर्णमिव पश्यतीति ॥ २ ॥

दार्ष्टान्तिकयोजनामाह—

तथेदममलं ब्रह्म निर्विकल्पमविद्यया । कलुषत्वमिवापन्नं भेदरूपं प्रकाशते ॥३॥

तथेदं- साक्षादपरोक्षम्, अमलं- सजातीयभेदरहितम्, निर्विकल्पं- विजातीयभेदविकल्पविकलम्, ब्रह्म, अविद्यया हेतुभूतया, कलुषत्वमिवापन्नं- सजातीयभेदभागिव भेदरूपं विजातीयभेदभागिव प्रकाशते । अविद्यानिवृत्तौ च शुद्धब्रह्मप्रतिपत्तिः, तथाहि- कश्चित् खलु नित्याध्ययनविधिना सम्यगधीतवेदान्तो वेदान्तवाक्यानामापाततोऽर्थमवगच्छति ।

ननु कथमध्ययनविधेर्नित्यत्वम्, स्वाध्यायाध्ययनस्यार्थबोधफलकत्वात् ? । न ह्यध्ययनस्यावघातादिवदुत्तरक्रत्वङ्गत्वम्, श्रुत्याद्यसत्त्वात् । तदवश्यं फले कल्पनीये न विश्वजिद्वत् स्वर्गः फलम्, स्वर्गोपस्थितेस्तस्य प्रकृतकर्मफलतायाश्च कल्पनायां गौरवात् । न चार्थवादिकं पितॄणां पयःकुल्याप्राप्त्यादि 'यद् वचोऽधीते' इत्याद्युक्तं तत्फलम्, तस्य ब्रह्मयज्ञार्थवादत्वात्, दृष्टे संभवत्यदृष्टकल्पनानुपपत्तेश्चार्थावबोधस्यैव फलत्वात् । न च विधिवैयर्थ्यम्, नियमविधित्वादुपदेष्ट्रादीनां साधनत्वेनाध्ययनस्य पक्षप्राप्तेः । तस्मात् काम्यत्वाद् न नित्यत्वमध्ययनस्येति चेत् ।

अत्र वदन्ति— काम्यत्वेऽपि फलतो नित्यत्वमविरुद्धम् । अत एव 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् भवति— यज्ञेन देवेभ्यः, प्रजया पितृभ्यः, ब्रह्मचर्येण ऋषिभ्यः' इति ऋणश्रुतिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

“ योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ १ ॥ ”

इति स्मृतेश्च । नन्वेवं स्वरूपत एव नित्यत्वमस्तु, तथाचाग्निहोत्रादिवत् काम्यत्वव्याघात इति चेत् । किमिदं स्वरूपनित्यत्वम् ? । यदि तावदवश्यकर्तव्यता, तदा तदुच्यत एव फलतः । अथाकरणे प्रत्यवायः, सोऽपीष्यत एव, अध्ययनाकरणे धर्मानवबोधेनोत्तरकर्माभावात् । अथ नैमित्तिकत्वम् । तदयुक्तम्, अग्निहोत्रादिवद् निमित्ताश्रवणात्, फलतो नित्यत्वेन ऋणश्रुत्याद्युपपत्तौ निमित्तकल्पनानवकाशात् । अत एवाध्ययनाकरणनिमित्तको न प्रत्यवायः । अथवा, तदकरणेऽपि प्रत्यवाय एव, 'विहितस्याननुष्ठानात्' इत्यत्रावश्यकत्वेनानुगतीकृतयोः फलतो नित्य-नैमित्तिकयोर्विहितपदेनोपादानात् अर्थावबोधफलकत्वं तु प्रकृतस्वाध्यायविधेरयुक्तम्, श्रवणादिविधेः साधनचतुष्टयसंपन्नाधिकामत्वश्रवणात्, अनन्तरदृष्टाहरहःकर्तव्यब्रह्मयज्ञाद्यर्थावाप्तेरेव तत्फलत्वात्, 'स्वाध्यायोऽध्येतव्यः' इत्यत्राध्ययनसंस्कृतेन स्वाध्यायेनार्थावबोधं भावयेदित्यर्थात्, संस्कारश्चावाप्तिः, इति श्रुतिपरित्यागायोगात्, क्षत्रियस्य निषादेष्ट्यादिवाक्याध्ययनेऽर्थावबोधस्य निष्प्रयोजनत्वेनावाप्तिफलत्वावश्यकत्वाच्चेति दिग् ।

आपातता च वेदान्तवाक्यार्थावगमस्य निःसामान्यविशेषब्रह्मावधारणरूपस्यापि संशयाविरोधितैव । यत्त्वेककोटिकानिश्चयरूपतैवाऽऽपाततेति । तन्न, अनिश्चयरूपस्यानेककोटिकत्वेन क्लृप्तत्वात् । अनिश्चयमपि किञ्चिदेककोटिकं कल्पयिष्याम इति चेत् । निश्चयमेव कश्चित् संशयाविरोधिनं कल्पन्ताम्, वेदानां स्वार्थे निश्चितप्रमाजनकत्वात् । वस्तुतः परेषामप्रामाण्यज्ञानस्थलेऽस्माकं दोषविशेषस्य लाघवादुत्तेजकत्वम् । अत एव व्यवसायसामर्थ्यात् तद्वत्त्वस्य तत्प्रकारक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वस्य चानुपस्थितस्यापि 'जलमहं जानामि' इति ज्ञानेऽवश्यं भानात्, प्रामाण्यनिश्चयेऽप्यनभ्यासादिदोषात् तत्संशयः। दृश्यते च काशीस्थस्याप्यार्द्रमरिचप्रत्यक्षेऽसंभावनादोषात् तत्संशयः, तद्वदधीताद् वेदान्तवाक्यादब्रह्मबोधेनासंभावनादोषाद् युक्तः संशय इति। तदयमापातज्ञानवानिह जन्मनि जन्मांतरे वाऽनुष्ठितकर्मभिर्विशुद्धान्तःकरणो नित्यानित्यादिविवेकं लभते।

ननु कथं कर्मणां तत्तत्फलसाधनानामन्तःकरणशुद्धिहेतुत्वम्? इति चेत्। अत्र वदन्ति– नित्यानां तावत् कर्मणां पापक्षयहेतुत्वमावश्यकम्, ज्ञानाज्ञानकृतानां सर्वपापानां पुरुषेषु सत्त्वात्, तत्क्षयस्य सर्वदा सर्वाभीप्सितत्वात्, दुःखवत् पापस्यापि द्वेष्यतया तन्निवृत्तेः काम्यत्वात्, अहरहःकर्तव्येनावगतानां नित्यानां तेनैव फलवत्त्वात्, स्वर्गादेर्नियतानुपस्थितिकत्वात्, प्रत्यवायप्रागभावस्य चासाध्यत्वादिति। तदुक्तम्– 'धर्मेण पापमपनुदति' इत्यादि। यद्वा, 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन' इत्यादिश्रुत्या तत्तत्फलसंयुक्तानामपि कर्मणां 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' इति न्यायाद् विविदिषासंयोगस्य ज्ञानसंयोगस्य चा (वा) विधानात्।

तत्रान्तःकरणशुद्धेर्द्वारत्वम्। न च प्रकरणान्तरे प्रयोजनान्यत्वमिति न्यायाद् तत्र प्रकरणान्तरमनुपादेयगुणश्च, यत्र मासमग्निहोत्रं जुहोति, आग्नेयं निर्वपेत् ऋद्धिकाम इत्यादाविव कर्मान्तरत्वानियमादत्रापि तत्प्राप्तिरिति वाच्यम्; यज्ञादिसंबन्धविधेरत्राश्रवणात्, प्रसिद्धानामाख्यातासमानाधिकरणव्यवहितपरामर्शसमर्थसुबन्तपरामृष्टानां कर्मणां फलसंबन्धमात्रविधा-

१ ज. 'बद्धवि'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नोपपत्तावपूर्वविध्यकल्पनात् । अत एव 'सर्वेभ्यो दर्श-पूर्णमासौ' इत्यादौ सर्वसंबन्धमात्रपरत्वाद् न कर्मान्तरत्वम् । उक्तं च– "सर्वकामार्थता तस्मादप्राप्तेह[1] विधीयते" इति ।

ननु किमत्र पशुकामस्योद्भिच्चित्रादिष्विव विविदिषादिकामस्य यज्ञादिषु विकल्पः, उत स्वर्गकामस्याग्नेयादिष्विव समुच्चयः ? इति चेत् । अत्र केचित्– 'यज्ञादीनामेकवाक्यगतत्वेन दर्शादिवत् समुच्चयः' इति वदन्ति । तत्रैकवाक्यत्वमर्थैकत्वात्, यथा 'अग्निहोत्रं जुहोति' इति । 'अरुणयैकहायन्या' इत्यादौ सत्यप्यारुण्याद्यर्थभेदे विशिष्टक्रियाविधानादेकवाक्यत्वम् । सत्यपि च विशिष्टविधानस्य गौरवग्रस्तत्वेऽगत्या तदाश्रयणम् । क्रियायाः प्रकरणान्तरप्राप्तौ हि विशेषणमात्रविधानम्, यथा 'दध्ना जुहोति' इति; तत्राप्येकमेव विशेषणं विधातुं शक्यते, नानेकम्, वाक्यभेदप्रसङ्गात् । अप्राप्ता हि क्रियाऽनेकविशेषणान्युपसंगृह्णती विशिष्टा विधातुं शक्या, प्राप्तायां तु तस्यामनेकार्थविधाने विधिप्रत्ययावृत्तिलक्षणो वाक्यभेदः । तदुक्तम्– "प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः" इति । अत्र च 'कर्मणि' इत्युपलक्षणम्, प्राप्तमात्रमुद्दिश्यानेकविधानस्याशक्यत्वात् ।

अत एव 'ग्रहसमष्टि-' इत्यत्र ग्रहोद्देशेनैकत्व-संमार्गयोर्विधाने वाक्यभेद एकोद्देशेनानेकविधानवदनेकोद्देशेनैकविधानमप्यशक्यम्, यथाऽत्रैवैकत्वग्रहोद्देशेन संमार्गविधानम् । तदत्र 'विविदिषन्ति' इत्यत्र न तावदरुणादिवाक्यवदेकविशिष्टक्रियाविधायकत्वम्, असंभवात्, अनङ्गीकृतेश्च येन तद्वदेकवाक्यत्वम् । नापि 'दध्ना जुहोति' इतिवत् कस्यांचित् क्रियायामेक-

---

१ ख. ग. घ. च. झ. 'प्राप्त्येह' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषणविधानम्, उक्तहेतोरेव। यज्ञदानादीन्युद्दिश्य विविदिषाफलसंबन्धविधाने एकत्वग्रहोद्देशेन संमार्गविधानवद् वाक्यभेदः, विविदिषाफलं चोद्दिश्य यज्ञदानादिविधाने ग्रहोद्देशेनैकत्वसंमार्गविधानवद् वाक्यभेदः।

'दर्श-पौर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्रैकस्वर्गोद्देशेन दर्श-पौर्णमासात्मकानेकयागविधानवदत्र विविदिषोद्देशेन यज्ञदानाद्यनेकविधानं किं न स्यात्? इति चेत्। न, तत्र 'व्रीहिभिर्यजेत' इत्यत्र व्रीहीणामिव षण्णामपि यागानां यज(ति?)नसमानाधिकरणैकपदोपात्तत्वेन वाक्यभेदाभावेऽपि प्रकृते 'यज्ञेन' 'दानेन' इत्यादौ तदभावात्। तेनैकस्य श्रोतव्यादिवाक्येष्वनुषङ्गवदेकस्य विविदिषन्तिपदस्यानुषङ्गः कल्प्यः– 'यज्ञेन विविदिषन्ति' 'दानेन विविदिषन्ति' इति।

कथं तर्हि समुच्चयः? इति चेत्। भिन्नवाक्यविहितानामपि सोमप्राप्त्यर्थानां क्रयाणामिव संभवत्समुच्चयो यज्ञादीनां नित्यवत्समुच्चये हि[1] क्रयाणां प्रत्येकविधिषु नियमविधित्वं न स्यात्। आर्थिकी हि तत्रेतरनिवृत्तिः, अरुणाक्रयेणैव सोमं भावयेदिति। संभवत्समुच्चये तु सोमप्राप्त्यर्थत्वात् क्रयाणां तत्रानतिद्वारस्यैकेनैव सिद्धौ न नियमभङ्गः। असिद्धौ तु प्रत्येकावगतं नियमं कार्यानुरोधेन परित्यज्य वाक्यान्तरविहितक्रयसापेक्षत्वं पूर्वक्रयस्य कल्प्यते। अत एव दध्यादिषु नासौ, होमनिष्पत्तेर्द्वारस्यैकेनैव सिद्धेः। एवमिहापि यज्ञादिनैकेनैवान्तःकरणशुद्धिद्वारसिद्धौ नान्यापेक्षा, अन्यथा तु स्यादेव। अत एव यज्ञानधिकारिणां ब्रह्मचारिणां वेदानुवचनेन केवलेनाप्यन्तःकरणशुद्धिद्वारा विविदिषासिद्धिः। तथा च स्मृतिः– "जपेनैव तु संसिध्येत्" इत्यादि। न च स्वर्गकामाग्निहोत्रवत् सैदनुष्ठाननियमः, तदनुष्ठानस्य साधनचतुष्टयसंपत्तिगम्यान्तःकरणशुद्धिपर्यन्तत्वात्।

१ ज. 'हि क्रिया'। २ क. 'सत्तद'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि वा, 'जातः पुत्रः कृष्णकेशोऽग्नीनादधीत' इत्यत्राधाने जातपुत्रकृष्णकेशत्वविधाने वाक्यभेदात् ताभ्यामवस्थाविशेषलक्षणवदत्र यज्ञादिपदैः प्रसिद्धं कर्मसामान्यमुपलक्ष्य विविदिषादिफलोद्देशेन विधीयते। संभवति चैवं संभवत्समुच्चयः, न च वाक्यभेदः। लक्षणापि दोष एवेति चेत्। तथापि वाक्यार्थभेदे प्रधानविशिष्टवाक्यार्थभङ्गः, लक्षणायां तु गुणीभूतपदशक्यार्थत्यागमात्रम्, इत्यत्रादरः। अत एव 'अर्धमन्तर्वेदि मिनोति, अर्धं च बहिर्वेदि' इत्यत्रापि वाक्यभेदो मा भूदित्यन्तर्वेदिबहिर्वेदिशब्दाभ्यां देशविशेषलक्षणाश्रयणम्' इत्यपरे। यद्वा, ईश्वरार्पणबुद्ध्यानुष्ठितानां कर्मणामन्तःकरणशुद्धिः फलम्, 'यत् करोषि' इत्यादिस्मृतेः। तत् सिद्धमेतत्– कर्मभिः शुद्धान्तःकरणो नित्यानित्यविवेकादि लभत इति।

तत्र नित्यानित्यविवेकः 'इदं सर्वमनित्यम्, एतस्याधिष्ठानं किञ्चिद् नित्यम्' इत्येवमालोचनात्मकः। तत ऐहिकपारलौकिकफलेच्छाविरोधिचेतोवृत्तिविशेषात्मको विरागः, ततः शमादिषट्कम्। तच्च शम-दमो-परति-तितिक्षा-समाधान-श्रद्धाः। अन्तःकरणनिग्रहः शमः। बाह्येन्द्रियनिग्रहो दमः। उपरतिः सन्न्यासः। द्वन्द्वसहिष्णुत्वं तितिक्षा। श्रवणादिप्रावण्यं समाधानम्। सांप्रदायिके विश्वासः श्रद्धा। ततो मोक्षेच्छा मुमुक्षा। तदेतत् साधनचतुष्टयं श्रवणाधिकारिविशेषणम्।

यत्तु– 'मुमुक्षैवाधिकारिविशेषणम्, तस्या एव निरपेक्षाधिकारनिमित्तत्वात्' इति। तन्न, सामर्थ्यादेरप्यधिकारनिमित्तत्वात्। अथ कामनार्थिकं सामर्थ्याद्यपेक्षते न श्रुतमन्यत्, तत् किं श्रुत-लिङ्गयोर्लिङ्गं बलवत्?। तस्माद् 'राजा राजसूयेन यजेत' इत्यादौ राजत्वादेरिव श्रुतस्य विवेकादेरप्यधिकारिविशेषणत्वं युक्तम्, मुमुक्षायाः सार्वत्रिकत्वात्, तच्चांविवेकादीनां

१ ख. ग. घ. च. 'द् राजसू'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वेकैकशाखापर्यालोचितानां सर्ववेदान्तप्रत्ययन्यायबाधितत्वाद् न तथात्वमिति चेत् । न, सर्ववेदान्तप्रत्ययन्यायेन साधनान्तरोपसंहारेऽपि तत्तच्छाखोपस्थितैकैकसाधनाबाधात्, इतरसाधनाभावस्य शब्दादनुपस्थितेः, आर्थिकस्य तदसाधनताभावप्रत्ययस्य चानपायात् ।

नन्वेवं शान्तो दान्त उपरत इति पुरुषविशेषणत्वात् सन्न्यासोऽप्यधिकारिविशेषणं स्यात् । न चानङ्गभूतस्यं तस्य तथात्वम्, विहितत्वात् । नाप्यङ्गभूतस्यं तस्य, श्रवणाङ्गत्वे श्रुत्याद्यसत्त्वात् । न च प्रकरणात् तस्य तथात्वम्, आत्मनः प्रकरणात् संनिधानात्; तथात्वे च वैपरीत्येऽप्यविनिगमात्, फलवत्त्वस्योभयत्राविशेषेण समप्राधान्यात् । किञ्च, शान्तो दान्त इत्यादावुपरतिपदाभिधेयस्य सन्न्यासस्य शान्त्यादिपदोपस्थिततद्वत्कर्तृकाविचारस्य च समुच्चयो विधीयते, अव्यभिचरितसंबन्धेन जुहूपदेन क्रतूपस्थितिवच्छान्त्यादिपदैस्तद्वत्कर्तृकविचारोपस्थितेः; अन्यथा ज्ञानस्य फलत्वेन विध्यगोचरत्वात्, ज्ञानोद्देशेन शान्त्याद्यनेकगुणविधाने वाक्यभेदप्रसङ्गात्, इति ज्ञानाङ्गत्वमेव सन्न्यासस्य । न 'च वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्' इति वाक्यात् श्रवणाङ्गत्वम्, दर्श-पौर्णमासाभ्यामिष्ट्वा सोमेन यजेतेतिवत् कालसंयोगपरत्वात् तस्य । अत एव जन्मान्तरीयोऽप्ययमुपयुज्यते, ज्ञानप्रतिबन्धकदुरितनिवृत्तिद्वारानिष्पत्तेः । अत एव जनकादीनामपि ज्ञानश्रवणम्, 'यद्यातुरः स्याद् मनसा वाचा च सन्न्यसेत्' इत्यापत्सन्न्यासविधानं च, स्वस्था-ऽऽतुरसन्न्यासयोरेककर्मत्वेऽप्येकत्राल्पाङ्गताया अन्यत्र सर्वाङ्गतायाश्चोपपत्तेः, नित्येषु शक्त्यपेक्षया तथात्वादिति चेत् ।

१ ख. ग. घ. च. झ. 'स्व तथा'। २ क. 'स्य श्र'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्राहुः– फलवत्त्वेन निर्णीतश्रवणसंनिधानफलस्य श्रुतत्वात् सन्न्यासस्य श्रवणाङ्गत्वम्, उपकार्योपकारकोभयाकाङ्क्षा-रूपस्थात्मप्रकरणोन्यस्य प्रकरणस्याङ्गत्वावेदकत्वात्, प्रयाजादीनामिव । एवमप्यार्थवादिकफलकल्पने प्रयाजादीनामपि 'कर्म वैतद्यज्ञस्य' इत्यार्थवादिकफलकल्पनाप्रसङ्गात् । किञ्च, सन्न्यासस्य फलकल्पनेऽफलसबलान्यतराकाङ्क्षाङ्गत्वकल्पने तूभयाकाङ्क्षेति श्रुतिलिङ्गेत्यादिन्यायादुभयाकाङ्क्षारूपप्रकरणस्यान्यतराकाङ्क्षारूपस्थानाद् बलवत्त्वात् श्रवणाङ्गत्वमेव, फलश्रुतेरर्थवादत्वात् । ज्ञानाङ्गत्वं तु न, प्रकरणावगतत्वात् श्रवणाङ्गत्वस्य शान्त इत्यादिवाक्ये दूषणाभावेन स्वार्थापरित्यागात् । कृतेऽपि स्वार्थपरित्यागे ज्ञानोद्देशेन सन्न्यास-श्रवणयोर्विधाने वाक्यभेदापरिहारात्, समुच्चयस्य द्वयानतिरेकेणैकसमुच्चयो विधीयत इत्यस्यापि दुर्वचत्वात् ।

वस्तुतोऽत्र ये मध्यमास्तानप्रये दात्र इत्यत्रेव सामानाधिकरण्यात् शान्तत्वादिविशिष्टैककर्तृविधानात्, जातपुत्र इत्यादाविव शान्त्यादिपदोपलक्षितावस्थाविशेषविधानाद् वा पश्येदित्यत्र ज्ञानस्य विध्ययोगात्, प्रकृतेस्तत्साधनश्रवणलक्षकत्वात्, शान्त्यादिविशिष्टैकश्रवणक्रियाविधानात्; 'सोमेन यजेत' इतिवद् वा न वाक्यभेदः । जन्मान्तरीयतदुपयोगस्तु नानिष्टः, द्वारस्य निष्पन्नत्वात् । श्रवणाङ्गत्वे जन्मान्तरीयप्रयाजादिवद् न तदुपयोगः स्यादिति चेत् । न, अध्ययनादावदृष्टस्यापि जन्मान्तरोपकारकत्वस्य श्रवणादाविव प्रयाजादावदृष्टस्यापि तस्य तदङ्गसन्न्यासादावविरोधात् ।

न चैतावता गृहस्थस्यापि श्रवणाधिकारः, विवेकादिवत् सन्न्यासस्याप्यधिकारविशेषणत्वात्, जन्मान्तरीयस्य च तस्या-

---

1 ख. ग. घ. ङ. 'णाङ्ग' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निश्चयात् । गृहस्थानामपि श्रवणं श्रूयत इति चेत् । न, 'वेदानिमम्' इत्यादिविधिविरोधेऽर्थवादालिङ्गस्य वाच्यत्वात्; 'ब्राह्मणो यजेत' इत्यादिविधिविरोध इव देवानां यागादिश्रवणे जनकस्य श्रूयत इति श्रद्धावन्तो मैत्रेय्याः 'श्रूयते' इति स्त्रीणामप्यधिकारं कल्पयेयुः । तस्मात् सन्न्यासिन एवाधिकारः । गृहस्थस्य तु प्रवृत्तस्य दृष्टार्थत्वात् श्रवणस्य प्रमाणसंभावनाददृष्टं निष्पद्यत एव । नियमादृष्टं तु नोत्पद्यते, विधेरप्रवृत्तेः, यथा शूद्रानुष्ठितयागान्तर्गतावघातात् ।

यच्चातुरसन्न्यासस्य ज्ञानार्थत्वमुक्तम् । तत्र 'यद्यातुर-' इत्यादिवाक्ये किं विधीयते ? । न तावत् सन्न्यासः, तस्य पूर्ववाक्यविहितत्वात् । नापि दशाविशेषे तद्विधानम्, अविरक्तस्य तदनधिकारात्, विरक्तस्यातुरस्यापि पूर्ववाक्येनैव सन्न्यासप्राप्तेः । नापि मनो-वाचोर्विधानम्, तयोरपि पूर्वतः प्राप्तेः । नाप्यातुरे तद्विधानम्, अनातुरे तत्प्रापकेनैव प्राप्तेः । अथ प्राप्तपुनः-संकीर्तनमितराङ्गपरिसङ्ख्यार्थमित्यनेनेतराङ्गव्यावृत्तिः क्रियत इति चेत् । न, परिसङ्ख्यायास्त्रिदोषत्वात् । श्रुतहान्य-ऽश्रुतकल्पना-प्राप्तबाधास्त्रयो दोषाः । तस्मात् 'यद्यातुर-' इत्याद्यभ्यासाधिकरणन्यायेन कर्मान्तरमेव विशिष्टं विधीयते । तस्य च न पूर्व-सन्न्यासप्रकृतित्वम्, मानाभावात् । न च तत्पूर्वसन्न्यासफलेन फलवत्, चोदकप्रवृत्त्यभावात् । नापि पूर्वसन्न्यासवत् श्रवणाङ्गम्, आतुरत्वसामर्थ्यस्य बलवत्त्वात् ।

तदवश्यं फले कल्पनीये केचिदाहुः—

"वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद् यतयः शुद्धसत्त्वाः ।

१ क. 'स्यापि' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते ब्रह्मलोके[1] तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे ॥१॥"

इति श्रुतेर्दग्धरथन्यायेनातुरसन्यासविषयत्वम् । न हि परिपक्वयोगस्य तत्र गमनम् । नापि 'प्राप्य पुण्यकृतान्' इत्यादेरातुरसन्न्यासविषयत्वम्, 'योगाच्चलितमानसः' इत्यादिनोपक्रान्तश्रवणादिविषयत्वेन प्रतीतेः । नापि कृतपापसन्न्यासिविषयत्वम्, कल्याणाभिधानात् । तस्मात् साधनसंपन्नस्योत्पन्नश्रवणादिप्रत्ययस्यापरिपक्वस्य 'प्राप्य पुण्यकृतान्' इत्यादिवचनविषयत्वम्, आतुरस्य शमाद्यसंपन्नस्याकृतश्रवणत्वेनानुत्पन्नप्रत्ययस्य 'वेदान्तविज्ञान-' इत्यादिवचनविषयत्वम् । परिपक्वयोगस्य तु नोभयविषयत्वमिति 'वेदान्त-' इत्यादिश्रुतेर्निर्गुणब्रह्मविषयत्वेन व्याख्यानेऽपि

"सन्न्यस्तमिति यो ब्रूयात् प्राणैः कण्ठगतैरपि । सोऽक्षयाँल्लभते भोगान् पुनर्जन्म न विद्यते ॥ १ ॥"

इत्यादिस्मृत्याऽऽतुरसन्न्यासिनो ब्रह्मलोकं गतस्य तत्रोपदेशे सत्युत्पन्नज्ञानस्य मुक्तिः, इत्युपदेशद्वारा मुक्तिसाधनब्रह्मलोकगमनकाम आतुरः सन्न्यसेदिति विधिर्विपरिणम्यत' इति ।

अपरे तु– 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इति वाक्यं 'यस्याहिताग्नेर्गृहानग्निर्दहेत् सोऽग्नये क्षामवतेऽष्टाकपालं निर्वपेत्' इतिवद् यदि वैराग्यनिमित्ते सन्न्यासविधायकम्, तदा निमित्ते विधानादेवाङ्गेष्वसमर्थस्यातुरस्य निरङ्गसन्न्यासप्राप्तेः 'यद्यातुर–' इत्यादेर्व्यर्थत्वाप(त्तेः)त्तिः । न हि यावज्जीवनिमित्ते विहितस्याग्निहोत्रस्यासमर्थं प्रत्यङ्गाभावबोधकं वचनान्तरमपेक्षितम्,

---

1 क. 'के तु प' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथाशक्तिन्यायेनैव सिद्धेः। यदि च विरक्तस्याधिकारिणस्तत्फलकामस्य सन्न्यासविधायकम्, तदाङ्गवाक्यपर्यालोचनयाङ्गेषु समर्थ प्रत्येवोक्तवाक्यप्रवृत्तिः। न ह्यङ्गेष्वसमर्थं प्रति स्वर्गकामाग्निहोत्रवाक्यं प्रवर्तते, अङ्गविकलस्याप्यधिकारापत्त्या तिर्यगधिकरणविरोधात्। तथा च प्रकृतेऽप्यङ्गासमर्थमातुरं प्रति 'प्रव्रजेत्' इति पूर्ववाक्यस्याङ्गवाक्यैकवाक्यतापन्नस्याप्रवृत्तेर्यथा(था)तुर इति वाच्यमङ्गासमर्थस्यातुरपदवाच्यस्य सन्न्यासकर्तव्यताविधायकं तद्विधिसामर्थ्यादेव चाङ्गाभावः। न ह्येतावता स एव सन्न्यास आतुरस्य विधीयते, 'वाचा मनसा वा' इत्यस्यापि विधेयस्य दर्शनात्। न चार्थप्राप्तानुवादः, अर्थप्राप्त्यपेक्षया श्रुतेः प्रवृत्तत्वात्, इति प्राप्ते सन्न्यासेऽनेकविधानस्याशक्यत्वात् सन्न्यासान्तरं विधीयते। तस्य चातुरत्वसामर्थ्यविरोधाद् न प्रकरणेन वाक्येन वा श्रवणसंबन्ध इति फलाकाङ्क्षायां पापक्षयः फलं कल्प्यते, "सन्न्यासेन द्विजन्मनाम्' इत्यादिस्मृतेः। यदि तु सन्न्यासं कृत्वा जीवितस्तदा श्रवणाधिकारिविशेषणत्वबोधकवाक्यप्रकरणबाधकं सामर्थ्यमपगतम्, इत्यधिकारिविशेषणत्वमेव सन्न्यासस्य भवति।

ब्रह्मलोकादिगमनं तु न सन्न्यासफलम्,'सन्न्यासाद् ब्रह्मणः स्थानम्' इत्यादेर्ब्रह्मलोकान्ते भोगविरक्तसन्न्यासविषयत्वात्, 'प्राप्य पुण्यकृतान्' इत्याद्युक्तस्य सन्न्यासपूर्वकानुष्ठितश्रवणादिसामर्थ्योद्बुद्धपूर्वशुभकर्मफलत्वात्। अत एव तदभावे " अथवा योगिनामेव कुले भवति धीमताम्" इत्युक्तेरातुरस्यापि सर्वतो विरक्तस्य तुल्यन्यायतया कदाचित् तत्सामर्थ्योद्बुद्धपूर्वशुभकर्मफलानि भुक्त्वा पुनर्जातस्य श्रवणादिना शीघ्रमुक्तिरेव; यथाश्रवणार्थसन्न्यासिनो दैवादर्वाक् श्रवणाद् मृतस्य नान्तरीयकफलाङ्गीकारे च सन्न्यासानां वैराग्यात् प्रकृतौ लय इत्यस्यापि प्रसङ्गात्, परिपक्वयोगस्यापि तत्प्रसङ्गाच्च। तत् सिद्धं ॥२९२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्न्यासः श्रवणार्थ एवेति। ततश्च सिद्धं साधनचतुष्टयसंपन्नः श्रवणाधिकारी श्रोत्रियं ब्रह्मनिष्ठं गुरुमनुसृतः श्रवणादि संपादयति।

श्रवणादिकं तु श्रवणम्, मननम्, निदिध्यासनं चेति। श्रवणं नाम वेदान्तानां शक्तितात्पर्यावधारणानुकूलो व्यापारः। श्रुतस्यार्थस्य युक्तितोऽनुसंधानं मननम्। विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं निदिध्यासनम्। एतेषां श्रवणं प्रधानम्, इतरे फलोपकार्यङ्गे, श्रोतव्यादिवाक्येषु प्राथमिकत्वात् श्रवणविधेरेवार्थवादिकफलकल्पनयेतरयोस्तत्कल्पनाक्लेशनिवृत्तेः। श्रवणस्य[1] तत्त्वज्ञाने प्रधानभूतशब्दप्रमाणस्वरूपनिर्वाहकतया प्राधान्यम्, अत्यन्तावगतार्थे गृहीतशक्तितात्पर्यस्यैव शब्दस्य प्रमाणत्वात्।

ये तु श्रवणादिषु विधिरेव नास्तीति, मननस्यैव च तत्त्वज्ञानोत्पत्तिं मन्यन्ते; तेषां निदिध्यासनस्य मनःसहकारितया, श्रवणादेश्च तदर्थतया न श्रवणे प्राधान्यादादरः। विधिश्चात्र नियम एव, निर्विशेषात्मबोधेऽपि पुराणप्राकृतवाक्यश्रवणादेः प्राप्तत्वात्, वेदान्तश्रवणस्य नियमनात्। संभवति हि शूद्रादेः शमादिसंपन्नस्य पुराणश्रवणादिना तत्त्वबोधः। ब्राह्मणस्य तु न वेदान्तपरित्यागेन पुराणश्रवणमिति नियमविधेः फलम्। एतच्च श्रवणाद्यावृत्तं तत्त्वधीहेतुः, दृष्टार्थत्वात्। एवं बहुजन्मलब्धपरिपाकवशादसौ 'तत्त्वमसि' आदिवाक्यार्थं विशुद्धं प्रत्यगभिन्नं परमात्मानं साक्षात् कुरुते।

तत्र त्वंपदार्थः प्रसिद्ध एव संबोध्यो जीवः, तत्पदार्थश्चेश्वरः। स च 'बिम्बचैतन्यम्' इति केचित्। 'विक्षेपशक्ति-

---

१ ख. ग. घ. च. 'स्य तस्य त'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रधानाज्ञानप्रतिबिम्बितं चैतन्यम्' इत्यन्ये । 'जीवनिष्ठाज्ञानविषयभूतं चैतन्यम्' इत्यपरे । उक्तार्थयोश्च तत्-त्वंपदयोरत्र सामानाधिकरण्यं न 'सिंहो देवदत्तः' इतिवद् गौणम्, मुख्ये संभवति तस्यान्याय्यत्वात् । नापि 'मनो ब्रह्म' इतिवदुपासनार्थम्, श्रुतहान्य-ऽश्रुतकल्पनापत्तेः । मुख्यत्वेऽपि न नीलोत्पलादिस्थानीयम्, गुण-गुणिभावाद्यसंभवात्, 'निर्गुणाऽस्थूल-' आदिवचनविरोधाच्च । नापि 'यः सर्पः स रज्जुः' इतिवद् बाधीयम्, उभयोश्चिद्रूपतया बाधायोगात् । तस्मात् पदार्थयोः परस्परभेदव्यावर्तकतया विशेषण-विशेष्यभावप्रत्ययानन्तरं लक्षणया 'सोऽयं देवदत्तः' इतिवद् विशुद्धप्रत्यगभिन्नाखण्डपरमात्मप्रतीतिः ।

सा च लक्षणा पदद्वयेऽपि विशेषणांशत्यागेन चिन्मात्रे स्ववाच्यैकदेशे, अन्यथाऽखण्डार्थप्रतीत्यनुपपत्तेः, लक्षणाबीजविरोधसमाधानाच्च । इयमेव जहदजहल्लक्षणा, भागलक्षणा च गीयते । न चाभेदान्वयिचैतन्यांशोपस्थितिरपि शक्त्यैव, वैशिष्ट्यांशस्य त्वनुपपत्त्याऽनन्वय इति न लक्षणायाः प्रयोजनमिति वाच्यम्; जीवत्वे-श्वरत्वाभ्यामुपस्थितयोरभेदान्वयासंभवाद् विशेषांशमात्रोपस्थित्यर्थं तदादरात् । न च शक्तिजन्ययैवोपस्थित्या विरुद्धप्रकारांशपर्युदासेनान्वयः, 'गौर्नित्यः' इत्यादावपि भागलक्षणोच्छेदात् । तत्र विशेषणत्वेनोपस्थितस्य न नित्यत्वान्वययोग्यता चेत् । अत्रापि जीवत्वे-श्वरत्वाभ्यामुपस्थितयोर्नाभेदान्वययोग्यतेति तुल्यम् । 'गोत्वं नित्यम्' इति बोधानुरोधात् तत्र विशेष्यतयोपस्थित्यर्थं लक्षणादर इति चेत् । अत्रापि विशेष्यतयोपस्थितयोर्विशेष्यांशयोरभेदः संसर्गविधया भायात्, इष्टं चाखण्डार्थत्वम्, इति लक्षणयैव शुद्धवस्तूपस्थितिः । अत एव निर्विकल्पको वाक्यार्थबोधः, पदार्थस्यैव वाक्यार्थत्वात् । न च वाक्यवैयर्थ्यम्, पदस्याप्रामाण्यात्, वाक्योत्थबोध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्तरेण भेदभ्रमानिवृत्तेश्च । न हि 'सः' इति 'अयम्' इति च देवदत्तस्वरूपमात्रविवक्षया प्रयुक्तपदजन्यबोधाद्[1] भेदभ्रमनिवृत्तिः, 'सोऽयम्' इति वाक्याच्च भवति सेति ।

तदिदमात्मज्ञानमुत्पन्नमात्रमेवानन्तजन्मार्जितकर्मराशिं विनाशयति, "क्षीयन्ते चास्य कर्माणि" इति श्रुतेः । तेन कर्मक्षयार्थं न कायव्यूहकल्पना,[2] 'स एकधा भवति' 'स त्रेधा' इत्यादिवाक्यानामुपासकाविषयत्वात् । न च देहनाशप्रसङ्गः, प्रारब्धप्रतिबन्धात् तस्य, न चेदेवम्, चिरथावद् न विमोक्षः; 'अथ संपत्स्ये' इति श्रुत्या कर्मविपाकेन प्रारब्धनिवृत्तावपि तस्य ज्ञानानिवर्त्यत्वाभिधानात् । तस्यां चावस्थायां प्रारब्धफलं भुञ्जानः सकलसंसारं बाधितानुवृत्त्या पश्यन् स्वात्मारामो विधिनिषेधाधिकारशून्यः संस्कारमात्रात् सदाचारः प्रारब्धक्षयं प्रतीक्षमाणो 'जीवन्मुक्तः' इत्युच्यते । अस्य च प्रारब्धतो जन्मान्तरमपि । अत एव सप्तजन्मविप्रम्भप्रदे कर्मणि प्रारब्धे उत्पन्नतत्त्वज्ञानस्य पुनर्देहान्तरं, प्रारब्धस्य ज्ञानानाश्यत्वादिति केचित् ।

संप्रदायस्तु– नैवम्, कर्म हि नैकमेव प्रारब्धतां भजते, एकेन कर्मणा भोजनादिक्षुधादिजन्यसुख-दुःखभोगानुपपत्तेः । 'भोजनादिजन्यसुखादेर्न कर्मजन्यत्वम्, स्वाभाविकत्वात्' इति तु न युक्तम्, दृष्टहेतुनिष्पादनेनैव कर्मणां सुखादिहेतुत्वात्, कर्मविशेषाभावादेव भोजनाद्यभावे सुखाभावात् । तस्मात् तत्तत्क्षणवर्तिबह्वल्पसुख-दुःखहेतुगुरुलघुकर्मणामनेकेषां प्रायणकालोद्बुद्धवृत्तिकानां प्रारब्धता वाच्या । इत्युत्पन्नज्ञानस्य देहान्तरस्वीकारे ज्ञानोत्पादकदेहनाशकाल एव कर्मणां प्रारब्धतापत्तेः प्राक् संचितावस्थानां तेषां ज्ञानेन नाशाभावे संचितकर्मनाशकताबोधकोक्तश्रुतिबाधः । नाशे वा कथं मनुष्यदेहान्तरोत्पत्तिः,

---

१ क. 'द् भ्र' । २ ख. ग. घ. 'कार्यव्यू' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य प्रतिक्षणवर्तिक्षुधादिदुःखबहुलत्वात् ? । तस्मात् सर्वेषां संचितानां नाशात् सप्तजन्मप्रदस्याप्यन्तिमतत्त्वबोधेनाज्ञान-तत्कार्यनिवृत्तौ निवृत्तिरिति न तस्य देहान्तरम् । इन्द्रादीनां तु ज्ञानिनां देहान्तरम्, प्रारब्धेनैव तन्नाशाभावात् । न च प्रकृतेऽपि तथा, उत्पन्नज्ञानस्य प्रतिक्षणभोगप्रदतत्तत्कर्मणां प्रारब्धत्वे मानाभावात्, इन्द्रादीनां तु देहश्रवणस्यैव मानत्वात्, देहान्तरस्य तादृक्सामर्थ्यस्य कल्पने गौरवाच्च ।

ततश्च ज्ञानिदेहारम्भकेष्वनेकजन्मप्रदेष्वनेकेषु सुकृत-दुष्कृतेषु सत्स्वपि न जन्मान्तरमेतस्य सुवचम्, सति देहे देहान्तरायोगात् । तन्नाशानन्तरं तदुपगमे च "यं यं वापि स्मरन् भावम्" इति स्मृतेर्देहान्तरविषयान्तिमप्रत्ययस्यावश्यकत्वाज्ज्ञानिनामपि तदापातात् । ततः प्रायणकाले उत्पादितदेहान्तरविषयान्तिमप्रत्ययत्वं प्रारब्धत्वम्, इति ज्ञानिदेहारम्भकाणां तज्जन्मभोगप्रदत्वावच्छेदेनैव प्रारब्धत्वात्, तज्जन्मभोगसमाप्तावज्ञाननिवृत्तेर्न देहान्तरम्, न चेदेवम्, उत्क्रमणस्यावश्यकत्वाद् 'न तस्य प्राणा उत्क्रामन्ति' इति श्रुतिसंकोचः । इति न ज्ञानिनो जन्मान्तरम्, किन्तु प्रारब्धक्षयेऽज्ञाननिवृत्तौ चिन्मात्रमेवावशिष्यत इति ।

अयं वेदान्तिनां सर्वः संप्रदायो निरूपितः । स्वैरं यत्राग्रहग्रस्ताः पतन्त्येते तपस्विनः ॥१॥३॥

एतन्निराकरणवार्तामाह—

अत्राप्यन्ये वदन्त्येवमविद्या न सतः पृथक् । तच्च तन्मात्रमेवेति भेदाभासोऽनिबन्धनः ॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रापि- अद्वैतपक्षे, अन्ये- वादिनः, वदन्ति यदुत- अविद्या न, सतः- ब्रह्मणः, पृथक्- तत्त्वान्तरम्, द्वैतापत्तेः। तच्च- सच्च, तन्मात्रमेव- सन्मात्रमेव, इति हेतोः, भेदाभासः-भेदाध्यवसायः, अनिबन्धनः- जनकविषयाभावादकारणः ॥४॥

पराशयं परिहरति—

सैवाथाभेदरूपापि भेदाभासनिबन्धनम्। प्रमाणमन्तरेणैतदवगन्तुं न शक्यते ॥५॥

अथ सैव- अविद्या, अभेदरूपापि- सन्मात्राभिन्नापि, भेदाभासनिबन्धनम्- अविद्यमाननीलादिप्रतिभासकारणम्। एतत्- परोक्तम्, प्रमाणमन्तरेण- एतदर्थनिश्चायकप्रमाणं विना, अवगन्तुं न शक्यते, प्रमेयव्यवस्थितेः प्रमाणाधीनत्वात् ॥५॥

तद्भावा-ऽभावयोरुभयतो दोषमाह—

भावेऽपि च प्रमाणस्य प्रमेयव्यतिरेकतः। ननु नाद्वैतमेवेति तदभावेऽप्रमाणकम् ॥६॥

भावेऽपि च- उपगमेऽपि च, प्रमाणस्य- उक्तार्थनिश्चायकस्य, प्रमेयव्यतिरेकतः- तस्य प्रमेयभिन्नत्वाद् हेतोः, ननु- निश्चितम्, अद्वैतमेवेति न, प्रमाण-प्रमेयद्वैविध्यव्यवस्थानात्। तदभावे- प्रमाणानभ्युपगमे, अप्रमाणकमद्वैततत्त्वम्, तथा च को नाम विनोन्मत्तं श्रद्दधीत ? ॥ ६ ॥

नन्वयमनुक्तोपालम्भः, अविद्यायाः पृथक्त्वस्य, प्रमाण-प्रमेयादिविभागेन व्यावहारिकभेदस्य च प्रागुक्तरीत्याऽभ्युपगमादेव; परमार्थतस्तु 'तत्त्वमसि' इत्यादिनोक्तमखण्डमेव सत्, इत्यत आह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विद्या-ऽविद्यादिभेदाच्च स्वतन्त्रेणैव बाध्यते। तत्संशयादियोगाच्च प्रतीत्या च विचिन्त्यताम् ॥

विद्या-ऽविद्यादिभेदाच्च, स्वतन्त्रेणैव– स्वाभ्युपगतप्रामाण्येन शास्त्रेणैव, बाध्यतेऽद्वैतम्; तथाहि—"विद्यां चाविद्यां च यस्तद्वेदोभयं सहाविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" इति श्रुतौ विद्या-ऽविद्ययोरमृतासि-मृत्युतरणफलयोः स्फुटमेवोक्तो भेदः, स चाद्वैतेन विरुध्यते। नन्वत्राविद्यया श्रवणादिलक्षणया मृत्युं तीर्त्वाऽविद्यामेव निवर्त्य विद्ययोपलक्षितममृतमश्नुते, स्फटिकमणिरिवोपाधित्यागादन्तरेण प्रयत्नान्तरं स्वरूपेऽवतिष्ठत इत्यर्थः। अविद्ययैवाविद्यानिवृत्तिश्च यथा पयः पयो जरयति, स्वयं च जीर्यति, यथा विषं विषान्तरं शामयति, स्वयं च शाम्यति, यथा वा कतकक्षोदादिरजो रजोन्तराणि संहरत् स्वयमपि संहृतं भवति तथेति। न चासत्याद् न किञ्चित् कार्यम्, मायायाः, प्रीतेः, भयस्य, रेखाङ्कादेश्च सत्यप्रतिपत्तेर्दर्शनात्, इत्यत आह— तत्संशयादियोगाच्चेति, किमत्रोक्तार्थेन 'तत्त्वमसि-' आद्युक्ताद्वैताबाधः, उत विद्या-ऽविद्यापदार्थाभ्यां ज्ञान-कर्मभ्यामतिरिक्तमुक्तिसाधनत्वबोधात् तद्बाधः? इति संशयात्; एवं "द्वे ब्रह्मणी वेदितव्ये परं चापरं च" इत्याद्युक्तो भेदः सत्यः, उत प्रागुक्तोऽभेदः? इति संशयः; तथा "परं चापरं च ब्रह्म यदोङ्कारः" इत्याद्युक्तं शब्दब्रह्माद्वैतम्, प्रागुक्तं निर्गुणब्रह्माद्वयं वा? इत्यपि।

न च "परं च०" इत्यादावुपासनार्थं सामानाधिकरण्यम्, निर्गुणब्रह्मण उपासितुमशक्यत्वात्, एतदालम्बने "ब्रह्मोपासितव्यम्" इति प्रतीकोपदेशात्, यथा देवतायाः साक्षात् पूजाया असंभवात् तल्लाञ्छने दारुण्यश्मनि वा पूजाविधानं तद्वु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्धेति वाच्यम्; "तत्त्वमसि-" इत्यादावेवोपासनार्थं तद् भविष्यति, जीवे-श्वरयोरभेदश्रुतेरिति संशयाविगमात् । एवं "तेनेदं पूर्णं पुरुषेण सर्वम्" इति श्रुतेः सर्वस्य ब्रह्मात्मकत्वं वा, "सर्वगन्धः, सर्वरसः०" इत्यादिश्रुतेर्ब्रह्मणः सर्वात्मकत्वं वा ? इत्याद्यूह्यम् । किञ्च, अनाकलितनयानां परेषां न क्वापि निश्चायिका श्रुतिः, तत्र तत्र प्रदेशे विरुद्धार्थाभिधानात्, नानासंप्रदायाभिप्रायव्याकुलतयैकव्याख्यानाव्यवस्थितेश्च । ननु युक्तिसिद्ध एवार्थे सुसंप्रदायेन श्रुति-शक्तितात्पर्यमवधार्यते, अन्यत्र 'यजमानः प्रस्तरः' इतिवदुपचार एव, युक्तिश्च प्रपञ्चासत्य एवोपदर्शितदिशा, इत्यद्वैतश्रुतीनां प्रामाण्यम् । अत एवानधिष्ठानस्य शून्यस्याध्यासायोगेन ब्रह्मरूपेण रूपवत्त्वात्, सर्वस्य ब्रह्मात्मकत्वेऽपि ब्रह्मणो न सर्वात्मकत्वम्, सर्वस्वभावस्य सर्वस्माद् वियोजयितुमशक्यत्वेनानिर्मोक्षापातादिति । अत आह– प्रतीत्या च– अनुभवेन च, विचिन्त्यतां यदुत— 'नाद्वैतम्' इति; तथाहि– अनुभूयन्ते तावदविगानेन घटादयो भावा मृद्-घटादिरूपेण भेदा-ऽभेदात्मका अवग्रहाद्यात्मनोपयोगेन । तत्र च स्वयमेकमेव चैतन्यं प्रमाण-फलरूपम्, एकामेव च पदशक्तिं पदार्थांशे ज्ञातामन्वयांशे चाज्ञातां स्वीकुर्वाणः परः कथमेकमर्थं द्विरूपमनुभवन्नपि प्रत्याचक्षीत ? । यदि च त्रपां परित्यज्य 'अभेदस्यैवालोचनम्' इति परापेक्षतया भेदस्य मिथ्यात्वं ब्रूयात्, तदा प्रत्यक्षं चक्षुर्व्यापारसमनन्तरभाविवस्तुभेदमधिगच्छदेवोत्पद्यते यतो भेदो भावस्वभाव इति भावमधिगच्छता कथं नाधिगम्येत ? । न च भेदः 'इदमस्माद् व्यावृत्तम्' इति कल्पनाविषय एव, अभेदस्यैव 'इदमनेन समानम्' इति कल्पनाविषयत्वात्; भेदस्य विविक्तपदार्थस्वरूपस्य परासंमिश्रितत्वात्, स्वस्वरूपव्यवस्थितानां भावानां कल्पनाज्ञानमन्तरेण योजनाभावात्, अन्यथा व्यवहारानिर्वाहात्; तदुक्तम्— "अनलार्थ्यनलं पश्यन् न तिष्ठेद् नापि प्रतिष्ठेत" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतेन "आहुर्विधातृ प्रत्यक्षम्" इत्यादि निरस्तम्; विधातृत्वं हि भावस्वरूपग्राहित्वमिति प्रतिनियतार्थप्रतिभासादेव भेदग्रहणाविरोधात्। भिन्नत्वेन ग्रहणं त्वभिन्नत्वेनेव परापेक्षमौत्तरकालिकं न विरोत्स्यते। एतेन च 'इतरेतराभावरूपत्वाद् न भेदः प्रत्यक्षविषयः' इत्यप्यपास्तम्, भावस्वरूपग्रहणे तत्प्रतिभासनात्। वस्तुनो देश-कालादिभेदाद् भेदेऽनवस्थाद्यभिधानं त्वभेदेऽपि समानम्, एकस्य द्व्यात्मकत्वायोगादन्यतरमिथ्यात्वावश्यकत्वे भेदानामेव मिथ्यात्वमिति तु विपरीतम्, नानाभेदानां मिथ्यात्वकल्पनापेक्षयैकस्याभेदस्यैव तत्कल्पनौचित्यात्; अन्यथा सर्वत्र सन्मात्राभेदनिश्चये कालभेदाभावेन 'सोऽयम्' इत्यवमर्शाभावेऽपि तद्भेदे घट-पटयोः 'सोऽयम्' इत्यवमर्शप्रसङ्गात्। न च देशान्तरस्थघटादिभेदानुगतत्वात् सद्रूपतायाः पारमार्थिकत्वम्, भेदानां तु प्रच्यवाद् न तथात्वमिति, तत्प्रच्युतिं परिगतस्यानुगतत्वस्य तदभानेऽभानात्; प्रातिभासिकस्यानुगतत्वस्योभयत्र तुल्यत्वात्; प्रत्यभिज्ञानादपि नान्वयि सद्रूपत्वम्, तन्निरासात्, इत्यादि वदता पर्यायास्तिकनयानुसारिणा गले गृहीतः कांदिशीकः कां दिशमनुसरेत्?।

किञ्च, सद्रूपत्वं ज्ञाने घटादिना सहैवानुभूयते, तत्र प्रमाणत्वेन ज्ञानस्यैव सत्त्वाश्रयत्वे[1] विषयं विना ज्ञानस्वरूपाप्रतिभासनाद् विषयं एव सत्त्वं किं नोपेयते?। ज्ञानस्य सर्वत्रानुगतत्वेन[2] स्वसत्तास्फोरकत्वे विषयस्यापि सामान्यतस्तथात्वेन तत्त्वस्य[3] सुवचत्वात्, नीलाद्याकारेणाननुगतत्वस्य चोभयत्र तुल्यत्वात्। एवं विषयं विनाऽभासमानस्य ज्ञानस्योपाधिभेदं विना विभाव्यमानभेदत्वकल्पनेऽपि विषये तथाकल्पनं सुवचम्। प्रतीतिपरित्यागेन लाघवानुरोधे तु निराश्रयमेव सत्त्वं कल्प्यताम्,

१ सप्तम्यन्तम्। २ सर्वत्रानुगतत्वेन। ३ विषयसत्तास्फोरकत्वस्य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रपञ्चप्रतिभासस्य मुक्तावभावात् । तस्यात्मविशेषादर्शनजन्यत्वेन भ्रान्तत्वात् प्रपञ्चस्यासत्त्वमित्यपि न रमणीयम्, मुक्तौ विषयास्फुरणे ज्ञानस्यैवाभावप्रसङ्गात्, सविषयस्यैव ज्ञानस्य दृष्टत्वात्, निर्विषयस्य तस्य कल्पनायां दृष्टविपरीतकल्पनाप्रसङ्गात् । अत एव "सर्वविषयत्वं ब्रह्मणः काल्पनिकतादात्म्याश्रयणेन" इत्यपि निरस्तम्, सर्वविषयताया ज्ञानत्ववद् मुक्तज्ञानस्वभावत्वात् । सर्वापेक्षा सर्वविषयता न तत्स्वभावेति चेत् । सर्वापेक्षं सर्वभिन्नत्वमपि न तत्स्वभाव इति कुतोऽद्वैतसिद्धिः ? । क्लृप्तसर्वतादात्म्याभाव एव सर्वभिन्नत्वमिति चेत् । संसारेऽपि तदबाधितमिति नित्यमुक्ततापातः ।

किञ्च, काल्पनिकसर्वतादात्म्येन सर्वज्ञत्वे रथ्यापुरुषस्यापि सर्वज्ञत्वाभिमानिनस्तव योगितुल्यत्वं स्यात् । योग्यऽयोगिवृत्तिविशेषोऽपि स्वभावभेदं विना दुर्वचः । मिथ्यास्वभावविशेषाद् विशेष इति तु 'मिथ्या च स्वभावश्च' इत्यत्यन्तव्याहतम् । एतेन "रज्जौ सर्प इव सत्त्वासत्त्वाभ्यामनिर्वचनीयत्वाद् मिथ्या प्रपञ्चः" इति निरस्तम्, भ्रान्तिविषयत्वातिरिक्तस्य मिथ्यात्वस्याननुभवात् । "मिथ्यार्थानङ्गीकारे मिथ्याज्ञानस्याप्यङ्गीकर्तुमशक्यत्वे प्राभाकरो न निराक्रियेत" इति तु मन्दप्रलपितम्, मिथ्याज्ञानस्थलीयप्रवृत्त्यन्यथानुपपत्त्यैव तन्निराकरणादित्यन्यत्र विस्तरः । यदि च ज्ञानगतं मिथ्यात्वं साक्षादेवार्थेऽङ्गीक्रियते, तदा ज्ञानविषयसंकरः स्यात्, रजतज्ञानस्यार्थमिथ्यात्वं निमित्तमिथ्यात्वे च मिथ्यारजतमनुभूतमिति बाधेऽपि मिथ्यात्वं स्यादिति भ्रान्त-भ्रान्तिज्ञसंकर इति न किञ्चिदेतत् ।

स्वाभावसामानाधिकरण्यरूपं मिथ्यात्वं तु घटेऽपि तुल्यम्, स्वाधिकरणेऽपि परापेक्षया स्वाभावात् । सर्वथा स्वाभावसामानाधिकरण्यं तु विरुद्धमेव, गन्ध-रूपयोरपि स्वभावभेदमपेक्ष्यैव सामानाधिकरण्यात्, घ्राणग्राह्यतानियतगन्धस्वभावेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यस्य चक्षुर्ग्राह्यतानियतस्वभावरूपाधारतायोगात् । एतेन "अनुभवत्वस्यैव लाघवेन साधकतावच्छेदकत्वात् पुरोवर्तिनि सर्पसिद्धिः" इत्यपास्तम्; अनुभवस्यार्थसाधकत्वं हि नार्थोत्पादकत्वम्, किन्त्वर्थग्रहणपरिणामः, इति तत्र सर्पज्ञानसिद्धावपि सर्पोत्पत्त्यसिद्धेः । न च तत्रानुभूयमानस्यान्यत्र सत्त्वादिकल्पने गौरवम्, तत्रैव तदुपादानाज्ञानस्याऽन्तरवच्छेदेन तदनुभवाय तदाकारवृत्तेः, रज्जुसत्त्वस्य तत्र भावेऽन्यथाख्यात्यापत्तिभिया तत्संसर्गोत्पत्त्यादेश्च कल्पने गौरवात् ।

किञ्च, तत्र सत्त्वसंसर्गोत्पत्तिस्वीकारेऽपि सत्त्वांशेऽन्यथाख्यातिभिया सत्त्वान्तरोत्पत्तिरेव युक्ताऽभ्युपगन्तुम्; तथा च स्वयमसति तत्रोत्पद्यमाना सत्ता स्वसंबन्धोत्पत्तिमपेक्षते; सोऽपि स्वसंबन्धान्तरोत्पत्तिमित्यनवस्था । सत्स्वभावस्य च तस्य सत्यरजतवदुत्पत्तौ किमनिर्वचनीयत्वम् ? । स्वानुपादाने समुत्पन्नत्वात् तत्त्वं चेत् । अहो ! व्याहताभिधायी देवानांप्रियः, यद् भावकार्यं स्वानुपादानोत्पन्नमङ्गीकुरुषे । अत्र प्रसिद्धोपादानत्यागादयं विशेषश्चेत् । उपादानत्वाविशेषे कः प्रसिद्ध्यप्रसिद्धिकृतो विशेषः ? । किञ्च, एवं दण्ड-घटादौ दान-स्वर्गादौ च लोक-शास्त्रप्रसिद्धः कार्यकारणभावो भज्यते, भज्येत च कार्यात् कारणानुमानम्, कारणाच्च कार्यानुमानादिकम्, अनिर्वचनीये व्यभिचारात् । विलक्षणदण्डत्वघटत्व-दानत्वस्वर्गत्वादिना कार्यकारणभावे चातिगौरवम्— वेदादौ दान-स्वर्गादिपदानां सामान्यतो दानत्व-स्वर्गत्वाद्यवच्छिन्नोपस्थापकानां विलक्षणदानत्व-स्वर्गत्वाद्युपस्थितये लक्षणापत्तिः, नानार्थत्वे च दानादिपदानां प्रतिपदं तात्पर्यग्रहाय प्रकरणाद्यपेक्षापत्तिः । किञ्च, एवं बाधेऽपि व्यवहारापत्तिः, अनिर्वाच्यरजताभावज्ञानेऽपि रजतसामान्याभेदभ्रमानिवृत्ते रजतविशेषस्य 'इदं रजतम्' इति भ्रमविषयत्वे तद्रजतभ्रमेऽपि 'इदं रजतम्' इत्युल्लेखापत्तेः । किञ्च, एवमिदंवृत्त्या चैत्रापरोक्षे इदमंशे उत्पन्नं रजतं तया तत्र मैत्रा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परोक्षे मैत्रस्याप्यपरोक्षं स्यात्। मैत्र-चैतन्याभेदेनानुत्पन्नत्वाद् नायं दोष इति तु रिक्तं वचः, इदंवृत्त्या स्वाभिन्ने इदमंशचैतन्येऽध्यस्तत्वेन तस्य तदभिन्नत्वात्। अविद्यावृत्त्या तदभेदोऽपेक्षित इति चेत्। तादृशतदभेदस्याविद्यानिवृत्तिनियम्यत्व आत्माश्रयः। इदमंशावच्छेदेन चैत्रीयरजत इदमंशावच्छेदेन चैत्रीयाज्ञानहेतुत्वकल्पने चातिगौरवम्, सामान्यत एवेदंविशेष्यकरजतत्वप्रकारकभ्रमं इदंविशेष्यकशुक्तित्वप्रकारकज्ञानाभावस्य हेतुत्वौचित्यात्।

एवं भ्रमानुमितावपि पर्वते वह्नेस्तत्संसर्गस्य वोत्पत्तौ शुक्तौ रजतवत् तत्र तदपरोक्षत्वापातः। दृश्यमानप्रदेशावच्छेदेन वह्न्यनुत्पत्तेर्न दोष इति चेत्। न, शुक्तित्वानवच्छेदेनेदंत्वावच्छेदेन च शुक्तौ रजतोत्पादात् 'शुक्तिं रजतं साक्षात्करोमि' इत्यप्रत्ययेऽपि शुक्तित्वपरित्यागेन 'इदं रजतं साक्षात्करोमि' इति प्रत्ययवद्दृश्यमानदेशावच्छेदपरित्यागेन प्रकृते पर्वतत्वावच्छेदमादाय 'पर्वते वह्निं साक्षात्करोमि' इति प्रसङ्गात्। पर्वतत्वविषयिणी वृत्तिरिदंत्वविषयिण्यपि, इदंत्वं च दृश्यमानप्रदेशावच्छिन्नत्वम्, तथा चेदं पर्वतत्वं वह्न्युत्पत्तिं कथमवच्छिन्द्यात्? इति चेत्। नन्वेवं 'अयं पर्वतो वह्निमान्' इत्युल्लेखादेतद्देश एव वह्न्युत्पत्तिर्वाच्येत्यति संकटम्। एतेन "पर्वतत्वेन ज्ञानादधिष्ठानज्ञानासिद्धिः, पक्षतापि पर्वतत्वेन" इति निरस्तम्, 'अयं पर्वतो वह्निमान्' इति स्फुटमनुभवात्।

अपि च, 'इमे रजत-शुक्ती' इत्यत्र संनिकृष्टशुक्ति-रजतयोरन्योन्यतादात्म्योत्पत्तावविनिगमः, धर्म्यंश इव प्रकारांशेऽपि प्रमाणतापत्तिः; संनिकर्षसत्त्वेऽन्यथाख्यातिस्वीकारे चान्यत्राप्येकत्र क्लृप्तत्वेन तत्स्वीकारापत्तिः; तत्रारजतादिस्वीकारेऽपि

१ सप्तमी।

'इदमेव रजतं शुक्तित्वेनाज्ञासिषम्' इत्याद्यनुभवविरोधः; एवमन्यत्र 'असदेव रजतमत्रान्वभवम्' इत्याद्यनुभवविरोधः; तस्य भ्रान्तत्वे बाधकत्वापत्तिः, मिथ्यारजतस्य तत्रासत एवोपगमे चासत्ख्यात्यापत्तिः। तत्र 'असदेव' इत्यस्य तन्निष्ठात्यन्ताभावाप्रतियोगित्वमर्थः, अविरुद्धं च तत् सति तत्रासति च तत्रेति चेत्। कथं तर्हि तत्र सत्त्वा-ऽसत्त्वाभ्यां निरुक्तिविरहः?। बाधा-ऽबाधदशयोः सत्त्वा-ऽसत्त्वाभ्यां निरुक्तावप्येकदा तथा निरुक्तिविरहोपगमाद् न दोष इति चेत्। न, तुल्यन्यायेन घटादावप्येवमनिर्वचनीयतापत्तेः। अत एवैकपदेन तथाऽप्रतिपाद्यत्वाज्जगत एव तथात्वं व्यवस्थापितमवक्तव्यभङ्गके।

अथ नाशक्यनिरुक्तिकत्वमनिर्वचनीयपदार्थः, किन्तु निरुक्तिनिमित्तविरह इति चेत्। ननु किं तद् निमित्तं ज्ञानं वा, विषयो वा?। नाद्यस्य विरहः,

"रजतं भाति यद् भ्रान्तौ तत् सदेके, परे त्वसत्। अन्येऽनिर्वचनीयं तदाहुस्तेन विचार्यते ॥ १ ॥"

इति स्वयमेव तज्ज्ञानाभ्युपगमात्। सत्यस्थल इवात्रेदं-रजतयोरेकवृत्त्यनङ्गीकाराद् न दोष इति चेत्। अयमपरस्तत्र दोषः- 'इदं च, रजतं च' इति समूहालम्बनम्, व्यावृत्तविशिष्टज्ञानस्यैकवृत्तिं विनाऽनुपपत्तेः। नापि द्वितीयस्य विरहः, सद्रूपस्यासद्रूपस्य वा विषयस्यासत्त्वेऽसत्ख्यातेः सत्ख्यातेश्च प्रसङ्गात्; उभयरूपस्य निवृत्तेश्च लोकेऽप्रतीतेः, एकनिषेधेऽन्यविधिनियमात्, अलौकिकतन्निवृत्तेश्चाकिञ्चित्करत्वादिति दिग्।

एवं स्वप्नरथादयोऽपि नानिर्वचनीयाः, निद्रादोषेण स्वप्नेऽसंनिहितरथादीनामेव संनिहितत्वादिना भावात्; परेषां तु महत्यनुपपत्तिः; तथाहि— न तावद् मूलाज्ञानकार्यं स्वप्नः, संसारदशायां बाधात्, रजतभ्रमस्य शुक्त्यज्ञानान्वय-व्यति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रेकानुविधायित्ववज्जाग्रत्प्रपञ्चाज्ञानान्वय-व्यतिरेकानुविधायित्वाच्च । न च जाग्रत्प्रपञ्चाज्ञानमेव तदारम्भकम्, शुक्तौ रजतोत्पत्तिवज्जाग्रत्प्रपञ्चे स्वाप्निकरथाद्युत्पत्त्यापत्तेः । न चेष्टापत्तिः, तत्सामानाधिकरण्येन स्फुरणाभावात्, 'यद्धि यदज्ञानेनोत्पद्यते तत् तत्सामानाधिकरण्येन स्फुरति' इति नियमात्; अत एवान्तःकरणावच्छिन्नचैतन्याज्ञानं न तदारम्भकम्, साक्षिवेद्येऽन्तःकरणेऽज्ञानासंभवाच्च ।

यत्तु "चिन्मात्रनिष्ठमूलाज्ञानमेवेश्वरत्वावच्छेदेन गगनादि सर्वमारम्भमाणं जीवत्वावच्छेदेनाप्यहङ्कारस्वप्नादिचित्सामानाधिकरण्येन स्फुरदारभते, जाग्रत्प्रपञ्चाज्ञानान्वय-व्यतिरेकानुविधानं तु स्वप्नारम्भकनिद्रादोषेणान्यथासिद्धम्, संसारदशायां बाधस्तु सविलासाज्ञाननिवृत्तिरूपो नेष्ट एव, अभावबोधो बाधस्तु स्वप्नारम्भकाज्ञानानिवृत्तावपि तूलाज्ञानानङ्गीकारपक्षे रजतादाविव संभवी, स्वप्नारम्भकनिद्रादोषनिवृत्त्याऽऽरोप्याभावज्ञानोपपत्तेः" इति । तद् न, मूलाज्ञानजन्यत्वे स्वप्नरथादेर्घटादेरिव निवृत्तावपि मिथ्यात्वप्रतीत्यनुपपत्तेः, तज्जन्यमिथ्यात्वप्रतिपत्तावाद्यशक्तेः प्रतिबन्धकत्वात्, सामान्यतो मिथ्यात्वधीप्रतिबन्धिकायां तस्यां तत्तद्दोषनिवृत्तेरुत्तेजकत्वे विनश्यदवस्थदोषजनिते रजतादौ तदानीमेव मिथ्यात्वप्रतिपत्त्यापत्तेः, एकदोषनिवृत्तावन्यमिथ्यात्वबुद्ध्यापत्तौ तत्तन्मिथ्यात्वबुद्धौ तत्तद्दोषनिवृत्तिहेतुत्वावश्यकत्वाच्च । न च तथापि निद्रादोषनिवृत्तौ स्वप्नावगतार्थमिथ्यात्वधीः, शुभादृष्टोपनीतजागरसंवादिभाव्यर्थदर्शनेन तदसिद्धेः, हेतुविशेषं विना निद्राविशेषानुपपत्तेश्च । अपिच, एवं जाग्रद्दशायामिव स्वप्नदशायामपि मोदकभक्षणजन्यं सुखं समानं स्यात्, स्वाध्यस्तत्वाविशेषात्; तथा चायातोऽयं न्यायः—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

" आशामोदकतृप्ता ये ये चास्वादितमोदकाः । रस-वीर्य-विपाकादि तुल्यं तेषां प्रसज्यते ॥ १ ॥"

इति । जागर-स्वप्नसुखयोः स्वाध्यस्तत्वेन तुल्यत्वेऽपि सत्या-ऽसत्यमोदकभक्षणजन्यत्वेन विशेष इति चेत् । न, तुल्याज्ञानजन्यत्वेन द्वयोस्तुल्यत्वात्, तत्र बहिरन्तर्विभागस्यापि स्वप्ने मोदकादेर्बहिष्ट्वेनानुभवेन तुल्यत्वात् । तत्र बहिष्ट्वमध्यस्तमिति चेत् । अन्यत्रापि तदध्यस्तत्वं सुवचम् । एकस्यैव सत्यमोदकस्य बहिर्बहुभिरनुभवात् तत्र बहिष्ट्वं नारोपितमिति चेत् । स्वप्नेऽपि सुवचमेतत् । स्वप्ने प्रतिसंतानमनुभूतानां नानात्वे च जागरेऽपि प्रतिसंतानमनुभूतानामेकत्वे का प्रत्याशा ?। दृग्दृश्यसंबन्धायोगादनन्तानिर्वचनीयानां काल्पनिकतादात्म्याश्रयणापेक्षया तत्तद्गाकारदृगुत्पत्तेरेव लघुत्वेन वक्तुं युक्तत्वात् । 'इष्टमेवेदं दृष्टिसृष्टिवादे; तथाहि– नास्मिन् मते चैतन्यातिरिक्तपदार्थानामज्ञातसत्त्वमस्ति, मिथ्यात्वस्य स्वप्नादिदृष्टान्तसिद्धत्वात्, तादृशस्यैव सत्त्वस्याङ्गीकारात् । एवं च 'घटादीनां यदा प्रतीतिस्तदा सत्त्वं नान्यदा, इति न दण्डादिजन्यत्वम्, किन्त्वज्ञानमात्रजन्यत्वं, स्वप्नवच्च दण्डाद्युपादानम्; अज्ञानदेहादिकं तु भासमानमेव तिष्ठति; अभावनिश्चयाभावाच्च पुत्राद्यभावकृतरोदनाद्यप्रसङ्गः; प्रत्यभिज्ञानमपि भ्रम एव; ततश्चाकाशादिक्रमेण सृष्टिः पञ्चीकरणं ब्रह्माण्डाद्युत्पत्तिः' इत्यादिकं मतान्तरे देवताविग्रहन्यायसिद्धमपि नास्मिन् मते दृष्टिव्यतिरेकेण सिध्यति । अत एवार्थानां नानेकप्रमाणवेद्यत्वम्, किन्तु 'चक्षुषा पश्यामि' इत्यादिव्यवहारस्य स्वप्नतुल्यत्वात् सुखादिवत् केवलसाक्षिवेद्यत्वम् । कथं तर्हि घटादेरपरोक्षत्वम्, वह्न्यादेश्च परोक्षत्वम्, अज्ञानजन्यत्वस्य साक्षिण्यध्यस्तत्वस्य च तुल्यत्वात् ? इति चेत् । वह्न्यादौ परोक्षत्वस्याप्यध्यस्तत्वाद् विशेषसिद्धेः । न च बौद्धमतप्रवेशः अधिष्ठानस्य स्थायित्वात्, अबाधितत्वाच्च, अज्ञानस्याप्यनादेः सकलदृष्टिहेतोरङ्गीकारात्' इति चेत् । न, अधिष्ठा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नस्य स्थायित्वासिद्धेः; नीलाद्याकारेणास्थायित्वदर्शनात् । नीलाद्याकाराः स्वाध्यस्ता अतिरिक्ता एव, साक्षी तु चिद्रूपः स्थायीति चेत् । न, नीलादिविनिर्मुक्तस्य चिद्रूपस्याभासमानत्वेनासत्त्वात् । नीलपीतादिभानानुगतं चिद्रूपमेव स्थायीति चेत् । तर्हि नीलादिरूपमपि प्रतिप्रमात्रनुगतं स्थायीभवेत् । संतानभेदाद् नीलादिभेदश्चेत् । नीलाद्याकारभेदाच्चिद्रूपस्यापि किं न भेदः ? । अज्ञानमपि नानादिसकलदृष्टिहेतुः, नित्यस्य क्रमिकनानादृष्टिहेतुत्वानुपपत्तेः, कारणान्तरविलम्बाभावादेकस्मादेकदैव सर्वोत्पत्तिप्रसङ्गात् । तज्जनितक्रमिकाज्ञानेभ्यः कार्यभेदनिर्वाह इति चेत् । न, एकस्य तस्य जन्यनानाऽज्ञानजननेऽप्यस्य प्रसङ्गस्य तुल्यत्वात् । कालभेदात् ततो भिन्नभिन्नकार्योत्पत्तिसंभव इति चेत् । कालभेदादेव तर्हि कार्यभेदनिर्वाहे दत्तोऽज्ञानाय जलाञ्जलिः । न चैकस्य स्वभावभेदं विना कालभेदस्यापि सहकारः, स्वभावभेदे च गतमनादित्वेनेति ।

किञ्च, एवं लोकसिद्धदण्ड-घटादिकार्यकारणभाववत् शब्दसिद्धयागस्वर्गाद्य-ऽगम्यागमननरकादिसाध्यसाधनभावस्यापि स्वाप्निकतुल्यत्वात्, वेदान्तेष्वप्यनाश्वासप्रसङ्गाच्च वेदान्तिनां यथेष्टाचरणप्रसङ्गात् । यदि हि विहितात् स्वर्गः, निषिद्धाद् नरको वा न स्यात्, किमर्थं तर्हि विहितमनुतिष्ठन्तः, निषिद्धं चावर्जयन्तः क्लिश्येरन् ? इति । अपि च, अनात्मदृष्टिसृष्टेरनवसानप्रसङ्गः । न चाधिष्ठानज्ञानात् तदवसानम्, तद्धेत्वभावात् । अज्ञानं तद्धेतुरिति चेत् । ज्ञानतोऽसत्यपि दण्डादौ घटाद्युत्पत्तिवत् शमाद्यसत्त्वेऽपि तत एवाधिष्ठानज्ञानोत्पत्तेः शमाद्यननुष्ठानप्रसङ्गात् । भ्रान्त्या तदनुष्ठानमिति चेत् । न, सकृद्वेदान्तार्थश्रवणवतां तदभावप्रसङ्गात् । न च प्राथमिकघटप्रतिभासे दण्डाद्यपेक्षावत् प्राथमिकाधिष्ठानज्ञाने शमाद्यपेक्षोपपत्तिः, क्वचित् तावत्प्रतिभासहेतूपनिपातेऽपि नियमासिद्धेः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च, भ्रमहेतोरज्ञानाद् नाधिष्ठानज्ञानोत्पत्तिरन्यत्र दृष्टा । न हि शुक्त्यज्ञानाद् रजतभ्रमः, तत एव च शुक्तिज्ञानमिति । अविद्यया मृत्युं तीर्त्वा शास्त्रात् तथा कल्प्यत इति चेत् । न, शास्त्रस्य स्वप्नतुल्यत्वात्, शमाद्यनुपसंग्रहानुद्धाराच्च । अथ लोकेऽज्ञानातिरिक्तकारणाभावेऽपि वेदे यागादौ स्वर्गादिसाधनता संमतैव । ततश्च यागादेः स्वर्गादिसाधनत्वं प्रतीत्य यागमनुतिष्ठतामुत्पन्नस्य स्वर्गसूक्ष्मरूपस्य यागसूक्ष्मरूपस्य वाऽपूर्वस्य स्वर्गजनकत्वम्, अन्यथाऽव्यवस्थाप्रसङ्गात्; ततश्च वेदान्तेष्वप्याश्वासात् शमादिसंपत्त्या ब्रह्मज्ञानसिद्धिरिति चेत् । न, लोकसिद्धकार्यकारणभावपरित्यागे वेदेऽप्यनाश्वासात् । न हि स्वप्रयोजनमपेक्ष्यैकं प्रमाणम्, अपरं चाप्रमाणं भवितुमर्हति । न च बलवत्त्वाद् वेदः प्रमाणम्, न तु प्रत्यक्षादिकमिति वाच्यम्, प्रत्यक्षादिबाधितेऽर्थे वेदाप्रामाण्येन प्रत्यक्षादीनामेव बलवत्त्वात् ।

किञ्च, याग-स्वर्गादिहेतुहेतुमद्भावं प्रतिपादयन् वेदः स्वप्नयाग-स्वर्गयोरपि हेतु-हेतुमद्भावं किं न बोधयेत् ? । तत्र वेदाप्रामाण्यादिति चेत् । कुत्र तर्हि तत्प्रामाण्यम् ? । तद्विलक्षणयाग-स्वर्गयोरिति चेत् । न, आभासमानसत्त्वानङ्गीकारे तद्वैलक्षण्यासिद्धेः, सिद्धौ वा दण्ड-घटादेरपि कार्यकारणभावः सिध्येत् । किञ्च, अपूर्वमपि साक्ष्यसिद्धत्वात् कथमभ्युपेयम् ? । अज्ञानकारणत्वात् साक्षिसिद्धमेव तत्; उक्तं हि संस्कारस्य साक्षिसिद्धत्वमभियुक्तैः—

"सुप्तेऽस्मिन् विषयग्रामे योऽसुप्तो लुप्तदृष्टितः ।
वासनारूपकान् पश्यन् प्राणान् प्राणिति वायुना ॥
भावनाकारकेक्षित्वादात्मैकः कारकायते ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादाविति चेत् । न, सूक्ष्मरूपेण साक्षिसिद्धत्वे तस्य श्रद्धामात्रात् ; अन्यथा घटादिज्ञानोत्तरमपि सूक्ष्मरूपेण तज्ज्ञानोपगमप्रसङ्गात् । किञ्च, अस्मिन् पक्षे परचित्ताग्रहणे परं प्रति पर्यनुयोगाप्रसङ्गः, तद्ग्रहणं च स्वाध्यस्ततयेनेति स्व-परचित्तसंकरप्रसङ्गः । स्वचित्ते परकीयत्वमध्यस्य कथाया त्वव्यवस्था । तस्माद् दृष्टिसृष्टिवादोऽपि वेदान्तिनां शून्यतावादाद् न विशिष्यते । तथाच सुष्ठूपहसितमेतत्—

"प्रत्यक्षादिप्रसिद्धार्थविरुद्धार्थाभिधायिनः । वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते ? ॥ १ ॥" इति ।

अपि च, अविद्यायामेव मानाभावाद् विशीर्यते सर्वं तन्मूलं वेदान्तिमतम् । न च 'न जानामि' इत्यनुगतः प्रत्ययस्तत्र मानम्, 'अहम्-अहम्' इत्यनुगतप्रत्याऽहंत्वस्याप्यनुगतस्य सिद्ध्यापत्तेः । न च 'जानामि' इत्यत्रानुगतविषयानुपपत्तिरप्यस्मान् प्रति सिद्धा, सर्वात्मना स्वरूपज्ञानाभावस्य सर्वत्रानुगतत्वात्, सर्वात्मना स्वरूपज्ञानस्यानुवृत्ति-व्यावृत्तिपर्यायद्वारा सर्वज्ञाननियतत्वाद् विना सर्वज्ञं कुत्राप्यर्थे तदनुपपत्तेः । तदयमाचाराङ्गे परस्परसमनियमाभिप्रायः परमर्षिवचनोद्गारः—

५१ "[1]जे एगं जाणइ से सव्वं जाणइ, जे सव्वं जाणइ से एगं जाणइ" इति । घटज्ञानादिनिवर्त्यमपि मिथ्याज्ञानरूपं सम्यग्ज्ञानप्रागभावरूपं वाऽज्ञानं त्वतिरिक्तम् । परेषां तु घटादिज्ञानात् तदज्ञाननिवृत्तिप्रसङ्गः, अनुगताज्ञानस्य मुक्तावेव निवृत्तेः । न च घटज्ञानाद् (द?)घटविषयतामात्रस्य निवृत्तिर्नाज्ञानस्य, यथा परेषां घटनाशे घटसंबन्धनाशः सत्ताया इति वाच्यम्, दृष्टान्तस्यै-

१ य एकं जानाति स सर्वं जानाति, यः सर्वं जानाति स एकं जानाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वासंप्रतिपत्तेः; न हि घटनाशे स्वरूपात्मकघटसंबन्धनाशो न तु सत्तानाश इति जैनाः प्रतिपद्यन्ते; न वोत्पाद-व्यय-ध्रौव्यपरिगतरूपबहिस्कृतां सत्तामेव प्रमाणयन्तीति । न च घटविषयतानिवृत्तिरपि सुवचा, स्वभावभूताया घटसंसक्तावरणजनकतारूपायास्तस्या निःस्वभाववतोऽनिवृत्तौ निवर्तयितुमशक्यत्वादिति । विषयास्फुरणप्रयोजकतयापि न तत्सिद्धिः, विषयस्फुरणस्वभाव एवात्मन्यभ्युपगम्यमाने परनिमित्ततदस्फुरणस्वभावनिर्वाहाय तत्प्रतिबन्धकज्ञानावरणकर्मकल्पनौचित्यात्। तदस्फुरणस्वभावे तु किं स्फुरणप्रतिबन्धकेन ? । न हि प्रतिबन्धकनिवृत्त्यापि तदस्फुरणस्वभावस्य तत्स्फोरकत्वं नाम, मणिनिवृत्तावपि दाहकस्य दहनस्येवादाहकस्याम्भसो दाहकत्वादर्शनादिति ।

एतेन 'विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम्, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत् । अत्रातीतत्वज्ञानं घटादिज्ञानं चोक्तसाध्यवदिति वेदान्तिनः, नेत्यपरे, इति विवादविषयतापन्नज्ञानानां पक्षत्वात् सुखादिज्ञाने विवादाभावेनापक्षत्वाद् न बाधः । नापि धारावाहिकज्ञाने बाधः, एकस्या एव वृत्तेरेतावद्दूरमवस्थानासंभवेन तदभावात् ; भावे वोक्तविवादगोचरत्वाभावेन पक्षताया अभावात् । न च घटादिज्ञाने स्वविषयस्य घटादेर्जडत्वेन तदावरणाभावाद् बाधः, घटावच्छिन्नचैतन्यस्यैव वृत्तिरूपघटादिज्ञानविषयत्वात्, अज्ञानेन तत्रावरणजननात्, अज्ञानविषयत्ववज्ज्ञानेनापि तत्रैव तन्निवृत्तिजननात्ज्ञानविषयत्वोपपत्तेः, ज्ञाना-ऽज्ञानयोः समानविषयत्वप्रसिद्धेः, अदूरविप्रकर्षेण घटादेरुभयविषयत्वव्यपदेशात् । नाप्यनुमितिज्ञाने बाधः, तस्याप्यज्ञाननिवर्तकत्वात् । न च ॥३०१॥

१ ख. ग. घ. 'नादिति ज्ञा' ।

परोक्षज्ञानादज्ञाननिवृत्तावपरोक्षभ्रमनिवृत्तिप्रसङ्गः, इष्टापत्तेः, 'रज्जुरियं न सर्पः' इत्याप्तोपदेशे तद्दर्शनात् । न च 'पीतः शङ्खः' इत्यादौ श्वैत्यानुमित्या तदज्ञाने नष्टे भ्रमनिवृत्तिप्रसङ्गः, अस्य भ्रमस्य सोपाधिकत्व उपाधेरेवाज्ञाननिवृत्तौ प्रतिबन्धकत्वात् । यदि च रविरश्मिभिः सह पित्तधातोः शङ्खदेशं यावद् गमने शङ्खसंपृक्तस्य च तस्य चाक्षुषयोग्यत्वे दोषवशेन च द्रव्याग्रहणेऽपि रूपमात्रग्रहणे मानाभावाद् गौरवाच्च, भ्रमस्य च पीतत्वसंस्कारादेव पित्तदोषसहितादुपपत्तेर्नायं पित्तोपाधिकः, तदा पित्तदोषस्यैव तथात्वादिति । रजतज्ञानेऽपि न बाधः, तस्य सुखादिज्ञानवत् पक्षत्वाभावात् । साध्ये ज्ञानप्रागभावव्यावृत्त्यर्थमाद्यं विशेषणम् । न च स्वनिवर्त्यपदेन तद्व्यावृत्तिः, तन्निवृत्तेः स्वानतिरेकादिति वाच्यम्; 'सादिरनन्तो ध्वंसः' इति मते तदतिरेकात् । उत्तरज्ञाननिवर्त्यपूर्वज्ञानेन भिन्नविषयेण सिद्धसाधनवारणाय स्वविषयावरणेति । यस्मिन् सति ज्ञानविषयो न स्फुरति तत् स्वविषयावरणम्, न च पूर्वज्ञानं तथा, तस्योत्तरज्ञानविषयस्फुरणाभावाप्रयोजकत्वात् । असंभावनाविपरीतभावनात्मकादृष्टव्यावृत्तये तृतीयं विशेषणम् । प्रमातृनिष्ठाज्ञानसिद्ध्यर्थं स्वदेशगतेति । मिथ्याज्ञानं व्यावर्तयितुं वस्त्वन्तरेति । हेतावपि द्वितीयादिधारावाहिकज्ञाने व्यभिचारवारणायाऽप्रकाशितेति । अप्रकाशितप्रकाशशब्देन स्वविषयावरणनिवृत्तिरूपो व्यवहारो विवक्षितः । न च धारावाहिकद्वितीयादिज्ञाने तद्धेतुत्वमस्ति, स्वविषयावरणनिवृत्तेराद्यज्ञानकार्यत्वात् । न च हेत्वसिद्धिः, साध्योपात्तस्वविषयावरणनिवृत्तेरप्रकाशितार्थव्यवहारशब्देन विवक्षितत्वात् । न च चक्षुरादौ व्यभिचारः, तस्य ज्ञानजननेनान्यथासिद्धत्वात् । न च साधनवैकल्यं दृष्टान्तस्य, स्वविषयावरणान्धकारनिवृत्तिहेतुत्वात् । न च सुखादिज्ञाने व्यभिचारः,

१ ख. ग. 'तद्दर्श' । २ ख. ग. घ. 'क्षुषायो' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य स्वविषयावरणनिवृत्तिहेतुत्वाभावात्। न च स्मृतौ व्यभिचारः, तस्याः स्मृतिप्रागभावरूपस्वविषयावरणनिवर्तकत्वादिति वाच्यम्; तस्य स्वविषयावरणत्वाभावात्, तत्सत्त्वेऽप्यनुभवदशायां तद्विषयस्फुरणात्। न चैवं प्रमाणज्ञानप्रागभावस्यापि स्वविषयावरणत्वाभावात् तद्व्यावृत्त्यर्थस्याद्यविशेषणस्य वैयर्थ्यम्, अत्यन्तापूर्वार्थज्ञानप्रागभावस्य तथात्वात्। आद्यज्ञानस्य पक्षत्वाद् न तत्र व्यभिचारः। हेतुत्वं च पुष्कलहेतुत्वम्, तेन नेश्वरादौ प्रतियोगिनि चावरणे व्यभिचारः। न चासंभावनादिनिवर्तके श्रवणादौ व्यभिचारः, असंभावनादेः स्वविषयावरणत्वे साध्यसद्भावात्। न च तेनैव सिद्धसाधनम्, तस्य ज्ञानानिवर्त्यत्वात्। दृष्टान्तेऽपि सवितृकिरणस्थासु द्वितीयाद्यासु च दीपप्रभासु साध्यसाधनवैकल्यपरिहाराय विशेषणद्वयोपादानम्' इति स्वगृहविचारपरिष्कृतमनुमानमपास्तम्, निरुक्तस्वविषयावरणत्वस्वनिवर्त्यत्वाभावेनास्माद् मूलाज्ञानस्यासिद्धेः, विशिष्टतथात्वस्य चातिप्रसक्तत्वात्, तूलाज्ञानसाधनेऽपि श्वैत्यानुमित्यादेः पक्षीकरणे बाधात्, तद्बहिर्भावे च व्यभिचारात्। तत्पक्षीकरणेऽप्यसति स्वनिवृत्तिप्रतिबन्धके 'तद्विषयस्फुरणाभावप्रयोजकत्वं तद्विषयावरणत्वम्' इत्युक्तौ न दोष इत्यस्यापि येषां पक्षीकृतज्ञानानामावारके स्वनिवृत्तिप्रतिबन्धकासिद्धिः, तत्र साध्यासिद्ध्या वक्तुमशक्यत्वात्; हेतोरपि स्वविषयावरणनिवर्तकत्वरूपस्योपादानेऽसिद्धेः, अप्रकाशितप्रकाशशब्देन तदुपादानेऽपि तदपरिहारात्, न खलु शब्दान्तरोपादानेनाप्याच्छादनं भवति। स्वविषयावरणनिवर्तकत्वव्यपदेशविषयत्वस्य हेतुत्वे तु सुखादिज्ञाने द्वितीयादिधारावाहिकेषु च मिथ्याज्ञाननिवर्तकत्वव्यपदेशविषयेषु व्यभिचारो दुर्निवारः। दृष्टान्तेऽपि साध्यगतज्ञानविषयतायाः प्रभाविषयतासाधारणत्वाभावेन साध्यवैकल्यम्। उपाधिश्चात्र चेतनत्वादि। न चात्रानुकूलतर्कोऽपि कश्चिदस्ति, अप्रकाशितार्थप्रकाशकेऽपि प्रकाशितार्थप्रकाशक

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इवोक्तवस्त्वन्तरपूर्वकत्वं विनापि विषयस्फोरकत्वोपपत्तेराद्यत्वस्य चानियम्यत्वादिति न किञ्चिदेतत् ।

एवं च जीवे-श्वरादिविभागोऽप्यनुपपन्न एव । न च प्रतिबिम्बवादे, आभासवादे वा दृष्टान्तोऽपि दृष्टः, मुखे द्वित्वस्य, आदर्शस्थत्वस्य चानिर्वचनीयस्योत्पत्तौ 'आदर्शे द्वे मुखे' इति प्रतीतिप्रसङ्गात्; आदर्शे मुखान्तरोत्पत्तौ च 'तदेवेदं मुखं यदादर्शस्थत्वेन दृष्टम्' इति प्रत्यभिज्ञाबाधात् । अथ प्रतिबिम्बवाद आदर्शस्थत्वस्य मुखे द्वित्वावच्छेदेनानुत्पत्तेः 'आदर्शे द्वे मुखे' इति न प्रतीतिः; आभासवादे च 'तदेवेदम्' इति भ्रम एवेति चेत् । न, 'आदर्शे मुखप्रतिबिम्बम्' इति प्रतीतिप्रामाण्यात् तत्र बिम्बाख्यद्रव्यस्यैवोत्पत्तेः स्वीकर्तुं युक्तत्वात्, द्वित्वाख्यस्य प्रतिबिम्बस्यादर्शे भावात्, अनिर्वचनीयमुखोत्पत्तौ च प्रतिबिम्बप्रतीतेः प्रामाण्यानुपपत्तेः । कथं तर्हि तत्र भ्रमव्यवहारः ? इति चेत् । बिम्ब-प्रतिबिम्बयोरभेदप्रतीतेः । अत एव न 'तदेवेदम्' इति प्रत्यभिज्ञापि दुरुपपदा, प्रतिबिम्बाभेदभ्रमविषयस्य तदर्थस्येदमर्थेऽभेदाबाधादिति । अधिकं सांख्यवार्तायां विवेचितम् । ततः प्रतिबिम्बस्य रूपवत एव भावाद् नेश्वर-जीवयोर्बिम्ब-प्रतिबिम्बादिभावः । न चाकाशस्यामूर्तस्यापि प्रतिबिम्बं दृश्यत इति युक्तम्, आकाशस्यायोग्यत्वे तत्प्रतिबिम्बस्य सुतरामयोग्यत्वात्; जले प्रभामण्डलाद्यवच्छिन्नयोग्यदेशस्यैव प्रतिबिम्बोपपत्तेः । 'अमूर्तेऽपि ज्ञाने विषयप्रतिबिम्बाभ्युपगन्त्रा कथममूर्ते बिम्बप्रतिबिम्बभावः शक्यः प्रतिक्षेप्तुम् ?' इत्यप्यज्ञानविजृम्भितम्, विषयग्रहणपरिणामस्यैव प्रतिबिम्बत्वेनाभ्युपगमात्, इत्थमेव विषयाकाराप्रतिसंक्रमादिना ज्ञानस्य प्रतिबिम्बाकारताप्रतिक्षेपस्य ज्ञानवादिकृतस्य प्रत्युक्तेरित्यन्यत्र विस्तरः । नन्वस्माभिरपि जीवे-श्वरभावेन द्वित्वमेव प्रतिबिम्बत्वेनोपेयत इति न दोष इति चेत् । न, अतत्स्वभावस्य तत्त्वायोगात्; तत्स्वभावत्वे चैका-ऽनेकवस्त्वङ्गीकारे परमताश्रयणात्; तदुक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रन्थकृतैवान्यत्र– "तद्विभागानामेव नीत्यात्मत्वात्" इति ।

एतेन 'अज्ञानतद्विषयतोपाध्यवच्छिन्नत्वेन चैतन्यस्य जीवे-श्वरत्वविभागः' इत्यपि मतं निरस्तम्, स्वभावतोऽनवच्छिन्नस्योपाधिसहस्रेणाप्यवच्छेत्तुमशक्यत्वात्; आकाशेऽपि घटाद्यवच्छिन्नत्वस्य चित्रस्वभावत्व एव सुवचत्वात्, अन्यथा तत्संबन्धानिरुक्तेः; अवच्छिन्ना-ऽनवच्छिन्नस्वभावब्रह्मोपगमे च परमताङ्गीकारात्, स्वनीत्याऽनिर्मोक्षापाताच्चेति । न चावच्छिन्नत्वं विभागरूपमवास्तवम्, अनवच्छिन्नत्वं त्वविभागरूपं वास्तवमिति युक्तम्, विपर्ययस्यापि सुवचत्वात्; अन्यथा "यथा यथाऽर्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा" इति व्यामोहेन शून्यताया एवापत्तेरध्यस्ताविद्यमानरूपप्रकाशोपगमेऽधिष्ठानस्याप्यनावश्यकत्वात्, व्यवहारदृष्टौ चैकानेकरूपस्यैव घटमानत्वात् ।

किञ्च, प्रतीयमानं सर्वेषां स्याद्वादमुद्रानतिभेदि सत्त्वमविशिष्टमपोह्य सत्त्वान्तर-तत्प्रतीत्यनुकूलशक्त्यादिकल्पने व्यसनमात्रमेव परेषाम्, न तु मानमस्ति, "तस्याभिध्यानात्" इत्यादिश्रुतेः– 'तस्यात्मनोऽभिमुखं ध्यानं क्षीणमोहगुणस्थानसंभवी केवलज्ञानाभिमुखः शुक्लध्यानपरिणामः, ततो घातिकर्मक्षयात्, युज्यतेऽनेनेति योजनं केवलिसमुद्घातः, ततो वेदनीयायुःकर्मप्रदेशसमीकरणात् तत्त्वभावः सर्वसंवरः, ततोऽन्तेऽन्तक्रियायां विश्वमायानिवृत्तिः सकलकर्मनिवृत्तिः, प्रतिक्षणं बहुतरनिर्जरासूचनाय 'भूयश्च' इत्युक्तम्, कारणोपचय एव कार्योपचयसिद्धेः' इत्यस्यैवार्थस्य सम्यग्दृष्टिपरिग्रहप्राप्तस्य न्याय्यत्वात्; तदुक्तम्– "सम्मदिट्ठिपरिग्गहियं मिच्छसुअं पि सम्मसुअं" इति ।

१ सम्यग्दृष्टिपरिगृहीतं मिथ्याश्रुतमपि सम्यक्श्रुतम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च 'प्रपञ्चो मिथ्या, दृश्यत्वात्, स्वप्नरथवत्' इत्यनुमानमपि निरस्तम्, मिथ्यात्वस्यात्यन्तासत्त्वरूपस्य साध्यत्वेऽसत्ख्यातिप्रसङ्गात्, अन्यथाप्रतीयमानत्वरूपस्य साध्यत्वेऽन्यथाख्यातेः प्रसङ्गात्, अनिर्वचनीयत्वरूपस्य साध्यत्वे च साध्याप्रसिद्धेः; स्वप्नरथादौ तथात्वासिद्ध्या दृष्टान्तस्य साध्यवैकल्यात्। स्वाभावसामानाधिकरण्यरूपस्य साध्यत्वेऽप्ययमेव दोषः, स्वस्यैव पररूपेण स्वाभावसामानाधिकरण्यात् सिद्धसाधनं वा, परमार्थसत्त्वाभावस्य साध्यत्वेऽपि परमार्थत्वस्यानिरुक्तेः, परमार्थसत्त्वग्राहकप्रत्यक्षेण बाधाच्च। न चानुमानमिथ्यात्वं साधयन्तं लोकायतं प्रति यथा नानुमानबाधोपन्यासः फलवान्, तथोक्तप्रत्यक्षस्यापि प्रपञ्चान्तर्गतत्वेन मिथ्यात्वं साधयन्तमद्वैतवादिनं प्रति न प्रत्यक्षबाधोपन्यासः फलवानिति वाच्यम्; तथा सत्येतदनुमानस्यापि मिथ्यात्वेनासाधकतयोपन्यासानुपपत्तेः। न चैतदनुमानमेव प्रत्यक्षबाधम्, प्रत्यक्षबाधपरिहारे तदनुमानप्रामाण्यम्, एतदनुमानप्रामाण्ये च प्रत्यक्षबाधपरिहार इतीतरेतराश्रयात्, अनन्यथासिद्धत्वेन प्रत्यक्षस्यैव बाधकत्वाच्च। न हि सत्त्वं विना 'सत्' इति प्रत्यक्षमुपपद्यते, शशशृङ्गेऽपि तत्प्रसङ्गात्; उपपद्यते च मिथ्यात्वं विनापि दृश्यत्वमिति।

हेतुरपि दृश्यत्वं दृग्विषयत्वरूपमनिरुक्तिपराहतम्; तथाहि— तद् यदि दृग्-दृश्यस्वरूपसंबन्धविशेषः, तदोभयसंबन्धिरूपस्य तस्य मिथ्यात्व उभयोरपि मिथ्यात्वम्, सत्यत्वे चोभयोरपि सत्यत्वं स्यात्। यदि च दृगभेदः, तदा पक्षे तदसिद्धिः, दृशि च व्यभिचारः। यदि च 'दृष्टो घटः' इत्यादिधीसाक्षिको विषयतापरपर्याय आध्यासिको दृगभेदस्तदा प्रतिवाद्यसिद्धिः, वादिनो दृग्-दृश्याभेदे भागासिद्धिश्च, आध्यासिकदृगभेदे दृगभेदान्तरस्यानवस्थापत्तिभिया वादिनाप्यनङ्गीकारात्; विरुद्धत्वं च, दृश्यत्वस्य मिथ्यात्वाभावव्याप्तत्वादिति न किञ्चिदेतत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेवं व्यवस्थितमेतत्- प्रतीत्यनुरोधेन नाद्वैतमेव तत्त्वम्, किन्तु प्रपञ्चोऽपि ब्रह्मवत् परमार्थसन्नेवेति ॥ ७ ॥

एतद्वादविषयविभागवार्तामाह—

अन्ये व्याख्यानयन्त्येवं समभावप्रसिद्धये। अद्वैतदेशना शास्त्रे निर्दिष्टा न तु तत्त्वतः ॥८॥

अन्ये- जैनाः, व्याख्यानयन्ति- व्याचक्षते, एवं- यदुत, समभावप्रसिद्धये- प्रपञ्चस्याविद्याविलसितत्वमात्रप्रदर्शनेन स्वात्मन्येव प्रतिबन्धस्थैर्यात् शत्रु-पुत्रादौ द्वेष-रागादिभावविच्छेदात् परमचित्तप्रसादरूपसाम्यसिद्ध्यर्थम्, शास्त्रे- श्रावकप्रज्ञप्तिवेदे, अद्वैतदेशना- "आत्मैवेदं सर्वं-ब्रह्मैवेदं सर्वम्" इत्यादिका, निर्दिष्टा, न तु, तत्त्वतः- अद्वैतमेव तत्त्वमित्यभिप्रायेण । अत एव "पुरुष एवेदं सर्वं ग्निम्" इत्यादिश्रुतीनामापातार्थदर्शनजनितो गणधरसंशयस्तासामुक्तार्थमात्मार्थवादत्वेन तदीयसदाशयस्फातये प्रपञ्चसत्यतावेदकश्रुत्यन्तरप्रकटीकरणेन स्वयमेव भगवता निरस्तः । व्यक्तं चैतद् विशेषावश्यकादौ[1] ।

यत्तु- "पुरुष एवेदम्" इत्यादावीश्वरस्य सर्वावेशनिबन्धनः सर्वतादात्म्यव्यवहारः' इति नैयायिकादीनां समर्थनम्, तत्तु तदभिमतेश्वरनिरासाद् न शोभते; शोभते तु सर्वतादात्म्यप्रतिपादकश्रुतीनां सर्वविषयतारूपावेशपरत्वम्, निश्चयतः सर्वस्य सर्वज्ञत्वात्; परमत्रापि स्वस्यैव सर्वात्मकत्वादन्यस्यानुपयोगित्वादनात्मप्रतिबन्धनिवृत्त्या साम्यसिद्धिरेव प्रयोजनमिति युक्तं पश्यामः ॥ ८ ॥

१ द्वितीयगणधरवादप्रकरणे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तव्याख्यानस्य युक्तत्वमेव व्यवस्थापयन्नाह—

न चैतद्बाध्यते युक्त्या सच्छास्त्रादिव्यवस्थितेः। संसार-मोक्षभावाच्च तदर्थं यत्नसिद्धितः ॥

न च, एतत्– उक्तव्याख्यानम् , युक्त्या– न्यायेन, बाध्यते। कुतः? इत्याह– सतां घटादिसत्त्वग्राहिणां शास्त्रादीनाम् , आदिनाऽनुमानादिग्रहः, व्यवस्थितेः– प्रामाण्योपपत्तेः। च– पुनः, संसार-मोक्षभावात्– संसार-मोक्षविभागस्य तात्त्विकत्वात् , तदर्थं– स्वर्गरूपसंसार-मोक्षार्थम् ; तत्पदेन मोक्षस्यैवानुकर्षणात् सकलपुरुषार्थाग्रणीत्वेन मोक्षस्य प्रसिद्धत्वात् , तत्पदस्य प्रसिद्धार्थत्वाद् वा तदर्थं– मोक्षार्थमिति वा; यत्नसिद्धितः– प्रेक्षावतां यम-नियमादिव्यापारोपपत्तेः ॥ ९ ॥

विपक्षे बाधामाह—

अन्यथा तत्त्वतोऽद्वैते हन्त! संसार-मोक्षयोः। सर्वानुष्ठानवैयर्थ्यमनिष्टं संप्रसज्यते॥१०॥

अन्यथा– उक्तविपरीतव्याख्याने, 'हन्त' इति खेदे, संसार-मोक्षयोस्तत्त्वतोऽद्वैते– अविभागे सति, सर्वानुष्ठानस्य– यम-नियमादेः, वैयर्थ्यम्– निष्फलत्वम् , अनिष्टम्– परस्याप्यनभिमतम् , संप्रसज्यते– प्राप्नोति। संसारनिवृत्त्यर्थः, मोक्षार्थो वा मुमुक्षूणां सर्वोऽपि व्यापारः। स चाद्वैतवादे नोपपद्यते, संसारस्यासत्त्वेन नित्यनिवृत्तत्वात् , मोक्षस्यापि सच्चिदानन्दरूपब्रह्मात्मकस्य नित्यत्वेन नित्यावाप्तत्वात्। एवं च प्रपञ्चशून्यतायाः परमार्थत्वे नित्यमुक्ततापरिदूषणं मण्डनेनोक्तम् , तत्र गत्वा स्वगृहे मत्यावृत्तम्। अविद्यानिवृत्त्यर्थो मुमुक्षूणां यत्न इति चेत्। न, यतो न तन्निवृत्तिः सती, नाप्यसती, नापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सद्-ऽसती, द्वैतप्रसङ्गो-द्देश्यत्व-विरोधेभ्यः, ज्ञानजन्यत्वाच्च। अस्तु तर्ह्यनिर्वचनीया, जन्यत्वात्, तदुक्तम्—"जन्यत्वमेव जन्यस्य मायिकत्वसमर्पकम्" इति चेत्। न, अनिर्वचनीयस्य ज्ञाननिवर्त्यत्वनियमाङ्गीकारेण तन्निवृत्तिपरम्पराप्रसङ्गात्। अथ सदद्वैतव्याकोपादसत्येव सा, असत्त्वेऽपि तस्या उद्देश्यत्व-ज्ञानजन्यत्वादि कल्पयिष्यत इति चेत्। नन्वेवमविद्याप्यसत्येव कार्यजननी कल्प्यतामिति कृतान्तव्याकोपः। कल्प्यादर्शनसंशयस्तूभयत्र तुल्यः। पञ्चमप्रकारत्वाश्रयणं त्वत्यन्ताप्रसिद्धम्।

अस्तु तर्हि चैतन्यात्मिकाऽविद्यानिवृत्तिरिति चेत्। मदुक्तमेवेत्थं चैतन्यस्य सदा सत्त्वेन तदर्थप्रयत्नवैफल्यं दूषणम्। अथ तत्त्वज्ञानोपलक्षितं चैतन्यमज्ञाननिवृत्तिः, तच्च न तत्त्वज्ञानतः प्रागस्ति, उपलक्षणत्वस्य संबन्धाधीनत्वात्; काकसंबन्धो हि गृहस्य काकोपलक्षितत्वमिति चेत्। न, काकोपलक्षितत्वस्याप्येकान्ते काकसंबन्धोत्तरं तदाहितस्वभावानुवृत्त्याऽसंभवदुक्तिकत्वात्, अनेकान्त एव तदुक्तेः 'अयं छत्री' इत्यादाविव योगसत्यपर्यवसानात्। किञ्च, ज्ञानोपलक्षितत्वस्यापि सत्त्वेऽद्वैतव्याघातः, असत्त्व उद्देश्यत्वानुपपत्तिः, मिथ्यात्वे ज्ञाननिवर्त्यत्वापत्तिः, चिन्मात्रत्वे चोक्तदोषानतिवृत्तिरिति न किञ्चिदेतत्।[1]

अथ नाज्ञानस्य निवृत्तिर्नाम ध्वंसः, रूपान्तरपरिणतोपादानस्यैव तद्रूपत्वात्; घटध्वंसो हि चूर्णाकारपरिणता मृदेव। न च चैतन्यस्य रूपान्तरमस्ति। तस्माद् नास्त्येवाज्ञानध्वंसः, किन्त्वज्ञानस्य कल्पितत्वात् तदत्यन्ताभाव एव तन्निवृत्तिः। किं तर्हि तत्त्वज्ञानस्य साध्यम्? इति चेत्। नास्त्येवाज्ञानात्यन्ताभावबोधात्मकत्वबाधव्यतिरेकेण; तदुक्तम्—

१ अतः 'सर्वस्वम्' इति पर्यन्तो वेदान्तिपूर्वपक्षः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः । अविद्या सह कार्येण नासीदस्ति भविष्यति ॥१॥"

इति । स चायमधिष्ठानात्मक एव, मिथ्याभूतस्य च बाध एव ध्वंस इत्यभिधीयते । अत एव शुक्तिबोधे रजतध्वंसव्यवहारः, न तु शुक्तिबोधेन रजतध्वंसः संभवति, रजतात्यन्ताभावबोधात्मको बाधस्तु शुक्तिज्ञानात्मक एव भवतीति । कथं तर्हि सर्वदा सत इच्छा, तदर्थप्रयत्नविशेषो वा ? इति चेत् । नास्माकं[1] परेषामिव मुक्तिर्भिन्ना, किन्तु चिद्रूपैव, नित्यावाप्तैव च, इच्छा-प्रयत्नविशेषौ तु कण्ठगतचामीकरन्यायेनानवाप्तत्वभ्रमात् । तन्निमित्तं चाज्ञानमेव । न चैवं मुक्तेः पुरुषार्थत्वहानिः, तद्धि न पुरुषकृतिसाध्यत्वम्, विषभक्षणादेरपि तथात्वापत्तेः[2] । नाप्यभिलषितत्वे सति कृतिसाध्यत्वं तत्[3], गौरवात्, लाघवेनाभिलषितत्वमात्रस्यैव पुरुषार्थत्वौचित्यात् । चन्द्रोदये पुरुषार्थत्वमिष्टमेव, प्रवृत्तिविलम्बस्तु कृतिसाध्यताधीविलम्बात् । ततः सिद्धं नित्यावाप्तस्यैव कण्ठगतचामीकरवच्चैतन्यस्य पुरुषार्थत्वम् । इत्यस्माकं वेदान्तविवेकसर्वस्वमिति चेत् ।

"मुक्तौ भ्रान्तिर्भ्रान्तिरेव प्रपञ्चे भ्रान्तिः शास्त्रे भ्रान्तिरेव प्रवृत्तौ ।
कुत्र भ्रान्तिर्नास्ति वेदान्तिनस्ते क्लृप्ता मूर्तिर्भ्रान्तिभिर्यस्य सर्वा ? ॥ १ ॥"

कथं चास्य भ्रान्तस्य शास्त्रश्रवणाद् नित्यावाप्ते चैतन्येऽनवाप्तत्वभ्रमो न निवर्तते ? । कथं वा विदितवेदान्तः स्वयं निवृत्तानवाप्तत्वभ्रमः परमुपदेशेन प्रवर्तयन् प्रतारको न स्यात् ? ।

---

१ वेदान्तिनाम् । २ पुरुषार्थत्वापत्तेः । ३ तदा पुरुषार्थत्वपरामर्शः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ द्विविधोऽस्माकं समाधिः– लयपूर्वकः, बाधपूर्वकश्च। तत्र पञ्चीकृतपञ्चभूतकार्यं व्यष्टिरूपं समष्टिरूपविराट्कार्यत्वात् तद्व्यतिरेकेण नास्ति, तथा समष्टिरूपमपि पञ्चीकृतपञ्चभूतात्मकं कार्यमपञ्चीकृतमहाभूतकार्यत्वात् तद्व्यतिरेकेण नास्ति, तत्रापि पृथिवी शब्द-स्पर्श-रूप-रस-गन्धाख्यपञ्चगुणा गन्धेतरचतुर्गुणात्मकाऽप्कार्यत्वात् तद्व्यतिरेकेण नास्ति, आपश्च गन्ध-रसेतरत्रिगुणात्मकतेजःकार्यत्वात् तद्व्यतिरेकेण न सन्ति, तदपि गन्ध-रस-रूपेतरद्विगुणवायुकार्यत्वात् तद्व्यतिरेकेण नास्ति, स च शब्दमात्रगुणाकाशकार्यत्वात् तद्व्यतिरेकेण नास्ति, स च शब्दगुण आकाशो 'बहु स्याम्' इति परमेश्वरसंकल्पात्मकाहंकारकार्यत्वात् तद्व्यतिरेकेण नास्ति, सोऽपि मायेक्षणरूपमहत्तत्त्वकार्यत्वात् तद्व्यतिरेकेण नास्ति, तदपि मायापरिणामत्वात् तद्व्यतिरेकेण नास्ति, इत्यनुसन्धानेन विद्यमानेऽपि कार्यकारणात्मके प्रपञ्चे चैतन्यमात्रगोचरो यः समाधिः स लयपूर्वक इत्युच्यते। अयं च सुषुप्तिवत् सबीजः, तत्त्वमस्यादिवेदान्तमहावाक्यार्थज्ञानाभावेनाविद्यातत्कार्यस्याक्षीणत्वात्; एवं चिन्तनेऽपि कारणसत्त्वेन पुनः कृत्स्नप्रपञ्चदर्शनाद् वेदान्तमहावाक्यार्थज्ञानेनाविद्यानिवृत्तौ साक्षिक्रमेण तत्कार्यनिवृत्तेर्हेत्वभावेन पुनरनुत्थानात्। बाधपूर्वस्तु निर्बीजः समाधिः, तत्र लयपूर्वकसमाधावनवाप्तत्वभ्रमनिवृत्तावपि बीजसत्त्वात् पुनस्तदुत्थानात् प्रवृत्तिः; बाधपूर्वकसमाधौ तु कुलालचक्रभ्रमवत् पूर्वसंस्कारवशादेव। उपदेशस्तु शमादिसंपत्त्यर्थमेव, नानवाप्तत्वभ्रमनिवृत्त्यर्थमिति न तद्वैफल्यमिति चेत्[1]। न, अभावबोधातिरिक्ताविद्यानिवृत्त्यभावे उक्तोभयसमाधिविशेषस्यैवासिद्धेः, कल्पितानुलोम-विलोमक्रमप्रपञ्चनिवृत्तिमात्रस्य विशेषाहेतुत्वात्, तादृशक्रमस्यैवानियम्यत्वात्, विविक्तप्रत्ययस्वरूपमात्राद् विशेषे सर्वज्ञज्ञानचरमक्षण एव

१ तद्वैफल्यमित्यन्तोऽयं पूर्वपक्षः। २ सप्तम्यन्तम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुक्तिरिति वदन् सौगत एव विजयेत ।

किञ्च, निवृत्तानवाप्तत्वभ्रमस्यापि पुनस्तद्भ्रमोदयादेव प्रवृत्तिरित्यपूर्वेयं प्रेक्षावत्ता । अपिच, शमाद्यर्थोऽप्युपदेशो व्यर्थ एव, मुक्तिसाधनतायां तस्याप्रामाण्यात् । अथ तत्त्वज्ञानसाधनतायां तत्प्रामाण्यम्, तच्च स्वत एव फलरूपम्, अत एव न तद् विधेयमिति चेत् । न, तत्त्वज्ञानस्य सुख-दुःखहान्यन्यतरत्वाभावेन स्वतःफलरूपत्वानुपपत्तेः । न च दुःखहानिरूपमेव तत्त्वज्ञानमिति स्वतः फलम्, एकस्य भावा-ऽभावोभयरूपत्वविरोधात् । अविरोधे वा भावा-ऽभावकरम्बितोभयवस्त्वापत्तेः । किञ्च, तत्त्वज्ञानेऽपि मुमुक्षयैवेच्छा जायमाना तस्य स्वतःफलत्वं व्याहन्ति । यदि च तत्र स्वरसत एवेच्छा तदा घटादावपि तथैव सा स्यादिति घटादेरपि स्वतःफलत्वापत्तिरिति न किञ्चिदेतत् ।

अपिच, एवमभ्रान्तपुरुषकृतिसाध्यत्वरूपं पुरुषार्थत्वमपि मोक्षस्यानुपपन्नमेव । न चाभिलषितत्वमात्रं[1] तत्, बलवदनिष्टाननुबन्धित्वभ्रमजन्येच्छाविषये विषभक्षणेऽतिव्याप्तेः, अभ्रान्तेच्छाविषयत्वं तु न मुक्तावपि, अनवाप्तत्वभ्रमजन्येच्छाविषयत्वादेव । न चाभिलषितत्वमात्रसत्त्वेऽपि चन्द्रोदये पुरुषार्थत्वं व्यवह्रियते, लक्ष्यीकृतं च तादृशव्यवहारालम्बनमेव तदिति । एतेन 'नानवाप्तत्वभ्रमजन्या मोक्षेच्छा, अवाप्तत्वज्ञानस्येच्छाप्रतिबन्धकस्य दोषेण प्रतिबन्धादेव तदुदयात्' इत्युक्तावपि न क्षतिः, वस्तुतो विवेके सत्यवाप्तत्वज्ञानम्, तस्मिंश्च सति न मुमुक्षा, इति न यावदधिकारसंपत्तिरेव वेदान्तिनः ।

किञ्च, अज्ञानात्यन्ताभावबोधोऽप्यज्ञाननिवृत्तिरूपो यद्यधिष्ठानात्मकः, तदा तस्य तत्त्वज्ञानजन्यत्वादधिष्ठानस्यापि

१ ख. ग. घ. च 'तत्र व'।

तज्जन्यत्वं प्राप्तम्। यदि चातिरिक्तः, तदा तन्निवृत्तिनिवृत्त्यादिपरम्पराप्रसङ्गो दुर्निवारः। अथ संप्रज्ञातसमाधिस्थलीयात्माकारवृत्त्युत्तरं निरोधसमाधिना वृत्तिं विनैवात्मानुभवः, तदा चित्तस्य निरुद्धवृत्तिकत्वेन दर्शनाहेतुत्वेऽपि स्वतःसिद्धस्यात्मदर्शनस्य दुर्निवारत्वाज्जल-तन्दुलादिपूर्णतापगमेऽपि घटस्य वियत्पूर्णतावत् स एवाज्ञानबाधरूपः, तस्यापि प्रवाहपतितनिर्हेतुकचित्तपरिणामरूपस्य सह निरोधसंस्कारैः स्वप्रकृतौ लये स्वरूपप्रतिष्ठः पुरुषो भवतीति चेत्। न, तस्य प्रकृतिलयहेत्वभावात्, स्वात्मिकाया अविद्यानिवृत्तेः स्वलयेऽहेतुत्वात्, लयस्यैवानिर्वचनाच्च; तथाहि– लयः किं ध्वंसो वा, बाधो वा, कार्यरूपपरित्यागेन कारणरूपेणावस्थानं वा? । नाद्यः, मिथ्याभूतस्यात्यन्ताभावस्यैवापगमात्। न द्वितीयः, बोधानुपरमेनानिर्मोक्षापातात्। नापि तृतीयः, [1]चित्ताभावात्।

अथाविद्यापर्यन्तस्याल्लयस्य न दोषः, लीयते तु सुषुप्तौ, "तन्निगृहीतं न लीयते" इति गौडोक्तं तु निरोधे चित्तवृत्त्यभावो न लयकृतः, किन्तु निग्रहकृत इत्यभिप्रायेणेति चेत्। अपमतमेतत्, लयस्य कार्यक्रमेण निवृत्तिरूपत्वात्, अत्र तु कारणक्रमेण निवृत्तेरभिधानात्। अथात्र कारणक्रमेण बाधरूपनिवृत्त्युत्तरं कार्यक्रमेण लय इति नापमतम्, स च बाधक्रमेणार्थसिद्ध इति न हेत्वनुपपत्तिरिति चेत्। न, अविद्याध्वंसत्वस्यैव तत्त्वज्ञानजन्यतावच्छेदकस्यौचित्यात्, बाधेनैव ध्वंसापलापे घटादेरपि प्रपञ्चस्य ध्वंसाभावे सूक्ष्मतया स्वरूपेणावस्थानस्य सुवचत्वे मुक्तावप्यनुवृत्तिप्रसङ्गः। कारणरूपमेव सूक्ष्मता, नान्येति चेत्। तर्हि प्रपञ्चकारणमविद्या स्वरूपतो न नष्टा, कार्यात्मना तु नष्टेति निवृत्त्य-ऽनिवृत्त्यात्मकतया वस्त्वस्तु। एवं ब्रह्मापि

१ क. 'द्वप्रत्त्व' । २ ख. ग. घ. च. 'स्थित्यभा' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साक्षित्वादिरूपेण मुक्तौ नष्टमनष्टं च ब्रह्मरूपेण वस्त्वस्तु । तथाच 'औदयिकादिभावनिष्पन्नसंसारितया निवर्तमानं सिद्धत्वेनोत्पद्यमानं द्रव्यतयाऽनुगतमात्मद्रव्यमेव मुक्ताववतिष्ठते; कर्म च संसारनिबन्धनोदयादिभावालम्बनतया निवर्तमानं द्रव्यतयाऽनुगतमेव ततः पृथग्भावपर्यायेणोत्पद्यते' इत्यार्हतमतमेवाकामेनाप्यभ्युपगन्तव्यम् । अनष्टायां खल्वविद्यायां मुक्तावप्यद्वैतस्यावश्यं व्याघाते किमर्थं संसारदशायामात्मनि साक्षाज्ज्ञान-सुखादिप्रतीतीनामनिर्वचनीयज्ञानाद्यालम्बनतयाऽन्तःकरणधर्माणामेव ज्ञान-सुखादीनां परम्परासंबन्धदोषेण भ्रमत्वं कल्पनीयम् ? । "कामः, संकल्पः, विचिकित्सा, श्रद्धा, धृतिः, अश्रद्धा, अधृतिः, ह्रीः, धीः, भीः, एतत् सर्वं मन एव" इति श्रुतेर्भावमनोऽभिप्रायेणैव घटमानत्वात् । 'मनःपदस्य मनःकारणके लक्षणयैतदुपपत्तिः' इत्यन्ये ।

अथाद्वैतश्रुत्यनुरोधाद्नाशेऽप्यविद्याया बाधितत्वेन तस्या अतात्त्विकत्वाददैततत्त्वाव्याकोप इति चेत् । न, तदा तस्या बाधाविषयत्वेन बाधितत्वायोगात् । ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वं चाविद्यायामिवाविद्यानिष्ठात्यन्ताभावप्रतियोगित्वं ब्रह्मण्यपि तुल्यम्; अन्यथा तु तत्तादात्म्यापत्त्या संसारितापत्तिः । एतेन 'प्राक् पश्चाद् वा घटादेः 'नास्ति' इति प्रतीतेरत्यन्ताभावेनैवोपपत्तौ प्रागभावे ध्वंसे वा मानाभावः, असत्त्वं चात्यन्ताभावादेव' इति निरस्तम्, अनुत्पन्नाप्रच्युताया अविद्याया अत्यन्ताभावोपगमे ब्रह्मणोऽपि तत्प्रसङ्गस्य दुर्निवारत्वात्, प्रागभाव-ध्वंसापलापे प्राक्-पश्चादिति प्रयोगस्यैवानुपपत्तेः, प्रतियोगिनः पुनरुत्पत्ति-पुनरुन्मज्जनादिप्रसङ्गाच्च ।

अथ सर्वस्य ब्रह्मात्मकत्वाद् ब्रह्मणः क्वात्यन्ताभावः ?, ब्रह्म तु न सर्वात्मकमिति तदेव सर्वात्यन्ताभावरूपम्, अत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव 'ब्रह्मसिद्धावसर्वम्" इति ब्रह्मविशेषणमुक्तमिति चेत् । न, व्याघातात्, सर्वधर्मप्रतियोगितोपरक्ताभावात्मकतया ब्रह्मणः सर्वत्वानपायात्, ब्रह्मस्वरूपवत् सर्वस्य ब्रह्माभिन्नत्वे तु च्छेदापाताच्च । नोच्छिद्यत एव ब्रह्मरूपेण सर्वम्, प्रपञ्चरूपेण चोच्छिद्यत इति चेत् । ब्रह्मापि संसाररूपेणोच्छिद्यते नोच्छिद्यते च ब्रह्मरूपेणेति तुल्यम् । नैकमेव निवर्तते, न निवर्तते चेति चेत् । तुल्योऽयमुभयत्र संत्रासः कातरस्य सः । अनित्यस्य प्रपञ्चस्य कल्पितब्रह्मतादात्म्येन सह निवृत्तिः, नित्यस्य तु ब्रह्मणो नेयमिति चेत् । न, रूपान्तरपरिणतोपादानरूपनिवृत्तिवादेऽनाद्यविद्यातादात्म्यानिवृत्त्याऽनिर्मोक्षापातस्य तदवस्थत्वात् । बाधरूपनिवृत्तिवादे च तस्य निर्विषयत्वाभावेन ब्रह्मरूपतदत्यन्ताभावविषयकेन तेन समानसंवित्संवेद्यतयाऽविद्याख्यब्रह्मात्यन्ताभावोऽपि विषयीक्रियेत । त्रैकालिकी तादात्म्यपरिणामनिवृत्तिरेव खल्वत्यन्ताभावः । अथास्त्वविद्याया ध्वंस एव, स चानिर्वचनीयः; न चानिर्वचनीयस्याज्ञाननिवर्त्यत्वनियमः, अविद्याध्वंसातिरिक्ते तत्संकोचादिति चेत् । न, तथापि मुक्तौ तत्सत्त्वेऽद्वैतसंकोचावश्यकत्वात्, तत्कार्यनिवृत्तीनामप्यनन्तानां तदा सत्त्वे तावतीषूक्तनियमाद्वैतसंकोचस्यातिजघन्यत्वाच्च; मुक्तावद्वैतवचनस्य दृग्-दृश्यसंयोगोपरतिवचनस्य च कर्मनिर्मुक्तत्वाभिप्रायेणैवोपपादयितुं युक्तत्वादिति दिग् ।

अपिच, तत्त्वमस्यादिवाक्ये परोक्षत्व-भोक्तृत्वाभ्यामुपस्थितयोरभेदान्वयायोग्यत्वाद् यदि पदद्वयस्य चिन्मात्रे लक्षणा, एतद्वाक्यसामर्थ्यादेव च प्रपञ्चे पारमार्थिकत्वाभावलाभः, भोक्तृत्वादेः पारमार्थिकत्वे तत्पदार्थैक्यासिद्धेर्भोक्तृत्वादेः कल्पितत्वे भोग्यादेरपि कल्पितत्वादिति मन्यते, तदा "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यत्र नित्यत्व-विज्ञानत्वा-ऽऽनन्दत्वादिनोपस्थितस्याप्यभेदान्वयायोग्यत्वाद् नित्यादिपदानां निर्विशेषब्रह्मणि लक्षणयैतद्वाक्यसामर्थ्यादेव नित्यत्वादे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रपारमार्थिकत्वात् तद्विनिर्मुक्तनिर्विशेषसिद्ध्यापत्तिः । न च निर्विशेषं शशविषाणवत् सिध्यतीति शून्यतैव स्यात्। अथ नित्यानन्दादिपदार्थानां नाभेदविरोधः, तर्हि तत्-त्वंपदार्थयोरपि मा भूद् विरोधः। विरोधश्चेत्, शशविषाणादिवाक्यतुल्यमेवैतद् वाक्यं स्यात्। यदि चात्र दृढा भक्तिः, तदा जीवे-श्वरयोः शक्त्या शुद्धस्वरूपेणैवाभेद उपपाद्यताम्। न हि 'सोऽयं देवदत्तः' इत्यत्रापि शुद्धाभेदे लक्षणा स्वारसिकी, तत्त्वे-दंताभ्यां पर्यायभेदोपरक्तस्यैवोर्ध्वतासामान्याख्यस्याभेदस्य शक्तितः प्रत्ययात्, प्रत्यभिज्ञायास्तत्समानाकाराभिलापस्य च भेदाभेदग्राहितयैव समर्थनात्, उक्तवाक्याद् भेदा-ऽभेदयोः समारोपव्यवच्छेददर्शनाच्च । किञ्च, एवमेकतरविशेषणं न प्रयुञ्जीत, 'सोऽस्ति' इत्यादिनाऽप्यभेदस्य प्रतिपादयितुं शक्यत्वात्, विशिष्टाभेदप्रत्यायनार्थमुक्तप्रयोगसमर्थनं तु भेदाभेदवादिनः शोभते, न त्वखण्डार्थप्रतीतिवादिन इति न किञ्चिदेतदनन्तदेवोदितम् ।

एतेन 'गौरश्वः' इत्यादिकं जातितोऽर्थं प्रत्याययति, 'पचति पठति' इत्यादिकं तु क्रियातः, 'शुक्लः कृष्णः' इत्यादिकं गुणतः, 'धनी गोमान्' इत्यादिकं च संबन्धत इति, ब्रह्म तु जाति-क्रिया-गुण-संबन्धरहितं मुख्यया वृत्त्या न केनापि शब्देन प्रतिपादयितुं शक्यते, परन्तु यथा कथञ्चिल्लक्षणयैव 'तत्त्वमसि' इत्यादिवाक्यात् तद्बोधः, तत्रापि तात्पर्यस्य नियामकत्वाद् निर्दोषत्वमहिम्ना वृत्तिं विनैव वा ततस्तद्बोधः' इति मधुसूदनाभिप्रायोऽपि निरस्तः, अस्य खलु तपस्विनो 'यथा कथञ्चित्' इति वदतो लक्षणायां संशय एव । न हि बहुप्रसिद्ध्यनारूढपदसंबन्धरूपा, शक्यार्थसंबन्धरूपा वा लक्षणा ब्रह्मणि घटते । न चा-

१ ख. ग. घ. च. 'न श' । २ क. 'संन्यास ए' ।

खण्डार्थप्रतीतिर्लक्षणया क्वचिद् दृष्टेति। न चास्य महात्मन उत्तरसमाधानपाणिनाऽपि विवेकलोचनमाच्छादयतो दोषदस्योर्न भयम्। न हि वृत्तिं विना क्वचन शब्दात् प्रतीतिः प्रादुर्भवन्ती दृष्टा। यदि च निर्दोषत्वमहिमा शाब्दसामग्रीप्रतिपत्त्यैव शब्दाद् ब्रह्म बोधयेत् तदा शब्दप्रतिपत्त्यैवासौ स्वातन्त्र्येण तद् बोधयन् [1]कुतो न प्रमाणान्तरतामास्कन्देत्[2]। न च निर्दोषत्वमत्राविद्यानिवृत्तिरूपम्, तस्याः फलत्वात्, तृतीयप्रतिपत्तौ भावाच्च; तिस्रो हि ब्रह्मणि प्रतिपत्तयः, आद्या शब्दात्, द्वितीया शब्दात् प्रतिपद्य संतानवती, तृतीया तु निर्विकल्पकसाक्षात्काररूपेति; किन्तु श्रवणादिजन्यप्रतिबन्धकादृष्टनिवृत्तिरूपम्। न च श्रवणादिकं वेदान्तवाक्यार्थबोधार्थं विधीयते, येन तत्र सा द्वारं स्यात्, किन्त्वात्मसाक्षात्कारार्थम्; "आत्मा वा रे द्रष्टव्यः श्रोत[3]व्यो मन्तव्यो निदिध्यासितव्यः" इति श्रुतौ 'अग्निहोत्रं जुहोति, यवागुं पचति' इतिवदार्थक्रमस्य बलवत्त्वात्, श्रवण-मननादिभिरात्मा द्रष्टव्य इत्यर्थात्। अत्रापि श्रवणं न वेदान्तानामेव, "श्रोतव्यः श्रुतिवाक्येभ्यः" इत्यत्र श्रुतिपदस्य प्रमाणशब्दमात्रपरत्वात्, अन्यथा नियमा-ऽदृष्टकल्पनागौरवात्। न च गौरवेण मुख्यार्थत्यागेऽविद्यामयुक्तिभयाद् रूढित्यागः स्यादिति वाच्यम्; विशेष्यतावच्छेदकप्रकारेण विशिष्टवाचकपदेन बोधे लक्षणाऽभावात्। अत एव विनापि लक्षणां श्येनादाविष्टसाधनबोधः। अत एव न प्रमाणमात्रपरत्वम्, 'श्रुतिपदशक्तौ मुख्यविशेष्ये प्रमाणत्वस्य साक्षात्प्रकारत्वात्, तन्मात्रेण तद्बोधने लक्षणापत्तेः' इति मिश्रोक्तेः। अत एव श्रवणे वेदान्तयुक्तरीत्या नियमविधिरपि न न्याय्यः।

नन्वेवमपि शब्दबोधस्यैव तत्प्रयोजकत्वाय नियमा-ऽदृष्टकल्पनावश्यकत्वाद् विशिष्टवाचकश्रुतिपदजन्योपस्थितिसंको- ।।३०९।।

---

१ क. 'कुतः प्र'। २ 'निर्दोषत्वम्' इति संबध्यते। ३ क. 'व्यो नि'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चस्यान्याय्यत्वात्, संन्यासाद्यधिकारवत एव श्रवणस्य नियम्यत्वाच्च न नियमविधेरन्याय्यत्वमिति चेत् । न, तथाप्यात्मदर्शनार्थं तद्विधिसिद्धेर्न तज्जन्यदुरितनिवृत्तिसाध्यो वाक्यार्थबोधः । वाक्यार्थबोधोऽपि प्रकृतो विषयस्यापरोक्षत्वादात्मदर्शनरूपः स्वीक्रियत इति चेत् । प्रक्रियामात्रमेतत् । न हि विषयपरोक्षत्वा-ऽपरोक्षत्वनिबन्धनं प्रतिभासस्य परोक्षत्वमपरोक्षत्वं वा, एकत्र विषय उभयप्रतिभासानुपपत्तिप्रसङ्गात्, विषयस्वरूपापरावृत्तेः । अथ वृत्तिधर्म एव परोक्षत्वमपरोक्षत्वं वा, तद्विषयतया च विषयपरोक्षत्वा-ऽपरोक्षत्वव्यवहार इति चेत् । न, सर्वज्ञानानां स्वांशे प्रत्यक्षत्वोपगमविरोधात् । अथ वृत्तेः स्वाकारवृत्तिमन्तरेण भासमानत्वात् शुद्धसाक्ष्यपरोक्षत्वम्, घट-वह्न्यादिविषयांशे तु ज्ञाततयाऽज्ञाततया वा साक्ष्यपरोक्षत्वं नैयायिकानां मानसप्रत्यक्षत्वतुल्यम्, स्वरूपेणापि प्रमाणतोऽपरोक्षत्वं च घटादेरेव, विषयचैतन्य-प्रमातृचैतन्ययोरभेदेन तस्य फलव्याप्यत्वात्, न तु वह्न्यादेः, तत्र वृत्तेर्बहिर्निःसरणाभावेनाभेदाभिव्यक्त्यभावात्, प्रकृते चैकस्यैव चैतन्यस्य शब्दबोधितस्य प्रमातृत्वेन विषयत्वेन चाभेदात् स्वरूपतोऽप्यपरोक्षत्वमिति चेत् । न, देशविशेषावच्छिन्नपर्वतस्येवाखण्डत्वाविशिष्टस्य चैतन्यस्य तत्त्वायोगात्; अन्यथा 'अहं ज्ञानवान्, ज्ञानसामग्रीतः' इत्यत्राप्यनुमितित्वमुच्छिद्येत । किञ्च, कर्मणि स्पष्टत्वं यदि ज्ञानधर्मः, तदा सर्वत्र तत्प्रसङ्गः । यदि च कारणज्ञानस्पष्टता तन्निमित्तम्, तदाऽनवस्था । न चैकान्त एकस्यांशे परोक्षत्वा-ऽपरोक्षत्वादिकं कर्तृ-कर्म-क्रियाविभागो वा संभवीति न किञ्चिदेतत् ।

अस्माकं त्वनेकान्ताद् नायं दोषः, प्रबलतरज्ञानावरण-वीर्यान्तरायकर्मक्षयोपशमविशेषात् क्वचिद् विषये विज्ञानस्य

---

१ क. 'क्ष्यत्व' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्पष्टत्वम्; तद्विपर्ययात्तु क्वचिदस्पष्टत्वम्। अनुमानाद्याधिक्येन नियतवर्णसंस्थानाद्यवगाहनेन विशेषप्रकाशनं हि स्पष्टत्वम्; तदुक्तम्—

"अनुमानाद्यतिरेकेण विशेषप्रतिभासनम्। तद् वैशद्यं मतं बुद्धेरवैशद्यमतः परम् ॥ १ ॥" इति।

'प्रतीत्यन्तराव्यवधानेन प्रकाशनं स्पष्टत्वम्' इति त्वीहादीनां संदेहादिभ्यः समुपजायमानत्वेन निरस्तं देवसूरिभिः[1]। तदिह शब्दादुद्भवदात्मज्ञानं न कथमप्यपरोक्षम्, अस्पष्टत्वात्, इति केवलज्ञानरूपं सकलप्रत्यक्षमेवात्मदर्शनमेष्टव्यम्। तत्र च श्रवणस्य ज्ञान-विज्ञानादिक्रमेणोपयोगः, अत एवोपरतिपदार्थस्य चारित्रस्य न तदङ्गत्वम्, श्रवणस्यैव तदुपकारित्वात्। अत एव च गृहस्थानां स्त्रीणां च तत्र तत्रोक्तस्तदधिकारोऽपि संगच्छते। श्रवणादिविधिश्च मुक्त्यर्थमेव, सम्यग्दृष्टिमधिकृत्य सर्वेषामपि कर्मणां तदर्थमेव विधानात्, विधिसामर्थ्यादेवेहलोकाद्यर्थनिषेधप्राप्तेः। विहितं च मुक्तिपरम्पराकारणमान्तरालिककारणोपनायकतयैव तज्जनयेदिति किं नात्मश्रवणमात्मदर्शनहेतुः स्यात्?। उपकारिकारणं चैतत्, तेन न प्रत्येकबुद्धादीनां श्रवणाभावेऽपि ज्ञानानुपपत्तिः। न च प्राग्भवीयश्रवणादिकमेव तेषां कल्पनीयम्, मरुदेव्यादौ तदभावात्, इत्यन्यत्र समयपरमार्थविस्तरः।

अपि च, स्वमतेऽपि परस्य श्रवणादिजन्यप्रतिबन्धकादृष्टनिवृत्तिरूपनिर्दोषत्वमहिमा न शब्दात् शुद्धब्रह्मबोधे हेतुः, उत्पत्तौ प्रामाण्यस्य स्वतस्त्वभङ्गापत्तेः। ज्ञानसामान्यसामग्रीजन्यत्वं हि तत्। न चोक्तार्थवाक्यार्थप्रमाया निर्दोषत्वजन्यत्वे

[1] प्रमाणनयतत्त्वालोकालङ्कारे द्वितीयपरिच्छेदे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युज्यत एतत्, श्रवणादेः प्रतिबन्धकनिवर्तकत्वात्, प्रतिबन्धकाभावस्य च तुच्छतया हेतुत्वादेव गेहेनर्दिभिः परैरेतद्दोषपरिहारादिति स्वगृहतत्त्वमेव न प्रेक्षितं क्षतक्षामकुक्षिना तपस्विना, ततः सम्यगुत्प्रेक्षितं शाक्यसिंहविनेयेन यत्–'प्रबलदोषमाहात्म्यात् 'खरविषाणम्' इत्यादिवाक्यादलीकस्याखण्डस्य खरविषाणस्येव वेदान्तवाक्यात् परेषां कुवासनादोषमाहात्म्यादलीकस्याखण्डस्य ब्रह्मणो बोधः' इति। एवं च सर्वस्य स्वरूपसत्त्वादिधर्मसंकीर्णस्य, पररूपासंकीर्णस्यैव चोपलम्भाद् व्यवहारस्य च प्रतियोगिप्रतिपत्तौ तथैवोदयात्, सदसदात्मकमेव जगत्; तदाहुर्वृद्धाः—

"सर्वमस्ति स्वरूपेण पररूपेण नास्ति च। अन्यथा सर्वसत्त्वं स्यात् स्वरूपस्याप्यसंभवः ॥ १ ॥"

न तु सदाद्यद्वैतमेवेति व्यवस्थितम् ॥ १० ॥

चार्वाकीयमतावकेशिषु फलं नैवास्ति, बौद्धोक्तयः कर्कन्धूपमितास्तु कण्टकशतैरत्यन्तदुःखप्रदाः।
उन्मादं दधते रसैः पुनरमी वेदान्ततालद्रुमाः गीर्वाणद्रुम एव तेन सुधिया जैनागमः सेव्यताम् ॥ १ ॥
न काकैश्चार्वाकैः सुगततनयैर्नापि शशकैर्बकैर्नाद्वैतज्ञैरपि च महिमा यस्य विदितः।
मरालाः सेवन्ते तमिह समयं जैनयतयः सरोजं स्याद्वादप्रकरमकरन्दं कृतधियः ॥ २ ॥
क्वचिद् भेदच्छेदः क्वचिदपि हताऽभेदरचना क्वचिद् नात्मख्यातिः क्वचिदपि कृपास्फातिविरहः।
कलङ्कानां शङ्का न परसमये कुत्र तदहो! श्रिता यत् स्याद्वादं सुकृतपरिणामः स विपुलः ॥ ३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्यासन् गुरवोऽत्र जीतविजयप्राज्ञाः प्रकृष्टाशया भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरस्तेन न्यायविशारदेन रचितस्तर्कोऽयमभ्यस्यताम् ॥ ४ ॥

इति पण्डितश्रीपद्मविजयसोदरन्यायविशारदपण्डितयशोविजयविरचितायां स्याद्वादकल्पलतानाम्न्यां
शास्त्रवार्तासमुच्चयटीकायामष्टमः स्तवकः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

अथ नवमः स्तवकः ।

प्रणतान् प्रति निर्वृतिश्रिया स्वहृदो राग इव स्फुटीकृतः ।
त्रिशलातनयस्य संपदे पदयोः पाटलिमा नखत्विषाम् ॥ १ ॥
अपि स्वपिति विद्विषां ततिरपायरात्रिंचरः प्रणश्यति यदाख्यया पठितसिद्धया विद्यया ।
स्तवप्रवणता स्वतः सततमस्य शङ्खेश्वरप्रभोश्चरणपङ्कजे भवति कस्य धन्यस्य न ? ॥ २ ॥
हेतु-युक्तिविलसत्सुवासनं निर्मितोरुकुनयव्यपासनम् ।
भूत-भावि-भवदर्थभासनं शासनं जयति पारमेश्वरम् ॥ ३ ॥

नन्वद्वैते मोक्षार्थानुष्ठानवैयर्थ्यमुक्तम्, मोक्ष एव चोपायाभावाद् नास्तीति किमेतद् दूषणम् ? इति केषाञ्चिद् वार्तान्तरमाह—

अन्ये पुनर्वदन्त्येवं मोक्ष एव न विद्यते । उपायाभावतः, किंवा न सदा सर्वदेहिनाम् ? ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ये पुनः– नास्तिकप्रायाः, वदन्ति, एवं–यदुत, मोक्ष एव न विद्यते परमार्थतः। कथम्? इत्याह– उपायाभावतः– तत्प्राप्तिहेत्वभावात्, नित्यावाप्तत्वेऽपि तदभिव्यक्तिहेत्वभावात्। सत्युपाये किंवा न सदा–सर्वकालमेव, सर्वदेहिनाम्– सर्वेषामेव संसारिणां स उपायः? । मोक्षवत् तदुपायस्यापि कादाचित्कत्व-कादाचित्कत्वयोस्तुल्यः पर्यनुयोग इति भावः ॥ १ ॥

प्रस्तुतवाद्येव पराशयमाशङ्क्य परिहरति––

कर्मादिपरिणत्यादिसापेक्षो यद्यसौ ततः। अनादिमत्त्वात्कर्मादिपरिणत्यादि किं तथा ॥२॥

यद्यसौ– मोक्षोपायः, कर्मादिपरिणत्यादिसापेक्षः, 'कर्मादि-' इत्यादिना प्रधानादिग्रहः, 'परिणत्यादि' इत्यादिना विवर्तादिग्रहः, तत्सापेक्षोत्पत्तिकः; ततः– तर्हि, अनादिमत्त्वात् कर्मादेः, कर्मादिपरिणत्यादि, किं तथा– किं कादाचित्कम्?, अनादेः कर्मादेः स्वपरिणत्यादावन्यापेक्षाऽभावात् ॥ २ ॥

ननु प्रधानादेर्नित्यस्यैकस्य सहकार्यपेक्षाभावेऽपि प्रवाहेणैव कर्मणोऽनादित्वात् कस्यचित् कर्मणः स्वभावतस्तथापरिणंस्यमानस्योपादानात् तथापरिणत्यादिकं न दुर्घटम्, इत्यत आह––

तस्यैव चित्ररूपत्वात्तत्तथेति न युज्यते। उत्कृष्टाद्या स्थितिस्तस्य यज्जातानेकशः किल ॥३॥

१ ख. ग. घ. च. 'णामादि'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यैव– अधिकृतस्यैव कर्मणः, चित्ररूपत्वात्– विचित्रस्वभावात् , तत्– परिणत्यादिकम् , तथा– कादाचित्कम् , इति न युज्यते– न घटते, यत्– यस्मात् , तस्य– कर्मणः, उत्कृष्टाद्या–उत्कृष्टा ग्रन्थ्यवाप्त्यवच्छिन्ना, अपकर्षवती च, स्थितिः, अनेकशः– बहुवारम् , जाता, 'किल' इत्याप्तवचनमेतत् ।

तथाचापकृष्टस्थितिकादिस्वभाववतः कर्मणो मोक्षोपायजननपरिणतिशालित्वेऽभव्यादीनामपि तल्लाभप्रसङ्गः, तेषामपि तीर्थकरादिविभूतिं दृष्ट्वा ग्रन्थ्यवाप्तौ श्रुतसामायिकलाभश्रवणात् । किञ्च, एवं दर्शनादेः स्वभावजनितत्वेन मोक्षः पुरुषकृतिसाध्यो न स्यादिति परं प्रत्युक्तं तदर्थानुष्ठानवैयर्थ्यं स्वयमप्यनिवारितम् । अपि च, प्रथमनिर्गुणस्यैव सतो गुणावाप्त्यावग्रेऽपि किं गुणापेक्षया ? । अपि च, सर्वमुक्तिसिद्धान्तो नास्ति जैनानाम् , तदभावे चायोग्यत्वशङ्कया कथं मोक्षोपाये प्रेक्षावतां निराकुलप्रवृत्त्युपपत्तिः ? । न च शम-दम-भोगानभिषङ्गादिना मुमुक्षुचिह्नेन तच्छङ्कानिवृत्तिः, शमादिमत्त्वानिश्चयानन्तरं प्रवृत्तिः, प्रवृत्त्युत्तरं च शमादिसंपत्तिरित्यन्योन्याश्रयात् । एतेन 'शमादिमत्त्वेन योग्यता' इत्यपि प्रत्युक्तम् , भव्यत्वजातिभेदोपगमविरोधाच्चेत्याद्यूहनीयम् ॥ ३ ॥

अत्र समाधानवार्तामाह—

५३ **अत्रापि वर्णयन्त्यन्ये विद्यते दर्शनादिकः । उपायो मोक्षतत्त्वस्य परः सर्वज्ञभाषितः ॥४॥**

अत्रापि– मोक्षाभाववादे, वर्णयन्त्यन्ये– मोक्षवादिनो जैनाः, विद्यते दर्शनादिकः– दर्शन-ज्ञान-चारित्ररूपः, उपायः–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राप्तिहेतुः, मोक्षतत्त्वस्य– द्रव्य-क्षेत्र-काल-भावभेदेन शुद्धात्मस्वरूपावस्थानरूपस्य, परः– उत्कृष्टः, सर्वज्ञभाषितः– वीतरागभणितः, नासर्वज्ञभाषितः, अभाषितो वा।

अत्र 'मोक्षतत्त्वस्य, इति तत्त्वपदेनान्याभिमतमोक्षस्याभावादेव तदुपायः शशशृङ्गोपायतुल्य इति ध्वनितम्; तथाहि— 'समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंस एव मोक्षः' इति नैयायिकमतं न रमणीयम्, अतीतदुःखवद् वर्तमानदुःखस्यापि स्वत एव नाशादपुरुषार्थत्वप्रसङ्गात्। न च हेतूच्छेदे पुरुषव्यापारः, प्रायश्चित्तवदिति वाच्यम्; तथा सति दुःखानुत्पादस्य दुःखसाधनध्वंसस्यैव वा प्रयोजनत्वप्रसङ्गात्। न च चरमदुःखध्वंसेऽन्वय-व्यतिरेकाभ्यां तत्त्वज्ञानस्य प्रतियोगिवद् हेतुत्वम्, प्रतियोगिनमुत्पाद्य तेन तदुत्पादनात्, पुरुषार्थसाधनतया दुःख-तत्साधनयोरपि प्रवृत्तिदर्शनादिति वाच्यम्; चरमत्वस्यार्थसमाजसिद्धत्वेन कार्यतानवच्छेदकत्वात्, अन्त्यदुःखे उपान्त्यदुःखस्यैव हेतुत्वेन तस्य तत्त्वज्ञानेनोत्पादयितुमशक्यत्वात्, भोगेनैव कर्मणां नाशे नानाभवभोग्यकर्मणामेकभवे भोक्तुमशक्यत्वात्, तत्कर्मभोगस्य चापूर्वकर्मार्जकत्वेनानिर्मोक्षापातात्। न च तत्त्वज्ञानबलार्जितेन कायव्यूहेन तत्तत्कर्मभोगाद् नानिर्मोक्ष इति सांप्रतम्, मनुजादिशरीरसत्त्वे शूकरादिशरीरोत्पादायोगात्। देवादीनां तु वैक्रियशरीरादिकर्मोदयमहिम्नैव नानाशरीरश्रवणोपपत्तेरिति।

' "दुःखेनात्यन्तविमुक्तश्चरति" इति श्रुतिस्वरसाद् दुःखात्यन्ताभाव एव मुक्तिः, दुःखसाधनध्वंस एव च स्ववृत्तिदुःख-

१ सप्तम्यन्तम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात्यन्ताभावसंबन्धः, स च साध्य एव' इति तदेकदेशिमतमपि न सांप्रतम्; दुःखसाधनध्वंसस्य दुःखात्यन्ताभावसंबन्धत्वे मानाभावात् ।

'दुःखध्वंसस्तोम एव मुक्तिः' इत्यपि केषाञ्चित् तदेकदेशिनां मतं वार्तम्; स्तोमस्य कथमप्यसाध्यत्वात् ।

'आनन्दमयपरमात्मनि जीवात्मलयो मुक्तिः' इति त्रिदण्डिमतमपि न पेशलम्; एकादशेन्द्रिय-सूक्ष्ममात्रावस्थितपञ्चभूतात्मकलिङ्ग-शरीरापगमरूपलयस्य नामान्तरेण नामकर्मक्षयरूपत्वादेव । यदि चोपाधिशरीरनाशे औपाधिकजीवनाशो लयः, तदा तेन रूपेणाकाम्यत्वादपुरुषार्थत्वात् ।

'अनुपप्लवा चित्तसंततिर्मुक्तिः' इति बौद्धबुद्धिरपि न सूक्ष्मा, संततेरवस्तुत्वेनासाध्यत्वात् । न च संततिपतितक्षणानामेव पूर्वोत्तरभावेन हेतु हेतुमद्भावात् तत्साध्यत्वम्, संसारानुच्छेदप्रसङ्गात्, सर्वज्ञज्ञानचरमक्षणस्यापि मुक्तज्ञानप्रथमक्षणहेतुत्वेन तत्संततिपतितत्वात् । अथ न हेतु-फलभावमात्रादेकसंततिव्यवस्था, अपि तूपादान-हेतुफलभावात्; न च सर्वज्ञज्ञानस्य चरमक्षण उपादानम्; आलम्बनप्रत्ययो हि सः, समनन्तरप्रत्ययश्चोपादानमिति चेत् । न तुल्यजातीयस्योपादानत्वे मुक्तचित्त-सर्वज्ञज्ञानयोस्तुल्यजातीयतानपायात्; सर्वज्ञज्ञानचरमक्षणस्याद्यमुक्तचित्तानुपादानत्वे तस्यानुपादानस्यैवोत्पत्तेर्जागराद्यप्रत्ययेऽप्युपादानानुमानोच्छेदात्, अन्वयिद्रव्याभावे बद्ध-मुक्तव्यवस्थानुपपत्तेरिति ।

'स्वातन्त्र्यं मुक्तिः' इत्यपरेषां मतमपि न क्षोदक्षमम्, तद् यदि कर्मनिवृत्तिरेव तदा सिद्धान्तसिन्धौ[2]वेव निमज्जनात् ।

---

१ सप्तम्यन्तम् । २ आर्हतसिद्धान्तप्रवेशात्, सिद्धसाधनादिति यावत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि चैश्वर्यमेव तत्, तदाऽभिमानाधीनतया तस्य संसारविलसितत्वात् ।

'प्रकृति-तद्विकारोपधानविलये पुरुषस्य स्वरूपेणावस्थानं मोक्षः' इति सांख्यमतमपि न निर्मलसंख्यासमुज्जृम्भितम्, स्वरूपावस्थानस्य कूटस्थात्मरूपस्यासाध्यत्वात्, प्रकृत्यादिप्रक्रियायां प्रमाणाभावाच्च ।

'अग्रिमचित्तानुत्पादे पूर्वचित्तनिवृत्तिर्मुक्तिः' इत्यन्येषां मतमपि कुवासनाविलसितम्, अग्रिमचित्तानुत्पादस्य प्रागभावरूपस्यासाध्यत्वात्, चित्तनिवृत्तेरनुदेश्यत्वाच्च ।

'आत्महानं मुक्तिः' इति पापिष्ठमतमपि विष्टमेव, वीतरागजन्मादर्शनन्यायेन नित्यतया सिद्धस्यात्मनः सर्वथा हातुमशक्यत्वात्, आत्महानस्यानुदेश्यत्वाच्च ।

'नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिः' इति तौतातितमतमपि नातिचतुरस्रम्, एकान्ततः सुखस्य नित्यत्वे संसारदशायामपि तदभिव्यक्तिप्रसङ्गात्, सुखमात्रस्य स्वगोचरसाक्षात्कारजनकत्वनियमात्, तज्ज्ञानस्याप्यभिव्यक्तिरूपस्य नित्यत्वात्, "नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुत्या ज्ञान-सुखयोरभेदबोधनात् । अनित्यज्ञानरूपतदभिव्यक्तेर्दोषाभावसाध्याया उपगमे तस्या नाशनियमेन मुक्तस्य पुनरावृत्तिप्रसङ्गात्; तदभिव्यक्तिप्रवाहस्य च शरीरादिहेत्वपेक्षां विनाऽनुपपत्तेः । उपपत्तौ वा एकस्या एव तदभिव्यक्तेर्दोषाभावजन्यायाः, सुखस्य च तादृशस्य तावद्दूरमवस्थानौचित्यात् । एतेन 'अविद्यानिवृत्तौ विज्ञान-सुखात्मकः केवल आत्मैवापवर्गः' इति वेदान्तिमतमपि निरस्तम्, ज्ञानसुखात्मकब्रह्मणो नित्यत्वे मुक्त-संसारिणोर-

१ स्वातन्त्र्यस्य तदाऽनुकर्षः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषापातात्, अविद्याया असत्त्वेन नित्यनिवृत्तत्वाच्चेति दिग्। 'परः' इत्यनेन ज्ञान-क्रिययोः समुच्चयेन मोक्षोपायत्वं सूचितम्। विवेचयिष्यते चात्र नयमतभेदविचारः स्वयमेव ग्रन्थकृतोपरिष्टात्।

ये तु ज्ञानदुर्नयावलम्बिन औपनिषदाः 'ज्ञानमेव मोक्षोपायः, तच्च साक्षिणि कल्पितम्, साक्ष्यमनृतत्वाद् नास्त्येव, साक्ष्येव तु परमार्थसत्, इति विचाररूपम्, योगस्तु चित्तदोषनिराकरणेनान्यथा सिद्धः' इति प्रतिजानते; तेषामुत्पन्नमात्र एव तत्त्वज्ञाने संसारोच्छेदापत्तिः। न च प्रारब्धस्याज्ञाननिवृत्तौ प्रतिबन्धकत्वाद् नायं दोष इति सांप्रतम्; अज्ञाननिवर्तकस्वभावस्य तत्त्वज्ञानस्य तन्निवृत्तौ प्रतिबन्धककृतविलम्बायोगात्। न हि शुक्तितत्त्वज्ञानेन रजतभ्रमे निवर्तनीये प्रतिबन्धककृतविलम्बो दृश्यते। दृश्यत एव 'पीतः शङ्खः' इत्यादौ श्वैत्यानुमित्यादावपि पित्तकृतः पीतत्वभ्रमनिवृत्तिविलम्ब इति चेत्। तथापि साक्षात्कारिभ्रमनिवृत्तौ तत्त्वसाक्षात्कारे सति प्रतिबन्धककृतो विलम्बो न दृश्यत एव। न च पराभिमतं भावरूपमज्ञानमेवास्ति, इति किं तत्त्वज्ञानेन निवर्तनीयम्?।

किञ्च, प्रारब्धस्य प्रतिबन्धकत्वं न कारणीभूताभावप्रतियोगित्वम्, अभावस्य तुच्छत्वेन परैः कारणत्वानभ्युपगमात्, किन्तु कार्यानुकूलशक्तिविघटकत्वम्। विघटनं च नाशः कुण्ठनं वेत्यन्यदेतत्। न चैकस्यैव ज्ञानस्य मुक्तिपर्यन्तमवस्थानम्, इत्यन्तिमतत्त्वज्ञान एव तच्छक्तिः कल्प्या, अनन्तशक्तिनाश-कुण्ठनादिकल्पने गौरवात्, अन्यथेदानींतनतत्त्वज्ञानेऽपि तत्कल्पनं दुर्निवारं स्यादिति गतं प्रारब्धप्रतिबन्धकत्वेन। इत्थमेव स्वीकारे च प्राच्यज्ञानवत् प्राच्यकर्मणोऽप्यन्तिमतत्त्वज्ञानो-

१ ख. ग. घ. च. 'स्य तन्नि'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पकारकतया समप्राधान्यमेव, आगमेऽध्यात्मदर्शनस्येव सम्यक्क्रियाया अपि मुक्तिहेतुत्वं सिद्धमेव। सूक्ष्मेक्षणेन तत्र प्रयोजकत्वविश्रामोऽप्युभयत्र तुल्यः। अन्तिमज्ञानक्षण इवान्तिमपुरुषव्यापारक्षणेऽपि मुक्तिजननी शक्तिस्तुल्येति विवेकः।

येऽपि पातञ्जला योगपदाभिधेयां सम्यक्क्रियामेव मोक्षहेतुत्वेनोपयन्ति, परमार्थभूतस्य चित्तस्यादर्शनेन साक्षिदर्शने निरोधातिरिक्तोपायाभावादिति; तेऽपि भ्रान्ताः, सर्वज्ञस्य चित्तदर्शनार्थं समाधिव्यापारायोगात्, अन्यथा सर्वज्ञस्वभावपरित्यागादचेतनादविशेषापत्तेः। अथ निस्तरङ्गमहोदधिकल्पो ह्यात्मा, तत्तरङ्गकल्पाश्च महदादिपवनयोगतो वृत्तय इति तन्निराकरणेनैवात्मनः स्वरूपप्रतिष्ठेति चेत्। न, आत्मनः प्राक् तद-ऽतत्स्वभावत्वयोरनुष्ठानवैयर्थ्यात्, विषयग्रहणपरिणामरूपाकारसंपृक्तज्ञानस्य मुक्तावप्यनपायाच्च। तस्माद् न चित्तदर्शनार्थं योगिनां समाधौ व्यापारः, किन्तु चित्तपृथक्करणार्थमेव। तत्र च क्रियाया इव ज्ञानस्यापि हेतुत्वमव्याहतमेव। केवलाभोगपूर्वक एव हि योगनिरोधव्यापार इति विभावनीयम्।

इत्थं च यदुक्तं वशिष्ठेन—

"द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव!। योगश्चित्तनिरोधो हि ज्ञानं सम्यगवेक्षणम् ॥ १ ॥" इति।

तदपि ज्ञान-कर्मसमुच्चयमनुरुणद्धि।

यत्तु 'अयमस्याभिप्राय उन्नीयते मधुसूदनेन— 'प्रथमः प्रकारः प्रपञ्चसत्यत्ववादिनाम्, द्वितीयस्त्वद्वैतवादिनाम्' इति, अत एवोक्तं तेनैव—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

“असाध्यः कस्यचिद् योगः कस्यचिद् तत्त्वनिश्चयः । मकारौ द्वौ ततो देवो जगाद परमः शिवः ॥१॥” ' इति ।

तत्तु वादद्वयस्य वास्तवत्वं शिवस्योभयपथभ्रान्तिजनकत्वेन प्रतारकतां व्यञ्जयतीति न किञ्चिदेतत् । न ह्यनेकान्ताश्रयणं विना नयमतभेदादिकं संगच्छत इति ।

केचित्तु ज्ञान-कर्मणोस्तुल्य(त्व)वत् समुच्चयमपि स्वीकुर्वन्ति, तथाच भास्करीयाः–'तीर्थविशेषस्नान-यम-नियमादीनां तावद् निःश्रेयसकारणत्वं शब्दबलादेवावगम्यते । तत्र तत्त्वज्ञानव्यापारकत्वं न शाब्दम्, न वान्यथानुपपत्त्या, तत्त्वज्ञानस्यापि व्यवहितस्यादृष्टद्वारकत्वावश्यकत्वेऽत्राप्यदृष्टस्यैव द्वारत्वौचित्यात्, ज्ञानिनामपि यमादावधिकारानपायाच्च । श्रुतिरपि “अन्धं तमः प्रविशन्ति ये विद्यामुपासते, ततो भूय इव ते तमो य उ विद्यायां रताः” तथा “विद्यां चाविद्यां च” इत्यादिः “तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय” इति तु तत्त्वज्ञानस्यापवर्गसामग्रीनिवेशनियमपरम्, न तु वाक्यान्तरावधृतकारणव्युदासार्थम् । कर्मणां समुच्चयश्चात्र स्वस्वाश्रमविहितानां साधारणानां यमादीनाम्, असाधारणानामपि यज्ञादीनामीश्वरार्पणबुद्ध्या विहितानामिति न यावत्कर्मसमुच्चयानुपपत्तिदोषः' इति । तेऽपि बाह्याः परमार्थावेदिनः, न हि कर्मणो ज्ञानस्य वाऽदृष्टद्वारा मोक्षजनकत्वमस्ति, कर्मद्रव्यरूपस्य तस्य संसारार्जकत्वात् । द्रव्यरूपता च तस्य 'चेतनस्य स्व-परज्ञस्य तदात्मनो हीनमातृगर्भस्थानप्रवेशस्तत्संबद्धान्यनिमित्तः, अनन्यनेयत्वे सति तत्प्रवेशा(श)त्, मत्तस्याशुचिस्थानप्रवेशात्' इत्यादिना सिद्धा ।

यत्तु गृहान्तरानुप्रवेशवद् देहाद् देहान्तरानुप्रवेशस्याभिलाषपूर्वकत्वादनन्यथासिद्धो हेतुर्न द्रव्यविशेषसाधकः, तदुक्तम्–

---

१ तस्य– अदृष्टस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"[1]दुःखे विपर्यासमतिस्तृष्णा वाऽवन्ध्यकारणम् । जन्मिनो यस्य ते न स्तो न स जन्माधिगच्छति ॥१॥"

इति सौगताकूतम् । तदसत्, प्रेत्य हीनशुन्यादिगर्भेऽभिलाषासंभवात् । एवं चात्मप्रदेशात् कर्मप्रदेशानां पृथक्करणरूपया निर्जरयैव व्यापारवत्त्वं कर्मणो ज्ञानस्य वा, न तु कर्मणा परेषामपि 'धर्मेण पापमपनुदति' इत्याद्येतदर्थावेदकम् ।

येऽप्याहुरुदयनमतानुसारिणः– 'कर्मणा यावदनुकूलोपसंहारकेण तत्त्वज्ञानमुपसंहृत्यैव मोक्षो जननीयः' इत्यावश्यकत्वात् तत्त्वज्ञानमेव कर्मणां द्वारम् । अनुमानमपि– तीर्थविशेषस्नानादीनि तत्त्वज्ञानद्वारकाणि, मोक्षजनककर्मत्वात्, यमादिवत् । न चात्र योगत्वमुपाधिः, "कथयति भगवानिहान्तकाले भवभयकातरतारकं प्रबोधम्" इत्यादिपुराणात्; "रुद्रस्तारकं व्याचष्टे" इत्यादिश्रुतेश्च तत्त्वज्ञानद्वारा मुक्तिजनके वाराणसीप्रायणादौ साध्याव्यापकत्वात् । तेषां च कर्मणां सत्त्वशुद्धिद्वारा तत्त्वज्ञानहेतुत्वम् । कार्यविशेषाच्च न व्यभिचारः । श्रुतिरपि तत्त्वज्ञान-कर्मणोः कारणतामात्रं बोधयति, न तु तुल्यकक्षतया समुच्चयम्' इति तेऽपि भ्रान्ताः, हिंसामिश्रितानां स्नानादीनामीश्वरार्पणबुद्ध्यादिना सत्त्वशुद्धिद्वारा तत्त्वज्ञानाहेतुत्वात्; अन्यथा ब्रह्महत्या-श्येनयागादीनामपि तद्बुद्ध्या क्रियमाणानां तथात्वप्रसङ्गात्, वाराणसीप्रायणादेरपि नियमतः सत्त्वशुद्ध्यभावात्, बहूनामपि तत्र म्रियमाणानां रौद्रध्यानादिलिङ्गोपलम्भात्, तत उपदेशेन ज्ञानकल्पने मानाभावात्; अन्यथा तदुपदेशस्यान्येनापि संनिहितश्रोत्रेण श्रवणप्रसङ्गात्, तदेकश्रवणयोग्योपदेशे श्रद्धामात्रात्, तत्त्वज्ञानप्रतिबन्धकादृष्टनाशककर्मणां मोक्षे जनयितव्ये तत्त्वज्ञानद्वारकत्ववत् तत्त्वज्ञानस्यापि मुक्तिप्रतिबन्धकप्रारब्धनाशकयोगिप्रयत्नविशेषकर्मद्वारक-

१ ख. ग. घ. च. 'दुःखवि' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वसाम्याच्च। अन्तिमतत्त्वज्ञानमेव मुक्तिहेतुरिति न तत्र कर्मद्वारकत्वमिति चेत्। तर्हि अन्तिमकर्मैव तत्त्वज्ञानजनकमस्तु, इति का तत्र सत्त्वशुद्धिद्वारकत्वप्रतिज्ञा?। अन्तिमं कर्मैव च मुक्तिहेतुः, न त्वत्र तत्त्वज्ञानद्वारकत्वमित्यपि च न दुर्वचम्। केवलज्ञानमनुवृत्तं ब्रुवतां किं कर्मव्यापारकत्वव्यसनेन? इति चेत्। अनभिज्ञोऽसि, न हि वयं कर्मणामपि भावतश्चारित्ररूपेणानुवृत्ततां न ब्रूमः, उत्तरोत्तरविशुद्ध्याऽविशुद्धपर्यायापगमेऽपि पर्यायवतोऽनपगमात्। युक्तं चैतत्, इत्थमेव ज्ञान-मुक्त्यादावनुगतहेतुहेतुमद्भावादिव्यवहारोपपत्तेः, बाह्यकर्मणां तदभिव्यञ्जकतयैवोपयोगात्, इदमेव भावतः सत्त्वशुद्धिः, कर्मापगमस्तु द्रव्यतः; तदाहुः—

"यः कर्मपुद्गलादानच्छेदः स द्रव्यसंवरः। भवहेतुक्रियात्यागः स पुनर्भावसंवरः॥ १॥" इति दिग्।

एतेन ' "न कर्मणा न प्रजया धनेन नान्यः पन्था विद्यतेऽयनाय, नास्त्यकृतः कृतेन"

"कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते। तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः॥ १॥"

इत्यादि-श्रुति-स्मृतिशतेन कर्मणां निषेधात्, "तपसा कल्मषं हन्ति" इत्यादिना तत्त्वज्ञानोत्पत्तिप्रतिबन्धकदुरितनिवृत्त्यैवान्यथासिद्धिप्रदर्शनात्, यागकारणताग्रहोत्तरकल्प्येनापूर्वेणोपजीव्य विरोधेन यागान्यथासिद्ध्यभावेऽपि प्रतिबन्धकाभावस्य कार्यमात्रकारणतायाः प्रागेवावधारणात् तेन कर्मणोऽन्यथासिद्धेः सुवचत्वात्; मङ्गल-कारीर्योरिव वृष्टि-समाप्त्योर्न कर्मणां मुक्तिहेतुत्वम्, किन्तु ज्ञानस्यैव, "ज्ञानादेव तु कैवल्यम्" "तमेव विदित्वाऽतिमृत्युमेति" "तरति शोकमात्मवित्"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"ब्रह्मविदाप्नोति परं ब्रह्मैव भवति" इत्यादिश्रुति-स्मृतिशतस्वरसादनन्यथासिद्धत्वाच्च' इति नव्यमतमप्यपास्तम्; प्रतिबन्धकाभावस्यापि तुच्छरूपस्यासिद्धेः, भावशुद्धिरूपस्य च चारित्ररूपाक्रियापर्यवसायित्वात्, ज्ञान-कर्मभ्यां द्वाभ्यामपि तत्र तत्र मुक्त्युत्पत्त्यभिधानाविशेषेऽप्येकत्रानन्यथासिद्धत्वपरित्यागेन नियतपूर्ववर्तित्वमात्रार्थादरस्यान्यत्राप्यविशेषात्, नियतपूर्ववर्तितावच्छेदकेन येन रूपेण कारणत्वं न व्यवह्रियते तेन रूपेणान्यथासिद्धत्वस्य व्यवहारनयेनैव निश्चयनयेनाप्यव्यवहितपूर्ववर्तितानवच्छेदकरूपेणान्यथासिद्धेरभ्युपगमादित्यन्यत्र विस्तरः। तस्माद् गुरुमनुसृतस्याशठभावस्य दर्शन-ज्ञान-चारित्राण्येव परो मोक्षोपायः, एकवैकल्येऽपि फलासिद्धेरिति व्यवस्थितम्।

अत्र केचन दिगम्बरडिम्भास्तर्ककर्कशमिदं निगदन्ति। हन्त ! दन्तिन इवातिमदान्धा अङ्कुशं गुरुमनादृतवन्तः ॥१॥

चेत् त्रयं शिवपथः श्लथ एव प्रेक्ष्यतेऽत्र भवतामभिलाषः। वाससा चरणहानिमुपेता न त्रयं सितपटा घटयन्ति ॥२॥

तथाहि– रागाद्यपचयनिमित्तनैर्ग्रन्थ्यविपक्षभूतत्वेन तदुपचयहेतुवस्त्रादिकग्रहणं विशिष्टशृङ्गारानुषक्ताङ्गनाङ्गसङ्गादिवत् कथं न मुक्तिप्रतिकूलम् ?। कथं च द्रव्यतः, क्षेत्रतः, कालतः, भावतो वा कृतपरिग्रहप्रत्याख्यानस्य वस्त्रोपादाने न पञ्चममहाव्रतभङ्गः ? । कथं चैवं परद्रव्यरतिसाम्राज्ये स्वात्मप्रतिबन्धमात्रविश्रान्तश्रामण्यसमृद्धिः ?। कथं च न तस्करादिभ्यो वस्त्रादेः संगोपनानुसंधानेन संरक्षणानुबन्धिरौद्रध्यानावकाशः ?। कथं चैवमाचेलक्यपरीषहविजयः कृतः स्यात् ?। न हि सचेलकत्वमचेलकत्वं च न विरुद्धमिति । यदि च सचेलत्वमप्याचेलक्यमूलगुणावगुण्ठितश्रामण्यं न विरुन्ध्यात्, तदा कथं जिनेन्द्र-जिनकल्पिकादयः परमश्रमणा अचेला एव श्रुते प्रसिद्धाः ?। असंगतार्थमेव हि ते वस्त्रादिकं परित्यक्तवन्तः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति तद्विनेया अपि तल्लिङ्गानुकारिण एवाचिताः । ततो न सितपटा महाव्रतपरिणामवन्तः, तत्फलसाधका वा, वस्त्र-पात्रादिपरिग्रहयोगित्वात्, महारम्भग्रहस्थवदिति चेत् । अत्र ब्रूमः—

दिक्पटाः सितपटैः सह सिंहैर्वारणा अपि रणाय न सज्जाः ।
दर्शयन्तु वदनानि कथं ही ! तेन ते परिगलन्निजलज्जाः ? ॥ १ ॥

तथाहि– यत् तावद् रागाद्यपचयनिमित्तनैर्ग्रन्थ्यविपक्षभूतत्वेन तदुपचयहेतुत्वं वस्त्रादेरुक्तम्, तत्र नैर्ग्रन्थ्यं सर्वतो देशतो वोपात्तम् ? । आद्ये, अष्टविधकर्मसंबन्धरूपग्रन्थात्यान्तिकाभावरूपस्य तस्य मुक्तेष्वेव संभवात् कथं तस्य रागाद्यपचयहेतुता ? । न हि तदा रागादिकमेवास्ति, इति किं तेनापचेयम् ? इति विशेषणासिद्धो हेतुः । द्वितीयेऽपि किं सम्यग्ज्ञानादितारतम्येनोपचीयमानं भावनैर्ग्रन्थ्यं विवक्षितम्, आहोस्विद् बाह्यवस्त्राद्यभावरूपम् ?। आद्ये तथाभूतसम्यग्ज्ञानादिविपक्षत्वेन वस्त्रादिग्रहणस्यासिद्धेर्हेतोर्विशेष्यासिद्धता । द्वितीये वस्त्राद्यभावस्य रागाद्यपचयनिमित्तताऽसिद्धेर्हेतोर्विशेषणासिद्धता । न च वस्त्राद्यभावो रागाद्यपचयनिमित्तत्वेन सिद्ध एवेति वाच्यम्, अतिशयितरागवद्भिः पारापतादिभिर्व्यभिचारात् । न च 'पुरुषत्वे सति' इति विशेषणीयम्, वस्त्रविकलैरनार्यदेशोत्पन्नैर्व्यभिचारात् । न च 'आर्यदेशोत्पन्नपुरुषत्वे सति' इति विशेषणाद् न दोष इति वाच्यम्; तथाभूतकामुकपुरुषैर्व्यभिचारात् । न च 'व्रतधारितथाभूतपुरुषत्वे सति' इति विशेषणाद् न दोषः, तथाभूतपाशुपतैर्व्यभिचारात् । न च 'जैनशासनप्रतिपत्तिमत्तथाभूतपुरुषत्वे सति' इति विशेषणोपादानाद् न दोषः, उन्मत्तदिगम्बरैर्व्यभिचारात् । न च 'अनुन्मत्तत्वे सति' इत्यपि विशेषणीयम्; मिथ्यात्वोपेतद्रव्यलिङ्गावलम्बिदिग्वाससा ऽय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिचारात् । न च सम्यग्दर्शनादिसमन्वितपुरुषत्वे सति वस्त्राभावो हेतुः, विशेषणस्यैव तत्र समर्थत्वेनासमर्थविशेष्यत्वात् । किञ्च, वस्त्रादिधर्मोपकरणाभावे यतियोग्याहारविरह इव विशिष्टश्रुत-संहननविकलानामेतत्कालभाविपुरुषाणां विशिष्टशरीर-स्थितेरेवाभावाद् न सम्यग्दर्शनादिसमन्वितत्वविशेषणोपपत्तिरिति विशेष्यसद्भाव एव विशेषणसद्भावं बाधते ।

अथ वस्त्रादिपरिग्रहस्तृष्णापूर्वकः, तद्विषयकग्रहण-मोचनादिप्रक्रमस्य तां विनानुपपत्तेः । अत एव परप्राणव्यपरो-पणस्याशुद्धोपयोगसद्भावा-ऽसद्भावाभ्यामनैकान्तिकच्छेदत्वेऽप्युपधेरशुद्धोपयोगेनैव परिग्रहसंभवादैकान्तिकच्छेदत्वमाम्नातम् ; तथा च प्रवचनसारकृत्---

"हवदि व ण हवदि बंधो मदेऽध जीवेंधकायचेट्ठम्मि । बंधो धुवमुवधीदो इदि सवणा छड्डिआ सव्वं ॥ १ ॥"[1]

इति । अत एव चैतद्व्याख्याताऽमरचन्द्रोऽप्याह– "न खलु बहिरङ्गसङ्गसद्भावे तुषसद्भावे तण्डुलगताशुद्धत्वस्येवाशुद्धोपयो-गरूपस्यान्तरङ्गच्छेदस्य प्रतिषेधः" इति । तथा च तृष्णाप्रभववस्त्रग्रहणाभावः स्वकारणनिवृत्तिमन्तरेणानुपपद्यमानो रागादिविपक्ष-भूतसम्यग्ज्ञानाद्युत्कर्षविधायकत्वात् कथं तद्भावबाधकत्वेनोपादिश्यते ? इति चेत् । न, साधूनां वस्त्रादिग्रहणस्य प्रासेष्टवस्त्ववियो-गाध्यवसाना-ऽप्राप्ततदभिलाषलक्षणार्तध्यानरूपतृष्णापूर्वकत्वासिद्धेः, कायकृतादान-निक्षेपादिचेष्टावत्, आहारग्रहणवद् वा, यथाविधिधर्मसाधनत्वमत्या साधुभिर्वस्त्रादिग्रहणात् । इत्थं च परप्राणव्यपरोपणस्यानैकान्तिकच्छेदत्वेऽप्युपधेरैकान्तिकच्छेद-त्वभणनं गाढाभिनिवेशगरलपानस्यैवोद्गारः, शुभोपयोगसंभविप्रमार्जनादिव्यापारकधर्मोपकरणस्य शुद्धपिण्डपुष्टशरीरवत् त्रि-

१ भवति वा न भवति बन्धो मतोऽथ जीवेऽन्धकायचेष्टे । बन्धो ध्रुवमुपधित इति श्रमणा अमुञ्चन् सर्वम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोटीपरिशुद्धाहारवद् वा नियमतः संयमोपकारकत्वादेव । 'शुभोपयोगोऽपि शुद्धोपयोगस्य च्छेद एव' इति निश्चयेऽभिनिविशमानस्य तु विना शैलेशीचरमसमयं मुक्त्याद्यसमयं वा न कुत्रापि संयमशुद्धिविश्रामः, शुभोपयोगे सति शुद्धोपयोगानवकाशवत् प्राच्यविशुद्धौ सत्यामप्युत्तरविशुद्ध्यनवकाशात् । न च शुद्धोपयोगरूपमेव चारित्रं सिद्धान्तितम्, किन्तु मूलगुणविषयस्थैर्यपरिणामरूपम्, तदुपकारित्वमेव च वस्त्रादेः, इति कथं तत्सद्भावे तच्छेदः ? ।

इत्थं च 'तुषसद्भावे तण्डुलाशुद्धिवद् वस्त्रादिसद्भावे आत्मनोऽशुद्धिः' इत्यमरचन्द्रोक्तमपि प्रत्युक्तम्, तुष-वस्त्रादेरेकरीत्याऽविशुद्धत्वापादकत्वासिद्धेः । 'तुषस्यापि विलक्षणपक्तिविरोधित्वादिरूपाशुद्धिनियमासिद्धिः, सतुषमुद्गादेः सिद्धिदर्शनात्' इत्यपि वदन्ति । स्यादेतदाहारस्य परिग्रहव्यवहारविषयत्वात् तद्विषयकप्रवृत्तेस्तृष्णापूर्वकत्वेऽपि वस्त्रादेरतथात्वात् तद्विषयिणी प्रवृत्तिस्तृष्णापूर्विकैवेति । मैवम्, परिग्रहव्यवहारविषयप्रवृत्तित्वावच्छिन्नं प्रति तृष्णाया अहेतुत्वात्, अतादृशेऽपि तृणादौ शरीरानुरागार्थं प्रवृत्तेस्तृष्णामूलत्वेन व्यभिचारात्, दुष्टप्रवृत्तित्वावच्छिन्नं प्रत्येव तद्धेतुत्वात् । न च तथापि ग्रन्थव्यवहारविषयवस्त्रादिपरिग्रहे यतीनां निर्ग्रन्थत्वव्यवहारभङ्गः, विभूषादिचिह्नेन मूर्च्छोपात्तत्वनिश्चय एव व्युत्पन्नानां ग्रन्थव्यवहारात्, अव्युत्पन्नव्यवहारस्य चाप्रयोजकत्वात् । सर्वथा ग्रन्थत्वमग्रन्थत्वं च न क्वचनापि व्यवस्थितम्, कनक-कामिन्योरपि विषघातनबुद्ध्या, धर्मान्तेवासिनीबुद्ध्या च परिगृह्यमाणयोर्ग्रन्थत्वासिद्धेः । तदाह भाष्यकारः—

"आहारो व्व ण गंथो देहट्ठं ति विसघायणट्ठाए । कणगं पि तहा जुवई धम्मंतेवासिणी मि त्ति ॥ १ ॥

---

१ सप्तम्यन्तम् । २ आहार इव न ग्रन्थो देहार्थमिति विषघातनार्थतया । कनकमपि तथा युवतिर्धर्मान्तेवासिनी ममेति ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तम्हा किमत्थि वत्थुं गंथोऽगंथो व्व सव्वहा लोए ?[1] । गंथोऽगंथो व्व मओ मुच्छमुच्छाइणिच्छयओ॥ २ ॥
वत्थाइं तेण जं जं संजमसाहणमराग-दोसस्स । तं तमपरिग्गहो चिय परिग्गहो जं तदुवघाई[2] ॥ ३ ॥" इति ।

एवं च 'वस्त्रादिकं ग्रन्थः, मूर्च्छाहेतुत्वात्, कनकादिवत्' इत्यनुमानमपि जाल्मानां परेषां प्रतिक्षिप्तम्; ग्रन्थत्वं यदि मूर्च्छाहेतुत्वम्, तदा हेतोः साध्याविशेषात्; यदि च ग्रन्थव्यवहारविषयत्वम्, तदा व्यवहारस्य लौकिकस्योपादाने तृणादौ व्यभिचारात्, अलौकिकस्य चोपादाने बाधात्, दृष्टान्तस्य साध्यवैकल्याच्च ।

अथ क्रय-पितृमरण-प्रतिग्रहादिजन्यं स्वत्वं धन-वस्त्रादौ पर्यायविशेषरूपं विक्रयादिविनाश्यमेवश्यमभ्युपेयम्[3], अन्यथा स्व-परविभागाभावे स्तेया-ऽस्तेयादिव्यवस्थोत्सीदेत् । न च स्वमूर्च्छाविषयत्वमेव स्वत्वम्, परकीयेऽपि स्वमूर्च्छाविषये दीयमाने प्रत्यवायाप्रसङ्गात् । न च क्रयाद्युपायविषयत्वम्, तत्क्रयादीनामिच्छाविशेषरूपतया क्रीतादौ तद्विषयत्वसंभवेऽपि पितृमरणादेर्निर्विषयत्वेन पैतृकादौ तदनुपपत्तेः, क्रयादेः स्वत्वगर्भत्वाच्च । न च शास्त्रानिषिद्धविनियोगोपाययोग्यत्वम्, यावदुपायव्यतिरेके विनियोगे प्रत्यवायस्तावदन्यतमत्वं वा तत्, प्रत्यवायप्रतिपादकस्य शास्त्रस्य "परस्वं नाददीत" इत्यादेः स्वत्वानवगमे-

---

१ तस्मात् किमस्ति वस्तु ग्रन्थोऽग्रन्थो वा सर्वथा लोके ? । ग्रन्थोऽग्रन्थो वा मतो मूर्च्छा-ऽमूर्च्छादिनिश्चयतः ॥ २ ॥
वस्त्रादि तेन यद् यत् संयमसाधनमराग-द्वेषस्य । तत् तदपरिग्रह एव परिग्रहो यत् तदुपघाती ॥ ३ ॥
२ विशेषावश्यकमहाभाष्येऽष्टमनिह्नवप्रकरणे गाथा २३,२४,२५ । ३ क. 'मभ्यु' । ४ क. 'यादि' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽप्रतीतेः । न च क्वचिद् विक्रयप्रागभावविशिष्टः क्रयविनाशः, क्वचिद् दानादिप्रागभावविशिष्टः प्रतिग्रहध्वंसश्चेत्येवमननुगतं स्वत्वं वाच्यम्; अनुगतव्यवहारोच्छेदात्; अतिरिक्तधर्मेण तावदनुगमे चातिरिक्तस्वत्वपर्यायस्यैव वक्तुमुचितत्वात् । तथा च स्वनिरूपितस्वत्ववत्त्वेनैव वस्त्रादेः कनकादिवद् ग्रन्थत्वं व्यवतिष्ठत इति चेत् । न, यतिप्रतिगृहीतवस्त्रादौ धर्म्यविनियोग्यतारूपस्यातृष्णामूलस्य स्वाश्रयभिन्नाभिन्नस्य स्वत्वपर्यायस्य सत्त्वेऽपि ग्रन्थव्यवहारनिबन्धनतृष्णामूलप्रतिग्रहादिजन्यस्वत्वपर्यायाभावात् । अत एव 'स्वपरिभोग्यमिदं वस्त्रादि' इति यतीनां भाषा, न तु 'स्वमेवेदम्' इति । न चेदेवम्, आहारेणापि स्वीयेनैव साधर्मिकं प्रति दानाद्युपग्रहसंभवाद् धर्मलाभपूर्वकप्रतिग्रहेण तत्र स्वत्वोत्पत्तेश्च कथं नाहारस्यापि ग्रन्थत्वम् ? । एतेन 'स्वाभेदभ्रमबलोपनीतस्वत्वाश्रयवस्त्रादिसत्त्वे कथमात्मस्वरूपभावना ?' इत्यप्यपास्तम्, स्वाभेदभ्रमस्य सम्यग्दर्शनेनैव नाशात्, अन्यथाऽऽहारकालेऽपि कथं सुसाधूनां तत्साम्राज्यम् ? ।

अथ संयतस्य सकलकालमेव सकलपुद्गलाहरणशून्यमात्मानमवबुध्यमानस्य सकलाशनतृष्णाशून्यतयाऽन्तरङ्गतपःस्वरूपानशनस्वभावभावनासिद्धयै[1] एषणादोषशून्यान्यभैक्ष्याचरणेऽपि साक्षादनाहारता; तदुक्तं प्रवचनसारे—

"जेस्स[2] अणेसणमप्पा तं पि तओ तप्पडिच्छगा समणा । अण्णं भिक्खमणेसणमध ते समणा अणाहारा ॥१॥"

इति चेत् । नन्वेवमस्य सर्वकालमेव सकलद्रव्यपरिग्रहशून्यमात्मानमवबुध्यमानस्य सकलमूर्च्छारहिततयाऽन्तरङ्गतपःस्वरूपापरिग्रहस्वभावभावनाप्रसिद्धये दोषशून्यमुपकरणं प्रतिगृह्णतोऽपि कुतो न साक्षादपरिग्रहता ? ।

---

१ चतुर्थ्यन्तम् । २ यस्यानेषणमात्मा तदपि ततस्तत्प्रतीच्छकाः श्रमणाः । अन्यद् भैक्ष्यमनेषणमथ ते श्रमणा अनाहाराः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ये तु मूढाः संगिरन्ते– 'असहिष्णोराहारकालेऽपि प्रमादसद्भावाद् न यथावदात्मभावना, वस्त्रादेस्तु सर्वदा संनिधाने सर्वदा प्रमादोदयाद् महदनिष्टम्' इति; ते समयलेशमपि न ज्ञातवन्तः, प्रमत्तगुणस्थानवर्तिनामपि शुभयोगं प्रतीत्यात्मानारम्भत्वादिप्रतिपादनात्, विधिना भुञ्जानस्य प्रमादाभावात्, प्रमादोपलक्षिताध्यवसायविशेषस्यैव प्रमत्तगुणस्थानपदप्रवृत्तिनिमित्तत्वात्। शश्वद्वस्त्रादिसंनिधानेन प्रमादोदये शश्वदतिसंनिहितेन कायेनापि तदुदये तदनुच्छेदप्रसङ्गात्। एतेन 'शश्वत् परद्रव्यसंनिधाने तद्दर्शनादात्मदर्शनप्रतिरोधः' इत्यपि प्रलपितं निरस्तम्, कायेऽप्यस्य समानत्वात्। कायदर्शनं प्रतियोगिज्ञानीभूय ध्यानिनः स्वभिन्नत्वज्ञानोपकार्येवेति चेत्। वस्त्रादिदर्शनमपि किं न तथा, अपेक्षाकारणानां प्रधानकारणायत्तत्वात् "[1]जे जित्तिआ य हेऊ भवस्स ते तित्तिया य मुक्खस्स" इति वचनप्रामाण्यात्।

अथ तनुर्महतामपि दुस्त्यजा ननु तदर्थमपीह भुजिक्रिया।
इति ततो महतां न पथक्षतिर्भवति यद्बलतः सकला स्थितिः ॥ १ ॥
शृणु गुणान् वहतां सुकृतस्पृशां किमुपधेर्बत दुस्त्यजताऽपि न [2]।
अभिनिवेशमपास्य विमृश्यतामिदमुदीरितमुज्ज्वलभावतः ॥ २ ॥
दीर्घदेहस्थितेर्हेतोराहारो दुस्त्यजो यथा। तथोपकरणं, धाष्ट्र्यमुभयत्र समोक्तिकम् ॥ ३ ॥
क्षुत्पीडितार्तिध्यानस्य यथा ह्यशनमौषधम्। तथा शीतादिभीतानामपि वस्त्रादिसेवनम् ॥ ४ ॥

१ ये यावन्तश्च हेतवो भवस्य ते तावन्तश्च मोक्षस्य। २ कँ. 'गुणावहता' ख. ग. घ. च. 'गुणवहता'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कामिनीविरहसंभवदुष्टध्यानसंततिमपासितुमेवम् ।
कामिनीमपि न किं कमनीयां स्वीकुरुध्वमिति चेत्, सममेतत् ॥ ५ ॥
अन्यथा पलभुजो न कुतः स्युर्दिक्पटा उचितपिण्डभुजश्चेत् ।
प्रत्युत प्रकटतामसवृत्तेर्भावनं तत इहापि समानम् ॥ ६ ॥
सङ्गमङ्ग ! समवाप्य तरुण्याः कस्य नाम न मनः कलुषं स्यात् ? ।
निर्मलान्यपि जलानि न किं स्युः पङ्कसंकरवशाद् मलिनानि ? ॥ ७ ॥
व्याधयोऽरसभुवो विषवल्ल्योऽभूमिका अशनयोऽगगनोत्थाः ।
मूर्तिमत्य इव मारणविद्याः किं न ता निगदिताः श्रुतवृद्धैः ? ॥ ८ ॥

तस्माद् विहिताहारवद् विहितस्योपकरणस्यापि दुर्ध्यानहति-शुभध्यानोत्पत्तिहेतुत्वाद् युक्तं यतीनां तत्परिशीलनम् । विधिश्चात्र– "[3]तिहिं ठाणेहिं वत्थं धरेज्जा, हिरिवत्तियं दुगंछावत्तियं, परीसहवत्तियं" तथा—

"[4]जं पि वत्थं च पायं वा कंबलं पायपुंछणं । तं पि संजमलज्जट्ठा धारंति पहरंति अ ॥ १ ॥" इत्यादि ।

अत्र चादग्धदहनन्यायेन यावदप्राप्तं तावद् विधेयम्, इति वस्त्रधरणस्य लोकत एव प्राप्तत्वाद् ह्री-कुत्सा-परीषहनिमित्तं

---

१ क. 'नरहितशु' । २ तच्छब्देन तरुणीपरामर्शः । ३ त्रिभिः स्थानैर्वस्त्रं धारयेत्, ह्रीप्रत्ययम्, जुगुप्साप्रत्ययम्, परीषहप्रत्ययम् ।
४ यदपि वस्त्रं च पात्रं वा कम्बलं पादप्रोञ्छनम् । तदपि संयमलज्जार्थं धारयन्ति परिदधति च ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्ग्रहणं नियम्यते। तत्र च निमित्तत्रयमपि जिनकल्पायोग्यानां निरतिशयानामधिकारिणामावश्यकम्। अथवा, ह्रीपदार्थः संयमलज्जा, सैव मुख्यं निमित्तम्, इतरत्तु द्वयं तदुपकारि निमित्तम्, तदुक्तं भाष्यकृता—

"[1]विहियं सुए च्चिय जओ धरेज्ज तिहिं कारणेहिं वत्थं ति। तेणं चिय तदवस्सं णिरतिसएणं धरेअव्वं ॥ १ ॥
जिणकप्पाजोग्गाणं ही-कुच्छ-परीसहा जओऽवस्सं। ही लज्ज त्ति व सो संजमो तयत्थं विसेसेणं[2] ॥ २ ॥ ॥" इति।

यदि च नैमित्तिकत्वाद् वस्त्रादिग्रहणमयुक्तमित्युद्भाव्यते, तदाऽऽहारग्रहणमप्ययुक्तं स्यात्, तस्यापि नैमित्तिकत्वात्; तदुक्तं स्थानाङ्गे– "[3]छहिं ठाणेहिं समणे णिग्गंथे आहारमाहारेमाणे णाइक्कमइ, तं जहा, वेअण, वेयावच्चे, इरिअट्ठाए, तह पाणवत्तिआए, छट्ठं पुण धम्मचिंताए" इति।

अथ ज्ञानादिपुष्टालम्बनेनादुष्टाहारग्रहणे न दोषः, वस्त्रादेस्तु मलादिदिग्धस्य यूकादिसंमूर्च्छनानेकसत्त्वहेतुतया तद्ग्रहणे तद्व्यापत्तेरवश्यंभावात् तद्ग्रहणमपौष्टालम्बनिकत्वाद् न न्याय्यमिति चेत्। न, आहारग्रहणेऽप्यस्य दोषस्य समानत्वात्। संभवन्त्येव ह्यागन्तुकाः संमूर्च्छनजाश्चानेकप्रकारास्तत्र जन्तवः, तत्परिभोगे चावश्यंभावी तेषां विनाशः, भुक्तस्य

१ विहितं श्रुत एव यतो धारयेत् त्रिभिः कारणैर्वस्त्रमिति। तेनैव तदवश्यं निरतिशयेन धारयितव्यम् ॥ १ ॥
जिनकल्पायोग्यानां ह्री-कुत्सा-परीषहा यतोऽवश्यम्। ह्रीर्लज्जेति वा स संयमस्तदर्थं विशेषेण ॥ २ ॥

२ विशेषावश्यकमहाभाष्येऽष्टमनिह्नवप्रकरणे गाथा ५३, ५४। ३ षड्भिः स्थानैः श्रमणा निर्ग्रन्था आहारमाहरन्तो नातिक्रामन्ति, तद्यथा– विनये, वैयावृत्ये, ईर्यार्थम्, संयमार्थम्, तथा प्राणवृत्त्यै, षष्ठं पुनर्धर्मचिन्तया ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च कोष्ठगतस्य संसक्तिमत्त्वात् तदुत्सर्गेऽनेककुम्ध्यादिव्यापत्तिरवश्यंभाविनीति । अथावधानेन तत्परिभोगादिकं विदधतो न सत्त्वव्यापत्तिः, व्यापत्तौ वा शुद्धाशयस्य तद्रक्षादौ यत्नवतो गीतार्थस्य ज्ञानादिपुष्टालम्बनप्रवृत्तेरहिंसकत्वाद् न तद्ग्रहणमन्याय्यमिति चेत् । तुल्यमिदमन्यत्र । अथ वस्त्रादेर्मलदिग्धस्य क्षालनेऽप्कायादिविनाशो वा, कुशिकत्वं वा, क्षालने च संसक्तिदोष इत्युभयतः पाशा रज्जुः, इति न तद्ग्रहणं युक्तमिति चेत् । आहारादिग्रहणेऽपि तुल्यमेतत्, तद्दिग्धस्याऽऽस्यादेः प्रक्षालनादप्कायविनाशात्, अप्रक्षालने च प्रवचनोपघातादिति । प्रासुकोदकादिना यत्नतः प्रक्षालने दोषाभावोऽप्युभयत्र तुल्य इति ।

शुद्धाहारादिव शुद्धोपकरणादनेकगुणसंभवस्तु निरपाय एव; तथाहि– समस्तरात्रिजागरणं कुर्वतां साधूनां तुषारकणगणप्रवर्षिणि शीतकाले यतनया कल्पप्रावरणेन भवति स्वाध्यायनिर्वाहः; तथा, सचित्तपृथिवी-धूमिका-वृष्टि-अवश्याय-रजः-प्रदीपतेजःप्रभृतीनां रक्षापि तैः कृता भवति; तथा, मृताच्छादन-बहिर्नयनाद्यर्थं ग्लानप्राणोपकारार्थं च भवति वस्त्रस्योपयोगः; तथा, संपातिमरजोरेणुप्रमार्जनाद्यर्थं मुखवस्त्रस्य, आदान-निक्षेपादिक्रियायां पूर्वं प्रमार्जनार्थं लिङ्गार्थं च रजोहरणस्य, वाय्वादिनिमित्तविक्रियावल्लिङ्गसंवरणाद्यर्थं च चोलपट्टपटलादेरिति । पात्रग्रहणेऽप्यमी गुणाः; तथाहि– अनाभोगेन गृहीतानां संसक्तगोरसादीनां पात्रेणैव विधिना परिष्ठापनेन रक्षा कृता भवति, अन्यथा तु हस्त एव गृहीतास्ते क धीयेरन् ?; तथा, पात्रं विना करपुटगृहीतसरसद्रववस्तुबिन्दुभिरधःपातिभिः कुन्थु-कीटिकादिजन्तुसंघातनेन, गृहस्थभाजनपरिग्रहे

१ क. ख. ग. घ. च. 'क्रिये' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च भाजनधावनादिपश्चात्कर्मदोषनिवहेन चारित्रशुद्धिः (कथम्)?। कथं वा पात्रमन्तरेणैकत्र भुजिक्रियां हस्त एव विदधतां करेण जलागालने जलगताऽसंख्येयादिसत्त्वव्यापत्तितो महाव्रतधारणोपपत्तिः?। न च प्रतिगृहमोदनस्य भिक्षामात्रस्योपभोगात्, वस्त्रपूतोदकाङ्गीकरणाच्चायमदोषः; तथा प्रवृत्तौ प्रवचनोपघातप्रसक्त्या बोधिबीजोच्छेदात्। न च गृहस्थवाससा पूतमप्युदकं निर्जन्तुकं सर्वं संपद्यते, तज्जन्तूनां सूक्ष्मत्वाद् वस्त्रस्य बाधनत्वात्, गृहिणां तच्छोधनेऽतिशयप्रयत्नानुपपत्तेश्च। न च प्रासुकोदकस्योपभोगादयमदोषः, तत्रापि सत्त्वसंसक्तिसंभवात्; करप्रक्षिप्ते तस्मिन्नप्रत्युपेक्ष्य पानो-ज्झनयोस्तद्व्यापत्तिदोषस्यापरिहार्यत्वात्; पात्रादिग्रहणे तु तत्प्रत्युपेक्षणस्य सुकरत्वाद् व्रतातिचारदोषानुपपत्तेः। न च त्रिवारोद्धृतोष्णोदकस्यैव परिभोगादयमदोषः, तथाभूतस्य प्रतिगृहं तत्कालोपस्थायिनस्तस्याप्राप्तेः, प्राप्तावपि तस्य तृडपनोदाक्षमत्वात्, तद्युक्तस्य चानुत्तमसंहननस्येदानींतनयतेरार्तध्यानानुच्छेदात्, तस्य च दुर्गतिनिबन्धनत्वात्। न च तृडादिदुःखस्य तपोरूपत्वेनाश्रयणीयत्वादयमदोषः, अनशनादेर्बाह्यतपस आन्तरतपउपचयहेतुत्वेनाश्रीयमाणत्वात्, अन्यादृग्भूतस्य चातपस्त्वात्, "से[1] य तवो कायव्वो जेण मणोऽमंगुलं ण चिंतेइ" इत्याद्यागमप्रामाण्यात्।

"बाह्यं तपः परमदुश्चरमाचरध्व-माध्यात्मिकस्य तपसः परिबृंहणार्थम्।"

इति स्तुतिकृताऽप्युक्तत्वाच्च। कथं वा पात्राभावे ग्लान-दुर्बलाद्यर्थं पथ्याद्यनयनादिनोपष्टम्भः?। कथं वाऽन्यस्य भक्त-पानादिप्रदानानुपपत्त्या दानधर्मानुग्रहः?। कथं वाऽलब्धिमतामशक्तानां प्राघूर्णकानां च लब्धिमद्भिः शक्तैर्वास्तव्यै-

१ तच्च तपः कर्तव्यं येन मनोऽमङ्गलं न चिन्तयति।

श्वोपकारानुपपत्त्या न समत्वम् ? इति ।

एतेनैतदु निराकृतं यदुत्प्रेक्षितं परेण– 'साक्षाद्वस्त्रग्रहणस्य न मुक्तिसाधनत्वम्, रत्नत्रयस्यैव साक्षात् तत्साधनत्वात्; नापि परम्परया रत्नत्रयकारणत्वेन तद्ग्रहणस्य रत्नत्रयविरोधित्वात्; निष्परिग्रहत्वविरोधि सपरिग्रहत्वमिति सकललोकप्रसिद्धम्, रूपज्ञानोत्पत्तेस्तम इव; न च रत्नत्रयहेतुशरीरस्थितिकारणत्वेन वस्त्रादिग्रहणं परम्परया मुक्तिसाधनम्, तदन्तरेणापि रत्नत्रयनिमित्तशरीरस्थितिसंभवात्' इति; आहारग्रहणेऽप्यस्य समानत्वेन प्रदर्शितत्वात् । विहिताहारग्रहणकर्मणः, उत्तरगुणरूपतया तन्नान्तरीयकाऽऽज्ञाशुद्धभावविशेषस्यैव वा पारम्पर्येण मुक्तिहेतुत्वे तु वस्त्रादिग्रहणेऽप्येवं वक्तुं शक्यत्वात् । अत एव च 'साक्षात् पारम्पर्येण वा मुक्त्यनुपयोगि वस्त्रादिग्रहणं रागाद्युपचयहेतुः, तत् स्वीकुर्वन् यत्याभासो गृहस्थतां नातिशेते' इत्याद्यपहस्तितम्; आगमोक्तविधिना वस्त्रादिग्रहणस्य हिंसाद्यपायरक्षणनिमित्ततया मुक्तिमार्गसम्यग्ज्ञानाद्युपबृंहकत्वात्, तत्परित्यागस्य त्वर्वाक्कालीयत्वापेक्षया तद्बाधकत्वात् । ततो विशेष्यसद्भावे 'सम्यग्ज्ञानाद्यन्वितत्वे सति' इति विशेषणमसिद्धम्, सति चास्मिन् विशेष्यमसिद्धमिति व्यवस्थितम् । तत्र रागाद्यपचयनिमित्तता परव्यावर्णितस्वरूपनैर्ग्रन्थ्यस्य सिद्धा । अत एव न तद्विपक्षभूतत्वेन वस्त्रादिग्रहणस्य रागाद्यपचयं प्रति गमकत्वम्, तद्विरुद्धेन सम्यग्दर्शनाद्युपचयेन यथोक्तवस्त्रादिग्रहणस्य व्याप्तत्वेन तद्विरुद्धसाधकत्वात् । दृष्टान्तस्यापि परव्यावर्णितनैर्ग्रन्थ्यविपक्षभूतत्वासिद्धेः साधनविकलता; न च यथोक्ताङ्गनासंगमादिरप्युपसर्गसहिष्णोर्वैराग्यभावनावशीकृतचेतसो योगिनो रागाद्यपचयहेतुर्भवति, ईश्वरप्रभृतिषु तस्य तत्प्रक्षयहेतुत्वेन शास्त्रे श्रवणात्, इति साध्यविकलतापि । न च पक्षे हेतुसिद्धिरपि, धर्मोपकरणत्वोपपत्तेरिति न किञ्चिदेतत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदपि 'कथं च द्रव्यतः, क्षेत्रतः, कालतः, भावतो वा कृतपरिग्रहप्रत्याख्यानस्य वस्त्रोपादाने न पञ्चममहाव्रतभङ्गः ?' इत्युक्तम्, तदपि मूर्च्छापरित्यागे भावतः परिग्रहप्रत्याख्यानोपपत्तावपि द्रव्यतः परिग्रहप्रत्याख्यानभङ्गाभिप्रायेण, अयुक्तश्चायमभिप्रायः, कायादिसत्त्वेऽपि तत्प्रत्याख्यानभङ्गप्रसङ्गात्; द्रव्यादिविकल्पैः "से[1] परिग्गहे चउव्विहे पन्नत्ते– दव्वओ, खित्तओ, कालओ, भावओ" इति सूत्रस्य सर्वद्रव्यादिविषयमूर्च्छात्याग एव कर्तव्य इति परमार्थात्, द्रव्यादिपरिग्रहस्य नामादिपरिग्रहवदनात्मधर्मत्वेन प्रत्याख्यातुमशक्यत्वात्; तथा च भगवान् महाभाष्यकारः—

"[2]अपरिग्गहया सुत्ते त्ति जा य, मुच्छा परिग्गहोऽभिमओ। सव्वद्व्वेसु ण सा कायव्वा सुत्तसब्भावो[3] ॥१॥" इति।

एतेन द्रव्य-भावपरिणतिभेदकल्पनापि परिग्रहाश्रवे केषाञ्चिदपास्ता, अतिक्रमा-ऽनाचारादिरूपयोरपकर्षो-त्कर्षयोर्भावाश्रवधर्मत्वादेव, तत्र चानाभोगा-ऽऽभोगादिरूपस्यात्मधर्मस्यैव विशिष्य नियामकत्वात्, द्रव्यादिपरिणतेः क्षेत्रादिपरिणतेरिव तत्र वक्तुमशक्यत्वात्, आत्मा-ऽनात्मधर्मयोरसंक्रमात्, 'द्रव्याश्रवसत्त्व आत्मन एव काचिद् द्रव्याश्रवपरिणतिः' इति परिभाषाया निर्मूलत्वात्; अन्यथा द्रव्यहिंसादेरनैकान्तिकच्छेदाभिधानविरोधादित्यन्यत्र विस्तरः।

यदपि 'कथं चैवं परद्रव्यरतिसाम्राज्ये स्वात्मप्रतिबन्धमात्रविश्रान्तश्रामण्यसमृद्धिः ?' इत्युक्तम्, तदप्ययुक्तम्; परद्रव्यसंनिधानमात्ररूपाया रतेर्मुक्तावप्यनुच्छेदात्, अभिष्वङ्गरूपाया रतेस्तु धर्मोपकरणेऽभावात्, अभिष्वङ्गविषयस्य सतः

---

१ अथ परिग्रहश्चतुर्विधः प्रज्ञप्तः– द्रव्यतः, क्षेत्रतः, कालतः, भावतः।

२ अपरिग्रहता सूत्र इति या च, मूर्च्छा परिग्रहोऽभिमतः। सर्वद्रव्येषु न सा कर्तव्या सूत्रसद्भावः ॥ १ ॥ ३ विशेषावश्यकेऽष्टमनिह्नवप्रकरणे गाथा ३१।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शरीरादेरप्यधर्मोपकरणत्वात् । न च शरीरेऽप्यप्रतिबद्धानां विदितवेद्यानां साधूनां वस्त्रादिषु 'ममेदम्' इत्यभिनिवेशः; तदुक्तं वाचकमुख्येन—

"यद्वत् तुरङ्गः सत्स्वप्याभरणे[1]-विभूषणेष्वनभिषक्तः । तद्वदुपग्रहवानपि न सङ्गमुपयाति निर्ग्रन्थः ॥१॥" इति ।[2]

अवश्यं चैतदभ्युपेयं परेणापि, अन्यथा शुक्लध्यानाग्निना कर्मेन्धनं भस्मसात् कुर्वतः परित्यक्ताशेषसङ्गस्य केनचित् तदुपसर्गकरणबुद्ध्या भक्त्या वा वस्त्रादिनाऽऽवृतशरीरस्य परद्रव्यरतिप्रतिबन्धात् स्वात्ममात्रप्रतिबन्धो न स्यात्। अथ स्वयमात्तेन वस्त्रादिना परद्रव्यरतिर्नान्यथेति चेत्। एतत् स्वयमादानस्य तृष्णानान्तरीयकत्वे शोभते। निरस्तं चैतदधस्तात्; अवोचाम चान्यत्र—

"[3]परदव्वम्मि पवित्ती ण मोहजणिया व मोहजण्णा वा । जोगकया हु पवित्ती फलकंखा राग-दोसकया ॥१॥" इति ।

कथं च स्वोपात्तवसति-पुस्तकादौ न परद्रव्यरतिः? । परस्वत्वापरित्यागादिति चेत् । कथमाहारादौ न सा? । आध्यात्मिकस्वत्वसंबन्धाभावादिति चेत् । तुल्यमिदमन्यत्र । आहारादिकं कर्मभोगसामर्थ्यसंपादितमिति न तत्र रतिरिति चेत् । इदमप्यन्यत्र समानम् । वस्तुतो विपक्षभावनाप्रतिरुद्धे रतिमोहोदये नालम्बनमात्रात् परद्रव्यरतिरिति विभावनीयम् ।

यदपि 'कथं वा न तस्करादिभ्यो वस्त्रादेः संगोपनानुसंधानेन संरक्षणानुबन्धिरौद्रध्यानावकाशः?' इत्युक्तम्, तदपि न पेशलम्; जल-ज्वलन-मलिम्लुच-श्वापदा-ऽहि-विष-कण्टकादिभ्यः संरक्षणानुबन्धस्य शरीरेऽपि समानत्वात् । धर्मनिर्वाहार्थः शरीरसंरक्षणानुबन्धः प्रशस्त इति चेत् । इदमन्यत्रापि सुवचम्; तदाह भाष्यकारः—

१ क. 'म्भरणवि'। २ प्रशमरतिप्रकरणे श्लो० १४१ । ३ परद्रव्ये प्रवृत्तिर्न मोहजनिका वा मोहजन्या वा । योगकृता खलु प्रवृत्तिः फलकाङ्क्षा राग-द्वेषकृता ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"सारक्खणाणुबंधो रोदज्झाणं ति ते मई हुज्जा। तुल्लमिणं देहाइसु पसत्थमिह तं तहेहावि[1] ॥ १ ॥" इति।

'रौद्रध्यानं कथं प्रशस्ता-ऽप्रशस्तभेदेन द्विधा विभज्यते? इति विमर्शपराइतस्त्विह गगनमेवालोकेत, संरक्षणानुबन्धे सार्थान्वेषणादिलिङ्गश्चौरादिभ्यो द्वेषः कथं प्रशस्तः स्यात्?' अयमपि वृथा व्यामोहः, 'हन्मि' इत्यादिसंक्लेशप्रधानस्य तस्याप्रशस्तत्वे निवृत्त्यादिलिङ्गस्य तस्य प्रशस्तत्वात्; 'असंक्लेशेन चौरादिकं द्वेष्मि' इत्यनुभवात्। 'रागः संक्लेशविशुद्ध्यङ्गतया द्विविधः, द्वेषस्तु संक्लेशैकरूपतयैक एव' इति पुनरज्ञानमूला परिभाषा, मोक्षेच्छाया रागयोनित्वादिव संसारजिहासाया द्वेषयोनित्वात्। स्फटिके तापिच्छकुसुमोपरागस्थानीयस्य द्वेषस्याशुभैकरूपत्वात् कथं द्वैविध्यम्? इति चेत्। 'जपाकुसुमोपरागस्थानीयस्य रागस्यापि शुभैकरूपत्वात् कथं द्वैविध्यम्?' इति पर्यनुयोगे किमुत्तरम्?। उपाधिविशेषादुपधेयविशेषवदुद्देश्यादिविशेषात् परिणामविशेषस्तूभयत्र तुल्य इति दिग्।

यदपि 'कथं चैवमाचेलक्यपरीषहविजयः कृतः स्यात्?, न हि सचेलकत्वमचेलकत्वं च न विरुद्धम्' इत्युक्तम्, तदपि तुच्छम्, यथा हि तीव्रक्षुद्वेदनोदयेऽप्येषणादिदोषदुष्टमाहारमगृह्णतस्तद्दोषरहितमाहारमुपलभ्य विधिना क्षुद्वेदनां प्रतिकुर्वतः क्षुत्परीषहविजयः, न तु सर्वथाऽऽहाराग्रहणेन, निरुपमधृति-संहननानां जिनानामपि तदजेतृत्वमसङ्गात्; तथा शीतादिवेदनाभिभूतेनापि दोषदुष्टोपधित्यागेन दोषरहितोपधिपरिभोगेन च तत्प्रतिकारे[3] आचेलक्यपरीषहविजयोपपत्तेः, न तु सर्वथा तत्परित्यागेन। अथ क्षुद्वेदनाप्रतिपक्षः परिणाम एव निश्चयतः क्षुत्परीषहविजय इति चेत्। तर्हि शीतादिवेदनाप्रतिपक्षः

१ संरक्षणानुबन्धो रौद्रध्यानमिति ते मतिर्भवेत्। तुल्यमिदं देहादिषु प्रशस्तमिह तत् तथेहापि ॥ १ ॥ २ विशे० अष्ट० गाथा २१। ३ सप्तम्यन्तम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिणाम एव निश्चयत आचेलक्यपरीषहविजय इति तुल्यम् । आध्यात्मिकपरीषहविजयोपष्टम्भकत्वं चाहारो-पकरणयोस्तुल्यमिति । तदिदमवदाम—

"[1]जइ चेलभोगमेत्ता ण जियाचेलयपरीसहो साहू । भुंजंतो अजिअखुहापरीसहो तो तुमं पत्तो ॥ १ ॥" इति ।

न च सचेलकत्वेऽचेलकत्वकार्यनिर्जराविघातकत्वलक्षणं नैश्चयिकमाचेलक्यविरोधित्वम्, न वा तद्व्यवहारविघातित्वलक्षणं व्यावहारिकमपि; लोकविदितसंनिवेशपरित्यागेन जीर्ण-स्तोक-कुत्सितवस्त्रपरिभोगेन च सत्यपि वस्त्रे साधूनां कटीवस्त्रेण वेष्टितशिरसो जलावगाढपुरुषस्येवोपचारेणाचेलकत्वव्यवहारात्; निरुपचरितव्यवहारेण च स्कन्धाद् देवदूष्यापगमे भगवत्स्वेवाचेलकत्वव्यवस्थितेरिति । एतेन 'यदि सचेलत्वमपि' इत्यादि निरस्तम्; आचेलक्यस्य मूलगुणत्वासिद्धेः, महाव्रतोपकारकत्वेन पिण्डविशुद्ध्यादिवत् तस्योत्तरगुणत्वात्, अन्यथोत्सूत्रोपहतेः, अव्यवस्थानाच्च ।

न च जिनेन्द्र-जिनकल्पिकादीनामपि सर्वथाऽचेलकत्वं सिद्धमस्ति, जिनकल्पिकादीनां सर्वदैव जघन्यतोऽप्युपधिद्वयस्य सद्भावात्; जिनेन्द्राणामपि प्रव्रज्याप्रतिपत्तिसमये देवदूष्यवस्त्रग्रहणश्रवणात् "[2]सव्वे वि एगदूसेण णिग्गया जिणवरा चउव्वीसं" इत्याद्यागमप्रामाण्यात् । न चास्यान्यार्थत्वम्, आचाराद्यङ्गेषु तैस्तैः सूत्रैर्भगवत्येकवस्त्रग्रहणस्य श्रामण्यप्रतिपत्ति-
५५ समये प्रतिपादितत्वात् । न चैवं तदा सर्ववस्त्रपरित्यागावेदकः कश्चिदागमः श्रूयते । योऽपि "वोसट्टचत्तदेहो विहरइ गामा-

१ यदि चेलभोगमात्राच्च जिताचेलकपरीषहः साधुः । भुञ्जानोऽजितक्षुत्परीषहस्ततस्त्वं प्राप्तः ॥ १ ॥ २ सर्वेऽप्येकदूष्येण निर्गता जिनवराश्चतुर्विंशतिः ।

णुगामं तु" इत्यागमः, सोऽपि न श्रामण्यप्रतिपत्तिसमयभाविभगवन्नग्नत्वावेदकः, किन्तु तदुत्तरकालं रागादिदोषविप्रमुक्तत्वं भगवत्यावेदयतीति। यस्त्विदानीं प्रमाणानुपपत्त्याद्युद्भावयन्नाचाराङ्गादिसद्भावमेव न स्वीकुरुते, सोऽतिबाह्यः, स्वक्लृप्तशास्त्रमूलप्रवृत्तावन्धपरम्पराशङ्काया दुर्निवारत्वात्, "जो भणइ नत्थि धम्मो" इत्यादिना महाप्रायश्चित्तोपदेशात्, असंभाव्यत्वाच्च तस्य।

इत्थं च 'तद्विनेया अपि तल्लिङ्गानुकारिण एवोचिताः' इत्यपि प्रत्युक्तम्, यादृशं गुरुलिङ्गं तादृशमेव शिष्यलिङ्गादिकम्' इति वदतां पिच्छिकादिपरिग्रहस्यान्याय्यत्वात्, भगवता तदपरिग्रहात्; 'गुरुकृतमेव कर्माचरणीयम्' इति व्यामोहवतां छद्मस्थावस्थायां भगवतोपदेश-शिष्यदीक्षा-गुरुवचनाद्यनुपग्रहाद् दिग्वाससामपि तदनुपग्रहापत्त्या स्वतीर्थोच्छेदापत्तेः। तस्माच्चतुरातुरेण यथा वैद्योपदिष्टमेव क्रियते, न तु तत्कृतमनुक्रियते, व्याध्यनुच्छेदप्रसङ्गात्, तथा भव्येनापि धर्माधिकारिणा भगवदुक्त एव मार्गो यथाशक्त्याऽऽचरणीयः, न तु तच्चरित्रमाचरणीयम्, चक्रवर्तिभोजनलुब्धविप्रवद् विपरीतप्रयोजनप्रसङ्गादिति विभावनीयम्। अवोचाम च—

"[3]वेज्जुवदिट्ठं ओसहमिव जिणकहियं हिअं तओ मग्गं। सेवंतो होइ सुही इहरा विवरीयफलभागी"॥ १ ॥ इति।

इत्थं च 'न सितपटा महाव्रतपरिणामवन्तः' इत्याद्यनुमाने हेत्वसिद्धिः, मूर्च्छाऽभावेन परिग्रहयोगित्वाभावात् "[4]मुच्छा

१ व्युसृष्टत्यक्तदेहो विहरति ग्रामानुग्रामं तु। २ यो भणति नास्ति धर्मः।

३ वैद्योपदिष्टमौषधमिव जिनकथितं हितं ततो मार्गम्। सेवमानो भवति सुखीतरथा विपरीतफलभागी ॥ १ ॥ ४ मूर्च्छा परिग्रह उक्तः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिग्गहो वुत्तो" इति भगवद्वचनात्, वस्त्रादियोगित्वस्य श्रेण्यारूढे व्यभिचारित्वादिति स्मर्तव्यम् ।

इदं कपटनाटकं प्रकटमद्य वो दिक्पटाः! सभासु विदितं सतामिति किमत्र भूयः श्रमैः ? ।
इतो जयति शासनं जगति चारु जैनेश्वरं सिताम्बरसमाश्रितं कृतधियां हितं शाश्वतम् ॥ १ ॥

तत् सिद्धमेतत्– 'गुरुवचनमनुसृतेषु चरणकरणपरायणेषु विदितनयेषु संसारभीरुषु सिताम्बरेष्वेव दर्शन-ज्ञान-चारित्र-संपत्तिरूपः परो मोक्षोपायः' इति ॥ ४ ॥

दर्शनमेवाभिष्टोतुं यथार्थान् दर्शनपदपर्यायानाह—

दर्शनं मुक्तिबीजं च सम्यक्त्वं तत्त्वसाधनम्। दुःखान्तकृत्सुखारम्भः पर्यायास्तस्य कीर्तिताः॥

दर्शनं– दृश्यतेऽनेन यथावस्थितमात्मतत्त्वमिति । मुक्तिबीजं च– चः समुच्चये, मुक्तेः सकलकर्मनिवृत्तेः फलभूताया धर्मचिन्ताद्यङ्कुरक्रमेण बीजं सत्प्रशंसादिलिङ्गमाद्यकारणम्; तदाहुः—

"वपनं धर्मबीजस्य सत्प्रशंसादि तद्गतम् । तच्चिन्ताद्यङ्कुरादि स्यात् फलसिद्धिस्तु निर्वृतिः ॥ १ ॥
चिन्ता-सच्छ्रुत्य-ऽनुष्ठान-देवमानुषसंपदः । क्रमेणाङ्कुर-सत्काण्ड-नाल-पुष्पसमा मताः ॥ २ ॥
फलं प्रधानमेवाहुर्नानुषङ्गिकमित्यपि । पलालादिपरित्यागात् कृषौ धान्यादिवद् बुधाः ॥ ३ ॥
अत एव च मन्यन्ते तत्र भावितबुद्धयः । मोक्षमार्गक्रियामेकां पर्यन्तफलदायिनीम् ॥ ४ ॥" इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यक्त्वम्– आत्मनः सम्यग्भावो मिथ्यात्वमलापगमात् परमनिर्मलीभावलक्षणः । तत्त्ववेदनम्– तत्त्वं भगवदुक्तं वेद्यते श्रद्धीयतेऽनेनेति । दुःखान्तकृत्– ग्रन्थिभेदाद् निबिडकर्मजन्यसंसारदुःखान्तकरम् । अत एव सुखारम्भः– सुखस्यारम्भो यस्मात् तत्[1] । एते तस्य– दर्शनस्य, पर्यायाः– एकार्थप्रतिपादकाः शब्दाः, कीर्तिताः, सत्यपि योगे पङ्कजादिपदानां पद्मादाविव दर्शने नियतत्वादेतेषाम् । लक्षणं चास्य शमाद्यभिव्यङ्ग्यः शुभात्मपरिणामः, तदार्षम्–"से[2] य सम्मत्ते पसत्थसम्मत्तमोहणिज्जकम्माणुवेअणोवसम-खयसमुत्थे सुहे आयपरिणामे पण्णत्ते" इति । शमादयश्च पञ्च– शमः, संवेगः, निर्वेदः, अनुकम्पा, आस्तिक्यं चेति । तत्र शमः क्रूराणामनन्तानुबन्धिनां कषायाणामनुदयः, स च प्रकृत्या, कषायपरिणतेः कटुकफलावलोकनाद् वा भवति, तदुक्तम्—

"पयईए, कम्माणं नाऊणं वा विवागमसुहं ति । अवरद्धे वि न कुप्पइ उवसमओ सव्वकालं[3] पि ॥ १ ॥"

अन्ये तु 'क्रोधकण्डू-विषयतृष्णोपशमः शमः' इत्याहुः । कृष्ण-श्रेणिकादौ चैतदभावेऽपि न क्षतिः, लिङ्गं विनापि लिङ्गिनो दर्शनात् । संज्वलनकषायोदयाद् वा कृष्णादीनां क्रोधकण्डू-विषयतृष्णे । भवन्ति हि संज्वलना अपि केचन कषायास्तीव्रतयाऽनन्तानुबन्धिसदृशविपाकवन्त इति । संवेगो मोक्षाभिलाषः, सम्यग्दृशाऽहमिन्द्रपर्यन्तसुखस्य दुःखानुषङ्गाद् दुःखतयैव पर्यालोचनात्; तदाह—

---

१ अनया व्युत्पत्त्या 'सुखारम्भम्' इति मूलपाठेन भवितव्यं स्यात्, वाच्यलिङ्गत्वाद् बहुव्रीहिसमासस्य ।

२ तच्च सम्यक्त्वं प्रशस्तसम्यक्त्वमोहनीयकर्मानुवेदनोपशम-क्षयसमुत्थः शुभ आत्मपरिणामः प्रज्ञप्तः ।

३ प्रकृत्या, कर्मणां ज्ञात्वा वा विपाकमशुभमिति । अपराद्धेऽपि न कुप्यत्युपशमतः सर्वकालमपि ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"[1]णर-विबुहेसरसुक्खं दुक्खं चिय भावओ अ मण्णंतो । संवेगओ ण मुक्खं मोत्तूणं किंचि पत्थेइ ॥ १ ॥"

निर्वेदो भववैराग्यं दुःखदौर्गत्यगहने भवकारागारे वसतस्तद्दुःखप्रतिकाराशक्तावपि तद्दुःखद्वेषलक्षणम्, तत्कृतभवसुखेच्छाविच्छेदलक्षणं वा ममत्वराहित्यम्; तदुक्तम्—

"[2]नारय-तिरिअ-नरा-ऽमरभवेसु निव्वेअओ वसइ दुक्खं । अकयपरलोअमग्गो ममत्तविसवेगरहिओ अ ॥ १ ॥"

अन्ये तु संवेग-निर्वेदयोरर्थविपर्ययमाहुः—'संवेगो भवविरागः, निर्वेदो मोक्षाभिलाषः' इति । अनुकम्पा दुःखितेष्वपक्षपातेन दुःखप्रहाणेच्छा, पक्षपाते तु करुणा स्वपुत्रादौ व्याघ्रादीनामप्यस्त्येव । सा च द्रव्यतो भावतश्च भवति । द्रव्यतः सत्यां शक्तौ दुःखप्रतिकारेण, भावत आर्द्रहृदयत्वेन; तदाह—

"[3]दट्ठूण पाणिणिवहं भीमे भवसायरम्मि दुक्खंतं । अविसेसओऽणुकंपं दुहा वि सामत्थओ कुणइ ॥ १ ॥"

आस्तिक्यं तत्त्वान्तरश्रवणेऽपि जिनोक्ततत्त्वविषये निराकाङ्क्षप्रतिपत्तिः, तदाह—

"[4]मन्नइ तमेव सच्चं णीसंकं जं जिणेहिं पन्नत्तं । सुहपरिणामो सम्मं कंखाइविसुत्तिआरहिओ ॥ १ ॥"

---

१ नर-विबुधेश्वरसौख्यं दुःखमेव भावतश्च मन्वानः । संवेगतो न मोक्षं मुक्त्वा किञ्चित् प्रार्थयते ॥ १ ॥

२ नारक-तिर्यग्-नरा-ऽमरभवेषु निर्वेदतो वसति दुःखम् । अकृतपरलोकमार्गो ममत्वविषवेगरहितश्च ॥ १ ॥

३ दृष्ट्वा प्राणिनिवहं भीमे संसारसागरे दुःखायमानम् । अविशेषतोऽनुकम्पां द्विधापि सामर्थ्यतः करोति ॥ १ ॥

४ मन्यते तदेव सत्यं निःशङ्कं यज्जिनैः प्रज्ञप्तम् । शुभपरिणामः सम्यक्त्वं काङ्क्षादिविस्रोतसिकारहितः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरे तु– 'मिथ्याभिनिवेशोपशमः शमः, संवेगः संसारभयम्, निर्वेदो विषयेष्वनभिष्वङ्गः, अनुकम्पा– आत्मवत् सर्वसत्त्वेषु सुख-दुःखयोः प्रिया-ऽप्रियत्वदर्शनेन परपीडापरिहारेच्छा, आस्तिक्यम्– भगवदुक्तसूक्ष्मातीन्द्रियभावेष्वसंभावना-विपक्षः सद्भावपरिणामः' इत्याहुरिति यथासमयं विभावनीयम् ॥ ५ ॥

यदुक्तम्– 'किं वा न सदा सर्वदेहिनाम्' इति, तदुत्तराभिधित्सयाह—

अनादिभव्यभावस्य तत्स्वभावत्वयोगतः। उत्कृष्टाद्यास्वतीतासु तथाकर्मस्थितिष्वलम्॥६॥

अनादिभव्यभावस्य– तत्तज्जीवसंबन्धिनोऽनादेर्भव्यत्वस्य, तत्स्वभावत्वयोगतः–प्रकृतिवैचित्र्यात् । न चैतदसिद्धम्, इतरहेतूनामपि फलविशेषे योग्यताविशेषापेक्षणात्, जात्यनुच्छेदेन गुणप्रकर्षाभावात्, अशुद्धतायामपि जात्या-ऽजात्यरत्नयोरिव साम्यासिद्धेः; अन्यथा तीर्थकृद-ऽन्तकृत्केवलिभावादिपार्यन्तिकफलविशेषानुपपत्तेः, परम्पराहेतुबोधिलाभादेरपि तत्फलत्वात्, तत्रापि स्वभावभेदावश्यकत्वात्, 'एकत्र हेतौ स्वभावभेदो नान्यत्र' इत्यभ्युपगमे च हेतुस्वभावविप्रतिषेधाद् नियतस्वभावकार्यानुदयप्रसङ्गात्, योग्यतामनपेक्ष्य सदा शिवानुग्रहादिना तत्त्वधर्मप्राप्त्यादिफलविशेषोपगमे च सर्वसाम्यप्रसङ्गात् ।

न चैवं सत्त्वानां प्राग् विशेषे मुक्तावपि विशेषः स्यादिति वाच्यम्; कृत्स्नकर्मकार्याया मुक्तेर्हेत्वविशेषेणाविशेषात्, दरिद्रेश्वरयोः प्राग् विशेषेऽप्यविशिष्टायुःक्षयकार्यमरणाविशेषवदुपपत्तेः । तज्जातीयादेव हेतोस्तज्जातीयं कार्यमुत्पद्यत इति परमार्थः । ॥३२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र मुक्तत्वप्रयोजिका सामान्यतोऽभव्यव्यावृत्ता जातिर्भव्यत्वमिति गीयते, प्रत्यात्म तथा तथापरिणामितया समुपात्तविशेषात् तथाभव्यत्वमिति सिद्धम्। तथा, अलं तेन तेन द्रव्यलिङ्गाद्यवाप्तिप्रकारेण, उत्कृष्टाद्यासु– त्रिंशद्-विंशति-सप्ततिकोटाकोटी-सागरोपममानासूत्कृष्टासु यथाप्रवृत्तिकरणाधीनग्रन्थ्यवाप्त्यवच्छिन्नासु प्रत्येकमेकसागरोपमकोटाकोट्यूनासु शेषाब्धिकोटाकोट्यन्तःस्थितिरूपासु च, कर्मस्थितिषु– ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तराय-नाम-गोत्र-मोहनीयस्थितिषु, अतीतासु– अतिक्रान्तासु सतीषु ॥ ६ ॥

किम्? इत्याह—

तद्दर्शनमवाप्नोति कर्मग्रन्थिं सुदारुणम्। निर्भिद्य शुभभावेन कदाचित्कश्चिदेव हि ॥७॥

कदाचित्– तथाभव्यत्वपरिपाककाले, कश्चिदेव हि– अधिकृतो भव्यः, सुदारुणं– दुर्भेदम्, ग्रन्थिदेशं प्राप्तानामपि तत्प्राबल्याद् बहूनां गाढकर्मणां पुनरुत्कृष्टबन्धश्रवणात्; उक्तं हि—

"ग्रन्थिदेशं तु संप्राप्ता रागादिप्रेरिताः पुनः। उत्कृष्टबन्धयोग्याः स्युश्चतुर्गतिजुषोऽपि ते ॥ १ ॥"

ग्रन्थिं– काष्ठादेरिवात्मनः सुदृढकठिनपरिणामम्, उक्तं हि—

"[2]गंठि त्ति सुदुब्भेओ कक्खडघणरूढगूढगंठि व्व। जीवस्स कम्मजणिओ घणराग-दोसपरिणामो ॥ १ ॥"

---

१ ख.ग.घ.च. 'थाऽलं'। २ ग्रन्थिरिति सुदुर्भेदः कर्कशघनरूढगूढग्रन्थिरिव। जीवस्य कर्मजनितो घनराग-द्वेषपरिणामः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुभभावेन–परमवीर्योल्लासजनितापूर्वकरणरूपेण, निर्भिद्य– अतिक्रम्य, अनिवृत्तिकरणादन्तरकरणे कृते सत्यग्रे वेदनीयस्य मिथ्यात्वस्य विरलीकरणादान्तर्मुहूर्तिकं तत्– प्राग् निरूपितस्वरूपम्, दर्शनं– सम्यक्त्वम्, अवाप्नोति। इदं च प्राथमिकमौपशमिकसम्यक्त्वमभिधीयते, मिथ्यात्वस्यानन्तानुबन्धिनां च भस्मच्छन्नाग्निवदुपशमात्; तदुक्तम्—

"उवसामगसेढीगयस्स होइ उवसामियं तु सम्मत्तं। जो वा अकयतिपुंजो अखवियमिच्छो लहइ सम्मं[2] ॥ १ ॥"

इदमेव हि प्रथमो मोक्षोपायः; उक्तं च—

"यमप्रशमजीवातु बीजं ज्ञान-चरित्रयोः। हेतुस्तपः-श्रुतादीनां सद्दर्शनमुदीरितम् ॥ १ ॥" इति।

इत्थं च यदुक्तम्– 'तथा चापकृष्टस्थितिकादिस्वभाववतः' इत्यादि, तन्निरस्तम्; यथाप्रवृत्तिकरणाद्यर्जितापकृष्टस्थितेरभव्यादिष्वपि संभवेऽप्यपूर्वकरणादिकृताल्पकर्मस्थितेरन्यत्रासंभवात्। यदपि 'किञ्च, एवं दर्शनादेः' इत्याद्युक्तम्, तदप्ययुक्तम्, अपूर्वकरणादिरूपप्रयत्नसाध्यत्वाद् दर्शनस्य, मोक्ष-तदुपाययोः पुरुषकृत्यसाध्यत्वायोगात्, मल्लप्रतिमल्लोपमयोर्जीव-कर्मणोरेकशक्तिपराभवादन्यशक्त्युद्रेकात्, प्राक्कर्मसामर्थ्याभिभूतत्वेऽपि तदा जीवपराक्रमप्राबल्यात्। इष्यते चैतद्योगाचार्यैरपि, विशिष्टाद्यकरणादीनां प्रवृत्त्यादिशब्दवाच्यतया "प्रवृत्ति-पराक्रम-जया-ऽऽनन्द-ऋतम्भरभेदः कर्मयोगः" इति श्रवणात्। प्रवृत्तिश्चरमयथाप्रवृत्तिकरणशुद्धिलक्षणा, पराक्रमेण अपूर्वकरणेनेत्यर्थः, जयः– प्रतिबन्धाभिभवोऽनिवृत्तिकरणमित्यर्थः, आनन्दः– सम्यग्दर्शनलाभरूपः, ऋतम्भरः– सम्यग्दर्शनपूर्वको देवतापूजनादिव्यापारः, प्रवृत्त्यादयो भेदा यस्य स तथा, कर्मयोगः

१ उपशमश्रेणिगतस्य भवत्यौपशामिकं तु सम्यक्त्वम्। यो वाऽकृतत्रिपुञ्जोऽक्षपितमिथ्यात्वो लभते सम्यक्त्वम् ॥ १ ॥ २ विशेषा०भाष्ये गाथा ५२९।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रियालक्षणः, कर्मग्रहणमिच्छालक्षणप्रणिधानयोगव्यवच्छेदार्थमिति ।

यदप्युक्तम्– 'अपिच, प्रथमं निर्गुणस्यैव सतो गुणावाप्तावग्रेऽपि किं गुणापेक्षया?' इति; तदपि न बन्धुरम्, पूर्वपूर्वगुणदलापेक्षयैवोत्तरोत्तरगुणोपचयसिद्धेः, उपादानोपचयं विनोपादेयानुपचयात् । अत एवोत्कृष्टस्थितेराग्रन्थिप्राप्ति पूजाभिलाषादिना भवतामपि शुश्रूषादीनां न गुणत्वम्, पूर्वोत्तरभावेन गुणक्रमाननुप्रविष्टतया फल(।)प्राप्तेः, विषयविषाभिलाषवैमुख्यहेतुलोकोत्तरभावामृतास्वादरूपतथाक्षयोपशमप्रत्युद्भ्याख्ययोग्यताविकलयात् । सत्यां च तत्त्वचिन्तायां प्रादुर्भवतामेतेषां प्रतिगुणमनन्तपापपरमाण्वपगमेन तत्त्वज्ञानफलयोगात् तत्त्वतो गुणत्वम्, बाह्याकृतसाम्येऽपि फलभेदादुक्तविशेषोपपत्तेः । इष्यते चैतदन्यैरपि; तदाहावधूताचार्यः– 'नाप्रत्ययानुग्रहमन्तरेण तत्त्वशुश्रूषादयः, उदकपयोऽमृतकल्पज्ञानाजनकत्वात्, लोकसिद्धास्तु सुप्तनृपाख्यानगोचरा इवान्यार्था एव' इति । विषयतुडपहार्येव विज्ञप्त्याख्यसम्यग्दर्शनरूपं ज्ञानम्, नान्यत्, अभक्ष्यास्पर्शनीयन्यायेनाज्ञानत्वात् । तत्र विविदिषाख्या तत्त्वचिन्ता हेतुः, तत्र सुखाख्यः सानुबन्धः क्षयोपशमः, तत्र श्रद्धाख्या तत्त्वरुचिश्चक्षुर्गुणस्थानीया । तत्र चेहलोकादिभयप्रतिपक्षो धृत्याख्यश्चेतःस्वास्थ्यपरिणाम इति सम्यग्दर्शनगुणस्य श्रद्धादिगुणवत्तैवावाप्तेर्न मोक्षोपायस्य प्रथमं निर्गुणेनैव सताऽवाप्तत्वं सिद्धमस्ति । श्रद्धादौ धृत्यादेर्विशिष्य हेतुत्वेऽपि धृत्याद्यनुगतविशिष्टगुणत्वावच्छिन्नेऽपुनर्बन्धकयोग्यताया हेतुत्वाद् न व्यभिचारः । उक्तं च भगवद्गोपेन्द्रेणापि– 'निवृत्ताधिकारायां प्रकृतौ धृतिः श्रद्धा सुखाविविदिषा विज्ञप्तिरिति तत्त्वधर्मयोनयः, नानिवृत्ताधिकारायां, भवन्तीनामपि तद्रूपताऽयोगात्' इति । 'न च निश्चयत

१ भवतां– जायमानानामित्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्यगुणावाप्तिरपि निर्गुणस्यैव, क्रियाकाल-निष्ठाकालयोरैक्येन गुणाप्तिकाल एव गुणवत्त्वसिद्धेः, हेतु-फलयोः पूर्वापरभावस्यातन्त्रत्वात्, चरमक्षण एव फलोपहितहेतूपगमात्, दीर्घक्रियाकालभ्रान्तेर्व्यवहारवासनानिमित्तत्वात्' इत्यपि वदन्ति ।

यदप्युपन्यस्तम्– 'अपि च, सर्वमुक्तिसिद्धान्तो नास्ति जैनानाम्' इत्यादि, तदपि न मनोहरम्, अभव्यत्वरूपस्यायोग्यत्वस्य भव्या-ऽभव्यत्वशङ्कयैव निवृत्तेः, तस्यास्तद्व्याप्यत्वेन शास्त्रे बोधनात्; तदुक्तमाचारटीकायाम्– 'अभव्यस्य भव्याभव्यत्वशङ्काया एवाभावात्' इति । एतेन 'सिद्धौ वा संसार्येकस्वभावा एव केचिदात्मान इति स्थिते 'अहमेव यदि तथा स्यां तदा मम विपरीतप्रयोजनं परिव्राजकत्वम्' इति शङ्कया न कश्चित् तदर्थं ब्रह्मचर्यादिदुःखमनुभवेत्, इत्युदयनोक्तं प्रत्युक्तम् । न च दीर्घतरसंसारस्थितिकत्वरूपायोग्यत्वाशङ्कयाऽपि प्रवृत्तिप्रतिरोधः, विषयसुखवैराग्य-यथाशक्तिप्रवृत्तिभ्यामेव तदभावव्याप्यासन्नसिद्धिकत्वनिश्चयात्, तयोरासन्नसिद्धिकत्वव्याप्यत्वेन शास्त्रे बोधात्; तथा च श्रुतकेवलिवचनम्—

"[1]आसन्नकालभवसिद्धिअस्स जीवस्स लक्खणं इणमो । विसयसुहेसु ण रज्जइ सव्वत्थामेण उज्जमइ ॥ १ ॥"

न च तथाप्रवृत्तौ तच्छङ्कानिवृत्तिः, तस्यां च संपन्नायां प्रतिबन्धकाभावसाम्राज्यात् तथा प्रवृत्तिरित्यन्योन्याश्रय इति शङ्कनीयम्; पूर्वप्रवृत्तेः कोट्यस्मरणादिसिद्धसंशयाभावादेवोपपत्तेः, प्रवृत्तेरिव प्रवर्तमानजातीयत्वस्याप्यासन्नसिद्धिकत्वव्याप्यत्वाद् वा । वस्तुतः शमादिलिङ्गैरपुनर्बन्धकत्वरूपयोग्यतानिश्चयाद् न दोषः, अपुनर्बन्धकतानियतभवव्यवधानज्ञानस्याप्रतिबं- ॥३२९॥

---

१ आसन्नकालभवसिद्धिकस्य जीवस्य लक्षणमिदं तु । विषयसुखेषु न रज्यति सर्वस्थाम्ना उद्यच्छते ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्धकत्वात्, तद्भवस्थितिहेतुदुरितानां सत्प्रवृत्तिनाश्यत्वेन प्रत्युत नाशार्थिप्रवृत्तौ नाश्यनिश्चयीभूयानुगुणत्वात्, अनतिशयितशमादिना प्रवृत्त्युत्तरमतिशयितशमादिसंपत्तेश्च नान्योन्याश्रयः । यत्तु 'शमादावपि संसारित्वेनैव स्वरूपयोग्यत्वाद् मुक्तावपि संसारित्वेन तत्त्वम्' इति गङ्गशाकूतम्, तद् न पूतम्, नित्यज्ञानादिमद्भिन्नत्वरूपसंसारित्वापेक्षया भव्यत्वस्यैव लघुभूतस्य तत्त्वौचित्यात्, सर्वमुक्तिनिरासाच्च ।

किञ्च, सर्वमुक्तिसत्त्वेऽपि परस्य कथं पारिव्रज्यादौ प्रवृत्तिः, स्वप्रयत्नं विनैव महाप्रलये भर्गप्रयत्नात् तदुपपत्तिसंभवात्? । शीघ्रमुक्त्यर्थं तत्प्रवृत्तौ चाकामेनापि परेण तत्स्वरूपयोग्यतावच्छेदकं किञ्चिद् वक्तव्यम्, तदेव चास्माकमपुनर्बन्धकत्वम् । अथात्मनैव मुक्तौ स्वरूपयोग्यता, ईश्वरे विशेषसामग्र्यभावाच्च नातिप्रसङ्गः, शीघ्रं मुक्तिहेतूपनिपाताच्च शीघ्रमुक्तिरिति शीघ्रमुक्तित्वस्यार्थसिद्धत्वाद् न तत्स्वरूपयोग्यतावच्छेदकं किञ्चित् कल्पनीयमिति न दोष इति चेत् । न, उपादानस्वभावाविशेषेऽर्थसिद्धस्याप्युपादेयविशेषस्यानुपपत्तेः, अतिप्रसङ्गात्, 'कस्यचित् कदाचिदेव पारिव्रज्यादौ प्रवृत्तिः' इति नियमस्य हेतुविशेषं विनाऽनिर्वाहात्; 'अदृष्टविशेषस्तद्धेतुः' इत्युपगमेऽपि नामान्तरेणापुनर्बन्धकत्वाङ्गीकरादिति सर्वमवदातम् ॥ ७ ॥

दर्शनावाप्तौ यत् स्यात् तदाह—

सति चास्मिन्नसौ धन्यः सम्यग्दर्शनसंयुतः । तत्त्वश्रद्धानपूतात्मा रमते न भवोदधौ ॥८॥

सति चास्मिन्– दर्शने, असौ– तथाभव्यत्वभाजनं जनः, धन्यः, लब्धचिन्तामणिदरिद्रवद् निष्ठितार्थत्वात्, सम्यग्द-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्शनसंयुतः– फलपर्यन्तहेयो-पादेयविवेकवान्; प्रतिज्ञातप्रत्ययनिर्वहणे हि न सम्यक्त्वमिति समयविदः; तत्त्वश्रद्धानेन– श्रवणेच्छारूपसुश्रूषोत्तरश्रोत्रोपयोगरूपश्रवणोत्तरशास्त्रार्थमात्रोपादानरूपग्रहणोत्तराऽविस्मरणरूपधारणोत्तरमोह-संदेह-विपर्ययव्युदासप्रधानज्ञानरूपविज्ञानोत्तरविज्ञातार्थावलम्बनतथाविधवितर्करूपोहोत्तरमत्यवायसंभावनानिमित्तोक्तयुक्तिविरुद्धार्थव्यावर्तनात्मकापोहोत्तरेण विज्ञानोहा-ऽपोहानुगमविशुद्धेन 'इदमित्थमेव' इति निश्चयरूपेण तत्त्वाभिनिवेशेन, समारोपविघातकृता चित्तकालुष्यापनायिना मिथ्यात्वमोहनीयादिक्षयोपशमजनितेन चेतःप्रसादेन वा; पूतात्मा पवित्राशयः; भवोदधौ– मिथ्यात्वागाधजले कषायपातालकलशसंक्रान्तबहलविपाकानिलवेगसमुच्छलत्कटुकफलपरिणतिकल्लोले प्रदीप्तविषयतृष्णारूपवडवानलभीषणे नानाविधाविरतिरूपतिमि-तिमिङ्गिलग्रस्तक्षुद्रगुणमीने सानुबन्धपापकर्मरूपमहानद्यावर्तभग्नभव्यधर्मयानपात्रे दुःखशतगिरिग्रावपाते क्रन्ददनेकसत्त्वनक्रचक्रे संसारसमुद्रे, न रमते, तत्त्वदर्शित्वेन भवाबहुमानित्वात्, प्रागर्जितकर्मोपनीते सुख-दुःखे भुञ्जानस्यापि विषयतृड्रूपरुच्यभावेन परमार्थतस्तदभोजित्वात्; उक्तं च समयसारकृताऽपि– "[1]सेवंतो वि ण सेवइ, असेवमाणो वि सेवए कोइ" इति। लौकिकैरप्युक्तम्– "आहृता हि विषयैकतानता ज्ञानधौतमनसं न लिम्पति" इति ॥ ८ ॥

तदरमणौपयिकमस्य तत्त्वदर्शित्वमेव व्यनक्ति—

स पश्यत्यस्य यद्रूपं भावतो बुद्धिचक्षुषा। सम्यक्शास्त्रानुसारेण रूपं नष्टाक्षिरोगवत्॥९॥

---

१ सेवमानोऽपि न सेवते, असेवमानोऽपि सेवते कश्चित्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सः– सम्यग्दृष्टिः, अस्य– भवोदधेः, यद्रूपं– वर्णितस्वरूपं विषयतृट्तिमिरदोषादज्ञानिनाऽदृश्यमानम्, शङ्खश्वैत्यमिव कामलोपहतदृशा, पश्यति, तत्त्वतो यथावस्थितस्वरूपेण। केन? इत्याह– सम्यक्शास्त्रानुसारेण– परमार्थप्रतिपादकवीतरागप्रवचनैकदत्तदृष्टितया, बुद्धिरेव मतिज्ञानावरणीयक्षयोपशमप्रसूतः सद्ग्रन्थग्रहणपटुर्मेधाख्यपरिणाम एव चक्षुरनुपहतलोचनं तेन। पापश्रुतावज्ञाकारिणी खलु सम्यक्शास्त्रानुसारिणी बुद्धिः, प्रेक्षावदातुरस्योत्तमौषध इव तद्वतः सद्ग्रन्थ एव ग्रहणादरात्। तेन पापश्रुतजनितकुवासनानिद्रया व्यवधानाभावाद् मोहदोषोपहतेश्च पश्यति निरन्तरमेवैतद्वास्ताविकं संसाररूपम्। दृष्टान्तमाह– रूपं– शङ्खश्वैत्यादिकम्, नष्टाक्षिरोगवत्– गलितनयनगतपित्तादिदोषवत्। रोगनाशश्च रोगान्तरप्रतिरोधस्योपलक्षणम्, इत्थमेव निरन्तरं रूपस्वरूपसम्यग्दर्शनसिद्धेः। स्यादेतदेकस्यैव बुद्धिगुणस्य कथं पूर्वदोषनाशकत्वम्, उत्तरदोषप्रतिबन्धकत्वं च?। मैवम्, सामर्थ्यविशेषादुपपत्तेः; दृष्टं ह्येकस्यैवोष्णस्पर्शस्य पूर्वशीतस्पर्शनाशकत्वम्, भाविशीतस्पर्शोत्पत्तिप्रतिबन्धकत्वं चेति ॥ ९ ॥

ततो यत् करोति तदाह—

तद् दृष्ट्वा चिन्तयत्येवं प्रशान्तेनान्तरात्मना। भावगर्भं यथाभावं परं संवेगमाश्रितः॥ १०॥

तत्– भवोदधिरूपम्, दृष्ट्वा चिन्तयति, एवं– वक्ष्यमाणम्, प्रशान्तेन– क्रोधाद्यनाकुलेन, आन्तरात्मना, भावगर्भम्– भावनाभिमुखोपयोगसारम्, यथाभावम्– यथार्थतत्त्वम्, परम्– उत्कृष्टम्, संवेगमाश्रितः। भवति हि शुष्केक्षुचर्वणप्रायादध्यात्म-

१ 'ख.ग.घ.च' 'पस'। २ क.ख.ग.घ.च. 'रा भा'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शास्त्रश्रवणात् तद्रसतुल्यमर्थग्रहणम्, प्रीणयति चान्तरात्मानं तत्। ततश्च गुड-खण्ड-शर्करोपलमृदुमध्याधिमात्रसंवेगोत्पत्तिः सत्क्रियाऽऽदरादिलिङ्गा। संवेगमहोदधेर्निस्यन्दभूतं च वक्ष्यमाणचिन्तनमिति विभावनीयम् ॥ १० ॥

यच्चिन्तयति तदाह—

जन्ममृत्युजराव्याधिरोगशोकाद्युपद्रुतः। क्लेशाय केवलं पुंसामहो! भीमो भवोदधिः ॥११॥

जन्म– मातृशरीरे संक्रमणम्, मृत्युः– आयुःक्षयः, जरा– वयोहानिः, व्याधिः– क्षयादि, रोगः– ज्वरादि, शोकः– इष्टवियोगादिजन्य आक्रन्दाद्यभिव्यङ्ग्यः परिणामः, आदिना वध-बन्धादिपरिग्रहः, एतैरुपद्रुतः, तत्स्थानामुपद्रुतत्वेऽपि तत्रोपद्रुतत्वमुपचर्यते, गिरिगततृणादीनां दाहेनेव गिरौ दग्धत्वम्; 'अहो' इत्यपूर्वदर्शनजनिताश्चर्यार्थो निपातः, भीमः– अतिभयावहः, भवोदधिः– संसारसमुद्रः, पुंसां– पुरुषाणाम्, सकलप्राण्युपलक्षणमेतत्, केवलं क्लेशाय– आत्यन्तिकदुःखाय, न तु सुखलेशायापि।

भवति हि नारकाणामत्रत्यातिशयितशीतोष्णाद्यनन्तगुणशीतोष्णादिवेद्या क्षेत्रप्रत्यया, भवस्वाभाव्यात्; महिष-शृङ्ग्यादीनामिवोदीर्णातिमत्सराणां दन्तादन्ति-नखानखि-केशाकेशि-खड्गाखड्गि-कुन्ताकुन्ति-मुष्टामुष्टि-दण्डादण्डिप्रबलप्रहारेण परस्परोदीरिता, व्याधादिकृता मृगादीनामिव संक्लिष्टसुरोदीरिताऽपि वेदना कुन्ताग्रोपर्यारोपण-कूटशाल्मलिवृक्षाधःस्थापन-संतप्तत्रपुपान-वैतरणीवाहनादिजनिता; न तेषां नेत्रनिमीलनसमयमपि सुखमस्ति। को हि नाम तद्वेदनां विशिष्य विना सर्वज्ञं वक्तुमीष्टे?।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न हि सा रसनासहस्रेणापि वक्तुं पार्यते। तिरश्चामपि कशा-ऽङ्कुशा-ऽऽरा-प्रहार-वध-बन्ध-तृड्बाधनादिना यावज्जीवमनुपरतैव वेदना। मनुजानां तूक्तप्रायैव। देवा अपि दिव्यभोगमुपस्थितपातमभिमुखं चाशुचिमातृगर्भप्रवेशं च पश्यन्तस्तथा खिद्यन्ति यथोपस्थितशूला-रोपभयश्चौरोऽपि न खिद्यति। नापि तेषामीर्ष्या-विषादादिना परस्परकलहोपरमोऽप्यस्ति। इति न चतसृणां गतीनामेकस्यामपि सुखविश्रामोऽस्ति, भणितं च श्रुतकेवलिना--

"नरएसु जाइं अइकक्खडाइं दुक्खाइं परमतिक्खाइं। को वण्णेइ ताइं जीवंतो वासकोडी वि ? ॥ १ ॥
कक्खडदाहं-सामलिअ-विसवण-वेअरणि-पहरणसएहिं। जा जायणाउ पावंति नारया तं अहम्मफलं ॥ २ ॥
तिरिया कसं-कुसा-ऽऽरानिवाय-वह-बंध-मारणसएहिं। न वि इहइं पावंता परत्थ जइ णियमिआ हुंता ॥ ३ ॥
आजीवसंकिलेसो सुक्खं तुच्छं उवद्दवा बहुआ। णीअजणसिट्ठणा विअ अणिट्ठवासो अ माणुस्से ॥ ४ ॥
चोर-गणिरोह-वह-बंध-रोग-धणहरण-मरणवसणाइं। मणसंतावो अयसोविग्गोवणया य माणुस्से ॥ ५ ॥

१ नरकेषु यान्यतिकर्कशानि दुःखानि परमतीक्ष्णानि। को वर्णयति तानि जीवन् वर्षकोटीरपि ? ॥ १ ॥
कर्कशदाह-शाल्मलिकविषवन-वैतरणी-प्रहरणशतैः। या यातनाः प्राप्नुवन्ति नारकास्तदधर्मफलम् ॥ २ ॥
तिर्यञ्चः कशा-ऽङ्कुशा-ऽऽरानिपात-वध-बन्ध-मारणशतैः। नैवेह प्राप्स्यन् परत्र यदि नियमिता अभविष्यन् ॥ ३ ॥
आजीविकासंक्लेशः सौख्यं तुच्छमुपद्रवा बहवः। नीचजनसेवनापि चानिष्टवासश्च मानुष्ये ॥ ४ ॥
चौरा-ऽग्निरोध-वह-बन्ध-रोग-धनहरण-मरणव्यसनानि। मनःसंतापोऽयशोविगोपना च मानुष्ये ॥ ५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]चिंतासंतावेऽहियदारिद्दरुआहिं दुप्पउत्ताहिं । लद्धूण वि माणुस्सं मरंति केई सुणिव्विन्ना ॥ ६ ॥
देवा वि देवलोए दिव्वाभरणाणुरंजिअसरीरा । जं परिवडंति तत्तो तं दुक्खं दारुणं तेसिं ॥ ७ ॥
तं सुरविमाणविभवं चिंतिय चवणं च देवलोगाओ । अइवलियं चिय जं न वि फुट्टइ सयसक्करं हिअयं ॥ ८ ॥
ईसा-विसाय-मय-कोह-माण-लोहेहिं एवमाईहिं । देवा वि समभिभूआ तेसिं कत्तो सुहं णाम ? ॥ ९ ॥

न चेन्द्रो-पेन्द्रादीनां पुण्यविपाककालोपस्थितभोगादिनापि निश्चयतः सुखमस्ति, व्याधिस्थानीयतृषितेन्द्रियप्रतिकारमात्रत्वात्, मधुलिप्तखड्गधारालेहनवद् दुःखानुषङ्गित्वात्, दुःखकारणजातीयकर्मजन्यत्वाच्च । सुखाभिमानः खल्विह भवबहुमानपुरस्कारीमूलमेषः, दुःखनिमित्तप्रवृत्तेर्भेतव्यमित्यतो भाविभद्रेणेति ॥ ११ ॥

यदि न संसारे क्वापि सुखमस्ति, तदा कुत्र तद्विश्रान्तिः ? इति चिन्तयन्नाह– । अथवा, प्रागस्य साक्षाद् निर्वेदाङ्गचिन्तनमुक्तम् ; अथ तु साक्षात् संवेगाङ्गं तदाह–

सुखाय तु परं मोक्षो जन्मादिक्लेशवर्जितः । भयशक्त्या विनिर्मुक्तो व्याबाधावर्जितः सदा १३

---

१ चिन्तासंतापोऽधिकदारिद्र्यरुग्भिर्दुष्प्रयुक्ताभिः । लब्ध्वापि मानुष्यं म्रियन्ते केचित् सुनिर्विण्णाः ॥ ६ ॥
देवा अपि देवलोके दिव्याभरणानुरञ्जितशरीराः । यत् प्रतिपतन्ति ततस्तद् दुःखं दारुणं तेषाम् ॥ ७ ॥
तं सुरविमानविभवं चिन्तयित्वा च्यवनं च देवलोकात् । अतिवलितमेव यद् नापि स्फुटति शतशर्करं हृदयम् ॥ ८ ॥
ईर्ष्या-विषाद-मद-क्रोध-मान-लोभैरेवमादिभिः । देवा अपि समभिभूतास्तेषां कुतः सुखं नाम ? ॥ ९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखाय तु– सुखायैव, परं– केवलम्, अत्राग्रिमपदत्रयेण सांसारिकसुखविपर्ययहेतुगर्भविशेषणत्रयमाह– जन्मादिक्लेशवर्जितः– कदाचिदपि जन्मादिक्लेशैरस्पृष्टः, तेनेन्द्रियाद्यभावाद् न तत्प्रतिकारमात्रत्वम्; तथा, भयशक्त्या– आगामिदुःखान्तरोपनिपातबीजभूतया स्वयोग्यतया, विनिर्मुक्तः– त्यक्तः, तेन दुःखाननुषङ्गित्वमुक्तम्; तथा, सदा– निरन्तरम्, व्याबाधावर्जितः– औत्सुक्यरूपात्मस्वभावबाधाकलङ्कविकलः, तेन दुःखकारणजातीयकर्माजन्यत्वमुक्तम्।

आत्मनो हि गलितौत्सुक्यबोधात्मा शाश्वतश्चिदानन्दः स्वभावोऽस्ति। स च सेन्द्रियदेहाद्यपेक्षाकारणस्वरूपावरणेनाच्छाद्यते, शीतांशोरिवामृतमयप्रकाशस्वभावोऽभ्रेण, स्वाभाविकान्यथाभूतपरिणतिजननात्, अन्यथाऽऽवारकत्वानुपपत्तेः। सेन्द्रियदेहाद्यपगमे चायत्नसिद्ध एवायमात्मनः स्वभाव आविर्भवति, अभ्रापगम इव शीतांशोः। उपलभ्यते च संसारदशायामपि समतृणमणि-लोष्टुकाञ्चनस्य विशिष्टध्यानावस्थितस्य मुमुक्षोर्वैराग्यभावनया परमाह्लादानुभव उपायप्रवृत्तिक्लेशपरिपन्थीति। तस्यैव भावनावशादुत्तरोत्तरावस्थामासादयतः परमकाष्ठागतिः संभाव्यते। इति सिद्धो मुक्तावेव सुखविश्रामः, तदुपादानोपशमप्रभवसुखस्यापि तत्त्वतस्तद्रूपत्वात्। न ह्युपादानो-पादेययोरत्यन्त(म?)भेदो यौक्तिकः; तदिदमाहुर्वृद्धाः—

"निर्जितमद-मदनानां वाक्-काय-मनोविकाररहितानाम्। विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम्[1] ॥१॥" इति।

न चैवमन्यदपि सुखं मुक्तिसुखोपादानमस्त्विति कुचोद्यमाशङ्कनीयम्; तृषितसुखस्य तदुपादानत्वे मुक्तावपि तृडनुवेधप्रसङ्गात्। अतो भिन्नजातीयमेव तात्त्विकं सुखं मुक्तावुत्कर्षप्राप्तमिति श्रद्धेयम् ॥ १२ ॥

१ प्रशमरतिप्रकरणे श्लो० २३८।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपायचिन्तनमाह—

हेतुर्भवस्य हिंसादिर्दुःखाद्यन्वयदर्शनात्। मुक्तेः पुनरहिंसादिर्व्याबाधाविनिवृत्तितः ॥१३॥

हेतुः– उपायः, भवस्य– संसारस्य, हिंसादिः– हिंसा-ऽनृत-मिथ्यात्व-क्रोधादिः । कुतः? इत्याह– दुःखाद्यन्वयदर्शनात्– हिंसादिप्रवृत्तौ विषयपिपासादिदुःखानुबन्धोपलम्भात्, दुःखैकमये संसारे तद्धेतुत्वौचित्यात् । मुक्तेः पुनरहिंसादिः– अहिंसा-सत्य-सम्यक्त्व-क्षान्त्यादिः, हेतुः । कुतः? इत्याह—व्याबाधाविनिवृत्तितः– अहिंसादिप्रवृत्तौ विषयपिपासादिपीडानिवृत्तिरूपगुणानुबन्धोपलम्भात्, गुणैकमय्यां मुक्तौ तद्धेतुत्वौचित्यात् ॥ १३ ॥

एतच्चिन्तनफलमाह—

बुद्ध्वैवं भवनैर्गुण्यं मुक्तेश्च गुणरूपताम्। तदर्थं चेष्टते नित्यं विशुद्धात्मा यथागमम्॥१४॥

एवम्– उक्तरीत्या, भवस्य– संसारस्य, नैर्गुण्यं– दोषैकमयत्वम्; मुक्तेश्च गुणरूपतां– गुणैकमयत्वम्, बुद्ध्वा, अशुद्धौदयिकादिभावत्वात् संसारस्य, मुक्तेश्च शुद्धक्षायिकादिभावरूपत्वात्, एतद्बोधश्च तदुपायबोधोपलक्षणम्; तदर्थं– मुक्त्यर्थम्, चेष्टते– भवहेतुहिंसादिप्रतिपक्षिष्वहिंसादिषु तदुपायेषु प्रवर्तते, नित्यं– निरन्तरम्, क्षुधितस्य भोजनेच्छाया इव मुमुक्षोर्मोक्षेच्छाया अविच्छेदेन तदुत्साहस्य शाश्वतत्वात्; अवोचाम च– सामाचारीप्रकरणे—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"खुहिअस्स जहा खणमवि विच्छिज्जइ णेव भोजणे इच्छा। एवं मोक्खट्ठीणं छिज्जइ इच्छा ण कज्जम्मि ॥१॥"

विशुद्धात्मा विवेकजलगलितानादरमलत्वात्, यथागमम्- आगमोक्तोत्सर्गा-ऽपवादादियोग्यधृतिशक्त्याद्यनतिक्रमेण। व्यवस्थितं खल्वागमे- आतुरादेरपि पीडाद्यनुभवनिमित्तसंक्लेशाभावे, आवश्यकयोगापरिहाणौ च चिकित्साऽकरणादि, अन्यथा तु पुष्टालम्बनेन तत्करणादि, स्फोरयतोऽपि च मनोधृतिबलं कदाचिदत्यन्तभग्नकायशक्तिकस्य सतो यथाभणिताचरणसीदनेऽपि मुक्तकूटचर्यस्य शुद्धत्वमेवेति। यस्त्वपरिशीलितगुरुकुलवासोऽनालोच्यैवागमं स्वशक्तिमतिक्रम्यैव व्यापृतो भवति स्वकृत्यऽसाध्ये महति कार्ये, स तु संक्लेशोदयादविधिना शरीरं पातयित्वाऽनेकभवेषु तदनुबन्धदोषं माप्नुयादिति। ततो यथाक्रमं शक्त्याद्यनतिक्रम्यैव मवर्तेत ॥ १४ ॥

इत्थमेवाज्ञाश्रद्धया तीव्रसंवेगादभ्यासाच्च क्लिष्टकर्मविगमात् तीव्रानुष्ठानयोग्यो भवति। अत एव मायः परिशीलितश्रावकप्रतिमादिक्रमस्यैव सदा यतिधर्मेऽधिकारः, विशिष्य तु दुःषमायामित्यन्यत्रोक्तमित्यभिमेत्याह---

दुष्करं क्षुद्रसत्त्वानामनुष्ठानं करोत्यसौ। मुक्तौ दृढानुरागत्वात्कामीव वनितान्तरे॥१५॥

असौ- विशुद्धात्मा, क्षुद्रसत्त्वानां- संसाराभिनन्दिनामपरमार्थदर्शिनां धर्मपराङ्मुखानां क्लीबानां कापुरुषाणाम्, दुष्करम्- कर्तुमशक्यम्, अनुष्ठानं- पूर्णाहिंसादिपालनाय परीषहादिजयरूपं, विशिष्टनिर्जरायै भिक्षुप्रतिमाद्यभिग्रहरूपं वा,

---

१ क्षुधितस्य यथा क्षणमपि विच्छिद्यते नैव भोजने इच्छा। एवं मोक्षार्थिनां छिद्यत इच्छा न कार्ये ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करोति । कुतः ? इत्याह– मुक्तौ दृढानुरागत्वात्– पारमार्थिकाभिलाषभावात्; अतीव्रस्त्वभिलाष आलस्याद्युपहतचित्तानां परमार्थतोऽभिलाष एव न, अन्यथा प्रवृत्त्यादिसिद्धेरिति विभावनीयम् । निदर्शनमाह— कामीव– तीव्रकामाविष्ट इव, वनितान्तरे– अभिलषिततरुणीविशेषे । यथा हि वनितान्तरेऽनुरक्तस्तदाप्तये प्रवर्तमानः शीतादि न गणयति तथा मुक्तावनुरक्तोऽपि तदाप्तये प्रवर्तमानो न तद् गणयति, उपायानुषङ्गिशैत्यादौ बलवद्द्वेषाभावेन बलवदनिष्टानुबन्धित्वज्ञानकृतप्रवृत्तिप्रतिघाताभावादिति निगर्वः ॥ १५ ॥

तत्त्वतस्तत्र चेतःपीडारूपानिष्टाननुबन्धित्वाद् दुष्करत्वमेव नास्तीति साधयन्नाह—

उपादेयविशेषस्य न यत्सम्यक्प्रसाधनम् । दुनोति चेतोऽनुष्ठानं तद्भावप्रतिबन्धतः ॥१६॥

उपादेयविशेषस्य– सम्यग्विदितोत्कृष्टगुणस्य चिन्तामणिरत्नादेः, यत्– यस्मात्, सम्यक् प्रसाधनम्– अव्यभिचार्युपायभूतं रोहणाचलविषमप्रदेशपर्यटनादिकम्, अनुष्ठानं कर्म कायोपतापजनकमपि, तद्भावप्रतिबन्धतः– तस्मिन्नुपादेयविशेषेऽप्रतिबद्धेच्छाजनितादन्तराह्लादभावप्रतिबन्धात्, चेतो न दुनोति, मानससुखसत्त्वे तदनुपमर्देन मानसदुःखोत्पादायोगात् । न च शारीरदुःखसत्त्वे मानससुखमपि विरुद्धम्, श्रमादिव(म)तोऽप्यप्रतिहतफलेच्छस्यान्तर्बहिरेकदैव सुख-दुःखानुभवदर्शनात् । न चैकदोभययोगक्रियाविरहः, अभिन्ने विषये त्रयाणामपि योगानां क्रियायौगपद्यस्य दृष्टत्वात्, इष्टत्वाच्च, भङ्गिकश्रुतप्रामाण्यात् । न च तदा विषयाभावादेव सुखाभावः, बाह्यैरपि चतुर्विधस्य सुखस्य व्यवस्थापनात्; तथाहि– किञ्चिदाभ्यासिकं सुखम्, यथा ॥३३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृगयादिषु; किञ्चिदाभिमानिकम्, यथा चुम्बनादिषु; किञ्चिद् वैषयिकम्, यथा सुरभिमधुरगौरगान्धारादिसंनिकर्षे, ईदृशविषयसाक्षात्कारवत् साक्षात्कारजनकेदृशविषयसंनिकर्षस्य हेतुत्वेऽप्यविनिगमात्; किञ्चिच्च मानोरथिकम्, यथा भाविपुत्रजन्माद्युत्सवचिन्तनादिषूत्पद्यमानमिति। तदिह प्रकृतप्रवृत्तौ श्रमादिखेदकालेऽपि मानसं मानोरथिकं सुखं न विरुद्धम्। इति कथं तत्साम्राज्ये ततश्चेतःपीडा स्यात्? इति सिद्धम् ॥ १६ ॥

साध्यमाह—

ततश्च दुष्करं तन्न सम्यगालोच्यते यदा। अतोऽन्यद् दुष्करं न्यायाद्धेयवस्तुप्रसाधकम्॥१७॥

ततश्च— तस्मात् कारणाच्च, तत्— मुक्त्यर्थमनुष्ठानम्, यदा सम्यगालोच्यते— तद्भावे मनः प्रतिबध्यते, तदान्तराह्लादोदयाच्चिन्तामणिरत्नार्थिप्रयत्नवद् दुष्करं न— चिन्तार्तिप्रदं न भवति 'तदश्रद्धावज्ञादिपरिणामिनि चित्ते च दुष्करमेव तत्, अन्तराह्लादाभावात्' इति सम्यक्पदेन व्यज्यते। भणितं च ग्रन्थकृता ललितविस्तरायाम्— "प्रकृतिसुन्दरं चिन्तामणिरत्नकल्पं संवेगकार्यं चैतत्, इति महाकल्याणविरोधि न चिन्तनीयम्, चिन्तामणिरत्नेऽपि सम्यग्ज्ञानगुण एव, श्रद्धाद्याशयभावतोऽवधिविरहेण महाकल्याणसिद्धेः" इति विभावनीयम्। प्रत्युताऽतः— मुक्त्यर्थानुष्ठानात्, अन्यत्— विपरीतानुष्ठानम्, हेयवस्तुप्रसाधकम्— आयत्यां सुदुःसहविचित्रदुःखप्रदम्, तदात्वेऽपि दुष्करं— चित्तार्तिप्रदं विवेकिन इति। अत एव प्राणात्ययेऽपि विषभक्षणमिव नाकार्यमाद्रियन्ते धीराः, अनिष्टफलावश्यंभावप्रतिसंधानजनितदुःखस्य प्रवृत्तिप्रतिबन्धकत्वादिति स्मर्तव्यम्॥१७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेवानिष्टवियोगोत्तरफललोभाद् निदर्शनान्तरेण समर्थयन्नाह—

व्याधिग्रस्तो यथारोग्यलेशमास्वादयन्बुधः। कष्टेऽप्युपक्रमे धीरः सम्यक्प्रीत्या प्रवर्तते॥१८॥

व्याधिग्रस्तः– विषमज्वरादिरोगपीडितः पुरुषः, यथा कुतश्चिदुपक्रमात्, आरोग्यलेशं– स्वल्पमपि नीरुग्भावम्, आस्वादयन्– अतिपिपासितजललवास्वादप्रायमनुभवन्, बुधः– हिता-ऽहितज्ञः, कष्टेऽपि– शरीरोपतापकारिण्यपि, उपक्रमे– तप्तकटुकौषधपानादौ निःशेषव्याधिघातनसमर्थे, धीरः– अक्षोभ्यसत्त्वः, सम्यक्प्रीत्या– उपायविषयदृढेच्छाप्रतिबन्धेन, प्रवर्तते, भाव्यारोग्यस्वभावत्वात् ॥ १८ ॥

दार्ष्टान्तिकयोजनामाह—

संसारव्याधिना ग्रस्तस्तद्वज्ज्ञेयो नरोत्तमः। शमारोग्यलवं प्राप्य भावतस्तदुपक्रमे ॥१९॥

संसारव्याधिना– संसाररोगेण, ग्रस्तः– पीडितः, नरोत्तमः– आसन्नभव्यः, तद्वज्ज्ञेयः प्रवृत्तिं प्रतीत्य । किं कृत्वा, क्व च? इत्याह– शमारोग्यलवम्– अपूर्वकरणाद्युपक्रमजनितमिथ्यात्वा-ऽनन्तानुबन्धिकषायोपशमजनितं शमारोग्यस्य लेशम्, प्राप्य, भावतः– फलाभिष्वङ्गात्, तदुपक्रमे– अशेषसंसारव्याध्यौषधभूते तीव्रानुष्ठाने ॥ १९ ॥

ततः किम्? इत्याह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवर्तमान एवं च यथाशक्ति स्थिराशयः। शुद्धं चारित्रमासाद्य केवलं लभते क्रमात्॥२०॥

एवं च– उक्तेन प्रकारेण मुक्तौ रागप्रतिबन्धात्, यथाशक्ति– स्वशक्त्यनुसारेण, प्रवर्तमानः, स्थिराशयः– दुर्लेश्याऽक्षोभ्यप्रशस्तपरिणामः, शुद्धं– निर्मलम्, चारित्रमासाद्य, क्रमात्– ध्यानारोहपरिपाटीतः, केवलं लभते। तथाहि— लेश्याविशुद्ध्या, भावनाहेतुकसाम्यहेतुकराग-द्वेषजयेन वा कृतमनःशुद्धिर्मैत्री-प्रमोद-कारुण्य-माध्यस्थ्यपवित्रितचित्तो भावितात्मा पर्वतगुहा-जीर्णोद्यान-शून्यागारादौ मनुष्यापातविकलेऽवकाशे मनोविक्षेपनिमित्तशून्ये सत्त्वोपघातरहित उचिते शिलातलादौ यथासमाधानं विहितपर्यङ्काद्यासनः "जोगाण[1] समाहाणं जह होइ तहा पयइअव्वं" इति वचनात्, मन्द-मन्दप्राणापानप्रचारः, अतिप्राणनिरोधे चेतसो व्याकुलत्वेनैकाग्रतानुपपत्तेः, "ऊसासं[2] ण णिरुंभइ" इत्यादिवचनप्रामाण्यात्, निरुद्धलोचनादिकरणप्रचारो हृदि ललाटे मस्तकेऽन्यत्र वा यथापरिचयं मनोवृत्तिं प्रणिधाय प्रसन्नवदनः पूर्वाभिमुख उदङ्मुखो ध्यायति धर्म्यम्। तत्र बाह्याध्यात्मिकभावानां याथात्म्यं धर्मस्तस्मादनपेतं धर्म्यम्। तच्च द्विविधम्– बाह्यम्, आध्यात्मिकं च। तत्र सूत्रा-ऽर्थपर्यावर्तन-दृढव्रतता-शीलानुराग-निभृतकाय-वाग्व्यापारादिरूपं बाह्यम्। आध्यात्मिकं चात्मनः स्वसंवेदनग्राह्यम्, अन्येषामनुमेयम्। तच्च तत्त्वार्थसंग्रहादौ संक्षेपतश्चतुर्विधमुक्तम्। अन्यत्र दशविधम्, अपायो-पाय-जीवा-ऽजीव-विपाक-विराग-भव-संस्थाना-ऽऽज्ञा-हेतुविचयभेदात्।

---

१ योगानां समाधानं यथा भवति तथा प्रयतितव्यम्। २ उच्छ्वासं न निरुन्ध्यात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रापाये विचयो विचारो यस्मिंस्तदपायविचयम्। एवमन्यत्रापि योज्यम्। 'दुष्टानां मनो-वाक्-कायव्यापारविशेषाणामपायः कथं नु नाम मे स्यात्, यद्वशात् प्राप्तेऽपि सौराज्ये भिक्षायै बालिश इव स्वायत्तेऽपि मोक्षे भवाय भ्रान्तवानस्मि?' इत्येवंभूतः संकल्पप्रबन्धः, दोषपरिवर्जनपरिणतेः कुशलप्रवृत्तित्वादपायविचयम्। तेषामेव कुशलानां स्वीकरणमुपायः, 'स कथं नु मे स्यात्, यतो भवति मोहपिशाचादात्मरक्षा?' इति संकल्पप्रबन्ध उपायविचयम्। असंख्येयप्रदेशात्मक-साकारा-ऽनाकारो-पयोगित्वा-ऽनादित्व-कृतकर्मफलोपभोगित्वादिजीवस्वरूपानुचिन्तनं स्वात्ममात्रप्रतिबन्धौपयिकं जीवविचयम्। धर्मा-ऽधर्मा-ऽऽकाश-काल-पुद्गलानां गति-स्थित्य-ऽवगाहना-वर्तना-ग्रहणगुणानामनन्तपर्यायात्मकानामजीवानामनुचिन्तनं शोका-ऽऽतङ्कनिदानदेहात्माद्यभेदभ्रमापनोदक्षममजीवविचयम्। मूलोत्तरप्रकृतिभेदभिन्नस्य पुद्गलात्मकस्य कर्मणो मधुरकटुफलस्याऽऽऽर्हतः संपदेमा च नारकविपदेकातपत्रसाम्राज्यप्रसरस्य विपाकचिन्तनं कर्मफलाभिलाषवैमुख्यविधायि विपाकविचयम्। 'कुत्सितमिदं शरीरं शुक्रशोणितसमुद्भूतमशुचिभृतं वारुणीघटोपममशुचिपरिणामि च यत्र क्षिप्तमात्राण्येव मिष्टान्नान्यपि विष्टासाद् भवन्ति, मूत्रसाच्चामृतान्यपि। तथाऽनित्यमपरित्राणं च न खलु समुपस्थिते यमातङ्के पिता, माता, भ्राता, स्वसा, स्नुषा, तनयो वा त्रातुमीष्टे। तथा, गलदशुचिनवच्छिद्रतयाऽशुचि, नात्र किञ्चित् कमनीयतरमस्ति। किंपाकफलोपभोगोपमा विपाककटवः प्रकृत्या भङ्गुराः पराधीनाः संतोषामृतास्वादपरिपन्थिनः सद्भिर्निगदिता विषयाः, तदुद्भवं च सुखं लालापातनाद् बालानां दुग्धास्वादसुखवदपारमार्थिकमिति नात्राऽऽस्था विवेकिनां युक्ता। विरतिरेवातः श्रेयस्कारिणी। प्रज्वलितज्वलनकल्पो ह्ययं गृहनि-

१ ख. ग. घ. च. 'दिस्रक्' । २ पञ्चम्यन्तेन पाठेन भाव्यं स्यात्, अन्यथावाङो योगात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वासः, यत्र दारुदाहं दहन्ति विषयस्निग्धानीन्द्रियाणि, प्रसरति च धूमधारेवाज्ञानपरम्परा, धर्ममेघ एव तद्विध्यापनाय पटुरिति तत्रैव प्रयत्न उचित इत्यादि रागहेतुविरोधानुचिन्तनं साक्षादेव समुल्लसितपरमानन्दास्वादं वैराग्यविचयम् । प्रेत्य स्वकृतकर्मफलोपभोगार्थं प्रादुर्भावः, तत्र चारघट्टघटीयन्त्रवद् मूत्र-पुरीषा-ऽन्त्रमयदुर्गन्धिजठरकोटरादिष्वजस्रमावर्तमानस्य स्वकृतभोक्तुर्जन्तोर्न कश्चित् सहाय इत्यादि भवसंक्रान्तिपर्यालोचनं सत्प्रवृत्तिहेतुभवनिर्वेदनिदानं भवविचयम् । अधो वेत्रासनसमः, मध्ये झल्लरीनिभः, अग्रे मुरजसंनिभो लोकश्चतुर्दशरज्ज्वात्मक इत्यादि संस्थानानुचिन्तनं विषयान्तरसंचारविरोधि संस्थानविचयम् । हेतू-दाहरणादिसद्भावेऽपि बुद्ध्यतिशयविकलैः परलोक-बन्ध-मोक्ष-धर्मा-ऽधर्मादिभावेष्वतीन्द्रियत्वादत्यन्तदुःखबोधेष्वाप्तप्रामाण्यात् तद्विषयं तद्वचनं नानृतमित्यनुचिन्तनं सकलप्रवृत्तिजीवातुश्रद्धासंतत्यविच्छेदकरमाज्ञाविचयम् । आगमविषयविप्रतिपत्तौ तर्कानुसारिबुद्धेः पुंसः स्याद्वादप्ररूपकागमस्य कष-च्छेद-तापशुद्धितः समाश्रयणीयत्वगुणानुचिन्तनं विशिष्टश्रद्धाभिवृद्धिकरं हेतुविचयम् ।

तदेवंविधधर्मध्यानरूपसंवरमाहात्म्याद् निर्जीर्णबहुकर्मणः पीत-पद्म-सितलेश्याबलाधानवतोऽप्रमत्तसंयतस्य कषायदोषमलापगमात् शुचित्वं भवति । ततश्चरमशरीरः परमशुक्ललेश्याकृतापूर्वस्थिति-रसघातगुणश्रेणिगुणसंक्रमस्थिति-बन्धादिक्रमो वक्रामुपशमश्रेणीं विहाय ऋज्वीं क्षपकश्रेणिं प्रतिपन्न आद्यं शुक्लध्यानं ध्यायति पृथक्त्ववितर्कसवीचाराख्यम् । तत्र पृथक्त्वं नानात्वम्, वितर्कः श्रुतज्ञानम्, तच्च पूर्वगतमन्यद् वा, न तु पूर्वगतमेव, माष-तुष-मरुदेव्यादौ व्यभिचारात्, वीचारोऽर्थ-व्यञ्जन-योगसंक्रान्तिः, तथाहि– अयमेकं द्रव्यपरमाणुं भावपरमाणुं वाऽवलम्ब्योत्पाद-स्थिति-भङ्गादीन् पर्यायांश्चिन्तयन्नर्थाद् व्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ञ्जने, व्यञ्जनाद् वाऽर्थे, मनोयोगात् काययोगे वाग्योगे वा, काययोगाद् मनोयोगे वाग्योगे वा, वाग्योगाद् मनोयोगे काययोगे वा संक्रामतीति । न चैवमर्थ-व्यञ्जनयोर्योगान्तरेषु संक्रमणात् कथं मनःस्थैर्यम्, तदभावाच्च कथं ध्यानत्वम् ? इत्याशङ्कनीयम्, एकद्रव्यविषयत्वेन मनःस्थैर्यसंभवात्, ध्यानत्वाविरोधात् । न चान्यद्रव्यचिन्तानन्तरितत्वरूपचिन्तास्थैर्योपपत्तावपि योगान्तरानन्तरितत्वरूपयोगस्थैर्यानुपपत्तिरिति शङ्कनीयम्, तदभावेऽपि ध्यानत्वनियतप्रयत्नदार्ढ्यस्य गात्र-दृष्टिपरिस्पन्दाभावाद्यभिव्यङ्ग्यातिशयरूपस्यानपायात्, उक्तविशेषस्य च द्वितीयभेदनियतत्वादिति । तदिदं केषाञ्चिदेकयोगभाजां, भङ्गिकश्रुतं पठतां च योगत्रयभाजामपि न विरुध्यत इति । ततोऽसावासन्नकल्याणः समुत्खातप्रचुरापायो द्वितीयं शुक्लध्यानमवलम्बत एकत्ववितर्कसविचाराख्यम् । इदं ह्येकपरमाण्वादावेकमेव पर्यायमालम्ब्यत्वेनादायाऽऽहितान्यतरैकयोगबलमाश्रितव्यतिरिक्ताशेषार्थ-व्यञ्जन-योगसंक्रमविषयचिन्ताविक्षेपरहितमत्यन्तमेकाग्रम्, आद्यशुक्लेऽर्थ-व्यञ्जन-योगेषु यथासंक्रमक्रमं निवृत्त्यभ्यासादनु सर्वविषयेभ्यो व्यावर्त्याणुमात्रे मनसो धरणात्, मान्त्रिकेण मन्त्रबलात् सर्वाङ्गगतस्य विषस्य दंशदेशे धरणवत्; सुकरं हि ततस्तदपनयनमिति । अत्र खलु ज्ञान-दर्शन-चारित्राण्येकीभावं प्रकर्षं च यान्ति, बोध-श्रद्धाना-ऽनाश्रवरूपत्वात्, फलाभिमुखत्वात्, वीतरागभावाच्च । ततोऽस्मात् परमनिर्जरारूपाद् घातिकर्मचतुष्टयक्षये परमशुक्लध्यानद्वयस्याप्रे प्राप्यत्वाद् ध्यानान्तरे वर्तमानः केवली भवति कृतकृत्यः सकलसुरनिकायनायकपूजितचरणाम्भोज इति ॥ २० ॥

ततः किम् ? इत्याह—

१ ख. ग घ. च. 'क्रमं' । २ क. ख. ग. घ. च. 'दसस' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः स सर्वविद् भूत्वा भवोपग्राहिकर्मणः । ज्ञानयोगात्क्षयं कृत्वा मोक्षं प्राप्नोति शाश्वतम् ॥

ततः– केवललाभोत्तरम्, सः– महात्मा, सर्वविद् भूत्वा– केवलीभूय, ''भूत्वा घटस्तिष्ठति' इत्यादाविवोत्पत्त्यनन्तरं निष्ठा' इति व्यवहारनयाभिप्रायादित्थमुक्तिः, भवोपग्राहिकर्मणः– जात्यपेक्षयैकवचनम्, भवोपग्राहिणां वेदनीया-ऽऽयु-र्नाम-गोत्राणाम्, ज्ञानयोगात्– समुद्धात-चरमशुक्लद्वयध्यानरूपावस्थाविशिष्टज्ञानरूपादेव योगात्, क्षयं कृत्वा– आत्मनः पृथग्भावं विधाय, शाश्वतम्– अपुनरावृत्तेर्नित्यम्, मोक्षं– महानन्दम्, प्राप्नोति; तथाहि— अयं खलु भगवान् क्षायिकज्ञान-दर्शन-चारित्र-वीर्यातिशयसंपत्समन्वितो जघन्यतोऽन्तर्मुहूर्तम्, उत्कर्षतश्च देशोनपूर्वकोटिं भवोपग्राहिकर्मवशाद् विहरन् यदाऽन्तर्मुहूर्त-परिशेषायुष्कस्तत्तुल्यस्थितिकनाम-गोत्र-वेदनीयश्च भवति तदा मनो-वाग्-बादरकाययोगनिरोधादुपगतसूक्ष्मकाययोगस्तृतीयं सूक्ष्मक्रियाऽप्रतिपाति शुक्लध्यानमध्यास्ते; तथाहि– प्रथमं बादरकाययोगेन बादरौ वाग्-मनसयोगौ निरुणद्धि । ततः सूक्ष्मकाययोगेन बादरकाययोगं निरुणद्धि; सति तस्मिन् सूक्ष्मयोगस्य निरोद्धुमशक्यत्वात्; न हि धावन् वेपथुं वारयतीति । ततश्च सर्वबादरयोगनिरोधानन्तरं सूक्ष्मेण काययोगेन सूक्ष्मौ वाग्-मनसयोगौ निरुणद्धीति । यदा त्वन्तर्मुहूर्तायुष्काधिकतरस्थितिशेषकर्मत्रयो भवत्यसौ, तदा तत्समीकरणाय स्थितिघात-रसघाताद्यर्थं समुद्धातं करोति; तदुक्तम्—

"यस्य पुनः केवलिनः कर्म भवत्यायुषोऽतिरिक्ततरम् । स समुद्धातं भगवानथ गच्छति तत्समीकर्तुम् ॥ १ ॥"

सम्यग्– अपुनर्भावेन, उत्– प्राबल्येन हननं समुद्धातः– शरीराद् बहिर्जीवप्रदेशानां निःसारणम् । अयं चात्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रमः– प्रथमसमये स्वदेहतुल्यविष्कम्भमूर्ध्वमधश्चायतं लोकान्तगामिनं जीवप्रदेशसंघातं दण्डाकारं केवली करोति, द्वितीयसमये तु तमेव दण्डं पूर्वापरादिग्द्वयप्रसारणात् पार्श्वतो लोकान्तगामिनं कपाटमिव कपाटं करोति, तृतीयसमये तु तदेव कपाटं दक्षिणोत्तरदिग्द्वयप्रसारणाद् मन्थानमिव मन्थानं करोति लोकान्तप्रापिणमेव। एवं च लोकस्य प्रायो बहु पूरितं भवति। चतुर्थसमये त्वनुश्रेणि गमनाद् मन्थान्तराण्यपूरितानि सह लोकनिष्कुटैः पूरयति। ततश्च सकलो लोको जीवप्रदेशैः पूरितो भवति। लोकपूरणश्रवणादेव हि परेषामात्मविभुत्ववादः समुद्भूतः; तथा चार्थवादः– "विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतःपात्" इत्यादि। तदा चासौ भवति समीकृतभवोपग्राहिकर्मा, विरलीकृतार्द्रशाटिकादिज्ञातेन क्षिप्रं तच्छोषोपपत्तेः। ततः पञ्चमसमये मन्थान्तराणि जीवप्रदेशरूपाणि सकर्मकाणि संकोचयति। षष्ठे समये मन्थानमुपसंहरति, घनतरसंकोचात्। सप्तमे समये कपाटमुपसंहरति, दण्डात्मनि संकोचात्। अष्टमसमये दण्डमुपसंहृत्य शरीरस्थ एव भवतीति।

समुद्घातकाले च मनो-वाग्योगव्यापारप्रयोजनाभावात् काययोगस्यैव केवलस्य व्यापारः। तत्रापि प्रथमा-ऽष्टमसमययोरौदारिककायप्राधान्यादौदारिककाययोग एव, द्वितीय-षष्ठ-सप्तमेषु समयेषु पुनरौदारिकाद् बहिर्गमनात् कार्मणवीर्यपरिस्पन्दादौदारिक-कार्मणमिश्रः, तृतीय-चतुर्थ-पञ्चमेष्वौदारिकाद् बहिर्बहुतरप्रदेशव्यापारादसहायकार्मणयोग एव परित्यक्तसमुद्घातश्च कारणवशाद् योगत्रयमपि व्यापारयति, यथाऽनुत्तरसुरपृष्टौ मनोयोगं सत्यं वाऽसत्यामृषं वा प्रयुङ्क्ते; एवमामन्त्रणादौ वाग्योगमपि; काययोगमपि फलकप्रत्यर्पणादाविति। ततोऽन्तर्मुहूर्तेन योगं निरुन्धानस्तृतीयं शुक्लध्यानभेदं परिसमापयति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः स्वात्मनैव काययोगमचिन्त्यवीर्यप्रभावाद् निरुन्ध्य समुच्छिन्नक्रियाऽनिवृत्तिसंज्ञं चतुर्थशुक्लध्यानभेदं ध्यायति ।

अमनस्कत्वात् कथं केवलिनो ध्यानम् ? इति पर्यनुयोग एवं प्रत्यभिदधाति– 'यथा कुलालचक्रे भ्रमणनिमित्त-दण्डाद्यभावेऽपि पूर्वाभ्यासाद् भ्रमणम्, तथा मनःप्रभृतिसर्वयोगोपरमेऽप्ययोगिनो ध्यानं भवति । तथा, यद्यपि द्रव्यतो योगा न सन्ति, तथापि जीवोपयोगरूपभावमनःसद्भावादयोगिनो ध्यानम् । यद्वा, ध्यानकार्यस्य कर्मनिर्जरणस्य हेतुत्वाद् ध्यानं तदुच्यते, यथा पुत्रकार्यादपुत्रोऽपि पुत्र उच्यत इति । अथवा, हर्यादिशब्दवद् ध्यानशब्दस्य नानार्थत्वाद् ध्यानं तत्; तथाहि– 'ध्यै चिन्तायाम्' 'ध्यै काययोगनिरोधे' 'ध्यै अयोगित्वे' वदन्ति हि––

"निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः । अनेकार्थाः स्मृता लोके पाठस्तेषां निदर्शनम् ॥ १ ॥" इति ।

जिनागमाद् वाऽयोगिनो ध्यानम्, इति । अत्र प्रथमो हेतुः कारणोपपत्तये, पूर्वसंस्काररूपहेत्वनपायात्; द्वितीयो लक्षणोपपत्तये, भावमनःस्थैर्यरूपलक्षणोपपत्तेः; तृतीयो व्यवहारोपपत्तये; चतुर्थः शब्दार्थोपपत्तये; पञ्चमश्च प्रमाणोपपत्तय इति द्रष्टव्यम् । वस्तुतः सुदृढप्रयत्नव्यापारविद्यमानयोगनिरोधानन्तरत्वमनुगतं ध्यानलक्षणम्; सुदृढत्वं च जातिविशेषः, तेन न समुद्घातादावतिव्याप्तिः; तथा च भाष्यकारः—

"[1]सुदढप्पयत्तवावारणं णिरोहो व विज्जमाणाणं । झाणं करणाण मयं ण य चित्तणिरोहमेत्तागं[2] ॥ १ ॥"

---

१ सुदृढप्रयत्नव्यापारणं निरोधो वा विद्यमानानाम् । ध्यानं करणानां मतं न च चित्तनिरोधमात्रकम् ॥ १ ॥ २ विशे० सिद्धनमस्कारप्रकरणे गाथा ४५ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विपश्चितमेतदन्यत्र । ततश्चतुर्थशुक्लभेदेन सकलभवविटापिदवानलकल्पेन भवोपग्राहीणि कर्माणि समन्ताद् भस्मसात्कृत्यौदारिक-तैजस-कार्मणानि शरीराणीह त्यक्त्वा प्रदेशान्तराणि चास्पृशन् ऋज्वा श्रेण्यैकेन समयेन याति सिद्धिक्षेत्रं साकारोपयोगोपयुक्तः। धर्मास्तिकायोपग्रहाभावाद् नोर्ध्वं गच्छति, गौरवाभावाच्च नाधो गच्छति, योगप्रयोगविगमाच्च नाधो गच्छति। ऊर्ध्वं गतिस्तु तस्य गौरवप्रतिपक्षभूतलाघवपरिणामाद् धूमस्येव; यद्वा सङ्गविरहेण, तथाविधपरिणामत्वात्; अष्टमृत्तिकालेपविलिप्तजलधौनिमग्नक्रमापनीतमृत्तिकालेपजलतलमध्योर्ध्वगामितथाविधालाबुफलस्येव; यद्वा, बन्धनस्य कर्मलक्षणस्य विरहात्, तथापरिणतेः, कोशबन्धनविमुक्तैरण्डफलवत्; यद्वा, वह्नेरूर्ध्वज्वलनस्वभाववदात्मन ऊर्ध्वगतिस्वभावत्वादिति ॥ २१ ॥

यदुक्तम्– "ज्ञानयोगात् क्षयं कृत्वा" इत्यादि, तत्र "[2]ज्ञानयोगस्तपः शुद्धम्" इत्यादिप्रागुक्तग्रन्थस्यैकवाक्यतानिरूपणं प्रतिजानीते—

ज्ञानयोगस्तपः शुद्धमित्यादि यदुदीरितम्। ऐदंपर्येण भावार्थस्तस्यायमभिधीयते॥२२॥

'ज्ञानयोगस्तपः शुद्धम्' इत्यादि यदुदीरितं पूर्वमुपन्यासग्रन्थे, ऐदंपर्येण–एकवाक्यतया, भावार्थः– फलीभूतोऽर्थः, तस्याऽयं– बुद्धिमत्यक्षः, अभिधीयते– सांप्रतं निरूप्यते ॥ २२ ॥

२ प्रथमस्तबके कारिका २१ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाहि—

ज्ञानयोगस्य योगीन्द्रैः परा काष्ठा प्रकीर्तिता। शैलेशीसंज्ञितं स्थैर्यं ततो मुक्तिरसंशयम्॥२३॥

ज्ञानयोगस्य– शुद्धतपोरूपस्य, परा काष्ठा– उत्कृष्टा कोटिः, प्रकीर्तिता, शैलेशीसंज्ञितं– शैलेशो मेरुस्तद्वन्निश्चलावस्था शैलेशः, शीलेशो वा भगवांस्तस्येयमन्यशीलशाल्यवस्थातिशायिन्यवस्था शैलेशी, सैव संज्ञा यौगिकी समाख्या जाता यस्य तत्, स्थैर्यम्– निवृत्तियत्नरूपं परमवीर्यम्। न चैवमयं न ज्ञानयोग इति शङ्कनीयम्; ज्ञानस्यावस्थारूपत्वात् शैलेश्याः, पाकरक्तताया इव घटस्य। ततः– शैलेश्यां काष्ठाप्राप्ताज्ज्ञानयोगात्, असंशयं ह्रस्वपञ्चाक्षरोद्गरणमात्रकालेन मुक्तिर्भवति ॥ २३ ॥

तस्य धर्मत्वादि साधयन्नाह—

धर्मस्तच्चात्मधर्मत्वान्मुक्तिदः शुद्धिसाधनात्। अक्षयोऽप्रतिपातित्वात्सदा मुक्तौ तथास्थितेः॥

तच्च– शैलेशीसंज्ञितं स्थैर्यं च, धर्मः, आत्मधर्मत्वात्– आत्मस्वभावत्वात्, शुद्धज्ञानवत्; मुक्तिदः– निर्वाणप्रदः स च धर्मः, शुद्धिसाधनात्– परमनिर्जरोत्पादनात्; तथा, अक्षयः– शाश्वतः, अप्रतिपातित्वात्– अनश्वरत्वात्; अनश्वरत्वं च सदा– नित्यम्, मुक्तौ तथास्थितेः– मुक्तस्य स्थिरभावेनावस्थानात्, स्थैर्यनिवृत्तावस्थैर्यस्य पुनरुन्मज्जनापत्तेः ॥ २४ ॥

न चैतदनार्षमित्याह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चारित्रपरिणामस्य निवृत्तिर्न च सर्वथा। सिद्ध उक्तो यतः शास्त्रे न चारित्री न चेतरः ॥२५॥

चारित्रपरिणामस्य– शैलेश्यवस्थाभाविनो विशिष्टस्थैर्यस्य, निवृत्तिः– नाशः, न च– नैव, सर्वथा– स्थैर्यरूपेणापि, किन्तु कथञ्चित्कर्मापगमनस्वभावत्वेन। कथमेतदेवम्? इत्याह– सिद्ध उक्तो यतः शास्त्रे– प्रवचने प्रज्ञापनादौ, न चारित्री न चेतरः– नाप्यचारित्री "[2]सिद्धे णो चरित्ती, णो अचरित्ती" इति वचनप्रामाण्यात् ॥ २५ ॥

मुक्तौ चारित्रानिवृत्तिमेव निदर्शनेन द्रढयितुमाह—

न चावस्थानिवृत्त्येह निवृत्तिस्तस्य युज्यते। समयातिक्रमे यद्वत् सिद्धभावस्य तत्र वै ॥२६॥

न चावस्थानिवृत्त्या– कर्मापगमस्वभावापगमलक्षणया, निवृत्तिस्तस्य– स्थैर्यपरिणामस्य, युज्यते, इह– मुक्तौ। किंवत्? इत्याह— समयातिक्रमे– प्रथमसमयातिक्रान्तौ, यद्वत्– यथा, सिद्धभावस्य– सिद्धत्वस्य, तत्र– मुक्तौ, वै– निश्चितम्। यथा हि सिद्धत्वं प्रथमसमयादिनिवृत्तितया नाशशीलं द्वितीयसमयादिभावितया चोत्पत्तिशीलमपि सिद्धत्वस्वरूपेण साद्यनन्तमेव तथा स्थैर्यमपि कर्मापगमनस्वभावत्वेन नश्वरमुत्तरस्वभावेन चोत्पत्तिशीलमपि स्थैर्यस्वरूपेण साद्यनन्तमविरुद्धमिति भावः।

[3]नन्वेवं स्थैर्यभावेन साद्यनन्तत्वासिद्धावपि चारित्रभावेन न तथात्वसिद्धिः। न हि स्थैर्यमेव चारित्रम्, प्राक् शैले-

१ सर्वत्र मूले 'न चरित्री' इति पाठः। २ सिद्धो नो चारित्री, नो अचारित्रः। ३ इतः 'सिद्धानां चारित्रं कथं सुश्रद्धानम्' इत्यन्तः 'सिद्धाचारित्रवादिपूर्वपक्षः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्यास्तदभावात्, किन्तु योगस्थैर्यं तत् । तच्च करणालम्बनसत्प्रवृत्त्य-ऽसन्निवृत्त्यन्यतरपरिणामरूपं, शैलेश्यामपि स्वरूपसत्, करणे काये स्थित्वैव सूक्ष्मकाययोगनिरोधात् परमचारित्रोपपत्तिः, सिद्धिगमनसमये च शरीरत्यागात् तदालम्बनचारित्रस्वभावापगमः, दण्डापगमे तदालम्बनदण्डित्वस्वभावापगमवदुपपत्तेः । द्रव्यरूपेणान्वयं तु न वारयामः । न चैवं योगपरिणामरूपत्वात् केवलिनश्चारित्रस्यौदयिकत्वं स्यात्, लेश्यावदिति वाच्यम्; नामकर्मोदयसव्यपेक्षत्वेऽपि तस्य मोहक्षयप्रधानहेतुकत्वेन क्षायिकत्वेनैव व्यपदेशात्, इन्द्रियपर्याप्त्युदयजन्येऽपीन्द्रिये प्रधानक्षयोपशमहेतुकत्वेन क्षायोपशमिकत्वेनैव व्यपदेशवत् । अत एव न कर्मकृतभावत्वेन तस्य धर्मत्वानुपपत्तिः, क्षायिकत्वेन तदुपपत्तेः । न चैवं स्वरूपत आश्रवत्वमप्यस्य शङ्कनीयम्; योगस्य तथात्वेऽपि योगानिर्गतपरिणामरूपस्य तस्यातथात्वात् ।

अपि च, भाक्तनं चारित्रमेवोत्कृष्यमाणं क्षायोपशमिकादिभावं परित्यज्य क्षायिकभावेन परिणमते, न तु निर्मलीभवद्रत्नमिव प्रागवस्थितस्वरूपात् प्रच्यवते, संज्ञान्तरोपनिबन्धस्य तत्त्यागानियतत्वात् । भाक्तनं च तद् मूलगुणविषययोगस्थैर्यमेव शुभवीर्यरूपं दृष्टम्, वज्रस्थानीयस्य तस्य ज्वलनजनितोपतापरूपोत्तरगुणास्थिरभावमूर्तिकातिचारादिना भङ्गायोगात्; इत्थमेव वक्रजडानां चण्डानां च चण्डरुद्रप्रभृतीनां तदुपपत्तेः; न तु शुद्धोपयोगरूपम्, आत्मस्थैर्यरूपं वा, तदोक्तातिरिक्ततदसिद्धेः, उपयोगरूपत्वे चारित्रस्य जिनानामुपयोगत्रयादिप्रसक्त्या व्यवस्थाविप्लवाच्च । शुभवीर्यरूपं च तत् करणनिमित्तकप्रवाहपतितपरिणामरूपत्वाद् निमित्तेन सहैव नश्यति । न चैवं केवलज्ञानस्यापि शरीरनिमित्तकत्वात् तन्नाशेन सह नाशप्रसङ्गः, तथाच जैनमतस्य ब्राह्ममताद्विशेषः स्यादिति शङ्कनीयम्; तत्रापेक्षामात्रेण शरीरस्य हेतुत्वेऽप्यालम्बनतयाऽहेतुत्वात् । इष्यते हि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काययोगनिरोधाख्यकायव्यापारोत्कर्षप्रयुक्तोत्कर्षभागित्वं चारित्रे केवलिनां न तु ज्ञान इति। निरोधो न कायव्यापार इति चेत्। न, संयोगादिवत् तस्य द्व्याश्रयत्वात्; अन्यथा 'कायस्य निरोधः' इति संबन्धायोगात्। क्षायिकत्वे कथं चारित्रस्योत्तरकालं हेत्वन्तरापेक्ष उत्कर्षः? इति चेत्। इदमुभयसमाधेयम्, मोहक्षयाद् दोषापगमेन स्वरूपशुद्धितारतम्यविश्रान्तावपि परमनिर्जरारूपफले योगानां प्रतिबन्धकत्वात् तदपगमलक्षणोत्कर्षो व्यवहाराद् न विरुध्यते, निश्चयतस्तु ऋते कालाद् न तत्रान्यप्रतिबन्धः। तत्प्रतिबन्धश्च तत्त्वतोऽप्रतिबन्धः। तथापरिणामोपयोगित्वात् तस्येति न विरोध इति चेत्। इदमप्युभयमते तुल्यम्। तस्माज्ज्ञानानाशेऽपि शरीरेण सह चारित्रनाशोऽवश्यमभ्युपेयः।

किञ्च, शुभवीर्यरूपत्वाच्चारित्रस्य कथमवीर्याणां सिद्धानां तत्सद्भावः सुश्रद्धानः?। न च सिद्धानामवीर्यत्वमसिद्धम्, "[1]तत्थ णं जे ते असंसारसमावण्णगा ते णं सिद्धा, सिद्धा णं अवीरिया" इति प्रज्ञप्तिवचनात्। न च सकरणवीर्याभावादवीर्याः सिद्धा इति व्याख्येयम्, सिद्धानां लब्धिवीर्यसत्त्वे '[2]सिद्धा णं लद्धिवीरिएणं सवीरिया, करणवीरिएणं अवीरिया' इति सूत्रकल्पनप्रसङ्गात्; यथा "[3]तत्थ णं जे ते सेलेसीपडिवन्नया ते णं लद्धिवीरिएणं सवीरिआ, करणवीरिएणं अवीरिआ" इति। किञ्च,

"[4]तस्सोदइआइया भव्वत्तं च विणिवत्तए समयं। सम्मत्त-नाण-दंसण-सुह-सिद्धत्ताइं मोत्तूणं[5] ॥ १ ॥"

---

१ तत्र ये तेऽसंसारसमापन्नकास्ते सिद्धाः, सिद्धा अवीर्याः। २ सिद्धा लब्धिवीर्येण सवीर्याः, करणवीर्येणावीर्याः।
३ तत्र ये ते शैलेशीप्रतिपन्नकास्ते लब्धिवीर्येण सवीर्याः, करणवीर्येणावीर्याः। ४ विशे० सिद्धनमस्कारप्रकरणे गाथा ६१।
५ तस्यौदयिकादिका भव्यत्वं च विनिवर्तते समकम्। सम्यक्त्व-ज्ञान-दर्शन-सुख-सिद्धत्वानि मुक्त्वा ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति विशेषावश्यके चारित्र-वीर्ययोर्निवृत्तिरर्थादुक्तैव; सूत्रेऽपि "[1]औपशमिकादि-भव्यत्वाभावाच्चान्यत्र केवलसम्यक्त्व-ज्ञान-दर्शन-सिद्धत्वेभ्यः" इत्यत्र । अत्र हि औपशमिक-क्षायोपशमिकौ-दयिकभावानां दर्शन-ज्ञान-गत्यादीनां, पारिणामिकभावस्य च भव्यत्वस्य, 'अन्यत्र केवल०' इत्यादिना चानन्तज्ञान-दर्शन-सम्यक्त्वानामनिवृत्त्यभिधानात्, एकविशेषनिषेधस्य तदितरविशेषाभ्यनुज्ञाफलकत्वाद् दानादिलब्धि-चारित्ररूपस्य च क्षायिकभावस्य निवृत्तिर्लभ्यत इति । सिद्धत्वमेव च भावतः सुखमिति विवक्षया न सुखानिवृत्त्यनुपग्रहः । सुख-सिद्धत्वयोर्निवृत्तिश्चानुत्पत्तिरूपा प्रतिषिध्यत इति नाप्रसक्तप्रतिषेधः । अत एव च—

"[2]सम्मत्त-चरित्ताइं साई संतो अ खओवसमिओ अ । दाणाइलद्धिपणगं चरणं पिय खाइओ भावो ॥१॥"

इति ग्रन्थेन दानादिलब्धिपञ्चक-चारित्ररूपस्य क्षायिकभावस्य स्फुटमौपशमिकसम्यक्त्व-चारित्रभाववत् सादिसान्तत्वं भाष्यकृतोक्तम् । न चावस्थानाशेन शाश्वतस्यापि चारित्रस्य सादिसान्तत्वमुपपद्यते, भवस्थत्वावस्थानाशेन केवलज्ञानस्यापि तत्त्वप्रसङ्गात्, केवलभावेन केवलस्य शाश्वतत्ववादिनाऽप्यवस्थाविशेषनियतनाशो-त्पादोपगमात्; अन्यथा वैलक्षण्यासिद्धेः; तथा च सम्मतिकारः—

"[3]जे संघयणाईआ भवत्थकेवलिविसेसपज्जाया । ते सिज्झमाणसमए ण होंति विगइं तओ होइ ॥१॥

---

१ तत्त्वार्थाधिगमसूत्रे १०,४ । २ सम्यक्त्व-चारित्रे सादिः सान्तश्च क्षायोपशमिकश्च । दानादिलब्धिपञ्चकं चरणमपि च क्षायिको भावः ॥ १ ॥
३ ये संहननादिका भवस्थकेवलिविशेषपर्यायाः । ते सिध्यमानसमये न भवन्ति विगतिस्ततो भवति ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धत्तणेण य पुणो उप्पण्णो एस अत्थपज्जाओ। केवलभावं तु पडुच्च केवलं दाइअं सुत्ते[2] ॥ २ ॥"

अथ चरण-दानादिलब्धीनां विकारिणीनामेव तदानीमुपक्षयः, अविकारिणीनां तु सुतरां संभवः, विकारिगुणोपक्षयेऽविकारिगुणप्रादुर्भावनियमादिति चेत् । किमिदं विकारित्वं– शरीराद्यपेक्षया प्रवर्तमानत्वं वा, तन्नियतापेक्षोत्पत्तिकत्वं वा, फलावच्छिन्नत्वं वा? । नाद्यः, केवलज्ञानादेरपि तथाभावप्रसङ्गात् । न द्वितीयः, तन्नाशनियतनाशप्रतियोगित्वस्यैवेत्थं प्रसङ्गात् । नापि तृतीयः, फलानवच्छिन्नतदुत्पत्तौ मानाभावात्, चारित्रस्य फलावच्छिन्नत्वनियमात् । अथोत्तरफलानवच्छिन्नत्वमविकारित्वम्, तच्चोत्पत्युत्तरसमयावच्छेदेन फलाभाववत्त्वम्, तेन नोत्तरफलसिद्ध्य-ऽसिद्धिभ्यां व्याघातः। मानं च चारित्रस्य तथात्वे रत्नत्रयसाम्राज्यस्य मोक्षसामग्रीत्वोक्त्यन्यथानुपपत्तिरेव; केवलोत्पत्तिसमये काष्ठाप्राप्तयोर्ज्ञान-दर्शनयोरुत्पादेऽपि चारित्रस्य तथाभूतस्यानुत्पादादेव मोक्षविलम्बात्; यथा खल्वचौरोऽपि चौरसंसर्गितया 'चौरः' इति व्यपदिश्यते तथा तत्त्वतश्चारित्राप्रतिपन्थित्वेऽपि तत्प्रतिपन्थिमोहसाहचर्याद् योगानां तथा व्यपदिश्यमानानां प्रतिबन्धकानामपगमादुत्पन्नेन परमयथाख्यातचारित्रेण सामग्रीसंपत्त्या मोक्षोत्पत्तेर्यथाख्यातत्वेनैव तस्य पञ्चस्वन्तर्भावाच्च न विभागव्याघात इति चेत् । न, तत्त्वतो योगानां चारित्राप्रतिपन्थित्वेन तदपगमे परमयथाख्यातचारित्रानुत्पत्तेः, उत्पत्तौ वा यथाख्यातात्तस्य गतिज्ञानादेः केवलज्ञानस्येव विजातीयत्वेन विभागव्याघातात् । ज्ञान-क्रिययोर्नयभेदादन्तक्रियाद्वारा शैलेश्यामवस्थाभेदाद् वा मोक्षजनकत्वोपपत्तेः, सर्वसंवरस्याप्यर्थसिद्धत्वात्, तदर्थं हेतुभेदकल्पनानौचित्यात्, क्षायिकस्यापि सतः शैलेश्यर्वाचीनचारित्र-

१ सिद्धत्वेन च पुनरुत्पन्न एषोऽर्थपर्यायः । केवलभावं तु प्रतीत्य केवलं दर्शितं सूत्रे ॥ २ ॥ २ सम्मतिप्रकरणे गाथा ८९, ९० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिणामस्य निवृत्त्युपगमे चारित्रस्य सामान्यतः सादिसान्तत्वप्रतिपादकवचनेषु चारित्रपदस्य परमयथाख्याततिरिक्तचारित्रपरत्वस्यान्याय्यत्वाच्चेति दिग् ।

नन्वेवं चारित्रं क्रियारूपं पर्यवसन्नम्, श्रूयते चाक्रियायाः सिद्धिगमनपर्यवसानफलत्वम्; तथा चार्षम्– "सा णं भंते ! अकिरिया किंफला ? । गोयमा ! सिद्धिगमणपज्जवसाणफला पन्नत्ता" इति कथं न विरोधः ? इति चेत् । न, अन्तक्रियाया एवैजनादिव्यापाराभावेनाक्रियात्वेन, चरमकर्मत्वेन च "ज्ञान-क्रियाभ्यां मोक्षः" इत्यादौ क्रियात्वेनोक्तेरविरोधात् । अथ सिद्धिगमनसमये चारित्रनाशोपगमे चारित्रस्य मोक्षहेतुत्वं न घटेत, कार्यकालेऽसता कार्यस्योत्पादयितुमशक्यत्वात्, कार्यानुकृतान्वय-व्यतिरेकित्वाभावात् । न च कार्याव्यवहितपूर्ववृत्तित्वमेव कारणत्वम्, न तु तत्र कार्यकालवृत्तित्वमपि निविशते, मानाभावात्, गौरवात्, प्रागभावादीनामकारणत्वप्रसङ्गाच्चेति न दोष इति वाच्यम्; तथापि निश्चयनयानुपस्कारात्, तेन कार्यकालसंबद्धस्यैव हेतोर्जनकत्वाभ्युपगमात्; इति चेत् । न, परिशुद्धनिश्चयनयेन शैलेशीचरमसमय एव मोक्षोत्पत्त्यभ्युपगमात्, तदा चारित्रस्यानपायात्; 'इह बोंदिं त्यक्त्वा तत्र गत्वा सिध्यति' इत्यत्र निश्चयेन बोंदित्यागसमये, व्यवहारेण च तत्र गतिसमये मोक्षोत्पादस्याभ्युपगमात् । न च तदा चारित्रस्य विगच्छत्त्वाद् विगतत्वेनासत्त्वात् कार्योत्पत्तिविरोधः, तदा मोक्षस्याप्युत्पद्यमानत्वेनोत्पन्नत्वादविरोधात्, एकदा चारित्रनाश-मोक्षोत्पादयोः परभवप्रथमसमये प्राग्देहपरिशाटनो-त्तरदेहसंघातनयोरिवोपपत्तेः, तदागमः—

---

१ सा भगवन् ! अक्रिया किंफला ? । गौतम ! सिद्धिगमनपर्यवसानफला प्रज्ञप्ता । २ ख.ग.घ.च. 'तद्विरो' । ३ इतः 'जनकत्वाभ्युपगमात्' इत्यन्तः पूर्वपक्षः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"[1]जम्हा विगच्छमाणं विगयं, उप्पज्जमाणमुप्पण्णं । तो परभवाइसमए मोक्खा-दाणाण ण विरोहो ॥१॥" इति ।

अथाचारित्रस्य सतः सिद्धस्य चारित्रावरणकर्मणः पुनर्बन्धप्रसङ्ग इति चेत् । न, अविरतिप्रत्ययत्वात् तस्य, योगादिसामग्रीसव्यपेक्षत्वाच्च । न च चारित्राभावे[2] एवाविरतिसिद्धानामविरतत्वव्यपदेशप्रसङ्ग इति वाच्यम्; निर्जराजनकविरतिपरिणामवदविरतिपरिणामस्य विचित्रकर्मबन्धजनकस्य स्वतन्त्रत्वात्, तस्य विरतिप्रागभावास्कन्दितत्वेऽपि तथाविधविरतिध्वंसानास्कन्दितत्वात् । अत एव '[4]सिद्धो नो चरित्री नो अचरित्री' इत्यागमः संगच्छते, चारित्राभावाद् 'नोचारित्री' इति, अविरत्यभावाच्च 'नो अचारित्री' इत्युक्तेरुपपत्तेः, 'अचारित्री' इत्यत्र नञो विरुद्धार्थत्वात् । अत एव भव्यत्वाभाव-भव्यत्वविरुद्धाभव्यत्वाभावाभ्यां नोभव्यत्व-नोअभव्यत्वमपि तस्य[3] तत्र तत्रोक्तम् । यदि च चारित्रावस्थाभावादेव नोचारित्रत्व-नोअचारित्रत्वं सिद्धस्योच्यते, तदा ज्ञानावस्थाभावाद् नोज्ञानित्व-नोअज्ञानित्वमपि तस्य प्रतिपाद्यमानं न विरुध्येत ।

अपिच, अनार्षं सिद्धानां चारित्रकल्पनम्, "[5]इहभविए भंते ! चरित्ते, परभविए चरित्ते, तदुभयभविए चरित्ते ? । गोयमा ! इहभविए चरित्ते, णो परभविए चरित्ते, णो तदुभयभविए चरित्ते" इति प्रश्न-निर्वचनप्रबन्धेन चारित्रपरिणाममादायैव प्रेत्य देवलोकेषु मुक्तौ वा नोत्पाद इत्यभिप्रायेण भगवता चारित्रस्यापारभविकत्वोपदेशात् । न च चारित्रस्य जीवलक्षण-

१ यस्माद् विगच्छद् विगतम्, उत्पद्यमानमुत्पन्नम् । ततः परभवादिसमये मोक्षा-ऽऽदानयोर्न विरोधः ॥ १ ॥ २ सप्तम्यन्तम् । ३ तस्य-सिद्धस्य ।

४ "सिद्धे नो भव्वे, नो अभव्वे" इत्यादिना प्रवचने । ५ इहभविकं भगवन् ! चारित्रम्, परभविकं चारित्रम्, तदुभयभविकं चारित्रम् ? । गौतम ! इहभविकं चारित्रम्, नो परभविकं चारित्रम्, नो तदुभयभविकं चारित्रम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वाभिधानाद् (न ?) मुक्तावपि तदनुवृत्तिः शङ्कनीया, तपःप्रभृतेरप्यनुवृत्तिप्रसङ्गात्; 'लक्ष्यतेऽनुमाप्यतेऽनेनेति लक्षणं लिङ्गम्' इत्यर्थेऽविरोधाच्च, लिङ्गाभावे लिङ्ग्यभावनियमाभावात् । न च बहिर्लक्षणाभावेऽप्यान्तरलक्षणसत्त्वाद् नैर्लक्षण्यमपि तस्येत्थमापद्यत इति विभावनीयम् । न च "आया[1] सामाइए आया सामाइअस्स अत्थे" इति सूत्रादात्मरूपतया चारित्रशक्तिर्मुक्तावप्यनुवर्तिष्यत इति व्यग्रभावो विधेयः, अष्टस्वप्यात्मसु चारित्रात्मनोऽल्प-बहुत्वाधिकारे सर्वस्तोकत्वाभिधानात्; तथाच प्रज्ञप्तिः– "सव्वत्थोवाओ[2] चरित्तायाओ, नाणायाओ अणंतगुणाओ, कसायाओ अणंतगुणाओ, जोगायाओ विसेसाहिआओ, वीरिआओ विसेसाहिआओ, उवओग-दविय-दंसणाया तिण्णि वि तुल्ला विसेसाहिआओ" । उक्तश्चायमेवार्थो विविच्य वृद्धैः—

"कोडीसहस्सपुहुत्तं[3] जईणं तो थोविआओ चरणाया । नाणाया अणंतगुणा पडुच्च सिद्धे असिद्धाओ ॥ १ ॥
हुंति कसायाओऽणंतगुणा जेण ते सरागाणं । जोगाया भणिआओ अजोगिवज्जाण तो अहिआ ॥ २ ॥

---

१ आत्मा सामायिकम्, आत्मा सामायिकस्यार्थः । २ सर्वस्तोकाश्चारित्रात्मानः, ज्ञानात्मानोऽनन्तगुणाः, कषायात्मानोऽनन्तगुणाः, योगात्मानो विशेषाधिकाः, वीर्यात्मानो विशेषाधिकाः, उपयोग-द्रव्य-दर्शनात्मानस्त्रयोऽपि तुल्या विशेषाधिकाः ।

३ कोटिसहस्रपृथक्त्वं यतीनां ततः स्तोकाश्चरणात्मानः । ज्ञानात्मानोऽनन्तगुणाः प्रतीत्य सिद्धानसिद्धान् ॥ १ ॥
भवन्ति कषायात्मानोऽनन्तगुणा येन ते सरागाणाम् । योगात्मानो भणिता अयोगिवर्जानां ततोऽधिकाः ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]जं सेलेसिगयाण वि लद्धी वीरिअं तओ समहिआओ। उवओग-दविअ-दंसण सव्वजिआणं तओ अहिआ ॥३॥" इति।

तस्मात् सिद्धानां चारित्रं कथं सुश्रद्धानम्? इति चेत्।

अत्र वदन्ति– अन्तरशुभयोगनिवृत्तिरूपं वीर्यमेव चारित्रम्, बहिष्प्रवृत्तिस्तु तदभिव्यञ्जिका। मूलगुणविषयसद्व्यापाररूपस्थैर्यसमये च तत्प्रतिपक्षनिवृत्तिरूपं स्थैर्यमव्याहतमेव। तच्चोत्कृष्यमाणं शैलेश्यां परमनिवृत्तिरूपं भवत् स्थैर्यपरिणामेन मुक्तावनुवर्तते। न च बाह्यालम्बनगुप्तिरूपतया तस्य कथं केवलात्मस्वभावसाम्राज्यरूपायां मुक्तावनुवृत्तिः? इति वाच्यम्; अर्वाग्दशायां समिति-गुप्त्युभयरूपस्यापि योगनिरोध-गुप्त्येकरूपतयोत्कर्षवच्छैलेशीचरमसमये स्थिरात्ममात्रपरिणामरूपतयोत्कर्षसंभवात्। अत एव स्वभावसमवस्थानं सिद्धानां चारित्रमित्यपि निरवद्यम्। न च वीर्याभावात् सिद्धानां चारित्राभावः, तदसिद्धेः, अनन्तज्ञान-दर्शन-वीर्य-चारित्र-सुखस्वभावत्वात् तेषाम्। "[2]सिद्धा णं अवीरिआ" इति सूत्रं तु सकरणवीर्याभावाभिप्रायादेव व्याख्येयम्। स्वरूपसत्करणस्याप्यभावे न तत्र शैलेशीवद् भजना, मूलसूत्रभङ्गयभावात्, विचित्रत्वाच्च सूत्रगतेः। न च क्षायिकभावस्य नाशो युक्तः, क्षायिकसामान्य एव नाशाप्रतियोगित्वनियमात्। अत एव नास्य शरीरनाशकनाश्यत्वम्, शरीरबलचयो-पचयभावेऽप्यान्तरवीर्यरूपचारित्रचयो-पचयाभावात्, तस्य तन्नाशनियतनाशप्रतियोगित्वाभावात्, फलविशेषौपयिकोत्कर्षस्य शरीराप्रयुक्तत्वात्, अन्यथाऽतिप्रसङ्गात्। न च चारित्रस्य प्रतिज्ञाविषयीकृतकालनाशनाश्यत्वात् कथं यावज्जीवतावधिकप्रतिज्ञाविषयस्य तस्य मुक्तावनुवृत्तिः? इति शङ्कनीयम्; परभवानुबन्ध्यविरतिपरिणामादेव चारित्र-

1 यत् शैलेशीगतानामपि लब्धिवीर्यं ततः समधिकाः। उपयोग द्रव्य-दर्शनानि सर्वजीवानां ततोऽधिकाः ॥ ३ ॥ 2 सिद्धा अवीर्याः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाशसंभवे तत्सहभूतस्य प्रतिज्ञाविषयीकृतकालनाशस्यान्यथासिद्धत्वेन तन्नाशकत्वायोगात्; अन्यथा सम्यक्त्वप्रतिज्ञाविषयीभूतकालनाशात् परभवे सम्यक्त्वस्याप्यनुवृत्तिर्न स्यात् । सम्यक्त्वाभिव्यञ्जकस्याचारविशेषस्यैवासावसति प्रतिबन्धे कालः प्रतिज्ञायत इति चेत् । तर्हि चारित्राभिव्यञ्जकस्याप्याचारविशेषस्यैव कालः प्रतिज्ञायत इति तुल्यम् । देवादिभवे भवस्वाभाव्यात् तत्सामग्रीविघटनाच्च न तदनुवृत्तिः, मोक्षे तु क्षायिकत्वेन तत्सामग्रीविघटनायोगादेव तदनुवृत्तिरिति विशेष इति ।

न च कर्मक्षपणफलाभावाद् मुक्तौ चारित्राभाव इति युक्तम्, एवं सति ज्ञानस्याप्यभावप्रसङ्गात्; व्यवहारतो घटमुत्पाद्य स्थितस्य दण्डस्येव निश्चयतस्तु हेतु-फलभावापन्नपूर्वापरक्षणश्रेणीभूतस्य तथातथापरिणतस्वभावसमवस्थानफलोपरतस्य वा न निष्फलत्वमिति समाधानस्याप्युभयत्र तुल्यत्वात् । सादिसान्तत्वं चैतन्मते नास्त्येव दानादिलब्धिचारित्राणाम् । उक्तं च विशेषावश्यकवृत्तावपि– "अन्ये तु दानादिलब्धिपञ्चकं चारित्रं च सिद्धस्यापीच्छन्ति, तदावरणस्य तत्राप्यभावात्, आवरणाभावेऽपि च तदसत्त्वे क्षीणमोहादिष्वपि तदसत्त्वप्रसङ्गात् । ततस्तन्मतेन चारित्रादीनां सिद्धावस्थायामपि सद्भावेनापर्यवसितत्वादेकस्मिन् द्वितीयभङ्ग एव क्षायिको भावः, न शेषेषु त्रिषु" इति । न चैवं ग्रन्थकृतस्तदा चारित्रनिवृत्तिसमर्थनमनतिप्रयोजनमिति शङ्कनीयम्, क्वचिदभिहितायाश्चारित्रस्य निवृत्तेर्ज्ञानादिसाधारण्याः परमनिवृत्तिप्रत्ययायाः कर्मापनयनस्वभावप्रत्ययत्वेनैव वैलक्षण्योपपादनस्य प्रयोजनत्वात् । अत एव चेदृशज्ञानादिनिवृत्त्यभावाद् नोचारित्रित्व-नोअचारित्रित्ववद् नोज्ञानित्व-नोअज्ञानित्वादिकं तत्र न व्यवह्रियते, कर्मापगमनस्वभावेन चारित्रदेशाभाववत् प्रकाशादिस्वभावेन ज्ञानादिदेशाभावायोगात् । न च ज्ञानस्यापि कर्मापनयनस्वभावत्वेन निवृत्तिरस्त्येवेति वाच्यम्; प्रकाशानाश्रवत्वा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पारभेदनयेनोक्तव्यवहाराविरोधात्। 'नो चारित्री' इत्यत्र क्रियारूपदेशस्यैव निषेधः' इत्यन्ये। अपारभविकत्वमपि तस्य क्रियारूपस्यैवोक्तम्, 'मोक्षो न भवः' इत्यभिप्रायाद् वा, मोक्षे तत्कृतफलोपकाराभावादर्वाग्दशावत्तदनुपयोगाद् वा; अवोचाम च—

" [1]जं पुण तं इहभवियं तं किरियारूवमेव णायव्वं। अहवा भवो ण मोक्खो णो तम्मि भवे हिअं अहवा ॥१॥"

एवं च स्वाभाविकात्मलक्षणत्वादप्यनन्तज्ञानवदनन्तचारित्रं सिद्धानां निर्बाधमेव, क्षायोपशमिकतपःप्रभृतिलक्षणानां तदाऽननुवर्तिष्णुत्वेऽपि क्षायिकस्य तस्यानुवर्तिष्णुत्वात्।

यत्तु प्रज्ञप्तौ चारित्रात्मनः सर्वस्तोकत्वमुक्तम्, तत्र चारित्रं क्रियारूपमेव विवक्षितम्, अन्यथा कोटिसहस्रपृथक्त्वसंख्योपादानं कथम्, भावचारित्रस्यान्येष्वपि संभवात्?; "[2]जस्स चरित्ताया तस्स जोगाया णियमा" इति वाचनान्तरे चारित्रस्य मत्युपेक्षणादिव्यापाररूपस्य विवक्षावश्यकत्वाच्च। ननु यदि सिद्धानां चारित्रमिष्यते, तदा ध्यानमप्येष्टव्यम्, समुच्छिन्नक्रियानिवृत्तिरूपशुक्लभेदस्य मुक्तावनुवृत्तेः सुवचत्वात्, विद्यमानकरणनिरोधपर्यन्तत्वाद् ध्यानव्यवहारस्य; तत्पर्यन्त एव ध्यानसद्भावश्चेत्, तर्हि चारित्रसद्भावोऽपि तत्पर्यन्त एवास्तु, तत्पर्यन्तमेव चारित्रव्यवहारादिति चेत्। न, चारित्रावस्थाविशेषरूपस्य ध्यानस्य तदाऽभावेऽपि चारित्रस्यानपायात्। न हि श्यामत्वादिस्वावस्थाऽभावेऽपि 'घटो नास्ति' इति वक्तुं शक्यते। 'स्वभावसमवस्थानरूपं ध्यानमपि मुक्तावक्षतम्' इत्यपर इति। अधिकं परीक्षायाम्।

इदं तु ध्येयम्– सिद्धानां चारित्राभावमतेऽपि प्रकृते नानुपपत्तिः, ज्ञानयोगाधिकारात्, ज्ञाननयप्राधान्येन ज्ञान-

१ यत् पुनस्तदिहभविकं तत् क्रियारूपमेव ज्ञातव्यम्। अथवा भवो न मोक्षो नो तस्मिन् भवे हितमथवा ॥१॥ २ यस्य चारित्रात्मा तस्य योगात्मा नियमात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चारित्रयोरभेदाश्रयणात्; ज्ञानावस्थारूपस्यैव स्थैर्याख्यचारित्रपरिणामस्याक्षयत्वोपपादनात्; एतदुपपादनार्थमेव शुद्धनयाभिप्रायकनोचारित्रित्व-नोअचारित्रित्ववचनानुसरणादिति गम्भीरधिया परिभावनीयम् ॥ २६ ॥

फलितमाह—

ज्ञानयोगादतो मुक्तिरिति सम्यग्व्यवस्थितम् । तन्त्रान्तरानुरोधेन गीतं चेत्थं न दोषकृत् ॥

अतः– उक्तन्यायात्, 'ज्ञानयोगाद् मुक्तिः' इति– एतदुपन्यस्तम्, सम्यक्– प्रमाणाविरोधेन, व्यवस्थितम् । ननु कथं सम्यगियं व्यवस्था, "ज्ञान-क्रियाभ्यां मुक्तिः" इति तन्त्रान्यवस्थानात्? । अत आह– तन्त्रानुरोधेन च– वेदान्तवादिमतानुरोधेन च, इत्थम्– उक्तरीत्या, गीतम्– उक्तम्, न दोषकृत्– न स्वतन्त्रक्षतिदोषावहम्, अनेकनयमये स्वतन्त्रे यथाप्रयोजनमेकनयप्राधान्यादरस्याप्यदुष्टत्वादिति भावः ।

योगाचार्यमतानुरोधे पुनरिच्छा-शास्त्र-सामर्थ्ययोगा इष्यन्ते । तत्र ज्ञातागमस्यापि प्रमादिनः कालादिवैकल्येन चैत्यवन्दनाद्यनुष्ठानमिच्छाप्राधान्यादिच्छायोगः । यथाशक्ति तीव्रश्रद्धया कालाद्यवैकल्येन तदनुष्ठानं च यथाशास्त्रमाचारात् शास्त्रयोगः । शास्त्रदर्शितोपाये शास्त्रदर्शितदिशाऽधिकतरवीर्यमुल्लासयतो मार्गानुसारिप्रकृष्टोहरूपस्वसंवेदनेन जाताधिकविवेकस्यानुष्ठानं सामर्थ्ययोगः । न हि शास्त्रादेव मोक्षोपायः कार्त्स्न्येनावगम्यते, तीव्ररुचेः श्रवणमात्रादेव मोक्षोपायलाभे योगाभ्यासवैयर्थ्यप्रसङ्गात्; उपायविशेषलाभार्थमेव तत्परिशीलनस्य सप्रयोजनत्वात् । न चायमज्ञातो लभ्यते । न च प्रत्यात्म

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शृङ्गग्राहिकया तद्बोधनाय शास्त्रं व्याप्रियते। न चैवमत्र शास्त्रवैयर्थ्यम्, दिग्दर्शकत्वात्। इति सिद्धमस्य शास्त्रातिक्रान्तविषयत्वम्। स चायं द्विविधः– धर्मसंन्यासः, योगसंन्यासश्च। तत्र धर्मसंन्यासस्तात्त्विकः क्षपकश्रेणियोगिनो द्वितीयापूर्वकरणे भवति, क्षायोपशमिकानां क्षान्त्यादिधर्माणां तदा निवृत्तेः, क्षायिकाणामेव विशुद्धानां प्रादुर्भावात्। अतात्त्विकस्तु प्रव्रज्याकालेऽपि भवति, सावद्यप्रवृत्तिलक्षणधर्मन्यासादिति समयविदः। द्वितीयस्त्वायोज्यकरणेन योगनिरोधादूर्ध्वं शैलेश्यां कायादिकर्मरूपाणां योगानां न्यासात्। अयं खल्वयोगोऽपि मोक्षयोजनात् परमो योग उच्[1]यत इति; तदाहुः—

“कर्तुमिच्छोः श्रुतार्[2]थस्य ज्ञानिनोऽपि प्रमादिनः। विकल्पे धर्मयोगो यः स इच्छायोग उच्यते ॥ १ ॥
शास्त्रयोगस्त्विह ज्ञेयो यथाशक्त्यप्रमादिनः। श्राद्धस्य तीव्रबोधेन वचसा विकलस्तथा ॥ २ ॥
शास्त्रसंदर्शितोपायस्तदतिक्रान्तगोचरः। शक्त्युद्रेकाद् विशेषेण सामर्थ्याख्योऽयमुत्तमः ॥ ३ ॥
सिद्ध्याख्यपदसंप्राप्तिहेतु-भेदा न तत्त्वतः। शास्त्रादेवावगम्यन्ते सर्वथैवेह योगिभिः ॥ ४ ॥
सर्वथा तत्परिच्छेदात् साक्षात्कारित्वयोगतः। तत्सर्वज्ञत्वसंसिद्धेस्तदा सिद्धिपदाप्तितः ॥ ५ ॥
न चैतदेवं यत्तस्मात् प्रातिभज्ञानसंगतः। सामर्थ्ययोगोऽवाच्योऽस्ति सर्वज्ञत्वादिसाधनम् ॥ ६ ॥
द्विधाऽयं धर्मसंन्यास-योगसंन्याससंज्ञितः। क्षायोपशमिका धर्मा योगाः कायादिकर्म तु ॥ ७ ॥

१ क. ‘च्यते त’। २ ख.ग.घ.च. ‘र्थस्याज्ञा’।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयापूर्वकरणे प्रथमस्तात्त्विको भवेत् । आयोज्यकरणादूर्ध्वं द्वितीय इति तद्विदः ॥ ८ ॥
अतस्त्वयोगो योगानां योगः पर उदाहृतः । मोक्षयोजनभावेन सर्वसंन्यासलक्षणः ॥ ९ ॥" इति ।

ततो ज्ञान-क्रियायोगयोरुभयोरप्युपपत्तिः स्वतन्त्रे इति सर्वमवदाततरम् ॥ २७ ॥

यः साक्षात्कृतमोक्षसाधनविधिस्तीव्रं तपस्तप्तवान् यः कर्माण्यपनीतवान् परिणमत्संज्ञानयोगाशयः ।
नित्यज्ञान-चरित्र-दर्शनसुखं मोक्षं च यो लब्धवानस्माकं शरणं स एव भगवान् स्वप्नेऽथवा जागरे ॥ १ ॥
यस्यासन् गुरवोऽत्र जीतविजयाः प्राज्ञाः प्रकृष्टाशया भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरस्तेन न्यायविशारदेन रचिते न्यायेऽत्र देया मतिः ॥ २ ॥

इति पण्डितश्रीपद्मविजयसोदरन्यायविशारदपण्डितयशोविजयविरचितायां स्याद्वादकल्पलताभिख्यायां
शास्त्रवार्तासमुच्चयटीकायां नवमः स्तबकः ॥

---

१ सप्तमी, जैनागम इत्यर्थः । २ ख.ग.घ.च. 'तम्' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

अथ दशमः स्तवकः ।

यज्ज्ञानोज्ज्वलदर्पणे प्रतिफलत्येतज्जगद् यत्पदाम्भोजे नम्रसुपर्वनाथमुकुटश्रेण्या मरालायितम् ।
वाणी सर्वशरीरिवाक्परिणता यस्याङ्गपूर्वार्थसूर्दोषा न स्म समाश्रयन्ति यमिमं श्रीवर्धमानं स्तुमः ॥ १ ॥

फणिपतिफणरत्नप्रान्तसंक्रान्तमूर्तिर्युगपदिव [1]दिधक्षुः स्पष्टमष्टापि [2]बन्धान् ।
जगति विधृतरूपो [3]दित्सुरष्टाथ सिद्धीर्दलयतु जिनभास्वानष्टधा कष्टधाराम् ॥ २ ॥

लब्धोदयायां हृदये यस्यां प्रक्षीयते तमः । पुण्यप्राग्भारलभ्यां तां कलां कामप्युपास्महे ॥ ३ ॥

ननु 'सर्वज्ञस्य ज्ञानयोगेन कर्मक्षयाद् मुक्तिः' इत्युक्तं न युक्तम्, सर्वज्ञस्यैवाभावात्' इति वार्तान्तरमुत्थापयति—

अत्राप्यभिदधत्यन्ये सर्वज्ञो नैव विद्यते । तद्ग्राहकप्रमाऽभावादिति न्यायानुसारिणः ॥१॥

---

१ दग्धुमिच्छुः । २ अष्टसंख्यत्वाद् मूलकर्मप्रकृतेः । ३ दातुमिच्छुः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रापि- निरूपितसम्यगुपायक्रमे मोक्षवादेऽपि, अभिदधति- वदन्ति, अन्ये- मीमांसकाः, यदुत- सर्वज्ञो नैव विद्यते। कुतः ? इत्याह- तद्ग्राहकप्रमाऽभावात्- सर्वज्ञसाधकप्रमाणाभावात्। इति प्रतिज्ञातहेतुसमाप्त्यर्थः। किंभूता अन्ये ? इत्याह- न्यायानुसारिणः- वक्ष्यमाणतर्काग्रहमात्रपराः ॥ १ ॥

तद्ग्राहकप्रमाणसामान्याभावे तद्विशेषाभावं हेतुं [1]विवेचयन्नाह—

प्रत्यक्षेण प्रमाणेन सर्वज्ञो नैव गृह्यते। लिङ्गमप्यविनाभावि तेन किञ्चिद् न दृश्यते ॥२॥

प्रत्यक्षेण प्रमाणेन नैव सर्वज्ञो गृह्यते, तद्धि प्रतिनियतासन्नरूपादिगोचरचारित्वेन परसंतानवर्तिसंवेदनमात्रेऽप्यशक्तम्, किं पुनरनन्तातीता-ऽनागत-वर्तमान-सूक्ष्मा-ऽन्तरितादिस्वभावसकलपदार्थसाक्षात्कारिसंवेदनविशिष्टस्याऽसतः पुरुषविशेषस्य परिच्छेदे ? इति। लिङ्गमपि तेन- सर्वज्ञेन सह, किञ्चिदविनाभावि- निश्चितप्रतिबन्धम्, न दृश्यते। न हि तदग्रहे तत्सत्त्वेन सह हेतोः प्रतिबन्धः पक्षधर्मत्वं वा तस्य निश्चेतुं शक्यत इति। किञ्च, सर्वज्ञोऽनुमानाद् विशेषेण साध्यः, अविशेषेण वा ?। आद्ये व्यभिचारः। द्वितीये स्वाभीप्सितार्हत्सर्वज्ञासिद्धिः। न च 'सर्वे पदार्थाः कस्यचित् प्रत्यक्षाः, प्रमेयत्वात्; अग्न्यादिवत्' इति हेतोः सर्वज्ञसिद्धिः, सकलपदार्थसाक्षात्कार्येकज्ञानप्रत्यक्षत्वस्य साध्यत्वे दृष्टान्तस्य साध्यवैकल्यात्। प्रतिनियतविषयानेकज्ञाने प्रत्यक्षत्वस्य साध्यत्वे च बाधः, सिद्धसाधनं वा। एवं प्रमेयत्वहेतावपि विकल्प्य दोषो

१ ख.ग.घ.च. 'विचिन्तय'। २ ख.ग.घ.च. 'मपि किञ्चित् तेन सर्वज्ञेन सहाविना'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाच्यः[1] । न च सामान्योपग्रहाद् दोषोद्धारः, अतिविलक्षणव्यक्त्योरेकसामान्यासिद्धेः, अन्यथाऽतिप्रसङ्गादिति ॥ २ ॥

न चागमेन, यदसौ विध्यादिप्रतिपादकः । अप्रत्यक्षत्वतो नैवोपमानेनापि गम्यते ॥३॥

न चागमेन 'सर्वज्ञो गृह्यते' इत्यनुषङ्गः, यत्– यस्मात्, असौ– आगमः, विध्यादिप्रतिपादकः– विधि-निषेधबोधकः[2]— अनित्यादागमात् तत्सिद्धिः स्यात्, नित्याद् वा ? । नाद्यः, अन्योन्याश्रयात्; सर्वज्ञसिद्धौ हि कृत्रिमस्यागमस्य तत्प्रणीतत्वेन प्रामाण्यसिद्धिः, तत्सिद्धौ च ततस्तत्सिद्धिः । न चासर्वज्ञप्रणीत आगमः प्रमाणं युज्यते, अन्यथा स्ववचनादेव तत्सिद्धिः स्यादिति । नापि द्वितीयः, नित्यस्यागमस्य कार्ये एवार्थे प्रामाण्यव्यवस्थापनेन सर्वज्ञप्रतिपादने तस्याप्रमाणत्वात् । यश्च हिरण्यगर्भं प्रकृत्य "स सर्ववित् स लोकवित्" इत्यादिरागमः, तस्यापि कर्मार्थवादप्रधानत्वेन सकलज्ञविधायकत्वानुपपत्तेः । नापि सकलज्ञस्यानुवादकोऽसौ, पूर्वमन्यैः प्रमाणैरबोधितस्य तस्यानुवदितुमशक्यत्वादिति भावः । अप्रत्यक्षत्वतः कारणात्, नैवोपमानेनापि गम्यते सर्वज्ञः, तस्य सादृश्यविषयत्वात्, सादृश्याश्रयदर्शननान्तरीयकत्वाच्च; पदवाच्यत्वविषयकत्वे च तस्यात्रोपयोग एव दूरे ॥ ३ ॥

नार्थापत्त्यापि सर्वोऽर्थस्तं विनाऽप्युपपद्यते । प्रमाणपञ्चकावृत्तेस्तत्राभावप्रमाणता ॥४॥

---

१ ख.ग.घ.च. 'भाव्यः' । २ क. 'कः, अयं भावः– अ' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्थापत्त्यापि न सर्वज्ञो गृह्यते, यतः सर्वोऽर्थः– धर्मदेशनादिः, तं विनापि– सर्वज्ञं विनापि, उपपद्यते बुद्धादीनां स्वप्नोपलब्धार्थोपदेशतुल्यस्य व्यामोहपूर्वकस्य, मन्वादीनां च साङ्गाध्ययनसमासादितव्युत्पत्तिविशेषाऽऽकलितनिखिलवेदार्थानां सम्यग्ज्ञानपूर्वकस्योपदेशस्योपपत्तेः; तदिदमुक्तं भट्टेन—

"सर्वज्ञो दृश्यते तावद् नेदानीमस्मदादिभिः। दृष्टो न चैकदेशोऽस्ति लिङ्गं वा योऽनुमापयेत् ॥ १ ॥
न चागमविधिः कश्चिद् नित्यः सर्वज्ञबोधकः। न च मन्त्रार्थवादानां तात्पर्यमवकल्प्यते ॥ २ ॥
तच्चान्यार्थप्रधानैस्तैस्तदस्तित्वे विधीयते। न चानुवदितुं शक्यः पूर्वमन्यैरबोधितः ॥ ३ ॥
अनादेरागमस्यार्थो न च सर्वज्ञ आदिमान्। कृत्रिमेण त्वसत्येन स कथं प्रतिपाद्यते ? ॥ ४ ॥
अथ न तद्वचनेनैव सर्वज्ञोऽज्ञैः प्रतीयते। प्रकल्प्येत कथं सिद्धिरन्योन्याश्रययोस्तयोः ? ॥ ५ ॥
सर्वज्ञोक्ततया वाक्यं सत्यं तेन तदस्तिता। कथं तदुभयं सिद्ध्येत् सिद्धमूलान्तरादृते ? ॥ ६ ॥
असर्वज्ञप्रणीतात्तु वचनाद् मूलवर्जितात्। सर्वज्ञमवगच्छन्तः स्ववाक्यात् किं न जानते ? ॥ ७ ॥
सर्वज्ञसदृशं कश्चिद् यदि पश्येम संप्रति। उपमानेन सर्वज्ञं जानीयाम ततो वयम् ॥ ८ ॥
उपदेशो हि बुद्धादेर्धर्मा-ऽधर्मादिगोचरः। अन्यथा नोपपद्येत सार्वज्ञ्यं यदि नो भवेत् ॥ ९ ॥
बुद्धादयो ह्यवेदज्ञास्तेषां वेदादसंभवः। उपदेशः कृतोऽतस्तैर्व्यामोहादेव केवलात् ॥ १० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ये तु मन्वादयः सिद्धाः प्राधान्येन त्रयीविदाम् । त्रयीविदाश्रितग्रन्थास्ते वेदप्रभवोक्तयः ॥११॥" इति ।

फलितमाह– प्रमाणपञ्चकाऽवृत्तेः– पञ्चानामपि प्रमाणानां विधिग्राहिणामप्रवृत्तेः, तत्र– सर्वज्ञे, अभावप्रमाणता– अभावप्रमाणात् सर्वज्ञाभावनिश्चय एवेति भावः । उक्तं च—

"प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते । वस्तुसत्तावबोधार्थं, तत्राभावप्रमाणता ॥ १ ॥" इति ।

न चाभावस्य पृथक्प्रमाणत्वमसिद्धम्, अभावग्राहिणस्तस्य पार्थक्यावश्यकत्वात् । न हीन्द्रियेणाभावज्ञानं जनयितुं शक्यम्, भावांशेनैवेन्द्रियस्य संयोगात् । न च धर्म्यभेदाद् भावांशेन सहाभावांशस्याभेदे सतीन्द्रियसंयोगोपपत्तिः, अभिन्ने धर्मिणि रूप-रसयोरिव भावा-ऽभावांशयोरन्योन्यं भेदात्; तदुक्तम्—

"न तावदिन्द्रियेणैषा नास्तीत्युत्पाद्यते मतिः । भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि ॥ १ ॥
ननु भावादभिन्नत्वात् संप्रयोगोऽस्ति तेन च । न ह्यत्यन्तमभेदोऽस्ति रूपादिवदिहापि नः ॥ २ ॥"

न चैवं तदभावज्ञानमनुमानम्, लिङ्गाभावात्; तदुक्तम्—

"न चाप्यस्यानुमानत्वं लिङ्गाभावात् प्रतीयते । भावांशो ननु लिङ्गं स्यात्तदानीमजिघृक्षणात् ॥ १ ॥
अभावावगतेर्जन्म भावांशे ह्यजिघृक्षिते । तस्मिन् प्रतीयमाने तु नाभावे जायते मतिः ॥ २ ॥

१ मुद्रितश्लोकवार्तिके पृ० ४७३ । २ मुद्रितश्लोक० पृ० ४७९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न चैष तस्य धर्मत्वं पदवत् प्रतिपद्यते[1] ।" इति ।

ततो 'नास्ति' इति ज्ञाने फले प्रतियोगिग्रहणपरिणामाभावरूपम्, हानादिबुद्धिरूपे च फलेऽन्यवस्तुज्ञानरूपमभावाख्यं प्रमाणमेष्टव्यम्; तदुक्तम्—

"प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते । सात्मनोऽपरिणामो वा विज्ञानं वाऽन्यवस्तुनि[2] ॥ १ ॥" इति ।

न चैवमभावज्ञानं इन्द्रियान्वय-व्यतिरेकानुविधानं न स्यादिति शङ्कनीयम्, तस्याधिकरणग्रहणापेक्षीणत्वात्, अधिकरण-ग्रहण-प्रतियोगिस्मरणयोस्तत्र हेतुत्वात्; तदुक्तम्—

"गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् । मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया[3] ॥ १ ॥" इति ।

न चाधिकरणज्ञानस्य हेतुत्वेऽन्धस्यापि त्वगिन्द्रियोपनीते घटादौ नीलाद्यभावग्रहः स्यादिति वाच्यम्; प्रतियोगिग्राहकेन्द्रियजन्याधिकरणज्ञानस्य तथात्वात् । न चैवं त्वगिन्द्रियोपनीते वायौ रूपाभावप्रतीत्यनुदयप्रसङ्गः, रूपानुपलम्भेन तदभावानुमानात् । न च हेतोरपि दुर्ग्रहत्वम्, उपलम्भस्य तत्रातीन्द्रियतया तदभावस्याज्ञातानुपलब्ध्यगम्यतया ज्ञातानुपलब्धिगम्यत्वेऽनवस्थानात्; प्राकट्याभावस्यापि रूपाभावतुल्यतया तेन तदनुमानायोगात्; काय-वाग्व्यवहाराभावेऽप्युपेक्षाज्ञानसत्त्वाद् व्यवहाराभावेनापि तस्याननुमेयत्वादिति वाच्यम्, मनोजन्यवायुज्ञानसत्त्वात्, प्राकट्याभावेन मनोग्राह्येण रूपानु-

१ मुद्रितश्लोक० पृ० ४८४ । २ मुद्रितश्लोकवा० पृ० ४७५ । ३ सप्तम्यन्तम्, एवमुत्तरत्रापि । ४ मुद्रितश्लोकवा० पृ० ४८२ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पलम्भानुमानसंभवात् । 'वायौ रूपाभावं पश्यामि' इति धीस्तु भ्रान्तैव । अथानुपलम्भे विशेषाभावाच्चक्षुषाऽभावग्रह आलोको हेतुर्न तु त्वचेति कुतः ? इति चेत् । सत्यम्, चक्षुरादाविवालोकादेरप्यधिकरणज्ञानविशेष एवोपयोगात्, अभावज्ञानेऽनुपलम्भविशेषकृतविशेषाभावेऽप्यधिकरणज्ञानविशेषकृतविशेषोपपत्तेः । अत एव 'घटाभावं पश्यामि' इत्यप्याविगानं समर्थितम्, 'पश्यामि' इति विषयताविशेषे संनिकर्षदोषविशेषादिवदधिकरणज्ञानविशेषस्यापि नियामकत्वात् । न चैवं गौरवम्, अभावज्ञान आलोकादिहेतुत्वाकल्पनलाघवात् । न चाज्ञातकरणकत्वादभावज्ञानमपरोक्षमित्यप्याशङ्कनीयम्, क्वचिज्ज्ञाताया एवानुपलब्धेः करणत्वात्; तथाहि– 'यत्र गृहाद् निर्गतश्चैत्रस्तत्र किं मैत्र आसीत् ?' इति केनापि पृष्टः क्षणं ध्यात्वा वदति– 'नासीत् तत्र मैत्रः' इति । तत्र प्राग्नास्तितावुद्धौ ज्ञातैव सा करणम् । न हीयं स्मृतिः, गृहसंनिकर्षकाले मैत्रास्मरणेन तदभावाननुभवात् । नापि प्रत्यक्षम्, गृहासंनिकर्षेऽपि जायमानत्वादिति । 'प्रकृताभावज्ञानं भावभूतकरणसचिवमनोजन्यम्, बहिर्विषयकालौकिकेतरज्ञानत्वात्' इति चाप्रयोजकम् ।

अथ यद् यत्प्रतियोगिग्राहकं तत् तदभावग्राहकम्, यथाऽनुमानादिकम्, भवति चेन्द्रियमपि प्रतियोगिग्राहकम्, अतस्तदभावग्राहकमिति चेत् । न, वाच्यताग्राहकोपमाने व्यभिचारात् । न च वाच्यतातिरिक्तं प्रतियोगिनो विशेषणं देयम्, तथापि प्रतियोगिग्राहकत्वस्य तदभावग्राहकत्वेऽतन्त्रत्वात्, अनन्यथासिद्धत्वस्योपाधित्वाच्च । न च व्यापारेणाधिकरणप्रत्यक्षेण, इन्द्रियस्य संयोगादिनेव नान्यथासिद्धत्वमिति वाच्यम्; अभावज्ञान इन्द्रियजन्यत्वसिद्धौ तद्धटितैतद्व्यापारत्वसिद्धिः, तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयात् । न चाभावभ्रमे दुष्टकरणजन्यत्वावश्यकत्वादिन्द्रिय एव पित्तादिना दुष्टताया उप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्तेरभावभ्रमकरणत्वाभावप्रमाकरणत्वमपीन्द्रियस्यैवेत्याशङ्कनीयम्; दोषसाहित्यरूपदुष्टताया अनुपलब्धावपि संभवात्।[1] अथाधिकरणविशिष्टाभावधीर्नेन्द्रियजा, अभावधीत्वात्; नानुपलब्धिकरणिका, भावधीत्वात्; नोभयजन्या, प्रमाणयोर्विरोधात्, अविरोधे सांकर्यात्; इतीन्द्रियमेव विशिष्टग्राहि स्वीकार्यम्। न च घ्राणोपनीतसौरभेण चन्दनस्येवानुपलब्धिगृहीतेनाभावेन भूतलस्यापि चक्षुषैव ग्रहः, विशेषणभूताभावग्राहकतयाऽनुपलब्धेः स्वीकारादिति वाच्यम्, तथापि प्रतियोगिविशिष्टाभावग्रहस्यानुपलब्ध्या संभवादिति चेत्। न, अनुपलब्धिजन्य एव विशिष्टज्ञाने ज्ञानोपनीतयोरधिकरण-प्रतियोगिनोर्विशेष्यतया विशेषणतया च भावग्रहसामग्रीमहिम्ना भानादिति दिग्। तदेवमभावप्रमाणात् सर्वज्ञाभाव एव सिद्ध्यतीति सिद्धम्।

एवं 'विमतिपन्नप्रत्यक्षं यदि सूक्ष्माद्यर्थग्राहकं स्यात्, प्रत्यक्षं न स्यात्' इत्यादि प्रसङ्गसाधनमपि द्रष्टव्यम्। न च गृध्रादीनां चक्षुरादिज्ञानेऽपूर्वदर्शित्वाद्यतिशयदर्शनाद् नराणामपि प्रज्ञा-मेधादिभिस्तद्दर्शनात् कस्यचिदतीन्द्रियार्थद्रष्टृत्वेनाप्यतिशयः स्यादिति संभावनीयम्, गृध्रादीनामपि स्वविषय एव रूपादौ चक्षुरादेर्दूरदर्शित्वादिविशेषदर्शनात्, विषयपरित्यागेन रूपादौ श्रोत्रादिवृत्तेरतिशयस्यादर्शनात्, सर्वज्ञे चक्षुराद्यविषयसूक्ष्माद्यर्थद्रष्टृत्वासिद्धेः। प्रज्ञा-मेधादिभिरपि नराणां स्तोकस्तोकान्तरत्वेनैवातिशयदर्शनाद् विषयान्तरे प्रकर्षपर्यन्तं च तददर्शनादुक्तासिद्धेः; तदुक्तम्—

"यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्। दूर-सूक्ष्मादिदृष्टौ स्याद्, न रूपे श्रोत्रवृत्तितः[3] ॥ १ ॥

येऽपि सातिशया दृष्टाः प्रज्ञा-मेधादिभिर्नराः। स्तोकस्तोकान्तरत्वेन[2] न त्वतीन्द्रियदर्शनात् ॥ २ ॥ ॥३५१॥

१ इतः 'संभवात्' इत्यन्तः पूर्वपक्षः। २ ख.ग.घ.च. 'स्तोका'। ३ मुद्रितश्लोक० पृ० ८२।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राज्ञोऽपि हि नरः सूक्ष्मानर्थान् द्रष्टुं क्षमोऽपि सन् । सजातीरनतिक्रामन्नतिशेते परान् नरान् ॥ ३ ॥
एकशास्त्रविचारेषु दृश्यतेऽतिशयो महान् । न च शास्त्रान्तरज्ञानं तन्मात्रेणैव लभ्यते ॥ ४ ॥
ज्ञात्वा व्याकरणं दूरबुद्धिः शब्दा-ऽपशब्दयोः । प्रकृष्यते न नक्षत्र-तिथि-ग्रहणनिर्णये ॥ ५ ॥
ज्योतिर्विच्च प्रकृष्टोऽपि चन्द्रा-ऽर्क-ग्रहणादिषु । न भवत्यादिशब्दानां साधुत्वं ज्ञातुमर्हति ॥ ६ ॥
तथा वेदे-तिहासादिज्ञानातिशयवानपि । न स्वर्ग-देवता-ऽपूर्वप्रत्यक्षीकरणे क्षमः ॥ ७ ॥
दशहस्तान्तरं व्योम्नि यो नामोत्प्लुत्य गच्छति । न योजनमसौ गन्तुं शक्तोऽभ्यासशतैरपि ॥ ८ ॥"

कथं च धर्मादिग्राहिज्ञानस्योत्पत्तिः ? । अभ्यासादिति चेत् । न, अक्षाणां रूपादावेव प्रवृत्तेः, अनुमानस्यापि धर्मादावव्यापारात् । आगमप्रभवस्यापि ज्ञानस्याभ्यासे तस्य सर्वज्ञप्रणीतस्यैवाश्रये चक्रकप्रसङ्गात्, अस्पष्टज्ञानस्याभ्यासशतेनापि स्पष्टताया अयोगाच्च । अथ दृश्यत एव काम-शोकाद्युपप्लुतचेतसामस्पष्टस्यापि ज्ञानस्य स्पष्टत्वम्; उक्तं च--

"काम-शोक-भयो-न्माद-रोग-शोकाद्युपद्रुताः । अभूतानपि पश्यन्ति पुरतोऽवस्थितानिव ॥ १ ॥" इति ।

तद्वदेतदपि स्यादिति चेत् । न, तद्वदेवास्याप्युपप्लुतत्वप्रसक्तेः । अथागमजं ज्ञानमेवाभ्यासात् साक्षात्कारीभवतीति नाङ्गीकारः, किन्तु तदभ्यासात् श्रवणादिक्रमेण तदुत्पत्तिरिति न दोष इति चेत् । न, परोक्षादपरोक्षोत्पत्त्यदर्शनात्, श्रवणादेः प्रत्यक्षप्रमाकरणत्वेन प्रत्यक्षप्रमाणत्वप्रसङ्गाच्च । अपि च, सर्वज्ञज्ञानेनैकक्षण एव समस्तार्थग्रहण उत्तरकालं तस्याकिञ्चिज्ज्ञत्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रसङ्गः। किञ्च, परसंतानवर्तिरागादिसाक्षात्करणादस्य रागादिमत्त्वमपि स्यात्। अपिच, अतीतकालाद्याकलितस्य वस्तुनो विद्यमानतया तेन प्रतिसंधाने भ्रान्तत्वापत्तिः; अन्यथा च तज्ज्ञानस्य प्रत्यक्षतानुपपत्तिः, अवर्तमानविषयत्वात्। अपिच, वस्तुनः प्रागभाव-ध्वंसयोस्तस्य युगपद् भानाद् युगपज्जात-मृतव्यपदेशापत्तिः। किञ्च, सर्वज्ञकालेऽपि सर्वज्ञो (असर्वज्ञैः) न ज्ञातुं पार्यत इति कथं तद्वाक्यविश्वासः? इति बहुसर्वज्ञकल्पनापत्तिः; तदुक्तम्[1]—

"सर्वज्ञोऽयमिति ह्येतत् तत्कालेऽपि बुभुत्सुभिः। तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम्?॥ १॥
कल्पनीयाश्च सर्वज्ञा भवेयुर्बहवस्तव। य एव स्यादसर्वज्ञः स सर्वज्ञं न बुध्यते ॥ २ ॥
सर्वज्ञो नावबुद्धश्च येनैव, स्याद् न तं प्रति। तद्वाक्यानां प्रमाणत्वं मूलाज्ञानेऽन्यवाक्यवत्[2] ॥ ३ ॥" इति।

किञ्च, नित्यसमाधानसंभवे विकल्पाभावात् कथं सर्वज्ञस्य वचनम्?। वचने वा विकल्पसंभवात् समाधानविरोधाद् न समाहितत्वं स्यात्। समाधिर्हि चित्तवृत्तिनिरोधः, विकल्पश्च चित्तवृत्तिरिति। अपिच, रागाद्यावरणाभावे परेण सार्वज्ञ्यं वाच्यम्, रजोनीहाराद्यावरणापाये वृक्षादिदर्शनस्येव रागाद्यावरणरूपविज्ञानावैशद्यहेत्वपाये सर्वज्ञज्ञानस्य विशदताऽभिप्रायात्; तथा च रागाद्यभावे कथं तस्य वचनादि, प्रवृत्तिसामान्य इच्छाया हेतुत्वात्। न च रागादीनामावरणत्वमपि प्रसिद्धम्, कुड्यादीनामेव ह्यावारकत्वप्रसिद्धिः, इति कथं तदपगमे सर्वसाक्षात्कारोदयः? इति दिग्॥ ४ ॥

सर्वज्ञाभावे धर्मा-ऽधर्मव्यवस्थामेव सम्यगुपपादयितुमाह—

१ श्लोकवार्तिके पृ० ८६। २ जैनेन।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्माधर्मव्यवस्था तु वेदाख्यादागमात्किल । अपौरुषेयोऽसौ यस्माद्धेतुदोषविवर्जितः ॥५॥

धर्मा-ऽधर्मव्यवस्था तु– 'यागादि धर्मसाधनम्, ब्रह्महत्याद्यधर्मसाधनम्' इत्यादिज्ञानजन्यप्रवृत्तिनिवृत्त्यादिरूपा तु, वेदाख्यादागमात्, 'किल' इति सत्ये, 'घटत एव' इति शेषः । ननु वेदस्यापि सर्वज्ञप्रणीतस्यैवोक्तव्यवस्थानिबन्धनत्वात् सर्वज्ञमूलैवेयं व्यवस्थेत्यत आह– असौ– वेदाख्य आगमः, यस्मादपौरुषेयः– नित्यः, हेतुदोषविवर्जितः– चक्षुर्गतभ्रमप्रमाद-विप्रलिप्सा-करणापाटवादिदोषविकल इत्यर्थः। तथा च स्वतःप्रमाणत्वाद् युक्ता वेदमूला धर्मा-ऽधर्मादिव्यवस्था। अथाप्रमायामिव प्रमायामपि ज्ञानसामान्यहेत्वतिरिक्तहेत्वपेक्षणाद् नैतद् युक्तमिति चेत् । न, अप्रमायां दोषापेक्षणात्, प्रमायां तदभावापेक्षणे-ऽविरोधात् । विशेषादर्शनाद्यभावभूतदोषाभावस्य भावभूतस्य प्रमायामधिकस्यापेक्षणीयत्वाद् विरोध एवेति चेत् । न, तथापि शब्दे विप्रलिप्सादिदोषाणां भावभूतत्वात् समष्ट्या प्रमायां तदभावमात्राधीनायां वक्तृगुणानपेक्षणात् । अथाप्तोक्तत्वनिश्चयस्य शाब्दबोधसामान्ये हेतुत्वाद् वेदे तदभावात् कथं ततः शाब्दबोधः ? इति चेत् । न, अनाप्तोक्तत्वशङ्काया एव शाब्दसामान्य-विरोधिन्या व्युदासार्थमाप्तोक्तत्वनिश्चयापेक्षणात्, वेदे तु नित्यतया निर्दोषत्वेनैव तच्छङ्काव्युदासात् ।

नित्यत्वमेव कथं वर्णरूपस्य वेदस्य ? इति चेत् । सत्यम्, वर्णानां नित्यत्वात्; अन्यथा परार्थवाक्योच्चारणान्यथानु-पपत्तेः । अवगतसंगतिको हि शब्दः स्वार्थं प्रतिपादयति, नान्यथा, अगृहीतसंकेतस्य पुंसः शब्दादर्थप्रतीत्यदर्शनात् । संग-त्यवगमश्च प्रमाणत्रयसंपाद्यः; तटस्थेन प्रत्यक्षेण शब्दार्थप्रत्ययात्; अनुमानेन प्रयोज्यवृद्धीयगवादिविषयप्रतिपत्त्यवगमात् तत्प्र-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीत्यन्यथानुपपत्त्या च गवादिशब्दानां गवादौ शक्तिकल्पनात्। इत्थंभूतश्चायं संगत्यवगमो न सकृद्वाक्यप्रयोगात् संभवति, भूयःप्रयोगादेवाऽऽवापो-द्वापाभ्यामेव शक्तिनिश्चयात्। न चास्थिरस्य पुनःपुनरुच्चारणं संभवतीति सिद्धं तन्नित्यत्वम्; तदुक्तम्- "दर्शनस्य परार्थत्वाद् नित्यः शब्दः" इति। अथ पुनःपुनरुच्चरिताच्छब्दात् सादृश्यादेव प्रतीतिः, न तु नित्यत्वादिति चेत्। न, सादृश्यस्यातन्त्रत्वात्, अगृहीतसंकेतादर्थाप्रतीतेः; 'य एव संबन्धग्रहणसमये गृहीतः शब्दः स एवायम्' इति प्रत्यभिज्ञानाच्च। न च नित्यत्वे शब्दस्य सर्वदा सर्वोपलब्धिप्रसङ्गः, परेषां शब्दोत्पादकानामेव विजातीयवायुसंयोगादीनामस्माभिः शब्दव्यञ्जकत्वेनोपगमात्। न च शब्दनित्यत्वे चैत्रादेः स्वीयमैत्र-शुकादीयककारादिप्रत्यक्षे चैत्रादिकर्णावच्छिन्ना विजातीयवायुसंयोगा हेतवो वाच्या इत्यतिगौरवम्, अनित्यत्वपक्षे तु विजातीयवायुसंयोगावच्छेदकतया तथैव विजातीयककारादौ हेतुस्तत्पुरुषीयनिखिलशब्दप्रत्यक्षे तत्पुरुषीयकर्णावच्छिन्नसमवाय इति लाघवमिति वाच्यम्; नित्यत्वपक्षेऽपि विजातीयककारादिप्रत्यक्षेऽवच्छेदकतया विजातीयसंयोगस्य, तत्तत्कर्णावच्छिन्नप्रत्यक्षे च तत्तत्कर्णस्य हेतुत्वे गौरवाभावात्, स्वावच्छेदकश्रोत्रसंयुक्तमनःप्रतियोगिकविजातीयसंयोगसंबन्धेन विजातीयपवनस्य हेतुत्वे तत्तत्कर्णानां पृथगहेतुत्वेन प्रत्युत लाघवात्। न च तथाप्यनित्यत्वपक्षे कप्रत्यक्षत्वाद्यपेक्षया कत्वादेरेव जन्यतावच्छेदकत्वे लाघवम्, नित्यत्वपक्षेऽपि लौकिकविषयितय कत्वादेरेव तथात्वात्। न च कोलाहलादौ कत्वादेरग्रहेऽपीदंत्व-शब्दत्वादिना ककारादिप्रत्यक्षात् तत्तत्प्रकारककारादिप्रत्यक्षे पृथग्धेतुत्वे गौरवम्, ककारादिनिष्ठगुणत्वादि-खकारभेदादिप्रत्यक्षे तथात्वे चातिगौरवमिति वाच्यम्; कोलाहले कत्वादिग्रहवारणाय दोषाभावानां कत्वादिप्रत्यक्षे हेतुत्वमपेक्ष्योक्तसंबन्धेन कत्वादेर्विजातीयनिमित्तपवनसंयोगजन्यतावच्छेदकत्वस्यैवौ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चित्यात्, निमित्तपवना-ऽऽकाशादेः समवायेन शब्दत्वस्य जन्यतावच्छेदकत्वापेक्षया कण्ठाद्यभिघातस्य निमित्तपवनसंयोगोपक्षीणत्वात्, तस्यैवोक्तसंबन्धेन शब्दत्वस्य जन्यतावच्छेदकत्वौचित्यात्, तावतैव कोलाहलप्रत्यक्षस्य सुघटत्वात् । न चैवमुच्चार्यमाणयावद्वर्णविषयत्वानियमे तत्कृतकोलाहलतारतम्यप्रत्ययानुपपत्तिः, व्यञ्जकतारतम्यस्यैव तत्रारोपात् । अस्तु वा स्वाश्रयविषयितया कत्वादिकं तथा, अनन्तशब्दोत्पत्ति-नाशादिकल्पनातो लघुत्वात्; शुकादिककाराद्येव वा विषयितया तथा, तदीयश्रावणसमय-तदीयश्रावणविशेषणत्वयोस्तदीयसमवेतप्रत्यक्ष-समवेतनिष्ठाभावप्रत्यक्षयोः कारणत्वाच्च न शब्दत्वादिप्रत्यक्षातिप्रसङ्ग इति दिग् ॥ ५ ॥

उक्तमेवार्थं तदभियुक्तोक्त्यनुवादेन द्रढयति—

आह चालोकवद्वेदे सर्वसाधारणे सति। धर्मा-ऽधर्मपरिज्ञाता किमर्थं कल्प्यते नरः ? ॥६॥

आह च– कुमारिलादिः, आलोकवत्– चाक्षुषहेतुप्रकाशवत्, वेदे सर्वसाधारणे सति– नित्यनिर्दोषतया प्रतिसर्वप्रमातृ तुल्यप्रमार्जनके सति, धर्मा-ऽधर्मपरिज्ञाता– धर्मा-ऽधर्मसाक्षात्कर्ता, नरः– मनुष्यः, किमर्थं कल्प्यते ?– चोदनैव हि धर्मा-ऽधर्माववगमयन्ती प्रवृत्ति-निवृत्त्यादिव्यवहारं स्वर्गा-ऽपवर्गादिफलं च जनयति, इति किमजागलस्तनायमानेन सर्वज्ञेन ? । चोदनाप्रामाण्यार्थं सर्वज्ञः कल्प्यत इति चेत् । न, उपजीव्यत्वेन महाजनपरिग्रहस्यैव तत्प्रामाण्यव्यवस्थापकत्वादिति भावः ॥६॥

यथा वेदाद् धर्मा-ऽधर्मपरिज्ञानं सिध्यति, तथाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इष्टा-पूर्तादिभेदोऽस्मात् सर्वलोकप्रतिष्ठितः। व्यवहारप्रसिद्धयैव यथैव दिवसादयः ॥७॥

इष्टा-पूर्तादिभेदः, अस्मात्– वेदात्, सर्वलोकप्रतिष्ठितः– सर्वजनसिद्धः। ननु स्वर्गादाविष्टा-पूर्तादिभेदधर्मस्य कथं सिद्धिः, सर्वज्ञाभाव आदिसंप्रदायाप्रवृत्तेः? इत्यत आह– व्यवहारप्रसिद्धयैव– व्यवहारस्यानुष्ठानस्य प्रकृष्टाऽनादिपरम्परा-प्रयोज्या या सिद्धिस्तयैव, तथा च सर्ग-प्रलयाभावात् प्रवाहविच्छेदाभावाद् नाद्यसंप्रदायाप्रवृत्तिरिति भावः। कथं व्यवहारो-ऽनादिः? इत्यत्र निदर्शनमाह– यथैव दिवसादयः– यथा दिवसादयो दिवसादिपूर्वका एव दृश्यन्ते तथा व्यवहारोऽपि व्यवहारपूर्वक इति भावः ॥ ७ ॥

इष्टादिस्वरूपमाह—

ऋत्विग्भिर्मन्त्रसंस्कारैर्ब्राह्मणानां समक्षतः। अन्तर्वेद्यां तु यद्दत्तमिष्टं तदभिधीयते ॥८॥

ऋत्विग्भिः– यजमानसहायैः, मन्त्रसंस्कारैः पूतं सद् यद् ब्राह्मणानां समक्षतः– प्रकृत-प्रतिग्रहीत्रतिरिक्तब्राह्मणानां प्रत्यक्षम्, अन्तर्वेद्यां वेदीमध्य एव, दत्तं– हिरण्यादि, तदिष्टमभिधीयते ॥ ८ ॥

तथा—

वापी-कूप-तडागानि देवतायतनानि च। अन्नप्रदानमित्येतत्पूर्तमित्यभिधीयते ॥ ९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वापी-कूप-तडागानि, च– पुनः, देवताऽऽयतनानि– लोकसिद्धानि, तथा, अन्नप्रदानं– भोजनदानम्, इत्येतत् सर्वं 'पूर्तम्' इत्यभिधीयते, भोगफलत्वात् ॥ ९ ॥

तथा—

अतोऽपि शुक्लं यद् वृत्तं निरीहस्य महात्मनः। ध्यानादि मोक्षफलदं श्रेयस्तदभिधीयते ।१०।

अतोऽपि– इष्टा-पूर्तात्, शुक्लं– शुद्धमित्यर्थः, यद् वृत्तम्– आचरितम्, निरीहस्य– निस्पृहस्य, महात्मनः– योगिनः। किं तत् ? इत्याह–ध्यानादि । किंभूतम् ? इत्याह– मोक्षफलदम्– अपवर्गरूपफलप्रदम्, तत् श्रेयोऽभिधीयते, श्रेयोहेतुत्वात् । एवमिष्टम्, पूर्तम्, श्रेयश्चेति त्रिधा कर्मव्यवस्था वेदादेवेत्युपपादितम् ॥ १० ॥

व्यवस्थान्तरमपि तत एवोपपादयन्नाह—

वर्णाश्रमव्यवस्थापि सर्वा तत्प्रभवैव हि । अतीन्द्रियार्थद्रष्टा तन्नास्ति किञ्चित्प्रयोजनम् ११

एवं वर्णानां ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां, आश्रमाणां च गृहि-ब्रह्मचारि-वानप्रस्थ-संन्यासिलक्षणानां व्यवस्थापि, सर्वा– लोकविदिता, हि– निश्चितम्, तत्प्रभवैव– वेदमूलैव, वेदादिनोपवीतादिना चिह्नेन सन्ध्या-षट्कर्माद्याचारेण च ब्राह्मण्यादिनिर्णयात्, ब्राह्मणादीनां कर्मविशेषेऽधिकारनिर्णयाच्चेति भावः । ततः किम् ? इत्याह– अतीन्द्रियार्थद्रष्टा– अतीन्द्रि-

१ ख. ग. घ. च. 'न च'।

यार्थदर्शिना पुंसा, नास्ति प्रयोजनं किञ्चित्, तत्साध्यस्य परलोकादिसाधनस्य वेदादेव सिद्धेः। मुक्तिश्च न सार्वज्ञ्यगर्भा, दुःखनिवृत्तिरूपाया नित्यनिरतिशयसुखाभिव्यक्तिरूपायास्तस्यास्तदगर्भत्वादिति निगर्वः ॥ ११ ॥

इत्थमापतति जैमिनिशिष्ये नास्तिकत्वमिह यत्खलु गूढम्।
दर्शयन्ति तदनेकसमक्षं वेदनैपुणपदाऽपगमेन ॥ १ ॥

अत्रापि ब्रुवते केचिदित्थं सर्वज्ञवादिनः। प्रमाणपञ्चकाऽवृत्तिः कथं तत्रोपपद्यते? ॥१२॥

अत्रापि– मीमांसकानां सर्वज्ञाभाववादेऽपि समुपस्थिते, ब्रुवते केचित्– सर्वज्ञवादिनो जैनाः, इत्थम्– एवं यदुत– प्रमाणपञ्चकाऽवृत्तिः— प्रमाणपञ्चकाविषयत्वम्, कथं, तत्र– सर्वज्ञे, अभावप्रमाणोत्थापकम्, उपपद्यते?– नैवोपपद्यत इति भावः ॥ १२ ॥

तथाहि—

सर्वार्थविषयं तच्चेत्प्रत्यक्षं तन्निषेधकृत्। अभावः कथमेतस्य, न चेदत्राप्यदः समम्? ॥१३॥

यत् तावदुक्तम्– 'प्रत्यक्षेण' इत्यादि, तत्– प्रक्रान्तम्, तन्निषेधकृत्– सर्वज्ञनिषेधकारि, प्रत्यक्षं, चेत्– यदि, सर्वार्थ-

१ ख. ग. घ. च. 'लोकसा'। २ प्रकृतस्तबके श्लो० २।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयं- विश्वगोचरम्, तदा, एतस्य- सर्वज्ञस्य, अभावः कथम्, विश्वगोचरज्ञानाश्रयस्यैव सर्वज्ञत्वात्?। न चेत् तत् प्रत्यक्षं सर्वार्थविषयम्, अत्रापि- एतत्पक्षेऽपि, अदः- अभावः कथमेतस्य? इति, समम्, प्रत्यक्षेण सतोऽप्यर्थस्यातिदूरत्वादिनाऽग्रहणात् तदभावासिद्धेः; अन्यथा धर्मादेरप्यभावप्रसङ्गात्। अनिष्टं चैतद् मीमांसकस्यास्तिकताभिमानिनः। चार्वाकस्तु वराकोऽतीन्द्रियमात्रोच्छेदमिच्छन्ननुपलब्धिमात्रादर्थाभावं साधयन् स्वगृहाद् निर्गतः स्वगृहे पुत्रादीनामप्यभावमवगच्छेत्। अधिकरणासंनिकर्षाद् न तदवगम इति चेत्। तर्ह्यतीन्द्रियाश्रयस्याप्यसंनिकर्षे तदभावासिद्धेर्हतं चार्वाकमतम्, अधिकरणज्ञानमात्रादतीन्द्रियाभावसिद्धौ च प्रकृतेऽप्यधिकरणस्मृतिसत्त्वात् तदापत्तिः। तदुपलम्भकस्वभावेनानुपलब्धेस्तदभावसाधकत्वं त्वसंभवदुक्तिकम्, स्वभावविरोधादिति न किञ्चिदेतत्। तदेवं प्रत्यक्षं न बाधकमित्युक्तम् ॥ १३ ॥

अनुमानं तु तत्साधकमेवेत्याह—

धर्मादयोऽपि चाध्यक्षा ज्ञेयभावाद्धटादिवत्। कस्यचित्सर्व एवेति नानुमानं न विद्यते॥१४॥

धर्मादयोऽपि च- ये परस्य चोदनागम्याः स्वतन्त्रसिद्धा वाऽजीवकायविशेषास्ते धर्मिणः। अध्यक्षा इति साध्यो धर्मः। ज्ञेयभावादिति हेतुः, ज्ञेयत्वादित्यर्थः। घटादिवदिति दृष्टान्तः। साध्यहेतुविकल्पकृतदोषस्तु प्रसिद्धानुमानेऽपि तुल्यः; तथाहि- यदि पर्वतीयो वह्निः साध्यते तदा साध्यविकलो दृष्टान्तः। अथ महानसीयस्तदा बाधः। एवं धूमेऽपि यदि पर्वतीयो हेतुस्तदाऽनन्वयः। यदि च महानसीयस्तदाऽसिद्धता। सामान्योपग्रहोऽप्यतिविलक्षणव्यक्त्योरसंभवीति। यदि च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वह्न्यनुमाने पक्ष-दृष्टान्तहेतु-साध्यव्यक्त्योरत्यन्तवैलक्षण्यानुभवात् सामान्योपग्रहेणैव दोषोद्धारः, व्याप्तिबलात् सामान्यसिद्धावपि पक्षधर्मताबलाद् नियतविशेषसिद्धेरित्युपगम्यते, तदा प्रकृतेऽपि तुल्यम्। न चात्राप्रयोजकत्वम्, विपक्षबाधकतर्काभावादिति वाच्यम्; 'ज्ञानं साश्रयम्, गुणत्वात्, रूपादिवत्' इत्यादाविव बाधकाभावे निरुपाधिसहचाररूपस्यैव तर्कस्य सत्त्वात्, अन्यथेदृशानुमानसहस्रोच्छेदात्। यदि चात्र गुणा-ऽऽश्रययोः कार्यकारणभाव एव परम्परया तर्कः, तदा प्रकृतेऽपि धर्माद्य-ध्यक्षज्ञानयोः स एवाश्रीयताम्, विना सर्वज्ञं धर्माद्यपरिज्ञानस्यान्यतो व्यवस्थापयिष्यमाणत्वात्। ईदृशप्रत्यक्षाश्रयं परिशेषय-न्नाह– कस्यचिदिति, अस्मदादीनां बुद्धादीनां च च्छद्मस्थत्वात्, दृष्टे-ष्टविरुद्धभाषित्वाच्चार्हत्येव धर्मादिसाक्षात्कर्तृत्वविश्रामादिति भावः। तेन न साध्यासिद्धिः, इष्टासिद्धिर्वा, साध्यकोटौ विशिष्यानिवेशात्, परिशेषस्य विशेषपर्यवसायित्वाच्चेति द्रष्टव्यम्। सर्वज्ञवादिभिरपि कैश्चित् सर्वज्ञः कतिपयेष्टार्थवेदित्वेनाभ्युपगम्यते, न तु विश्वद्रष्टा, यदुक्तम्––

"सर्वं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु। कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते? ॥ १ ॥"

तथा––

"सर्वं पश्यतु वा मा वा इष्टमर्थं तु पश्यतु। प्रमाणं दूरदर्शी चेदेतान् गृध्रान् प्रपूजय ॥ १ ॥" इति।

तदभिमतनिरासपूर्वकस्वाभिमतसिद्ध्यर्थं पक्षविशेषणमाह–– सर्व एवेति। न चैवं घटादेः पक्षप्रविष्टत्वे सपक्षत्वानुपपत्तिः, तदप्रविष्टत्वे च 'सर्व एव' इत्यसिद्धमिति वाच्यम्; पक्षप्रविष्टत्वेऽपि निश्चितसाध्यधर्मत्वेन सपक्षत्वाविरोधात्, तत्र ॥३५६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गौरवेण पक्षातिरिक्तत्वानिवेशात् । न च तथाप्यंशतः सिद्धसाधनम् , पक्षसामान्ये साध्यासिद्ध्या तस्यादोषत्वादिति दिग् । वस्तुतस्तत्त्वत एकार्थदर्शनमपि सर्वदर्शनाविनाभावि ; तदुक्तम्– "जे[1] एगं जाणइ से सव्वं जाणइ" इत्यादि । एतदनुसारिभिः पूर्वाचार्यैरस्यायमर्थः प्रत्यज्ञायि—

"एको भावस्तत्त्वतो येन दृष्टः सर्वे भावाः सर्वथा तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टा एको भावस्तत्त्वतस्तेन दृष्टः ॥ १ ॥" इति ।

न चैतदयुक्तम् , एकस्यापि पदार्थस्यानुगत-व्यावृत्तधर्मद्वारेण सर्वपदार्थसंबन्धिस्वभावत्वात् , तदवेदने तत्त्वतोऽधिकृतवस्त्ववेदनात् । केवलमभिमानमात्रमेव लोकानां तत्र– 'तत्त्वतो दृष्टोऽयमर्थः' इति । अथ संबन्धिस्वभावता पदार्थस्य स्वरूपमेव न भवति, यत् केवलं प्रत्यक्षप्रतीतं संनिहितवस्तुमात्रं स एव वस्तुस्वभावः, संबन्धिता तु तत्र पदार्थान्तरप्रतिसंधानसंभवितया परिकल्पितैव ; तदुक्तम्—

"निष्पत्तेरपराधीनमपि कार्यं स्वहेतुना । संबध्यते कल्पनया किमकार्यं कथञ्चन ? ॥ १ ॥"

इति चेत् । अयुक्तमेतत् , इत्थं कल्पनायां स्वरूपमात्रसंवेदनादद्वैतपर्यवसाने व्यवहारोच्छेदात् , तद्भिया बहिष्पदार्थाभ्युपगमे च तन्नियतसर्वसंबन्धिताया अप्यवश्याभ्युपेयत्वात् ; अन्यथा नियतस्वरूपासिद्धेः । न चातिरिक्तैव सर्वसंबन्धिता न तु स्वापृथग्भूतेति वाच्यम् ; अत्यन्तभेदे संबन्धाभावात् , भावे वाऽनवस्थानात् । तथा च तत्पदार्थपरिज्ञाने तस्य विशेषण-

१ य एकं जानाति स सर्वं जानाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूता सर्वसंबन्धितापि ज्ञातैव, केवलमस्मदादिज्ञाने तद्विषयत्वमनुमीयते । अनुमेयं ह्यनभ्यासदशायामितरपदार्थसंबन्धित्वम्, अभ्यासदशायां तु यत्र क्षयोपशमलक्षणोऽभ्यासस्तदग्न्यादिजन्यत्वरूपमग्न्यादिसंबन्धित्वं धूमादेः प्रत्यक्षतोऽपि प्रतीयते । इत्थं च 'विश्वं कस्यचित् घटसाक्षात्कारविषयः, घटसंबन्धिस्वभावत्वात्, एतद्भूतलवत्' इत्यनुमानमपि सर्वज्ञे सर्वपदाक्षिप्तं द्रष्टव्यम् । विषयता च विषयतांशे स्पष्टताख्याऽभिमता, तेन नास्मदादिना सिद्धसाधनम्, अर्थान्तरं वा । न चात्र घटसाक्षात्कारनियतसाक्षात्कारसामग्रीकत्वमुपाधिः, अभ्यासेन घटसाक्षात्कारविषयायां दण्डजन्यतया दण्डसंबन्धितायां व्यभिचारेण साध्यव्यापकत्वात् । एवमस्मदादीनां घटसाक्षात्कारो विश्वसंबन्धितांशे दोषप्रतिबद्धः, तद्ग्राहित्वे सति तद्धर्माग्राहित्वात्, श्वैत्याग्राहिशङ्खप्रत्यक्षवत् । न चात्र दृष्टान्ते साध्यवैकल्यम्, शङ्खप्रत्यक्षस्य श्वैत्यांशे दोषाप्रतिबद्धत्वात्, श्वैत्याभावज्ञानेनैव श्वैत्यज्ञानानुदयात्, श्वैत्याभावग्रहजनकदोषस्य श्वैत्यज्ञानप्रतिबन्धकत्वे विनश्यदवस्थदोषेण यत्र श्वैत्याभावग्रहो जनितस्तत्र श्वैत्याभावज्ञानोत्पत्त्यनन्तरं श्वैत्यज्ञानोत्पत्तिप्रसङ्गादिति वाच्यम्; तदा बाह्यदोषापगमेऽप्यान्तरदोषानपगमात्, आन्तरदोषापगमस्य कार्यैकोन्नेयत्वात्, इतरहेतूनां तदपगम एव व्यापारात्, तस्य च दोषस्य क्वचित् पित्तादिवद्वापगमात् सिध्यति सर्वज्ञः । तदिदमाह– इति हेतोः, नानुमानं न विद्यते– किन्तु विद्यत एव सर्वज्ञेऽनुमानम् ॥ १४ ॥

आगमादपि तत्सिद्धिरित्याह—

आगमादपि तत्सिद्धिर्यदसौ चोदनाफलम् । प्रामाण्यं च स्वतस्तस्य नित्यत्वं च श्रुतेरिव ॥ ॥३५७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आगमादपि तत्सिद्धिः– सर्वज्ञसिद्धिः, यत्– यस्मात्, असौ– सर्वज्ञः, चोदनाफलम्– विध्युद्देश्यः, 'स्वर्ग-केवलार्थिना तपः कर्तव्यम्' इत्यादितपःप्रभृतिकर्मविधीनां स्वर्गांश इव केवलांशेऽपि फले प्रामाण्यात्; अथवा, चोदनाफलम्– चोदनैकवाक्यागमबोधित इत्यर्थः। तथा च "स्वर्गकामो यजेत" इत्यादिविध्येकवाक्यतया "यन्न दुःखेन संभिन्नम्" इत्यादेरिव, "आत्मानं पश्येत्" इत्यादिविध्येकवाक्यतया 'स सर्वज्ञः' इत्यादेरपि स्वार्थे प्रामाण्यमविरुद्धमिति भावः। समर्थयिष्यते चाविशेषेण सर्वेषामेवार्थवादानां प्रामाण्यमिति मा त्वरिष्ठाः। श्रुतितुल्यत्वमस्य व्यवस्थापयति– प्रामाण्यं च तस्य– सर्वज्ञस्य, स्वतः– स्वातिरिक्तानपेक्षोत्पत्तिकत्वात्; नित्यत्वं च दोषक्षयाविर्भूतत्वात्, श्रुतेरिव– वेदस्येव। इदमभ्युच्चयेनोक्तम्।

वस्तुत उत्पत्तौ सर्वत्र परत एव प्रामाण्यम्। प्रमाणं चात्र– प्रामाण्यं ज्ञानहेत्वतिरिक्तहेत्वधीनम्, ज्ञानत्वे सति कार्यत्वात्, अप्रामाण्यवदिति। यदि पुनः प्रामाण्यं ज्ञानसामान्यहेतुमात्राधीनं भवेत् तदाऽप्रमापि प्रमा स्यात्। न खलु तत्र ज्ञानसामान्यहेतुर्न विद्यते, तदनुत्पत्तिप्रसङ्गात्। अथ तत्र ज्ञानहेतुसंभवेऽप्यतिरिक्तदोषानुप्रवेशादप्रामाण्यमिति चेत्। तर्हि दोषाभावमधिकमासाद्य प्रामाण्यमुपजायते, नियमेन तदपेक्षणात्। भावहेतुमधिकं नापेक्षते प्रामाण्यमिति चेत्। न, विशेषादर्शनाद्यभावस्य प्रत्यक्षे, अनुमाने च विपर्यासादिदोषाभावातिरिक्तस्य नियमगुणस्यापेक्षणात्, अन्यथा 'शब्दो नित्यः, प्रमेयत्वात्' इत्यादौ प्रमानुमितिप्रसङ्गात्। अस्त्वन्यत्र तथा, शब्दे तु विप्रलिप्सादिदोषाभावे वक्तृगुणापेक्षा प्रामाण्यस्य नास्तीति चेत्। अवद्यमेतत्, वक्तृगुणाभावे तत्राप्रामाण्यस्य वक्तृदोषापेक्षा नास्तीति विपर्ययस्यापि सुवचत्वात्। अप्रामाण्यं प्रति दोषाणामन्वय-व्यतिरेकौ स्त इति चेत्। प्रामाण्यं प्रति गुणानामपि किं न तौ?। अननुगतानां गुणानां प्रमासामान्ये न हेतुत्वमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेत् । अनुगतानां दोषाणामप्रमासामान्येऽपि न हेतुत्वमिति तुल्यम् । 'यावद्विशेषेऽतिरिक्तहेत्वपेक्षत्वं यद्विशेषे' इत्यादिन्यायोऽपि चोभयत्र तुल्यः । न तुल्यः, शङ्खश्वैत्यादिभ्रमाविशेषे पित्ताभावाद्यतिरिक्तगुणादर्शनादिति चेत् । न, अदर्शनेऽपि तत्र सम्यगुपयोगादिरूपगुणकल्पनात्; अन्यथा देहा-ऽऽत्माभेदभ्रमेऽपि सम्यग्दर्शनरूपगुणाभावातिरिक्तदोषादर्शनाद् मिथ्याज्ञानवासनारूपं दोषकल्पनं न स्यादिति द्रष्टव्यम् । वस्तुतो दृश्यत एवेन्द्रिये पित्तादिदोषवद् नैर्मल्यादिको गुणोऽपि । न च नैर्मल्यमिन्द्रियस्वरूपमेव, दोषेऽप्येवं सुवचत्वात्, जातमात्रस्याप्युभयरूपदर्शनात्, अनुभवभेदस्तूभयत्र परिणतिभेदे तुल्य इति दिक् ।

इत्थं च 'अस्तु पौरुषेयविषयेयं व्यवस्था, अपौरुषेये तु दोषनिवृत्त्यैव प्रामाण्यम्' इत्यपहस्तितम्, गुणनिवृत्त्याऽप्रामाण्यस्यापि संभवात् । तस्याप्रामाण्यं प्रति सामर्थ्यं नोपलब्धमिति चेत् । दोषनिवृत्तेः प्रामाण्यं प्रति क्व सामर्थ्यमुपलब्धम् ? । लोकवशादिति चेत् । तदितरत्रापि तुल्यम् । लोकवचसामप्रामाण्ये दोषा एव कारणम्, गुणनिवृत्तेस्त्वसामर्थ्यमिति चेत् । प्रामाण्यं प्रति गुणेष्वपि तुल्यमेतत् । गुणानां दोषोत्सारणप्रयुक्तः संनिधिरिति चेत् । दोषाणामपि गुणोत्सारणप्रयुक्तोऽसावि-[1]स्त्वस्तु । अथैवं वेदानामपौरुषेयतया गुण-दोषयोरुभयोरप्यभावे तद्धेतुकयोः प्रामाण्या-ऽप्रामाण्ययोरभावाद् निःस्वभावत्वं स्यादिति चेत् । पामर ! हन्त ! एवं मिथ्यामतिसंनिपातग्रस्तमात्मानमुपालभस्व, यदमीषामकर्तृकत्वं प्रलपसि । करिष्यामोऽत्र निपुणं चिकित्साम् । ततो 'यथाक्रमं द्वेषाभावस्य रागाभावस्य चाऽविनाभावेऽपि यथा प्रवृत्ति-निवृत्तिप्रयत्नयो राग-द्वेषयोरेव हेतुत्वं तथा दोषाभावस्य गुणाभावस्य चाविनाभावेऽपि प्रामाण्या-ऽप्रामाण्ययोर्गुण-दोषयोरेव हेतुत्वम्' इति वदन्ति । इत्थं च

१ ख. ग. घ. च. 'णां चि' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वज्ञप्रमायां सम्यग्दर्शनादिगुणापेक्षणादुत्पत्तौ परतस्त्वम्, ज्ञप्तौ तु सर्वज्ञज्ञानप्रामाण्यस्य स्वाश्रयेणैव ग्रहणात् स्वतस्त्वमेव ।

अत्र प्रामाण्यज्ञप्तौ स्वतस्त्व-परतस्त्वयोर्वादिनां विप्रतिपत्तिः । तत्र 'प्रामाण्यं स्वाश्रयेणैव[2] गृह्यते' इति प्राभाकराः[1]; स्वानुव्यवसायिना' इति मुरारिमिश्राः; 'स्वजन्यज्ञाततालिङ्गकानुमित्या' इति भाट्टाः । इत्थं च स्वतस्त्ववादिनामप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामाग्रीग्राह्यत्वमभिमतम्, परतस्त्ववादिनां तु नैवम् । तत्र ज्ञानस्यास्वसंविदितत्वस्य ज्ञाततायाश्च निरासाद् मिश्रमतम्, भट्टमतं चासंभवदुक्तिकम् ।

'ज्ञानधर्मत्वाज्ज्ञानप्रामाण्यं स्वत एव गृह्यताम्; अन्यथा ज्ञानत्वस्याप्यग्रहप्रसङ्गात् । न च प्रामाण्यमयोग्यम्, तद्वति तत्प्रकारकत्वरूपस्य तस्य योग्यत्वात्, प्रकारतादेर्ज्ञानरूपत्वात्' इति प्राभाकरमतमपि न रमणीयम्; स्वधर्मस्यापि सर्वस्य स्वेनाग्रहात्; अन्यथा सार्वज्ञ्यप्रसङ्गात् । यदि च प्रामाण्यं स्वत एव गृह्येत तदा ज्ञानप्रामाण्यसंशयो न स्यात्, ज्ञानग्रहे धर्मिज्ञा[3]नाभावात्, तद्ग्रहे च प्रामाण्यनिश्चयात्, निश्चिते संशयायोगात् । न च निश्चितेऽपि प्रामाण्ये प्रमाणा-ऽप्रमाणसाधारणज्ञानत्वदर्शनादेतदुदय इति सांप्रतम्, साधक-बाधकप्रमाणाभावमवधूय समानधर्मदर्शनादेव संशयोदये तदनुच्छेदप्रसङ्गात् । अथ निश्चितेऽपि प्रामाण्ये दोषात् तत्संशयः, तस्योत्तेजकस्थानीयत्वादिति चेत् । किमर्थमेषा कल्पना ? । प्रामाण्यग्रहहेतुसमाजोपनिपातान्यथानुपपत्तेरिति चेत् । न, स्वाप्राकाश्ये प्रकाश्यघटितसंबन्धेनावृत्तित्वादिरूपे प्रमेयाव्यभिचारित्वलक्षणे प्रामाण्ये विषयांशेऽभ्यासाख्यक्षयोपशमव्यङ्ग्यत्वादनभ्यासदशायां प्रामाण्यग्रहसामग्र्यसिद्धेः । यत्र च स्वांशे प्रामाण्यग्रह-

१ क. 'प्रभाकरः' । २ ख. ग. घ. च. 'सायेनेति' । ३ 'धर्मांशा' इति पाठो युक्तः स्यात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामग्री स्वजनकक्षयोपशमसामग्र्यन्तर्गता तत्र भवत्येव सदा प्रामाण्यग्रहः; अत एव स्वांशे न क्वापि प्रमाणा-ऽप्रमाणविभागः; किन्तु विषयांश एव; तदुक्तम्—

"भावप्रमेयापेक्षायां प्रमाणाभासनिह्नवः । बहिष्प्रमेयापेक्षायां प्रमाणं तन्निभं च ते ॥ १ ॥" इति ।

नैयायिकनये तु स्यादप्ययं दोषः, पुरोवर्तिविशेष्यत्वस्य रजतत्वादिप्रकारत्वस्य चानुव्यवसायग्राह्यत्वाभ्युपगमात्, पुरोवर्तिन इदंत्वेन रजतत्वादिनाऽप्युपनयवशाद् भानसंभवात्, विशेष्यत्वादेरनुपस्थितस्याप्रकारत्वेऽपि विशेष्यतया रजतादिमत्त्वे सति प्रकारितया रजतत्वादिमत्त्वस्य प्रामाण्यस्य सुग्रहत्वात् । न चेदंत्ववैशिष्ट्यं पुरोवर्तिनि न भासत इति वाच्यम्; विशेष्यतायां पुरोवर्तिनः स्वरूपतो भानानुपपत्तेः, तादृशविशेषणज्ञानाभावात्, समानाकारविषयकज्ञानस्यैवोपनायकत्वात्, यद्विशेष्यकयत्प्रकारकज्ञानत्वावच्छेदेन प्रामाण्यसंशयस्तद्धर्मविशिष्टे तत्प्रकारक एव संशय इति नियमात्; प्रकृते प्रामाण्यसंशयोत्तरं 'रजतमिदं नवा द्रव्यं रजतं नवा' इत्याद्यनियमापोहेन 'इदं रजतं नवा' इत्येव संशयार्थमिदंत्वेन धर्मिभानावश्यकत्वाच्च । अथ विधेयताशालिनः स्वातन्त्र्येण वैशिष्ट्यज्ञानेऽनुव्यवसायसामग्र्या असामर्थ्यं कल्प्यते, व्यवसायस्यैव वा प्रतिबन्धकत्वम्, तद्वद्विशेष्यकतोपस्थितेरुत्तेजकत्वाच्च (न?) तत्सत्त्वे प्रामाण्यग्रह इति चेत् । नैतत् कमनीयम्, गौरवात्, व्यवसायनाशोत्तरं तदग्रहप्रसङ्गाच्च, अभ्यासस्य प्रामाण्याश्रयज्ञाने प्रामाण्यग्रहणपरिणामहेतुत्वस्यैव कल्पयितुं युक्तत्वात् । न चेदेवम्, स्वप्रकाशवादोपदर्शितदिशा व्यवसायस्यैव क्षणिकत्वाद् नानुव्यवसायेन ग्रहणमिति कैव कथा प्रामाण्योपस्थितिव्यवहितस्य तस्य ? इति परिभावनीयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतेन वस्तुनः 'तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वमात्रं न प्रामाण्यम्, रजत-शुक्त्योः शुक्तिरजत इत्यादिज्ञानसाधारण्यात्, किन्तु तावद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वम्, तद्ग्रहे चानुव्यवसायसामग्र्या असामर्थ्यम्, व्यवसायो वा प्रतिबन्धकः, विशेषणतावच्छेदकीभूततद्वद्विशेष्यकत्वज्ञानस्यात्र कारणत्वकल्पनाद् वा न प्रथमानुव्यवसायेन तद्ग्रहः' इति निरस्तम्, तत्प्रकारतावच्छिन्नतद्विशेष्यताकत्वस्य प्रामाण्यत्वेऽविनिगमात्, अनभ्यासे द्वितीयानुव्यवसायेनापि तदग्रहाच्च, कदाचित् प्राक्कोट्यस्मरणादिना विलम्बेऽपि तदुत्तरं संशयदर्शनात्। यत्तु 'एकसंबन्धेन तद्वति संबन्धान्तरेण तत्प्रकारकज्ञानं व्यावृत्तं तेन संबन्धेन तत्प्रकारकत्वं प्रामाण्यं दुर्ग्रहम्' इति; तदपि मनोरथमात्रम्, व्यवसायेन संबन्धेन रजतत्वादिकं प्रकारस्तेन तद्वतोऽनुव्यवसाये भानात्। यदपि 'इदं रजतम्' इति तादात्म्यारोपव्यावृत्तये मुख्यविशेष्यता प्रामाण्ये निवेशनीयेति मुख्यत्वं दुर्ग्रहम्' इति; तदपि न, आरोप्यांशे प्रमात्वेन मुख्यताया अनिवेशादिति दिग्।

तस्मादनभ्यासदशायां वह्निज्ञानमात्रतः प्रवृत्तस्य समर्थप्रवृत्त्युपलम्भात् तथैव लिङ्गेन प्रामाण्यं परतो निश्चीयते, निश्चायकस्यानुमानस्य प्रकृतप्रामाण्याश्रयातिरिक्तत्वात्। न चैवं तत्रापि प्रामाण्यग्राहकान्तरापेक्षायामनिष्ठापातः, कस्यचित् संवादकस्य स्वत एव प्रामाण्यनिश्चयेनोपरमात्। ततश्चाभ्यासदशायां तज्जातीयज्वलनोपलम्भे तदाहितक्षयोपशमाल्लिङ्गाद्यनपेक्षतया स्वत एव प्रामाण्यनिश्चय इति विवेकः। दृश्यते च प्राग् लिङ्गाद्यपेक्षतया निश्चितस्यापीष्टसाधनतादेः स्वाश्रयनिर्भासिज्ञानेऽभ्यासाहितक्षयोपशमपाटवात् तदनपेक्षतयापि साक्षादनुभवः। स्मृतित्वं च तत्रानुभवबाधितम्। प्राक् तदुपस्थितिरपि तत्रातन्त्रम्, क्षयोपशमेन ज्ञानप्रत्यासत्त्यन्यथासिद्धेः, तथाविधोपस्थित्यादिनियामकादेव कार्यनियमसिद्धेः "तद्धेतोः" इत्यादिन्यायात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत एव श्रुतनिश्रितादिमतिज्ञानव्यवस्थापि संगता, तत्र श्रुतानुसारानपेक्षणादित्यन्यत्र विस्तरः। अथ झटिति प्रचुरा च तथाविधा प्रवृत्तिरन्यथानुपपद्यमाना स्वतःप्रामाण्यज्ञप्तिमाक्षिपतीति चेत्। न, अन्यथैवोपपत्तेरिष्टोपायताज्ञानादेर्झटिति सिद्ध्यादिनैव झटिति प्रवृत्त्यादिसंभवात्, तत्र प्रामाण्यग्रहस्य क्वचिदप्यनुपयोगात्, उपयोगे वा 'स्वतः' इति पक्षपातायोगात्।

स्यादेतदनभ्यासदशायां प्रामाण्यसंदेहादपि प्रवृत्तेः किं प्रामाण्यनिश्चयप्रयोजनम्? इति। तत्र वदन्ति– तद्विषयसंशयापगम एव प्रयोजनम्, इति किं प्रयोजनान्तरनिरूपणप्रयासेन?। तत् प्रयोजनं किम्? इति चेत्। अभ्यास एव। संदेहात् प्रवर्तमानस्य कथं प्रेक्षावत्त्वं स्यात्? इति चेत्। न, कथञ्चित् प्रेक्षावरणक्षयोपशमादासादितप्रेक्षावद्व्यपदेशस्यापि संदेहादिदशायां तदभावादतथाव्यपदेशात्; उक्तं च—

"प्रेक्षावत्ता पुनर्ज्ञेया कस्यचित् कुत्रचित् क्वचित्। अप्रेक्षाकारिताप्येवमन्यत्राशेषवेदिनः॥ १॥" इति।

अयं भावः– तृणारण्यादिस्थले वह्नाविव प्रामाण्यसंशय-निश्चयस्थले प्रवृत्तौ विशेषादर्शनाद् विशिष्य प्रवृत्तौ तयोर्हेतुत्वं न कल्प्यते चेत्, तथापि प्रेक्षावरणक्षयोपशमभावा-ऽभावाभ्यामर्थतस्तयोः प्रेक्षावद-ऽप्रेक्षावत्प्रवृत्तित्वविशेषोऽनिवारित एव। न च सकम्पत्व-निष्कम्पत्वयोः प्रवृत्तिगतविशेषधर्मयोरनुभवात् तदवच्छिन्नयोरेव हेतुत्वमिति निरवद्यम्; कम्पा-ऽकम्पयोरपि फलानवश्यंभावसंभावनाजनितभय-तदभावनिमित्तत्वात् स्वाभाविकविशेषासिद्धेः। किञ्च, प्रामाण्यानिश्चयेऽपि कोट्यस्मरणादिना संशयाभावाद् निष्कम्पप्रवृत्त्युपपत्तेर्व्यभिचारादपि न तत्र प्रामाण्यनिश्चयस्य हेतुत्वम्, प्रेक्षापूर्वप्रवृत्तौ तु बाध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वनिश्चये विशेषदर्शनस्यैव प्रामाण्यनिश्चयस्य हेतुत्वं स्यादपीति । वस्तुतः प्रवृत्तावप्रामाण्यज्ञानानास्कन्दितस्यैवेष्टज्ञानस्य हेतुत्वाद् हेतुतावच्छेदकविघटकाप्रामाण्यज्ञानापनयनायैव प्रामाण्यनिश्चयादरः । तदिदमुक्तम्- 'तद्विषयसंशयापगम एव प्रयोजनम्' इति । अधिकमस्मत्कृतप्रमारहस्यादनुसंधेयम् । तत् सिद्धमेतत्—

प्रामाण्यं स्वत एव केवलदृशां ज्ञप्तौ, गुणापेक्षणादुत्पत्तौ परतः, स्वतश्च परतश्छाद्मस्थ्यभाजां पुनः ।
अभ्यासे च विपर्यये च विदितं ज्ञप्तौ, समुत्पद्यते त्वन्यस्मादिति शासनं विजयते जैनं जगज्जित्वरम् ॥ १ ॥१५॥

एवं सर्वज्ञग्रहादुपमानस्याप्यत्र प्रवृत्तिरित्याह—

हृद्गताशेषसंशीतिनिर्णयात् तद्ग्रहे पुनः । उपमान्यग्रहे तत्र न चान्यत्रापि चान्यथा ॥१६॥

हृद्गताशेषसंशीतिनिर्णयात्— स्वहृदयगताखिलसंदेहापनयनाद् हेतोः, तद्ग्रहे- सर्वज्ञग्रहे सति, पुनः- तदनन्तरम्, अन्यग्रहे- तथाविधान्योपलब्धौ सत्याम्, तत्र- गृहीते सर्वज्ञे, 'अनेन सदृशोऽसौ' इत्युपमानम् । तद्ग्रहे चोपमाऽप्रवृत्तौ न क्षतिरित्याह- न चान्यत्रापि च- गो-गवयादावपि च, अन्यथा- उभयदर्शनाभाव उपमासंभवः ।

अत्र वैशेषिकादयः- 'नोपमानमतिरिच्यते, विषयाभावात् । न च सादृश्यं विषयः, तद्धि नातिरिक्तम्, तद्व्यञ्जक-
६१ त्वाभिमतस्य तदन्यत्वे सति तद्धर्मवत्त्वादेरेव तत्त्वात् । तच्च स्वघटकभेदप्रतियोगिज्ञानसहकृतेन्द्रियग्राह्यम् । एतेन 'इन्द्रियसंनिकर्षमात्रात् तदग्रहेण लिङ्गाद्यप्रतिसंधानेऽपि च ग्रहणे तस्यानतिरिक्तत्वेऽपि ग्राहकान्तरमावश्यकम्' इत्यपास्तम् । ननु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथापि गवये गोप्रतियोगिकसादृश्यज्ञानकरणकं गवि गवयप्रतियोगिकसादृश्यज्ञानमुपमितिरस्तु । न ह्येतत् प्रत्यक्षम्, विशेष्यस्य गोरसंनिकर्षात् । नापि स्मृतिः, अननुभूतविषयकत्वात्, गोरनुभवेऽपि विशिष्टस्याननुभवात्; तदुक्तम्—

"तस्माद् यत् स्मर्यते तत् स्यात् सादृश्येन विशेषितम् । प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥ १ ॥"

इत्युपमानमतिरिच्यतामिति चेत् । न, एवं सति 'गवयो गोविधर्मा' इति ज्ञानस्यापि 'गौर्गवयविधर्मा' इति ज्ञानजनकस्य मानान्तरत्वप्रसङ्गात् । यदि च गवये गोप्रतियोगिकवैधर्म्यज्ञाने गवि गवयनिष्ठवैधर्म्यप्रतियोगित्वेन ज्ञानेन गवयप्रतियोगिकवैधर्म्यमनुमीयते, तदा तुल्यम्, प्रकृतेऽपि गवयनिष्ठसादृश्यप्रतियोगित्वेन गवयप्रतियोगिकसादृश्यानुमानात्' इत्याहुः ।

नैयायिकास्तु– 'कीदृग् गवयः ?' इति प्रश्ने 'गोसदृशो गवयः' इत्युत्तरवाक्ये श्रुते, वने पर्यटतस्तत्सदृशपिण्डदर्शनानन्तरं तत्र गवयपदशक्तिपरिच्छेद उपमानफलम्, इन्द्रिय-लिङ्ग-शब्दासाध्यत्वात् । न च 'गोसदृशो गवयः' इति वाक्यादेव गोसादृश्यविशिष्टे शक्तिग्रहः, 'गोसदृशो गवयपदवाच्यः, असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात्' इत्यनुमानाद् वेति शङ्कनीयम्; गौरवात्, तदज्ञानेऽपि व्यवहारादिना गवयत्वविशिष्टे शक्तिग्रहेण गवयपदप्रयोगाच्च, गोसादृश्यस्य गवयपदाप्रवृत्तिनिमित्तत्वात्, गवयत्वस्य तादृशस्य प्रागप्रतीतेः, शब्दादनुमानाद् वा तेन रूपेण शक्त्यग्रहात् । न च गवयत्वप्रत्यक्षा-

१ मुद्रितश्लोकवार्तिके पृ० ४४४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्तरं 'गोसदृशो गवयः' इति वाक्याल्लक्षणया गवयत्वविशिष्टे शक्तिग्रह इति वाच्यम्; गोसादृश्यसामानाधिकरण्येन गवयपदवाच्यत्वबोधजननात्, जनितान्वयबोधतयाऽनाकाङ्क्षत्वेन तस्य लक्षणीयं बोधयितुमसमर्थत्वात् । ननु तथापि 'गवयपदं सप्रवृत्तिनिमित्तकम्, पदत्वात्' इति सामान्यतो दृष्टमितरबाधात्, लाघवाच्च गवयत्वप्रवृत्तिनिमित्तकत्वबोधकमस्तु; अस्तु वा गवयत्वप्रवृत्तिनिमित्तकं तत्, इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तत्वादिति व्यतिरेक्येव तथेति चेत् । न, अनुमितेर्व्यापकतानवच्छेदकाप्रकारकत्वात्, द्वितीये साध्याप्रसिद्धेश्च ।

अत्र 'सादृश्यादिविशिष्टपिण्डदर्शनं करणम्, उद्बोधकीभूततज्जन्यातिदेशवाक्यार्थस्मृतिर्व्यापारः' इति मिश्राः । 'एतन्नये वाक्यार्थस्मृत्यव्यवहितोत्तरं सादृश्यविशिष्टपिण्डदर्शन उपमितिर्न स्यात्, इत्यतिदेशवाक्यार्थधीः करणम्, तदर्थस्मृतिर्व्यापारः, सदृशपिण्डदर्शनं च सहकारि' इति नव्याः । 'एतन्नयेऽतिदेशवाक्यार्थानुभवोत्तरमेव सदृशपिण्डदर्शन उपमितिर्न स्यादिति वाक्यज्ञानं करणम्, वाक्यार्थानुभवादिकं व्यापारः' इत्यन्ये । 'अयमपि नयश्चित्रलेखादिना मानसबोधादुपमित्यभावे शोभते । न च निश्चयत्वाप्रवेशलाघवादातिदेशवाक्यार्थशाब्दत्वेनैव हेतुत्वात् प्रकृत आभिप्रायिकशब्दकल्पनाद् नानुपपत्तिरिति वाच्यम्; तदर्थज्ञानसत्त्वेऽपि व्यापारभूततन्निश्चयादेव कार्यसंभवात् । तस्मात् सादृश्यज्ञानमात्रं करणम्, व्यापारोऽतिदेशवाक्यार्थज्ञानम्, सादृश्यविशिष्टपिण्डदर्शनं च, उभयत्रैव विशेषणीभूतसादृश्यज्ञानहेतुत्वात्' इति यौक्तिकाः । अथ 'धिक् करभमतिदीर्घग्रीवं कठोरकण्टकाशिनमपसदं पशूनाम्' इत्यादिवाक्यार्थज्ञानादनन्तरमतिदीर्घग्रीवत्वादिरूपवत्पिण्डदर्शने करभपदवाच्यतोपमितेरत्र पश्वन्तरवैधर्म्यज्ञानमप्युपमितिहेतुः, इति साधर्म्य-वैधर्म्यज्ञानयोरुपमितिहेतुत्वे व्यभिचार इति चेत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न, इदंत्वाद्यवच्छिन्ने गवयपदवाच्यत्वोपमितौ गवयपदवाच्यत्वधर्मितावच्छेदकप्रकारकज्ञानत्वेन हेतुत्वात्; अस्तु वाऽनुमितिविशेषे परामर्शविशेषवदुपमितिविशेषे तत्तज्ज्ञानानां हेतुत्वम्, अन्यथा तत्तदप्रामाण्यज्ञानाभावनिवेशानुपपत्तेः' इत्याहुः।

वयं तु ब्रूमः– गवये गोसादृश्यज्ञानं न प्रत्यक्षम्, अस्पष्टत्वात्, 'उपमिनोमि' इति विलक्षणानुभवाच्च; किन्तु प्रत्यभिज्ञाविशेष एव, उपमितित्वस्य प्रत्यभिज्ञात्वव्याप्यत्वात्, गवये गोसादृश्यज्ञाने गवि गवयसादृश्यपरिच्छेदोऽपि लिङ्गादिप्रतिसंधानानपेक्षत्वाद् नानुमानिकः, किन्तु विचित्रक्षयोपशमाधीनस्तस्यैव समानवित्तिवेद्यपर्यायग्रहपरिणामः। संज्ञा-संज्ञिसंबन्धप्रतीतिरपीत्थमेवोपपादनीया, प्रतीतगवयपदवाच्यत्वोपलक्षणताकस्य गोसादृश्यस्य ग्रहेऽतिदेशवाक्यार्थस्मरणे च सति गवयं प्रति व्यापारिते लोचने तथाप्रत्यभिज्ञावरणक्षयोपशमात् 'अयं गवयपदप्रवृत्तिनिमित्तवान्' इति परिच्छेदोपपत्तेः; अन्यथा 'कररेखाविशेषवान् शतवर्षजीवी' इति वाक्यार्थं प्रतिसंदधतः क्वचित् पुरुषे कररेखाविशेषोपलम्भे तत्र 'अयं शतवर्षजीवी' इत्यनुसंधानमपि प्रमान्तरं स्यात्, इति तत्रापि प्रमाणान्तरमन्वेषणीयं देवानांप्रियेण। अथात्र 'कीदृग्लिङ्गः शतवर्षजीवी ?' इति प्रश्ने 'कररेखाविशेषवान् शतवर्षजीवी' इत्युत्तरवाक्यं व्याप्तिपरम्, इति कररेखाविशेषणलिङ्गेन शतवर्षजीवित्वमनुमीयत इति चेत्। न, लिङ्गाद्यनुसंधानाभावात्; अन्यथा प्रकृतेऽपीदृशक्रमस्य सुवचत्वात्। 'इन्द्रियव्यापाराभावेऽप्युपलब्धगोसादृश्यविशिष्टगवयपिण्डस्य वाक्यतदर्थस्मृतिमतः कालान्तरेऽप्यनुसंधानबलात् समयपरिच्छेदोपपत्तेर्न प्रत्यभिज्ञानमेतत्' इति तु 'प्रत्यभिज्ञा प्रत्यक्षविशेषः' इति वदतां दूषणम्, नास्माकमत्र परोक्षभेदवादिनाम्। हेतुभेदश्चात्र नाधिक्यसाधकः, प्रत्यक्षविशेषे चाक्षुषादौ चक्षुरादिहेतुभेदवत् प्रत्यभिज्ञाविशेषेऽतिदेशवाक्यादिहेतुभेदोपपत्तेः। नन्वेवमतिदेशवाक्यार्थानुभवान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्तरं झटित्येव सदृशपिण्डदर्शन उपमितिर्न स्यात्, अनुभव-स्मरणोत्तरमेव प्रत्यभिज्ञानोपगमादिति चेत् । न स्यादेव यदि श्रुतोपयोगानुपरमः, तदुपरमे तु स्मृतिसंपत्त्या स्यादेवेति दिग् ॥ १६ ॥

अर्थापत्त्यापि तद्ग्रहं प्रतिपादयितुमाह—

शास्त्रादतीन्द्रियगतेरर्थापत्त्यापि गम्यते । अन्यथा तत्र नाश्वासश्छद्मस्थस्योपजायते ॥१७॥

शास्त्रात्– वेदात्, अतीन्द्रियगतेः– धर्मा-ऽधर्मादिपरिच्छेदात्, अर्थापत्त्यापि– परमार्थनीत्या, गम्यते सर्वज्ञः । न हि तद्वाच्यवाचकसाक्षात्कारिव्यतिरेकेण सम्यक्शास्त्रादतीन्द्रियार्थगतिरित्यर्थात् तत्सिद्धिरिति । इत्थं चैतदङ्गीकर्तव्यम् । अन्यथा, तत्र– अतीन्द्रियार्थे, नाश्वासः– 'इदमित्थमेव' इत्येवम्, छद्मस्थस्य– अक्षीणावरणस्य प्रमातुः, उपजायते, वक्ष्यमाणरीत्या शक्तितात्पर्यनिश्चयाभावात्, निश्चितेऽप्यावरणदोषात् संशयाद्युत्पत्तेश्च । ज्ञानावरणप्रकृतिकत्वाज्ज्ञानावरणकर्मणः सर्वज्ञमूलकत्वनिश्चयाच्च तन्निवृत्तिः सुघटा, "तमेव सच्चं"[1] इत्याद्यागमप्रामाण्यात् । वेदमूलकत्वेन तु न तन्निवृत्तिः, वेदमूलकत्वेऽव्यभिचारित्वव्याप्यत्वस्य वेदेनाबोधनात्; अन्यतश्चानाश्वासादिति स्फुटीभविष्यत्युपरिष्टात् । एवं वचनविशेषान्यथानुपपत्तिरूपयाप्यर्थापत्त्या सर्वज्ञसिद्धिर्भावनीया ।

अथासर्वज्ञत्व-वक्तृत्वयोर्वह्नि-धूमयोरिव नियतानुकृतान्वय-व्यतिरेकत्वेन हेतुहेतुमद्भावात् कथमेतत् ? । न च विवक्षा-

१ तदेव सत्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

या एव वचनहेतुत्वम्, तदभावेऽसर्वज्ञत्व-रागादिसद्भावेऽपि वचनाभावेन व्यभिचारादिति वाच्यम्; विवक्षायामपि व्यभिचारोपलब्धेः, अन्यविवक्षायामन्यशब्ददर्शनात्, अन्यथा गोत्रस्खलनादेरभावप्रसङ्गात्। अर्थविवक्षाव्यभिचारेऽपि शब्दविवक्षायामव्यभिचार इति चेत्। न, स्वप्नावस्थायामन्यगतचित्तस्य वा तदभावेऽपि वक्तृत्वसंवेदनात्। न चासर्वज्ञत्वादिना वचनस्यान्वयासिद्धावपि 'तदभावे सर्वत्र वक्तृत्वं न भवति' इत्यत्र प्रमाणाभावात् प्रत्यक्षा-ऽनुपलम्भसाध्यः कथं हेतु-हेतुमद्भावनिश्चयः ? इति वाच्यम्; वह्निधूमस्थलेऽप्येवं सुवचत्वात्, तर्कबलेन नियमस्य चोभयत्र सुग्रहत्वादिति चेत्।

न, वह्नि-धूमयोरिवासर्वज्ञत्व-वक्तृत्वयोः कार्यकारणभावाभावात्; तथाहि— 'वह्निसद्भावे धूमो दृष्टस्तदभावे न दृष्टः' इत्येतावतैव न धूमस्याग्निकार्यत्वम्, किन्तु वह्निधर्मानुविधायित्वम्, "कार्यं धूमो हुतभुजः कार्यधर्मानुवृत्तितः" इति वचनात्। तच्च न दर्शना-ऽदर्शनमात्रगम्यम्, किन्तु विशिष्टात् प्रत्यक्षा-ऽनुपलम्भाख्यात् प्रमाणात् प्रतीयते। प्रत्यक्षमेव कार्यकारणाभिमतपदार्थविषयं तद्विविक्तान्यवस्तुविषयं च प्रत्यक्षा-ऽनुपलम्भशब्दाभिधेयम्। कदाचिदनुपलम्भपूर्वकं प्रत्यक्षं तद्भावसाधकम्, कदाचिच्च प्रत्यक्षपुरस्सरोऽनुपलम्भः। तत्राद्येन येषां कारणाभिमतानां संनिधानात् प्रागनुपलब्धं धूमादि यत्संनिधानादुपलभ्यते तस्य तत्कार्यता व्यवस्थाप्यते, 'वह्न्यतिरिक्तकारणसमवहितो धूमो यद्यग्निजन्यो न स्यात्, अग्निसंनिधानात् प्रागपि तत्र देशे स्यात्, अन्यतो वाऽऽगच्छेत्' इत्यापाद्यव्यतिरेकशङ्काया अनुपलम्भेन निरासात्। संनिहितधूमे जायमानस्य वह्निजन्यत्वनिश्चयस्य सामान्योपयोगेन सामान्ये पर्यवसानात्। एतेन 'प्रागनुपलब्धस्य रासभस्य कुम्भकारसंनिधानानन्तरमुपलभ्य- ॥३६३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानस्य तत्कार्यता स्यात्' इति निरस्तम्; तथाहि— तत्रापि यदि रासभस्य तत्र प्रागसत्त्वम्, अन्यदेशादनागमनम्, अन्याकारणत्वं च निश्चेतुं शक्येत तदा स्यादेव कुम्भकारकार्यता, केवलं तदेव निश्चेतुमशक्यमिति। द्वितीयेन यत्संनिधाने प्रवर्तमानं तत्कार्यं दृष्टं तावतां मध्ये यस्याभावात् तद् नोपलभ्यते तत्र तत्कार्यत्वं निश्चीयते। न चाग्नि-काष्ठादिसंनिधाने भवतो धूमस्यापनीते कुम्भकारादावनुपलम्भोऽस्ति, अग्न्यादौ त्वपनीते भवत्यनुपलम्भः। इति परस्परसहितौ प्रत्यक्षा-ऽनुपलम्भौ तन्निश्चायकौ। सर्वकालमग्निसंनिधाने भवतश्च धूमस्यानग्निजन्यत्वं कदाचिदजन्यत्वेनाहेतुकत्वेन, अदृश्यहेतुकत्वेन वा शक्येत, तत्र कादाचित्कत्वा-ऽग्न्याद्यन्वयानुविधायित्वज्ञानेन तन्निवृत्तिरिति दिग्।

न चायं प्रकारोऽसर्वज्ञत्व-वक्तृत्वयोः संभवति, असर्वज्ञत्वधर्मानुविधानस्य वचनेऽदर्शनात्; तथाहि— असर्वज्ञत्वं यदि पर्युदासेन किञ्चिज्ज्ञत्वमुच्यते तदा तद्धर्मानुविधानादर्शनाद् न तज्जन्यता वचनस्य। न हि किञ्चिज्ज्ञत्वतरतमभावाद् वचनस्य तरतमभाव उपलभ्यते, किञ्चिज्ज्ञत्वप्रकर्षवत्स्वत्यल्पविज्ञानेषु कृम्यादिषु वचनोत्कर्षानुपलम्भात्। यदि च प्रसज्यप्रतिषेधेनासर्वज्ञत्वं सर्वज्ञत्वाभाव उच्यते, तदा ज्ञानरहिते मृतशरीरे तस्योपलम्भः स्यात्, न च कदाचनापि तत् तत्रोपलभ्यते, ज्ञानातिशयवत्स्वेव सकलशास्त्रव्याख्यातृषु वचनातिशयदर्शनात्। अतो ज्ञानप्रकर्षतारतम्यरूपज्ञानधर्मानुविधानदर्शनात् तत्कार्यता, धूमस्येवाग्न्यादिसामग्रीगतसुरभिगन्धाद्यनुविधायिनोऽग्न्यादिजन्यता, इति यथोक्तप्रत्यक्षा-ऽनुपलम्भाभ्यामेतावद्व्यापारकज्ञानस्य स्पष्टताननुभवेनोहाख्येन प्रमाणान्तरेण व्यवस्थाप्यत इति। यद् यन्निश्चिताविसंवादि वचनं तत् तदविसंवादिज्ञानविशेषपूर्वकतां विना नोपपन्नम्, इत्यात्मन्येवासकृद् निश्चितम्, इत्यविसंवादिवचनविशेषोऽविसंवादिज्ञानवन्तं पुरुष-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषं सर्वज्ञमर्थापयतीति सिद्धम्; तदुक्तम्—

"यद् यस्यैव गुणान् दोषान् नियमेनानुवर्तते। तन्नान्तरीयकं तत् स्यादतो ज्ञानोद्भवं वचः॥ १॥" इति।

इदं चाभ्युपगम्योक्तम्, वस्तुतोऽर्थापत्तिर्नानुमानादतिरिच्यते; तथाहि– 'देवदत्तस्य जीवित्वे सति गृहेऽसत्त्वं बहिः सत्त्वं विनाऽनुपपद्यमानं बहिः सत्त्वमर्थापयति' इति परेषामभिमानः। तत्र बहिः सत्त्वं विनाऽनुपपत्तिर्बहिःसत्त्वाभावव्यापकीभूताभावप्रतियोगित्वं व्यतिरेकव्याप्तिरेव, इति 'देवदत्तो बहिः सन्, जीवित्वे सति गृहासत्त्वात्, यो नैवं स नैवम्, यथा गृहवर्ती' इति व्यतिरेक्यनुमानमस्तु, 'बहिर्वृत्तिमद्वत्' इति दृष्टान्तेन कदाचिदन्वय्येव वा। अथ गृहे संनिकृष्टे जीविदेवदत्ताभावो गृहीतो देवदत्ते बहिःसत्त्वकल्पकः; न चेदमनुमानम्, वैयधिकरण्यादिति चेत्। न, विशिष्टेन सह गृहीतान्यथानुपपत्तिकेन लिङ्गेन व्यधिकरणेनापि विशिष्टानुमानोपपत्तेः, 'उदेष्यति शकटम्, कृत्तिकोदयात्' 'उपरि सविता, भूमेरालोकवत्त्वात्' इत्यादौ तथादर्शनात्, पक्षधर्मताया अनुमितावतन्त्रत्वात्; इष्यते च परेणाप्येतत्,

"पित्रोश्च ब्राह्मणत्वेन पुत्रब्राह्मणताऽनुमा। सर्वलोकप्रसिद्धा, न पक्षधर्ममपेक्षते॥ १॥" इत्यभिधानात्।

'तुल्यवित्तिवेद्यतया तदुत्तरं मनसा वा गृहीतेन गृहनिष्ठाभावप्रतियोगित्वेन देवदत्तनिष्ठेनानुमानाद् न वैयधिकरण्यम्; 'उदेष्यति शकटम्' इत्यादावप्येतत्काले संनिहितशकटोदयत्वम्, भूमौ संनिहितसवितृकत्वं च साध्यते' इति तु यौगाः। तच्चिन्त्यम्, तथापि 'बहिर्देशो देवदत्तवान्' इत्यस्यानुपपत्तेः, यथोहमनुमितिव्यवस्थाया एव न्याय्यत्वात्, विलक्षणानुमितौ वि- ॥३६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्षणशक्तिमत्त्वेन तत्तज्ज्ञानानां हेतुत्वादित्यन्यत्र विस्तरः। एतेन 'अस्त्वन्वयव्याप्तिज्ञानजन्याऽनुमितिः, व्यतिरेकव्याप्तिज्ञानजन्या त्वर्थापत्तिः, अन्यथा परस्परव्यभिचारेण हेतुत्वस्याप्यसंभवात्' इति निरस्तम्, प्रमाणद्वयसमाहारे परस्परविरोधित्वकल्पने गौरवात्, अनुभूयमानानुमित्यपलापप्रसङ्गाच्च। 'व्यतिरेकिणो वह्न्यभावाभाववत्त्वादिना, अन्वयिनस्तु वह्न्यादिनाऽनुमितिः' इत्यन्ये। तत्र नियमश्चिन्त्यः। अथ व्यतिरेकव्याप्तिज्ञानजन्यज्ञाने 'नानुमिनोमि किन्त्वर्थापयामि' इत्यनुव्यवसायात् पार्थक्यमेवास्या इति चेत्। न, 'नानुभवामि किन्त्वनुमिनोमि' इतिवदस्य पार्थक्याव्यवस्थापकत्वात्, अन्यथाऽन्वयव्यतिरेकिणः प्रमाणान्तरत्वप्रसङ्गात्, अनुभवापलापस्यान्यत्रापि तुल्यत्वाच्चेति दिग्।

अथ जीवद्गृहाभावग्रहसमय एव बहिःसत्त्वग्रहात् प्रमेयानुप्रवेशदोषाद् नेदमनुमानमिति चेत्। न, असिद्धे धूमाभावग्रहोत्तरमेव दहनप्रतीतिवज्जीवतो गृहाभावग्रहोत्तरमेव बहिःसत्त्वप्रतीतेः। अथ 'देवदत्तः क्वचिदस्ति, जीवित्वात्' इत्यनुमानजन्यं क्वचित्त्वेन गृहविषयकं ज्ञानम्, अनुपलब्धिजन्यं च 'गेहे नास्ति' इति ज्ञानम्, इत्यनयोर्विरोधज्ञानात् करणीभूतात् 'क्वचित्' इत्यत्र गेहान्यविषयकत्वार्थापत्तिरविरोधापादिका जायत इति चेत्। न, तयोर्ज्ञानयोरेककालीनत्वेनाविरोधात्। 'क्वचिदिति ज्ञानं यदि गेहविषयकं स्याद् 'गेहे नास्ति' इति ज्ञानं विरुद्धं स्यात्' इति विरोधापादनं च 'क्वचित्' इति न गेहविषयकम्, 'गेहे नास्ति' इत्यविरुद्धत्वादित्यनुमानोत्थापकमेव। 'गृहसत्त्व-गृहासत्त्वयोर्विरोधो गृहासत्त्व-बहिःसत्त्वयोर्व्याप्तिद्योतक एव' इत्यन्ये। अथ सामान्यानुमितिसामग्र्यामेवैकविशेषबाधज्ञानकरणिका विशेषान्तरप्रकारिकाऽर्थापत्तिरिति चेत्। न, एवं सति पर्वते वह्न्यनुमितेरपि जायमानायाः शिखरावच्छेदेन बाधज्ञानाद् नितम्बावच्छेदेन पर्यवस्यन्त्याः, सामान्यप्रत्यक्षादेर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्येकविशेषबाधाद् विशेषान्तरपर्यवसायिनोऽर्थापत्तित्वप्रसङ्गादिति दिग् ॥ १७ ॥

यतश्चैवम्, अत आह—

प्रमाणपञ्चकावृत्तिरेवं तत्र न युज्यते । तथाप्यभावप्रामाण्यमिति स्वान्ध्यविजृम्भितम् ॥

प्रमाणपञ्चकाऽवृत्तिः– भावोपलम्भकयावत्प्रमाणाविषयत्वम्, एवम्– उक्तरीत्या, तत्र– सर्वज्ञे, न युज्यते– न घटते; तथापि– एवमपि व्यवस्थिते, अभावप्रामाण्यम्– अभावप्रमाणस्य सर्वज्ञाभावनिश्चायकत्वम्, इति– अदः, स्वान्ध्यविजृम्भितम्– स्वाज्ञानविलसितम्, सदुपलम्भकसाम्राज्येनाभावप्रमाणस्यैवानुत्थानात् । वस्तुतोऽभावस्य पृथक्प्रमाणत्वमेवासिद्धम्, भावांशग्राहिणेन्द्रियेणैवाभावांशग्रहणात् । न च संबन्धाभावः, योग्यतारूपस्य तस्याभावायोगात्, संयोगस्य च भावांशोपलम्भेऽप्यतन्त्रत्वात्, चक्षुषोऽप्राप्यकारित्वव्यवस्थितेः । कथमेतदेवम्? इति चेत् । शृणु, प्रसङ्गसंगतमेतत्तत्त्वं निरूपयामः—

चक्षुर्न प्राप्यकारि, अधिष्ठानासंबद्धार्थग्राहकेन्द्रियत्वात्, मनोवत् । न चाप्रयोजकत्वम्, संबद्धार्थग्राहकत्वे तस्य वह्नि-जलावलोकनादिना दाह-क्लेदादिप्रसङ्गात्, अधिष्ठानाच्चक्षुषो विभागेऽन्धत्वप्रसङ्गाच्च । अथ नयनाद् नायना रश्मय एव निर्गत्य प्राप्य च वस्तु रविरश्मय इव प्रकाशमादधति, सूक्ष्मत्वेन तैजसत्वेन च तेषां वह्न्यादिभिर्दाहादयो न भविष्यन्तीति चेत् । न, चक्षुषस्तैजसत्वस्यैवासिद्धेः । न च 'चक्षुस्तैजसम्, रूपादिषु मध्ये रूपस्यैवाभिव्यञ्जकत्वात्, प्रदीपवत्' इत्यनुमा- ॥३६५॥

१ मुद्रितमूलपुस्तके 'ध्यान्ध्यवि' इति पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नात् तत्सिद्धिः, चक्षु-र्विषयसंयोगेनानैकान्तिकत्वात्; 'द्रव्यत्वे सति' इति विशेषणेऽप्यञ्जनविशेषेणानैकान्तिकत्वाच्च। एतेन 'रूपसाक्षात्कारासाधारणकारणं तैजसम्, रसाव्यञ्जकत्वे सति स्फटिकाद्यन्तरितप्रकाशकत्वात्, प्रदीपवत्' इत्यपि निरस्तम्। 'अञ्जनादिभिन्नत्वे सति' इति विशेषणदाने चाप्रयोजकत्वात्, अञ्जनादिवच्चक्षुषोऽतैजसत्वेऽप्यक्षतेः, चक्षुः-प्रदीपयोरेकया जात्या व्यञ्जकत्वासिद्धेश्च।

अथ चक्षुषोऽप्राप्यकारित्वे कुड्यादिव्यवहितस्यापि ग्रहणं स्यात्, असंनिहितत्वाविशेषात्, योग्यता च स्थैर्यपक्षे न परावर्तत इति चेत्। हन्त! एवं तवापि कथं नायं दोषः, स्फटिकादिव्यवहितग्रहणेऽप्यतिप्रसङ्गस्य दुर्निवारत्वात्, स्फटिकादिकं निर्भिद्य विषयदेशं यावद् नायनरश्मीनां गमने च तूलपटलादेस्तैः सुतरां सुभेदत्वात्, तूलपटलाद्यन्तरितस्याप्युपलम्भप्रसङ्गात्?। यत् पुनरुदयनेनोक्तम्— 'स्फटिकाद्यन्तरितोपलब्धिः प्रसादस्वभावतया स्फटिकादीनां तेजोगतेरप्रतिबन्धकतया प्रदीपप्रभावदेवोपपन्ना' इति। तद् दूषितं वृद्धैः— प्रसन्नतावन्मूर्तद्रव्यकृतगत्यप्रतिबन्धस्य क्वाप्यदर्शनात्, तूलादिना जलादिगत्यप्रतिबन्धस्य प्रशिथिलावयवारभ्यत्वनिमित्तकस्यैव दर्शनात्। स्फटिकान्तर्गतप्रदीपरश्मयस्तु न तं भित्त्वा प्रसरन्ति, किन्तु तत्संपर्कमासाद्य स्फटिकपरमाणुपुञ्ज एव तथापरिणतः सर्वतः प्रसरति। अत एव पीतरक्तादिकाचकूपिकातो रश्मयोऽपि तच्छायाः प्रसरन्तो दृश्यन्ते। अथ यथा पारदस्याऽयस्पात्रभेदे सामर्थ्यम्, न पुनरलाबुमात्रभेदे, तथा लोचनरोचिषामपि स्फटिकादिभेदे शक्तिर्भविष्यति न तूलपटलभेद इति चेत्। न, प्रत्यभिज्ञाबाधात्। तस्मात् कुड्याद्यन्तरितचाक्षुषजनकक्षयोपशमाभावादेवास्मदादीनां न तदन्तरितचाक्षुषम्, तादृशक्षयोपशमवतामतिशयितज्ञानिनां तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवत्येव तच्चाक्षुषम् ।

अथानन्तरितस्यापि कदाचिदन्तरितत्वात् कुड्यादिव्यवधानकालीनघटादिचाक्षुषे ज्ञानावरणप्रकृतिविशेषस्य प्रतिबन्धकत्वेऽपि तद्दशायां तद्व्यवधानकालीनचाक्षुषापत्तिवारणाय तादृशचाक्षुषे तत्तत्कुड्यादिव्यवधानाभावहेतुत्वे स्वप्राचीस्थपुरुषसाक्षात्कारे स्वप्रतीचीवृत्तित्वसंबन्धेन कुड्यादीनां प्रतिबन्धकत्वकल्पने वा गौरवाच्चक्षुषः प्राप्यकारित्वमेव युक्तम्, चाक्षुषत्वावच्छिन्न एव चक्षुःसंयोगत्वेन हेतुताकल्पने लाघवात्, कुड्यादीनां नयनादिप्राप्तिप्रतिबन्धकत्वकल्पनागौरवस्य फलमुखत्वात्, तत्तत्क्रिया-तत्तदुत्तरदेशादीनामेव संयोगनियामकत्वेनानतिप्रसङ्गाद्, भित्त्यादीनां प्रतिबन्धकत्वाकल्पनाद् वेति चेत् । न, अन्धकारादिसाधारण्येन कुड्यादीनामेकशक्तिमत्त्वेनावारकत्वकल्पने गौरवाभावात् । एतेन 'परभागेऽन्धकारवति भित्त्यादौ चाक्षुषोदयाच्चक्षुःसंयोगावच्छेदकावच्छिन्नालोकसंयोगत्वेन द्रव्यचाक्षुषत्वावच्छिन्नं प्रति हेतुत्वाच्चक्षुषः प्राप्यकारित्वसिद्धिः' इत्यपि निरस्तम् ; कुड्यादिवदर्वाग्भागावस्थितस्यैवान्धकारस्यावरणत्वात्, अन्धकारत्वव्यवधानस्य च विषयव्याप्तस्य व्यवधानकालीनचाक्षुषप्रतिबन्धकत्वाद् नान्धकारमध्यावस्थितस्यालोकस्थसाक्षात्कारानुपपत्तिः । प्रतिबन्धकत्वं च प्रकृतिविशेषशक्त्युद्बोधकत्वमिति नानुपपत्तिः ।

प्राप्यकारित्वे च चक्षुषः शाखा-चन्द्रमसोर्युगपद्ग्रहानुपपत्तिः, युगपदुभयसंयोगाभावात् । न च 'तिर्यग्भागावस्थितयोः शाखा-चन्द्रमसोर्युगपत् संयोगोपपत्तिः, इति वर्धमानोक्तं निरवद्यम्, ऊर्ध्वं प्रसृतानामेव नयनरश्मीनां तयोस्तिर्यग्भागेऽवस्थानो-

---

१ ख. ग. घ. 'त्वमात्रेण निर्वाहादिति तु विवेचितं प्राक्' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पपत्तेरूर्ध्वस्थितवस्तुग्रहणप्रसङ्गात्। न चाग्रभागावच्छेदेन संयुक्तस्यैव चक्षुषो ग्राहकत्वम्, अत एव न नयनस्थिताञ्जनादिग्रहोऽपीति नायं प्रसङ्ग इति वाच्यम्; तथापि तावत्पर्यन्तं प्रसृतस्यान्तरालिकवस्त्वन्तरग्रहणप्रसङ्गात्, संनिहितं विमुच्यासंनिहितसंयोगानुपपत्तेः, अनन्यगत्या वेगादिविशेषाद् विनैव संनिकृष्टदेशविशेषसंयोगं विप्रकृष्टदेशसंयोगोपपादने चानन्यगत्या देशविशेषस्य तत्तच्चाक्षुषहेतुत्वमस्तु, अनन्तचक्षुःक्रिया-संयोग-विभाग-तत्कार्यकारणभावाद्यकल्पनलाघवात्। अस्तु वा नयनप्राप्तिनियामकं विशिष्टाभिमुख्यमेव तत्कार्यनियामकम्। एतेन 'क्रमिकोभयसंयोगवता चक्षुषा शाखा-चन्द्रमसोर्ग्रहणे कालसंनिकर्षाद् यौगपद्याभिमानः' इत्यपि निरस्तम्, चन्द्रज्ञानानुव्यवसायसमये शाखाज्ञानस्य नष्टत्वेन 'शाखा-चन्द्रौ साक्षात्करोमि' इत्यनुव्यवसायानुपपत्तेश्च। न च क्रमिकतदुभयजनितसंस्काराभ्यां जनितायां समूहालम्बनस्मृतावेवानुभवत्वारोपात् तथाऽनुव्यवसाय इति सांप्रतम्; तादृगारोपादिकल्पनायां महागौरवादिति। अधिकं ज्ञानार्णवात्।

तदेवं भावांश इवाभावांशेऽपि विषयग्रहणपरिणामरूपभावेन्द्रियस्य ग्राह्यतापरिणामाख्ययोग्यतासंबन्धसत्त्वादिन्द्रियेण तद्ग्रहणं न दुर्घटम्। यच्चोक्तम्– 'प्रतियोगिग्रहणपरिणामाभावरूपं तदन्यवस्तुविज्ञानरूपं वाऽभावाख्यं प्रमाणमेष्टव्यम्' इति। तन्न पटिष्ठम्, आद्यस्य समुद्रोदकपलपरिणामेनानैकान्तिकत्वात्; द्वितीयस्य च विविक्ताधिकरणज्ञानरूपस्येन्द्रियाद्यन्वयव्यतिरेकानुविधायित्वेन प्रत्यक्षत्वादेव। यदप्युक्तम्– 'न चैवमभावज्ञाने' इत्यादि। तदप्ययुक्तम्, प्रतियोग्यधिकरणसंसृष्टता-
१२ ऽसंसृष्टताभ्यामधिकरणग्रहण-प्रतियोगिस्मरणयोरपेक्षायां बाधात्, प्रत्यक्षेणैव सिद्धौ वैयर्थ्याच्च; अन्यासंसृष्टतादिग्रहेऽभावव्यापारे च चक्रकादिदोषात्। न च संसृष्टता-ऽसंसृष्टतोदासीनं तदज्ञानमात्रं तथा, इदंत्वादिनाऽभावज्ञाने व्यभिचारात्, विशिष्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावज्ञानेऽनन्ताधिकरण-प्रतियोगिज्ञानहेतुताकल्पने गौरवाच्चेन्द्रियोपयोगसमय एवाधिकरणप्रतियोगिज्ञानापेक्षां विनैव भावांशवदभावांशस्य प्रत्यक्षत्वाभ्युपगमौचित्यात्, भूतलासंसृष्टघटदर्शनाहितसंस्कारस्य पुनर्घटासंसृष्टभूभागदर्शनानन्तरं तथाविधघटस्मरणे सति 'अत्र घटो नास्ति' इति प्रत्यभिज्ञानमात्रात्। 'न चात्र किञ्चिदधिकं कल्पनीयम्, विशिष्टवैशिष्ट्यज्ञानसामग्रीमात्रेणैव निर्वाहात्' इति तु विवेचितं प्राक्। न चैवं प्रतियोगिग्राहिणेन्द्रियेणाधिकरणज्ञानस्य हेतुत्वे वायौ रूपाभावप्रतीतिरपि संगच्छते, तत्र रूपाभावस्य रूपानुपलम्भेनाप्यनुमातुमशक्यत्वात्, प्राकट्यनिरासेन तदभावेन तस्यानुमातुमप्यशक्यत्वात्। न चानुपलम्भे विशेषाभावादभावग्रहविशेष आलोकाद्यपेक्षोपपत्तिरपि, अधिकरणज्ञानविशेषेऽपि करणविशेषं विना क्रियाविशेषानुपपत्तेः, अधिकरणज्ञानस्य करणत्वे च गतमभावप्रमाणेन। न चाधिकरणा-ऽभावाज्ञानद्वयं क्रमेणोत्पद्यमानमुपलभ्यतेऽपि, येनेयं कल्पना सावकाशापि स्यात्।

अपि च, अज्ञातकरणत्वादप्यभावज्ञानमपरोक्षं स्वीकरणीयम्, ज्ञाताया अनुपलब्धेः करणत्वेऽनवस्थानात्। न च प्राग्नास्तिताबुद्धौ ज्ञातैव सा करणम्, अभावप्रत्यक्षमात्रे प्रतियोगिज्ञानस्याहेतुत्वेन गृहसंनिकर्षकाले मैत्रास्मरणेऽपि तदभावानुभवेन मैत्रस्मरणे सति प्राग्नास्तिताधियः प्रत्यभिज्ञामात्रत्वात्। अवधानं च तत्रानुपयोगादिकृताभावसंभावनानिरासार्थमुपयुज्यते। 'स्मरणार्हास्मरणानुमितसंनिकर्षादिकालीनानुपलब्धिलिङ्गिकैव प्राग्नास्तिताधीः' इत्यन्ये। दोषेणाप्यनुपलब्धेरभावरूपाया उपघाताभावादिन्द्रियस्यैव दुष्टत्वोपपत्तेरभावप्रमाकरणत्वादभावभ्रमकरणत्वमपीन्द्रियस्यैव युक्तम्। किञ्च, प्रमाणयोर्विरोधादधिकरणविशिष्टाभावधीरप्येवं न युज्यते, अभावज्ञानेऽधिकरण-प्रतियोगिनोरुपनीतयोर्भानानभ्युपगमेऽधिक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रणांशे 'साक्षात्करोमि' इत्यनुभवानुपपत्तेः, अनुमाना-ऽभावप्रमाणयोः समाहारे व्यापकाभाव-व्याप्याभावप्रतीत्यनुपपत्तेश्च, द्वयोर्मिथः प्रतिरोधेऽनुभवस्यैवानुपपत्तेः, अप्रतिरोधे च साङ्कर्यात्, तत्स्थलीयानुभवे जात्यन्तरस्वीकारे च तत्र करणान्तरस्याऽवश्यकत्वात् प्रमाणसंख्याव्याघातापत्तेः, एकतरबलवत्त्वे चाविनिगमात्। अपि च, अभावग्रहे भावानुपलब्धिवद् भावग्रहेऽप्यभावानुपलब्धेर्हेतुत्वात् प्रत्यक्षकथैवोत्सीदेत्, घटादिग्रहेऽपि घटाभावानुपलब्धेर्व्यापारात्, इन्द्रियसहकारित्वं तु तस्या उभयत्र तुल्यमिति दिग्। ततो 'नाभावप्रमाणप्रवृत्तिः सर्वज्ञे' इति व्यवस्थितम्।

यच्च 'एवं विप्रतिपन्नप्रत्यक्षं यदि' इत्यादि प्रसङ्गसाधनमुद्भावितम्; तद्व्याप्याव्यापादकयोस्तद्विपर्ययथोश्च व्याप्यव्यापकभावे सिद्धे शोभते, स चाद्यापि न सिद्ध इति न किञ्चिदेतत्। यदपि 'यत्राप्यतिशयो दृष्टः, येऽपि सातिशया दृष्टाः' इत्याद्युक्तानुरोधेन स्वविषयस्वग्राह्यजात्यतिक्रान्तप्रत्यक्षं प्रत्यषेधि, तदपि 'दृष्टजातीयचक्षुरादय एव सर्वे पुरुषाः' इति नियमग्रहे शोभते, स एव चासर्वज्ञस्य दुर्ग्रहः। दृश्यते च चक्षुरपि केषाञ्चित् प्रश्नादि-मन्त्रादिद्वारेण संस्कृतं कालविप्रकृष्टार्थग्राहकम्, मूषिकादेर्नक्तञ्चर-दृषदंशादेश्चान्धकारव्यवहितार्थग्राहकम्, अञ्जनविशेषादिसंस्कृतं च केषाञ्चित् कुड्यादिव्यवहितार्थग्राहकम्, दीपान्तरादौ च समुद्र-सेना-नग-नगरादिग्राहकम्, तद्वद् यदि पुरुषविशेषस्यापि कस्यचिच्चक्षुरादि धर्मादेरपि देश-कालस्वभावविप्रकृष्टस्य ग्राहकं भवति तदा को नाम दृष्टस्वभावातिक्रमः?; चक्षुःश्रवसां चक्षुषैव शब्दश्रवणस्य प्रसिद्धत्वेन विषयातिक्रमस्याप्यदृष्टस्याकल्पनात्। कर्णच्छिद्रानुपलब्धेर्दंदशूकचक्षुर्जात्यन्तरमेवेति चेत्। तुल्यमेतदुत्तरमन्यत्रापि, प्रकृष्टपुण्यसंभारजनितसर्वविच्चक्षुषो जात्यन्तरत्वात्। अभ्युपगमवादश्चायम्, वस्तुतो घातिकर्मक्षयाविर्भूतत्वेन केवलज्ञानस्यातीन्द्रियत्वादिन्द्रियज-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानस्यावग्रहादिक्रमानुविद्धत्वादिति द्रष्टव्यम् ।

ये तु यौगा संगिरन्ते– 'मनःकरणकमेव योगिनां प्रत्यक्षम्, योगजधर्मप्रत्यासत्त्या मनसैव निखिलार्थसाक्षात्कारात्' इति । तेऽपि भ्रान्ताः, योगजधर्मस्य मनःप्रत्यासत्तित्वं चक्षुरादिप्रत्यासत्तित्वं वेत्यत्राविनिगमात् । धर्मविशेषसहकारेण मानसं प्रातिभप्रत्यक्षं दृष्टमिति योगिप्रत्यक्षमपि धर्मविशेषसहकृतमनोजन्यमेव कल्प्यत इति चेत् । न, अञ्जनविशेषाद्युद्बुद्धधर्मविशेषसहकृतचक्षुरादिजन्यस्य निध्यादिसाक्षात्कारस्य दर्शनाद् योगिनां सर्वार्थविषयचाक्षुषादिकल्पनस्यापि सुशकत्वात् । अञ्जनादिना निध्यादिसाक्षात्कारोऽपि मानस एव, 'पश्यामि' इति प्रतीतिस्तु तत्र चाक्षुषत्वारोपादिति चेत् । न, बाधकाभावात्, नयनप्राप्त्यभावस्य तस्याप्राप्यकारित्वेऽबाधकत्वात् । अपि च, जन्यज्ञानत्वावच्छिन्नं प्रत्येव मनसः कारणत्वं त्वया कल्प्यते । तत्र जन्यत्वमीश्वरज्ञानादिव योगिज्ञानादपि व्यावृत्तमस्तु, योगधर्मप्रत्यासत्त्यकल्पनलाघवात् । अथ केवलिनामपि मनःसत्त्वात् कथं न तत्करणकं तेषां ज्ञानम्? इति चेत् । सत्यम्, तत्सत्त्वेऽपि तद्व्यापाराभावात् । संयोगातिरिक्ततद्व्यापारस्यासिद्धिरेवेति चेत् । न, सुषुप्तिव्यावृत्त्यनुपपत्तेः । अस्त्येव तेषामनुत्तरसुरसंशयनिवर्तको मनोव्यापारोऽपीति चेत् । सत्यमस्त्येव, प्राश्निकानामर्थानुमापकः सः, परं न क्षयोपशमानिष्पादकतया स्वप्रतिपत्त्यनुकूलः, इन्द्रियव्यापारस्य तद्द्वारैव ज्ञानहेतुत्वात्, अन्यथा व्यभिचारात् । अत एव क्षयोपशमभेदादेव ज्ञानभेदः, न त्विन्द्रियभेदात् । इत्थमेव संभिन्नश्रोतोलब्धिमतां श्रोत्रेणापि रूपग्रहणोपपत्तेः । न चैवं चाक्षुषत्व-श्रावणत्वादिसांकर्यम्, तस्य जात्यन्तरत्वात् । अत एव च 'इन्द्रियादिबहिरङ्गपरहेतुकत्वाद-स्मदादिचाक्षुषादीनां निश्चयतः परोक्षत्वम्, संशयास्पदत्वाच्च; योगिज्ञानस्य चात्मातिरिक्तानपेक्षत्वात् संशयानास्पदत्वाच्च तत्त्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तोऽपरोक्षत्वम्' इत्यामनन्ति ।

यदप्युक्तम्– 'कथं च धर्मादिग्राहिज्ञानस्योत्पत्तिः ?' इत्यादि । तदपि न पेशलम्, सर्वज्ञप्रणीतमागममनुसृत्याभ्यासादेव सामर्थ्ययोगेन तदुत्पत्तेः । न चैवं चक्रकावतारः, अनादित्वात् सर्वज्ञपरम्परायाः, अत एव "तप्पुव्विया अरहया" इत्यादावनवस्थादिदोषस्यापि परिहारः । अर्थज्ञान-शब्दरूपत्वाच्चागमस्य मरुदेव्यादीनां सार्वज्ञ्यस्य वचनरूपागमाभ्यासापूर्वकत्वेऽपि न क्षतिः, आगमार्थप्रतिपत्तित एव तेषामपि तथात्वसिद्धेस्तत्त्वतस्तत्पूर्वकत्वात् । अभ्यासेनास्पष्टस्य स्पष्टत्वायोगदोषश्चानुक्तोपालम्भमात्रम्, ततोऽस्पष्टज्ञानमुपमृद्य स्पष्टज्ञानान्तरोत्पत्तेरेवोपगमात् "नट्ठम्मि उ च्छाउमत्थिए नाणे" इति वचनात् । अत एव 'प्रेरणाजनितं ज्ञानमस्मदादीनामप्यतीता-ऽनागत-सूक्ष्मादिपदार्थविषयमस्तीति सर्वज्ञत्वं स्यात्' इति मीमांसकमनोरथतरुरुन्मूलितः, अभ्यासजस्य स्पष्टविज्ञानस्य सकलपदार्थविषयस्यास्मदादीनामभावात्, इतरस्य च संशययोग्यतया स्वतन्त्रप्रवृत्त्यनुपयोगित्वात्, निर्मूलपरम्पराप्रसक्तेः । कामादिविप्लुतविशदज्ञानवत इव भावनाबललब्धविशदज्ञानवतः सर्वज्ञस्य तद्वदुपप्लुतत्वप्रसङ्गापादनं च वृथैव, 'भावनाबलाज्ज्ञानं वैशद्यमनुभवति' इत्येतावन्मात्रेण दृष्टान्तस्योपात्तत्वात्, सकलदृष्टान्तधर्माणां साध्यधर्मिण्यासञ्जनस्यायुक्तत्वात्, अन्यथा सकलानुमानोच्छेदप्रसक्तेः ।

यच्च परोक्षादपरोक्षोत्पत्त्यदर्शनमुद्भावितम्, तदज्ञानविलसितम्, परोक्षादपि तत्तास्मरणात् स्वयमपरोक्षतत्ताविषयकप्रत्यभिज्ञानस्वीकारात् । यस्तु श्रवणादेः प्रत्यक्षप्रमाकरणत्वेन प्रत्यक्षप्रमाणत्वप्रसङ्ग उक्तः, स तु 'साक्षात्कारिप्रमायाः करणं

१ तत्पूर्वका अर्हन्तः । २ नष्टे तु च्छाद्मस्थिके ज्ञाने ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यक्षम्' इति वदतो नैयायिकान् प्रति शोभते, न तु "स्पष्टं प्रत्यक्षम्"[1] इति वदतोऽस्मान् प्रति, अभेद एव प्रदीप-प्रकाशयोरिव क्रिया-करणशक्तिभेदोपपत्तेः। योऽपि च 'सर्वज्ञज्ञानेन' इत्यादिप्रसङ्ग उक्तः, सोऽपि न युक्तः, उत्पन्नस्य तस्य सर्वथाऽनाशेनोत्तरकालमकिञ्चिज्ज्ञत्वानुपपत्तेः। स्यान्मतम्— द्वितीयादिक्षणे गृहीतग्राहित्वादप्रामाण्यापत्तिरिति । मैवम् , अगृहीतग्राहित्वस्य प्रमाया अलक्षणत्वात् , धारावाहिकप्रमायामव्याप्तेः, भ्रमेऽतिव्याप्तेश्च । तदुक्तमुदयनेनापि— "अव्याप्तेरधिकव्याप्तेरलक्षणमपूर्वदृग्"[2] इति । अथ 'यथार्थत्वे सति' इति विशेषणाद् नातिव्याप्तिः, धारावाहिके च पूर्वज्ञानजन्यज्ञाततायाः पूर्वज्ञानाविषयाया उत्तरज्ञानविषयत्वाद् नाव्याप्तिः, भाव्य-ऽतीतघटादौ घटत्वादिगतज्ञाततयैव धर्म-धर्मिणोरभेदस्वीकारेण घटादेरपि विषयत्वोपपत्तेर्ज्ञाततया निरासायोगादिति वाच्यम् ; यथार्थत्वमात्रस्यैव लक्षणत्वेऽधिकस्य व्यर्थत्वात् , विषयाबाधेन स्मृतेरपि प्रमात्वात् , अन्यापेक्षतया प्रामाण्यस्य चानुमित्यादौ दुर्वचत्वात् , स्वभावविशेषेणैव विषयतानियमे ज्ञातताया निरासाच्च; अन्यथा भाविघटप्रकारकभाविभूतलज्ञानादौ गत्यभावात् । न हि घट-भूतलयोरप्यभेदो भट्टानामभिमत इति दिग् । यदपि 'किञ्च, परसंतानवर्तिरागादिसाक्षात्करणादस्य रागादिमत्त्वमपि स्यात्' इत्युक्तम् ; तदपि न चेतोहरम् , न हि रागादिसंवेदनमात्रं रागादिनिमित्तम्, किन्तु तथापरिणाम इति; अन्यथा स्वप्ने मद्यपानानुभवे, 'मद्यं पीतम्' इति शब्दार्थनिबोधे वा श्रोत्रियस्य मद्यपत्वनिमित्तकप्रायश्चित्तप्रसङ्गात् । यदप्यभाणि— 'अपि च, अतीतकालाद्याकलितस्य वस्तुनः' इत्यादि; तदप्यसारम् , अतीतादेरतीतत्वादिनैव केवलज्ञानेन ग्रहणात् , स्पष्टतया प्रत्यक्षत्वोपपत्तेः, वर्तमानतायास्तत्रातन्त्रत्वात् ;

१ प्रमाणनयतत्त्वालोकालङ्कारे २,२ । २ कुसुमाञ्जलौ चतुर्थस्तबके कारिका १ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यथा वर्तमानार्थानुमित्याद्यवगतेः। न चातीतादेरसत्त्वाद् न तद्ग्रह इति शङ्कनीयम्; वर्तमानस्य वर्तमानकालसंबन्धित्वेनेवातीतादेरपि स्वकालसंबन्धित्वेन सत्त्वात्; अन्यथा निखिलशून्यताप्रसङ्गात्। एतेन 'अपिच, वस्तुनः' इत्याद्यपि निरस्तम्, यथाकालं वस्तुनो ध्वंस-प्रागभावभावेन युगपज्जात-मृतव्यपदेशानापत्तेः। यदपि 'किञ्च, सर्वज्ञकालेऽपि' इत्यादि न्यगादि; तदपि न साधु, विषयापरिज्ञाने विषयिणोऽप्यपरिज्ञानाभ्युपगमे सकलवेदार्थपरिज्ञानानिश्चये तद्व्याख्यातार्थाश्रयणादग्निहोत्रादौ स्वप्रवृत्तिव्याघातात्, व्याकरणादिसकलशास्त्रार्थापरिज्ञाने व्यवहारिणां तदर्थज्ञतानिश्चयानुपपत्तेश्च। यदपि 'किञ्च, नित्यसमाधानसंभवः' इत्याद्यभिहितम्; तत्रापि न सुष्ठ्वहितम्, मन्त्राविष्टकुमारिकावद् विकल्पाभावेऽपि केवलिनो वचनोपपत्तेः। धर्मविशेषहेतुकं मन्त्राविष्टकुमारिकावचनं न विकल्पमपेक्षत इति चेत्। केवलिवचनमपि किं न तथा, अर्थावबोधस्य तत एव सिद्धेः !; यदागमः—

"[1]केवलनाणेणत्थे णाउं जे तत्थ पन्नवणजोग्गे। ते भासइ तित्थयरो वइजोगसुअं हवइ सेसं[2] ॥ १ ॥"

इत्थं च रागाद्यभावे वचनादिप्रवृत्तिरपि व्याख्याता, तदभावेऽप्यदृष्टविशेषात् तदुपपत्तेः, तीर्थकरनामवेदनार्थत्वाद् भगवद्देशनायाः, "[3]तं च कहं वेइज्जई अगिलाए धम्मदेसणाइ इहं" इत्याद्यागमप्रामाण्यात्। न चैवमदृष्टस्य दृष्टघातकत्वापत्तिः, दृष्टहेतुवैचित्र्यस्याप्यदृष्टनियम्यत्वात्। देशनाबीजं भगवतो निरुपधिपरदुःखप्रहाणेच्छा, न रागः, सामायिकचिद्विवर्तरूपत्वात्।

---

१ केवलज्ञानेनार्थान् ज्ञात्वा ये तत्र प्रज्ञापनयोग्याः। तान् भाषते तीर्थकरो वाग्योगश्रुतं भवति शेषम् ॥ १ ॥

२ मुद्रितावश्यकनिर्युक्तौ पृ० १२। ३ तच्च कथं वेद्यतेऽग्लानया धर्मदेशनयेह।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत एव "[1]तो मुअइ नाणवुट्ठिं भविअजणविबोहणट्ठाए[2]" इत्यागमोक्तिरित्यपि वदन्ति । न चैवं कृतकृत्यत्वहानिः, क्षीणघातिकर्मकत्वेन कथञ्चित्कृतकृत्यत्वेऽपि जीवदघातिकर्मविपाकभाजनतया सर्वथा तत्त्वासिद्धेः, आह च भाष्यकृत्—

"[3]णेगंतेण कयत्थो जेणोदिन्नं जिणिंदनामं से । तदवंझफलं, तस्स य खवणोवाओऽयमेव जओ[4] ॥ १ ॥"

ये तु जैनाभासाः परोक्तदोषभीता अक्षररूपाया वाचो रागनियतत्वाद् नियत्यैव मुखाद् मूर्ध्नो वा निरित्वरीं ध्वनिरूपामेव पारमेश्वरीं वाचमुपयन्ति; तेऽभिनिवेशलुप्तविवेकाः, ध्वनिरूपायास्तस्याः प्रतिसर्वज्ञं श्रोतृभाषापरिणामवदक्षरपरिणामायोगात्, अव्यक्तैकरूपतया सत्या-ऽसत्यामृषदलद्वयनिष्पादकवाग्योगद्वयवैयर्थ्यात्, "[5]अद्धमागहीए भासाए भासंति" इति सूत्रविरोधात्; नियत्यैव प्रयत्नं विना वचनोपपत्तौ च तयैव तद्विनापि परानुग्रहोपपत्तेः, ध्वनेरपि पौरुषेयतयाऽक्षररूपतया तुल्ययोगक्षेमत्वात्, अन्यथा बाह्यमतप्रवेशाच्चेत्यन्यत्र विस्तरः ।

यदप्युक्तम्— 'न च रागादीनामावरणत्वमपि प्रसिद्धम्, कुड्यादीनामेव ह्यावारकत्वप्रसिद्धिः' इति; तदपि न क्षोदक्षमम्, कुड्यादीनामेव स्वातन्त्र्येणावरणत्वासिद्धेः, तद्व्यवहितानामप्यर्थानां सत्यस्वप्नज्ञानेन स्वप्नदशायां, जाग्रद्दशायां च शब्द-लिङ्गा-ऽक्षव्यापाराभावेऽपि 'श्वो भ्राता मे आगन्ता' इत्याद्याकारेण प्रातिभेन च ग्रहणात्, सकलार्थग्रहणस्वभावे ज्ञाने प्रतिबिम्बस्वभाव आदर्शे मलस्येव रागादीनामेवावरणत्वौचित्यात् । अथ रागादीनामावारकत्वेऽपि कथमात्यन्तिकः क्षयः ? इति

१ ततो मुञ्चति ज्ञानवृष्टिं भविकजनविबोधनार्थतया । २ मुद्रितावश्यकानिर्युक्तौ पृ० १४ । ३ विशेषावश्यकभाष्ये गाथा ११०२ ।
४ नैकान्तेन कृतार्थो येनोदीर्णं जिनेन्द्रनाम तस्य । तदवन्ध्यफलं, तस्य च क्षपणोपायोऽयमेव यतः ॥ १ ॥ ५ अर्धमागध्यां भाषायां भाषन्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेत् । सम्यग्दर्शन-वैराग्यादीनां परमप्रकर्षेण, 'यदुत्कर्षतारतम्याद् यस्यापचयतारतम्यं तस्य परमप्रकर्षे तदत्यन्तं क्षीयते, यथोष्णस्पर्शस्य परमप्रकर्षे शीतस्पर्शः' इति नियमात् । न च लङ्घनो-दकतापादिवदभ्यस्यमानस्यापि सम्यग्दर्शन-वैराग्यादेर्न परमप्रकर्षप्राप्तिरिति शङ्कनीयम्, पूर्वप्रयत्नसाध्यस्य लङ्घनस्य व्यवस्थितत्वाभावेनोत्तरोत्तरप्रयत्नानामपरापरलङ्घनातिशयोत्पत्तौ व्यापारायोगेन तत्परमप्रकर्षासिद्धेः, व्यायामापनीतश्लेष्मानासादितपटुभावतयैव कायेन प्राग्यावल्लङ्घयितव्यस्यालङ्घनात् । न च विज्ञानस्यापि प्राक्तनाभ्यासादासादितातिशयस्य शीघ्रमेव विनाशादव्यवस्थिततयाऽपराभ्यासादन्यस्यैवातिशयवतो ज्ञानस्योत्पत्तेर्न परमप्रकर्षसिद्धिरिति वाच्यम्; तत्र पूर्वाभ्यासजनितसंस्कारस्योत्तरत्रानुवृत्तेः, अन्यथा शास्त्रपरावर्तनादिवैयर्थ्यप्रसङ्गात् । उदकतापे त्वतिशयेन क्रियमाणे तदाश्रयस्यैव क्षयाद् नातितप्यमानमप्युदकमग्निरूपतामासादयति, विज्ञानस्य त्वाश्रयोऽभ्यस्यमानेऽपि तस्मिन् न क्षयमुपयाति, इति कथं तस्य व्यवस्थितोत्कर्षताऽशक्या वक्तुम्? । न च 'यदुत्कर्षतारतम्यात्' इत्यादिव्याप्तौ निम्बाद्यौषधोपयोगप्रकर्षतारतम्यानुविधाय्यपचयतारतम्यवता श्लेष्मणा व्यभिचारः, तत्र निम्बाद्यौषधोपयोगपरमप्रकर्षस्यैवासिद्धेः, तदुपयोगेऽपि श्लेष्मपुष्टिकारणानामपि तदैवासेवनात्; अन्यथौषधोपयोगाधारस्यैव विनाशप्रसङ्गात्, चिकित्साशास्त्रस्य धातुदोषसाम्यापादनाभिप्रायेणैव प्रवृत्तेः, तत्प्रतिपादितौषधोपयोगस्योद्रिक्तधातुदोषसाम्यविधान एव व्यापारात्, तदत्यन्तनिर्मूलने तद्व्यापारे च दोषान्तरस्यात्यन्तक्षये श्लेष्माद्यधिष्ठितशरीरानवस्थानात् । न च सम्यग्दर्शनादिपरमप्रकर्षेऽपि पुनर्मिथ्याज्ञानादिप्रवृत्तिसंभवाद् न वाञ्छिताप्तिरिति वाच्यम्; प्रकृष्टेऽपि मिथ्याज्ञानादौ दोषदर्शनात् तद्विपक्षे च गुणदर्शनादभ्यास-प्रवृत्त्युपपत्तावपि प्रकृष्टसम्यग्ज्ञानादि-तद्विपक्षयोर्दोष-गुणादर्शनात् तदनुपपत्तेः, इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वदन्ति । अभ्यासः क्षयोपशमवृद्धावुपयुज्यते, सा च क्षायिकभावोत्पत्ताविति तत्त्वम् ॥ १८ ॥

परोदितधर्मा-ऽधर्मव्यवस्थानिमित्तं विचारयति—

वेदाद्धर्मादिसंस्थापि हन्तातीन्द्रियदर्शिनम् । विहाय गम्यते सम्यक्कुत एतद्विचिन्त्यताम् ॥

वेदाद् धर्मादिसंस्थापि– परोदिता धर्मादिव्यवस्थापि, हन्त खेदे, अतीन्द्रियदर्शिनं– धर्मादिसाक्षात्कारिणं प्रमातारम्, विहाय– अनादृत्य, कुतः– केनोपायेन, सम्यक्– यथावत्, गम्यते ? । एतद् विचिन्त्यताम्– उपयुज्य विमृश्यताम् ॥ १९ ॥

एतदेव भावयति—

न वृद्धसंप्रदायेन च्छिन्नमूलत्वयोगतः । न चार्वाग्दर्शिना तस्यातीन्द्रियार्थोऽवसीयते ॥२०॥

न वृद्धसंप्रदायेन– वृद्धपारम्पर्येणैव वेदाद् धर्मादिसंस्था ज्ञायते । कुतः ? इत्याह– छिन्नमूलत्वयोगतः– आदावेव तत्त्वतः केनचिदज्ञानाद् मूलस्यैवोच्छेदात् । न चाचारात् स्मृतिः, स्मृतेराचार इत्यनादिपरम्परायां न दोषः, यावदर्थदर्शनाभ्यासपरिपक्वज्ञानैरेव स्मृतिप्रणयनात्, परैस्तदुपजीवनादिति वाच्यम् ; तत एव वेदार्थसिद्धेर्वेदवैयर्थ्यात् । तयोः स्वातन्त्र्येणाप्रामाण्याद् वेदमूलकत्वमावश्यकम्, अत एव शिष्टाचारविशेषादप्रत्यक्षस्यापि वेदस्यानुमानमिति चेत् । न, शिष्टाचारत्वेनैव कर्तव्यतामनुमाय तया मूलशब्दानुमानायोगात्, तदर्थस्य प्रागेव सिद्धेः। यदि च व्याप्तेरेव तस्यागममूलत्वम्, तदा तस्य प्रत्यक्षाऽनुमानमूलत्वमप्यत एवानुमेयम्, अनादेस्तदनपेक्षायां चाचारेऽपि कश्चिदीदृशः स्यादिति नित्यानुमेयो वेद इति चोदनैव धर्मे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाणमिति च भज्येत । किञ्च, शाखोच्छेदे कृत्स्नस्यापि वेदस्य कदाचिदुच्छेदात् कथमग्रे स्वतन्त्रपुरुषं विना संप्रदायः, धर्मादिव्यवस्था वा ? । 'गतानुगतिक एव लोक इत्यप्रामाणिक एवाचारो न तु शाखोच्छेदः 'अनेकशाखा गता' इति कर्तव्यतापूरणीयत्वादेकस्मिन्नपि कर्मण्यनाश्वासप्रसङ्गात्' इत्युपगमे तु वेदानामपि गतानुगतिकतयैव लोकैः परिग्रहादप्रमाणत्वप्रसङ्गात् । दोषान्तरमाह– न चार्वाग्दर्शिना– छद्मस्थेन प्रमात्रा, तस्य– वेदस्य, अतीन्द्रियार्थः– धर्मादिप्रतिपादनशक्तिलक्षणः, अवसीयते– निश्चीयते ॥ २० ॥

ततश्च—

प्रामाण्यं रूपविषये संप्रदाये न युक्तिमत्। यथाऽनादिमदन्धानां तथात्रापि निरूप्यताम् २१

रूपविषये– नील-पीतादिविषये व्यवस्थाकारिणि, यथाऽनादिमदन्धानां संप्रदाये व्यामोहदोषाद् यथा कथञ्चित् प्रवृत्तेऽपि, प्रामाण्यं न युक्तिमत्, मूलासंभवात्, स्वतोऽपरिच्छेदशक्तेश्च; तथाऽत्रापि– वेदाद् धर्मादिसंप्रदायेऽपि, निरूप्यताम्– विभाव्यताम् ॥२१॥

ननु लौकिकपदार्थतुल्यतया प्रसिद्धशब्दार्थत्वमेव वेदपदानाम्, अतो नात्र वृथा नामकल्पना, इति न निर्मूलत्वं संप्रदायस्येत्याशङ्क्याह—

१ ख.ग.घ.च. 'वृद्धानाम' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न लौकिकपदार्थेन तत्पदार्थस्य तुल्यता। निश्चेतुं पार्यतेऽन्यत्र तद्विपर्ययभावतः ॥२२॥

न लौकिकपदार्थेन— न लोकोक्ताग्न्यादिपदप्रतिपाद्येनाग्न्यादिना सह, तत्पदार्थस्य- वेदोक्ताग्न्यादिपदार्थस्य, तुल्यता- एकत्वम्, निश्चेतुं पार्यते। कुतः? इत्याह- अन्यत्र- नित्यत्वादौ, विपर्ययभावतः- लौकिकपदतुल्यताविपर्ययभावात्। तथा चाग्न्याद्यर्थका-ऽनग्न्याद्यर्थकलौकिकाग्नि-घटादिपदव्यावृत्तनित्यत्वादिधर्मजनिते वेदस्थाग्न्यादिपदेऽन्यर्थकत्वादिसंशयसाम्राज्यमिति भावः ॥ २२ ॥

एतदेवाह—

नित्यत्वापौरुषेयत्वाद्यस्ति किञ्चिदलौकिकम्। तत्रान्यत्राप्यतः शङ्का विदुषो न निवर्तते॥

नित्यत्वा-ऽपौरुषेयत्वादि, आदिनाऽतीन्द्रियार्थाभिधायकत्वादिग्रहः, अस्ति किञ्चिदलौकिकम्- लोकातीतम्, तत्र- वेदे; यतश्चैवम्, अतः- अस्मात् कारणात्, अन्यत्रापि- पदार्थादौ, विदुषः- असाधारणधर्मज्ञस्य, शङ्का न निवर्तते- किं लौकिकपदार्थतुल्य एवास्यार्थः, किंवा विलक्षणः, नित्यत्वादेः? इति ॥ २३ ॥

न चैतन्निवृत्त्युपायः परस्येत्याह—

तन्निवृत्तौ न चोपायो विनातीन्द्रियवेदिनम्। एवं च कृत्वा साध्वेतत् कीर्तितं धर्मकीर्तिना ॥ ॥३७२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्निवृत्तौ– यथोदिताशङ्कानिवृत्तौ, न चोपायोऽन्यः कश्चित् , विनाऽतीन्द्रियवेदिनं प्रमातारम् , शङ्कावीजकर्मदोषराहित्य एव निःशेषशङ्काराहित्यस्य तत्त्वत उपपत्तेः, स च वो नास्ति । एवं च कृत्वा– इदं चाभिप्रेत्य, साधु– शोभनम् , एतत्– वक्ष्यमाणम् , कीर्तितम्– उद्भावितम् , धर्मकीर्तिना– धर्मकीर्तिनाम्ना बौद्धाचार्येण ॥ २४ ॥

तथाहि—

'स्वयं रागादिमान्नार्थं वेत्ति वेदस्य नान्यतः । न वेदयति वेदोऽपि वेदार्थस्य कुतो गतिः?॥२५॥

स्वयम्– अन्यानपेक्षतया, रागादिमान् पुरुषः,नार्थं वेत्ति- निश्चिनोति वेदस्य, संशयालुस्वभावत्वात् । नान्यतः– नाप्यन्यतः पुरुषविशेषात् , तस्यापि रागादिमत्तया विश्वासानास्पदत्वात् । न वेदयति वेदोऽपि 'भो ब्राह्मण ! ममायमर्थः' इति, एवमप्रतीतेः । एवं च वेदार्थस्य– अग्निहोत्रादेः, कुतो गतिः?– कथं परिच्छित्तिः ? ॥ २५ ॥

यतश्चैवम्, अत आह—

तेनाग्निहोत्रं जुहुयात्स्वर्गकाम इति श्रुतौ । खादेत् श्वमांसमित्येष नार्थ इत्यत्र का प्रमा? ।२६।

तेन कारणेन "अग्निहोत्रं जुहुयात् स्वर्गकामः" इति श्रुतौ 'भूतविशेषे घृतादि प्रक्षिपेत्' इत्यर्थिकायामभ्युपगम्यमानायाम्, 'खादेत् [1]श्वमांसम्' इत्येष नार्थः किन्तु भवदभिप्रेत एव, इत्यत्र का प्रमा ? नात्र किञ्चिद् विशेषार्थनिर्धारकं प्रमाणमिति भावः ॥२६॥

---

१ अग्निहा श्वा तस्य उग्रं मांसमिति कृत्वेत्यर्थः ।

पराभिप्रायमाशङ्क्य परिहरति—

प्रदीपादिवदिष्टश्चेत्तच्छब्दोऽर्थप्रकाशकः। स्वत एव, प्रमाणं न किञ्चिदत्रापि विद्यते ॥२७॥

प्रदीपादिवदिष्टश्चेत् तच्छब्दः– श्रुतिशब्दः, अर्थप्रकाशकः– स्वार्थबोधजनकः, स्वत एव तथास्वाभाव्यादेव। अत्रापि– एवंभूतस्वभाववादेऽपि, न किञ्चित् प्रमाणं– प्रत्यक्षादि विद्यते ॥ २७ ॥

किञ्च, एवं भ्रमजनकत्वमपि क्वचिद् वेदस्य स्यादित्याह—

विपरीतप्रकाशश्च ध्रुवमापद्यते क्वचित् । तथाहीन्दीवरे दीपः प्रकाशयति रक्तताम्॥२८॥

विपरीतप्रकाशश्च– अतथाभूतार्थवाचकत्वं च, ध्रुवं– निश्चितम्, आपद्यते, क्वचित्– विषयान्तरे। प्रदीपादिदृष्टान्तेनैतदेव भावयति– तथाहीन्दीवरे नीलोत्पले, दीपः, प्रकाशयति–प्रदर्शयति, रक्ततां– पाटलिमानम्। एवं च चन्द्रः पीतवाससि शुक्लताम्, इत्यादि द्रष्टव्यम् ॥ २८ ॥

ननु यथा दीपस्य चाक्षुषजननशक्तिरेव कार्यदर्शनात् कल्प्यते न घ्राणीयादिजननशक्तिः, तथा वेदानामपि स्वार्थे प्रमाजननशक्तिरेव कल्प्यते न भ्रमजननशक्तिरिति नानुपपत्तिरिति चेत् । न, ततः प्रमाकार्यस्यैवादर्शनात्। न च तद्गताग्न्यादिपदेभ्यो नियतार्थबोधोऽपि दृश्यते, जलादौ संकेतितेभ्यस्तेभ्यो जलादिबोधस्यापि दर्शनात्, नियतसंकेतापेक्षायामपि ॥३७३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वतस्त्वभङ्गो दुर्निवारः इत्यभिप्रेत्याह—

तस्मान्न चाविशेषेण प्रतीतिरुपजायते । संकेतसव्यपेक्षत्वे स्वत एवेत्ययुक्तिमत् ॥२९॥

तस्मात्- श्रुतिपदात्, न चाविशेषेण प्रदीपादित इव रूपादौ, प्रतीतिरुपजायते । संकेतसव्यपेक्षत्वे- इष्टवाच्यविषय-संकेतमपेक्ष्येष्टार्थप्रतीतिजनकस्वभावत्वे, 'स्वत एव' इत्ययुक्तिमत् प्रदीपादितुल्यस्वतःप्रकाशकत्वभङ्गात् ॥ २९ ॥

नियतसंकेतापेक्षायामपि दोषमाह—

साधुर्नवेति संकेतो न चाशङ्का निवर्तते । तद्वैचित्र्योपलब्धेश्च स्वाशयाभिनिवेशतः ॥३०॥

इतेर्व्यवहितसंबन्धाद् न च नैव, संकेतः- श्रुतिस्थाग्न्यादिपदानामग्न्यादिविषयोऽभिप्रायः, साधुः- प्रकृतयथार्थवा-च्यार्थधीजनकः, नवा; इति- एवमाकारा, आशङ्का निवर्तते। कुतः? इत्याह- स्वाशयाभिनिवेशतः- स्वाशयेन स्वाभिप्रायेणाभिमुखो निवेशः- तथा तथा व्याख्यारचनं ततः, तद्वैचित्र्योपलब्धेश्च- संकेतवैचित्र्यदर्शनाच्च ॥ ३० ॥

ननु व्याख्याप्यपौरुषेयी, स्मृता केवलं जैमिन्यादिभिः, इति वेदवत् तद्व्याख्यायामपि न साधुत्वाशङ्केत्याशङ्क्याह—

व्याख्याप्यपौरुषेय्यस्य मानाभावान्न संगता । मिथो विरुद्धभावाच्च तत्साधुत्वाद्यनिश्चितेः ॥

व्याख्यापि- अस्य- वेदस्य, अपौरुषेयी, मानाभावात्- जैमिन्यादीनां स्मरणादौ प्रमाणाभावात्, न संगता, करणेऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्मरणोक्तेरन्यार्थतयोपपत्तेर्बाधकाभावात् । अनन्यगतिकतैवात्र मानमित्यत आह—मिथः– कापिलेयादिव्याख्यया सह, विरुद्धभावाच्च–व्याहतार्थत्वाच्च जैमिनीयादिव्याख्यायाः। व्याख्याभेदेऽपि यस्यां साधुत्वं सैवाद्रियत इत्यत आह– तत्साधुत्वाद्यनिश्चितेः– 'इयं साधुः, इयं च कल्पिता' इति निश्चयाभावात् ॥ ३१ ॥

एतदेव भावयति—

नान्यप्रमाणसंवादात्तत्साधुत्वविनिश्चयः। सोऽतीन्द्रिये न यन्न्याय्यस्तत्तद्भावविरोधतः॥३२॥

नान्यप्रमाणसंवादात्– न प्रत्यक्षादिप्रमाणसंवादेन 'तद्गोचरगतेन' इति गम्यते, तत्साधुत्वविनिश्चयः–अधिकृतव्याख्यायाः साधुत्वनिश्चयः, गृहीतप्रामाण्यकप्रमाणान्तरसंवादित्वेनाप्रामाण्यशङ्कानिवृत्तेरिति भावः। कुतः? इत्याह– सः– अन्यप्रमाणसंवादः, यत्– यस्मात्, अतीन्द्रिये– व्याख्यागोचरे, न न्याय्यः– न युक्त्युपपन्नः। कुतः? इत्याह– तत्तद्भावविरोधतः– तस्यातीन्द्रियस्य व्याख्याविषयस्य तद्भावविरोधतोऽन्यप्रमाणग्रहेऽतीन्द्रियत्वविरोधादित्यर्थः ॥ ३२ ॥

तस्माद्व्याख्यानमस्येदं स्वाभिप्रायनिवेदनम्। जैमिन्यादेर्न तुल्यं किं वचनेनापरेण वः?॥३३॥

यतश्चैवम्, तस्मात् कारणाद्, व्याख्यानमस्य– वेदस्य, इदं– भवत्कल्पितम्, स्वाभिप्रायनिवेदनं– तत्त्वतः स्वाशयकथनमात्रम्, जैमिन्यादेः– व्याख्यानकर्तुः, न तु नित्यार्थस्मरणम्, सूत्रवदर्थस्य व्यवस्थितस्यादर्शनात्। 'अतः' इति गम्यते, अपरेण–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बौद्धादिवचनेन, किं न तुल्यम्, वः- युष्माकम्, रागादिमतः स्वस्याभिप्रायनिवेदनाविशेषात्, तादृशस्य च पुंसः स्वतन्त्रवचनेऽविश्वासाविशेषादिति भावः ॥ ३३ ॥

न च स्वानिर्देशमात्रेऽपि स्वातन्त्र्यमपयातीत्याह—

एष स्थाणुरयं मार्ग इति वक्तीह कश्चन। अन्यः स्वयं ब्रवीमीति तयोर्भेदः परीक्ष्यताम् ॥३४॥

एष स्थाणुः, अयमेतदभिमुखो मार्ग इति कश्चन वक्ता स्वनामानभिनिवेशेन, इह- जगति, वक्ति; अन्यः- तदपरः, स्वयं ब्रवीमि यदुतायं मार्ग इति स्वनामाभिनिविशेन वक्ति; तयोः- वक्त्रोः, भेदः- विशेषः, परीक्ष्यताम्, स्वाभिप्रायनिवेदनं प्रति न कश्चिद् भेदः फलिष्यतीति भावः। स्यादेतदग्न्यादिपदानामग्न्यादावेव शक्तिर्निश्चिता लाघवादितर्केण संशयनिरासात्, असति बाधके शक्यार्थ एव च वेदानां प्रामाण्यम्, इति वेदादिपदानां बाधकाभावादिशक्त्यादिप्रदर्शनार्थाया व्याख्याया उपयोग इति। मैवम्, विनिगमकाभावेन लाघवेन च यथाप्रतीति निखिलार्थशक्तिकल्पनायाः पदानां युक्तत्वात्, आवश्यकसङ्केतान्तराश्रयणेनैव लक्षणानुच्छेदात्, नियतसंकेतस्यातीन्द्रियार्थे दुर्ग्रहत्वात्, अर्वाग्दृशामप्रसिद्धार्थेऽपि प्रामाण्याप्रच्यवात्, बाधकं विनापि च तात्पर्यविशेषेण प्रसिद्धार्थस्य परित्यागादर्शनात्, अप्रसिद्धशक्तिकानां वेदपदानां विना मूलं शक्तिग्रहस्य दुःशकत्वाच्चेति दिग् ॥

प्रस्तुत एव दोषान्तरमाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न चाप्यपौरुषेयोऽसौ घटते सूपपत्तितः। वक्तृव्यापारवैकल्ये तच्छब्दानुपलब्धितः॥३५॥

न चाप्यसौ- वेदः, सूपपत्तितः- सुयुक्त्या, अपौरुषेयो घटते। कुतः? इत्याह– वक्तृव्यापारवैकल्ये- वक्तृताल्वादिव्यापाराभावे, तच्छब्दानुपलब्धितः- वेदशब्दानुपलब्धेः, शब्दत्वावच्छिन्न एव ताल्वादिव्यापाराणां हेतुत्वादिति भावः ॥३५॥

ननूक्तयुक्त्या वर्णानां नित्यत्वाद् वक्तृव्यापारो व्यञ्जकपवनोत्पाद एवोपक्षीण इत्याशङ्क्याह—

वक्तृव्यापारभावेऽपि तद्भावे लौकिकं न किम्। अपौरुषेयमिष्टं वो वचो द्रव्यव्यपेक्षया॥३६॥

वक्तृव्यापारभावेऽपि- शब्दे ताल्वाद्यन्वय-व्यतिरेकानुविधानेऽपि, तद्भावे– अपौरुषेयत्वेऽभ्युपगम्यमाने, लौकिकं वचः किं न वः– युष्माकं द्रव्यव्यपेक्षयाऽपौरुषेयमिष्टम्?। तत्रापि हि द्रव्याण्यपौरुषेयाण्येव, द्रव्यतो नित्यत्वस्य, पर्यायतश्चोत्पाद-व्यययोस्तत्रापि प्रामाणिकत्वात्। ईदृशापौरुषेयत्वेन लौकिकस्यापि वेदतुल्यत्वं स्यादिति निगर्वः।

किञ्च, एवं कारणत्वाभिमतानां व्यञ्जकस्थाननिवेशे घटादावपि दण्डादीनां व्यञ्जकतयैवोपपत्तेर्गतं कार्यद्रव्यचर्चयापि, घटाद्युत्पाद-विनाशाकल्पनलाघवात्। अतिसूक्ष्मेक्षिकया ग्राहकविश्रामे च गतं घटादिना बाह्यतयैव। यच्च परार्थवाक्योच्चारणानुपपत्तेर्नित्यत्वं वर्णानामुक्तम्, तदयुक्तम्, अनित्यस्यापि शब्दस्य धूमादेरिवावगतसंबन्धस्यार्थप्रत्यायकत्वसंभवात्, भूयोदृष्टासु धूमव्यक्तिषु वह्निसंबन्धग्रहवत् पुनःपुनरुच्चारितासु शब्दव्यक्तिष्वर्थसंबन्धग्रहोपपत्तेः। जातावेव संबन्धग्रहो व्यक्तीनां चाक्षेप इति ॥३७५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनरुभयत्र सुवचम्, अयुक्तं च, जातिविशिष्टव्यक्तावेककालमेव संबन्धग्रहात्। अथ धूमे धूमत्वजातिसत्त्वाद् धूमत्वविशिष्टे वह्निसंबन्धग्रहोऽस्तु, गादौ तु शब्दत्वादिजात्यभावाद् न तद्विशिष्टे शक्तिग्रह इति चेत्। न, जातावप्यनुगतव्यवहारासिद्धाया जातेः प्रतिक्षेपायोगात्, श्रोत्रग्राह्यत्वादिना तद्व्यवहारान्यथासिद्ध्ययोगात्, तस्यातीन्द्रियघटितत्वात्, जातेराकृतिव्यङ्ग्यत्वनियमे मानाभावाच्च। यच्च प्रत्यभिज्ञयैव ज्ञात-ज्ञायमानशब्दैक्यमभिहितम्। तदसत्, लून-पुनर्जातकेश-नखादिष्विव तस्या भ्रान्तत्वात्, अन्यथोत्पाद-विनाशप्रतीत्यनुपपत्तेः, तार-मन्द-शुक-सारिकाप्रभवादिशब्देन नानाविधेष्वपि वर्णेषु प्रत्यभिज्ञादर्शनात् तस्या भ्रमत्वावश्यकत्वाच्च। एतेन 'उत्पाद-विनाशप्रतीतीनामेव भ्रमत्वमस्तु। न चोत्पाद-विनाशप्रतीतीनां भ्रमत्वकल्पनामपेक्ष्य प्रत्यभिज्ञामात्रस्य तत्कल्पने लाघवम्, प्रत्यभिज्ञानामप्यानन्त्यात्, विषयबाहुल्यस्य ज्ञानबाहुल्याप्रयोजकत्वात्। न च 'उत्पन्नो गकारः, विनष्टो गकारः' इति वैधर्म्यज्ञानकालोत्पत्तिकायाः प्रत्यभिज्ञायास्तज्जातीयाभेदविषयकत्वम्, 'श्यामो नष्टः, रक्त उत्पन्नः' इति ज्ञानकाले 'स एवायं घटः' इति व्यक्त्यैक्यप्रतीतिस्तु तत्र विशिष्टोत्पादादिप्रतीतेः शुद्धव्यक्त्यभेदाविरोधित्वात्; इह तु शुद्धस्यैव गकारादेरुत्पादादिधीरिति विशेषादिति वाच्यम्; तादृशवैधर्म्यज्ञानाभावकालोत्पन्नपूर्वापरकालीनव्यक्त्यभेदविषयकप्रत्यभिज्ञया तदैक्यसिद्धावुत्पादादिप्रतीतेर्वायुसंयोगाद्युत्पादादिविषयकत्वस्य सुवचत्वात्, वह्न्यादौ धूमादिव्याप्तिभ्रमवद् नित्येऽपि शब्दे स्वत्वगर्भस्यापि सखण्डोत्पादस्य भ्रमसंभवात्, साक्षाद्विरोधिनस्तथाविधोत्पादस्य व्यावर्तकत्वेनागृहीतत्वात्, तद्बुद्धेर्व्यक्त्यभेदबुद्ध्यविरोधित्वाच्च' इत्युक्तावपि न क्षतिः। न च तारत्वादिकं ध्वनिधर्म एव शब्द आरोप्यते, न तु शब्दस्य स्वाभाविकं रूपमिति वाच्यम्; तस्य तारत्वादिधर्मवत्तयैव नित्यमनुभूयमानतया तत्र तारत्वाद्यारो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पायोगात्; तदुक्तम्—

" यो ह्यन्यरूपसंवेद्यः संवेद्येतान्यथापि वा। स मिथ्या न तु तेनैव यो नित्यमुपलभ्यते ॥ १ ॥" इति।

न च ध्वनिधर्मत्वे तारत्वादीनां ग्रहणमप्युपपद्यते, स्पर्शाद्यनन्तर्भावेन त्वगादीनामशब्दधर्मत्वेन च श्रोत्रस्य तत्राव्यापारात्। सन्तु तर्हि ध्वनयो नाभसा इति चेत्। न, तथापि व्यक्तियोग्यतान्तर्भूतत्वाज्जातियोग्यतायाः 'तारोऽयम्' इत्यादौ ध्वन्यस्फुरणे तद्गततारत्वाद्यस्फुरणप्रसङ्गात्। न चेदेवम्, कत्वादिकमपि वायुगतमेवारोप्येतेति शब्दैक्यं स्यात्, कादेरपि वा वायुधर्मत्वं स्यात्। अस्त्वेवं को दोषः? इति चेत्। वायुगतयोग्यधर्मत्वे तद्गतस्पर्शादिवत् त्वचा ग्रहप्रसङ्गः, अवयविगुणत्वे नित्यस्य, परमाणुगुणत्वे चाग्रहणस्य प्रसङ्गः।

किञ्च, नित्यत्वे शब्दस्य सर्वदा सर्वोपलब्धिप्रसङ्गः। विजातीयवायुसंयोगादीनां व्यञ्जकत्वं च नित्यसर्वगतस्य गकारादेर्वर्णस्य, श्रोत्रस्य, उभयस्य वाऽऽवारकाणां वायूनामपनयनाद् वर्ण-श्रोत्र-तदुभयसंस्कारक्रमेण वक्तव्यम्। तत्र वर्णसंस्कारपक्ष आवारककृतविज्ञानजनकशक्तिप्रतिबन्धापनयनद्वारा विज्ञानजनकशक्त्याविर्भावने शक्ति-शक्तिमतोः कथञ्चिदभेदाद् वर्णस्वरूपमेवाविर्भावितं भवति, इति कथं न वर्णस्य व्यञ्जकजन्यत्वम्?, जनकसंनिधानप्रागुत्तरकालीनज्ञानजननाजननस्वभावभेदावश्यकत्वाच्चेति किमभिव्यक्त्या?। अपिच, वर्णाभिव्यक्तिपक्षे कोष्ठ्येन वायुना यावद्देशमभिसर्पता यावान् वर्णविभागोऽपनीतावरणः कृतस्तावत एव श्रवणं स्याद् न समस्तस्य वर्णस्य, इति खण्डशस्तत्प्रतिपत्तिः स्यात्। निर्विभागत्वादेकत्रोत्सारितावरणः सर्वत्रापनीतावरणोऽयमिति चेत्। तर्हि तत एवैकत्रानपनीतावरणः सर्वत्र तथेति मनागपि श्रवणं न स्यात्। अथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धात्तघटादिवदभिव्यक्तः सन् सर्व एवायं गृह्यते, यदवच्छेदेन संस्कारस्तदवच्छेदेन ग्रहणनियमाद् नातिप्रसङ्गः, तदुक्तम्—

" यथैवोत्पद्यमानोऽयं न सर्वैरवगम्यते । दिग्देशाद्यविभागेन सर्वान् प्रति भवन्नपि ॥ १ ॥

तथैव तत्समीपस्थैर्नादैः स्याद् यस्य संस्कृतिः । तैरेव गृह्यते शब्दो न दूरस्थैः कथञ्चन ॥ २ ॥"

इति न दोष इति चेत् । न, असिद्धमसिद्धेन साधयतो महासाहसिकतापत्तेः, घटस्याप्यावृता-ऽनावृतदेशयोः खण्डा-ऽखण्डप्रतिभासभेदेन भेदसाधनात्, तद्वदस्य सविभागत्वप्रसङ्गात्, संस्कृता-ऽसंस्कृतदेशभेदात्, अन्यथा सर्वात्मना संस्काराधाने ऽन्यत्रावारकाणां शक्तेः प्रतिबद्धुमशक्यत्वेनाकिञ्चित्करतयाऽतिप्रसङ्गस्य तादवस्थ्यात् । उत्पत्तिपक्षे त्वव्यापकत्वाद् यत्समीपवर्ती वर्ण उत्पन्नस्तेनैवासौ गृह्यते न दूरस्थैरिति नातिप्रसङ्गः । दिग्देशाद्यविभागेन इति चातीवासंगतम्, अविभागस्य कस्यचिद् वस्तुनोऽसंभवेनानभ्युपगमात् । किञ्च, व्यापकत्वेन वर्णानामेकावरणापायेन समानदेशत्वे सर्वेषामनावृतत्वाद् युगपत् सर्ववर्णश्रुतिः स्यात् । न च प्रतिनियतवर्णश्रवणान्यथानुपपत्त्या व्यञ्जकभेदसिद्धेर्नायं दोषः स्यादिति वाच्यम्; तद्भेदो ह्यावारकभेदे स्यात्, अभिन्नावारकापनेतृत्वे तद्भेदासिद्धेः, आवारकभेदश्च वर्णदेशभेदे स्यात्, समानदेशानामेकावारकेणैवापरावरणदर्शनात्, देशभेदोऽपि वर्णानामव्यापकत्वे सति स्यात्, व्यापकत्वे तु परस्परदेशपरिहारेण तेषामनवस्थानाद् देशभेदासिद्धेः । न चाव्यापकत्वं वर्णानामभ्युपगम्यते भवद्भिरिति ।

व्यञ्जकत्वाभिमतानां नावारकापनेतृत्वेन व्यञ्जकत्वम्, किन्तु वर्णे दृश्यस्वभावाधानात्, इत्युपगमे तु स्ववाचैव तस्य परिणामित्वमभिहितम् । 'स्वप्रतिपत्तौ सहकारित्वेनैव व्यञ्जकत्वम्, इत्यप्येकान्तनित्यस्य सहकार्यपेक्षाऽयोगाद् न शोभते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विजातीयवायुसंयोगानां कत्वादेरेव जन्यतावच्छेदकत्वौचित्याच्च, अन्यथा कोलाहलप्रत्ययानुपपत्तेः, तत्र काद्यविषयकत्वे च तारतम्यानुपपत्तेः। न च ध्वनिगतमेव तारतम्यं तत्रारोप्यत इति सांप्रतम्, तस्याश्रावणत्वात्, विलक्षणतारतम्यानुभवाच्च। कत्वादिशब्दत्वादिप्रकारकप्रत्यक्षे पृथग्घेतुत्वे तु गौरवम्। न च कत्वादिप्रकारकप्रत्यक्षे दोषाभावहेतुत्वमपेक्ष्य विजातीयवायुसंयोगहेतुत्वमावश्यकमिति युक्तम्, तत्र कोलाहलादावपि बहु-बहुविधादिमतिज्ञानभेदवतः कत्वादि-शुकीयत्वादिप्रकारकप्रत्यक्षोदयात्, तत्र दोषाभावहेतुत्वावश्यकत्वात्। न च कोलाहलादिकालीनकत्वादिप्रकारकप्रत्यक्षे गुणविशेषस्यैव हेतुत्वम्, तथापि विजातीयवायुसंयोगानां विशिष्य हेतुत्वे गौरवानपायात्, गुणविशेषस्य क्षयोपशमविशेषद्वारकत्वेन 'यद्विशेष०' इति न्यायात् सामान्यत एव क्षयोपशमस्य हेतुत्वाच्च। न च स्वाश्रयविषयतयापि कत्वादिकं जन्यतावच्छेदकमिति वक्तुं युक्तम्, कादेः स्वगतधर्मानुविधायित्वेन साक्षादेव कत्वादेस्तत्त्वौचित्यात्, अन्यथा घटत्वादेरपि ज्ञानगतस्यैव तथात्वप्रसङ्गात्। एतेन शुकादिककारादेरपि विषयितया तथात्वं निरस्तम्, शब्दत्वादिग्रहेऽतिप्रसङ्गानिरासाच्च। तदीयश्रवणसमवाये श्रावणत्वस्योपलक्षणत्वेऽतिप्रसङ्गतादवस्थ्यात्। विशेषणत्वे तु प्रथमं केवलशब्दप्रत्यक्षस्वीकारेऽपसिद्धान्तापाताच्चेति न किञ्चिदेतत्। एतेन 'नित्यत्वपक्षेऽपि' इत्यारभ्य दिगन्तं पूर्वपक्षोक्तं प्रत्युक्तम्। तन्न वर्णसंस्कारपक्षो ज्यायान्।

नापि श्रोत्रसंस्कारपक्षो युक्तः, तस्मिन्नपि पक्षे हि सकृत् संस्कृतं श्रोत्रं सर्ववर्णान् युगपत् शृणुयात्। न ह्यञ्जनादिना संस्कृतं चक्षुः संनिहितं स्वविषयं किञ्चित् पश्यति किञ्चिद् नेति दृष्टम्, न वा बाधिर्यनिराकरणद्वारा तैलविशेषादिसंस्कृतं श्रोत्रं गकारादिकमेव शृणोति न खकारादिकमिति दृष्टम्। न च समानेन्द्रियग्राह्येष्वप्यर्थेषु व्यञ्जकप्रतिनियमो दृष्टः, तैलाभ्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्तस्य मरीचिभिर्भूमेर्मेघोदकसेकेन गन्धाभिव्यक्तिभेदात्, तथा च व्यञ्जकैर्वायुभिर्भिन्नेषु कर्णमूलावयवेषु वर्तमानैः प्रतिनियतवर्णग्राहकतयैव श्रोत्रे संस्काराधायकत्वाद् नैकवर्णग्राहकत्वेन संस्कृतं श्रोत्रं सर्ववर्णान् युगपद् गृह्णाति; तदुक्तम्—

"व्यञ्जकानां हि वायूनां भिन्नावयवदेशता। जातिभेदश्च तेनैव संस्कारो व्यवतिष्ठते ॥ १ ॥
अन्यार्थप्रेरितो वायुर्यथाऽन्यं न करोति च। तथान्यवर्णसंस्कारशक्तो नान्यं करिष्यति ॥ २ ॥
अन्यैस्ताल्वादिसंयोगैर्नान्यो वर्णो यथैव हि। तथा ध्वन्यन्तरोच्चारो न ध्वन्यन्तरकारिभिः ॥ ३ ॥
तस्मादुत्पत्त्यभिव्यक्त्योः कार्यार्थापत्तितः समः। सामर्थ्यभेदः सर्वत्र स्यात् प्रयत्न-विवक्षयोः ॥ ४ ॥"

इति वाच्यम्; इन्द्रियसंस्कारिणां व्यञ्जकानां समानदेशसमानेन्द्रियग्राह्येष्वर्थेषु प्रतिनियतविषयग्राहकत्वेनेन्द्रियसंस्कारकत्वस्य क्वचिदप्यदर्शनात्। मरीचि-मेघोदकयोस्तु विषयसंस्कारकत्वमेव, नेन्द्रियसंस्कारकत्वम्, तैलाभ्यक्तभुवोर्गन्धातिशयस्यैव ताभ्यामभिव्यक्तेः। किञ्च, इन्द्रियसंस्कारकत्वमिन्द्रियगतोपकारजननं विना दुर्वचम्, उपकारश्च भेदा-ऽभेदविकल्पोपहतः, अन्यथा च व्यञ्जकभेदोपलोप इति न किञ्चिदेतत्। एतेन 'व्यवहितनिध्यादिमात्रव्यञ्जकमन्त्रादिवत् संनिहितकादिमात्रव्यञ्जकवायुभेदोक्तावपि न क्षतिरिति श्रोत्रसंस्कारपक्षोऽपि न साधीयान्। उभयसंस्कारपक्षस्तु प्रत्येकपक्षोक्तदोषोपहत एवेति दिग्। एवं च वर्णानामेवानित्यत्वात् कथं तत्समुदायरूपस्य वेदस्य नित्यत्वम्? इति परिभावनीयम्।

अत्र नैयायिकाः—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्णो न नित्य इति तावदत्रादि युक्तं द्रव्यत्वमस्य पुनरर्थवशाद् यदुक्तम्।
व्योमैकवर्तिनि गुणे न विराजते तद् गुञ्जेव राजवनितामणिहारमध्ये ॥ १ ॥

तथाहि- 'शब्दो गुणः, बहिरिन्द्रियव्यवस्थापकत्वात्, रूपादिवत्' इत्यनुमानात् परिशेषेणाम्बरगुणत्वसिद्धेः कथं तस्य द्रव्यत्वम्? । तथात्वे हि श्रोत्रेण तस्य ग्रहणं न स्यात्- 'श्रोत्रेन्द्रियं द्रव्याग्राहकम्, रूप-स्पर्शाग्राहकबहिरिन्द्रियत्वात्, रसनवत्' इत्यनुमानेन श्रोत्रस्य द्रव्याग्राहकत्वसिद्धेः । अपिच, शब्दो न द्रव्यम्, एकद्रव्यत्वात्, रूपादिवत् । एकद्रव्यत्वं च तत्र 'एकद्रव्यः शब्दः, सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षत्वात्, रूपादिवत्' इत्यनुमानेन सिद्धम् । न च वायौ व्यभिचारः, तस्य बाह्येन्द्रियाप्रत्यक्षत्वाद् मूर्तप्रत्यक्षत्वस्यैव संग्राहकत्वलाघवेनोद्भूतरूपकार्यतावच्छेदकत्वात्, द्रव्यचाक्षुषत्वस्य तथात्वे गगनादिस्पार्शनवारणाय द्रव्यस्पार्शनं प्रत्युद्भूतस्पर्शत्वेन हेतुत्वे स्पर्शत्वप्रवेशे गौरवात्, अनुद्भूतत्वाभाव-कूट-स्पर्शत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहात् । मम तु स्पर्शनिष्ठानुद्भूतावच्छिन्नप्रतियोगिताकानुद्भूताभावकूटत्वेनैव हेतुत्वात्, गगनादौ रूपाभावादेव त्वाचापत्तेरभावात्, सामान्यसामग्रीमादायैव विशेषसामग्र्याः कार्यजनकत्वनियमात् । अपि च, एवं त्वगिन्द्रियवृत्त्यनुद्भूताभावस्याप्यनिवेशाल्लाघवम् । एतेन 'प्रामाणिकस्य घट-पटादिनिष्ठोपादानप्रत्यक्षादिजन्यत्वस्यावच्छेदकं कार्यत्वमस्तु, संग्राहकत्वात्, न तु घटे घटत्वम्, पटादौ पटत्वादिकम्, गौरवात्; प्रकृते तु स्पार्शनस्य रूपजन्यत्वे मानाभावाद् निश्चिताव्यभिचारकत्वाच्च द्रव्यचाक्षुषत्वमेव तथा; अस्तु वा मूर्तप्रत्यक्षत्वावच्छिन्ने स्पर्शहेतुता' इत्यपास्तम्, ॥३७८॥ वायोश्चाक्षुषतापत्तेश्च । यदि चापेक्षाबुद्धिभेदेन कूटत्वस्य नानात्वाद् न तादृशानुद्भूताभावकूटत्वेन हेतुता, अपि त्वनुद्भूतत्वा-

भावकूटस्पर्शत्वयोर्व्यासज्यवृत्त्यवच्छेदकतोपगमेनानुद्भूतत्वाभावकूटवत्स्पर्शत्वेनैव तथात्वमिति विभाव्यते, तदा मूर्तप्रत्यक्षत्वावच्छिन्नं प्रत्येव महत्त्वोद्भूतरूपस्पर्शवत्त्वेन हेतुत्वमस्तु, इति वायुप्रभादेरुच्छिन्नैव प्रत्यक्षत्वकथा, स्पर्श-रूपादिप्रत्यक्षेणैव तदनुमितिस्मृत्यादिसंभवात् । द्रव्यस्पार्शनजनकतावच्छेदकैकत्वनिष्ठजातेः सांकर्यवारणाय द्रव्यचाक्षुषजनकतावच्छेदकैकत्वनिष्ठजातिव्याप्यत्वस्वीकारात् कुतो वाय्वादेः स्पार्शनम् ?, प्रकृष्टमहत्त्वोद्भूतस्पर्शयोर्द्रव्यस्पार्शनं प्रति गौरवेणाहेतुत्वात्, एकस्य विजातीयैकत्वस्यैव तत्त्वौचित्यात् । यदि च त्रसरेणोरचाक्षुषत्वाभ्युपगमेन द्रव्यचाक्षुषजनकतावच्छेदकैकत्वनिष्ठजातेरेव द्रव्यस्पार्शनजनकतावच्छेदकैकत्वनिष्ठजातिव्याप्यत्वं किं न स्यात् ? इति विभाव्यते, तदाप्येकस्या एवैकत्वनिष्ठजातेर्द्रव्यचाक्षुष-स्पार्शनोभयजनकतावच्छेदकत्वाद् न वाय्वादेः स्पार्शनत्वमिति तु स्वतन्त्राः ।

यत्तु 'घटाकाशसंयोगद्वित्वादेः स्पार्शनवारणाय द्रव्यान्यसत्त्वावच्छिन्नं प्रति स्वाश्रयसमवेतत्वसंबन्धेन लौकिकविषयत्वावच्छिन्नत्वाचाभावस्य प्रतिबन्धकत्वं कल्प्यते, व्यासज्यवृत्तिगुणत्वाचत्वावच्छिन्नं प्रति तथात्वे गुणादित्वाचं प्रति प्रकृष्टमहत्त्ववदुद्भूतस्पर्शवत्समवायस्य पृथक्कारणत्वकल्पनापत्तेः, द्रव्यान्यसत्प्रत्यक्षत्वावच्छिन्नं प्रति चाक्षुषाभावस्य तथात्वे च घट-प्रभासंयोगादिस्पार्शनापत्तेर्दुर्निवारत्वात्, इति वायुष्पादेरस्पार्शनत्वेन तद्वृत्तिस्पार्शनानुपपत्तिः । न च स्पर्शेतरद्रव्यान्यसत्त्वाचत्वं तत्प्रतिबध्यतावच्छेदकम्, स्पर्शेतरत्वप्रवेशे गौरवात् । घटा-ऽऽकाशसंयोगादौ स्पार्शनसामान्यापत्तिवारणाय स्वस्पर्शस्पार्शनं प्रति स्पर्शत्वेन, परमाण्वादिस्पर्शस्पार्शनवारणाय प्रकृष्टमहत्त्वेन चातिरिक्तकारणत्वकल्पनाच्च' इति । तदसत्, त्रसरेण्वादिघटितसंनिकर्षेण द्रव्यत्वादित्वाचप्रसङ्गवारणाय द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वावच्छिन्नं प्रति त्वक्संयुक्तप्रकृष्टमहत्त्वो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्भूतस्पर्शवत्समवायत्वेन प्रत्यासत्तित्वावश्यकत्वात्, द्रव्यान्यसत्त्वाचत्वस्य प्रतिबध्यतावच्छेदकत्वे घटा-ऽऽकाशसंयोगादौ जातिस्पार्शनवारणाय जातिस्पार्शनं प्रति जातित्वादिना हेतुत्वकल्पने गौरवात्, व्यासज्यवृत्तिगुणनिष्ठविषयतया त्वाचत्वावच्छिन्नं प्रत्येवोक्तप्रत्यासत्त्या त्वाचाभावस्य यावदाश्रयत्वाचस्य वा हेतुत्वाच्च। न च द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वावच्छिन्नं प्रति त्वक्संयुक्तत्वाचवत्समवायत्वेनैव प्रत्यासत्तित्वम्, महदुद्भूतरूपयोरुभयोः प्रवेशे गौरवात्, तथा च वाय्वादेरस्पार्शनत्वे कथं तद्वृत्तिस्पर्शादिस्पार्शनम्? इति वाच्यम्, त्वाचत्वस्य विशेषणत्वे गुण-गुणिनोर्युगपद्ग्रहणप्रसङ्गात्। उपलक्षणत्वे च पाकजस्पर्शोत्पत्तिकालेऽपि स्पर्शादिग्रहणप्रसङ्गात्, एकस्यामेव व्यक्तौ कालभेदेनानन्तत्वाचसंभवेन तावत्त्वाचनिवेशापेक्षया महत्त्वोद्भूतस्पर्शयोरुभयोरेव निवेशौचित्याच्चेति दिग्। एवं चोद्भूतरूपाभावाच्छब्दस्य मूर्तद्रव्यत्वे वायुपिशाचादिवद् बहिरिन्द्रियप्रत्यक्षत्वमेव न घटते, विभुत्वे तु नित्यत्वाज्जन्यत्वमेव न स्यादिति मीमांसकमतप्रवेशः। कर्णावच्छिन्नश्रोत्रसमवायस्य शब्दग्राहकप्रत्यासत्तित्वाच्च न तस्य द्रव्यत्वम्, कर्णावच्छिन्नश्रोत्रसंयोगस्य तथात्वे श्रोत्रेण द्रव्यान्तरग्रहणप्रसङ्गादिति।

सेयं कदक्षरमयी बत! गीः परेषां घर्मव्यथेव विदुषां हृदयं दुनोति।
कुर्मस्तदत्र गिरमाप्तमताद् वितत्य पीयूषवृष्टिसदृशं प्रतिकारसारम् ॥ १ ॥

तथाहि– यत् तावद् बहिरिन्द्रियव्यवस्थापकत्वात् शब्दस्य गुणत्वमुक्तम्। तदसत्, रूपादीनामपि द्रव्यविविक्तानामसत्त्वेनाऽतथात्वाद् दृष्टान्तासिद्धेः, इन्द्रियान्तराग्राह्यग्राहकत्वस्यैव भिन्नेन्द्रियत्वव्याप्यत्वेन तत्र गुणप्रवेशस्य गौरवकरत्वाच्च। एतेन ॥३७९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'श्रोत्रेन्द्रियं द्रव्यग्राहकम्' इत्याद्यपि निरस्तम्, अप्रयोजकत्वात्। तस्याद्रव्यत्वसाधकमनुमानं च बलवता द्रव्यत्वसाधकानुमानेन बाधितमेव; तथाहि– शब्दो द्रव्यम्, क्रियावत्त्वात्, शरवत्। निष्क्रियत्वे च तस्य स्वासंबद्धश्रोत्रेण ग्रहणे तस्याप्राप्यकारित्वप्रसङ्गः। संबन्धकल्पनायां च श्रोत्रं वा शब्ददेशं गत्वा शब्देन संबध्येत, शब्दो वा श्रोत्रदेशमागत्य तेनाभिसंबध्येत?। नाद्यः, नभोरूपस्य श्रोत्रस्य निष्क्रियत्वेन गत्यभावात्, अपान्तरालवर्तिनामप्यन्यान्यशब्दानां ग्रहणप्रसङ्गात्, अनुवात-प्रतिवात-निर्यग्वातेषु प्रतिपत्त्य-ऽप्रतिपत्ती-षत्प्रतिपत्तिभेदाभावप्रसङ्गाच्च, श्रोत्रस्य गच्छतस्तत्कृतोपकाराद्ययोगात्। नापि द्वितीयः, शब्दस्य श्रोत्रदेशागमने स्वयमेव सक्रियत्वाभिधानात्।

नन्विदं स्वविकल्पजल्पमात्रम्, अस्मन्मते तु वीणाद्याकाशसंयोगेन स्वावच्छेदकावच्छेदेन जनितेनाद्यशब्देन दशदिक्षु निमित्तपवनतारतम्ये कदम्बगोलकन्यायेन तार-मन्दादिरूपा दश शब्दा आरभ्यन्ते, निमित्तपवनतारतम्ये तु दशदिक्षु वीचितरङ्गन्यायेनैक एव शब्द आरभ्यते, एवं तैरपि वा शब्दान्तरारम्भक्रमेण श्रोत्रप्राप्तेः सुघटत्वाद् नानुपपत्तिरिति चेत्। नन्वेवं 'बाणादयोऽपि पूर्वपूर्वसमानजातीयक्षणप्रभवा अन्या एव लक्ष्येणाभिसंबध्यन्ते' इति किं नाभ्युपगम्यते?। प्रत्यभिज्ञानाद् बाणादौ स्थायित्वसिद्धेर्नेयं कल्पनेति चेत्। शब्देऽपि तर्हि मा भूदियम्, तत्राप्येकत्वग्राहिणः प्रत्यभिज्ञानस्य 'देवदत्तोच्चारित एवायं शब्दः श्रूयते' इत्येवमाकारेणोपजायमानस्याबाधितत्वात्। दूरत्व-नैकट्याभ्यां तार-मन्दादिभेदेन भेदे ध्रुवे साजात्यमेव प्रत्यभिज्ञाविषय इति चेत्। न, परिणामभेदेऽपि रक्ततादशायां घटस्येव परिणामिनस्तस्य सर्वथाऽभेदात्। अत एवानुश्रेण्यां विश्रेण्यां वा मिश्राणामेव पराघातवासितानामेव च शब्दद्रव्याणां श्रवणाभ्युपगमेऽपि न क्षतिः। न च क्षणिकत्वं शब्दस्य प्रत्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिज्ञायां बाधकम्, तत्र मानाभावात्, शब्दजनकशब्दस्य कार्यशब्देन शब्दजन्यशब्दस्य कारणशब्दनाशेन नाशकल्पने गौरवात्, उच्चरितशब्दस्य श्रोत्रदेशागमनकल्पनस्यैवौचित्यात्; अन्यथा कत्वादिविशिष्टलौकिकप्रत्यक्षानुपपत्तेश्च।

यैश्चैतदुपपादनाय संप्रदायं परित्यज्य 'प्रतियोगितया शब्दनाशे विजातीयपवनसंयोगनाशत्वेन, स्वप्रतियोगिजन्यतासंबन्धेन नाशत्वेनैव वा हेतुत्वमुपगम्य विजातीयपवनसंयोगनाशादेव जनकशब्दनाशादेव वा शब्दानां नाशः, इति पवनसंयोगस्योत्सर्गतः क्षणचतुष्टयस्थायितया शब्दोत्पत्तिचतुर्थक्षणे निमित्तपवनसंयोगनाशात् पञ्चमक्षणे शब्दनाशः, इति शब्दस्य चतुःक्षणस्थायितया न तृतीयक्षणवर्तिध्वंसप्रतियोगित्वरूपं क्षणिकत्वम्; नापि निमित्तपवनसंयोगनाशक्षणोत्पन्नशब्दस्य क्षणिकतापत्तिः, निमित्तपवनसंयोगस्योत्पत्तिसंबन्धेन कार्यसहभावेन वा शब्दहेतुत्वात्; अवच्छेदकतया तारे शुकीयककारादौ वा तादृशभावस्य हेतुत्वाद् वा; अत एव नैकावच्छेदेन सदृशनानाशब्दोत्पत्तिरपि' इति नव्यदृशा निरीक्ष्यते; तेषां बहुक्षणस्थायितामुपेक्ष्य प्रत्यभिज्ञाकदर्थनं व्यसनमात्रम्। वस्तुतो 'दूरादागतोऽयं शब्दः, समीपादागतोऽयं शब्दः' इति 'दूरादागतोऽयं बकुलपरिमलः, समीपादागतोऽयं बकुलपरिमलः' इति घ्राणेन गन्धक्रियाविशेषवत् श्रोत्रेण शब्दक्रियाविशेषः साक्षादेव गृह्यते। इत्थमेव श्रोत्राप्राप्यकारित्वाभिमानिशाक्यसिंहविनेयमतनिरासात्, क्रियाविशेषग्रहादेव दूरादिव्यवहारोपपत्तेः, दूरस्थत्वादेः श्रोत्रेण ग्रहीतुमशक्यत्वात्, दूरस्थस्यैव शब्दस्य ग्रहे दूरस्थेन महता भेर्यादिशब्देनाल्पस्य मशकादिशब्दस्यानभिभवप्रसङ्गाच्च। न च पवनगतैव गतिः शब्द आरोप्यते, स्वाभाविकगतेरन्यगत्यनुविधानानुपपत्तेरिति वाच्यम्, इन्द्रनीलप्रभागतेरिन्द्रनीलगत्यनुविधानवदुपपत्तेः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि च, गुणवत्त्वादपि द्रव्यं शब्दः। न च गुणवत्त्वमसिद्धम्, कंसपात्र्यादिध्वानाभिसंबन्धेन कर्णशष्कुल्याख्यस्य शरीरावयवस्याभिघातदर्शनेन स्पर्शवत्तया तस्य तत्सिद्धेः, स्पर्श-वेगसापेक्षक्रियाया अभिघातहेतुत्वात्। स्पर्शवता शब्देन कर्णविवरं प्रविशता वायुनेव तद्द्वारलग्नतूलांशुकादेः प्रेरणं स्यात्। न स्याद् धूमेनानेकान्तात्। धूमो हि स्पर्शवान्, तदभिसंबन्धेन पांशुसंबन्धेनेव चक्षुषोऽस्वास्थ्योपलब्धेः। न च तेन चक्षुःप्रदेशं प्रविशता तत्पक्ष्ममात्रस्यापि प्रेरणं समुपलभ्यत इति। न च स्पर्शवत्त्वे शब्दस्य वायोरिव स्पार्शनप्रसङ्गः, धूम-प्रभादिवदनुद्भूतस्पर्शत्वात्। नापि धूमादिवच्चाक्षुषप्रसङ्गः, जलसंयुक्तानलवदनुद्भूतरूपत्वात्। अथ जलसहचरितेनानलेनोष्णस्पर्शवता शरीरप्रदेशदाहवत् तथाविधेन शब्दसहचरितेन वायुनेव श्रवणाख्यशरीरावयवाभिघाताद् न शब्दस्य स्पर्शवत्त्वमिति चेत्। न, शब्दतीव्रतानुविधायित्वेनाभिघातविशेषस्य तद्धेतुकत्वात्। न चानुद्भूतस्पर्शवताऽभिघात इति सांप्रतम्, तादृशस्यापि पिशाचादेः पादप्रहारेण तत्संभवात्। वेगवन्निबिडावयवक्रिययैवाभिघातः, तत्र स्पर्शो न तन्त्रमिति चेत्। अस्त्वेवम्, तथापि गुणवत्त्वमव्याहतमेव। अल्पत्व-महत्त्वाभिसंबन्धादपि गुणवान् शब्दः, 'अल्पः शब्दो, महान् शब्दः' इति सार्वजनीनानुभवात्। न च वक्तृगतं व्यञ्जकगतं वाऽल्प-महत्त्वमारोप्यत इति वाच्यम्; बाधकाभावात्। न चेयत्तानवधारणं बाधकम्, वाय्वादौ तदनवधारणेऽप्यल्प-महत्त्वावधारणात्। न च तारत्व-मन्दत्वजातिभ्यामेव शब्दगताभ्यामल्प-महत्त्वव्यपदेशोपपत्तेर्न तत्र परिमाणकल्पनमिति वाच्यम्; तारत्वादेः शब्दगतजातित्वासिद्धेः, कत्वादिना सांकर्यात्, 'कत्वादिव्याप्यं तारत्वादिकं भिन्नमेव' इत्यस्य च दुर्वचत्वात्, 'तारत्वादिव्याप्यं कत्वादिकमेव भिन्नमस्तु' इत्यपि वक्तुं शक्यत्वात्। कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वनियमेन नानातारत्वाद्यवच्छिन्ने नानाहेतुक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ल्पनागौरवाच्च । 'मन्द-तीव्रताभिसंबन्धादल्प-महत्त्वप्रत्ययसंभवे मन्दवाहिनि गङ्गानीरे 'अल्पमेतत्' इति प्रत्ययोत्पत्तिः स्यात्, तीव्रवाहिनि गिरिसरिन्नीरे 'महत्' इति च प्रतीतिप्रसङ्गः' इत्यपि वदन्ति । न चात्र क्रियानिष्ठयोरेव मन्दत्व-तीव्रत्वयोः प्रत्ययः, शब्दे तु स्वगतयोरेवेति विशेष इति वाच्यम्; शब्देऽपि 'मन्दमायाति, तीव्रमायाति शब्दः' इति क्रियानिष्ठयोरपि तयोः प्रतीयमानत्वात्, क्रियाधर्मस्य क्रियावत्युपचारश्च नीरेऽपि दृश्यत एव 'इदं नीरं मन्दम्, इदं तीव्रम्' इति न किञ्चिदेतत् ।

वायुना प्रतिनिवर्तनात् संयोगादपि तथा, गन्धादिवत् प्रतिकूलवायुनाऽऽश्रयनिवर्तनस्य दुर्वचत्वात्, तदाश्रयस्य भवद्भिर्व्यापकस्याभ्युपगमात्, शब्दात् शब्दोत्पत्तेश्च निरस्तत्वात् । तन्निरासे कथमेक एव शब्दो बहुभिः प्रतीयते ? इति चेत् । यथैक एव चम्पकादिगन्धो बहुभिः प्रतीयते तथेति विभावय, तदवयवानां दिक्षु प्रसरणवत् शब्दावयवानामपि तदुपगमात् । चम्पकादिभ्यो निर्गता द्रव्यान्तरीभूता एव चम्पकावयवा यथावातं प्रसरन्ति न तु चम्पकोऽपि, अदृष्टवशाद् बीजाद्युच्छूनतायामिव नियतावयवान्तरागमनाच्च न चम्पके च्छिद्राद्यापत्तिः, न चायं शब्दे न्याय इति चेत् । न, चम्पकीयगन्धप्रत्यभिज्ञानादवयवान्तरागमकल्पने गौरवाच्चावस्थितस्यैव चम्पकस्य तथापरिणामकल्पनात् शब्दस्याप्यवस्थितस्यैव दिग्-विदिग्व्याप्तिसंभवात्, आगममूलश्चास्माकमयमर्थ इति दिक् ।

एकत्वादिसंख्यायोगादपि तथा, 'एकः शब्दः, द्वौ शब्दौ, बहवः शब्दाः' इति प्रतीतेः । न चाधारसंख्योपचारात् तथाव्यपदेश इति युक्तम्, आधारस्यैकत्वाद् बहुष्वप्येकत्वव्यपदेशापत्तेः । विषयसंख्योपचारे च गगना-ऽऽकाश-व्योम-शब्देषु बहुत्वव्यपदेशानापत्तिः, गगनलक्षणस्य विषयस्यैकत्वात् । न स्याच्च 'एको गोशब्दः' इति स्वप्नेऽपि प्रतीतिः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गवामनेकत्वात् । अपिच, घटादाविव निरुपचरितमेव शब्द एकत्वादिकं प्रतीयते, परम्परासंबन्धेन वैलक्षण्येन वा तदप्रत्ययात् । एतेन 'यथाऽविरोधं संख्योपचारः' इति पदार्थेषु षट्त्ववदत्रैकत्वादिकम्, बुद्धिविशेषविषयरूपमेव वा' इत्यादि निरस्तम् । एवं क्रियावत्त्वात्, गुणवत्त्वाच्च 'शब्दो द्रव्यम्' इति बाधितं तस्याद्रव्यत्वसाधकानुमानम् ।

अपिच, 'एकद्रव्यत्वात्' इति हेतुरप्यसिद्धः, 'एकद्रव्यः शब्दः' इत्याद्यनुमाने वायुनैव व्यभिचारात्, तस्याप्रत्यक्षत्वे घटादेरपि तथात्वप्रसङ्गात्, त्वचा स्पर्शस्येव चक्षुषापि रूपस्यैव प्रतीतेः सुवचत्वात् 'पश्यामि, स्पृशामि' इति धिया घटादेर्दर्शन-स्पर्शनाभ्यां प्रत्यक्षत्वोपगमे च वायावपि 'खरः, मृदुः, उष्णः, शीतो वायुर्मे लगति' इति प्रतीतेस्तथात्वं किं नोपेयते ? । न चेयं प्रतीतिर्न स्पार्शनी, अपि तु मानसीति वाच्यम्; त्वग्व्यापार एव तदुदयात्, 'स्पृशामि' इत्याकारानुपपत्तेश्च । अथ 'स्पृशामि' इति धीर्भ्रान्ता, मूर्तप्रत्यक्षत्वस्योद्भूतरूपकार्यतावच्छेदकत्वेन कारणाभावस्य बाधकस्य सत्त्वादिति चेत् । न, चाक्षुषे स्पार्शने वा विलक्षणक्षयोपशमरूपयोग्यताया एव हेतुत्वात् प्रभादिष्वप्यनुद्भूतस्पर्शादेः स्पार्शनादिप्रतिबन्धकत्वाकल्पनात्, योग्यताऽभावादेव तत्र स्पार्शनाद्यनुदयात् । अत एव योग्यताविशेषवतः पुरुषविशेषस्य शब्दे बाह्येन्द्रियान्तरेणापि प्रतीतौ प्रकृतहेतावसिद्धतामप्युद्भावयन्ति संप्रदायवृद्धाः; अन्यथा चक्षुषैवास्मदादिभिरुपलभ्यमानैश्चन्द्रा-ऽर्कादिभिर्व्यभिचारात्, 'सर्वदा सर्वत्र सर्वैर्बाह्यैकेन्द्रियग्राह्यः शब्दः, बाह्येन्द्रियग्राह्यत्वे सति विशेषगुणत्वात्, रूपादिवत्' इत्यत्र च शब्दस्य गुणत्वनिषेधेन हेतोरसिद्धत्वात् ।

अपिच, मूर्तप्रत्यक्षत्वावच्छिन्न उद्भूतरूपस्य हेतुत्वं मीमांसकानुसारिभिरेव निरस्तम्, मूर्तप्रत्यक्षत्वस्य कार्या-ऽकार्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृत्तितया कार्यतानवच्छेदकत्वात्; मूर्तलौकिकप्रत्यक्षत्वापेक्षया च द्रव्यनिष्ठलौकिकविषयतया चाक्षुषत्वस्यैव लाघवेन कार्यतावच्छेदकत्वौचित्यात्। अस्तु वा शक्तिविशेषस्य शक्तिमद्विशेषवत्त्वेन विषयस्यैव वा चाक्षुषे स्पार्शने च हेतुत्वमिति न वाय्वादेरस्पार्शनत्वम्। न चैवं वायुगतसंख्या-परिमाणादेः प्रत्यक्षतापत्तिः, सजातीयसंवलनाभावे भूयोऽवयवावच्छेदेन त्वक्संनिकर्षे चेष्टत्वात्, पार्श्वद्वयलग्नफूत्कारद्वयसंख्यापरिमाणग्रहस्यानुभविकत्वादिति। एतेन स्वतन्त्रोक्तनीत्या 'विजातीयैकत्वाभावादस्पार्शनत्वं वायोः' इत्यपि निरस्तम्, स्पार्शनजनकतावच्छेदकवैजात्यव्यापकत्रसरेण्वेकत्वसाधारणवैजात्यस्य नित्यैकत्वसाधारणत्वे महत्त्वो-द्भूतरूपयोः पृथक्कारणताद्वयकल्पनस्यावश्यकत्वात्, निखिलतद्व्यावृत्तत्वे च कार्यमात्रवृत्तितया जातितया तदवच्छिन्नं प्रति कस्यचित् कारणस्यावश्यकतया द्रव्यचाक्षुषं प्रत्येकत्वकारणतामादाय कारणताद्वयकल्पनस्यावश्यकत्वात्, वैजात्यकल्पनस्य पुनरधिकत्वात्, उक्तविजातीयैकत्वस्यैव संयुक्तसमवायप्रत्यासत्तिमध्ये निवेशेन वायोरस्पार्शनत्वे तद्वृत्तिस्पर्शाद्यस्पार्शनप्रसङ्गात्, अन्यथा प्रभादौ चाक्षुषजनकतावच्छेदिकया सांकर्यादिति दिग्।

एवं च 'उद्भूतरूपाभावाद् मूर्तत्वे शब्दस्य प्रत्यक्षत्वं न स्यात्' इति व्याहतं वचनम्, योग्यतायाः शक्तिविशेषस्य वा तत्राप्यव्याहतत्वात्। प्रत्यासत्तिश्च शब्दे श्रोत्रस्य संयोग एव, मनो-नयनवर्जानामिन्द्रियाणां व्यञ्जनावग्रहप्रतिपादनात्, "पुट्ठं[1] सुणेइ सद्दं" इत्यागमात्, द्रव्यान्तरस्याग्रहणं च श्रोत्रेणायोग्यत्वादिति किमनुपपन्नम्? । तदेवं द्रव्यापेक्षया सर्वं वचोऽपौरुषेयम्, पर्यायापेक्षया तु पौरुषेयमेवेति व्यवस्थितम् ॥ ३६ ॥

१ स्पृष्टं शृणोति शब्दम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभ्युपगम्य परमतम्, दोषान्तरमाह—

दृश्यमानेऽपि चाशङ्काऽदृश्यकर्तृसमुद्भवा। नातीन्द्रियार्थद्रष्टारमन्तरेण निवर्तते ॥३७॥

दृश्यमानेऽपि च– श्रूयमाणेऽपि च स्वतन्त्रवक्तृव्यापारवैकल्ये वेदशब्दे, आशङ्काऽअदृश्यकर्तृसमुद्भवा– दृश्यकर्त्रश्रवणे 'पिशाचकर्तृकोऽयं भविष्यति' इति पिशाचकर्तृत्वोत्कटकोटिविषया, न निवर्तते 'प्रेक्षापूर्वकारिणः' इति शेषः। किं सर्वथा न निवर्तत एव? नेत्याह– अतीन्द्रियार्थद्रष्टारमन्तरेण। यदि त्वसौ स्वीक्रियेत तदा तद्वचस्तो निवर्ततापि, प्रत्यक्षादिभ्यः सर्वज्ञवचनस्य बलवत्त्वादिति भावः ॥ ३७ ॥

परः शङ्कते—

पापादत्रेदृशी बुद्धिर्न पुण्यादिति न प्रमा। न लोको हि विगानत्वात्तद्बहुत्वाद्यनिश्चितेः॥३८॥

पापात्– दुरदृष्टात्, अत्र– वेदे, ईदृशी बुद्धिः– उक्ता शङ्कारूपा; ततः क एतां निवर्तयेद् विनाऽऽस्तिक्यपरिपाकनिमित्तमदृष्टम्? इति भावः। उत्तरयति– न पुण्यात्– न पुण्यादीदृशी बुद्धिरिति, न प्रमा– नात्र प्रमाणं किञ्चिदिति भावः। लोक एवात्र प्रमाणमित्याशङ्क्याह– न लोको हि– न लोक एवात्र प्रमाणम्। कुतः? इत्याह– विगानत्वात्– विरुद्धं गानमभ्युपगमो यस्येति बहुव्रीहिस्तस्य भावस्तत्त्वं ततः। तथा च केषांचिद् विप्रतिपत्तेर्नात्र सकललोकैकवाक्यतेति भावः। यद्यप्येवम्, तथापि बहवोऽस्मत्पक्ष एव, इति बहूनामभ्युपगमः प्रमाणमित्याशङ्क्याह– तद्बहुत्वाद्यनिश्चितेः– तेषामुक्ताभ्युपगमवतां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुत्वस्य, आदिना तदन्येषामल्पत्वस्य वा, अनिश्चितेः सर्वादर्शनेनानिश्चयात् ॥ ३८ ॥

कथञ्चिद् निश्चयेऽप्याह—

बहूनामपि संमोहभावाद् मिथ्याप्रवर्तनात्। मानसंख्याविरोधाच्च कथमित्थमिदं ननु?॥३९॥

बहूनामपि– तथाऽभ्युपगन्तॄणाम्, संमोहभावात्– मूलाज्ञानदोषात्, मिथ्याप्रवर्तनात्– विगीतप्रवृत्त्युपपत्तेः, पारसीकादीनामिव मातृविवाहादौ। तथा च 'शतमप्यन्धानां न पश्यति' इति न्यायाद् बहूनामप्यभ्युपगमोऽत्राप्रमाणमिति भावः। अभ्युपगम्यापि दोषमाह– मानसंख्याविरोधाच्च– लोकस्य मानत्वे सप्तममानापत्त्या 'षडेव प्रमाणानि' इति विभागव्याघाताच्च; 'ननु' इत्याक्षेपे, इदं– 'पापादत्रेदृशी बुद्धिः' इत्युक्तम्, इत्थं कथम्– युक्तं कुतः? ॥ ३९ ॥

"नातीन्द्रियार्थद्रष्टारमन्तरेण' इत्युक्तं विवेचयति—

अतीन्द्रियार्थद्रष्टा तु पुमान्कश्चिद्यदीष्यते। संभवद्विषयापि स्यादेवंभूतार्थकल्पना ॥४०॥

अतीन्द्रियार्थद्रष्टा तु पुमान्– सर्वदर्शी तु पुरुषः, यदि कश्चिदिष्यते– स्वीक्रियते, ऋषभोऽन्यो वा। ततः किम्? इत्याह– संभवद्विषयापि स्यात्– संभवदुक्तिकापि स्यात्, तदुपदेशमूलज्ञानसामर्थ्यात्; एवंभूतार्थकल्पना– 'पापादत्रेदृशी

१ प्रस्तुतस्तबके का० ३८। २ प्रकृतस्तबके का० ३७।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुद्धिः' इति संभावना ॥ ४० ॥

नन्वपौरुषेयत्वसिद्धेर्विशेषदर्शनादेवोक्ताशङ्का निवर्तते, इत्यतस्तत्साधनमपि विना सर्वज्ञं न, इत्याह—

अपौरुषेयताप्यस्य नान्यतो ह्यवगम्यते । कर्तुरस्मरणादीनां व्यभिचारादिदोषतः॥४१॥

अपौरुषेयतापि, अस्य– वेदस्य, नान्यतः– न सर्वज्ञादन्यस्मात् प्रमाणात्, हि– निश्चितम्, अवगम्यते, अतीतस्य वक्तुरनुपलब्धिमात्रादभावासिद्धेः । ननु चात्र हेतवः सन्तीत्येतदाशङ्क्याह– कर्तुरस्मरणादीनां– वक्ष्यमाणानां हेतूनाम्, व्यभिचारादिदोषतः– अनैकान्तिका-ऽसिद्धत्वादिदोषदुष्टत्वात् ॥ ४१ ॥

'तथाहि– वेदोऽपौरुषेयः, 'कर्तुरस्मरणात्' इति व्यधिकरणो हेतुः । अस्मर्यमाणकर्तृकत्वं च भारतादौ व्यभिचारि, परकीयकर्तृस्मरणं च वेदेऽपि तुल्यम् । न तुल्यम्, वेदे विगानेन कर्तृस्मरणादिति चेत् । किमिदं विगानम्?— कर्तृविशेषविप्रतिपत्तिर्वा, स्मर्यमाणकर्तृविशेषे प्रकृतकार्यान्यसजातीयकार्यकर्तृत्वसंभावना वा? । नाद्यः, कर्तृविशेषविप्रतिपत्त्या तद्विशेषस्मरणस्यासत्यत्वेऽपि कर्तृमात्रस्मरणस्यासत्यत्वायोगात्; अन्यथा कादम्बर्यादावपि कर्तृविशेषविप्रतिपत्त्याऽस्मर्यमाणकर्तृकत्वेनानैकान्तिकत्वप्रसङ्गात् । अत एव न द्वितीयोऽपि, कर्तृविशेषे प्रकृतजातीयकार्यान्तरकर्तृत्वसंभावनायामपि प्रकृते कर्तृमात्रस्मरणाबाधात्; अन्यथा च वक्ष्यमाणस्थले व्यभिचारात्' इत्याशयवानाह—

नाभ्यास एवमादीनामपि कर्ताऽविगानतः । स्मर्यते च विगानेन हन्तेहाप्यष्टकादिकः॥४२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभ्यास एवमादीनामपि—

"अभ्यासः कर्मणां सत्यमुत्पादयति कौशलम् । धात्रापि तावदभ्यस्तं यावत्सृष्टा मृगेक्षणा ॥ १ ॥"

अन्ये तु पश्चार्धमन्यथा पठन्ति— "मिथ्या तत्तादृशी येन न धात्रा निर्मिता परा" इत्यादीनामपि, कर्ताऽविगानतः— एकवाक्यतया न स्मर्यते; स्मर्यते च विगानेन— अनेकवाक्यतया, हन्त ! इहापि— वेदेऽपि, अष्टकादिकः— अष्टका नामक-ब्रह्मादिरिति । अथ "अभ्यासः" एवमादौ कर्तृमात्रे न विगानमस्ति, वेदे तु कर्तृमात्रेऽपि तदस्ति; तथाहि— वेदे सौगताः कर्तृमात्रं स्मरन्ति न मीमांसकाः, इति तत्र कर्तृस्मरणमसत्यमिति चेत् । नन्वेवमस्मर्यमाणकर्तृकत्वहेतुरेवासिद्धः । अथ च्छिन्न-मूलवेदे कर्तृस्मरणम्, अनुभवो हि स्मरणस्य मूलम्, न चासौ तत्र तद्विषयत्वेन विद्यत इति न दोष इति चेत् । न, स्वप्रत्य-क्षेण कर्त्रनुभवस्यागमान्तरेऽप्यभावात्, सर्वप्रत्यक्षाभावस्य चार्वाग्दृशा निश्चेतुमशक्यत्वात्, "हिरण्यगर्भः समवर्तताग्रे" इत्या-द्यागमेन, रचनाविशेषकार्यानुमानेन च तत्र कर्त्रनुभवस्यानपायाच्च; अन्यथा कारणाभावे कार्यानुत्पत्तेश्छिन्नमूलकर्तृस्मरणस्या-संभवदुक्तिकत्वादिति न किञ्चिदेतत् ।

अथ स्मरणयोग्यत्वेऽपि सत्यस्मर्यमाणकर्तृकत्वं हेतुः; अस्ति चात्रापि कर्ता स्मरणयोग्यः, यद्यसौ स्यात्, तदा-ऽग्निहोत्रादिप्रवृत्तिसमये स्मर्येत, स्वयमदृष्टफलेषु कर्मसु पित्राद्युपदेशमूलायां प्रवृत्तौ 'पित्रादिभिरेतदुपदिष्टम्' इति पित्रा-दिस्मरणावश्यंभावदर्शनात्; न चाभियुक्तानामपि वेदार्थानुष्ठातॄणां त्रैवर्णिकानां कर्तुः स्मरणमस्तीति चेत् । न, आगमान्तरे व्यभिचारात् । न हि तत्रापि तत्कर्ता न स्मरणयोग्यः, न वा स्मर्यत इति । न चायं नियमः— 'अनुष्ठातारोऽभिप्रेतार्थानुष्ठान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समये तत्कर्तारमनुस्मृत्यैव प्रवर्तन्ते' इति। न हि पाणिन्यादिप्रणीतव्याकरणप्रतिपादितशब्दव्यवहारानुष्ठानसमये तदनुष्ठातारोऽवश्यं व्याकरणप्रणेतारं पाणिन्यादिकमनुस्मृत्यैव प्रवर्तन्त इति दृष्टम्, निश्चिततत्समयानां कर्तृस्मरणव्यतिरेकेणाप्यविलम्बितं भवत्यादिसाधुशब्दप्रयोगव्यवहारदर्शनात्। अनाप्तोक्तत्वशङ्का च ग्राह्यसंशयपर्यवसायिनी न प्रतिबन्धिका। प्रतिबन्धिका चेत्। तदाप्तोक्तत्वज्ञानमात्रं मृग्यम्, न तु तद्विशेषोक्तत्वज्ञानमपीति न किञ्चिदेतत् ॥ ४२ ॥

'आद्याभिमतं हिरण्यगर्भवेदाध्ययनं गुरुमुखाधीतवेदाध्ययनपूर्वकम्, वेदाध्ययनत्वात्, इदानींतनवेदाध्ययनवत्' इत्येतदप्यसाधनमित्यभिधातुमाह—

स्वकृताध्ययनस्यापि तद्भावो न विरुध्यते। गौरवापादनार्थं च तथा स्यादनिवेदनम् ॥४३॥

स्वकृताध्ययनस्यापि— स्वरचितपाठस्यापि, तद्भावः— आद्याध्ययनभावः, न विरुध्यते, कालिदासादिकृतकुमारसंभवादौ तथा दर्शनात्; तथा चायं व्यभिचारी हेतुरिति भावः। कृतापलापे कारणमाह— गौरवापादनार्थं च— प्रस्तुतग्रन्थस्यार्वाग्दृगनिर्मितत्वसंभावनादिनाऽत्यादरार्थं च, तथा स्यादनिवेदनं— यदुत 'मत्कृतोऽयम्' इति ॥ ४३ ॥

'वैदिकमन्त्रशब्दा अपौरुषेयाः, समर्थत्वात्, व्यतिरेके शब्दान्तरं दृष्टान्तः' इत्यप्यसाधनमित्यभिधातुमाह—

मन्त्रादीनां च सामर्थ्यं शावराणामपि स्फुटम्। प्रतीतं सर्वलोकेऽपि न चाप्यव्यभिचारि तत्।

मन्त्रादीनां च सामर्थ्यं विषापहरणादौ, शावराणामपि पौरुषेयाणामपि, स्फुटं— सर्वसाक्षिकम्, सर्वलोकेऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतीतम्, तथा च व्यभिचार इति भावः। असिद्धतामप्याह– न चापि तत्– भवदभिमतं वेदमन्त्रसामर्थ्यम्– अव्यभिचारि, सुप्रयुक्तमन्त्रेऽपि विवाहादिकर्मणि वैधव्यादिदर्शनात्। तदेवमपौरुषेयत्वमपि नान्यतः सिद्ध्यतीति व्यवस्थितम् ॥ ४५ ॥

अन्यदप्याह—

वेदेऽपि पठ्यते ह्येष महात्मा तत्र तत्र यत्। स च मानमतोऽप्यस्यासत्त्वं वक्तुं न युज्यते ।४५।

वेदेऽपि पठ्यते ह्येषः– सर्वज्ञः, महात्मा– शुद्धसत्त्वः, तत्र तत्र– "स सर्वविद् यस्यैष महिमा" इत्यादौ, यद्– यस्मात्, स च– वेदः, मानं– प्रमाणं भवताम्, अतोऽपि हेतोः, अस्य– सर्वज्ञस्य, असत्त्वं वक्तुं न युज्यते ॥ ४५ ॥

न चेहार्थवादादिकल्पनया परिहार इत्याह—

न चाप्यतीन्द्रियार्थत्वाज्ज्यायो विषयकल्पनम्। असाक्षाद्दर्शिनस्तत्र रूपेऽन्धस्येव सर्वथा ॥

न चाप्यतीन्द्रियार्थत्वात्– साक्षात् तदर्थादर्शनात्, ज्यायः– शोभनम्, विषयकल्पनम्– अर्थवादादिकल्पनम्, असाक्षाद्दर्शिनः– छद्मस्थस्य, तत्र– वेदे। निदर्शनमाह– सर्वथाऽन्धस्य– जात्यन्धस्य, रूप इव– नीलादौ विषय इव; यथा हि जात्यन्धस्य न सम्यग् नीलादिग्रहणश्लाघा युज्यते, तथा च्छद्मस्थस्यापि सर्वविच्चश्लाघेति। न च सिद्धार्थस्य स्वार्थेऽप्रामाण्यमपि वक्तुं युक्तम्, प्रथमं गृहीताया अपि शब्दत्वावच्छेदेन कार्यत्वविशिष्टशक्तेरुत्तरकाले बाधकदर्शनेन त्यागात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमं गृहीताया इव चन्द्र-तारादिस्वल्पताया उत्तरप्रवृत्तागमादिमूलतन्महत्त्वज्ञानेऽनुभावकत्व आकाङ्क्षादिवत्साध्यतोपरागस्याप्रामाणिकगौरवेणाप्रयोजकत्वाच्च; अन्यथा 'परिणतिसुरसमाम्रफलम्' इत्यादिवाक्यश्रवणानन्तरं सुरसाम्रफलानुभवाभावेन प्रवृत्त्यनुपपत्तिप्रसङ्गात् । न च तत्र क्रियापदमध्याहृत्यैव प्रवृत्तिरिति वाच्यम्; अध्याहारे मानाभावात् । किञ्च, 'पुत्रो जातस्ते' इति श्रवणे हर्षप्रयुक्तमुखप्रसाददर्शनाद् हर्षस्य ज्ञानसाध्यत्वात् पुत्रजन्मज्ञान उपाचितस्य वाक्यस्यैव हेतुत्वौचित्यात्; अन्यथा 'गामानय' इत्यादावपि प्रमाणान्तरजन्यज्ञानेनान्यथासिद्धिप्रसङ्गात् कथं न सिद्धार्थस्यानुभावकत्वम्? । यदि चाप्रवृत्तिपराद् वाक्यादननुभव एव, तदा तत्र मूकतैव स्यात्, व्यवहाराभावात् । असंसर्गग्रहादेव तत्र व्यवहारोपपादने चान्यत्रापि तत एव तदुपपत्तिः किं न स्यात्? । इति प्रवृत्तिवद् व्यवहारस्याप्यनुभवप्रमाणतया सिद्धं सिद्धार्थस्यानुभावकतया ॥ ४६ ॥

उपसंहरन्नाह—

सर्वज्ञेन ह्यभिव्यक्तात्सर्वार्थादागमात्परा । धर्माधर्मव्यवस्थेयं युज्यते नान्यतः क्वचित् ॥४७॥

सर्वज्ञेन हि– सर्वज्ञेनैव, अभिव्यक्तात्– प्रकाशितात्, सर्वार्थात्– सर्वविषयात्, आगमात्, परा– मुमुक्षु-सत्-साधुपरिग्रहादुत्कृष्टा, इयं– प्रत्यक्षलक्ष्यमाणा, धर्मा-ऽधर्मव्यवस्था युज्यते, नान्यतः– नान्यस्मादपौरुषेयत्वाभिमतादागमात्, क्वचित्–

---

१ क. 'गस्य प्रा' । २ क. 'वेण प्र' ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कदाचनेयं युज्यते ।

धर्मा-ऽधर्मव्यवस्थेयं कृतविश्वपरिग्रहा । यतः प्रवर्तते शश्वत् तं सर्वज्ञमुपास्महे ॥ १ ॥ ४७ ॥

वार्तान्तरमाह—

अत्रापि प्राज्ञ इत्यन्य इत्थमाह सुभाषितम्। इष्टोऽयमर्थः शक्येत ज्ञातुं सोऽतिशयो यदि ॥

अत्रापि– अनन्तरोदितवार्तायामपि, प्राज्ञः– पण्डितः, इति– अस्माद्धेतोः, अन्यः– सौगतः, इत्थं– वक्ष्यमाणनीत्या, आह 'सुभाषितम्' इत्युपहसति। इष्टोऽयमर्थः– 'सर्वज्ञेन ह्यभिव्यक्तात्' इत्यादिनोक्तः, शक्येत ज्ञातुम्, सः– अर्थः अयं 'सर्वज्ञः, अयं च तदभिव्यक्तार्थ आगमः, इत्येवं विभक्तस्वभावः यद्यतिशयो– गुणविशेषः स्यात् ॥ ४८ ॥

एतदेवाह—

अयमेवं न चेत्यन्यदोषो निर्दोषतापि वा । दुर्लभत्वात्प्रमाणानां दुर्बोधेत्यपरे विदुः॥४९॥

अयमेवं– सर्वज्ञः, न चायं– न सर्वज्ञश्च, इति– एवम्, अन्यदोषः– संतानान्तरवर्तिदोषः, निर्दोषतापि वा– संतानान्तरवर्तिदोषाभावोऽपि वा, प्रमाणानां परचेतसाम्, दुर्लभत्वात्– अप्रत्यक्षत्वात्, दुर्बोधा– दुर्ज्ञाना, इत्यपरे– सौगताः, विदुः– जानन्ति ॥ ४९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र समाधानवार्तान्तरमाह—

अत्रापि ब्रुवते वृद्धाः सिद्धमव्यभिचार्यपि। लोके गुणादिविज्ञानं सामान्येन महात्मनाम्॥५०॥

अत्रापि– सौगतोदितविचारेऽपि, ब्रुवते– समादधति, वृद्धाः– सिद्धान्तपारीणाः। किम्? इत्याह– सिद्धं– प्रतिष्ठितम्, अव्यभिचार्यपि– नियमवदपि, लोके– जगति, गुणादिविज्ञानं– गुण-दोषविज्ञानम्, सामान्येन– सामान्यतोदृष्टानुमानरूपप्रज्ञया, न तु साक्षात्कारेण, महात्मनां– प्राज्ञानाम् ॥ ५० ॥

अत्रैव हेतुं दर्शयति—

तन्नीतिप्रतिपत्त्यादेरन्यथा तन्न युक्तिमत्। विशेषज्ञानमप्येवं तद्वदभ्यासतो न किम्?॥५१॥

तन्नीतिप्रतिपत्त्यादेः– दिग्नागाचार्यन्यायानुसरणादेः 'यद् वृद्धन्यायानुसारि विज्ञानं तद् गुणपूर्वकम्' इति व्याप्तेः, अन्यथा तत्– नीतिप्रतिपत्त्यादि न युक्तिमत्, अप्रेक्षापूर्वकारिनीतित्वात्। सामान्यसिद्धौ विशेषज्ञानप्रकारमप्याह– विशेषज्ञानमपि– अधिकृते पुंसि विशिष्टगुणज्ञानमपि, एवम्– उक्तप्रज्ञादिशा, तद्वत्– सामान्यगुणज्ञानवत्, अभ्यासतो न किम्?– भवत्येव साध्यतल्लिङ्गाद्यनुमानपरम्परारूपादभ्यासात् प्रकृतपक्षकं विशिष्टगुणसाधकं व्यतिरेक्यनुमानमिति भावः, तत्र 'अयं परमप्रकृष्टगुणवान्, अशेषसंशयापनायकत्वात्, दृष्टेष्टाविरुद्धवचनत्वाद् वा, यो नैवं स नैवं यथा रथ्यापुरुषः' इति व्यतिरेकिणि साध्यप्रसिद्धये, 'रागादीनामत्यन्तक्षयः परमप्रकृष्टगुणपूर्वकः, तत्तारतम्यानुविधाय्यत्यन्तापकर्षत्वात्, यो यत्तारतम्यानुविधाय्यत्यन्तापकर्षः स पर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मप्रकृष्टतत्पूर्वकः, यथा शीतस्पर्शात्यन्तक्षयः परमप्रकृष्टोष्णस्पर्शपूर्वकः' इत्यन्वय्यनुमानमुपयुज्यते, तत्र च पक्षज्ञानार्थं 'रागादयः क्वचिदत्यन्तं क्षीयन्ते, क्षीयमाणत्वात्' इत्युपयुज्यते ॥ ५१ ॥

एतदेवाह--

दोषाणां ह्रासदृष्ट्येह तत्सर्वक्षयसंभवात्। तत्सिद्धौ ज्ञायते प्राज्ञैस्तस्यातिशय इत्यपि ॥५२॥

दोषाणां– रागादीनाम्, ह्रासदृष्ट्या– प्रतिपक्षभावनाबलेन देशतो नाशदर्शनेन; तेन जन्मादीनामपि ह्रासदर्शनात् कदाचिदत्यन्तह्राससंभवाद् महाप्रलयाभ्युपगमः परेषां निरस्यते, तत्प्रतिपक्षाभावेन तदत्यन्तह्रासायोगात्, धर्मह्रासेन तन्मूलशुभजन्मादिह्रासेऽपि षष्ठारकादावधर्ममूलजन्मादिपरिग्रहादिति द्रष्टव्यम्; इह– जगति, तत्सर्वक्षयसंभवात् तेषां रागादीनां प्रतिपक्षोत्कर्षेण सर्वक्षयोपपत्तेः; तत्सिद्धौ– क्वचिदातिशयसिद्धौ, ज्ञायते प्राज्ञैः, तस्य अधिकृतस्य, अतिशय इत्यपि ॥ ५२ ॥

कथम्? इत्याह—

हृद्गताशेषसंशीतिनिर्णयादिप्रभावतः। तदात्वे, वर्तमाने तु तद्व्यक्तार्थाविरोधतः ॥५३॥

हृद्गतानामशेषसंशीतीनां निर्णयो निराकरणम्, आदिना दृष्टेष्टाविरुद्धोक्तिसामर्थ्यग्रहः, तयोः प्रभावोऽतिशयव्याप्यत्वं ततः, तदात्वे– सर्वज्ञसद्भावकाले द्वयादप्यतः; वर्तमाने तु– सांप्रतं पुनः, तद्व्यक्तार्थाविरोधतः– तेनातिशयवता व्यक्त उपदिष्टो य आगमस्तदर्थपौर्वापर्याव्याघातेन केवलेनैवेति ॥ ५३ ॥ ॥३८७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवंभूतोऽपीदानीं न दृश्यते, अतो नास्त्येवेत्याशङ्कानिवृत्त्यर्थमाह—

न चास्यादर्शनेऽप्यद्य साम्राज्यस्येव नास्तिता। संभवो न्याययुक्तस्तु पूर्वमेव निदर्शितः ॥५४॥

न चास्य— अशेषसंशयनिर्णयकर्तुः, अदर्शनेऽप्यद्य— सांप्रतम्, साम्राज्यस्येव— चक्रवर्त्यादिराज्यस्येव, नास्तिता— अभाव एव, किन्त्वस्तित्वैव। न हीदानीं साम्राज्यमपि (न ?) दृश्यते, न च कदापि नास्तीति। स्यादेतत् संभवति तदिति न तदभावः, इत्यत्राह— संभवस्तु— 'अस्य' इति वर्तते, न्याययुक्तः— अनुकूलतर्कोपस्कृतः, पूर्वमेव निदर्शितः— 'दोषाणां ह्रासदृष्ट्या' इत्यादिनेति समानमेतदिति ॥ ५४ ॥

एवमनुमानातिशयज्ञानमुक्त्वा भूयोऽनुभवाहितपटुक्षयोपशमबलाद् व्याप्त्यादिप्रतिसंधाननिरपेक्षेण प्रकृष्टमतिज्ञानेनापि तदाह—

प्रातिभालोचनं तावदिदानीमप्यतीन्द्रिये। सुवैद्यसंयतादीनामविसंवादि दृश्यते ॥ ५५ ॥

प्रातिभालोचनम्— व्याध्यादिपरिणामविषयमनपेक्षितव्याप्त्यादिप्रतिसंधानं मानसज्ञानम्, तावच्छब्दः प्रसिद्ध्यर्थः, इदानीमपि— अस्मिन् कालेऽपि, अतीन्द्रिये— अनागतव्याध्यादिपरिणामे, सुवैद्य-संयतादीनां— निपुणभिषग्वर-परिणतयोग-मुनिप्रभृतीनाम्, अविसंवादि— अर्थक्रियाक्षमम्, दृश्यते ॥ ५५ ॥

प्रकृते योजनामाह—

१ प्रकृतस्तबके कारिका ५२।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं तत्रापि तद्भावे न विरोधोऽस्ति कश्चन। तद्व्यक्तार्थाविरोधादौ ज्ञानभावाच्च सांप्रतम्॥५६॥

एवं– सुवैद्यादीनां व्याध्यादिपरिणाम इव, तत्रापि– गुणवत्पुरुषेऽपि, तद्भावे– विशिष्टचेष्टोपलब्ध्या प्रातिभातिशयालोचनभावे, न विरोधोऽस्ति कश्चन– न बाधकमस्ति किञ्चित्, असाक्षाद्दर्शिनोऽपि संभवत्येतदित्यर्थः। तथा, तद्व्यक्तार्थाविरोधादौ– तदुपदिष्टागमार्थाव्याघातादौ विषये, आदिना संवादादिग्रहः, ज्ञानभावात्– ज्ञानोत्पादाच्च, सांप्रतम्– इदानीम्, चकारेण तत्कालोऽपि समुच्चीयते, 'न विरोधोऽस्ति कश्चन' इत्यनुषज्यते। ननु किमेतत् प्रातिभम् ?, चेष्टादिलिङ्गज्ञानाल्लिङ्गिज्ञानमेवैतत्। न, व्याप्त्यादिप्रतिसन्धानानपेक्षत्वात्। अस्तु तर्ह्यनुमितविषयं स्मरणं प्रत्यभिज्ञानं वा। न, विशदत्वात्, तद्वदनपेक्षत्वाच्चेति द्रष्टव्यम् ॥ ५६ ॥

ननु यदि नाम दृष्टे संवादः, तथाप्यदृष्टेऽर्थे तथाविधप्रातिभस्याप्रामाण्याशङ्का न निवर्तत एवेत्यप्रयोजकं तदित्याशङ्कापोहायाह—

सर्वत्र दृष्टे संवादाददृष्टे नोपजायते। ज्ञातुर्विसंवादाशङ्का तद्वैशिष्ट्योपलब्धितः॥५७॥

सर्वत्र दृष्टेऽर्थे संवादात्– अर्थक्रियाक्षमत्वदर्शनात्, अदृष्टे धर्मादौ, नोपजायते ज्ञातुः प्रमातुः, विसंवादाशङ्का– 'किमित्थमन्यथा वा' इति। कुतः ? इत्याह– तस्य व्यञ्जकस्य व्यक्तस्य वा माध्यस्थ्याद्युपायाभिधानादिना विषयतोऽविसंवादिजातीयत्वेन स्वरूपतश्च वैशिष्ट्योपलब्धितः– प्रामाण्यव्याप्यधर्मवत्त्वोपलम्भात् ॥ ५७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्त्वेवमविसंवादकत्वाभिमानात् प्रातिभं प्रवृत्त्याद्युपयोगि, वस्तुस्थित्या तु तद् विसंवाद्येवेत्याशङ्कयाह—

वस्तुस्थित्यापि तत्तादृग् न विसंवादकं भवेत्। यथोत्तरं तथा दृष्टेरिति चैतन्न सांप्रतम्॥५८॥

वस्तुस्थित्यापि– परमार्थेनापि, तादृग्– मार्गानुसारि, तत्– प्रातिभम्, न विसंवादकम्– अर्थक्रियाऽक्षमम्, भवेत्। कुतः? इत्याह– यथोत्तरं– क्रियाप्रवृत्त्यनन्तरम्, (तथा–) सुवैद्यप्रातिभवदर्थक्रियोपधानेनाविसंवादकतया, दृष्टेः। इति च– एवं च सति, एतद्– वक्ष्यमाणम्, न सांप्रतम्– न भजमानम् ॥ ५८ ॥

किं तत्? इत्याह—

सिद्ध्येत्प्रमाणं यद्येवमप्रमाणमथेह किम्। न ह्येकं नास्ति सत्यार्थं पुरुषे बहुभाषिणि।५९।

सिद्ध्येत् प्रमाणमागमाख्यम्, यदि, एवम्– एकवाक्यार्थसंवादित्वेन; अथेहाप्रमाणं किम्। न ह्येवं सति किञ्चिदप्रमाणं नाम पौरुषेयं वचनं युज्यते। कुतः? इत्याह– न ह्येकं किमपि नास्ति सत्यार्थं वचनम्, किन्तु किञ्चिद् भवत्यपि, पुरुषे बहुभाषिणि– भूयो जल्पनशीले। तथा च सर्वेषां वचनं प्रमाणमापन्नमिति महाननर्थः ॥ ५९ ॥

यथैतदसांप्रतं तथाभिधातुमाह—

यत एकं न सत्यार्थं किन्तु सर्वं यथाश्रुतम्। यत्रागमे प्रमाणं स इष्यते पण्डितैर्जनैः ॥६०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतः– यस्मात्, एकं– किञ्चिदेव वचनम्, न सत्यार्थं घुणाक्षरन्यायेन, किन्तु सर्वमेव– यथाश्रुतं– यथानुयोजितं वचनम्, यत्रागमे सत्यार्थम्, सः– आगमः, पण्डितैर्जनैः– परीक्षकैर्लोकैः, इष्यते– आमुष्मिकफलसिद्ध्यर्थमाद्रियते । तथा च भूयः संवाददर्शनाद् न घुणाक्षरीयत्वाशङ्का, विषयशुद्धिज्ञानाच्च न क्वचिद् विसंवादाशङ्केति भावः ॥ ६० ॥

विषयशुद्धिमेव व्यनक्ति—

आत्मा नामी पृथक्कर्म तत्संयोगाद्भवोऽन्यथा । मुक्तिर्हिंसादयो मुख्यास्तन्निवृत्तिःससाधना ॥

आत्मा, नामी– नारकादिरूपेण परिणामवान्, तथा, पृथक्– पौद्गलिकत्वेनात्मनो भिन्नम्, कर्म, तत्संयोगात्– कर्मसंबन्धात्, भवः– संसारः; अन्यथा– वस्तुसत्कर्मवियोगात्, मुक्तिः; हिंसादयः कर्मसंयोगहेतवः, मुख्याः– निरुपचरिताः; तथा, तन्निवृत्तिः– हिंसादिनिवृत्तिः, ससाधना– सह साधनैरुपदेश-क्षयोपशमादिभिर्निमित्तैर्वर्तमाना मुख्या ॥ ६१ ॥

तथा—

अतीन्द्रियार्थसंवादो विशुद्धो भावनाविधिः । यत्रेदं युज्यते सर्वं योगिव्यक्तः स आगमः ॥६२॥

अतीन्द्रियार्थानां चन्द्रोपरागनिमित्तादीनां संवादः; तथा, विशुद्धः– संभवस्वरूपफलशुद्ध्या निर्मलः, भावनाविधिः– अनित्यत्वादिभावनामार्गः । यत्रेदम्– अनन्तरोदितम्, सर्वं युज्यते– विचार्यमाणमुपपद्यते, योगिव्यक्तः– सर्वज्ञप्रकाशितः, सः– आगमः, नान्यः, परीक्षाक्षमवचनस्यैव सम्यगागमलक्षणत्वात् ॥ ६२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ज्ञः, अज्ञो वाऽस्याधिकारी स्यात्? उभयथापि सिद्ध्य-ऽसिद्धिभ्यां वैयर्थ्यम्' इति कुवादिकुतर्कनिराकरणार्थमाह—

अधिकार्यपि चास्येह स्वयमज्ञो हि यः पुमान् । कथितज्ञः पुनर्धीमांस्तद्वैयर्थ्यमतोऽन्यथा ६३

अधिकार्यपि च, अस्य– आगमस्य, इह– जगति, 'सः' इति गम्यते, यो हि पुमान् स्वयम्– आगमश्रवणनैरपेक्ष्येण, अज्ञः– विषयापरिज्ञाता; कथितज्ञः पुनः, न तु कथितमपि यो न जानात्येव, अत एवाह– धीमान्– बुद्ध्यावरणक्षयोपशमवान् । अतोऽन्यथा– उक्तविपर्यये सर्वथा ज्ञत्वेऽज्ञत्वे वा, तद्वैयर्थ्यम्– आगमवैयर्थ्यम्, तत्कथाप्रीत्यादिलिङ्गेनावेत्यैवाधिकारितां पुनरध्यापनादौ न तद्वैयर्थ्यम् । अनधिकारिप्रयोगे हि लोकसंज्ञाप्रवेशात् प्रयोक्तैव प्रयोज्याविधिसमासेवनजनितं महदकल्याणमासादयेत् । इति लिङ्गैरधिकारितामवेत्याध्यापने नागमा-ऽऽगमज्ञादिवैयर्थ्यमिति निपुणं विभावनीयम् ॥ ६३ ॥

अन्यचित्त-चैतसिकाद्यगतेरसर्वार्थविषयोऽयं स्यादित्याशङ्कापोहायाह—

परचित्तादिधर्माणां गत्युपायाभिधानतः । सर्वार्थविषयोऽप्येष इति तद्भावसंस्थितिः ॥६४॥

परचित्तादिधर्माणाम्– परचित्तालोचन-समुद्रोदकपलादिमानरूपाणाम्, गत्युपायाभिधानतः– परिच्छेदोपायतपोभावनाद्यभिधानात्, सर्वार्थविषयोऽप्येषः– प्रक्रान्त आगमः फलतः स्वरूपतोऽपि सर्वाभिलाप्यभावविषयः, इति– एवम्, तद्भावसंस्थितिः– सर्वज्ञव्यक्तस्यागमस्य धर्मा-ऽधर्मव्यवस्थापकत्वसिद्धिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्तर्कैर्निशितैः शरैरिव वरैर्मीमांसके दुर्जये लुण्टाके सुपथस्य मुष्णति धनं सर्वज्ञमस्तौजसि ।
तस्यैवावगमं च लुम्पति परे बाढं हते सौगते साम्राज्यं जिनशासनस्य जयति न्यायश्रिया सुन्दरम् ॥ १ ॥

विश्वस्यापि दृशोर्मुदं वितनुते यः प्रातिहार्यश्रिया धर्मास्था यदुपज्ञमज्ञमनसामप्याप्यवद्यापहा ।
दुर्न्यायोत्थकुवासनां नयशतैर्लुम्पन्ति यस्यागमाः सर्वज्ञो गतिरामहोदयपदं सोऽयं कृतार्थोऽस्तु नः ॥ २ ॥ ६४ ॥

ननु युक्तमुक्तम्– 'सर्वज्ञेनाभिव्यक्तादागमाद् धर्मा-ऽधर्मव्यवस्था' इति । कवलाहारित्वे त्वस्मदादिवत् सार्वज्ञ्यमेव नोपपद्यते, इति कथं सिताम्बराणां सर्वज्ञमूला व्यवस्था ?। न च छद्मस्थे भुजिक्रियादर्शनात् केवलिनि तद्विजातीये तत्कल्पना युक्ता; अन्यथा चतुर्ज्ञानित्वा-ऽकेवलित्वसंसारित्वादयोऽपि तत्र स्युः। न च देहित्वमात्रं तस्य भुक्तिसंपादकम्, मैथुनसंपादककर्मसत्त्वेऽपि सुषुप्त्यादौ वृषस्याभावेन मैथुनविरहवत् कैवल्ये हतमोहतया बुभुक्षाऽभावेन भुक्त्यनुपपत्तेः । एवं च तथाभूतशक्त्या-ऽऽयुष्ककर्मणोः सत्त्वेऽपि न क्षतिः। न च मोहाभावात् शरीरानुरागनिमित्तबुभुक्षाऽभावेऽपि शरीरं स्थापयितुमिच्छुरश्नातीति वाच्यम्; अनन्तवीर्यस्य भगवतः शरीरस्थितिमिच्छोः प्रकृताहारमन्तरेणापि तत्स्थापनसामर्थ्याविरोधात् । न च शरीरतिष्ठापयिषापि बुभुक्षादिवदिच्छारूपत्वाद् भगवतोऽस्ति। न वा तीर्थप्रवर्तनवदिच्छाऽभावेऽपि स्वभावादेव भगवतो भुक्तिरिति कल्पयितुं युक्तम्; प्रकृताहारवैकल्य एव नियतकालभाविशरीरस्थितिस्वभावकल्पनायां दोषाभावात्, भावनाविशेषोत्पन्नसकलक्लेशोपरतव्यापारव्यवहारलक्षणतीर्थप्रवर्तनस्वभाववत् क्लेशोपशमनार्थं प्रकृताहारस्वभावकल्पनाया अन्याय्यत्वात् । न ॥३९०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हि भगवति क्लेशो नाम, अनन्तसुखविरोधात्; 'पयोभृते घटे निम्बरसलव इव बहुपुण्यप्राग्भारभृते भगवत्यसातवेदनीयादिप्रकृतयो नासुखदाः' इत्युपदेशात्, दग्धरज्जुस्थानीयत्वाच्च तासाम्। न चातीन्द्रियस्य भगवतो देहगतं क्षुदादिदुःखं तदुपशमसुखं वा संभवति, आहारसंज्ञा-रुचिरूपयोर्मानस-रासनज्ञानयोस्तत्र हेतुत्वात्, विषयसंपर्कमात्रस्य तज्ज्ञानमात्रस्य चाव्यभिचारित्वात्, तदिदमुक्तम्—

"[1]सोक्खं वा पुण दुक्खं केवलनाणिस्स णत्थि देहगदं। जम्हा अदिंदियत्तं जादं तम्हा हु न तं णेयं ॥१॥"

औदारिकव्यपदेशस्तु भगवच्छरीरस्योदारत्वात्, न तु भुक्तेः। यत्त्वेकेन्द्रियादीनामयोगिपर्यन्तानामाहारिणां सूत्र उपदेशात् केवलिनां कवलाहारित्वं केचित् प्रतिपन्नाः, तत्सूत्रार्थापरिज्ञानविजृम्भितम्; तत्र ह्येकेन्द्रियादिभिः सह भगवतो निर्देशात्, निरन्तराहारोपदेशाच्च शरीरप्रायोग्यपुद्गलग्रहणस्याहारत्वेन विवक्षितत्वात्, अन्यथा समुद्घातावस्थायां क्षणत्रय-मात्रमपहाय तेनाहारेण भगवतो निरन्तराहारत्वप्रसङ्गात्। तत्र यथासंभवमाहारव्यवस्थितेः सह निर्देशेऽपि कवलाहार एव केवलिनो व्यवस्थापयितुं युक्तः, अन्यथा तच्छरीरस्थितेरभावप्रसङ्गादिति युक्तम्, अस्मदादौ प्रकृताहारमन्तरेणौदारिकशरीर-स्थितेः प्रभूतकालमभावदर्शनात् केवलिन्यपि तथाकल्पने तत्र सर्वज्ञताया अप्यनवसायप्रसङ्गात्, दृष्टव्यतिक्रमकल्पनाऽयोगात्। श्रूयते च प्रकृताहारमन्तरेणाप्यौदारिकशरीरस्थितिश्चिरतरकाला प्रथमतीर्थकृत्प्रभृतीनाम्। न च तदियत्तानियमप्रतिपादकं प्रमाणमस्ति, इति निर्निमित्तं सूत्रभेदकरणम्। यथान्यासं सूत्रार्थाश्रयण एव हि निरन्तराहारवचनमप्यनुल्लङ्घितं भवेत्। न

१ सौख्यं वा पुनर्दुःखं केवलज्ञानस्य नास्ति देहगतम्। यस्मादतीन्द्रियत्वं जातं तस्मात् खलु न तज्ज्ञेयम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चातिशयदर्शनाद् निरवशेषदोषावरणहानेरत्यन्तशुद्धात्मस्वभावप्रतिपत्तिवत् प्रकृताहारविकलौदारिकशरीरस्थितिरप्यात्यन्तिकी संभवन्मुक्तेर्भगवतः सिध्येत्, इति "असरीरा जीवघणा" इत्याद्यागमाविरोधः प्रसज्येतेति शङ्कनीयम्, संयोगस्यात्यन्तिकस्थितेरसंभवात्, असंख्येयकालादूर्ध्वं सर्वस्याः पुद्गलपरिणतेरन्यथाभवनात्, औदारिकस्य निराहारस्यापि चिरतरकालस्थायिन उत्तरकालमशेषकर्मक्षयाद् विनिवृत्त्युपपत्तेरिति चेत् ।

अत्र ब्रूमः– घातिकर्मक्षयापेक्षयाऽस्मदादिविजातीयत्वेन भगवति चतुर्ज्ञानित्वाद्यनुपपत्तावपि भुक्तिनिमित्तकर्मक्षयापेक्षया विजातीयत्वासिद्धेर्न तत्र भुक्त्यनुपपत्तिः । न च भुक्तिसंपादकं कर्मेच्छां विना तदनिष्पादकम्, अनिच्छतामपि कर्मविपाककृतफलोपनिपातदर्शनात् । न च भुक्तिप्रवृत्ते रागनिमित्तकत्वाद् वीतरागे तदभावः, शरीरतिष्ठापयिषयोपवेशनादिप्रवृत्तेरिव भुक्तिप्रवृत्तेरपि तत्रातथात्वात् । अनन्तवीर्यत्वं च तत्र विघ्नपरिपन्थि, न परमाहारमन्तरेणैव शरीरस्थितिसंपादकम्, अन्यथा च्छद्मस्थावस्थायां भगवत्यपरिमितबलश्रवणात् कर्मक्षयार्थमनशनादितपस्युद्यमवतोऽस्य प्राणवृत्तिप्रत्ययं तस्यामवस्थायामशनाद्यभ्यवहरणमसङ्गतं स्यात् । न च तदा क्षायोपशमिकं तस्य वीर्यम्, कैवल्यवस्थायां तु क्षायिकं तत्, इति विशिष्टाहारमन्तरेणापि शरीरस्थितिनिबन्धनमिति वाच्यम्ः तत्सद्भावेऽपि शरीरस्थितिनिमित्तशयनो-पवेशनादिवत् प्रकृताहारस्याप्यविरोधात् । न चोपवेशनादिकमपि शरीरस्थित्यर्थं तत्रासिद्धम्, समुद्घातावस्थानन्तरकालं पीठफलकादिप्रत्यर्पणश्रुतेः, तद्ग्रहणमन्तरेण तत्प्रत्यर्पणस्यासंभवात्, तद्ग्रहणस्य च यथोक्तप्रयोजनमन्तरेणाभावात् । यस्त्वागमबाह्य उपवेशनादिकमपि केवलिनो घनगर्जन-वर्षणादिवद् नियतिकृतकाल-देशनियममेव स्वीकुरुते न तु प्रायोगिकम्, प्रवृत्ताविच्छाया ॥३९१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हेतुत्वात्; तथा च प्रवचनसारकृत्—

"[1]ठाण-णिसेज्ज-विहारा धम्मुवदेसो अ णियदिणा तेसिं। अरहंताणं काले मायाचारो व्व इत्थीणं ॥ १ ॥"

पुण्यविपाकस्तु तेषां सन्नपि बाह्यप्रवृत्तिं प्रत्यकिञ्चित्करः, औदयिक्या अपि तत्प्रयुक्तक्रियायाः कार्या-ऽकार्यभूतयोर्बन्ध-मोक्षयोरकारण-कारणत्वाभ्यां क्षायिकरूपतया स्वीकारात्; तदाह—

"[2]पुण्णफला अरहंता तेसिं किरिया पुणो हि ओदइगी। मोहादीहिं विरहिदा तम्हा सा खाइगि त्ति मदा ॥१॥" इति।

सोऽविमृश्यवादी, भगवतोऽपि नामकर्मोदयेन योगप्रवृत्त्यविरोधात्, क्षायिकत्वेनोपचरितस्याप्यौदयिकभावस्य स्वकार्याप्रतिरोधात्; केवलज्ञानादेस्तत्कार्यप्रतिबन्धकत्वे मोहादेस्तत्सहकारित्वे वा मानाभावात्; अन्यथा जिननाम्ना-ऽऽयुष्क-कर्मादिविपाकनिमित्तक्रियाया अपि तत्रानुपपत्तेः। न च परपरिणमनलक्षणक्रियायामज्ञानस्य हेतुत्वाज्ज्ञानिनो भगवतस्तदनुपपत्तिः; तदुक्तम्—

"[3]गेण्हदि णेव ण मुंचदि ण परं परिणमदि केवली भगवं। पच्छादि समंतदो सो जाणदि सव्वं णिरवसेसं ॥१॥"

इति वाच्यम्; सत्यपि ज्ञान आत्मप्रदेशैः कर्मादानवद् योगप्रदेशैर्बहिरर्थादानस्याप्युपपत्तेः। यदि च प्रयत्नसामान्यं

---

१ स्थान-निषद्या-विहारा धर्मोपदेशश्च नियत्या तेषाम्। अर्हतां काले मायाचार इव स्त्रीणाम् ॥ १ ॥

२ पुण्यफला अर्हन्तस्तेषां क्रिया पुनरौदयिकी। मोहादिभिर्विरहिता तस्मात् सा क्षायिकीति मता ॥ १ ॥

३ गृह्णाति नैव न मुञ्चति न परं परिणमते केवली भगवान्। प्रेक्षते समन्ततः सो जानाति सर्वं निरवशेषम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतीच्छाया हेतुत्वावधारणाद् न केवलिनः प्रवृत्तिरिष्यते, तदा चेष्टात्वावच्छिन्नेऽपि विलक्षणप्रयत्नेन हेतुत्वात् तदभावे न केवलिनश्चेष्टाऽपि, इति जीवन्मुक्ति-परममुक्त्योरविशेषापातः। यदि च विलक्षणचेष्टात्वावच्छिन्न एव विलक्षणप्रयत्नस्य हेतुत्वात् तदभावेऽपि भगवतो नियतेः स्वभावादेव वा विलक्षणचेष्टोपपत्तिरिष्यते, तदेच्छाया अपि विलक्षणप्रवृत्तित्वावच्छिन्न एव हेतुत्वात् तदभावेऽपि नियतेः स्वभावादेव वा भगवतः प्रवृत्तिरिति वक्तुं किमिति मूकायते भवान्?। असमुदायवादे मिथ्यात्वं तु निर्लक्षणस्य भवत एव, य एवमभिनिविष्टो भाषते, न त्वस्माकं पुरुषकारं नियत्यादिसापेक्षमाश्रयताम्। यदि च चेष्टाजातीयाऽपि प्रयत्नविशेषमतिपतेत् तदा धूमजातीयोऽपि कश्चिद् धूमध्वजमतिपतेदिति संभावनया प्रसिद्धानुमानमपि भज्येत। तस्मादिच्छाभावेऽप्याहारपुद्गलग्रहणे भगवतो न क्षतिः। वस्तुतः शरीरातिष्ठापयिषा निरुपाधिपरदुःखप्रहाणेच्छेव रागकर्मोदयाप्रभवत्वेन राग एव न, सामायिकवतां माध्यस्थ्यप्रभवेच्छाया एवोचितप्रवृत्तिहेतुत्वात्, 'उचितप्रवृत्तिप्रधानं निरभिष्वङ्गं चित्तं सामायिकम्' इति वचनादिति दिग्।

यच्चोक्तम्— 'न च भगवति क्लेशो नाम' इत्यादि। तदयुक्तम्, अनन्तसुखस्य वेदनीयक्षयप्रभवस्यायोगिचरमसमयं तत्रासिद्धेस्तेन तदविरोधात्। न च घातिवद् वेदनीयमिति तद्विपाकस्य तत्र मोहाभावप्रतिबद्धत्वात् तत्कर्मण आत्यन्तिकफलायोगादेव भगवति क्षायिकसुखोपपत्तेस्तदनुपमृद्य न क्लेशोत्थानमिति वाच्यम्; तत्कर्मक्षयजन्यभावे तत्कर्मसत्ताया एव प्रतिबन्धकत्वात्; अन्यथाऽतिप्रसङ्गात्, उदयप्रभवेऽपि सुखेऽर्वागिव तदापि क्षायिकभावमपेक्ष्यानन्तत्वाविरोधात्। घाति- ॥३९२॥
तुल्यत्वं च वेदनीयस्य चिन्त्यम्; तथाहि— किं तत्?— घातिरसवत्त्वं वा, तद्रसविपाकप्रदर्शकत्वं वा, स्वकार्यजनने क्वचित्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्सहभूतत्वं वा, स्वापनेयसजातीयापनायकत्वं वा, स्वकार्यैकमूर्तिककार्यकत्वं वा, द्वेषोत्पादकत्वं वा, अन्यद् वा ?। नाद्यः, असिद्धेः। न द्वितीयः, अघातिकर्मान्तरप्रकृतीनामपि तादृशत्वात्; उक्तं हि– 'अघातिन्यो हि प्रकृतयः सर्व-देशघातिनीभिः सह वेद्यमानास्तद्रसविपाकं प्रदर्शयन्ति, न तु सर्वदा स्वरसविपाकदर्शनेऽपि ता अपेक्ष्यन्ते' इति। अत एव न तृतीयोऽपि, कादाचित्कस्य तत्सहभावस्याकिञ्चित्करत्वात्; अन्यथाऽतिप्रसङ्गात्, सार्वदिकस्य च तस्यासिद्धेः। नापि चतुर्थः, आत्मगुणत्वजात्याऽष्टकर्मक्षयजन्यानामष्टानामपि गुणानां साजात्यात्, तद्घातिनामष्टानामप्यविशेषेण घातित्वप्रसङ्गात्, ज्ञान-दर्शन-चारित्र-वीर्यान्यतरत्वेन साजात्यविवक्षणे तु तस्य तज्जातीयापनायकत्वस्यासिद्धत्वात्, सुखघटितान्यतरत्वस्य च यादृच्छिकत्वात्। नापि पञ्चमः, सर्वासामपि प्रकृतीनां सजातीयप्रकृत्यन्तरकार्याधीनप्रकर्षशालिकार्यकत्वलक्षणस्य तस्याविशेषात्, इतरस्य च दुर्वचत्वात्। नापि षष्ठः, अष्टानामपि कर्मणामष्टसिद्धगुणप्रतिपन्थिदोषजनकत्वाविशेषात्। अष्टादशसु दोषेषु क्षुत्-पिपासयोर्गणनं च प्रभाचन्द्रादीनामभिनिवेशमूलम्, घातिकर्मविपाकह्रदनिस्यन्दभूतानामन्तरायादीनामेवाष्टादशानां दोषाणां प्रामाणिकैः परिभाषणात्; अन्यथा मनुजत्वादेरपि दोषत्वप्रसक्त्या भवतामदुष्टदेवस्य दुर्लभत्वापत्तेः, अवोचाम च—

"[1]दूसइ अव्वाबाहं इय जइ तुह सम्मओ तयं दोसो। मणुअत्तणं वि दोसो नासिद्धं तस्स दूसणओ ॥ १ ॥"

अथ प्रशस्तविपरीतभावनाप्रकर्षशालित्वं दोषत्वम्, तच्च रागादाविव क्षुदादावप्यस्ति। दृश्यते हि वीतरागभावनातारतम्येन रागादेर्मन्द-मन्दतमादिभाव इति तदत्यन्त्योत्कर्षात् तदत्यन्तापकर्षोऽपि भगवतामिति, एवमभोजनभावनाता-

१ दूषयत्यव्याबाधमिति यदि तव सम्मतस्तद् दोषः। मनुजत्वमपि दोषो नासिद्धं तस्य दूषणतः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रतम्यात् सकृद्भोजनै-कदिन-पक्ष-मास-संवत्सराद्यन्तरितभोजनादिदर्शनात् तदत्यन्तोत्कर्षादात्यन्तिकक्षुद्-भुक्त्याद्यपकर्षोऽपि तेषां युज्यत इति चेत्। न, अशरीरभावनया शरीरानुग्रहो-पघातनिमित्तकशरीरममत्व-मानसोपतापनिवृत्तिवद्भोजनभावनया भोजनानुराग-क्षुज्जनितसंक्लेशयोरेव निवृत्तेः स्वकारणोपनीतयोः क्षुद्-भोजनयोः शरीरवदाकर्मक्षयं भावनाशतेनापि निवर्तयितुमशक्यत्वात्। न हि विशुद्धभावनावतां तपस्विनां क्षुदेव न लगति, अपि तु क्षुत्कृतसंक्लेशस्तैर्निरुध्यते; अन्यथा शरीरकार्श्यादितत्कार्यानुपपत्तेः; क्वचित् तदनुपलब्धेस्तथाविधमनोद्रव्याहरणोपाधिकत्वात्, पुद्गलैरेव पुद्गलोपचयात्। न च तेषां क्षुत्-पिपासाऽभावे उभयथा तत्परीषहविजयो घटते तस्मात् शीतादिसत्त्वेऽपि तत्संक्लेशाभाववत् क्षुदादिसत्त्वेऽपि तपस्विनां तत्संक्लेशाभाव इति युक्तमुत्पश्यामः। इत्थं च मानसपीडाऽप्रदत्वादेव 'भगवतोऽसातवेदनीयाद्याः प्रकृतयो नासुखदाः' इत्युपदेशोऽज्ञाना-ऽरत्यादिजन्यदुःखविलयात्, स्वोदयजन्यदुःखमात्रहेतुत्वेनाल्पदातर्यदातृत्वव्यपदेशवद् एतदुपपत्तिः, स्वविपाकप्रतिरोध एव तु निम्बरसलवदृष्टान्तानुपपत्तिरिति विभावनीयम्। न चेदृशं दुःखं कवलायोग्यमिति शङ्कनीयम्; आहारपर्याप्तिनामकर्मोदय-वेदनीयोदयज्वलदनलप्रतिरोधायोगात्। दग्धरज्जुस्थानीयत्वमपि भगवत्यसातवेदनीयादिप्रकृतीनां न स्वकार्यक्षमत्वाभिप्रायेण शास्त्रे प्रतिपाद्यते, किन्तु क्षिप्रक्षपणयोग्यत्वाद्यभिप्रायेण, केवलिनि सातात्यन्तोदयस्यैवागमेऽभिधानात्; साता-ऽसातयोश्चान्तर्मुहूर्तपरिवर्तमानतया सातोदयवदसातोदयस्यापि संभवात्। अन्तरानन्दभावे कथं दुःखोदयः? इति चेत्। यथा भावितात्मनां तपस्विनां परीषहादौ।

यत्तु 'पापप्रकृतीनामपूर्वकरणे रसघातादेव केवलिनां न तथाविधोऽसातोदयः, मोहसापेक्षप्रकृतीनां तद्घातेऽवश्यं रस-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घातात्; अन्यथा पराघातनामकर्मोदयात् केवली पराहननाद्यपि कुर्यात्; पुण्यप्रकृतयस्तु विशुद्धिप्रकर्षात् पीनविपाकाः कृता इति तद्विपाकप्राबल्यमेव तत्र' इति केनचिदुच्यते। तत् तुच्छम्, रसघाताद् रसस्येव स्थितिघातात् स्थितेरप्युच्छेदप्रसङ्गात्। तथाविधस्थितौ च व्यवस्थितायां तथाविधरसः कस्य पाणिना पिधेयः?। अर्वागेव च सर्वथा भवोपग्राहिपापकर्मरसघाते समुद्घातवैयर्थ्यम्। न खलु सत्कर्मसमीकरणायैव समुद्घातः, सत्कर्मण एव वाधिक्यं तदेत्यत्र मानमस्तीति किमुत्सूत्रविस्यन्दितेन?। पराघातोदयेन च परेषां दुर्धर्षताद्यभिव्यङ्ग्यं स्वफलं क्रियत एव; परहननादिकं तु मोहकार्यमेव, इति कथं ततस्तदापादनम्?। परे तूदीरणां विना प्रचुरपुद्गलोपनिपाताभावाद् भगवदसातवेदनीयस्य दग्धरज्जुस्थानिकत्वमूचुः। तदपि न पेशलम्, एवं सति सातवेदनीयस्यापि तथात्वप्रसङ्गात्, सम्यग्दृष्ट्याद्येकादशगुणस्थानेषु गुणश्रेणीसद्भावात्, तदधिकपुद्गलोपसंहारादधिकपीडाप्रसङ्गाच्च। तस्माद् यथाऽनुभागमेव फलसंभव इति विभावनीयम्।

अपरे तु बल-पुण्योदयाभिभूतत्वमेव पापप्रकृतीनां दग्धरज्जुस्थानिकत्वमनुमन्यन्ते। तदप्यसत्, बलवत्सजातीयसातोदयस्य परिवर्तमानतयाऽसातानभिभावकत्वात्। पुण्यप्रकृत्यन्तरोदयस्याभिभावकत्वे च चक्रवर्त्यादीनामपि क्षुद्वेदनीयाद्यभिभवप्रसङ्गात्। एतेन 'देवानामपि पुण्याभिभूतं वेदनीयं नास्मदादिसाधारणक्षुदादिजनकम्, देवाधिदेवानां तु कैव कथा?' इति पामरप्रलपितं परास्तम्। न खलु देवानां वेदनीयम् 'अभिभूतम्' इत्येव विचित्रस्वकार्याक्षमम्, अपि तु तद्भवोपग्रहनिबन्धनविचित्रादृष्टवशादौदर्यज्वलनविशेषाद्यनुपष्टम्भहेतुकमिति। यदि च सर्वथा भगवति क्लेशो नेष्यते कथं तर्हि "एकादश जिने"

१ तत्त्वार्थाधिगमसूत्रे ९। ११।

इति भगवत्येकादशपरीषहाऽऽवेदकं सूत्रं समर्थनीयम् ? । 'एकादश' इत्यनन्तरं 'न सन्ति' इत्यध्याहारादिति चेत् । न, स्वामित्वचिन्ताद्यवसरेऽस्य विपरीतव्याख्यानत्वात् । एतेन 'एकेनाधिका दश न' इत्यप्यपव्याख्यानं द्रष्टव्यम्, तथा समासायोगाच्च । इत्थं च 'एकादश जिने सन्ति, वेदनीयसत्त्वात्, न सन्ति वा, मोहाभावात्' इति द्वेधा व्याख्यातुः सर्वार्थसिद्धिकृतोऽपि महाननर्थ एवोपतिष्ठते । वेदनीयात्मककारणसत्त्वादेकादशपरीषहाणां भगवत्युपचारे मोहसत्त्वमात्रेणोपशान्तवीतरागेऽपि द्वाविंशतिपरीषहाभिधानप्रसङ्गात्; 'न सन्ति' इत्यध्याहारस्याप्रामाणिकत्वाच्च । भोजनजनकतावच्छेदकजात्यभाववत्क्षुदादिपरीषहकल्पने च न मानमस्ति । 'अयोगिन्युपचारावश्यकत्वात् सयोगिन्यप्येकादशानामुपचारौचित्यम्' इति तु वैलक्ष्यभाषितम्, श्रेण्यामप्युपचारापत्तेः । शक्ति-व्यक्तियोग्यताभ्यां श्रेण्यां नोपचार इति चेत् । अन्यत्रापि सुवचमेतत्, कालविशेषादिसहकार्यवाप्त्यैव सयोगिन्यभिव्यक्तेरिति दिग् ।

यदपि– 'न चातीन्द्रियस्य' इत्याद्यभिहितम्, तदपि न चतुरचेतोहरम्, तृष्णाधानद्वारके सुखे दुःखे वेन्द्रियाणां तज्जन्यज्ञानस्य वा हेतुत्वेऽप्यन्यत्र तथाविधपरिणामादेव द्रव्य-क्षेत्रादिसंपत्तिलब्धविपाककर्मकृतात् सुख-दुःखोपपत्तेः । आहारसंज्ञा-रुची च न क्षुदुःख-भुक्तिसुखयोर्हेतू, किन्त्वार्तध्यानजन्यदुःख-तत्प्रतिकारसुखयोः, अवमकोष्ठताक्षुद्वेदनीयोदयमतितदर्थोपयोगप्रभवयेष्टाभिलाषरूपार्तध्यानमय्याऽऽहारसंज्ञया क्षुद्दुःखाभिवृद्धौ भुक्त्यप्राप्तौ तद्दुःखवेगमसहमानानां वेदनावियोगप्रणिधानरूपार्तध्यानाभिवृद्ध्या क्रन्दनाद्यभिव्यङ्ग्यमानसदुःखजननात्, भुक्तिप्राप्तौ चेष्टाभिष्वङ्गेन मनसा सुखवेदनात् । न चेयं मध्यस्थेषु गतिः, अतिचारजनन्योराहार-रुच्योस्तेष्वनुपपत्तेः । न हि विहितानुष्ठानेऽप्यतिचारो नाम । एतेन 'आहारसंज्ञां विना केवलिनो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाहारः, मैथुनसंज्ञां विनाऽब्रह्मेव' इति कुचोद्यमपास्तम्, महर्षीणामिव भगवतो विनाप्याहारसंज्ञामाहारोपपत्तेः, अन्यथा तेषामाहारसंज्ञयाऽऽहारवद् मैथुनसंज्ञयाऽब्रह्माप्यदुष्टं स्यादिति। यच्चोक्तम्— 'औदारिकव्यपदेशस्तु भगवच्छरीरस्योदारत्वाद् न तु भुक्तेः' इति। तत्तु न दोषावहम्, औदारिकशरीरित्वे स्वकारणाधीनाया भुक्तेरप्रतिषेधात्, व्यपदेशस्योदारत्वनिमित्तत्वेऽपि स्वकारणनिमित्तमकृतभुक्तिसिद्धेः।

यदपि 'एकेन्द्रियादीनामयोगिपर्यन्तानामाहारिणां सूत्र उपदेशात्' इत्याद्युक्तम्। तदप्यसंगतम्, एकेन्द्रियादिसहचरितत्वनिरन्तराहारोपदेशमन्तरेणापि "विग्गहगइमावण्ण–" इत्यादिसूत्रसंदर्भस्य केवलिभुक्तिप्रतिपादकस्यागमे सद्भावात्। न च तस्याप्रामाण्यम्, सर्वज्ञप्रणीतत्वेनाभ्युपगतसूत्रस्येव प्रामाण्योपपत्तेः। न च तत्प्रणीतागमैकवाक्यतया प्रतीयमानस्याप्यस्यातत्प्रणीतत्वम्, अन्यत्रापि तत्प्रसक्तेः। शरीरप्रायोग्यपुद्गलग्रहणमेवात्राहारत्वेनाभिमन्यमानस्य च भवतो विग्रहगत्यापन्नसमवहतकेवल्ययोगिसिद्धव्यतिरिक्ताशेषप्राणिगणे शरीरप्रायोग्यपुद्गलग्रहणमेवाहारशब्दवाच्यमिह सूत्रेऽभिप्रेतमित्यपूर्वं सामायिकशब्दार्थकल्पनकौशलम्। यदपि 'निरन्तराहारत्वं केवलिनस्तेनाहारेण समुद्घातक्षणत्रयमपहाय भवेत्' इत्युक्तम्; तदप्ययुक्तम्, विशिष्टाहारस्य विशिष्टकारणप्रभवत्वात्, तस्य च प्रतिक्षणमसंभवात्; यस्तु पुद्गलादानलक्षणो लोमाद्याहारः, तस्य प्रतिक्षणं सद्भावेऽप्यदोषात्। यदपि 'यथासंभवमाहारव्यवस्थितेः केवलिनः कवलाहारः, अन्यथा शरीरस्थितेरभावात्' इत्यभिधानम्। तदपि युक्तमेव। न हि देशोनपूर्वकोटिं यावद् विशिष्टाहारमन्तरेण विशिष्टौदारिकशरीरस्थितिः संभविनी। न

१ विग्रहगतिमापन्न–।

च तच्छद्मस्थावस्थातः केवल्यवस्थायामात्यन्तिकं तच्छरीरस्य विजातीयत्वम्, [1]येन प्रकृताहारविरहेऽपि तच्छरीरस्थितेरविरोधो भवेत्, ज्ञानाद्यतिशयेऽपि प्राक्तनसंहननाद्यधिष्ठितस्य तस्यैवापातमनुवृत्तेः । अस्मदाद्यौदारिकशरीरविशिष्टस्थितेर्विशिष्टाहारनिमित्तत्वं च प्रत्यक्षा-ऽनुपलम्भप्रभवप्रमाणेन सर्वत्राधिगतम्, इति विशिष्टाहारमन्तरेण तत्स्थितेरन्यत्र सद्भावे क्वचिदपि तत्स्थितिस्तन्निमित्ता न भवेत् । अथौदारिकशरीरस्थितित्वं न कवलाहारजन्यतावच्छेदकम्, एकेन्द्रियशरीरस्थितौ व्यभिचारात्; नाप्यस्मदादिशरीरस्थितित्वम्, अस्मदादित्वस्याननुगतत्वात्, किन्तु विजातीयशरीरस्थितित्वम्; तच्च वैजात्यं केवलिशरीरे नास्ति, मोहक्षयेण रुधिरादिधातुरहितस्य मूत्र-पुरीषादिमलाधायिकवलाहारानपेक्षस्य परमौदारिकशरीरस्यैव भावादिति चेत् । न, केवलिशरीरस्य कवलाहारानपेक्षत्वसिद्धौ परमौदारिकत्वसिद्धिः, तत्सिद्धौ च कवलाहारानपेक्षत्वसिद्धिरित्यन्योन्याश्रयात् । न च मोहक्षयेण परमौदारिकत्वमप्युत्पादयितुं शक्यम्, भवोपष्टम्भकशरीरोपमर्देन शरीरान्तरोपग्रहे भवान्तरप्रसङ्गात् । अवस्थितशरीरस्यातिशयश्च न रुधिरादिधातूपष्टब्धमनुष्यशरीरत्वजात्युच्छेदेन संभवति । न ह्यतिशयितोऽपि पद्मरागो मुक्तामणीभवति । कथं चैवं पुद्गलविपाकिवज्रर्षभनाराचसंहननप्रकृतिविपाकोदयस्तत्र स्यात्?, अस्थि-पुद्गलेष्वेव तस्या विपाकदर्शनात् "[2]संहयणमट्ठिणिचओ" इति वचनात् । न चास्थि-पुद्गलेषु दृढतररचनाविशेष एव तत्प्रकृतिजन्य इति नियमो न तु तेष्वेवेति वाच्यम्, दृढावयवशरीराणां देवानामपि तत्प्रसङ्गात् । किञ्च, मोहक्षयस्य तत्कार्यराग-द्वेषविलयद्वारा ज्ञानोत्पादकत्वमेव, न तु शरीरातिशायकत्वम्, नामकर्मातिशयादेव जात्यनुच्छेदेन प्रशस्तसंहननादि- ॥३९५॥

१ क. 'यतः' । २ संहननमस्थिनिचयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रूपशरीरातिशयोपपत्तेः; तथा चागमः—

"[1]संघयण-रूव-संठाण-वण्ण-गइ-सत्त-सार-ऊसासा । एमाइणुत्तराइं हवंति णामोदया तस्स ॥ १ ॥"

न च नामातिशयस्य संहननाद्यतिशायकवज्जाठरानलनाशकत्वमपि क्वचिदुक्तं युक्तं वा, तत्कारणीभूततथाविधतैजसशरीरविघटनप्रसङ्गात्, लब्धीनां कारणघटन-विघटनद्वारैव कार्यघटन-विघटनयोस्तन्त्रत्वात् । किञ्च, अत्यन्तवैजात्ये भगवच्छरीरस्य षष्ठशरीरपरिकल्पनाप्रसङ्गः, धातुमच्छरीरस्थिति-वृद्ध्योः क्षुज्जनितकार्श्याद्यपनायकधातूपचयादिद्वारा कवलाहारस्य स्थूलौदारिकस्थिति-वृद्धिसामान्ये स्थूलाहारस्य वा हेतुत्वात्; अवोचाम च—

"[2]ओरालियत्तणेणं तह परमोरालिअं पि केवलिणो । कहलाहारावेक्खं ठिइं च वुड्ढिं च पाउणइ ॥ १ ॥"

तस्माद् धूमसामान्ये वह्नेरिव विशिष्टौदारिकस्थितिसामान्ये कवलाहारस्य हेतुत्वात् तदभावे चिरतरकाला भगवच्छरीरस्थितिर्न संभवतीति सिद्धम् । सर्वज्ञतादिकं तु घातिकर्मक्षयादुपपद्यते । न च भुक्ताहारेण, तत्कारणेन, तत्कार्येण, तद्व्यापकेन वा सर्वज्ञतादेर्विरोधः, आहारस्य साक्षात्, ज्ञानादिघातकत्वेन वाऽविरोधात्; तत्कारणस्य क्षुद्वेदनीयोदयादेरतथात्वात्, मोहादेश्च तत्कारणत्वनिरासात्; तत्कार्यस्यापि चिरकालभाव्यौदारिकशरीरस्थितेरतथात्वात् । प्रमादश्च न तत्कार्यम्, योगदुष्प्रणिधानस्यैव तन्निमित्तत्वात्, तस्य च राग-द्वेषकृतत्वात् । एतेन 'आहारकथयैव चेद् यतीनां प्रमत्तत्वम्, तर्हि कथं

१ संहनन-रूप संस्थान-वर्ण गति-सत्त्व-सारो-च्छ्वासाः । एवमाद्यनुत्तराणि भवन्ति नामोदयात् तस्य ॥ १ ॥

२ औदारिकत्वेन तथा परमौदारिकमपि केवलिनः । कवलाहारापेक्षं स्थितिं च वृद्धिं च प्रकरोति ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाहारं कुर्वतां भगवतां तदापद्यते?' इति प्रभाचन्द्रोक्तं निरस्तम्, देशकथावदाहारकथया रागादिपरिणामकृतया दोषोपपत्तावपि देशवदाहारस्योदासीनस्यानपराधात्, अन्यथाऽऽहारकथयेवाहारेणापि सुसंयतानामतीचारप्रसङ्गात्। निद्रापि न तत्कार्यम्, दर्शनावरणप्रकृतिजन्यत्वात् तस्याः। न च ध्यान-तपोव्याघातौ तत्कार्ये, शैलेशीकरणप्रारम्भात् प्राग् ध्यानानभ्युपगमात्; अभ्युपगमे वा तद्ध्यानस्य शाश्वतत्वात्; अन्यथा गच्छतोऽप्येतद्विघ्नप्रसङ्गात्, विशिष्टतपसोऽपि कायक्लेशकरस्य भगवत्यासिद्धेः, "अणुत्तरे तवे" इति सूत्रस्य शैलेश्यवस्थाभाविध्यानरूपस्याभ्यन्तरतपसः पारम्यवेदकत्वात्। नापि रासनमतिज्ञानं तत्कार्यम्, तस्य क्षयोपशमावस्थाविशिष्टकर्मपुद्गलनिमित्तकत्वात्; अन्यथा सुरविकीर्णजानुदघ्नबहलकुसुमपरिमलादपि घ्राणेन्द्रियोद्भवमतिज्ञानप्रसङ्गात्। नापीर्यापथिकी क्रिया, गमनादिनापि तत्प्रसङ्गात्। नापि परोपकारहानिः, तृतीययाममुहूर्तमात्र एव भगवतां भुक्तेः शेषमशेषकालमुपकारावसरात्। नापि व्याधिसमुत्पत्तिः, परिज्ञाय हितमिताहाराभ्यवहारात्। नापि पुरीषादिजुगुप्सा, स्वस्य निर्दग्धमोहबीजतयैव तदनुत्पत्तेः, अन्येषां तु तद्भावे मनुजा-ऽमरेन्द्ररमणीसहस्रसंकुलायां सभायामनंशुके भवगवत्यासीनेऽपि तत्प्रसङ्गात्; सातिशयत्वपरिहारस्य चोभयत्र तुल्यत्वात्; सामान्यकेवलिभिस्तु विविक्तदेशे तत्करणे दोषाभावात्। कथं चैतदाहारेऽपि निराहारभावमभ्युपगच्छताऽऽगमबाह्येनापादयितुं शक्यम्?, "तित्थयरा तप्पियरो" इत्यादिवचनात्। न च तद्व्यापपकेनापि सातवेदनीयोदीरणादिना विरोधः, तस्य प्रमादकृतत्वात्, बाह्ययोगव्यापारमात्रेण तत्प्रसङ्गे, उपदेशादिनापि तत्प्रसङ्गादिति न किमप्यनुपपन्नम्।

१ अनुत्तरं तपः। २ तीर्थकरास्तत्पितरः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदपि 'श्रूयते च भक्ताहारमन्तरेणापि' इत्याद्युक्तम्, तदप्यपर्यालोचिताभिधानम्, प्रथमतीर्थकरप्रभृतीनां निराहारकालमानोक्तिप्रामाण्ये तदियत्तानियमस्यापि तत एव सिद्धेः, तदधिकनिराहारतच्छरीरस्थितेः सूत्रे निषेधात्, निरशनकालस्य तावत एवोत्कृष्टताप्रतिपादनात् "संवच्छरमुसभजिणो"[1] इत्यादिवचनप्रामाण्यात् । इत्थं च 'निर्निमित्तं सूत्रभेदकरणम्' इति परास्तम्, तच्छरीरस्य चिरतरकालस्थितेरेव सूत्रभेदकरणनिमित्तत्वात्, भक्ताहारमन्तरेण तत्स्थितेरसंभवस्य प्रतिपादनात्, सामान्यसूत्रस्याप्यन्यथानुपपत्त्या यथासंभवन्यायेन विशेषबोधकत्वात् । भूयांसि च भक्ताहारप्रतिपादकानि केवलिनः सूत्राण्यागम उपलभ्यन्ते, प्रतिनियतकालभक्ताहारनिषेधकानि च; यथा वर्धमानस्य भगवतो व्याख्याप्रज्ञप्त्यादौ विकटभोजित्वाद्यभिधायकानि, यथा च प्रथमतीर्थकृत एव चतुर्दशभक्तनिषेधेनाष्टापदनगे दशसहस्रकेवलिवृतस्य निर्वाणगतिप्रतिपादनादिसूत्राणीति न सूत्रभेदक्लृप्तिदोषोऽपि ।

यदपि 'न चातिशयदर्शनात्' इत्याद्युक्तम्; तदपि न, निराहारौदारिकशरीरचिरतरस्थितेरदृष्टायाः कल्पने सयोगात्यन्तावस्थानस्याप्यतिशयेन प्रसङ्गापादने दोषाभावात्, बाधकानुमानादेश्चोभयत्र सत्त्वात् । एतेन यदुच्यते– 'सुनिश्चितासंभवद्बाधकप्रमाणत्वादकवलभोजित्वं भगवतः सिध्यति' इति; तदपि प्रत्युक्तम्, एतस्य प्रामाण्येऽतन्त्रत्वाच्च, बाधकप्रमाणाभावस्यान्यतः प्रमाणाद् निश्चये तत्राप्येतन्निश्चयार्थं प्रमाणान्तरापेक्षायामनवस्थाप्रसङ्गात्; बाधानुपलम्भात् तन्निश्चयस्य चाशक्यत्वात्, उत्पत्स्यमानबाधकेऽपि प्राग् बाधानुपलब्धिसंभवात् । न चानिश्चितलक्षणं प्रमाणं प्रमेयव्यवस्थानि-

१ संवत्सरमृषभजिनः ।

बन्धनम्, ज्ञातकरणानां प्रामाण्यनिश्चयापेक्षत्वात्, अप्रामाण्यज्ञानास्कन्दितधूमादिपरामर्शाद् वह्न्यनुमित्यनुत्पत्तिदर्शनात्। संवादादसंभवद्बाधकप्रमाणत्वनिश्चये च संवादित्वमेव तन्त्रमस्तु। तच्च संवादित्वमतीन्द्रियार्थविषयस्यागमस्याप्तप्रणीतत्वाद् निश्चीयते, तत्प्रणीतत्वनिश्चयश्चागमैकवाक्यतया व्यवस्थितस्य केवलिभुक्तिप्रतिपादकसूत्रसमूहस्य सिद्ध एव। इति निर्बाधागमादपि केवलिभुक्तिसिद्धिरिति सर्वमवदातम्। तेन सिद्धमेतत्– कवलाहारित्वेऽपि घातिकर्माकलङ्कितेन भगवताऽभिव्यक्तादस्माकमागमाद् धर्मा-ऽधर्मव्यवस्थेति।

दिगम्बर! परस्परं मतविरोधजं मत्सरं निरस्य हृदि भाव्यतां यदिदमुच्यते तत्त्वतः।
स्थिता परिणतिर्यथाक्रममघातिनां कर्मणां न किं कवलभोजिनं गमयति त्रिलोकीगुरुम्? ॥ १ ॥
यस्यासन् गुरवोऽत्र जीतविजयाः प्राज्ञाः प्रकृष्टाशया भ्राजन्ते सनया नयादिविजयप्राज्ञाश्च विद्याप्रदाः।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरस्तेन न्यायविशारदेन रचितस्तर्कोऽयमभ्यस्यताम् ॥ २ ॥

इति श्रीपण्डितश्रीपद्मविजयसोदरन्यायविशारदपण्डितयशोविजयविरचितायां स्याद्वादकल्पलता-
भिधानायां शास्त्रवार्तासमुच्चयटीकायां दशमः स्तबकः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ अर्हम् ॥

अथैकादशः स्तबकः ।

अपापायामायानुसृतमतिरभ्येत्य सदनं क्षमायां निर्मायापहृतमदमायान् गणभृतः ।
सभायामायातान् य इह जनतायां मुदमदादपायात् पायाद् वो जिनवृषभवीरः स सततम् ॥ १ ॥

प्रत्यूहापोहमन्त्रः सकलजनवशीकारकृतसिद्धविद्यो दुर्नीतिव्याधिदिव्यौषधमधमजनव्यालपारीन्द्रनादः ।
अज्ञानध्वान्तधारारविकिरणभरो यस्य नामार्थसिद्धिं दत्ते विश्वस्य शश्वत् स भुवि विजयतामाश्वसेनिर्जिनेन्द्रः ॥ २ ॥

येषां गिरं समुपजीव्य सुसिद्धविद्यामस्मिन् सुखेन गहनेऽपि पथि प्रवृत्तः ।
ते सूरयो मयि भवन्तु कृतप्रसादाः श्रीसिद्धसेन-हरिभद्रमुखाः सुखाय ॥ ३ ॥

ननु 'सर्वज्ञोपज्ञादागमाद् धर्मा-ऽधर्मव्यवस्था' इत्युक्तम्, तच्च कथं युक्तम्, शब्दस्याकल्पितार्थाविषयत्वात्, शब्दा-ऽर्थयोर्वास्तवसंबन्धाभावाच्च ? इति मनसिकृत्य वार्तान्तरमुत्थापयति—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ये त्वभिदधत्येवं युक्तिमार्गकृतश्रमाः। शब्दा-ऽर्थयोर्न संबन्धो वस्तुस्थित्येह विद्यते॥१॥

अन्ये तु– बौद्धाः, अभिदधत्येवं– वक्ष्यमाणप्रकारम् । किम्भूताः ? इत्याह– युक्तिमार्गकृतश्रमाः– अनुभवाद्युत्सृज्य जातियुक्तिमात्रनिष्ठा इत्युपहासः । एवमर्थमाह– शब्दा-ऽर्थयोः– लोके प्रसिद्धयोर्नाम-नामवतोः, न संबन्धः कश्चिद् वस्तुस्थित्या– परमार्थेन, इह–जगति, विद्यते, संबन्धान्तरनिषेधात्, तादात्म्य-तदुत्पत्त्योरयोगाच्च ॥ १ ॥

तत्र तादात्म्यं निरस्यन्नाह—

न तादात्म्यं द्वयाभावप्रसङ्गाद् बुद्धिभेदतः। शस्त्राद्युक्तौ मुखच्छेदादिसङ्गात् समयस्थितेः॥२॥

न तादात्म्यं 'शब्दा-ऽर्थयोः' इत्यनुकृष्य योज्यते । कुतः ? इत्याह– द्वयाभावप्रसङ्गात् शब्दा-ऽर्थयोरेकत्वेन भेदनिबन्धनद्वित्वाभावात्, स्वस्वरूपवत् ; तथा, बुद्धिभेदतः– घटादिशब्द-घटाद्यर्थयोः श्रावण-चाक्षुषादिबुद्धिभेदात्, भेदसिद्धावभेदासिद्धेः, घट-पवनादिवत्, तथा, शस्त्राद्युक्तौ– करवाला-ऽनलाद्यभिधाने, मुखच्छेदादिसङ्गात्– वदनच्छेद-दाहादिप्रसङ्गात्, करवाला-ऽनलादिनिवेशवत् ; तथा, समयस्थितेः- संकेतव्यवस्थानात् । न ह्यगृहीतसमयः शब्दोऽर्थं प्रत्याययति, घटपदशक्तिपरिज्ञानविकलानां पामराणां, विपरीतव्युत्पन्नानां च घटपदश्रवणमात्राद् घटार्थप्रत्ययप्रसङ्गात्; किन्तु यः शब्दो यत्र गृहीतसंकेतः स तमेवार्थं प्रत्याययतीति । न चेदमर्थतादात्म्ये युज्यते । न ह्यर्थ एव समयव्यवस्थानं दृष्टमिष्टं वा ॥ २ ॥

तदुत्पत्तिमपि निराकुरुते—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्थासंनिधिभावेन तद्दृष्टावन्यथोक्तितः । अन्याभावनियोगाच्च न तदुत्पत्तिरप्यलम् ॥३॥

अर्थासंनिधिभावेन– घटाद्यसंनिधावपि घटादिशब्दोत्पत्त्या व्यतिरेकव्यभिचारात्, तद्दृष्टौ–देवदत्ताद्यर्थदृष्टौ, अन्यथोक्तितः– गोत्रस्खलनादिदशायां यज्ञदत्तादिशब्देनोक्तितो देवदत्तादिशब्दानुत्पत्त्याऽन्वयव्यभिचारात्, तथा, अन्यस्मिन् घटादौ पटादिशब्दस्य, अभावे चात्यन्तासति वान्ध्येयादौ वान्ध्येयादिशब्दस्य नियोगात् संकेतकरणात्, यद् यतो नोत्पत्तिस्वभावं तस्य तत्र नियोगवैयर्थ्यात्, न तदुत्पत्तिरपि– अर्थात् शब्दोत्पत्तिरपि, अलं शोभते ॥ ३ ॥

शब्दानां वास्तवार्थत्वे दोषान्तरमाह—

परमार्थैकतानत्वे शब्दानामनिबन्धना । न स्यात् प्रवृत्तिरर्थेषु दर्शनान्तरभेदिषु ॥ ४ ॥

परमार्थैकतानत्वे– वास्तवैकविषयत्वेऽभ्युपगम्यमाने, शब्दानामनिबन्धना– प्रवृत्तिनिमित्तविकला, दर्शनान्तरभेदिषु– दर्शनान्तरप्रसिद्धासद्भावेषु, अर्थेषु– प्रधाने-श्वरादिषु, प्रवृत्तिः शक्तिः, न स्यात्; तथा च प्रधानादिपदानामप्रत्यायकत्वं स्यात्; अनिष्टं चैतत् । न च सखण्डप्रधानत्वादिविशिष्टे शक्तिभ्रमादुपपत्तिः, गवादिपदानामिव प्रधानादिपदानामखण्डधर्मविशिष्ट एव शक्त्यनुभवादिति भावः ॥ ४ ॥

अपिच,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतीताजातयोर्वापि न च स्यादनृतार्थता। वाचः कस्यचिदित्येषा बौद्धार्थविषया मता ॥८॥

अतीता-ऽजातयोः- विनष्टा-ऽनुत्पन्नयोर्वाप्यर्थयोरसत्त्वेन, न स्यात् प्रवृत्तिः। तथा, न च- नैव भवेत्, अनृतार्थता- असत्यार्थता, वाचः, कस्यचित्- प्रतारकादेः, अन्यथा 'परमार्थैकतानत्वायोगात्' इति- अस्मादुक्तदोषात्, एषा- वाक्, बौद्धार्थविषया- बुद्धिक्लृप्तार्थविषया, मता- इष्टा शब्दार्थविद्भिः सौगतैः। एतेन यदुक्तमुद्द्योतकरेण- 'अवाचकत्वे शब्दानां प्रतिज्ञाहेतुव्याघातः' इति, तत् प्रत्युक्तम्। न ह्यागोपालप्रतीतः शब्दार्थो निषिध्यते, किन्तु तत्र सांवृतत्वमभ्युपगम्य तात्त्विकत्वं निषिध्यत इति। तन्निषेधश्च स्वलक्षणस्य व्यवहारकालाननुयायित्वेनाकृतसमयत्वात् तत्र शब्दस्य। अयमेवाभिप्रायः 'न जातिशब्दो भेदानां वाचकः, आनन्त्यात्' इति वदत आचार्यदिग्नागस्य। तेन यदुक्तमुद्द्योतकरेण- 'यदि शब्दं पक्षयसि तदानन्तस्य वस्तुधर्मत्वाद् व्यधिकरणो हेतुः; अथ भेदा एव पक्षीक्रियन्ते तदा नान्वयी न व्यतिरेकी दृष्टान्तोऽस्ति, इत्यहेतुरानन्त्यम्' इति, तद् निरस्तम्। न च जातिविशेषणभेदेषु समयसंभवादयमदोषः, जातेर्निरस्तत्वात्, अनन्तभेदविषयानिःशेषव्यवहारोपलम्भस्य कस्यचिदसंभवेनादृष्टेषु भेदेषु समयासंभवाच्च। विकल्पबुद्ध्याहृतेषु तत्प्रतिपत्त्यभ्युपगमे च विकल्पसमारोपितार्थविषय एव संकेतः प्राप्तः। अथ समयक्रियाकाले क्षणान्तरसंनिधानात् कथं न स्वलक्षणे समयकरणसंभवः? इति चेत्। न, तस्याभोगाविषयीकृतत्वेनाश्वाभोगाविषयीकृते संनिहिते गवादावश्वपदस्येव समयस्य दुर्ग्रहत्वात्। सादृश्येनैक्यमध्यवस्य समयग्रहे च तस्यास्वलक्षणत्वेन स्वलक्षणस्य वाच्यत्वासिद्धेः। एतेन 'व्यक्त्या-ऽऽकृति-जातयः पदार्थः' इति केषाञ्चिद् मतम्, 'जातिरेव पदार्थः' इत्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्येषाम्, 'द्रव्यम्' इति च परेषाम्, 'उभयम्' इति चापरेषां मतमपास्तम्, जातेरयोगात्, व्यक्त्यादीनां च स्वलक्षणात्मकत्वात्, तत्पक्षभाविदोषानतिवृत्तेः। बुद्ध्याकारेऽपि न समयः संभवति, तस्य व्यवहारकालाननुयायित्वात्, बहिरर्थज्ञापनाभिमानिभिरेव शब्दप्रयोगाच्च। 'अस्त्यर्थमात्रमेवापूर्वदेवतादिपदानामिव गवादिपदानामर्थः, तत्राकारविशेषपरिग्रहस्तु केषाञ्चित् सिद्धान्तबलात्, न तु शब्दात्' इत्येके। तद् न, शब्दभेदव्यवहारविलोपाद् विषाणादिविशेषानुपरागेणास्त्यर्थवाचकत्वे च गोत्वविशिष्टस्य वाच्यत्वमिष्टम्, तत्र चोक्तप्राय एव दोषः। अपरे तु 'तपो-जाति-श्रुतादिर्ब्राह्मणादिशब्दैः समुदायो विना विकल्प-समुच्चयाभ्यां सामस्त्येनाभिधीयते, यथा वनादिशब्दैर्धवादयः। 'वनम्' इत्युक्ते हि 'धवो वा खदिरो वा' इति न विकल्पेन धीः' न वा 'धवश्च खदिरश्च' इति समुच्चयेन, अपि तु सामस्त्येन प्रतीयन्ते धवादयः, तथा 'ब्राह्मणः' इत्युक्तेऽपि 'तपो वा जातिर्वा श्रुतं वा' तपश्च जातिश्च श्रुतं च' इति वा न धीः, अपि तु साकल्येन संबन्ध्यन्तरव्यवच्छिन्नास्तपःप्रभृतयः संहताः प्रतीयन्ते' इत्याहुः। तदपि न, वनादिपदेनापि परस्परसंनिहितबहुवृक्षत्वादिप्रकारकविकल्पबुद्ध्युपहृतार्थस्यैवाभिधानात्, समुदायस्य प्रत्येकानतिरिक्तत्वेनान्वयितयानभिधेयत्वात्। परे तु 'द्रव्यत्वादिनिर्धारितस्वरूपैर्यः संबन्धो द्रव्यादीनां स शब्दार्थः। स च संबन्धिनां शब्दार्थत्वेनासत्यत्वादसत्य इत्युच्यते। यद्वा, तपः-श्रुतादीनां मेचकवर्णवदैक्येनावभासनादेषामेव परस्परमसत्यः संसर्गस्तथा' इत्याहुः। अन्ये तु-'असत्यवलयाङ्गुलीयकाद्युपाधिकं सत्यं सुवर्णादिसामान्यमभिधेयम्' इत्याहुः। मतद्वयमिदमसत्, संयोगादिसंबन्धस्य सामान्यस्य च निरासात्, असत्याभिधेयत्वध्रौव्याच्च। 'शब्द एवाभिजल्पत्वमागतः शब्दार्थः, तच्च शब्दस्यार्थेन सहै-

१ ख. ग. घ. 'अद्भ्रान्त'।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्याध्यवसानम्' इत्यन्ये। एतदपि न, असताऽर्थेनैकीकरणायोगात्, योगे वा बुद्धिशब्दार्थपक्षप्रवेशात्। 'बुद्धिरूपमेव बाह्यविषयं तथा, गृह्यमाणबुद्धित्वेन वा गृह्यमाणं शब्दार्थः' इति पक्षस्तु निरस्तप्राय एव, शाब्दप्रत्ययेनाध्यवसीयमानस्य शब्दार्थत्वायोगाच्च। परे त्वाहुः– 'अभ्यासात् प्रतिभाहेतुः शब्दो न तु बाह्यार्थप्रत्यायकः; यथैव ह्यङ्कुशादिघातादयो हस्त्यादीनामर्थप्रतिपत्तौ क्रियमाणायां प्रतिभाहेतवो भवन्ति तथा शब्दार्थसंबन्धसंमता वृक्षादयः शब्दा यथाभ्यासं प्रतिभामात्रोपसंहारहेतवो भवन्ति' इति। अत्रापि प्रतिभा यदि परमार्थतो बाह्यार्थविषया तदैकत्र विरुद्धसमयग्राहिणां विचित्रा प्रतिभा न स्यात्, एकस्यानेकस्वभावासंभवात्। यदि च निर्विषया, कथं तर्हि तदर्थे प्रवृत्ति-प्रतिपत्ती?। अनर्थेऽर्थाध्यवसायेन भ्रान्त्या चेत्। तर्हि भ्रान्तः शब्दार्थः प्राप्तः, तत्र च बीजं भावानां परस्परतो भेद एवेति पक्ष एवैष न इति। अन्ये तु– 'अर्थविवक्षां शब्दोऽनुमापयति, यदुक्तम्– "अनुमानं विवक्षायाः शब्दादन्यद् न विद्यते" इति। अत्रापि विवक्षाया न पारमार्थिकशब्दार्थविषयत्वम्, अन्वय्यर्थायोगात्। नापि शब्दस्य तत्प्रतिपादकत्वम्। न च विवक्षायाः प्रतिपाद्यत्वे बहिरर्थे प्रवृत्तिः सुघटा, अप्रेरितत्वात्। न च विवक्षा-परिवर्तिनो बाह्यस्य च सारूप्यादप्रेरितेऽपि तत्र ततः प्रवृत्तिः, यमलकवदिति वाच्यम्, प्रेरितेऽपि तत्प्रसक्त्याऽनियमापत्तेः। स्वप्रतिभासानुभवेऽपि बाह्यार्थशक्तिभ्रमात् प्रवृत्त्युपगमे च पक्ष एव नः, धूमस्याग्नेरिव शब्दस्याताात्त्विकार्थप्रतिपादनेच्छानुमापकत्वात्, तस्यानुमानानतिरेकात्; तदाहुः– 'वक्तुरभिप्रायं तु सूचयेयुः' इति। एतेन वैभाषिकोऽपि शब्दविषयं नामाख्यमर्थचिह्नरूपं विप्रयुक्तं संस्कारमिच्छन् निरस्तः, तस्याप्यन्वयायोगात्, बाह्ये चाप्रवृत्तेः, सारूप्यात् प्रवृत्तावप्यनियमापत्तेः। तदेवम् 'अकृतसमयत्वात्' इति हेतोर्नासिद्धता, नाप्यनैकान्तिकत्व-विरुद्धत्वे। इति सिद्धम्– 'अपोहकृत् शब्दः' इति ॥ ५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदिदमाह—

वाच्य इत्थमपोहस्तु न जातिः पारमार्थिकी। तदयोगाद्विना भेदं तदन्येभ्यस्तथास्थितेः॥६॥

इत्थं– तात्त्विकत्वाभावे, अपोहस्तु– अपोह एव, वाच्यः– शब्दप्रतिपाद्यः । अवधारणफलमाह– न जातिः पारमार्थिकी– अकल्पिता गोत्वादिरूपा वाच्या । कुतः ? इत्याह– तदयोगात्– गोत्वादिजातेर्भेदाऽभेदादिविकल्पेनाघटमानत्वात्; तथा, विना भेदं– स्वभावत एव गोत्वाधारस्वभावलक्षणं गोव्यक्तीनाम्, तदन्येभ्यः– अश्वादिव्यक्तिविशेषेभ्यः, तथास्थितेः– भिन्नत्वाव्यवस्थितेः, गोत्वस्य व्यापकत्वात्, तत्त्वेऽपि तत्र गोव्यक्त्याधेयत्वस्य स्वभावभेदनियम्यत्वादिति भावः ॥ ६ ॥

स्वभावभेदसत्त्वे दोषमाह—

सति चास्मिन् किमन्येन शब्दात्तद्वत्प्रतीतितः। तदभावे न तद्वत्त्वं तद्भ्रान्तत्वात्तथा न किम् ?॥

सति चास्मिन्– स्वभावभेदे, किमन्येन– गोत्वादिना कल्पितेन ? शब्दात्– गवादिशब्दात्, तद्वत्प्रतीतितः– विशिष्टभेदवद्व्यक्तिप्रतीतेः । पराभिप्रायमाह– तदभावे– गोत्वाभावे, न तद्वत्त्वम्– न गोत्वाधारस्वभावभेदवत्त्वम्, तत एव तद्भेदोपपत्तेः । अत्रोत्तरम्– तद्भ्रान्तत्वात्– तस्य भेदस्य भ्रान्तत्वात् कल्पितत्वात्, तथा न किम् ?– तथाध्यवसायवशेन कल्पितं तद्वत्त्वं न कथम् ? । वास्तवे ह्यस्मिन्नयं दोषो न पुनर्भ्रान्त इत्यभिप्रायः ॥ ७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव व्यतिरेकनिरासेन द्रढयति—

अभ्रान्तजातिवादे तु न दण्डाद्दण्डिवद्गतिः । तद्वत्युभयसांकर्ये न भेदाद्वोऽपि तादृशम्॥८॥

अभ्रान्तजातिवादे तु– अकल्पितजातिवाच्यत्वपक्षे तु, दण्डात्– दण्डाभिधानात्, दण्डिवत्– दण्डिनीव, तद्वति– जातिमति, गतिः– परिच्छित्तिः, न स्यात्। न च प्रथमं जातिरवसीयते, ततस्तद्वाँल्लक्ष्यते, तेन विना तस्या अयोगात्, इति लक्षणया तद्वतो गतिरिति वाच्यम्; क्रमवत् प्रत्ययादर्शनात्। जाति-व्यक्त्योः संकीर्णप्रतिपत्त्युपगमे दोषमाह– उभयसांकर्ये– जाति-व्यक्तिसांकर्ये इष्यमाणे, वोऽपि– युष्माकमपि, भेदात्– अध्यवसीयमानाभेदविरोधात्, तादृशम्– अभ्रान्तम्, न 'तद्वत्त्वम्' इति योगः।

ननु भ्रान्ततद्वत्त्वस्य वाच्यत्वे कथमपोहः शब्दार्थः ? इति चेत्। सत्यम्, द्विविधो ह्यस्माकमपोहः– पर्युदासलक्षणः, प्रसज्यप्रतिषेधलक्षणश्च। आद्यो द्विविधः– अर्थेऽनुगतैकरूपत्वेनाध्यवसितो बुद्धिप्रतिभासो बुद्ध्यात्मा, विजातीयव्यावृत्तस्वलक्षणार्थात्मा च। तत्र यथा हरीतक्यादयो बहवोऽन्तरेणापि सामान्यलक्षणमेकमर्थम्, ज्वरादिशमनं कार्यमुपजनयन्ति, तथा शाबलेयादयोऽप्यर्थाः सत्यपि भेदेऽधिकृतैकाकारपरामर्शमन्तरेणापि वस्तुभूतं सामान्यम्, तदनुभवबलेन यदुत्पन्नं विकल्पज्ञानम्, तत्र यदर्थाकारतयार्थेऽप्रतिबिम्बकं ज्ञानादभिन्नमाभाति तत्रान्यापोह इति व्यपदेशः, अन्यव्यावृत्तवस्तुप्राप्तिहेतुत्वादिनोपचारात्। अर्थस्तु विजातीयव्यावृत्तत्वाद् मुख्यतस्तद्व्यपदेशभाक्। प्रसज्यप्रतिषेधस्तु 'गौरगौर्न भवत्ययम्' इति विशिष्ट

॥४०१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवायमन्यापोहोऽवगम्यते, तत्रार्थप्रतिबिम्बात्माऽपोहः शब्दजन्यत्वात् साक्षात् शब्दवाच्यः। शब्दा-ऽर्थयोः कार्य-कारणभाव एव च वाच्यवाचक(भाव):; तदुक्तम्, "विकल्पयोनयः शब्दाः" इत्यादि। अपोहद्वयं च बाह्यार्थाध्यवसायिविकल्पप्रतिबिम्बोत्पादोत्तरं सामर्थ्यगम्यत्वादुपचारात् शब्दवाच्यमुच्यते; तदुक्तम्—

"न तदात्मा परात्मेति संबन्धे सति वस्तुभिः। व्यावृत्तवस्त्वधिगमोऽप्यर्थादेव भवत्यतः ॥ १ ॥" इति।

एतेन यदुक्तं कुमारिलेन—

"नन्वन्यापोहकृच्छब्दो युष्मत्पक्षे तु वर्णितः। निषेधमात्रनैवेह प्रतिभासेऽवगम्यते ॥ १ ॥
किन्तु गौर्गवयो हस्ती वृक्ष इत्यादिशब्दतः। विधिरूपावसेये न मतिः शाब्दी प्रवर्तते ॥ २ ॥
यदि गौरित्ययं शब्दः समर्थोऽन्यनिवर्तने। जनको गवि गोबुद्धेर्मृग्यतामपरो ध्वनिः ॥ ३ ॥
ननु ज्ञानफलाः शब्दा न चैकस्य फलद्वयम्। अपवाद-विधिज्ञानं फलमेकस्य वः कथम्? ॥ ४ ॥
प्रागगौरिति विज्ञानं गोशब्दश्रावणे भवेत्। येनागोः प्रतिषेधाय प्रवृत्तो गौरिति ध्वनिः ॥ ५ ॥"

इति; तदपास्तम्, प्रागर्थप्रतिबिम्बरूपविध्यर्थस्यैवावसायात्; अनन्तरं च सामर्थ्यतो निषेधप्रतीतिः, एकस्यापि रात्रिभोजननिषेधार्थापकदिवाभोजनवत् क्रमिकविधि-निषेधज्ञानद्वयफलकत्वाविरोधात्। यदपि तेनैवोक्तम्—

"अगोनिवृत्तिः सामान्यं वाच्यं यत्परिकल्पितम्। गोत्ववस्त्वेव तैरुक्तमगोऽपोहगिरा स्फुटम् ॥ १ ॥

---

१ "विकल्पाः शब्दयोनयः, कार्यकारणता तेषां नार्थं शब्दाः स्पृशन्त्यपि" इति शिष्टं पादत्रयम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावान्तरात्मको भावो येन सर्वो व्यवस्थितः । तत्राश्वादिनिवृत्तात्मा भावः क इति कथ्यताम् ? ॥ २ ॥
नेष्टोऽसाधारणस्तावद् विशेषो निर्विकल्पनात् । तथाच शाबलेयादेरसामान्यप्रसङ्गतः ॥ ३ ॥
तस्मात् सर्वेषु यद् रूपं प्रत्येकपरिनिष्ठितम् । गोबुद्धिस्तन्निमित्ता स्याद् गोत्वादन्यच्च नास्ति तत् ॥ ४ ॥ ”

इति; तदपि प्रत्युक्तम्, बाह्यरूपतयाऽध्यस्तस्य बुद्ध्याकारस्यैव सर्वत्र शाबलेयादौ ‘गौर्गौः’ इति समानरूपतयाऽवभासनात्, तत्रैव भ्रान्तप्रतिपत्तृवशेन सामान्यव्यवहारात्, मुख्यसामान्यसामर्थ्यदर्शनेऽन्तरुपप्लवात्, द्विचन्द्रज्ञानवत् तत्र सामान्यभ्रान्त्युपपत्तेः, बुद्धेरव्यतिरिक्तत्वेनार्थान्तरानुगमाभावात्; परमार्थतोऽसामान्यरूपत्वेन तस्यापोहवाच्यतायां सिद्धसाधनानवकाशात् । यदपि ‘भ्रान्तस्य शब्दार्थत्वे बाह्यार्थानपेक्षत्वं स्यात्’ इत्युच्यते; तदपि न, पारम्पर्येण वस्तुप्रतिबद्धस्य भ्रान्तस्यापि विकल्पस्य मणिप्रभायां मणिबुद्धिवद् बाह्यार्थानपेक्षत्वासिद्धेः । यदपि ‘अपोहस्य निःस्वभावत्वात्, अरूपस्य परस्परतो भेदाभावात्, वृक्ष-रूपादिशब्दवदभिन्नसामान्यवचनानां गवादिपदानाम्, विशेषवचनानां च शाबलेयादिपदानां पर्यायतापत्तिः’ इति; तदपि न, भेदवदभेदस्याप्यभावेनाभिन्नार्थाभावे तत्र पर्यायत्वाऽऽसञ्जनस्य कर्तुमशक्यत्वात्, निर्बीजकल्पनायाश्चाव्यवस्थितत्वात्; तदुक्तम्,—

“रूपाभावेऽपि चैकत्वं कल्पनानिर्मितं यथा । विभेदोऽपि तथैवेति कुतः पर्यायता ततः ? ॥ १ ॥
भावतस्तु न पर्याया न पर्यायस्य वाचकाः । न ह्येकं वाच्यमेतेषामनेकं वेति वर्णितम् ॥ २ ॥” इति ।

न चैकेनानुगामिना विना बहुष्वेका श्रुतिर्न नियोक्तुं शक्येति वक्तव्यम्, इच्छामात्रप्रतिबद्धत्वात् शब्दानामर्थप्रति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नियमस्य । स्यादेतद् मा भूत् पर्यायत्वमेषाम्, अर्थभेदस्य कल्पितत्वात्; सामान्य-विशेषवाचित्वव्यवस्था तु विना सामान्य-विशेषाभ्यां कथमेषामिति ? । नैवम्, बह्व-ऽल्पविषयतत्संकेतानुसारतः सामान्य-विशेषवाचित्वाविरोधात्, वृक्ष-धवादिशब्दानामवृक्षा-ऽधवादिव्यवच्छेदमात्रानुस्यूतार्थप्रतिबिम्बजनकत्वात् । यदपि 'विनाऽपोह्यस्याधारस्य वा भेदं नापोहभेदः, तद्भेदश्च न वस्तुभूतं सामान्यमन्तरेण, इति किमपोहेन ?' इति; तदपि न, कल्पनयैव व्यावृत्तीनां भेदात्, तत्रापोह्यादिभेदस्यातन्त्रत्वात् । परमार्थतस्त्वनादिविकल्पवासना(ज)न्यविविक्तवस्तुसंकेतादेर्निमित्ताद् विकल्पानामेव भेदाभ्युपगमात्; तदुक्तम्—

"ताश्च व्यावृत्तयोऽर्थानां कल्पनाशिल्पिनिर्मिताः । नापोह्या-ऽऽधारभेदेन भिद्यन्ते परमार्थतः ॥ १ ॥

तासां हि बाह्यरूपत्वं कल्पितं न तु वास्तवम् । भेदा-ऽभेदौ च तत्त्वेन वस्तुन्येव व्यवस्थितौ ॥ २ ॥

स्वबीजानेकविश्लिष्टवस्तुसंकेतशक्तितः । विकल्पास्तु विभिद्यन्ते तद्रूपाध्यवसायिनः ॥ ३ ॥

नैकात्मतां प्रपद्यन्ते न भिद्यन्ते च खण्डशः । स्वलक्षणात्मका अर्था विकल्पः प्लवते त्वसौ ॥ ४ ॥

संसृज्यन्ते न भिद्यन्ते स्वतोऽर्थाः पारमार्थिकाः । रूपमेकमनेकं वा तेषु बुद्धेरुपप्लवः ॥ ५ ॥" इति ॥

यदपि 'अपोहस्य प्रतिपाद्यत्वे शब्द-लिङ्गयोः प्रामाण्यं न स्यात्; प्रतिपाद्याव्यभिचारित्वेनैव हि तयोः प्रामाण्यम्, प्रतिपाद्यश्चापोहो निःस्वभावः, इति क्व तयोरव्यभिचारित्वम् ?' इति; तदपि न, वस्तुभूतसामान्याभावेऽपि विजातीयव्यावृत्तस्वलक्षणमात्रेणान्वयोपपत्तेः, अविवक्षितभेदस्य स्वलक्षणस्यैव सामान्यलक्षणत्वात् । यदपि 'यथा स्वलक्षणादिषु समयासंभ-

वाद् न शब्दार्थत्वं तथाऽपोहेऽपि; अर्थं निश्चित्य हि समयः कर्तुं शक्यते; न चापोहः केनचिदिन्द्रियैर्व्यवसीयते, व्यवहारपूर्वं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यावस्तुत्वात्, इन्द्रियाणां च वस्तुविषयत्वात्; न चान्यव्यावृत्तं स्वलक्षणमुपलभ्य शब्दः प्रयोक्ष्यते, अन्यापोहादन्यत्र शब्दवृत्तेः प्रवृत्त्यनभ्युपगमात्; नाप्यनुमानेनापोहाध्यवसायः, न चान्वयविनिर्मुक्ता प्रवृत्तिः, 'शब्द-लिङ्गयोः' इत्यादिना तत्प्रतिषेधात्' इति; तदप्यत एव निरस्तम्, स्वलक्षणात्मनोऽपोहस्येन्द्रियैरेव गम्यत्वात्, अर्थप्रतिबिम्बात्मनश्च परमार्थतो बुद्धिस्वभावत्वेन स्वसंवेदनप्रत्यक्षत एव सिद्धेः, प्रसज्यप्रतिषेधात्मनोऽपि सामर्थ्यगम्यत्वात्। यदपि 'इतरेतराश्रयदोषप्रसक्तेरपोहे संकेतोऽशक्यक्रियः; तथाहि– अगोव्यवच्छेदेन गोः प्रतिपत्तिः, स चागौर्गोनिषेधात्मा, तत्र नञा निषेध्यो गौर्ज्ञातव्यः, अनिर्ज्ञातस्वरूपस्य निषेद्धुमशक्यत्वात्; एवं च गोरगौप्रतिपत्तिद्वारा प्रतीतिः, अगोश्च गौप्रतिपत्तिद्वारा, इति व्यक्तमितरेतराश्रयत्वम्, प्रतीते च प्राग् गवि किमपोहेन ?, अप्रतीते च कथं तत्प्रत्ययः ? इति; तदाह—

"सिद्धश्चागौरपोह्येत गोनिषेधात्मकश्च सः। तत्र गौरेव वक्तव्यो नञा यः प्रतिषिध्यते ॥ १ ॥
स चेदगोनिवृत्तात्मा भवेदन्योन्यसंश्रयः। सिद्धश्चेद् गोरपोहार्थं वृथाऽपोहप्रकल्पनम् ॥ २ ॥
गव्यसिद्धे त्वगौर्नास्ति तदभावेऽपि गौः कुतः ? ।" इति।

अपिच, एवं नीलोत्पलादिशब्दानामर्थान्तरनिवृत्तिविशिष्टार्थाभिधायकत्वमपि दिङ्नागोक्तं विरुद्धमेव, अनीला-ऽनुत्पलादिव्यवच्छेदरूपतयाऽभावैकरूपाणां नीलोत्पलाद्यर्थानामाधाराधेयभावाद्यनुपपत्तेः; तदुक्तम्– "नाधाराधेयवृत्त्यादिसंबन्धश्चाप्यभावयोः" इति। न चानीला-ऽनुत्पलाभ्यां व्यावृत्तं वस्त्वेवार्थान्तरनिवृत्त्या विशिष्टमुच्यत इति युक्तम्; स्वलक्षणस्याऽवाच्यत्वात्। न च स्वलक्षणस्यान्यनिवृत्त्या विशिष्टत्वमपि युज्यते, वस्तव-ऽवस्तुनोः संबन्धाभावात्, वस्तुद्वयाधारत्वात् तस्य। ॥४०३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावेऽपि नीलादिबुद्ध्याऽपोहाध्यवसायेन तस्य विशेषणत्वायोगात् । ज्ञातं सद्यत् स्वाकारानुरक्तबुद्धिं जनयति, तस्यैव विशेषणत्वात् । न चेदमपोहे युज्यते, प्राग् ज्ञानात् स्वाकारधियोऽभावात्, तया विशेष्यानुपरक्तेश्च, भावा-ऽभावयोर्विरोधात्; तदाह—

"न चासाधारणं वस्तु गम्यतेऽपोहवत्तया । कथं वा परिकल्प्येत संबन्धो वस्त्व-ऽवस्तुनोः? ॥ १ ॥
स्वरूपसत्त्वमात्रेण न स्यात् किञ्चिद् विशेषणम् । स्वबुद्ध्या रज्यते येन विशेष्यं तद् विशेषणम् ॥ २ ॥
न चाप्यश्वादिशब्देभ्यो जायतेऽपोहबोधनम् । विशेष्यबुद्धिरिष्टेह न चाज्ञातविशेषणा ॥ ३ ॥
न चान्यरूपमन्यादृक् कुर्याज्ज्ञाने विशेषणम् । कथं चान्यादृशे ज्ञाने तदुच्येत विशेषणम्? ॥ ४ ॥
अथान्यथा विशेष्येऽपि स्याद् विशेषणकल्पना । तथा सति हि यत् किञ्चित् प्रसज्येत विशेषणम् ॥ ५ ॥
अभावगम्यरूपे च न विशेष्येऽस्ति वस्तुता । विशेषितमपोहेन वस्तु वाच्यं न तेऽस्त्यतः ॥ ६ ॥" इति ।

अपिच, व्यक्तीनामवाच्यत्वेनानपोह्यत्वात् सामान्यस्य तथात्वेन वस्तुत्वं स्यात् । अपोहास्तु नापोह्याः, अभावरूपत्यागेन वस्तुत्वापातात्, वस्तुत्वानियतत्वाच्च निषेधप्रतियोगित्वस्य; तदुक्तम्—

"यदा चाशब्दवाच्यत्वाद् न व्यक्तीनामपोह्यता । तदापोह्येत सामान्यं तस्यापोहाच्च वस्तुता ॥ १ ॥
नापोह्यत्वमभावानामभावाभाववर्जनात् । व्यक्तोऽपोहान्तरेऽपोहस्तस्मात् सामान्यवस्तुनः ॥ २ ॥" इति ।

अपिच, अपोहानां परस्परतो वैलक्षण्ये गोशब्दाभिधेयस्य गोनिषेधवैलक्षण्याद् भावत्वं स्यात्, अभावनिवृत्तिरूप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वाद् भावस्य। अवैलक्षण्ये च गौरश्वगौः प्रसज्येत, तद्वैलक्षण्येन तादात्म्यासिद्धेः। न चानादिकालप्रवृत्तविचित्रतथार्थविकल्पवासनाभेदाद् भिन्ना इवार्थात्मान इवास्य भावा अपोहाः समारोप्यन्त इति युक्तम्, अवस्तुनि वासनाऽसंभवात्, वासनाहेतोर्निर्विषयप्रत्ययस्यायोगात्' इति। तदपि न, अन्यग्रहणमन्तरेणैव प्रतिभासरूपगवावसाये तदनन्तरमगोव्यावृत्तेः सामर्थ्यलभ्यत्वेऽन्योन्याश्रयाभावात्, परमार्थतः क्वचिदप्यपोहविशिष्टार्थानभिधानेनाधाराधेयभावाद्यनुपपत्त्ययोगात्, नीलोत्पलादिप्रतिभासाकारेष्वेव प्रातिभासिकवैशिष्ट्याद्याकारभावेनोपपत्तेः 'नीलोत्पलादिशब्दा अर्थान्तरनिवृत्तिविशिष्टानर्थानाहुः' इत्याचार्योक्तेः; वस्तुतो बुद्ध्यारूढार्थाभिधानेऽपि बाह्यार्थाध्यवसायिविकल्पोत्पादनात्, जात्याद्यभिधाननिराकरणप्रयोजनकोपचाराश्रयणेनादुष्टत्वात्; तदुक्तम्—

"अर्थान्तरनिवृत्त्याह विशिष्टानिति यत् पुनः। प्रोक्तं लक्षणकारेण तत्रार्थोऽयं विवक्षितः॥ १ ॥
अन्योन्यत्वेन ये भावा हेतुना करणेन वा। विशिष्टा भिन्नजातीयैरसंकीर्णा विनिश्चिताः॥ २ ॥
वृक्षादीनाह तान् ध्वानस्तद्भावाध्यवसायिनः। ज्ञानस्योत्पादनादेतज्जात्यादेः प्रतिषेधनम्॥ ३ ॥
बुद्धौ येऽर्था विवर्तन्ते तानाह जननादयम्। निवृत्त्या च विशिष्टत्वमुक्तमेषामनन्तरम्॥ ४ ॥" इति।

अगोव्यावृत्तेश्च वस्तुरूपाया एव विशेषणतयोपादानेन स्वाकारधिया विशेषानुरञ्जनस्याप्युपपत्तेः। न च पुरुषे दण्डस्येवेतरव्यावृत्तेर्गवादेर्भेद एव विशेषणत्वोपपत्तिरिति वाच्यम्, अनुपकारकस्य विशेषणत्वायोगात्, उपकारकत्वस्य च युगपद्-ऽयुगपत्कालभावयोः सर्वात्मनापरिनिष्पत्त्य-ऽसामर्थ्याभ्यामयोगात्, काल्पनिकस्य विशेषणविशेष्यभावस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्पनारचितं भेदमाश्रित्योपपत्तेः । 'व्यक्तीनामवाच्यत्वेनानपोह्यता' इत्यत्र च हेतुरेवासिद्धः, सांवृतस्य वाच्यत्वस्य तत्र प्रसिद्धेः, तात्त्विकं तु वाच्यत्ववदपोह्यत्वमपि न तत्रेति सिद्धसाध्यता । इत्थं च 'सामान्यस्यापोह्यत्वेन वस्तुता' इत्यत्र हेतोरसिद्धत्वम्, अनैकान्तिकत्वं च । न चापोहेऽपि वस्तुता, साध्यविपर्ययहेतोर्बाधकप्रमाणाभावात्, भावे विधिरूपतयाऽपोह्यत्वेऽप्यभावत्वेनानपोह्यत्वात्, भवतामपि प्रकृती-श्वरादिजन्यत्वस्य निषेधेऽपि तस्य वस्तुत्वानापत्तिवदस्माकमपोह्यत्वेऽप्यभावस्य वस्तुत्वानापत्तेः, प्रतियोगित्वस्य वस्तुत्वानियतत्वात्, तदभावाभावत्वादिरूपत्वे तस्य षष्ठ्यर्थाद्यनिरुक्तेः, विशेषणत्वादिवत् कल्पनामात्रनिर्मितत्वात्, आभाससिद्धस्यापि विधि-निषेधोपपत्तेः; अभावग्रहे प्रतियोगिग्रहस्य हेतुत्वेऽपि तत्रानाभासिकत्वस्य गौरवेणाप्रवेशात्; तदिदमुक्तम्—

"नाभावोऽपोह्यते ह्येवं नाभावो भाव इत्ययम् । भावस्तु न तदात्मेति तस्यैष्टैवमपोह्यता ॥ १ ॥
यो नाम न यदात्मा हि स तस्यापोह्य उच्यते । न भावोऽभावरूपश्च तदपोहे न वस्तुता ॥ २ ॥
प्रकृती शादिजन्यत्वं न हि वस्तु प्रसिध्यति । नातोऽसतोऽपि भावत्वमिति क्लेशो न कश्चन ॥ ३ ॥"

अपोहवैलक्षण्ये गोरगौत्वप्रसङ्गोऽपि वृथा, अश्वादिरूपादगोवस्तुनो गोवस्तुनः स्वरूपतो वैलक्षण्यात्, अपोहभेद-सत्त्वयोश्च तथाविधवासनामूलविकल्पविषयत्वात्, कल्पितवृत्तान्तार्थाद्युपस्थित्यनुरोधेनावस्तुन्यपि वासनोपगमात्; तदुक्तम्—

"अगोतो विनिवृत्तेश्च गौर्विलक्षण इष्यते । भाव एव ततो नायं गौरगौर्मे प्रसज्यते ॥ १ ॥
अवस्तुविषयेऽप्यस्ति चेतोमात्रविनिर्मिता । विचित्रकल्पनाभेदरचितेष्विव वासना ॥ २ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्च वासनाभेदाद् भेदः सद्रूपतापि च । प्रकल्प्यतेऽप्यपोहानां कल्पनारचितेष्विव ॥ ३ ॥"

यदपि 'एवं वाचकाभिमतस्याप्यपोह्यस्याभावः, वासनाभेदात्, वाच्यापोहभेदाद् वा सामान्यविशेषवाचिशब्दभेदानुपपत्तेः। न च प्रत्यक्षत एव शब्दानां कारणभेदाद् विरुद्धधर्माध्यासाच्च भेदः प्रसिद्ध एवेत्युक्तानुपपत्तिरिति वाच्यम्, वाचकशब्दमङ्गीकृत्यैवमुक्तेः, श्रोतृज्ञानावसेयस्य स्वलक्षणात्मनः शब्दस्यावाचकत्वात्, संकेतकालानुभूतस्य व्यवहारकाले चिरविनष्टत्वात्। अगम्यगमकत्वं चैवमवस्तुनोः शब्दा-ऽर्थयोः स्यात्, खपुष्प-शशशृङ्गवत् । न च मेघाभावाद् वृष्ट्यभावप्रतीतेर्नायमेकान्त इति वाच्यम्, विविक्ताकाशा-ऽऽलोकाद्यात्मकत्वाद् मेघाद्यभावस्य' इति; तदप्येतेनैव निरस्तम्, वाच्यापोहस्येव वाचकापोहस्यापि प्रतिबिम्बात्मकस्य भेदव्यवस्थाऽविरोधात्, वाच्य-वाचकापोहयोर्बाह्यवस्तुत्वेन भ्रान्तैरध्यवसितत्वेन सांवृतवस्तुत्वादवस्तुत्वेनागम्यगमकत्वापादनस्याप्ययुक्तत्वात्; पारमार्थिकावस्तुत्वेन पारमार्थिकगम्यगमकभावनिषेधे च सिद्धसाधनात्; तदुक्तम् —

"न वाच्यं वाचकं वास्ति परमार्थेन किञ्चन । क्षणभङ्गिषु भावेषु व्यापकत्ववियोगतः ॥ १ ॥" इति ।

सांवृतगम्यगमकभावनिषेधे तु न तस्य सामर्थ्यम्, काल्पनिकेषु महाश्वेतादिशब्दार्थेषु व्यभिचारात्, शब्दस्वलक्षणस्यापि तत्राव्यापकत्वेनावाचकत्वात्, कल्पनातो बोधापलापस्य च कर्तुमशक्यत्वात्; तदुक्तम्—

"तस्मात् तद्द्वयमेष्टव्यं प्रतिबिम्बादिसांवृतम् । तेषु तद्व्यभिचारित्वं दुर्निवारमतः स्थितम् ॥ १ ॥"

'द्वयम्' इति वाच्यं वाचकं च । 'प्रतिबिम्बादि-' इत्यादिशब्देन निराकारज्ञानाभ्युपगमेऽपि स्वगतं किञ्चित् प्रतिनिय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तमनर्थेऽर्थत्वाध्यवसायिरूपं गृहीतम्। 'तेषु' कल्पनारचितेष्वर्थेषु। 'तत्' इति तस्मात्, तस्य वाऽवस्तुत्वस्य हेतोः। यदप्यपोहवादे– 'नीलोत्पलादिशब्दानां विशेषणविशेष्यभावस्य सामान्याधिकरण्यस्य च लोकप्रसिद्धस्यापह्नवः स्यात्, नीलोत्पलादिशब्दानां शबलार्थाभिधायित्व एव तदुपपत्तेः; 'न हि तत् केवलं नीलम्, न च केवलमुत्पलम्, समुदायाभिधेयत्वात्' इत्यादिना तेषां शबलार्थाभिधायित्वस्योपपादितत्वात्' इति; तदपि न, नीलपदेन पीतादिव्यावृत्तपदार्थाध्यवसायिनो भ्रमर-कोकिला-ऽञ्जनादिषु संशय्यमानरूपस्य, उत्पलपदेन च भ्रमरादिभ्यो व्यवच्छिद्यानुत्पलव्यावृत्तवस्तुविषये व्यवस्थाप्यमानस्य परि-निश्चितात्मकस्य विकल्पप्रतिबिम्बस्य जननात्, परस्परं व्यवच्छेदकव्यवस्थाभावाद् विशेषणविशेष्यभावस्य, द्वाभ्यां त्वनीला-ऽनुत्पलव्यावृत्तैकप्रतिबिम्बात्मकवस्तुप्रतिपादनादेकार्थवृत्तितया सामान्याधिकरण्यस्याप्यविरोधात्। परपक्षे तु तद्व्यवस्था दुर्घटा; तथाहि– विधिशब्दार्थपक्षे नीलादिपदेन नीलादिस्वलक्षणेऽभिहिते उत्पला-ऽञ्जनादिविशेषसंशयानुपपत्तिः, सर्वात्मना नीलस्याभिहितत्वात्, एकस्यैकदैकप्रतिपत्रपेक्षया ज्ञाता-ऽज्ञातत्वविरोधात्। एवमुत्पलादिशब्दप्रयोगाकाङ्क्षापि न स्यात्, तदर्थस्य नीलशब्देनैव कृतत्वात्। न च नीलशब्देनैकदेशाभिधानादयमदोषः, एकस्य वस्तुनो देशानुपपत्तेः, एकत्वा-ऽनेकत्व-योर्विरोधात्। न च नीलो-त्पलपदाभ्यां नीलत्वो-त्पलत्वविशिष्टद्रव्याभिधानाद् नाकाङ्क्षाद्यनुपपत्तिः, नीलशब्देनाधिकृत-द्रव्यस्य सर्वात्मनाभिधाने उत्पलश्रुतेर्वैयर्थ्यप्रसङ्गस्य तदवस्थत्वात्। अर्थान्तरसंशयव्यवच्छेदायोत्पलश्रुतेः सार्थक्ये च भ्रान्तिसमारोपिताकारव्यवच्छेदमात्रस्यैव प्रतिपादने विध्यर्थपक्षक्षतेः, तद्विषयकानिश्चयचेतसस्तद्विषयकानिश्चयने ततस्तद्विषय-कारोपचित्तप्रतिबन्धकत्वेन संशयविषयस्य शब्दार्थत्वायोगाच, समानप्रकारकतादेः प्रतिबन्धकतायां निवेशे गौरवात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यच्चोद्द्योतकरेणोच्यते- 'निरंशमेकं वस्तु सर्वात्मना विषयीकृतम्, नांशेन, इति विकल्पस्यैवानवतारः, सर्वशब्दस्यानेकार्थविषयत्वात्, एकशब्दस्य चावयववृत्तित्वात्' इति । तद् वाक्यार्थापरिज्ञानविजृम्भितम्, 'नीलशब्देन सर्वात्मना तत् प्रकाशितम्' इत्यत्र 'सर्वात्मना' इत्यस्य 'स्वाभिधेयत्वव्याप्यस्वभाववत्त्वेन' इत्यर्थात्, कृत्स्नै-कदेशविकल्पानुपपत्त्युद्भावनस्य तत्र वाक्छलमात्रत्वात्; विशेषणशब्देन तादृशस्यैव तद्वस्तुनोऽभिहितत्वेन विशेष्यशब्दप्रयोगानुपपत्तेः, प्रयोगे वा पर्यायताऽऽपातात्; तदुक्तम् —

"अन्यथैकेन शब्देन व्याप्त एकत्र वस्तुनि । बुद्ध्या वा नान्यविषय इति पर्यायता भवेत् ॥ १ ॥" इति ।

अस्मत्पक्षे तु नायं दोषः, नीलोत्पलश्रुतिजनितप्रतिबिम्बाभ्यामनीला-ऽनुत्पलव्यावृत्तस्याध्यवसितबाह्यैकरूपस्य विकल्पप्रतिबिम्बस्यानुरोधात् सांवृतसामानाधिकरण्योपपत्तेः, उभयोरभिन्नप्रतिबिम्बजनकत्वरूपपर्यायत्वायोगात् । यदपि 'लिङ्ग-संख्या-क्रिया-कालादिभिः संबन्धोऽपोहस्यावस्तुत्वादयुक्तः; न च लिङ्गादिविविक्तः पदार्थः शक्यः संबन्धेनाभिधातुम्; न च व्यावृत्त्याधारभूताया व्यक्तेर्वस्तुत्वात् लिङ्गादिसंबन्धात् तद्द्वारेणापोहस्याप्यसौ व्यवस्थाप्यः, व्यक्तेर्निर्विकल्पकज्ञान-विषयत्वाल्लिङ्ग-संख्यादिसंबन्धेन व्यपदेष्टुमशक्यत्वात्, अपोहस्य तद्द्वारेण तद्व्यवस्थाऽसिद्धेः' इति; तदपि लिङ्गादीनां वस्तुधर्मत्वे शोभते, न तु स्वतन्त्रेच्छाविरचितसंकेतशालित्वेन काल्पनिकत्वे । वस्तुत्वे च लिङ्गस्यैकत्र तटाख्ये वस्तुनि लिङ्गत्रययोगात् त्रैरूप्येण सदा शबलप्रतिपत्तिप्रसङ्गः । विवक्षावशादेकरूपप्रतिपत्त्युपगमे च तस्यास्त्र्यात्मकवस्तुविषयताया अनुपपत्तिः, तदाकारशून्यत्वात्, चक्षुर्विज्ञानस्येव शब्दविषयतायाः । यत्तु 'संस्त्यान-प्रसव-स्थितिषु यथाक्रमं स्त्री-पुं-नपुंसक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवस्था' इति; तन्न, तटादिवदन्यत्राप्येवमविशेषेण त्रिलिङ्गतापत्तेः, स्थित्यादिषु खरविषाणादिषु च तदभावेऽपि 'स्थितिः, स्थानम्, स्वभावः, अस्वभावः, निरुपाख्यम्, तुच्छता' इत्यादिशब्दैर्लिङ्गत्रयप्रतिपत्तिदर्शनाच्च । 'स्त्रीत्वादयो गोत्वादय इव सामान्यविशेषाः' इत्यन्यः; तदपि न, तेष्वेव सामान्यविशेषेष्वन्तरेणाप्यपरं सामान्यविशेषं 'जातिः, भावः, सामान्यम्' इत्यादेः स्त्री-पुं-नपुंसकलिङ्गस्य प्रवृत्तिदर्शनात् । यदि तु सामान्यस्याप्यस्यापराणि सामान्यानीष्यन्ते, वैयाकरणैः प्रत्ययाभिधानान्वयव्यापारकार्योन्नीयमानरूपा हि जातयः; न हि तासां शास्त्रान्तरपरिदृष्टा नियमव्यवस्थेति; तदुक्तम्—

"अर्थजात्यभिधानेऽपि सर्वे जातिविधायिनः । व्यापारलक्षणा यस्मात् पदार्थाः समवस्थिताः ॥ १ ॥" इति ।

तथाप्यवस्तुनि लिङ्गप्रतीत्यनुरोधाद् व्याकरणनियन्त्रितपरिभाषाविशेषप्रतिसंधानमहिम्नाऽर्थप्रतिबिम्बप्रतिबन्धसांवृतलिङ्गोत्पत्तिरेव वक्तुं युक्ता । न चैवं विरुद्धलिङ्गयुताद् घटादिपदाद् नियतलिङ्गोत्पत्तिर्मा भूत्, घटाद्यर्थप्रतिबिम्बोत्पत्तिस्तु स्यादिति वाच्यम्, रूपादिसामग्रीविरहे घटानुत्पत्तिवद् नियतलिङ्गसामग्रीविरहे नियतार्थप्रतिबिम्बानुत्पत्तेः । संख्याया अपि वास्तवत्वे 'आपः, दाराः, सिकताः, वर्षाः' इत्यादावसत्यपि वस्तुनो भेदे बहुत्वसंख्या प्रवर्तमाना न घटेत; नापि 'वनम्, त्रिभुवनम्, जगत्, षण्णगरी' इत्यादिष्वसत्यप्यभेद एकत्वसंख्या व्यपादिश्येत । अथैकदारव्यक्तावप्यवयवगतबहुत्वमादाय बहुत्वव्यपदेशः, वनशब्देऽपि धवादिव्यक्तिगतजात्यैक्यमादायैकत्वव्यपदेशः; भाक्तं वा तत्रैकत्वमिति चेत् । न, एक-बहुवधू-वृक्षाद्यर्थे वधूवृक्षादिपदेऽपि बहुत्वै-कत्वप्रसक्तेः; विवक्षाऽभावात् तत्र तदप्रसक्तौ च विवक्षाया बहुत्वादिप्रतीत्युत्पादकत्वापेक्षया सांवृतबहुत्वाद्युत्पादकत्व-कल्पनाया एवौचित्यात्; अन्यथा घट-वनादिष्वेकाकारैकत्वप्रत्ययानुपपत्तेः । क्रिया-कालयोरपि वस्तुत्वे 'सत्ताऽस्ति, विद्यमा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नकालोऽस्ति' इत्यादौ स्वास्मिन् स्वप्रतीत्यनुपपत्तिः, सांवृतत्वे तु तादृशभेदमादायोपपत्तिरिति द्रष्टव्यम् । यदपि 'आख्यातेष्वन्यनिवृत्तेरसंप्रत्ययादव्यापिन्यपोहव्यवस्था' इति; तदपि न, जिज्ञासितेऽर्थे शब्दप्रयोगेणाभीष्टार्थप्रतिपत्तौ सामर्थ्यात्, उत्सर्गतोऽनभीष्टव्यवच्छेदप्रतीतेः—

"तथाहि पचतीत्युक्ते नोदासीनोऽवतिष्ठते । भुङ्क्ते दीव्यति वा नेति गम्यतेऽन्यनिवर्तनम् ॥ १ ॥"

यच्च—"'पचति' इत्यनिषिद्धं तु स्वरूपेणैव तिष्ठति' इत्युच्यते, तत्र स्ववचनव्याघात एव, एवकारेणान्यरूपनिषेधस्यैवोपदर्शनात् । यदपि "'पचति' इत्यादौ पूर्वापरीभूतावयवक्रियात्वरूपस्य साध्यत्वस्य, 'अभूद् भविष्यति' इत्यादौ च भूतादिकालविशेषस्य प्रतीतिरपोहवादे न स्यात्, अपोहस्य निष्पन्नत्वात्' इत्युच्यते; तदपि न, निरुपाख्ये बाह्यवस्तुत्वारोपेण निष्पन्नत्वादिधर्मारोपवदेव साध्यत्वादिधर्मारोपस्याप्युपपत्तेः सांवृतार्थप्रतिपत्तिविशेषे शास्त्रकृतनियमापेक्षणेन चानतिप्रसङ्गात् । यदपि 'विध्यादावन्यपोहनिरूपणम्, 'न न पचति चैत्रः' इत्यत्र च नञाऽपरेण नञा योगेनैवापोहः, प्रतिषेधद्वयेन च विधिरेवावसीयते' इति; तदपि न, विध्यादेरर्थस्य निषेध्यादपि व्यावृत्ततयाऽवस्थितत्वात्, नञ्द्वयस्थलेऽपि नञन्तराभ्यामवसेयस्यान्यापोहस्य जागरूकत्वात्; तदुक्तम्—

"नासौ न पचतीत्युक्ते गम्यते पचतीति हि । औदासीन्यादियोगश्च तृतीये नञि गम्यते ॥ १ ॥
तुर्ये तु तद्विविक्तोऽसौ पचतीत्यवसीयते । तेनात्र विधिवाक्येन सममन्यानिवर्तनम् ॥ २ ॥"

यदपि 'चादीनामसंबन्धवचनत्वाद् नञ्योगाभावेन तत्रान्यापोहस्याव्यापकत्वम्' इति; तदपि न, नञ्योगेऽपि तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामर्थ्यादन्यनिषेधप्रतीत्यबाधात्; तदाह;—

"समुच्चयादिरर्थश्चार्थः कश्चिच्चादेरभीप्सितः । तदन्यस्य विकल्पादेर्भवेत् तेन व्यपोहनम् ॥ १ ॥" इति ।

यदपि 'कल्माषवर्णवत् शबलैकरूपो वाक्यार्थः, तत्रान्यनिवृत्त्यनुपपत्तिः, तदवयवस्य विवेक्तुमशक्यत्वात् 'चैत्र ! गामानय' इत्यादावचैत्रादिव्यवच्छेदस्य पदार्थस्यैव प्रत्ययात्' इत्युच्यते; तदपि न, कार्यकारणभावेन संबद्धानां पदार्थानामेव वाक्यार्थत्वात्, तद्व्यतिरिक्तनिरवयवस्य शबलात्मनः कल्माषवर्णप्रख्यस्य वाक्यार्थस्यानुपलब्धेः । यदप्युच्यते– 'अनन्यापोहशब्दादौ वाच्यं न च निरूप्यते' इति; तदपि न, वितथविकल्पवासनावशात् तत्र तथाविधार्थविकल्पक्रमेणोन्यापोहनिषेधप्रतिप्रवृत्तेः । यदपि 'ज्ञेय-प्रमेयादिशब्दानां न किञ्चिदपोह्यमस्ति, सर्वस्यैव ज्ञेयादिस्वभावत्वात्, इत्यव्यापिन्यपोहव्यवस्था; यदि वा ज्ञेयं कल्पितं कृत्वा तद्व्यवच्छेदेन ज्ञेयेऽनुमानमिष्यते, तदा वरं वस्त्वेव विधिरूपशब्दार्थत्वेन कल्पितं भवेत्' इति; तदपि न, संशयादिनिरासार्थं वाक्यगर्भितस्यैव ज्ञेयादिशब्दस्य प्रयोगात्, 'क्षणिकत्वेन ज्ञेया भावाः' इत्यादिवाक्यस्थेन तेन क्षणिकत्वादिनाऽज्ञेयत्वादेः समारोपितस्य व्यावर्तनात् । कथं तर्हि 'अनित्यत्वेन शब्दाः प्रमेया नवा ? इति प्रस्तावे 'प्रमेयाः' इति प्रयोगे प्रकरणानभिज्ञस्यापि प्रतिपत्तुः केवलशब्दश्रवणात् प्लवमानरूपा शाब्दी धीः ? इति चेत् । न कथञ्चित्, 'घटेनोदकमानयामि, उताञ्जलिना' इति प्रस्तावे तदनभिज्ञस्य 'घटेन' इति शब्दादिव पूर्ववाक्यार्थानुसरणं विनाऽऽकाङ्क्षाया अपरिपूर्तेः, वाक्येषूपलब्धस्यार्थवतः शब्दस्य सादृश्येनापहृतबुद्धेः केवलशब्दश्रवणात् केवलमर्थप्रत्ययाभिमान इति दिग् ॥८॥

अत्र समाधानवार्तामाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ये त्वभिदधत्येवं वाच्यवाचकलक्षणः। अस्ति शब्दार्थयोर्योगस्तत्प्रतीत्यादि तत् ततः॥९॥

अन्ये तु– जैनाः, अभिदधति, एवं – वक्ष्यमाणप्रकारेण यदुत, वाच्यवाचकलक्षणः– अर्थे शब्दवाच्यतास्वभावरूपः, शब्दे चार्थवाचकतास्वभावरूपः, शब्दा-ऽर्थयोर्योगः– संबन्धः, अस्ति 'तत्त्वतः' इति शेषः, संवृत्या तदस्तित्वस्य परेणाऽप्यभ्युपगमात्। तत्– तस्मात् कारणात्, ततः– शब्दात्, तत्प्रतीत्यादि– वाच्यप्रतीति-प्रवृत्ति-प्राप्तिनिवेदनाद्यागोपाला-ङ्गनं प्रसिद्धं युज्यते ॥ ९ ॥

अन्यथा चैतदनुपपत्तिरित्याह—

नैतद् दृश्य-विकल्प्यार्थैकीकरणेन भेदतः। एकप्रमात्रभावाच्च तयोस्तत्त्वाप्रसिद्धितः॥१०॥

एतत्– शब्दाद् वाच्यप्रतीत्यादि, दृश्य-विकल्प्यार्थैकीकरणेन– विकल्प्येऽर्थे दृश्यार्थैक्याध्यवसायेन, न युज्यते। कुतः? इत्याह– भेदतः– दृश्य-विकल्प्यार्थयोर्भेदात्, तदभेदाध्यवसायायोगात्। न च मुख्यभेदस्य सांवृताभेदधियोऽविरोधित्व-मिति वाच्यम्, मुख्यभेदशालित्वे विकल्प्यस्य दृश्यत्वापत्तेः, स्वलक्षणवत्। हेत्वन्तरमाह– एकप्रमात्रभावाच्च– दृश्य-विकल्प्य-प्रमातृक्षणयोरेकत्वाभावाच्च, तयोः– दृश्य-विकल्प्ययोः, तत्त्वाप्रसिद्धितः– ऐक्याप्रसिद्धेः, परस्परं स्वलक्षण इतरप्रतियोग्यभा-वेनैक्यस्य दुरध्यवसानत्वात् ॥ १० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यादेतद् दृश्य-विकल्प्यार्थैकीकरणं नामावाह्यालम्बनस्य विकल्प्यस्य वाह्यालम्बनत्वेन प्रतीतिः, न तु वस्तुगत्या भिन्नयोस्तयोरेकीकरणम्; तथाचाह—

शब्दात्तद्वासनाबोधो विकल्पैश्च ततो हि यत्। तदित्थमुच्यतेऽस्माभिर्न ततस्तदसिद्धितः ११

शब्दादिति कारणे कार्योपचारात् शब्दज्ञानात्, तद्वासनाबोधः– विशिष्टविकल्पवासनाबोधः, विकल्पश्च– विशिष्टविकल्पश्च, ततो हि– तत एव विशिष्टवासनाबोधात्, यद्– यस्मात्; तत्-तस्मात्, इत्थमुच्यते–'दृश्य-विकल्प्यावर्थावेकीकृत्य' इत्येवमभिधीयते, अस्माभिः, विकल्पवैशिष्ट्याद् गवाद्यर्थप्रतीतेर्गवाद्यर्थप्रवृत्तेः, भ्रमात् प्रवृत्तस्यापि स्वलक्षणप्रतिबन्धेन प्राप्तेर्गवादिबोधनाद्यर्थ निवेदनादेश्चोपपत्तेरिति भावः । एतदाशङ्क्याह– न– नैतदुक्तम्, ततः– शब्दात्, तदसिद्धितः– विशिष्टवासनाबोधासिद्धेः ॥ ११ ॥

एतदेवोपपादयति—

विशिष्टं वासनाजन्म बोधस्तच्च न जातुचित्। अन्यतस्तुल्यकालादेर्विशेषोऽन्यस्य नो यतः

विशिष्टम्– तथाविधविकल्पजननस्वभावम्, वासनाजन्म-वासनोत्पाद एव, बोधः– प्रकृतवासनाबोधो वाच्यः; तच्च– विशिष्टवासनाजन्म, न जातुचित्– न कदाचित्, युज्यते। कथम्? इत्याह– अन्यतः– अन्यस्मात् सहकारिणः, तुल्य-

१ सर्वत्र मूले 'ल्पस्य' इति पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालादेः– तुल्यकालादतुल्यकालाद्वा, विशेषः– विशिष्टीभावः, अन्यस्य– विशेषस्य, नो– नैव, यतः– यस्माद्धेतोः ॥ १२ ॥

एतदेव विकल्पदोषोपन्यासद्वारेणाह—

निष्पन्नत्वादसत्त्वाच्च द्वाभ्यामन्योदयो न सः। उपादानाविशेषेण तत्स्वभावं तु तत्कुतः?॥१३॥

निष्पन्नत्वात् तुल्यकालात् सहकारिणो न विशेषः, विशेष्यस्य तदानीमनाधेयातिशयत्वात्, विशेषस्य चातिशयत्वादिति भावः। असत्त्वाच्च तुल्यकालादपि सहकारिणो न विशेषः, तदा तस्यासत्त्वात्, असतश्चोपकारकरणायोगादिति भावः। द्वयोर्द्वयोऽपर एव विशेष इत्याशङ्क्याह– द्वाभ्याम्– उपादान-सहकारिभ्याम्, अन्योदयः– विशिष्टापरोत्पादः, न, सः– विशेषः। कुतः? इत्याह– उपादानाविशेषेण– पूर्ववदविशिष्टकार्यजननस्वभावत्वातिरस्कारेणान्योदयस्यैवासिद्धेरित्यर्थः। तदेवोपादानं तत्स्वभावम्, यदन्यदप्यन्योदयकारीत्याशङ्क्याह– तत्स्वभावं त्विति– अनुपकारिणमपि सहकारिणमासाद्य विशिष्टापरजननस्वभावमेवेत्यर्थः, तत्– उपादानम्, कुतः?– न काचिदत्र युक्तिः, वाङ्मात्रमेतदिति भावः ॥ १३ ॥

'स्वहेतोर्विशिष्टजननस्वभावस्यैवोत्पत्तिः' इत्याशयं परिहरति—

नह्युक्तवत्स्वहेतोस्तु स्याच्च नाशः सहेतुकः। इत्थं प्रकल्पने न्यायादत एतन्न युक्तिमत्॥१४॥

नहि, उक्तवत्– तुल्यकाला-ऽतुल्यकालसहकारिकृतविशेषाभाववत्, स्वहेतोस्तु– स्वकारणादेव, विशेषाभावे त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्स्वभावमुपादानं युक्तम्; तथाहि– नास्यापि स्वहेतुरविशिष्टः सन्निदं विशिष्टं जनयेत्, न चान्यतो विशिष्येतापि, इति केवलस्यैव वैशिष्ट्यमेष्टव्यम्; एवं च सर्वत्रैवैतत्, इति प्रतीतिवैशिष्ट्याभावे तद्वासनाबोधानुपपत्तिरिति। दोषान्तरमाह— स्याच्च नाशो भवतामपि, सहेतुकः– उत्पादहेतुव्यतिरिक्तहेतुसापेक्षः। इत्थं प्रकल्पने– 'स्वहेतोरेवानुपकारिणमपि सहकारिणमवाप्य विशिष्टापरजननस्वभावमेतत्' इत्येवं प्रकल्पने, एतदपि वक्तुं शक्यत एव–'आकिञ्चित्करमपि नाशहेतुमवाप्य निवृत्तिस्वभावमेतज्जातम्' इति विशिष्टोत्पादवत् सहेतुको नाश आपन्नः, न्यायात्– भवत्कल्पितयुक्तेः। अनिष्टं चैतद् भवतः। अतः– अस्मात् कारणात्, एतत्– इत्थं स्वभावकल्पनम्, न युक्तिमत्। एवं च स्वनीतितो विकल्पानुपपत्तेर्वचनमात्रमेवैतद् यदुत– 'दृश्य-विकल्प्यार्थैकीकरणं नामाबाह्यालम्बनस्य विकल्प्यस्य बाह्यालम्बनत्वेन प्रतिपत्तिः' इति। विरुद्धं च बाह्याकाराया धियोऽबाह्यालम्बनत्वम्, अन्यथा पीताकाराया अप्यपीतालम्बनत्वेनाव्यवस्थापत्तेः। एतेन 'शाब्दविकल्पेऽसद्विषयकृतं वैशिष्ट्यं प्रत्यक्षसिद्धमेव, वासनायां वैशिष्ट्यं तु तत्कुर्वद्रूपत्वं स्वभावत एव' इत्यपि निरस्तम्, तत्कुर्वद्रूपस्यापि कादाचित्कत्वेन हेतुनियम्यत्वाच्च; अन्यथोत्पादस्याप्यतत्त्वापत्तेरिति दिग्॥ १४॥

परोक्तदोषजालं निराचिकीर्षन्नाह—

अनभ्युपगमाच्चेह तादात्म्यादिसमुद्भवाः। न दोषा नो न चान्येऽपि तद्भेदाद्धेतुभेदतः॥१५॥

अनभ्युपगमाच्च–अनङ्गीकरणाच्च, इह–प्रकृतविचारे, तादात्म्यादिसमुद्भवाः–शब्दा-ऽर्थयोस्तादात्म्य-तदुत्पत्तिविकल्प-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभवाः, न दोषाः–नानिष्टापादकाः, नः–अस्माकम्, न चान्येऽपि–'परमार्थैकतानत्वे' इत्यादिनोक्ताः। कुतः? इत्याह–हेतुभेदतः–कारणभेदेन, तद्भेदात् शब्दभेदात्; 'अतीता-ऽजातयोश्च विद्यमानवत् स्वकाले सत्त्वेन तत्र शब्दप्रवृत्तेरविरोधाच्च' इत्यपि पूरणीयम् ॥ १५ ॥

उक्तमेवोपपादयति—

वन्ध्येतरादिको भेदो रामादीनां यथैव हि । मृषा-सत्यादिभेदानां तद्वत्तद्धेतुभेदतः॥१६॥

वन्ध्ये-तरादिकः– वन्ध्या-ऽवन्ध्यादिकः, भेदः– विशेषः, यथैव हि रामादीनाम्– स्त्रीप्रभृतीनाम्, सकललोकप्रतीतः, आदिभ्यां मत्कुणा-ऽमत्कुणपुरुषादिग्रहः, मृषा-सत्यादिशब्दानाम्, आदिना सत्यमृषा-ऽसत्यामृषापरिग्रहः, तद्वत्– वन्ध्ये-तरादिरामादिवत्, 'भेदः' इत्यनुषज्यते; तद्धेतुभेदतः– मृषादिशब्दहेतुभेदात्, सत्यादिभाषाद्रव्यवर्गणानां भेदाभ्युपगमादिति ॥ १६ ॥

यतश्चैवम्, अतः किम्? इत्याह—

परमार्थैकतानत्वेऽप्युक्तदोषोपवर्णनम्। प्रत्याख्यातं हि शब्दानामिति सम्यग् विचिन्त्यताम्॥

परमार्थैकतानत्वेऽपि– वस्त्वेकगोचरत्वेऽपि, शब्दानामुक्तदोषोपवर्णनम्– दर्शनान्तरभेदिषु प्रधानादिष्वप्रवृत्त्याद्यभिधानलक्षणम्, प्रत्याख्यातं हि– निराकृतमेवः इति– एतत्, सम्यग्– माध्यस्थ्येन, विचिन्त्यताम्, प्रधानादिपदानां प्रवृत्तिनिमित्तवैकल्ये गवादिपदानां तदापादनस्यायुक्तत्वात्, अत्यन्तं मिथो भेदात् ॥ १७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव स्पष्टयति—

अन्यदोषो यदन्यस्य युक्तियुक्तो न जातुचित् । व्यक्तावर्णं न बुद्धानां भिक्ष्वादि शबरादिवत् ॥

अन्यदोषः– अर्थान्तरभूतवस्तुदोषः, यद्– यस्मात्, अन्यस्य– अर्थान्तरस्य, न युक्तियुक्तः– न प्रमाणोपपन्नः, जातुचित्– कदाचित् । प्रतिवस्तूपमया द्रढयति– बुद्धानाम्– भगवताम्, भिक्ष्वादि– भिक्ष्वादिपदम्, शबरादिवत्– शबरादिपदवत्, व्यक्तावर्णं– न व्यक्तो वर्णो येनेति विग्रहादवर्णव्यञ्जकम्, न । तथा च शबरादिभिक्ष्वादिपदानां जातिभेदादवर्णव्यञ्जका-ऽव्यञ्जकत्ववत् प्रधान-गवादिपदानामपि प्रवृत्तिनिमित्तवैकल्या-ऽवैकल्ये नायुक्ते इति भावः । न चैवं प्रधानाद्यर्थासत्त्वात् तत्र प्रधानादिपदाशक्तेस्तेषामप्रत्यायकत्वापत्तिः, अर्थासत्त्वेऽपि मृषाभाषावर्गणाप्रसूतानां शब्दानां तच्छब्दजनन्याः शक्तेरविरोधात् । न चैवं प्रधानादिपदजनितविकल्पस्याखण्डप्रधानत्वादिविशिष्टविषयकत्वेऽसत्ख्यात्यापत्तिः, विकल्पस्यापि कस्यचिदखण्डैकविषयत्वानुभवात्, निरंशेऽर्थे संशयधीप्रसरायोगात्, प्रकृते यथान्यसमयसंकेतानुसारं शशविषाणादिसंकेतिततदादिपदार्थवद्वाक्यार्थमयत्वात् पदार्थस्य तत्सद्भावतात्पर्यादसद्भूतोद्भावनरूपमृषावादोपपत्तेः । अत एव परसमयाभिधानपराणां निषेधपराणां चासत्यभाषावर्गणाप्रसूतवाक्यस्थानां प्रकृत्यादिपदानां सद्भावानभिप्रायाद् न मृषात्वम् । अत एव च पाण्डुरपत्रकिशलयादिवृत्तान्तार्थानामुपमावचनानां स्वार्थबाधेऽपि तात्पर्ये प्रामाण्याद् न तथात्वमिति दिग् । तत्त्वमत्रत्यं मत्कृतभाषारहस्यादवसेयम् ॥ १८ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु शब्दभेदसिद्धौ तस्य हेतुभेदनियम्यत्वाद् हेतुभेदसिद्धिः, तत्सिद्धौ च शब्दभेदसिद्धिरित्यन्योन्याश्रय इत्याशङ्क्याह—

ज्ञायते तद्विशेषस्तु प्रमाणे-तरयोरिव । स्वरूपालोचनादिभ्यस्तथादर्शनतो भुवि ॥१९॥

ज्ञायते प्रमातृभिः, तद्विशेषस्तु– सत्ये-तरशब्दभेदस्तु, प्रमाणे-तरयोरिव- प्रमाण-तदाभासयोरिव, 'स्वकृतप्रतिभाससाम्येऽपि विशेषः' इति योजना; स्वरूपालोचनादिभ्यः– संवादा-ऽसंवादनिरूपणादिभ्यः । एषां भेदव्याप्यत्वमाह– भुवि– पृथिव्याम्, तथादर्शनतः, अनेन प्रकारेण तद्भेदसिद्धेः, परैरपि सद-ऽसदर्थप्रतिभासाविशेषेऽपि संवादा-ऽसंवादाभ्यामेव भेदाभ्युपगमात् । न चैकान्ततुल्ययोः संवादा-ऽसंवादसंभव इति विभावनीयम् । अथ स्वातिरिक्तगुण-दोषसंबन्धादेव तेषामेकान्ततुल्यत्वं न भविष्यति, इति किं स्वरूपभेदेन ?; अन्यथा कालभेदेन भ्रम-प्रमाजनकचक्षुरादेरपि स्वरूपभेदः स्यादिति चेत् । न, सत्ये-तरादिशब्दानां सर्वथा स्वरूपाभेदे संवादे-तराद्यनापत्तेः, कार्यभेदे स्वभावभेदस्य प्रयोजकत्वात्, सहकारिभेदस्याप्यजनकस्वभावपरित्यागौपयिकत्वात्, निर्मला-ऽनिर्मलचक्षुरादेरपि स्वरूपभेदाभ्युपगमात् । इष्यते च सत्ये-तरादिव्यवहारभेदादपि सत्ये-तरादिभेदः, असति बाधके व्यवहारस्यापि प्रमाणत्वात्, स च हेतुभेदमाक्षिपतीति कान्योन्याश्रयः ? इति दिग् ॥ १९ ॥

नन्वेवं शब्दा-ऽर्थयोः स्वाभाविकसंबन्ध-सत्येतरादिभेदसाम्राज्ये संकेतवैयर्थ्यम्, स्वत एव शब्दस्यार्थप्रतिपादन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योग्यतायां संकेतादर्शिनोऽपि स्वतोऽर्थप्रतिपत्त्यविरोधादित्याशङ्कयाह--

समयापेक्षणं चेह तत्क्षयोपशमं विना । तत्कर्तृत्वेन सफलं योगिनां तु न विद्यते ॥२०॥

समयापेक्षणं च- संकेतप्रातिसंधान्वय-व्यतिरेकानुविधानं च, इह- शब्दस्थले, तत्क्षयोपशमं विना- शब्दार्थसंबन्धज्ञानावरणक्षयोपशमं विना, तत्कर्तृत्वेन- उक्तक्षयोपशमकर्तृत्वेन, सफलं- सार्थकम्, शाब्दबोधे शक्तिग्रहस्यैव हेतुत्वेऽपि संकेतस्य तदभिव्यञ्जकत्वेनोपयोगात् । यत्तु 'एवं शक्तिव्यञ्जकत्वाभिमतस्य संकेतग्रहस्यैव शाब्दबोधहेतुत्वौचित्यम्' इति; तन्न, पटुभ्यासे संकेतमननुस्मृत्यापि वाच्यताज्ञानेन शाब्दबोधोदयेन व्यभिचारात् । यत्तु 'अतिरिक्तशक्त्यभावज्ञानेऽपि शाब्दबोधोदयात् संकेतज्ञानमेव शाब्दप्रयोजकम्' इति; तत्तु धर्म-धर्मिणोर्भेदाभेदवादिनां न दोषावहम्, तत्पदबोध्यत्वप्रकारकेच्छाविषयत्वस्य गौरव-व्यभिचाराभ्यामतन्त्रत्वात् । एतेन 'तत्तत्पदबोद्धव्यत्वप्रकारतानिरूपितेश्वरेच्छाविशेष्यत्वं तत्तत्पदार्थमात्रवृत्तितत्तत्पदवाच्यत्वम्' इति नैयायिकादिमतमपास्तम्, लक्ष्यादावतिप्रसक्तत्वात्, ईश्वरमनङ्गीकुर्वतामपि वाच्यत्वव्यवहारात्, लाघवाच्च तत्पदबोध्यरूपस्यार्थधर्मस्यैव तत्त्वात् । न चैवं लक्षणोच्छेदः, अर्थान्तरबोधार्थमाश्रीयमाणे संकेतान्तर एव तद्व्यपदेशात् । युक्तं चैतत्, शाब्दबोधे शक्ति-लक्षणान्यतरत्वेन प्रयोजकत्वापेक्षया शक्तित्वेनैव तत्त्वौचित्यादिति दिग् । नन्वेवं समयस्य क्षयोपशमार्थत्वे सर्वत्र गलितावरणानां योगिनां वाचकप्रयोगार्थं तदपेक्षा न स्यात्, इत्यत इष्टापत्तिमाह- योगिनां तु न विद्यते समयापेक्षणम्, स्वयमेव वाच्यवाचकभावं ज्ञात्वा वाचकप्रयोगादिति ॥ २० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यस्यान्यत्र समये विरोध इत्येतत् परिहरन्नाह--

सर्ववाचकभावत्वाच्छब्दानां चित्रशक्तितः। वाच्यस्य च तथान्यत्र नागोऽस्य समयेऽपि हि॥

सर्ववाचकभावत्वात्- देशाद्यपेक्षया विलम्बितादिप्रतीतिजनकत्वेन सर्ववस्तुवाचकस्वभावत्वात्, शब्दानां चित्रशक्तितः- विचित्रार्थबोधनशक्तिमत्त्वात्; वाच्यस्य च तथा- अनेकशब्दवाच्यत्वस्वभावत्वेनानेकप्रतीतिनिबन्धनानेकशक्तिमत्त्वात्, अस्य- घटादिशब्दस्य, अन्यत्र- पटादौ, समयेऽपि- संकेतेऽपि, नाऽऽगः- नापराधो वृथानियोगलक्षणः, हि- निश्चितम्, अधिकृतप्रतीतिजनकत्वेनोभयोस्तत्स्वभावत्वात्, नियतसंकेतसहकृतस्य शब्दस्य सर्वार्थान् प्रत्यविशिष्टत्वासिद्धेरनतिप्रसङ्गात्, नियतत्वस्य सहकारियोग्यताख्यस्य तन्नियामकधर्मान्तररूपस्य वा कार्यगम्यत्वात्; अन्यथा चक्रादिसमवहितस्य दण्डादेरपि घटान्यकार्यजननेऽविशिष्टतापत्तेः। 'कुतः पुनरेतत् स्वरूपं शब्दादेः' इति पर्यनुयोगे तु 'स्वहेतुप्रतिनियमात्' इत्युत्तरं न्यायविदः। न चैवं 'पटो घटपदवाच्यः' इति व्यवहारापत्तिः, यथाप्रमात्रादिभेदं तत्सत्त्वेनेष्टत्वात्; अन्यथा च तदभावादेव पौरुषेयस्य शब्दार्थसंबन्धस्य निरपेक्षत्वासिद्धेः। स्वरूपयोग्यतामादाय सामान्यतः 'घटो घटपदवाच्यः' इति व्यवहारस्तु नामादिभेदभिन्नत्वाद् घटपरिणामस्य, पटादेरपि घटपदवाच्यत्वेन घटत्वावच्छेदेनैव घटवाच्यत्वस्य साकाङ्क्षत्वादिति दिग् ॥ २ ॥

अत्रैवानुक्तदोषपरिहारायाह--

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनन्तधर्मकं वस्तु तद्धर्मः कश्चिदेव च। वाच्यो न सर्व एवेति ततश्चैतन्न बाधकम् ॥ २२ ॥

अनन्तधर्मकं वस्तु, तथातथाऽनेककार्यकरणात्, एकस्वभावादनेककार्यासिद्धेः; तद्धर्मः कश्चिदेव च- अभिधेयपरिणामरूपः, वाच्यः- अभिधेयः, न, सर्व एव- सर्वथेन्द्रियान्तरग्राह्योऽपि, इति; यस्मादेवम्, ततश्चैतद्- वक्ष्यमाणम्, न बाधकम् ॥ २२ ॥

किं तत्? इत्याह—

अन्यदेवेन्द्रियग्राह्यमन्यच्छब्दस्य गोचरः। शब्दात्प्रत्येति भिन्नाक्षो न तु प्रत्यक्षमीक्षते ॥ २३ ॥

अन्यदेवेन्द्रियग्राह्यम्- तात्त्विकं स्वलक्षणम्, अन्यत् शब्दस्य गोचरः- सांवृतं सामान्यलक्षणम्। कुतः? इत्याह- शब्दात्, घटादिशब्दात्, प्रत्येति- जानाति घटादिकम्, भिन्नाक्षः, अपेरध्याहारादन्धोऽपि, न तु प्रत्यक्षमीक्षते चक्षुष्मानिव। ततः स्पष्टत्वा-ऽस्पष्टत्वविरुद्धधर्माध्यासाद् भेद एव दृश्य-विकल्प्ययोः ॥ २३ ॥

एतदेव विशिष्य भावयति—

अन्यथा दाहसंबन्धाद्दाहं दग्धोऽभिमन्यते। अन्यथा दाहशब्देन दाहार्थः संप्रतीयते ॥ २४ ॥

अन्यथा- स्पष्टत्वेन, दाहसंबन्धात्- दाहे-न्द्रिययोगात्, दाहं दग्धः पुरुषोऽभिमन्यते- एकलोलीभावेन साक्षात्कुरुते;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यथा– अस्पष्टतया, दाहशब्देन श्रुतेन, दाहार्थः संप्रतीयते– विकल्पगोचरीक्रियते, अतोऽनुभवसिद्धमेवेन्द्रिय-शब्दार्थयोस्तुच्छा-ऽतुच्छत्वमिति भावः ॥ २४ ॥

यथैतस्योक्तस्य न बाधकत्वं तथाह—

इन्द्रियग्राह्यतोऽन्योऽपि वाच्योऽसौ न च दाहकृत्। तथाप्रतीतितो भेदाभेदसिद्ध्यैव तत्स्थितेः

इन्द्रियग्राह्यतः– इन्द्रियग्राह्याद् धर्मात्, अन्योऽपि वाच्यो धर्मः, अपिशब्दादनन्योऽपि। अतो युक्तमिदं यत्– 'शब्दात् प्रत्येति भिन्नाक्षो न तु प्रत्यक्षमीक्षते' इति, तदभिधेयधर्मस्य कथञ्चित् ततो भेदात्, अन्यथा प्रतीतिभेदानुपपत्तेः। न च शब्दार्थं नेक्षत एव, कथञ्चित् तद्ग्राह्यानुविद्धस्यैव शब्दात् प्रतीतेः, यथाक्षयोपशमं तथानुभवादिति। तथा, असौ– दाहशब्दवाच्यो धर्मः, न च दाहकृत्– न च दाहकरणशीलः, चशब्दाद् नादाहकृच्च। अतोऽयुक्तमिदं यदुक्तम्– 'अन्यथा दाहसंबन्धात्' इत्यादि, स्पर्शनेन्द्रियगम्यधर्मस्य कथञ्चिदभिधेयधर्मतो भेदात्। न च शब्दादपि न तत्प्रतीतिरेव, अस्पष्टाकारतया प्रतीतेः, एकत्रापि प्रतिभाससामग्रीभेदात् स्पष्टा-ऽस्पष्टप्रतिभासोपपत्तेः। तथादाहवेदनं त्वसातवेदनीयकर्मोदयादिनिमित्तम्, न तु दाहसंबन्धमात्रजमिति न दोषः। द्वैरूप्ये हेतुमाह– तथाप्रतीतितः– उक्तवदितरेतरगर्भप्रतीतेः, भेदाभेदसिद्ध्यैव– जात्यन्तरात्मकभेदाभेदोपपत्त्यैव, तत्स्थितेः– अभिधेयेन्द्रियग्राह्यधर्मव्यवस्थानात्। यदि चैवमपि ॥४१३॥

१ प्रकृतस्तबके कारिका २३। २ प्रस्तुतस्तबके कारिका २४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वाग्रहादस्पष्टज्ञानं वस्त्वविषयमेवेष्यते, तदा काचाद्यिव्यवहितवस्तुप्रतिभासिदर्शनं दूरस्थवृक्षादिदर्शनं चास्पष्टमुच्छिद्येत। न च तत्र नास्पष्टत्वम्, सामान्योपसर्जनविशेषप्रतिभासत्वेन तत्र सार्वजनीनास्पष्टत्वव्यवहारात्। भ्रान्तत्वे चास्य प्रमाणद्वयानन्तर्भूतस्याज्ञातवस्तुप्रकाश-संवादाभ्यां प्रमाणान्तरतापत्तिः। न चास्य स्वप्रतिभासेऽस्यैव संस्थानविशेषलिङ्गत्वेनानुमानेऽन्तर्भावाद् न प्रमाणान्तरत्वम्, अनुमानस्य च स्वप्रतिभासिन्यनर्थेऽर्थाध्यवसायेन प्रवृत्तेर्भ्रान्तत्वम्, भ्रान्तस्यापि च पारम्पर्येण वस्तुप्रतिबन्धात् प्रामाण्यमिति वक्तव्यम्, अनुमानप्रामाण्यान्यथानुपपत्त्या विकल्पस्य स्वातन्त्र्येण प्रामाण्यस्य व्यवस्थापितत्वात्, समानविषयतया प्रवृत्तिविज्ञानजनकत्वपर्यवसितस्याविसंवादकत्वलक्षणस्य प्रामाण्यस्य भ्रान्तेऽयोगाच्च प्रवर्तकत्वमात्रत्वस्य स्वप्रदर्शितार्थप्रदर्शकत्वमात्रस्य च संनिकृष्टज्ञानान्तरे पीतशङ्खादिग्राहिज्ञानान्तरे चातिव्याप्तेः। अथ तत्रापि ग्राह्ये आरोपितवस्तुनि स्वाकारे वा प्राप्याभेदाध्यवसायेन प्राप्यांशेन समानविषयतया प्रवर्तकत्वरूपं प्रामाण्यमक्षतम्; तदुक्तम्– 'ततोऽपि विकल्पात् तदध्यवसायेन वस्तुन्येव प्रवृत्तेः, प्रवृत्तौ च प्रत्यक्षेणाभिन्नयोग-क्षेमत्वात्' इति; अन्यदप्युक्तम्– 'न ह्याभ्यामर्थं परिच्छिद्य प्रवर्तमानोऽर्थक्रियायां विसंवाद्यते, इति चेत्। न, उभयोरेकस्य विषयसाम्यस्यासिद्धेः, लोकव्यवहारार्थं काल्पनिकस्य तस्याश्रयणे च तन्निर्वाहाय नित्यानित्यवस्तुग्राहकत्वाश्रयणस्यैव युक्तत्वात्; उक्तप्रामाण्यस्योपेक्षणीयार्थाव्यापकत्वात्, दृश्य-प्राप्ययोरर्थयोः कथञ्चिदेकत्वं विना प्रवृत्तिप्रतिनियमानुपपत्तेश्च स्वपरव्यवसायिज्ञानत्वस्यैव प्रामाण्यलक्षणस्य युक्तत्वादिति दिग्। इत्थं च दूरस्थवृक्षादिज्ञानवदस्पष्टस्यापि शाब्दस्य नाप्रामाण्यम्। न चाशेषविशेषाध्यासितवस्तुप्रतिभासवैकल्यादप्यस्य तथात्वमाशङ्कनीयम्, प्रत्यक्षेऽपि तथात्वप्रसक्तेः। न ह्यस्मदादिप्रत्यक्षे क्षणिकत्व-नैरात्म्याद्यशेषधर्माध्यासितसंख्योपेतघटाद्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारपरिणतसमस्तपरमाणुप्रतिभासः, तथैवानिश्चयात्। अत एव "[1]मति-श्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु" इति समानविषयत्वमक्षज-शाब्दयोस्तत्त्वार्थसूत्रकृता प्रतिपादितम्। न चावस्तुभूतसामान्यविषयत्वादस्याप्रामाण्यम्, एकाकारप्रतीतिहेतुत्वेन वस्तुभूतस्य तस्य व्यवस्थापितत्वादिति दिग्॥ २५॥

'[2]वाच्य इत्थमपोहस्तु' इत्युक्तं निराकरोति—

अपोहस्यापि वाच्यत्वमुपपत्त्या न युज्यते। असत्त्वाद्वस्तुभेदेन बुद्ध्या तस्यापि बोधतः २६

अपोहस्यापि— परपरिकल्पितस्य, वाच्यत्वम्— अभिधेयत्वम्, उपपत्त्या—युक्त्या, न युज्यते। कुतः? इत्याह— वस्तुभेदेन— वस्तुभिन्नतया, तस्यासत्त्वात्, विजातीयव्यावृत्तेरपि समानपरिणातिरूपतया वस्तुवाच्यत्वपक्षप्रसङ्गात्, तुच्छस्य वस्तुना संबन्धायोगात्। विकल्पगतार्थप्रतिबिम्बवाच्यत्वमधिकृत्याह— बुद्ध्या— तृतीयाया अभेदार्थत्वाद् विकल्पबुद्ध्यभिन्नस्य, तस्य— अपोहस्यापि, बोधतः— अद्वयबोधात् 'भेदेनासत्त्वात्' इति योगः। न हि बोधमात्रवादिनोऽद्वयव्यतिरिक्तं किञ्चिदस्ति, इति कुत इष्टप्रतिभासस्तैमिरिकादीनां प्रतिभासविशेषेऽपि लोके बोधमात्रसामग्रीभिन्नकर्मतिमिरापरकेशदर्शनादिजो युज्यते, ननु बोधमात्रसामग्रीतस्तस्यापरमन्तरेण वैशिष्ट्यायोगात्?। अपि च, एवं सामानाधिकरण्यादिव्यवहारोऽप्युच्छिद्येत, प्रवृत्तिनिमित्तद्वयवत एकस्य बहिर्भूतस्य धर्मिणोऽभावात्। न च भिन्नप्रवृत्तिनिमित्तोपरक्तैकधर्म्याकारविकल्पादेव सामान्याधि-

१ तत्त्वार्थाधिगमसूत्रे १। २७। २ प्रकृतस्तबके कारिका ६।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करण्यव्यवहारोपपत्तिः, एकान्तवादिनाऽनेकाकारैकविकल्पस्याभ्युपगन्तुमशक्यत्वात् । न चातात्त्विकमनेकत्वमिति न दोषः, एकत्वस्य तात्त्विकत्वेऽविनिगमात्; ज्ञानात्मन्यविद्यमानस्य चानेकस्य स्वसंवेदनेनापरिच्छेदप्रसक्तेः; परिच्छेदे वाऽविद्यमानाकारग्राहित्वेनाप्रत्यक्षत्वप्रसङ्गात्, सद्-ऽसतोरेकत्वा-ऽनेकत्वयोर्ज्ञानतादात्म्यविरोधेनातदाकारज्ञानवेदने साकारवादक्षतेश्च । एतद्भयाज्ज्ञानवैचित्र्योपगमे च बहिरर्थवैचित्र्येण किमपराद्धम्? । विवेचिततरं चैतत्, इति नेदानीं प्रयासः । अपि च, शब्दार्था-ऽपोहयोर्जन्य-जनकभावरूपवाच्यवाचकभावाभ्युपगम आकाङ्क्षादिज्ञानात् प्रागेव शाब्दधीप्रसङ्गः । पदार्थोपस्थितिस्थानीयप्रतिबिम्बे नियमतस्तदपेक्षणाद् नायं प्रसङ्ग इति चेत् । न, क्षणिकस्य शब्दस्य तदपेक्षाऽयोगात्; अनन्तरोत्पन्नशब्दाकारक्षणे स्वक्षणसंयोगरूपापेक्षायोगे च हेतुधर्मस्य कार्ये संक्रमात् शब्दे नियमत आकाङ्क्षादिभानापत्तेः, निरंशस्यांशेनापेक्षाऽयोगात् । अपि च, लिङ्ग-संख्यादियोगोऽप्यनन्तधर्मात्मकबाह्यवस्तुसमाश्रित एव, इति नापोहस्य वाच्यत्वम्, एकत्र स्त्री-पुं नपुंसकाख्यभावत्रयस्य, एकत्व-द्वित्वादिसंख्यायाश्चाविरोधात्, यथाविवक्षमनन्तधर्माध्यासिते वस्तुनि कस्यचिद् धर्मस्य केनचित् शब्देन प्रतिपादनात्, प्रतिनियतापाश्रिविशिष्टवस्तुप्रतिभासस्य प्रतिनियतक्षयोपशमविशेषनिमित्तत्वेन शबलाभासानापत्तेः । अपि च, शब्दस्य बहिरर्थाप्रतिपादकत्वेऽदृष्टेषु नदी-देश-पर्वत-द्वीपादिष्वाप्तप्रणीतत्वेन निश्चितात् शब्दात् प्रतिपत्तिर्न स्यात्, अदृष्टे विकल्पानुपपत्तेः । न च तद्विशेषानिश्चयेऽपि न कथञ्चित् ततो निर्णीतिः, प्रत्यक्षस्यापि स्वविषयप्रतिपत्तेः कथञ्चिदेव संभवाद् वस्तुविषयस्य प्रत्यक्षस्यानिश्चायकत्वम्, अतथाभूतस्य च विकल्पस्य निश्चायकत्वं च वदतः सौगतस्यैव निर्विकल्पत्वादिति दिग् ॥ २६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपिच, अवस्तुवाच्यत्वेऽपसिद्धान्तोऽपि परस्येत्याह—

क्षणिकाः सर्वसंस्कारा अन्यथैतद्विरुध्यते। अपोहो यन्न संस्कारो न च क्षणिक इष्यते॥

अन्यथा—अवस्तुनो वाच्यत्वे, 'क्षणिकाः सर्वसंस्काराः—कृतकाः सर्वं उत्पत्तिमन्तः' इति, एतत्— उक्तम्, विरुध्यते। कथम्? इत्याह— अपोहो यद्— यस्मात्, न संस्कारः, अवस्तुत्वात्; न च क्षणिकः— नश्वरः, इष्यते, तत एवेति। नन्वेवं हेतु-साध्योभयाभावे न व्यभिचार इति क्व विरोधः?, संस्कारसामान्यमुद्दिश्य क्षणिकत्वविधाने व्याप्यव्यापकभावस्यैव लाभादिति चेत्। सत्यम्, तथापि बुद्धिप्रतिभासरूपापोहस्यावस्तुसंस्पर्शेन विपर्ययापादने सामर्थ्यप्रतीयमाने तुच्छापोह इवान्यत्रापि तुच्छत्वेऽपि तथाप्रतीत्युपपत्त्या वा विरोधोद्भावने तात्पर्यात् ॥ २७ ॥

अपि च, एवं शास्त्रादिवैयर्थ्यमपीत्याह—

एवं च वस्तुनस्तत्त्वं हन्त! शास्त्रादनिश्चितम्। तदभावे च सुव्यक्तं तदेतच्छुष्कखण्डनम् ॥

एवं च— कल्पितस्य वाच्यत्वे च, वस्तुनः— स्वलक्षणस्य, तत्त्वम्— अनित्यत्वादिमत्त्वम्, हन्त! शास्त्रात्— पिटकत्रयलक्षणात्, अनिश्चितं भवत्नीत्या। तदभावे च— तत्त्वनिश्चयाभावे च, सुव्यक्तम्— अतिस्पष्टम्, तदेतत्— शास्त्रप्रणयनम्, तन्मूलं भवदनुष्ठानं च, शुष्कखण्डनम्, फलकणानासादनात्। अथ शब्दजनितविकल्पात् सामर्थ्येन तथा स्वलक्षणप्रतीतेर्न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोष इति चेत् । न, विकल्प-स्वलक्षणयोः प्रतिबन्धस्यैवासिद्धेः, स्वलक्षणमालम्बनं विनाऽप्यसत्यविकल्पवत् सत्यविकल्पेऽप्याकारनियमोपपत्तेः सामर्थ्यजविकल्पस्यापि स्वलक्षणास्पर्शित्वात्, समारोपव्यवच्छेदस्य च शाब्दविकल्पादेवोपपत्तेस्तत्कल्पनायां मानाभावात् । अस्त्वेवमेव शाब्दवैयर्थ्यमिति चेत् । न, तथा सति स्वलक्षणास्पर्शिनो व्याप्त्याद्यनपेक्षस्यार्थप्रापकस्य शाब्दस्य मानान्तरत्वप्रसङ्गात्, अर्थविवक्षानुमितिरूपत्वे च तस्य स्वातन्त्र्येण बाह्यार्थानध्यवसायित्वेनाप्रवर्तकत्वापातात्, 'नानुमिनोमि किन्तु शाब्दयामि' इत्यनुभवानुपपत्तेश्च । अपि च, अन्यविवक्षायामन्यशब्ददर्शनाद् विवक्षाविशेषसूचकत्वमपि कथं शब्दानाम् ? । 'सुविवेचितं कार्यं कारणं न व्यभिचरति' इति न्यायात् शब्दविशेषाणां तद् न विरुध्यत इति चेत् । तर्हि येनैव प्रतिबन्धेन शब्दविशेषो विवक्षाविशेषसूचकस्तत एवार्थविशेषप्रतिपादकः किं नाभ्युपगम्यते ? । विवक्षया सह तदुत्पत्तिरेव प्रतिबन्धोऽर्थेन सह पुनरियमसंभविनीति चेत् । न, तथापि विवक्षाया वचनेऽर्थप्रतिपादनरूपेष्टसाधनताज्ञानं विनाऽसंभवाद् विवक्षोपसर्जनतयाऽर्थप्रतिपादकत्वस्य च शुकादिवचने व्यभिचारात्, कल्पितार्थप्रतिपादकत्वे च सत्या-ऽसत्यविभागाभावाल्लोकयात्रोच्छेदात्, शब्दजनितार्थप्रतिबिम्बे बहिरर्थविषयतायास्तात्त्विकत्वकल्पनाया एवौचित्यादिति दिग् ॥ २८ ॥

दोषान्तरमभिधातुमाह—

बुद्धावर्णेऽपि चादोषः संस्तवेऽप्यगुणस्तथा । आह्वानाप्रतिपत्त्यादि शब्दार्थायोगतो ध्रुवम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुद्धावर्णेऽपिच– बुद्धाश्लाघायामपि च, अदोषः– दोषाप्रसङ्गः प्राप्नोति परस्य, बुद्धावर्णस्य बुद्धाविशेष्यकापकृष्टत्वप्रकारकज्ञान-जनकत्वाभावात्; तथा, संस्तवेऽपि– बुद्धस्तुतिकरणेऽपि, अगुणः– गुणाभावप्रसङ्गः, बुद्धसंस्तववर्णस्य बुद्धविशेष्यकोत्कृष्टत्वप्रकारकज्ञानजनकत्वाभावात्; तथा, आह्वानाप्रतिपत्त्यादि– आह्वाने कृतेऽप्यप्रतिपत्त्य ऽप्रवृत्त्यादि, शब्दार्थायोगतः– शब्दार्थासंबन्धाभाव इष्यमाणे, ध्रुवम्– आवश्यकम्। 'बुद्ध्याकारे बहिरर्थाध्यासात् सर्वमिदं नोपपन्नम्' इति त्वीदृशविशेषदर्शिनः परस्य कथं समाधानं शोभते ?। अथानुमानिकश्वैत्यज्ञाने सत्यपि पित्तदोषेण शङ्खे पीतिमाध्यासवद् विशेषदर्शिनोऽप्यर्वाग्दृशो लोकवासनादोषाद् न प्रकृताध्यासानुपपत्तिरिति चेत्। न, अधिष्ठान-तज्ज्ञानाभावेऽध्यासानुपपत्तेः, असाक्षात्कारिभ्रमस्य विशेषदर्शनमात्रनिवर्त्यत्वनियमाच्च; अन्यथा क्षणिकत्वानुमानात् परस्याक्षणिकत्वसमारोपस्याप्यनिवृत्त्यापत्तेः। यदि च बहिरर्थाध्यवसायिशाब्दविकल्पप्रतिबन्धकविशेषदर्शने लोकवासनाया उत्तेजकत्वं स्वीक्रियते, अत एव लोकवासनाविरहिणां विशेषदर्शिनां योगिनां न पूर्वक्षणबलायातोऽपीदृशविकल्प इतीष्यते, तदा लाघवादस्य बहिर्विषयेऽभ्रान्तत्वमेव कल्प्यताम्, किं तत्र भ्रान्तत्वस्य, वासनाविशेषे तत्प्रतिबन्धकोत्तेजकत्वादेश्च कल्पनया ? इत्यादि सूक्ष्मधिया विभावनीयम् ॥ २९ ॥

तदेवं सिद्धः शब्दा-ऽर्थयोः संबन्धः, तत्सिद्धौ च निराबाधा सर्वज्ञनाभिव्यक्तादागमाद् धर्मा-ऽधर्मव्यवस्था, ततश्च 'ज्ञान-क्रियाभ्यां मुक्तिः' इत्यत्र नयमतभेदजनितं वार्तान्तरमुत्थापयति—

ज्ञानादेव नियोगेन सिद्धिमिच्छन्ति केचन। अन्ये क्रियात एवेति द्वाभ्यामन्ये विचक्षणाः॥३०॥ ॥४१६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानादेव केवलात्, नियोगेन– अवश्यंभावेन, सिद्धिम्– मुक्तिम्, इच्छन्ति केचन– ज्ञानवादिनः। अन्ये– क्रियावादिनः, 'क्रियात एव केवलाया मुक्तिः' इतीच्छन्ति। अन्ये– ज्ञान-क्रियावादिनः, विचक्षणाः– उभयसमर्थनाद् यथावस्थितबुद्धयः, द्वाभ्यां– समुदिताभ्यां ज्ञान-क्रियाभ्याम्, सिद्धिमिच्छन्ति ॥ ३० ॥

तत्र प्रथमं ज्ञानवादिमतमुपन्यस्यति—

ज्ञानं हि फलदं पुंसां न क्रिया फलदा मता। मिथ्याज्ञानात्प्रवृत्तस्य फलप्राप्तेरसंभवात्॥३१॥

ज्ञानं हि– ज्ञानमेव, फलदम्– ईहितफलहेतुः, पुंसाम्– फलार्थिनां फलोपायं प्रमाय प्रवर्तमानानाम्, फलाव्यभिचारदर्शनात्। न क्रिया फलदा मता; कुतः? इत्याह– मिथ्याज्ञानात्– उपायभ्रमात्, प्रवृत्तस्य पुरुषस्य, फलप्राप्तेरसंभवात्; न हि मृगतृष्णिकाजलज्ञानप्रवृत्तस्यापि तदवाप्तिरिति भावः। आगमेऽप्युक्तम्– "पढमं नाणं तओ दया"[1] इत्यादि। इत्यतोऽप्ययमर्थः सिध्यतीति द्रष्टव्यम् ॥ ३१ ॥

'ज्ञानोत्कर्षा-ऽपकर्षाभ्यां फलोत्कर्षा-ऽपकर्षयोरपि ज्ञानस्यैव फलहेतुत्वम्, क्रियोत्कर्षा-ऽपकर्षयोस्तत्रातन्त्रत्वात्' इत्यभिप्रायवानाह—

ज्ञानहीनाश्च यल्लोके दृश्यन्ते हि महाक्रियाः। ताम्यन्तोऽतिचिरं कालं क्लेशायासपरायणाः॥

---

[1] प्रथमं ज्ञानं ततो दया।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानहीनाश्च– सम्यगुपायपरिज्ञानविकलाश्च, यत्– यस्मात्, लोके– जगति, महाक्रियाः– अवेगम्यमानत्वाद् महाक्रिया अपि पुरुषाः काष्ठवाहकादयः, क्लेशायासपरायणाः– शारीर-मानसदुःखपराः, अतिचिरं कालं ताम्यन्तः– क्लिश्यन्तः, दृश्यन्ते, हि– निश्चितम्, न तु क्रियोत्कर्षेऽप्युत्कृष्टं फलं लभन्ते ॥ ३२ ॥

तथा,

ज्ञानवन्तश्च तद्वीर्यात्तत्र तत्र स्वकर्मणि। विशिष्टफलयोगेन सुखिनोऽल्पक्रिया अपि ॥३३॥

ज्ञानवन्तश्च– सम्यगुपायपरिज्ञानोपेताश्च, तद्वीर्यात्– ज्ञानोत्कर्षात्, तत्र तत्र– अधिकृते स्वकर्मणि रत्नवाणिज्यादौ, अल्पक्रिया अपि– अल्पव्यापारा अपि, विशिष्टफलयोगेन– उत्कृष्टधनप्राप्त्या, सुखिनः 'दृश्यन्ते' इति योगः, न तु क्रियापकर्षादपकृष्टफलभाजो भवन्ति। धर्मक्रियामाश्रित्यागमेऽप्युक्तम्—

"[1]जं अन्नाणी कम्मं खवेइ बहुआहिं वासकोडीहिं। तं नाणी तिहिं गुत्तो खवेइ ऊसासमित्तेणं ॥ १ ॥" ॥३३॥

प्रधानमपि पुरुषार्थमङ्गीकृत्य ज्ञानमेव साक्षादुपयोगीत्याह—

केवलज्ञानभावे च मुक्तिरप्यन्यथा न यत्। क्रियावतोऽपि यत्नेन तस्माज्ज्ञानादसौ मता ॥३४॥

केवलज्ञानभावे च– केवलज्ञानोत्पादे च, मुक्तिरपि भवति। अन्यथा– केवलज्ञानानुत्पादे, क्रियावतोऽपि यत्नेन– ॥४१७॥

---

[1] यदज्ञानी कर्म क्षपयति बहुकाभिर्वर्षकोटिभिः। तज्ज्ञानी त्रिभिर्गुप्तः क्षपयत्युच्छ्वासमात्रेण ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रयासेन, यत्- यस्मात्, न भवति । तस्मात् कारणात्, असौ- मुक्तिः, ज्ञानाद् मता न तु क्रियात इति ॥ ३४ ॥

क्रियावादिमतमुपन्यस्यन्नाह—

क्रियैव फलदा पुंसां न ज्ञानं फलदं मतम् । यतः स्त्री-भक्ष्यभोगज्ञो न ज्ञानात् सुखितो भवेत् ॥

क्रियैव- प्रवृत्तिलक्षणा, फलदा पुंसां- फलार्थिनाम्, न ज्ञानं फलदं मतम्, यतः- यस्मात्, स्त्री-भक्ष्यभोगज्ञो न ज्ञानात्- स्त्री-भक्ष्यभोगज्ञानमात्रात्, सुखितो भवेत्, किन्तु स्त्री-भक्ष्यभोगेणैवेति ॥ ३५ ॥

क्रियाऽभावे ज्ञानोत्कर्षस्याप्यप्रयोजकत्वमाह—

क्रियाहीनाश्च यल्लोके दृश्यन्ते ज्ञानिनोऽपि हि । कृपायतनमन्येषां सुखसंपद्विवर्जिताः ॥ ३६ ॥

क्रियाहीनाश्च- व्यापारविरहिताश्च, यत्- यस्मात्, लोके- जगति, ज्ञानिनोऽप्यालस्योपहताः, हि- निश्चितम्, सुखेन- अन्तरानन्देन, संपदा च लक्ष्म्या विवर्जिताः अत एवान्येषां- पश्यतां प्राणिनाम्, कृपायतनं- करुणाभाजनम्, दृश्यन्ते ॥ ३६ ॥

उपचयमाह—

क्रियोपेताश्च तद्योगादुदग्रफलभावतः । मूर्खा अपि हि भूयांसो विपश्चित्स्वामिनोऽनघाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रियोपेताश्च- व्यापारप्रवणाश्च, तद्योगात्- क्रियासामर्थ्याद्, उदग्रफलभावतः- विशिष्टफलसिद्धेः, मूर्खा अपि हि सन्तो भूयांस ईश्वराः, विपश्चित्स्वामिनः- पण्डिताधिपतयः, अनघा- अपापाः, दृश्यन्ते। ततः फलसिद्धावतन्त्रं ज्ञानम्। आगमेऽपि क्रियाया एव प्राधान्यमुक्तम्; तथाहि—

"सुबहुं पि सुअमहीअं किं काही चरणविप्पहीणस्स। अंधस्स जह पलित्ता दीवसयसहस्सकोडी वि? ॥ १ ॥"[1]

तथा—

"नाणं सविसयणिअयं न नाणमित्तेण कज्जनिप्फत्ती। मग्गण्णू दिट्ठंतो होइ सचेट्ठो अचेट्ठो य ॥ १ ॥[2]
आउज्जनट्टकुसला वि नट्टिआ तं जणं ण तोसेइ। जोगं अजुंजमाणा णिंदं खेयं च सा लहइ ॥ २ ॥
इय नाणलिंगसहिओ काइअजोगं ण जुंजई जो उ। न लहइ स मुक्खसुक्खं लहइ अ णिंदं सपक्खाओ ॥ ३ ॥
जाणंतो वि य तरिउं काइअजोगं ण जुंजई जो उ। सो बुड्डइ सोएणं एवं नाणी चरणहीणो ॥४॥" इत्यादि ॥३७॥

---

१ सुबह्वपि श्रुतमधीतं किं करिष्यति चरणहीनस्य। अन्धस्य यथा प्रदीप्ता दीपशतसहस्रकोटिरपि? ॥ १ ॥

२ ज्ञानं स्वविषयनियतं न ज्ञानमात्रेण कार्यनिष्पत्तिः। मार्गज्ञो दृष्टान्तो भवति सचेष्टोऽचेष्टश्च ॥ १ ॥
आतोद्यनर्तकुशलापि नटी तं जनं न तोषयति। योगमयुञ्जाना निन्दां खेदं च सा लभते ॥ २ ॥
इति ज्ञानलिङ्गसहितः कायिकयोगं न युनक्ति यस्तु। न लभते स मोक्षसौख्यं लभते च निन्दां स्वपक्षात् ॥ ३ ॥
जानन्नपि च तरीतुं कायिकयोगं न युनक्ति यस्तु। स ब्रुडति स्रोतसा एवं ज्ञानी चरणहीनः ॥ ४ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदप्युक्तम्– 'ज्ञानोत्कर्षादेव मुक्तिः, न क्रियोत्कर्षात्' इति; तत् प्रतिविधित्सुराह—

क्रियातिशययोगे च मुक्तिः केवलिनोऽपि हि । नान्यदा केवलित्वेऽपि तदसौ तन्निबन्धना ॥

केवलिनोऽपि– सर्वज्ञस्यापि हि, क्रियातिशययोगे च– शैलेशीकरणाख्यव्यापारोत्कर्षे च, मुक्तिः, नान्यदा– शैलेश्या अर्वाक्, केवलित्वेऽपि सति, तत्– तस्मात्, असौ– मुक्तिः, तन्निबन्धना– क्रियानिमित्तिकैवेत्यर्थः ॥ ३८ ॥

उभयवादिमतमुपन्यस्यन्नाह—

फलं ज्ञान-क्रियायोगे सर्वमेवोपपद्यते । तयोरपि च तद्भावः परमार्थेन नान्यथा ॥ ३९ ॥

सर्वमेव फलं– पुरुषार्थत्वेन व्यवह्रियमाणम्, ज्ञान-क्रियायोगे– उभयसमुदाय एव, उपपद्यते, विशिष्टफलमधिकृत्य प्रत्येकं देशोपकारितायाः समुदाये संपूर्णतोपपत्तेः; उक्तं च भाष्यकृता—

"वीसुं ण सव्वह च्चिय सिकतातेल्लं व साहणाभावो । देसोवगारिया जा सा समवायम्मि संपुण्णा ॥ १ ॥"

अथ संपूर्णता फलोपहितहेतुत्वं, देशोपकारिता च हेतुत्वमात्रम्, तच्च न पृथग्, ज्ञान-क्रिययोः परस्परमुक्तदोषात्, तथा च कथं समवाये पूर्णता ? इति चेत् । न, प्रत्येकमपि ज्ञान-क्रिययोर्द्वयोरन्वय-व्यतिरेकानुविधानाविशेषेण हेतुत्वात्, असम्यग्ज्ञाने फलव्यभिचारस्य चासम्यक्क्रियायामपि तुल्यत्वादिति भावः । यदि च फलमनुपदधानं ज्ञानं ज्ञानमेव तत्त्वतो

---

१ विष्वग् न सर्वथैव सिकतातैलमिव साधनभावः । देशोपकारिता या सा समवाये संपूर्णा ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेष्यते, तदा फलमनुपदधती क्रियापि क्रियेति नोच्यते एवंत्वभिप्रायवानाह– तयोरपि च– ज्ञान-क्रिययोः, तद्भावः– ज्ञान-क्रियाव्यपदेशः, परमार्थेन– निश्चयेन, नान्यथा– न तद्योगमन्तरेण, फलानुपहितस्य सतोऽकारणत्वात्, कुशूलस्थबीजा-ऽबीजयोरविशेषात्, कारणस्य च सतः फलोपहितत्वात्, क्षेत्रस्थबीजवदिति भावः ॥ ३९ ॥

एतदेवाह—

साध्यमर्थं परिज्ञाय यदि सम्यक् प्रवर्तते । ततस्तत्साधयत्येव तथा चाह बृहस्पतिः ॥४०॥

साध्यमर्थं परिज्ञाय– इष्टत्वसाध्यत्वादिना प्रमाय, यदि सम्यक्– परिज्ञानानुसारेण, प्रवर्तते साध्योपाये, ततः, तत्– अधिकृतं साध्यम्, साधयत्येव, तथा चाह बृहस्पतिरेतत् संवादि ॥ ४० ॥

'सम्यक्प्रवृत्तिः साध्यस्य प्राप्त्युपायोऽभिधीयते । तदप्राप्तावुपायत्वं न तस्या उपपद्यते ॥४१॥'

सम्यक् प्रवृत्तिः– सम्यग्ज्ञानपूर्विका क्रिया, साध्यस्य– इष्टार्थस्य, प्राप्त्युपायोऽभिधीयते; तदप्राप्तौ– साध्याप्राप्तौ सत्याम्, उपायत्वम्–अधिकृतसाध्यहेतुत्वम्, न, तस्याः– सम्यक्प्रवृत्तित्वाभिमतायाः, उपपद्यते; अतो नासौ सम्यक् प्रवृत्तिरेवेति भावः ॥ ४१ ॥

फलितार्थमाह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असाध्यारम्भिणस्तेन सम्यग्ज्ञानं न जातुचित्। साध्यानारम्भिणश्चेति द्वयमन्योन्यसंगतम्॥

असाध्यारम्भिणस्तेन कारणेन, सम्यग्ज्ञानं तत्त्वनीत्या, न जातुचित्, फलावच्छिन्नप्रवृत्त्यनङ्गत्वात्; साध्यानारम्भिणश्च– व्यर्थकालक्षपणकृतः, तत एव; इति हेतोः, द्वयम्– ज्ञान-क्रियोभयम्, अन्योन्यसंगतम्– इतरेतरनान्तरीयकं निश्चयतः ॥ ४२ ॥

अन्योन्यसंगतिसमर्थकमेव वृद्धव्यपदेशमाह—

अत एवागमज्ञस्य या क्रिया सा क्रियोच्यते। आगमज्ञोऽपि यस्तस्यां यथाशक्ति प्रवर्तते ४३

अत एव– ज्ञान-क्रिययोर्मिथोऽनुविद्धत्वादेव, आगमज्ञस्य पुंसः, या क्रिया, सा– परमार्थेन, क्रियोच्यते, आगमज्ञोऽपि स उच्यते यस्तस्यां क्रियायाम्, यथाशक्ति– स्वसामर्थ्यानुरूपम्, प्रवर्तते। अत एवागीतार्थानां स्वच्छन्दविहारिणां मासक्षपणादिकामपि न क्रियामामनन्ति श्रुतवृद्धाः, न वा भग्नचारित्राणां पूर्वपर्यन्तमपि ज्ञानमामनन्ति, "[1]णिच्छयणयस्स चरणस्सुवघाए नाण-दंसणवहो वि" इति वचनादिति द्रष्टव्यम् ॥ ४३ ॥

उक्तमेव दृष्टान्तेन भावयन्नाह—

---

१ निश्चयनयस्य चरणस्योपघाते ज्ञान-दर्शनवधोऽपि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिन्तामणिस्वरूपज्ञो दौर्गत्योपहतो नहि। तत्प्राप्त्युपायवैचित्र्ये मुक्त्वान्यत्र प्रवर्तते ॥४४॥

चिन्तामणिर्दारिद्र्यनाशनो रत्नविशेषस्तत्स्वरूपज्ञः- परमार्थेन तत्स्वरूपज्ञाता, दारिद्र्योपहतः सन्, तत्प्राप्त्युपायवैचित्र्ये- तल्लाभोपायनानात्वे सति, स्वकृतिसाध्यतासूचनाय वैचित्र्योपादानम्; न हि बहूनामुपायानां मध्य एकोऽप्यनलसस्य कृतिसाध्यो न भवतीति, नहि- नैव, मुक्त्वा तदुपायम्, अन्यत्र- अन्योपाये, प्रवर्तते ॥ ४४ ॥

यस्त्वन्यत्र प्रवर्तते नासौ तत्स्वरूपज्ञ एवेत्याह—

न चासौ तत्स्वरूपज्ञो योऽन्यत्रापि प्रवर्तते। मालतीगन्धगुणविद्दर्भे न रमते ह्यलिः ॥४५॥

न चासौ तत्स्वरूपज्ञः- तत्त्वतश्चिन्तामणिरत्नस्वरूपज्ञः, योऽन्यत्रापि- चिन्तामणिव्यतिरिक्तोपायेऽपि, तदुपायं मुक्त्वा प्रवर्तते। प्रतिवस्तूपमया समर्थयति- मालतीगन्धगुणवित्- जातिकुसुमसौरभज्ञः, अलिः- भ्रमरास्तिर्यक्सत्त्वोऽपि, हि- यतः, दर्भे- तृणविशेषे, न रमते; किमुतान्यः?, एवं न भवतीत्यभिप्रायः ॥ ४५ ॥

प्रधानपुरुषार्थमङ्गीकृत्योभयोपयोगमाह—

मुक्तिश्च केवलज्ञान-क्रियातिशयजैव हि। तद्भाव एव तद्भावात्तदभावेऽप्यभावतः ॥४६॥ ॥४२०॥

मुक्तिश्च- प्रधानपुरुषार्थरूपा, केवलज्ञान-क्रियातिशयजैव हि- उभयनिबन्धनैव, नानुभयनिबन्धनिकेत्यर्थः। कुतः?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याह– तद्भाव एव– केवलज्ञान-शैलेशीक्रियाभाव एव, तद्भावात्– मुक्त्युत्पादात्, तदभावेऽपि– केवलज्ञान-शैलेश्यन्यतराभावेऽपि, अभावात्– मुक्त्यनुत्पादात्, उभयोर्नियतान्वय-व्यतिरेकानुविधानेऽप्यन्यतरेणान्यतरासिद्धौ चाविनिगमादिति भावः ॥ ४६ ॥

तन्त्रान्तरीया अपि मध्यस्था इत्थमेवास्थितवन्त इत्याह—

न विविक्तं द्वयं सम्यगेतदन्यैरपीष्यते। स्वकार्यसाधनाभावाद्यथाह व्यासमहर्षिः ॥४७॥

न विविक्तम्– अन्यतरासंयुक्तम्, एतद् द्वयम्, अन्यैरपि– तन्त्रान्तरीयैरपि, सम्यगिष्यते। कुतः ? इत्याह– स्वकार्यसाधनाभावात्, कार्यासाधकस्य चासम्यक्त्वात्। संवादमाह– यथाह व्यासमहर्षिः ॥ ४७ ॥

'बठरश्च तपस्वी च शूरश्चाप्यकृतव्रणः। मद्यपा स्त्री सतीत्वं च राजन्! न श्रद्दधाम्यहम्'।४८।

बठरश्च– मूर्खश्च, तपस्वी च– उत्कृष्टतपःकारी च; शूरश्चापि– प्रथमप्रहारादिकैश्यहीनश्चापि, अकृतव्रणः– अनिर्मितक्षतः; तथा, मद्यपा– चित्तभ्रमहेतुमद्यभोगवती, स्त्री, सतीत्वं च– पतिव्रतात्वं च; तत्र राजन्! न श्रद्दधाम्यहमेतत्, शीतोष्णस्पर्शादिवत् परस्परविरुद्धत्वाद् बठरत्व-तपस्वित्वादीनामिति भावः। ननु फलोपहित एव तत्त्वतो हेतुत्वव्यवहारेऽपि फलोपहितत्वेन न हेतुता, आत्माश्रयात्; नापि कुर्वद्रूपत्वेन, भेदविशेषेण वा, तेन रूपेणान्वय-व्यतिरेकाग्रहात्; किन्तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यक्प्रवृत्तित्वेनैव फलप्राप्तिहेतुता, ज्ञानं तु प्रवृत्तिजनकतयाऽन्यथासिद्धमिति चेत् । न, रत्नवाणिज्यादिकर्मण एव विशिष्ट-धनादिफलप्राप्तिहेतुत्वात्, सम्यग्ज्ञान-प्रवृत्त्योस्तु तत्र तत्र कर्मण्येव तुल्यवद्व्यापारात् । अत एव धनव्यापारवतामीश्वराणां पाण्डित्यप्रयोजकसम्यग्ज्ञानाभावेऽपि रत्नवाणिज्यादिप्रयोजकसम्यग्ज्ञानसत्त्वाद् न क्षतिः; अन्यथा फलावच्छिन्नत्वरूपप्रवृत्ति-सम्यक्त्वस्य हेतुतावच्छेदकत्वायोगात्; सम्यग्ज्ञानपूर्वकप्रवृत्तित्वेन हेतुत्वे त्वावश्यकत्वाज्ज्ञानस्यैव हेतुत्वमिति ज्ञाननयेन वक्तुं शक्यत्वात्; चारित्रस्य तु प्रवृत्तिरूपस्यैवाधिकृतफलहेतुकर्मत्वात् । तत्र ज्ञान-क्रिययोर्द्वार-द्वारिभावेन फल-हेतुत्वं निराबाधम् । एतेन 'मन्त्राद्युपयोगादेव केवलाद् वनितादिफलप्राप्तेः क्रियाया अकिञ्चित्करत्वम्' इति ज्ञाननयोक्तो दोषो निरस्तः, तत्र वनिताद्यागमनस्यैव वनितादिप्राप्तिहेतुत्वात्, तत्र च मन्त्रोपयोगवत् परिजपनादिक्रियाया अपि हेतुत्वात्; तदाह भाष्यकारः—

"परिजवणाई किरिया मंतेसु वि साहणं ण तम्मत्तं । तन्नाणओ अ न फलं तन्नाणं जेणमकिरियं ॥ १ ॥"

अथ परिजपनमपि धारावाहिकं मन्त्रज्ञानमेव, न तु वाग्व्यापाररूपा क्रियाऽपि, तूष्णीं मन्त्रं जपतामपि फलसिद्धेः; न चाक्रियस्याकाशवत् कार्यजनकत्वमसंगतमिति वाच्यम्; क्रियायाः संयोग-विभागादावेव हेतुत्वेन तां विनाऽऽकाशादावपि कार्यान्तराभ्युपगमादिति चेत् । न, पुरुषार्थे वनिताद्याकर्षणे परिजपनरूपमानसव्यापाराख्याया अप्यन्तःक्रियाया हेतुत्वात्, तत्तन्मन्त्रसंकेतोपनिबद्धदेवताप्रेरणजन्यत्वाच्च तस्य; तदाह—

---

१ परिजपनादिः क्रिया मन्त्रेष्वपि साधनं न तन्मात्रम् । तज्ज्ञानतश्च न फलं तज्ज्ञानं येनाक्रियम् ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"तो तं कत्तो, भन्नइ तं समयणिबद्धदेवओवहियं । किरियाफलं चिय जओ न णाणमित्तोवओगस्स ॥१॥"

स्यादेतज्ज्ञानं परिच्छेद एवोपक्षीणं न मुक्तिप्राप्तावुपयुज्यत इति । मैवम्, ज्ञान-क्रिययोः शिबिकावाहकपुरुषवदेकस्वभावेनासहकारित्वेऽपि नयन-चरणयोरिव स्वभावभेदेन सहकारित्वाभिधानात्, तयोर्द्वार-द्वारिभावेनैव हेतुत्वोपपत्तेः । तथा सति प्रवचनमातृज्ञानातिरिक्तश्रुतानुपयोगः स्यादिति चेत् । न, स्वातन्त्र्येण श्रुतस्यापि ध्यानादिमानसक्रियाद्वारकस्यैवोपयोगात्; अन्यथा द्रव्यश्रुतत्वापत्तेः । स्यादेतज्ज्ञानस्य परम्परया हेतुत्वादन्नपक्तावन्धनादेरिव गौणं हेतुत्वम्;

"पारंपरप्पसिद्धी दंसण-नाणेहिं होइ चरणस्स । पारंपरप्पसिद्धी जह होइ तदन्न-पाणाणं ॥ १ ॥"

इत्यागमात्, क्रियायास्त्वनन्तरत्वाद् मुख्यं हेतुत्वमिति क्रियानयो विशिष्यते, ज्ञाननयस्तु हीयते; तदिदमुक्तं भाष्यकृतापि—"नाणं परंपरमणंतरा उ किरिया तयं पहाणयरं, जुत्तं कारणं" इति कथमुभयनयानुग्राहकमुभयवादिमतमिति ?। मैवम्, प्रवृत्तिकाले तज्जनकज्ञानस्यापि सत्त्वेनानन्तरत्वाविरोधात् । न ह्युत्तरविशेषगुणेन पूर्वविशेषगुणनाश इत्यभ्युपगमो नः। न चैवं क्रियाया द्वारत्वविरोधः, द्वारिणोऽनाशेऽपि स्वफलयोनियतमध्यभावेन तदविरोधात्, द्वारत्वे द्वारिनाशविशिष्टत्वाप्रवेशात्; तदिदमुक्तं भाष्यकृतैव "अहवा समयं तो दोन्नि जुत्ताइं" । प्रथमपक्षाभिधानं तु ज्ञाननयाभिमतस्वविषयमुख्यत्वाभि-

---

१ ततस्तत् कुतः, भण्यते तत् समयनिबद्धदेवतोपहितम् । क्रियाफलमेव यतो न ज्ञानमात्रोपयोगस्य ॥ १ ॥

२ पारम्पर्यप्रसिद्धिर्ज्ञान-दर्शनाभ्यां भवति चरणस्य । पारम्पर्यप्रसिद्धिर्यथा भवति तथाऽन्न-पानयोः ॥ २ ॥

३ ज्ञानं पारम्परमनन्तरा तु क्रिया तत् प्रधानतरं युक्तं कारणम् । ४ अथवा समकं ततो द्वे युक्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निवेशत्यागाय, ह्रस्वत्व-दीर्घत्वयोरिव गौणत्व-मुख्यत्वयोरापेक्षिकत्वात्। एतेन

"जम्हा दंसण-नाणा संपुन्नफलं ण दिंति पत्तेयं। चारित्तजुआ दिंति हु विसिस्सए तेण चारित्तं ॥ १ ॥"

इतीयमागमोक्तिर्व्याख्याता, आत्मगृहशुद्धये प्रदीपदीपन-संमार्जनीमार्जन-वातायनजालकपिधानस्थानीयज्ञान-तपः-संयमानामेकदैव व्यापारात्, फलोपयोगितया द्वयोरपि मुख्यत्वाविशेषात्; यदागमः—

"नाणं पयासयं सोहओ तवो संजमो अ गुत्तिकरो। तिण्हं पि समाओगे मुक्खो जिणसासणे भणिओ ॥१॥" इति।

यदि चैवमपि 'कालतो देशतश्च स्वेतरसकलकारणसमवधानव्याप्यसमवधानकत्वलक्षण उत्कर्षश्चारित्रक्रियायामेव, न खलु षष्ठगुणस्थानभाविपरिणामरूपं चारित्रं चतुर्थगुणस्थानभाविपरिणामरूपं ज्ञानमतिपत्य वर्तते, न वा चतुर्दशगुणस्थानचरमसमयभाविपरमचारित्रं त्रयोदशगुणस्थानभाविकेवलज्ञानमतिपत्येति; घटकारणेषु दण्डादिष्वपि चरमकपालसंयोगोऽपि हीत्थमेव विशिष्यते; न च स्वप्रयोज्यविजातीयसंयोगसंबन्धेन दण्डादेरपि स्वप्रयोज्यातिशयितचारित्रसंबन्धेन च ज्ञानादेरपि स्वेतरसकलकारणसमवधानव्याप्यसमवधानकत्वं निर्बाधमिति वाच्यम्, स्वतस्तथात्वस्य विशेषार्थत्वात्' इत्यभिमन्यते, तदा 'ज्ञानमेव विशिष्यते, तादृशक्रियाजनकत्वात्, न च स्वापेक्षया तस्यातिशयोऽस्तु, न तु स्वकार्यापेक्षयेति

१ यस्माज्ज्ञान-दर्शने संपूर्णफलं न दत्तः प्रत्येकम्। चारित्रयुक्ते दत्तो विशिष्यते तेन चारित्रम् ॥ १ ॥

२ ज्ञानं प्रकाशकं शोधकं तपः संयमश्च गुप्तिकरः। त्रयाणामपि समायोगे मोक्षो जिनशासने भणितः ॥ १ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाच्यम्, "दासेण मे" इत्यादिन्यायात्, स्वकार्यकार्यस्यापि स्वकार्यत्वाविशेषात्, कार्यद्वैविध्येन तस्य द्विधातिशयात्, स्वकार्यनिष्ठातिशयस्य परम्परया स्वनिष्ठत्वाच्च; यथा हि मृत्तिकाऽपान्तरालवर्तिपिण्डादिकार्यं जनयन्ती घटं प्रति न मुख्यतां जहाति तथा ज्ञानमप्यान्तरालिकं संवरं जनयद् न मोक्षं प्रति तथा' इति ज्ञाननयस्यप्रसरोऽपि कथं निवारणीयः? । तस्मात् तुल्यवत्समुच्चयेनैव ज्ञान-क्रिये आदरणीये इति । अधिकं परीक्षायाम् ॥ ४८ ॥ तदेवमुपदर्शितं शास्त्रसम्यक्त्वम् ॥

अथ प्राग् वक्ष्यमाणत्वेन प्रतिज्ञातं मुक्तेर्मृत्यादिवर्जितत्वमुपपादयति--

मृत्यादिवर्जिता चेह मुक्तिः कर्मपरिक्षयात् । नाकर्मणः क्वचिज्जन्म यथोक्तं पूर्वसूरिभिः॥

मृत्यादिवर्जिता च- मृत्यु-जरा-जन्मवर्जिता च, इह-प्रवचने, मुक्तिः, कर्मपरिक्षयात्- सर्वथा कर्मविगमात्, तदभावे च कारणं विना कार्यानुत्पत्तेरुक्तोपपत्तेः । तदाह- न, अकर्मणः- कर्मरहितस्य, क्वचित्, जन्म- सम्मूर्च्छनोत्पत्त्यादिरूपम्, जन्मनो गत्यादिकर्मनिमित्तत्वात्; यथोक्तं पूर्वसूरिभिः- उमास्वातिप्रमुखैः ॥ ४९ ॥

किमुक्तम्? इत्याह--

दग्धे बीजे यथात्यन्तं प्रादुर्भवति नाङ्कुरः। कर्मबीजे तथा दग्धे न रोहति भवाङ्कुरः॥

---

१ "दासेण मे खरो कीओ दासो वि मे खरो वि मे" इत्यस्मादित्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्यन्तं- निःशेषतया, दग्धे बीजे- शाल्यादिबीजे, यथाऽङ्कुरः- शाल्यङ्कुरः, न प्रादुर्भवति; तथा कर्मबीजे- ज्ञानावरणादिप्रकृतिमये, अत्यन्तं दग्धे सति, भवाङ्कुरः- नर-नारकाद्यग्रिमभवः 'न प्रादुर्भवति' इति योज्यम् ॥ ५० ॥

जन्माभावे जरा-मृत्योरभावो हेत्वभावतः। तदभावे च निःशेषदुःखाभावः सदैव हि ॥

जन्माभावे, जरा-मृत्योः- वयोहान्या-ऽऽयुःक्षयलक्षणयोः, अभावः- अनुत्पत्तिः, हेत्वभावतः- कारणाभावात्, जन्मावस्थारूपत्वात् तयोः। ततः सिद्धं मृत्यादिवर्जितत्वम्। तदभावे च- मृत्याद्यभावे च, निःशेषदुःखाभावः- रोग-शोकादिसकलदुःखविरहः, सदैव हि- आकालमेव। एवं च दुःखोद्विग्नानां मुक्त्यर्थप्रवृत्तिरुपपादिता भवति ॥ ५१ ॥

न चैवमभावैकमयी मुक्तिरित्याह—

परमानन्दभावश्च तदभावे हि शाश्वतः। व्याबाधाभावसंसिद्धः सिद्धानां सुखमुच्यते ॥५२॥

परमानन्दभावश्च- प्रकृष्टस्वास्थ्यलक्षणः, तदभावे- निःशेषदुःखाभावे, हि- निश्चितम्, शाश्वतः- अप्रतिपाती, व्याबाधाभावसंसिद्धः- काम-क्रोध-शीतो-ष्ण-क्षुत्-पिपासादिव्याकुलतानिवृत्त्युपजातः, सिद्धानां सुखमुच्यते। न च तत्र सुखाभावः, विषयसंनिकर्षादिवद् व्याबाधाभावस्यापि सुखविशेषहेतुत्वात्; काम-क्रोधाद्यभावेऽपि योगिनां सुखसाक्षात्कार-

१ मूले सर्वत्रादर्शेषु 'सुखमिष्यते' इति पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साम्राज्यात् । न च तत्र दुःखाभाव एव सुखाभिमानः, शमादितारतम्येन तत्तारतम्यानुभवात् । न चाभिमानिकमेव तत् सुखं न मुक्तावनुवर्तितुमुत्सहत इति वाच्यम्, चुम्बनादिजनितसुखवैलक्षण्येनानुभवात्, अभिमानविरहे तदभिव्यक्तेश्च । नापि मानोरथिकत्वादेव तस्य मुक्तावननुवृत्तिः, संहृतसकलविकल्पानामपि तदनुभवात् । वैषयिकत्वं तु तत्रासंभवदुक्तिकमेव, स्रगादिविषयाणां तदाऽसंनिधानात् । नाप्याभासिकत्वादेव तस्य मुक्तावननुवृत्तिः । न ह्यनभ्यस्तयोगानां शमसुखसंभवः । न चाभ्यासोऽसकृत्प्रवृत्तिलक्षणो मुक्तौ संभवतीति वाच्यम्, अभ्यासस्य तत्त्वज्ञान इव निरुपमसुखेऽपि प्रतिबन्धकनिवर्तकतयैवोपयोगित्वात्, तत्त्वतस्तु तत्र प्रतिबन्धकापगमस्यैव हेतुत्वात् । प्रतिबन्धकं च तत्र व्याबाधाजनकं वेदनीयं कर्मैव । इति सिद्धं व्याबाधाभावसिद्धं सिद्धानां सुखम् । न च धर्माभावात् तदा सुखानुपपत्तिः, तदभावेऽपि तज्जनितसुखनाशकाभावेनानुवृत्तेः, स्थैर्यरूपचारित्रधर्मस्य तदा सद्भावस्यापि ग्रन्थकृदभिमतत्वाच्च । उत्पन्ने सिद्धसुखे प्रध्वंसाभावे दृष्टमविनाशित्वमनभ्युपगच्छतः, काप्यदृष्टमप्रच्युतानुत्पन्नमीश्वरज्ञानादिकं चाभ्युपगच्छतः परस्य तु सुस्थितं नैयायिकत्वमिति दिग् ॥५२॥

एतद्गुणगर्भमेव सिद्धस्वरूपमभिष्टौति—

सर्वद्वन्द्वविनिर्मुक्ताः सर्वबाधाविवर्जिताः । सर्वसंसिद्धसत्कार्याः सुखं तेषां किमुच्यते ? ।५३।

सर्वैर्द्वन्द्वैः शीतोष्णादिभिर्विनिर्मुक्ताः, तथा, सर्वाभिर्बाधाभिः क्षुत्-पिपासादिपीडाभिर्विवर्जिताः, तथा, सर्वं संसिद्धं सत्कार्यमानन्दोपयोगि कृत्यं येषां ते तथा । ईदृशा हि सिद्धा भगवन्तः । किमुच्यते तेषां सुखम् ?, परिमिताहेतुकत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरिमितं हि तत्; सर्वेषामपि सांसारिकसुखानामेतदनन्तभागवर्तित्वात्, एतदुपमानस्य कस्याप्यलाभात्। यथा हि नगरगुणान् दृष्ट्वा पल्ल्यामागतो भिल्लस्तत्प्रतिमल्लं कमप्यपश्यन् जानन्नपि नोपमातुमीष्टे परेषां पुरः, तथा जानन्नपि हि सिद्धसुखमहिमानमसद्भिरुपमानैः केवल्यपि नोपमातुमीष्टे। इति कथमिव परेषामदो वाचां गोचरः? इति स्मर्तव्यम् ॥ ५३ ॥

भूयोऽपि परममङ्गलभूतममीषां लक्षणमभिष्टौति—

अमूर्ताः सर्वभावज्ञास्त्रैलोक्योपरिवर्तिनः। क्षीणसङ्गा महात्मानस्ते सदा सुखमासते ॥५४॥

अमूर्ताः– नाम-गोत्रकर्मक्षयाद् रूपादिसंनिवेशमयमूर्तिरहिताः, सर्वभावज्ञाः– निरावरणज्ञस्वभावतया सकलपदार्थज्ञातारः, तथा, त्रैलोक्योपरिवर्तिनः– ऊर्ध्वगतिस्वभावत्वेन परतो धर्मास्तिकायाद्यनुपग्रहेण च लोकान्तस्थाः "[1]अलोए पडिहया सिद्धा लोअग्गम्मि पइट्ठिया" इत्यागमात्; तथा, क्षीणसङ्गाः–क्षीणाशेषकर्माणः, अत एव महात्मानः– अष्टगुणयोगित्वेन सर्वथा शुद्धात्मानः, अवोचाम च– "[2]सव्वहा परमप्पत्तं सिद्धाणं चेव संसिद्धं"। ते– सिद्धाः, सदा– निरन्तरम्, एकरूपतयैवाव्याकुलम्, आसते– अवतिष्ठन्ते।

ते च सिद्धास्तीर्थादिभेदात् सूत्रे पञ्चदशविधाः प्रज्ञप्ताः, तथा च प्रज्ञापनासूत्रम्–"[3]अणन्तरसिद्धअसंसारसमावण्णगजी-

---

१ अलोके प्रतिहताः सिद्धा लोकाग्रे प्रतिष्ठिताः। २ सर्वथा परमात्मत्वं सिद्धानामेव संसिद्धम्। ३ अनन्तरसिद्धासंसारसमापन्नकजीवप्रज्ञापना पञ्चदशविधा प्रज्ञप्ता, तद्यथा– तीर्थसिद्धाः, अतीर्थसिद्धाः, तीर्थकरसिद्धाः, अतीर्थकरसिद्धाः, स्वयंबुद्धसिद्धाः, प्रत्येकबुद्धसिद्धाः, बुद्धबोधितसिद्धाः, स्त्रीलिङ्गसिद्धाः, पुरुषलिङ्गसिद्धाः, नपुंसकलिङ्गसिद्धाः, स्वलिङ्गसिद्धाः, अन्यलिङ्गसिद्धाः, गृहिलिङ्गसिद्धाः, एकसिद्धाः, अनेकसिद्धाः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वपण्णवणा पन्नरसविहा पण्णत्ता, तं जहा– तित्थसिद्धा, अतित्थसिद्धा, तित्थगरसिद्धा, अतित्थगरासिद्धा, सयंबुद्धसिद्धा, पत्तेयबुद्धसिद्धा, बुद्धबोहिअसिद्धा, इत्थीलिङ्गसिद्धा, पुरिसलिङ्गसिद्धा, णपुंसगलिङ्गसिद्धा, सलिङ्गसिद्धा, अण्णलिङ्गसिद्धा, गिहिलिङ्गसिद्धा, एगसिद्धा, अणेगसिद्धा" इति । तत्र तीर्थे चतुर्वर्णश्रमणसंघरूपे प्रथमगणधररूपे वोत्पन्ने सति सिद्धास्तीर्थसिद्धाः । तीर्थस्याभावेऽनुत्पत्तिलक्षण आन्तरालिकव्यवच्छेदलक्षणे वा सति सिद्धा अतीर्थसिद्धा मरुदेव्यादयः, सुविधिस्वाम्याद्यपान्तराले विरज्याप्तमहोदयाश्च । तीर्थकरा अवाप्तजिननामोदयार्जितसमृद्धयः सन्तः सिद्धास्तीर्थकरसिद्धाः । अतीर्थकराः सामान्यकेवलिनः सन्तः सिद्धा अतीर्थकरासिद्धाः । स्वयमेव बाह्यप्रत्ययमन्तरेणैव निजजातिस्मरणादिना बुद्धाः सन्तः सिद्धाः स्वयंबुद्धसिद्धाः, ते च तीर्थकरा-ऽतीर्थकरभेदेन द्विविधाः, इह चातीर्थकरैरधिकारः । प्रत्येकं बाह्यं वृषभादिकारणमभिसमीक्ष्य बुद्धाः सन्तः सिद्धाः प्रत्येकबुद्धसिद्धाः । बुद्धैर्गुर्वादिभिर्बोधिताः सन्तः सिद्धा बुद्धबोधितसिद्धाः । स्त्रिया लिङ्गं स्त्रीलिङ्गं स्त्रीत्वस्योपलक्षणमित्यर्थः, तच्च त्रिधा– वेदः, शरीरनिर्वृत्तिः, नेपथ्यं चेति; इह च शरीरनिर्वृत्त्यैवाधिकारो न वेद-नेपथ्याभ्याम्; तयोर्मोक्षानङ्गत्वात्; ततस्तस्मिंल्लिङ्गे वर्तमानाः सन्तः सिद्धाः स्त्रीलिङ्गसिद्धाः; आह च नन्द्यध्ययनचूर्णिकृत्– "इत्थीए[1] लिङ्गं इत्थिलिङ्गं, इत्थीए उवलक्खणं ति वुत्तं हवइ । तं च तिविहं– वेदो, सरीरं, णेवत्थं च । इह सरीराणिवत्तीए अहिगारो, ण वेअ-णेवत्थेहिं" । तथा, पुंलिङ्गे पुंशरीरनिर्वृत्तिरूपे व्यवस्थिताः सन्तः सिद्धाः पुंलिङ्ग-

1 स्त्रिया लिङ्गं स्त्रीलिङ्गम्, स्त्रिया उपलक्षणमित्युक्तं भवति, तच्च त्रिविधम्– वेदः, शरीरम्, नेपथ्यं च । इह शरीरनिर्वृत्तेरधिकारः, न वेद नेपथ्याभ्याम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धाः। एवं नपुंसकशरीरे व्यवस्थिताः सन्तः सिद्धा नपुंसकलिङ्गसिद्धाः। तथा, स्वलिङ्गे रजोहरणादिरूपे व्यवस्थिताः सन्तः सिद्धाः स्वलिङ्गसिद्धाः। अन्यलिङ्गे परिव्राजकादिसंबन्धिन्येव व्यवस्थिताः सिद्धा अन्यलिङ्गसिद्धाः। गृहिलिङ्गे व्यवस्थिताः सिद्धा गृहिलिङ्गसिद्धा मरुदेव्यादयः। एकस्मिन् समय एकका एव सन्तः सिद्धा एकसिद्धाः। एकस्मिन् समयेऽनेकैः सह सिद्धा अनेकसिद्धाः।

अत्राचक्षते क्षपणका अभिनिवेशपेशलचित्ताः– ''स्त्रीलिङ्गसिद्धाः' इत्यत्र 'पूर्वं क्षीणस्त्रीवेदाः सन्तः सिद्धाः' इत्ययमर्थ आश्रयणीयः, लिङ्गपदेन मोक्षानङ्गस्यापि वेदस्यात्रोपादानात्, अतीर्थकरसिद्धादाविव मोक्षाङ्गोपाध्युपादाने नियमाभावात्, स्त्रीशरीरावस्थितास्तु न मुक्तिभाजः, स्त्रीत्वात्, व्यतिरेके पुरुषवत्। अथवा, स्त्रियो मोक्षभाजो न भवन्ति, विशिष्टपूर्वाध्ययनलब्ध्यभाववत्त्वात्, अभव्यवत्' इति। ते भ्रान्ताः, लिङ्गपदेन वेदोपादानेऽप्युक्तार्थस्य स्त्रीमुक्तिं विनानुपपत्तेः, पूर्वं स्त्रीवेदादिक्षयस्य शरीरनिर्वृत्तिनियमनियतत्वात्; तथाहि– यदि पुरुषः प्रारम्भकस्तदा पूर्वं नपुंसकवेदम्, ततः स्त्रीवेदम्, ततो हास्यादिषट्कं क्षपयति, ततः पुरुषवेदं खण्डत्रयं कृत्वा खण्डद्वयं युगपत् क्षपयति, तृतीयखण्डं तु संज्वलनक्रोधे प्रक्षिपति। यदि च स्त्री प्रारम्भिका, ततः प्रथमं नपुंसकवेदम्, ततः पुरुषवेदम्, ततः षट्कम्, ततश्च स्त्रीवेदम्। यदि नपुंसकः प्रारम्भकस्तदा प्रथमं स्त्रीवेदम्, ततः पुरुषवेदम्, ततः षट्कम्, ततो नपुंसकवेदमिति। अन्यथा कल्पनं चानागमिकम्। न च 'स्त्रीलिङ्गसिद्धाः' इत्यत्र स्वारसिकोऽयमर्थः, सतिसप्तम्याः स्त्रीलिङ्गव्यवस्थितस्यैव स्वरसतो लाभात्। परिभाषा चासंप्रदायिकी कल्पितत्वाद् न प्रमाणमिति न किञ्चिदेतत्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'स्त्रियो न मुक्तिभाजः' इत्यत्र च सर्वासां स्त्रीणां पक्षीकरणेऽभव्यस्त्रीणां मुक्त्यनभ्युपगमात् सिद्धसाधनम्; भव्यस्त्रीणामपि पक्षीकरणे भव्यानामपि सर्वासां मुक्त्यनभ्युपगमात् "भव्वा वि ते अणंता जे सिद्धिसुहं ण पावंति" इति वचनप्रामाण्यात्; अवाप्तसम्यग्दर्शनानामपि पक्षीकरणे परित्यक्तसम्यग्दर्शनाभिः, अपरित्यक्तसम्यग्दर्शनानामपि पक्षीकरणेऽप्राप्ताविकलचरित्राभिस्तद्दोषतादवस्थ्यात् । किञ्च, स्तन-जघनादिस्त्र्याकारयोगित्वरूपस्त्रीत्वहेतुर्विपर्यये बाधकप्रमाणाभावात् संदिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिकः । न च पक्षीयव्यभिचारसंशयस्यानुमितिप्रतिबन्धकत्वेऽनुमानमात्रोच्छेद इति शङ्कनीयम्, स्वारसिकस्य तस्यातथात्वेऽप्यप्रयोजकत्वाहितस्यान्वय-व्यतिरेकाभ्यां प्रतिबन्धकत्वावधारणात् । एतेन 'स्त्रीत्वपर्यायकालावच्छेदेन स्त्रीत्वावच्छिन्ने मुक्त्ययोगित्वसाधने न दोषः, पक्षतावच्छेदकावच्छेदेन साध्यासिद्धावंशतः सिद्धसाधनस्य 'पृथिवीतरेभ्यो भिद्यते' इत्यादाविवादोषत्वात्' इत्युक्तावपि न क्षतिः । नन्वेवमपि द्वितीयहेतौ न बाधकम्, पूर्वाध्ययनाभावे सकलकर्मविटपिदवानलकल्पाऽऽद्यशुक्लध्यानद्वयाभावात्, "आद्ये पूर्वविदः" इति वचनप्रामाण्यात्, तदभावे च केवलज्ञानानुत्पत्त्या मुक्त्यनुपपत्तेरप्रयोजकत्वाभावात्; अयमेवाभिप्रायः 'न स्त्रीणां मुक्तिः, पुरुषेभ्यो हीनत्वात्, नपुंसकादिवत्' इति प्रभाचन्द्रप्रयोगस्यापि, श्रुतापेक्षया हीनत्वस्य ग्रहणात्, उक्तरीत्यांशतः सिद्धसाधनस्यादोषत्वाच्च 'सामान्यतः पक्षत्वे सिद्धसाधनम्, विवादास्पदीभूतानां पक्षत्वे चेतरव्यावर्तकपक्षविशेषणानुपादाने पक्षस्य न्यूनत्वम्, प्रकरणादेव तल्लाभे च पक्षस्यापि तत एव लभ्यस्यानुपादानप्रसङ्गः' इति दोषानवकाशादिति चेत् । न, पूर्वाध्ययनं विनाऽऽद्य-

१ भव्या अपि तेऽनन्ता ये सिद्धिसुखं न प्राप्नुवन्ति । २ तत्त्वार्थाधिगमसूत्रे ९ । ३९ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुक्लध्यानद्वयाभावे प्राक्तनभवानधीतपूर्वाणां वर्तमानतीर्थाधिपत्यादीनामपि तदभावेन मुक्त्यभावापत्तेः। यदि च 'शास्त्रयोगागम्यसामर्थ्ययोगावसेयभावेष्वतिसूक्ष्मेष्वपि तेषां विशिष्टक्षयोपशमप्रभवप्रभावयोगात् पूर्वधरस्येव बोधातिरेकसद्भावादाद्यशुक्लध्यानद्वयप्राप्तेः केवलावाप्तिक्रमेण मुक्तिप्राप्तिरिति न दोषः, अध्ययनमन्तरेणापि भावतः पूर्वविरवसंभवात्' इति विभाव्यते; तदा निर्ग्रन्थीनामप्येवं द्वितयसंभवे दोषाभावात्। किञ्च, विशिष्टपूर्वाध्ययनानधिकारोऽपि तासां कुतः सिद्धः?। सर्वज्ञप्रणीतादागमादिति चेत्। तत एव मुक्तिभाक्त्वस्यापि तासां सिद्धिरस्तु। न हि 'एकवाक्यतया व्यवस्थितो दृष्टेष्टादिषु बाधामननुभवन्नाप्तागमः क्वचित् प्रमाणं क्वचिद् न' इत्यभ्युपगन्तुं शक्यं प्रेक्षावता। वस्तुतोऽशंतः सिद्धसाधनमप्यबाधितविशेषान्तरोपस्थितौ न दोषः, अन्यथांशतस्तत्त्वायोगात्। न चात्राप्राप्ताविकलचारित्रातिरिक्तं मुक्त्यभाजनं विशेषान्तरमुपतिष्ठते येन तद् न दोषः स्यादिति न किञ्चिदेतत्। इत्थं च विवादास्पदीभूतस्त्रीणां पक्षत्वेऽपि न निर्वाहः, विवादास्पदीभूतत्वेनातिरिक्तविशेषपरिग्रहायोगात्। एतेन 'न्यूनत्वं पुरुषदोषो न तु वस्तुदोषः, न चैतावतैव वादिपराजयात् कथापर्यवसानम्, तत्त्वनिर्णिनीषायामदोषात्' इत्युक्तावपि न क्षतिः।

अथ चारित्राभावादेव स्त्रीणां न मुक्तिः। नन्वसावपि तासां कुतः सिद्धः?। स्त्रीत्वादिति चेत्। नन्वेवं पुरुषत्वात् पुरुषस्यापि तदभावः किं न सिध्येत्?। अथ पुरुषे सकलसावद्ययोगनिवृत्तिरूपचित्तपरिणतेः स्वसंवेदनाध्यक्षसिद्धत्वात्, अन्यैश्चानुमानाद् न तत्सिद्धिरिति चेत्। ननु सा स्त्रियां तथैव किं नावसीयते?। अथ तासां भगवता नैर्ग्रन्थ्यस्यानभिधानाद् न तत्प्राप्तिः। ॥४२६॥

असदेतत्, तासां तस्य भगवता "[1]णो कप्पदि णिग्गंथस्स णिग्गंथीए वा अभिन्नतालपलंवे पडिगाहित्तए" इत्याद्यागमेन बहुशः प्रतिपादनात्, अयोग्यायाः प्रव्रज्याप्रतिषेधस्य विशेषाभ्यनुज्ञापरत्वाच्च । अथ सलज्जतया तासां चारित्रमूलमचेलत्वं न संभवति, अप्रावृतानां तासां तिरश्चीनामिव पुरुषैरभिभवनीयत्वात्, "[2]नो कप्पइ णिग्गंथीए अचेलाए होत्तए" इति भगवदागमेनापि निषिद्धमेव नाग्न्यम्, इति न तासां चारित्रसंभव इति चेत् । न, नाग्न्यं हि न चारित्राङ्गम्, लज्जारूपसंयमविघातित्वात् । न च धर्मोपकरणधरणेन परिग्रहः, तस्य मूर्च्छारूपत्वादिति; प्रपञ्चितत्वादिति न किञ्चिदेतत् ।

न च स्त्रीणां स्वभावत एव मायाप्रकर्षवत्त्वमुज्जृम्भते; न च तत्प्रकर्षे निष्कषायपरिणामरूपं चारित्रमुज्जीवतीति चेत् । न, चरमशरीरिणामपि नारदादीनां मायादिप्रकर्षवत्त्वश्रवणात् । तेषां संज्वलनी माया न चारित्रविरोधिनीति चेत् । संयतीनामपि तादृश्येव सा किं न तथा ? । न च सर्वासां मायाप्रकर्षनियमोऽपि, स्वभावसिद्धाया अपि तस्या भूयसीषु विपरीतपरिणामेन निवृत्तिदर्शनात् । एतेन 'स्त्रियो न चारित्रपरिणामवत्यः, पुरुषापेक्षया तीव्रकामवत्त्वात्, नपुंसकवत्' इत्यपास्तम्, तीव्रस्यापि कामस्य भूयसीषु तासु श्रुतपरिशीलन-साधूपासनादिप्रसूतविपरीतपरिणामेन निवृत्तिदर्शनात् । न च मिथ्यात्वसहायेन महापापेन स्त्रीत्वस्य निर्वर्तनाद् न स्त्रीशरीरवर्तिन आत्मनश्चारित्रप्राप्तिरिति शङ्कनीयम्, सम्यक्त्वप्रतिपत्त्यैव मिथ्यात्वादीनां क्षयादिसम्भवात्; आस्त्रीशरीरं तदनुवृत्तौ तस्याः सम्यक्त्वादेरप्यपलापप्रसङ्गात्; उक्तं च– 'सम्यक्त्वप्रतिपत्तिकाल एवान्तःकोटिस्थितिकानां सर्वकर्मणां भावेन मिथ्यात्वमोहनीयादीनां क्षयादिसंभवात्' इति । न च कक्षा-स्तना-

१ न कल्प्यते निर्ग्रन्थस्य निर्ग्रन्थ्या वाऽभिन्नतालप्रलम्बान् प्रतिग्रहीतुम् । २ न कल्प्यते निर्ग्रन्थ्या अचेलया भवितुम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिदेशेषु संसजनाद्यशुद्धेः प्राणातिपातबहुलत्वाद् न तासां चारित्रमिति वाच्यम्; शुद्धशरीराया अपि भूयस्या दर्शनात्, प्राणातिपातपरिणामाभावात्। यदि च स्त्रीणां चारित्रं न स्यात् तदा 'साधुः, साध्वी, श्रावकः, श्राविका च' इति चतुर्वर्णसंघव्यवस्थोत्सीदेत्। अथाणुव्रतधारिणी श्राविकापि 'साध्वी' इत्येवं व्यपदिश्यत इति न दोष इति चेत्। हन्त! तर्हि केवलसम्यक्त्वधारिण्येव श्राविकाव्यपदेशमासादयेत्; एवं च श्रावकेष्वपि तथा द्वैविध्यप्रसङ्गेन पञ्चविधः संघः प्रसज्येत। अथ वेषधारिणी श्राविका 'साध्वी' इति व्यपदिश्यते, श्रावकस्तु तथाभूतस्तत्त्वतो यतिरेवेति चातुर्वैध्यं व्यवतिष्ठत इति चेत्। नूनं गुणं विना वेषधारणे विडम्बकचेष्टैव सा। एतेन 'एकोनषष्टिरेव जीवा यथा त्रिषष्टिः शलाकापुरुषा व्यपादिश्यन्ते तथा त्रिविधोऽपि संघो विवक्षावशाच्चतुर्विधो व्यपदिश्यते' इति निरस्तम्, विवक्षाबीजाभावात्। स्यादेतत् संभवतु नाम चारित्रलेशः स्त्रीणाम्, यद्बलादिमाः साध्वीव्यपदेशमासादयेयुः, न तु मोक्षहेतुस्तत्प्रकर्षोऽपि तासु संभवी। मैवम्, स्त्रीत्वेन समं रत्नत्रयप्रकर्षस्य विरोधासिद्धेः, तस्य शैलेश्यवस्थाचरमसमयभावित्वेनादृष्टत्वात्, तददर्शने च स्वभावत एव च्छाया-ऽऽतपयोरिव तयोः प्रत्यक्षेण विरोधाग्रहात्; प्रत्यक्षाप्रवृत्तौ चानुमानस्याप्रवृत्तेः, तस्य प्रत्यक्षमूलत्वात्, आगमस्य च तद्विरोधप्रतिपादकस्याश्रवणात्, प्रत्युत तदविरोधप्रतिपादकस्यैव जागरूकत्वात्। न च वाद-विक्रिया-चारणादिलब्धिविशेषहेतुसंयमविशेषविरहे कथं तासां तदधिकमोक्षहेतुतत्सत्त्वम्? इति वाच्यम्, लब्धिविशेषहेतुसंयमविरहस्य मोक्षहेतुसंयमविरहाव्याप्यत्वात्, माष-तुषादीनां लब्धिविशेषहेतुसंयमाभावेऽपि मोक्षहेतुतच्छ्रवणात्, क्षायोपशमिकलब्धिविरहेऽपि क्षायिकलब्धेरप्रतिघातात्, अन्यथावधिज्ञानादिकमुपमृद्य केवलज्ञानस्याप्रादुर्भावप्रसङ्गात्, आह च—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"वाद-विकुर्वणत्वादिलब्धिविरहे श्रुते कनीयसि च । जिनकल्प-मनःपर्ययविरहेऽपि न सिद्धिविरहोऽस्ति ॥१॥" इति ।

एतेन 'स्त्रीणां वेद-मोहनीयादिकर्मणः पुरुषापेक्षया प्रबलत्वात्, प्रबलस्य च कर्मणः प्रबलेनैवानुष्ठानेन क्षपणयोग्यत्वात्; अन्यथा जिनकल्पाद्युच्छेदापत्तेः, स्त्रीणां च "[1]जिणकप्पिया इत्थी ण हवइ" इत्याद्यागमेन जिनकल्पनिषेधात्, विशिष्टचारित्राभावात् कथं प्रबलकर्मक्षपणम्, तदभावे च कथं मोक्षः ?' इति निरस्तम्; पुरुषेभ्यः प्रबलकर्मत्वस्यैव स्त्रीणामसिद्धेः, स्त्रीवेदस्य पुंवेदापेक्षया प्राबल्येऽपि तस्य पुरुषेष्वप्यबाधितत्वात्, नैरन्तर्येण प्रज्वलनस्य चानियतत्वात्; क्वचित् स्त्रीत्वसहचरितदोषप्राबल्येऽपि क्वचित् पुंस्त्वसहचरितदोषप्राबल्यस्यापि दर्शनात् । अस्तु वा पुरुषापेक्षया स्त्रीणां प्रबलकर्मत्वम्, तथापि तासां भाववैचित्र्यादेव विचित्रकर्मक्षयः संभवी । नन्वेवं विशिष्टविहारं विना भाववैचित्र्यसंभावनया जिनकल्पिकादीनां जिनकल्पादौ प्रवृत्तिर्न स्यादिति चेत् । न, शक्त्यनिगूहनेन संयमवीर्योल्लास एव हि चारित्रं परिपूर्यते "[2]जइ संजमे वि विरियं ण णिगूहिज्जा ण हाविज्जा" इत्यागमात् । जिनकल्पिकादीनां च स्थविरकल्पापेक्षया विशिष्टमार्गे जिनकल्पादौ शक्तानां विपरीतशङ्कया तत्र शक्तिनिगूहने चारित्रमेव हीयेत, कुतस्तरां तदतिरेकाधीनभाववैचित्र्यप्राप्तिसंभावना ? । स्त्रीणां तु विशिष्टमार्गे शक्तिरेव न, इति स्वोचितचारित्रे शक्तिमनिगुह्य प्रवर्तमानानां न नाम शक्तिनिगूहनाधीना चारित्रहानिरस्ति । एवं चोत्तरोत्तरं चारित्रवृद्धिरेव तासां संभवति । इति भाववैचित्र्याधीनो विचित्रकर्मक्षयः । इदमेवाभिप्रेत्योक्तम्—

"जिनवचनं जानीते श्रद्धत्ते चरति चार्यिका शबलम् । नास्यास्त्यसंभवोऽस्या नादृष्टविरोधगतिरस्ति ॥१॥" इति ।

---

१ जिनकल्पिका स्त्री न भवति । २ यदि संयमेऽपि वीर्यं न निगूहेद् न हीयेत ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ 'विप्रतिपन्नाऽबलाऽशेषकर्मक्षयनिबन्धनाध्यवसायविकला, अविद्यमानाधःसप्तमनरकप्राप्त्यविकलकारणकर्मबीजभूताध्यवसानत्वात्, यो नैवं स नैवम्, यथा संप्रतिपन्नपुरुषः' इति व्यतिरेकिणः स्त्रीषु मुक्तिहेत्वध्यवसायाभावः सिध्यतीति चेत्। न, अबलातो निवर्तमानस्य यथोक्ताध्यवसानस्य मुक्तिहेत्वध्यवसायनिवर्तकत्वे तत्कारणत्वस्य तद्व्यापकत्वस्य वा तन्त्रत्वात्; आह च न्यायवादी—

"तस्मात् तस्माद् न संबद्धः स्वभावो भावमेव वा। निवर्तयेत् कारणं वा कार्यमव्यभिचारतः ॥ १ ॥" इति।

न च तत्कारणत्वं तद्व्यापकत्वं वात्र संभवति, योगिनोऽपि यथोक्ताध्यवसानावश्यंभावे नरकप्राप्तिप्रसङ्गात्; अन्यथा तदविकलकारणत्वायोगात्। अपि च, नाधोगतिविषये मनोवीर्यपरिणतिवैषम्यदर्शनादूर्ध्वगतावपि तद्वैषम्यं कल्पयितुं शक्यम्, येनोत्कृष्टशुभमनोवीर्यपरिणतिविरह उत्कृष्टशुभमनोवीर्यपरिणतिविरहस्तासां स्यात्; यतो भुजपरिसर्पाः, पक्षिणः, चतुष्पदाः, उरगाश्चाधोगतावुत्कर्षतो यथाक्रमं द्वितीयाम्, तृतीयाम्, चतुर्थीम्, पञ्चमीं च पृथ्वीं गच्छन्ति; ऊर्ध्वं तु सहस्रारं यावदेवेति। स्यादेतत् तेषामूर्ध्वा-ऽधोगतिवैषम्यं भवस्वाभाव्यादेव, स्त्रीणां तु न तथा, नरभवे सप्तमनरकपृथिव्यामपि गमनसंभवात्; तस्मात् स्त्रीपर्यायस्यैवायं स्वभावः, यत इमाः सप्तमनरकपृथिव्यां न गच्छन्ति, इति मोक्षेऽपि ता न गच्छन्ति, इति कुतो नासां स्वभावः? इति। मैवम्, तथाकारणसंपत्त्य-ऽसंपत्तिभ्यामेव तथास्वाभाव्यनिर्वाहात्, स्त्रीणां सप्तमनरकगमनकारणासंपत्तौ तद्गमनास्वाभाव्येऽपि मुक्तिकारणसंपत्त्या तद्गमनस्वाभाव्याबाधात्। एतेन 'ऊर्ध्वगतिपरमोत्कर्ष एवाधोगतिपरमोत्कर्षव्याप्यः, प्रसन्नचन्द्रादौ तथादर्शनात्, तेनान्तरालिकवैषम्यदर्शनेऽपि न क्षतिः' इति निरस्तम्। किञ्च, स्त्रीणां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तमनरकपृथ्वीप्राप्तिनिबन्धनाध्यवसायाभावः कुतः प्रतिपन्नः ? । आप्तागमादिति चेत् । तदाऽशेषकर्मशैलवज्रभूतशुभाध्यवसायोऽपि तत एवाध्यवसीयताम् । न ह्यतीन्द्रिय एवंविधेऽर्थेऽस्मदादेरर्वाग्दृश आप्तागमादृतेऽन्यद् बलवत्तरं प्रमाणमस्ति । न च दृष्टे-ष्टाविरोध्याप्तवचनमसत्तर्कानुसारिजातिविकल्पैर्बाधामनुभवति, तेषां प्राप्ताऽ-प्राप्तत्वापादकमतङ्गजविकल्पवदवस्तुसंस्पर्शित्वात्; तदुक्तं भर्तृहरिणा—

"अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा । ये भावान्, वचनं तेषां नानुमानेन बाध्यते ॥ १ ॥" इति ।

न चाप्तवचनं स्त्रीनिर्वाणप्रतिपादकमप्रमाणम्, सप्तमनरकप्राप्तिप्रतिषेधकं च प्रमाणमिति वक्तुं शक्यम्, उभयत्राप्याप्तप्रणीतत्वादेः प्रामाण्यनिबन्धनस्याविशेषात् । न चैकमाप्तप्रणीतमेव न भवतीति वाच्यम्, इतरत्राप्यस्य सुवचत्वात्, पूर्वापरोपनिबद्धाशेषदृष्टा-ऽदृष्टप्रयोजनार्थप्रतिपादकावान्तरवाक्यसमूहात्मकैकमहावाक्यरूपतयार्हदागमस्यैकत्वात्, अवान्तरवाक्यविशेषाप्रामाण्ये सर्वस्याप्यागमस्याप्रामाण्यप्रसक्तेः । एतेन 'ज्ञानादिपरमप्रकर्षो न स्त्रीवृत्तिः, परमप्रकर्षवत्त्वात, सप्तमनरकपृथ्वीगमनापुण्यपरमप्रकर्षवत्' इत्यपि निरस्तम्, मोहनीयस्थिति-स्त्रीवेदपरमप्रकर्षेण च व्यभिचारात्; सप्तमनरकपृथ्वीगमनापुण्यजातीयपरमप्रकर्षत्वस्य हेत्वर्थत्वे च हेतोः पक्षावृत्तित्वात्; आत्मपरिणामत्वजात्या तज्जातीयविवक्षायां चोक्तदोषतादवस्थ्यात् । 'चारित्रप्रकर्षो न स्त्रीवृत्तिः, गुणप्रकर्षत्वात्, श्रुतज्ञानप्रकर्षवत्' इत्यत्रापि सम्यग्दर्शनप्रकर्षेण व्यभिचारः, ज्ञानप्रकर्षं विनापि चारित्रप्रकर्षस्य माष-तुषादौ सिद्धत्वेनाप्रयोजकत्वं चेति न किञ्चिदेतत् । एतेन च 'पुंस्त्वेनैव लघुना मुक्तिस्वरूपयोग्यता, न तु गुरुणाऽक्लीबत्वेन, इति न स्त्रीणां मुक्तिः' इति कल्पनाप्यपास्ता, भव्यत्वेनैव सिद्धौ स्वरूपयो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्यत्वात्, क्वचित् कदाचिदितरकारणविलम्बादेव कार्यविलम्बात् । यदि च पुंस्त्वस्यापि मनुष्यत्वादिवद् ज्ञानादिसंपादकतया परम्परया मोक्षाङ्गता कल्प्यते, तदा स्त्रीत्वेनापि पृथगेषा कल्पनीया, गुरुणाऽप्यक्लीबत्वेन वा; लाघवमात्रेणागमस्यापवदितुमशक्यत्वात्, परस्यापि स्त्री-क्लीबयोरुभयोः कारणाविघटकत्वकल्पने गौरवसाम्याच्च ।

न च पुरुषानभिवन्द्यत्वात् स्त्रीणां न मुक्तिरित्याभिधानीयम्; असिद्धेः, भगवज्जनन्यादीनां जगद्वन्द्यत्वश्रवणात्, आचार्यानभिवन्द्यत्वेन शिष्ये, साधुमात्रानभिन्द्यत्वेन शैक्षे वा व्यभिचारात्, पुरुषानभिवन्द्यत्वस्य मुक्तिप्राप्त्यप्रतिबन्धकत्वेनाप्रयोजकत्वाच्च । यदि च तदनभिवन्द्यत्वेन तदपेक्षयानुत्तमगुणत्वाद् न स्त्रीणां मुक्तिरितीष्यते, तदा तीर्थकृद्गुणापेक्षया गणधरादेरप्यनुत्तमत्वाद् मुक्तिप्राप्तिर्न भवेत् । अथाशेषकर्मक्षयनिबन्धनस्याध्यवसायस्य गणधरादिषु तीर्थकृदपेक्षया तुल्यत्वादयमदोषः, तदा समानमेतदार्यिकास्वपि । यदि च तीर्थस्य भगवदभिवन्द्यत्वात् प्रथमगणधरस्यापि तीर्थशब्दाभिधेयत्वेन तथात्वाद् न दोषः, तदा चातुर्वर्ण्यश्रमणसंघस्यापि तीर्थशब्दाभिधेयत्वादार्यिकाणामपि तत्रान्तर्भावात् तुल्यमेतत् । यत्तु 'धर्मे पुरुषोत्तमत्वविपर्ययशङ्कया स्त्रीणां चारित्रग्रहणं न युक्तम्' इति; तदसभ्यप्रलपितम्; आज्ञाशुद्धभावेन यथाशक्ति प्रवर्तमानानामार्यिकाणामीदृशशङ्कानुदयात्, तस्याः पापजन्यत्वात् । अत एव भगवतामनलङ्कृतविभूषितत्वादिविपर्ययधीप्रसङ्गादाभरणादिभिर्विभूषा न विधेया' इति हतं परेषां मतम्, तत्करणस्य शुभभावनिमित्ततया कर्मक्षयावन्ध्यकारणत्वात्, विपर्ययशङ्कायाश्च विना कल्मषमनुदयात् । यदि च ध्येयावस्थायां भगवता भूषणादेरनङ्गीकृतत्वाद् न तत्प्रतिकृतौ तद् विधेयम्, तदा समज्जना-ङ्गराग-पुष्पादिधारणस्यापि तदवस्थायां भगवताऽनाश्रितत्वाद् न तत् तत्र विधेयं स्यात् । अथ मेरुमस्तकादिषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदभिषेकादात्रिन्द्रादिभिस्तस्य विहितत्वादस्मदादिभिरपि कृतानुकरणादिभिर्हेतुभिस्तत् तत्र विधीयते, तर्हि तत एवाभरणादि-विभूषादिकमपि विधेयम्, कृतानुकरणादेः समानत्वात्। न ह्येतदत्र स्पर्धासाधनम्, किन्तु प्रवृत्तौ निर्मूलत्वशङ्कानिरासेन भावाभिवृद्धिनिबन्धनमिति दिक्।

अथाकल्याणभाजनत्वाद् न मुक्तियोग्याः स्त्रिय इति चेत्। न, तीर्थकरजननात्; न ह्यतः परं कल्याणमस्ति लोके। अथ हीनबलत्वादेव स्त्रीणां न मुक्तिरिति चेत्। न, रत्नत्रयसाम्राज्ये हीनबलत्वस्याप्रयोजकत्वात्; अन्यथा स्त्रीभ्योऽपि हीनबलाः पङ्ग्वादयः पुरुषा रत्नत्रयसाम्राज्येऽपि न मुच्येरन्। हीनबलानां विशिष्टचर्यारूपं चारित्रमेव न स्यादिति चेत्। न, यथाशक्त्याचरणरूपस्य सत्त्वसाध्यस्य तस्य तासामप्यविरोधात्। न हि दुर्धरब्रह्मचर्यधारिणीनामसदभियोगादौ तृणवत्प्राणपरित्यागं कुर्वाणानां सत्त्वं तासां नातिरिच्यत इति वक्तुं शक्यम्। न चानुपस्थाप्यतापाराञ्चितकानुपदेशेन तासु सत्त्वहीनता सिध्यति, सत्त्वापेक्षयैव शास्त्रे विशुद्धयनुपदेशात्, योग्यतापेक्षयैव तत्र तद्वैचित्र्योपदेशात्; उक्तं च—

"संवर-निर्जररूपो बहुप्रकारस्तपोविधिः शास्त्रे। योग-चिकित्साविधिरिव कस्यापि कथञ्चिदुपकारी ॥१॥" इति।

तदेवं संपूर्णयोग्यतामभिमेत्योक्तं यापनीयतन्त्रे— "[1]णो खलु इत्थी अजीवे, ण यावि अभव्वा, न यावि दंसणविरो-

---

१ नो खलु स्त्री अजीवः, न चाप्यभव्या, न चापि दर्शनविरोधिनी, नो अमानुष्या, नो अनार्योत्पत्तिः; नो असंख्यायुष्का, नो अतिक्रूरमतिः, नो नोपशान्तमोहा, नो न शुद्धाचारा, नो अशुद्धशरीरा, नो व्यवसायवर्जिता, नो अपूर्वकरणविरोधिनी, नो नवगुणस्थानरहिता, न अयोग्या लब्धेः, नो अकल्याणभाजनम्, इति कथं नोत्तमधर्मसाधिका ?।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हिणी, नो अमाणुस्सा, नो अणारिउप्पत्ती, नो असंखाउआ, नो अइकूरमई, नो न उवसंतमोहा, नो न सुद्धाचारा, नो असुद्धबोंदी, नो ववसायवज्जिआ, नो अपुव्वकरणविरोहिणी, नो नवगुणठाणरहिआ, नो अजोग्गा लद्धीए, नो अकल्लाभायणं ति कहं न उत्तमधम्मसाहगा ?" इति । एवं व्यवस्थितेऽनुमानमप्याहुः– मनुष्यस्त्रीजातिर्मुक्त्युपहितव्यक्तिमती, प्रव्रज्याधिकारिजातित्वात्, पुरुषजातिवत् । न च तासां प्रव्रज्याधिकारस्य पारम्पर्येणैव मोक्षहेतुतया निर्वाहादप्रयोजकत्वम्; न चैवमल्पायाससाध्ये तद्धेतुदेशविरत्यादावेव प्रवृत्तिः स्यात्, न तु बह्वायाससाध्यसर्वविरताविति वाच्यम्; देशविरत्यादिभूयोभवघटितपारम्पर्येण मोक्षहेतुत्वेऽपि चारित्रस्यैवाल्पभवघटितपारम्पर्येण मोक्षहेतुत्वात्, तादृशपारम्पर्येण मोक्षार्थितया तत्र प्रवृत्तेर्युक्तत्वात्; कथमन्यथा दुःषमाकालवर्तिनो मुमुक्षवस्तत्र प्रवर्तिष्यन्ते ? इति वाच्यम्, तासां चारित्रस्य पारम्पर्येणैव मोक्षहेतुत्वाश्रवणात्, साक्षात्कारणस्य चारित्रस्यासति प्रतिबन्धके तद्भव एव मुक्तिप्रापकत्वोपपत्तेः, स्त्रीत्वस्य प्रतिबन्धकत्वे मानाभावात्; अन्यथा तत्र साक्षाच्चारित्रार्थितयैव प्रवृत्त्यापत्तेरिति । एवं 'मनुष्यस्त्री काचिद् निर्वाति, अविकलतत्कारणत्वात्, पुरुषवत्' इत्यप्याहुः । तदेवं स्त्रीमुक्तिसिद्धेः सिद्धाः पञ्चदश सिद्धभेदाः । इति सिद्धमदः प्रासङ्गिकमिति सर्वमवदाततरम् ॥ ५४ ॥

एता वार्ता उपश्रुत्य भावयन्बुद्धिमान्नरः । इहोपन्यस्तशास्त्राणां भावार्थमधिगच्छति ॥५५॥
शतानि सप्त श्लोकानामनुष्टुप्छन्दसां कृतः । आचार्यहरिभद्रेण शास्त्रवार्तासमुच्चयः॥५६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृत्वा प्रकरणमेतद् यदवाप्तं किञ्चिदिह मया कुशलम् ।
भवविरहबीजमनघं लभतां भव्यो जनस्तेन ॥ ५७ ॥

यं बुद्धं बोधयन्तः शिखि-जल-मरुतस्तुष्टुवुर्लोकवृत्त्यै
ज्ञानं यत्रोदपादि प्रतिहतभुवनालोकबन्ध्यत्वहेतुः ।
सर्वप्राणिस्वभाषापरिणतिसुभगं कौशलं यस्य वाचां
तस्मिन् देवाधिदेवे भगवति भवता धीयतां भक्तिरागः ॥ ५८ ॥

॥ इति श्रीयाकिनीमहत्तरासूनुश्रीहरिभद्रसूरिविरचितं श्रीमदुपाध्यायकृतटीकासमेतं शास्त्रवार्तासमुच्चयप्रकरणं संपूर्णम् ॥

॥ समाप्तोऽयं ग्रन्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुद्रितग्रन्थानां सूचीपत्रम् ।

१ श्रीवीतरागस्तोत्रम्—श्रीमद्धेमचन्द्राचार्यकृतप्रभानन्दसूरिकृतविवरण—श्रीविशालराजशिष्यकृतावचूरि-
समेतम् । ०–८–०
२ श्रीश्रमणप्रतिक्रमणसूत्रवृत्तिः पूर्वाचार्यकृता । ०–१–६
३ श्रीस्याद्वादभाषा–श्रीमच्छुभविजयगणिकृता । ०–१–६
४ श्रीपाक्षिकसूत्रम्– अस्मिन् पाक्षिकसूत्रम्, क्षमापनाविषया श्रीयशोदेवसूरिकृतटीका च समावेशिताऽस्ति । ०–६–०
५ श्रीअध्यात्ममतपरीक्षा–न्यायाचार्यश्रीयशोविजयप्रणीतस्वोपज्ञटीकायुक्ता, अन्ते पृथग् मूलमपि प्रसेधितम् । ०–६–०
६ श्रीषोडशकप्रकरणम्– श्रीहरिभद्रसूरिकृतम्, श्रीमद्यशोभद्र–श्रीयशोविजयकृताभ्यां टीकाभ्यां सहितम् ।
मूलमात्रमपि प्रान्ते पृथग्भूतं प्रसेधित । ०–६–०
७ श्रीकल्पसूत्रवृत्तिः– श्रीविनयविजयोपाध्यायकृताम् । 'सुबोधिका' टीकासहिता । (संप्रति विक्रीता) ०–१२–०
८ श्रीवन्दारुवृत्त्यपरनाम्नी श्राद्धप्रतिक्रमणसूत्रवृत्तिः– श्रीमद्देवचन्द्रसूरिवररचिता । ०–८–०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

९ श्रीदानकल्पद्रुमः– परमगुरुश्रीसोमसुन्दरसूरिशिष्य-श्रीजिनकीर्त्तिसूरिकृतः । ०–६–०
१० योगफीलोशोफी– By, (अंग्रेजी) वीरचंद राघवजी गांधी । ०–५–०
११ श्रीजल्पकल्पलता– श्रीरत्नमण्डनकृता । ०–३–०
१२ श्रीयोगदृष्टिसमुच्चयः– श्रीहरिभद्रसूरीश्वरकृतः । ०–३–०
१३ कर्मफीलोसोफी– By, (अंग्रेजी) वीरचंद राघवजी गांधी । ०–५–०
१४ आनन्दकाव्यमहोदधिमौक्तिकस्य प्रथमो भागः (पृथक् पृथक् साधुकृतरासः) । ०–१०–०
१५ श्रीधर्मपरीक्षा– धर्मसागरोपाध्यायशिष्यपण्डितपद्मसागरगणिविनिर्मिता (औपदेशिककथाग्रन्थः) । ०–५–०
१६ श्रीशास्त्रवार्तासमुच्चयः– (प्रथमो विभागः) । २–०–०
१७ श्रीकर्मप्रकृतिः– श्रीशिवशर्मपादप्रणीता श्रीमलयगिरिवृत्तिसहिता । ०–१४–०

प्राप्तिस्थानम्–

लायब्रेरीयन शेठ देवचन्द लालभाई पुस्तकोद्धार फण्ड ओफीस ।

c/o शेठ देवचन्द लालभाई धर्मशाला ।

बडेखां चकलो "सुरत सिटी" ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ इति श्रीशास्त्रवार्तासमुच्चये प्रथमो विभागः समाप्तः ॥

इति श्रेष्ठिदेवचन्द्-लालभाई-जैनपुस्तकोद्धारे ग्रन्थाङ्कः १६ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org